पुस्तकालय से बाहर
इश्यू न की जावे।

पुस्तकालयाध्यक्ष

6640
1



R
740

Î

# KALHAṆA'S RÂJATARAṄGIṆÎ.

## VOL. I.

# KALHAṆA'S RÂJATARAṄGIṆÎ

OR

# CHRONICLE OF THE KINGS OF KASHMIR.

EDITED BY

STEIN, PH.D.,

COLLEGE, LAHORE.

REGISTERED UN

# KALHAṆA'S RÂJATARAÑGIṆÎ

OR

## CHRONICLE OF THE KINGS OF KASHMIR.

EDITED BY

M. A. STEIN, PH.D.,

PRINCIPAL, ORIENTAL COLLEGE, LAHORE.



VOL. I.

SANSKRIT TEXT WITH CRITICAL NOTES.



सोखण्डिताश्मप्राकारं प्रासादान्तर्व्यधत्त च ।
मार्तण्डस्याद्भुतं दाता द्राचास्फीतं च पत्तनम् ॥

*Râjataraṅgiṇî*, iv. 192.

PUBLISHED UNDER THE PATRONAGE OF THE KASHMIR STATE COUNCIL.

**BOMBAY:**

EDUCATION SOCIETY'S PRESS, BYCULLAH.

LEIPZIG: OTTO HARRASSOWITZ.

MDCCCXCII.

TO

HIS HIGHNESS

MAHARAJA PARTAB SINGH, G. C. S. I.,

MAHARAJA OF KASHMIR AND JAMMU,

THIS EDITION OF THE EARLIEST EXTANT NARRATIVE

OF THE HISTORY OF KASHMIR

IS RESPECTFULLY

DEDICATED

BY

M. A. STEIN.

भुजवनतरुच्छायां येषां निषेव्य महौजसां जलधिरशना मेदिन्यासीदसावकुतोभया।
स्मृतिमपि न ते यान्ति क्ष्मापा विना यदनुग्रहं प्रकृतिमहते कुर्मस्तस्मै नमः कविकर्मणे ॥

*Kalhaṇa's Rájataraṅgiṇí*, i. 46.

# PREFACE.

---

The plan of the present Edition of *Kalhaṇa's Râjataraṅgiṇî* first suggested itself to me in the summer of 1888 when a visit to Kashmir had directed my interest towards the antiquities and the history of the Valley.

The *Râjataraṅgiṇî* is our oldest written authority for the history of the various dynasties which ruled Kashmir from the earliest period down to the time of the author who began to write his Chronicle in the *Śaka* year 1070 (A. D. 1148). Although it has for this reason been the object of much attention and research on the part of Sanskritists, an elaborate statement is scarcely needed to justify the present enterprise to those who have had occasion to consult the *Râjataraṅgiṇî* in its published Editions for the purposes of historical or philological research.

When Professor Wilson published in 1825 the first account of Kalhaṇa's work and an abstract of its first six cantos, he had to rely for his text on three incomplete *Devanâgarî* MSS. which were so deficient that "a close translation, even if desirable, would have been impracticable."* The *editio princeps*, which appeared ten years later at Calcutta under the auspices of the Bengal Asiatic Society,† was based principally, as Mr. Troyer states, on a Devanâgarî transcript from a Kashmirian MS. which had been prepared for Mr. Moorcroft during that traveller's stay at Śrînagar in 1823. The fact that this copy, as we now can prove, was prepared from the *codex* which must be considered as the *archetypus* of all existing Kashmirian MSS., reflects no little credit on the care and judgment with which that energetic but ill-fated traveller endeavoured to serve on this occasion the cause of Sanskrit philology. But the numerous corruptions which have rendered the text of the Calcutta Edition unintelligible in many passages, and which can be shewn to have originated mostly from mistakes in the transcription, prove that this copy shared all the defects which are inherent to Devanâgarî transcripts made in Kashmir from *Śâradâ* MSS. Frequently, too, the difficulties which the Calcutta Paṇḍits evidently encountered in interpreting the text in consequence of their want of familiarity with the details of Kashmir topography and traditions, seem to have induced them to alter the text in an unscrupulous manner.

Mr. Troyer's edition, which, together with a translation, was published by the *Société Asiatique* at Paris in 1840, was avowedly prepared from the same materials as the editio princeps,‡ and has not been carried beyond the first six cantos. Besides correcting numerous misprints of the Calcutta Edition, Mr. Troyer's text shews an improvement by taking more carefully into account, in a certain number of passages, the readings of Mr. Moorcroft's

---

* "*Essay on the Hindu History of Cashmir*," Asiatic Researches, Vol. XV., p. 5.

† Published in 1835, together with the *Râjataraṅgiṇîs* of *Jonarâja* and *Śrîvara* and the *Râjâvalipatâkâ* of *Prâjyabhaṭṭa* which bring down the narrative to the time of Akbar, under the title: "*The Râjataraṅgiṇî; a History of Cashmir.*"

‡ The two Colebrooke MSS., which Mr. Troyer consulted at the East India House (see *Preface*, p. v.), are described by him as very inferior to Mr. Moorcroft's copy, and are apparently identical with those which Professor Wilson had at his disposal.

copy. Of Mr. Troyer's translation of the Râjataraṅgiṇî which was completed in 1852, it may, perhaps, be said without injustice that it has proved useful chiefly by bringing conspicuously before the eyes of Sanskritists the great defects of the text upon which it was based, and the insufficiency of the materials then available to European scholars for the interpretation of the work.

These defects did not escape the notice of scholars like Professor Lassen and General Cunningham who endeavoured to use Kalhaṇa's work for the purposes of historical and chronological research ; no effort, however, seems to have been made to obtain better materials till Professor Bühler's tour in search for Sanskrit MSS. in Kashmir in 1875. Amongst the many results which rewarded Professor Bühler's brilliant researches in Kashmir, not the least important was that he established the absolute superiority of the Kashmir MSS. of the Râjataraṅgiṇî, written in the Śâradâ character, over those in Devanâgarî. The acquaintance gained with the genuine text of the Râjataraṅgiṇî by the collation of a good, though modern, Śâradâ copy, and the discovery of valuable fresh material for its explanation in other Kashmirian works like the *Nîlamatapurâṇa*, and the various *Mâhâtmyas*, enabled Professor Bühler to trace out with admirable lucidity the work yet to be done for the Râjataraṅgiṇî.* Professor Bühler had clearly recognized the fact that all Śâradâ MSS. known to exist at present in Kashmir are derived from a single Manuscript called by him the *codex archetypus*. But he had not been able to obtain more than a glimpse of this ancient MS. from the owner, *Paṇḍit Keśavarâm*, in whose family it had come down as an heirloom.

It had been my chief aim since my first visit to Kashmir to utilize the opportunities offered by a prolonged stay in the Valley for the acquisition of such materials as might enable me to undertake the task of preparing a critical Edition of the Râjataraṅgiṇî, and to contribute towards the interpretation of the work. As regards the text of the Râjataraṅgiṇî I had to content myself in 1888 with obtaining for collation a Śâradâ paper MS. in possession of *Paṇḍit Râzdân Balabhadra*, copied in the first quarter of this century, which had already served Professor Bühler for the same purpose, and another MS., copied about the same time from the codex archetypus and now the property of *Paṇḍit Govind Kaul*. The careful collation of the abovenamed two MSS., which was completed in the Cold Season of 1888-89, revealed, in numerous passages, considerable discrepancies between them, notwithstanding their evidently common origin. This convinced me still more of the necessity of securing the *codex archetypus* itself for the purpose of my Edition.

On Paṇḍit Keśavarâm's death which took place after Professor Bühler's visit, the *codex archetypus* had been divided among three of the Paṇḍit's heirs, and this circumstance had made access to the MS. still more difficult than in 1875. It was, therefore, not till I had made repeated endeavours during my second visit to Śrînagar in 1889 that the whole of the MS. was entrusted to me by the owners for the purposes of the present Edition. My success was chiefly due to the kind interest shewn in the matter by *Paṇḍit Sûraj Kaul*, C.I.E., Member of the Kashmir State Council, and his son *Paṇḍit Hari Krishṇa Kaul*, M.A., then my pupil, and now a promising young officer in the Statutory Civil Service of the Punjab. Their timely aid has made it possible to secure the contents of this venerable codex against the

* *Detailed Report on a Tour in search of Sanskrit MSS. in Kashmir* ( Extra Number of the Journal of the Bombay Branch of the Royal Asiatic Society, 1877), p. 52 *seqq.*

risks to which its worn and decaying leaves have so long been exposed. Both gentlemen have thus well deserved the thanks of all interested in the ancient history of Kashmir.

The *codex archetypus* contains all the eight cantos of Kalhaṇa's poem, and consisted originally of 328 folia of age-worn country paper. One leaf in the middle (fol. 167) and unfortunately also the leaf at the end (fol. 328) have been lost, probably when the above-mentioned partition between P. Keśavarâm's heirs was made. The leaves, which vary in their dimensions, measure on the average about 9½″ by 6½″; they are written, as is the case in most Kashmir MSS., whether of birch-bark or paper, in lines running parallel to the narrower side. The number of lines to the page varies from 15 to 20. The leaves, of which two always form one sheet, are placed in forms or "*saṁchayas*" of different thickness, containing from 2 to 6 sheets. These forms are found in the first half of the work, up to fol. 166, bound up after the fashion of European books. The second part appears never to have been bound, and most of the sheets are now cut up into loose leaves.

No date is given in the colophons attached to the end of the several *taraṅgas;* but fortunately the writer of the codex, *Paṇḍit Râjânaka Ratnakaṇṭha,* has recorded his name in the colophons of *taraṅgas* iii., vi. and vii.,* and from this entry the age of the MS. can be ascertained with a fair degree of precision. A birch-bark MS. of the *Kâvyaprakâśa-saṁketa,* written by the same Râjânaka Ratnakaṇṭha, is dated Śaka 1570, corresponding to A. D. 1648.† Other MSS. from his hand, which I purchased in Kashmir, shew later dates : a MS. of *Râyamukuṭa's* Commentary on the *Amarakośa*‡ and a MS. of *Trilochanadâsa's Kâtantrapañchikâ*§ were written by Râjânaka Ratnakaṇṭha in Śaka 1577 (A. D. 1655) and Śaka 1595 (A. D. 1673), respectively. Râjânaka Ratnakaṇṭha has, however, taken care to let us know about his person and time not only in the MSS. he copied, but also in such works as he composed. In a commentary to the *Haravijayakâvya,* named the *Laghupañchikâ,* of which a copy written by his own hand and extending to the end of the It Sarga is now in my possession, he calls himself the son of *Râjânaka Śaṁkarakaṇṭha,* of the *Dhâumyâyana gotra,* and states the year of composition as Śaka 1603 (A. D. 1681).¶

The details here given enable us to identify our Râjânaka Ratnakaṇṭha with the author of the well-known commentary on *Jagaddhara's Kusumâñjali,* called likewise *Laghupañchikâ,* which has been printed in the *Kâvyamâlâ,* and of the commentary, called *Śishyahitâ,* on the *Yudhishṭhiravijayakâvya* which has been noticed in Professor Bühler's

---

* See colophon of *taraṅgas* iii. and vii. : लिखितश्चैष मया राजानकरत्नकण्ठेन; and colophon of *taraṅga* vi.: लिखितश्चैष राजानकरत्नकण्ठेन.

† The MS. was then in possession of Paṇḍit *Dâmodar,* Head Paṇḍit of H. H. the Mahârâja's School, Śrînagar. The colophon of the It *ullâsa* runs: काव्यप्रकाशसंकेतो ग्रन्थकारकृतो मया । अलेखि रत्नकण्ठेन शाके खागाहरुम्भिते (१५७०).

‡ See colophon of *kâṇḍa* ii. : लिखितश्चैष मया राजानकरत्नकण्ठेन सं ३१ (*i. e., Laukika Saṁvat* 4731) शाकः १५७७ भ्रति ९ कष्ठवाटविषये (*Kishtvâr*) लिखितोयं ग्रन्थः.

§ See colophon to *Nâmaprakaraṇa,* Pada ii.: लिखितश्चैष मया राजानकरत्नकण्ठेन सं ४९ (*Laukika Saṁvat* 4749) शाके १५९५.

¶ See the introduction to the *Laghupañchikâ:* त्रिनभोष्टि १६०३ मिते शाके धौम्यायनकुलोद्भवः । कश्मीरदेशवास्तव्यो रत्नकण्ठाभिधः सुधीः ॥ विपश्चिन्मण्डलीरत्नरत्नाकरमहाकवेः । गभीरविततें काव्ये करोति लघुपञ्चिकाम् ॥; and the colophon at the end of the first *sarga:* इति ···श्रीमहाकवे राजानकरत्नाकरस्य कृतौ हरविजयाख्ये महाकाव्ये श्रीशारदाचरणरजःपवित्रस्थलवास्तव्यराजानकश्रीशंकरकण्ठात्मजराजानकरत्नकण्ठकृतायां लघुपञ्चिकायां ···प्रथमः सर्गः । लिखितश्चैष मया राजानकरत्नकण्ठेन सं ५७ शाके १६०३.

Kashmir Report.* In the introduction to the first named commentary† which was composed in Śaka 1602 (A. D. 1680), the same statements are made regarding the author's descent and residence as those given in the above note from the commentary to the *Haravijayakâvya*. The commentary to the *Yudhishṭhiravijayakâvya*, as will be seen from the extracts given below,‡ can also be ascribed with certainty to our Râjânaka Ratnakaṇṭha. He wrote this work Śaka 1593 (A. D. 1671), "when Aurangzeb (*Avarañgaśâhi*) ruled the Earth." The dates recorded above of works composed or MSS. written by Râjânaka Ratnakaṇṭha, range from A. D. 1648 to A. D. 1681, and we are, therefore, justified in assuming that the codex of the Râjataraṅgiṇî was also written by him some time about this period.

From the evidence of the numerous MSS. by his hand which are still extant in Kashmir and which are on account of the marked peculiarity of the writing well known to the Paṇḍits, it appears that Râjânaka Ratnakaṇṭha, although an accurate copyist, must have been a very fast writer. He evidently copied MSS. chiefly for his own use and took little care about the legibility of his copies. His hand-writing with its cursive and peculiar characters, therefore, presents unusual difficulties even to the practised reader of Śâradâ MSS. A reference to the facsimile of two pages from Râjânaka Ratnakaṇṭha's codex, prefixed to this Edition, will fully illustrate this remark. Taking into account the difficulties which even intelligent copyists must have frequently encountered in making out this puzzling hand-writing in passages where the meaning was obscured by the unfamiliar character of the subject or the redundant rhetoric of Kalhaṇa's style, we need not be astonished at the large number of corruptions and blunders evidently committed by the scribes who prepared Mr. Moorcroft's Devanâgarî copy, which also occur, though to a smaller extent, in all Śâradâ transcripts of the *archetypus* I have examined.

The deficient form of the text presented by the previous editions must thus, to a considerable extent, be attributed to the peculiar hand-writing of Râjânaka Ratnakaṇṭha. But for this we are more than compensated by the fact that the writer of this codex was not a mere copyist, but a scholar of considerable attainments who, we have every reason to believe, has copied his original MS. with great care and accuracy. The text of Râjânaka Ratnakaṇṭha in the first six cantos and in the greater portion of the seventh is remarkably free from corruptions and mistakes. And a closer examination of the MS. itself proves that its immunity from defects of this kind is not the result of unscrupulous restoring on the part of its learned writer as might otherwise be suspected.§ Râjânaka Ratnakaṇṭha has indicated

---

* My attention was first called to these two works by the entries in Professor Aufrecht's excellent *Catalogus Catalogorum*, s. v. रत्नकण्ठः.

† See introductory verses to the *Stutikusumâñjaliṭîkâ* in *Kâvyamâlâ* Edition, p. 1.

‡ See Introduction to the *Yudhishṭhiravijayakâvyaṭîkâ*, in Dr. Râjendralâla Mitra's "*Notices of Sanskṛit MSS.*," No. 2441: रामाङ्केषु शशाङ्कैः १५९३ प्रमिते वर्षे शकेन्द्राणां। अवरङ्गःशाहिभूपे शासति सति मेदिनीचक्रं ॥ धर्मात्मजविजयाख्ये सुगभीरे निबन्धेऽस्मिन्। टीका शिष्यहितैषा विधीयते रत्नकण्ठेन ॥. In a MS. of the *Yudhishṭhiravijayakâvya* which I inspected in the Library once belonging to *Paṇḍit Râdhâkṛishṇa* of Lahore, the *ṭîkâ* of Râjânaka Ratnakaṇṭha closes as follows— सर्वज्ञः सविभूतिः सर्वचर्यः सर्वमङ्गलोपेतः। तस्याजनि तनुजन्मा शंकर इति भूतले ख्यातः ॥ अस्ति सद्गुरुकृपारसपात्रं रत्नकण्ठ इति तस्य तनूजः। भास्करस्तुतिरहस्यसमेतं येन रत्नशतकं निरमायि ॥ गङ्गाधरस्य पाठार्थं स्वशिष्यस्योपयोगिनी। टीकैषा लिखिता तेन सज्जनानन्ददायिनी ॥. The *Ratnaśataka*, which Ratnakaṇṭha in the above colophon claims to have written, is still known in Kashmir, and is a composition showing considerable skill; the MS. I possess of it, has lost the last leaf and does not, therefore, furnish any *data* regarding the author.

§ Compare the remarks made by Professor Bühler on the notions still recently prevailing on this subject among Kashmirian Paṇḍits, *Kashmir Report*, p. 33.

refully in the above-named portion of the text, by dots and by leaving empty spaces, the cunae which he must have found in his original. They vary in extent from one *akshara* several verses, and can all easily be explained by the peeling or breaking off of the birch-ark leaves on which the original MS. of Râjânaka Ratnakantha was, in all probability, ritten. These *lacunae* are now filled up by a later hand, evidently from collation of nother MS. independent of Ratnakantha's original. The fact that Ratnakantha had allowed e *lacunae* to remain in his copy even where, from the nature of the context, it would have en easy to supplement the missing letters, is sufficient to set at rest any doubts as to the anner in which he has reproduced the text of his original.

Unfortunately, the text Ratnakantha copied, must have been in a far less satisfactory ndition in the remaining part of the work, which comprises roughly the last third of nto vii. and the whole of canto viii. Not only do we meet here much more frequently with *cunae*, now rarely supplemented by the later hand previously mentioned, but misspellings r wrong forms, and undoubtedly corrupt passages are found here in increasing numbers, s we proceed towards the conclusion of the work. As we have no MS. older than Rajâ-naka Ratnakantha's codex to refer to, it would be unsafe to make any assertions regarding this difference in the preservation of the several cantos. But it may be useful to point out that the diminished interest with which the last portions of the poem seem to have been read and which probably caused them to be copied less frequently, the greater obscurity of Kalhaṇa's relation where it deals with events of contemporary history, and the greater risk of injury to which the leaves at the end of birch-bark volumes have always been exposed, are all circumstances which could well account for the deficiencies of the text in this part.

The MS. from which Ratnakantha copied his text, and which for the sake of convenience may here be marked as O, appears to have been an old one. The numerous lacunae, which Ratnakantha was obliged to leave in his text, were, as stated above, in all probability due to portions of the birch-bark having peeled off in O. But a more conclusive proof is furnished by the following observation. Among the numerous various readings which, as will be shewn below, have been recorded in the *codex archetypus* (to be designated thereafter as A) there are only five in Ratnakantha's own handwriting (marked $A_1$ in the Edition); they are found Râjatar. iii. 122; viii. 777; viii. 794; viii. 3139 and viii. 1084. In the first four cases it is evident from the nature of the *variae lectiones*, that they are due only to the indistinctness with which the respective Śâradâ letters and ligatures had been written in Ratnakantha's original, and which had induced him to record in each case the two possible readings. In the fifth case, however, Râjatar. viii. 1084, where $A_1$ has given the name of one of King Sussala's companions in arms as तेजो in the text and as ओजो in the margin, this explanation holds good only if we assume that the original MS. was written in an older form of Śâradâ writing than we meet with in any existing MSS.; in the latter the *aksharas* ते and ओ are quite different and not to be mistaken for each other. In that older form of Śâradâ writing, however, which is known to me only from inscriptions,* the vowel *e* is designated by a short vertical stroke before the consonant, not by a horizontal stroke above, and there ते and ओ shew almost identical forms. This explanation would

* The latest among the Śâradâ inscriptions known to me which show the form of the vowel sign *e* described above, and which can be dated, belongs to the time of king *Râjadeva* (A. D. 1213-1236). It was found by me, in 1889 at *Bijabrôr* (the ancient *Vijayeśvara*), in possession of *Lakshman Bhôyû*, a Purohita of that place.

also account for the wrong form ओजो written by $A_1$ in viii. 2695 instead of तेजो.* It would, of course, be possible to argue that Ratnakaṇṭha found the above *variae lectiones* already in O or copied them from another MS. But certain features of the codex archetypus, to be noticed thereafter, render both these suppositions improbable.

Through the whole of Ratnakaṇṭha's MS., but especially in taraṅgas i.—vi. and in the first half of the seventh, we find very numerous glosses, various readings and corrections marked by different hands which add, in no small degree, to the critical value of the codex. Leaving aside certain explanatory notes written in the margin by hands which are not met with elsewhere (i. 56; iv. 103), the bulk of these later additions and corrections in Ratnakaṇṭha's codex can be traced back to four different hands. Two of these designated in the Edition $A_2$ and $A_3$, respectively, are of particular importance for the criticism of the text.

To $A_2$ we owe, apart from a series of important corrections and various readings in the text, a considerable number of valuable glosses which have proved most useful in ascertaining the details of the historical topography of Kashmir and which also throw a welcome light on many other obscure points in Kalhaṇa's narrative. There is good reason to assume that $A_2$ is the oldest among the annotators of the codex archetypus and probably a contemporary of Râjânaka Ratnakaṇṭha himself. A gloss on the word नीवि, v. 145, which Ratnakaṇṭha had left unfinished in the middle of a word, has been completed by $A_2$. The conclusion to be drawn from this circumstance is made more certain by a reference to the readings recorded in iv. 503, which prove that $A_2$ must have made its revision of the codex before the other old annotator marked $A_3$. Here $A_1$ had written originally अकुर्वन्विगुणामाज्ञां; this had been corrected into आंकुर्वन्वि° by $A_2$ who explained his own reading by a marginal gloss. $A_3$ who restores the original reading of $A_1$ and explains it by an interlinear note, must necessarily have had the correction of $A_2$ before his eyes. The same relation exists between the readings of $A_1$ and the two annotators in iv. 688. The faded appearance which the writing of $A_2$ shews in many places, tallies with the above conclusion as to the priority of this annotator.

Although $A_2$ refers in several notes expressly to separate MS. authority† it still appears to me very doubtful whether $A_2$ had actually used for his revision any MS. apart from Ratnakaṇṭha's original. The numerous lacunae throughout the whole work, which Ratnakaṇṭha had indicated by dots or empty spaces, have either been filled in by $A_3$ ( not by $A_2$ ) or have remained as before. It seems scarcely possible that $A_2$, who had bestowed so much trouble on the correction of the text of the codex and on the explanation of its contents, should have been unable to supplement any of Ratnakaṇṭha's lacunae in taraṅgas i.—vii. if he could have referred to another independent MS. We are thus led to assume, as the easiest explanation, that the above quoted references to another MS., as well as the corrections made by $A_2$ in the text, resulted from a careful collation of Ratnakaṇṭha's copy with its original O. While Ratnakaṇṭha was copying the text of O $A_2$ appears to have revised what the former had written, and to have added from the original the marginal notes and various readings which Ratnakaṇṭha had omitted to copy.‡ No direct evidence is available

* Compare the note to viii. 2695 in the Edition.

† See i. 287 इत्यपि पाठः; ii. 103 इत्यन्यादर्शे; iv. 501 इत्यपि पाठो रम्यः.

‡ Notes by the hand of Ratnakaṇṭha are found only in very few places (see iii. 180, 198, 226, 276; iv. 18; viii. 2628); they refer exclusively to points of grammar and construction, and their peculiar wording shews that they are Ratnakaṇṭha's own memoranda jotted down in the course of copying, not notes reproduced from O.

regarding the origin of the glosses and explanatory notes written by $A_2$. But if we take into account that many of the glosses contain information on Kashmir antiquities which it would have been very difficult for any Paṇḍit of the 17th century to obtain directly,* we shall be inclined to look to O as the probable source of these notes and glosses.

Reference has already been made to the annotator $A_3$ who has filled up most of the lacunae, which $A_1$ had left in the text of cantos i.—vii., and who has, besides, recorded in the codex a considerable number of various readings and explanatory notes. In several instances his hand has also supplied words and whole verses which $A_1$ had omitted without indicating a lacuna. A careful examination of the text thus supplied by $A_3$ in lacunae and elsewhere will shew that the additions of $A_3$ are derived from a genuine recension of Kalhaṇa's text, and cannot be due to conjecture. To exclude the latter assumption it is sufficient to point to passages like iii. 332; v. 153; vii. 125, 299, where the matter supplemented by $A_3$ contains historical data which were certainly beyond the reach of any modern emendator. We are thus fully justified in assuming that $A_3$ has used, for the purpose of revising Ratnakaṇṭha's text, a manuscript which was independent of O. To this MS. we must also trace back the very numerous *variae lectiones* which $A_3$ has indicated either by writing them in the margin or by correcting the text of $A_1$.

Besides the various readings we find in several notes written by $A_3$ particular reference made to the readings of another MS.† It is probable that in these instances $A_3$ had found the various readings marked as such in the MS. which he collated. The numerous notes written by $A_3$ between the lines or in the margin of Ratnakaṇṭha's text, are frequently very useful for the interpretation of the Râjataraṅgiṇî, and appear, for reasons similar to those adduced above regarding the glosses of $A_2$, to have been obtained from an older source. Whereas the glosses of $A_2$ deal pre-eminently with topographical and historical points, those of $A_3$ relate more to the general explanation of the text. I have not been able to obtain any information as to the existence of the MS. which $A_3$ collated, or to discover any traces of its use in other Kashmirian copies, and I am afraid, it must, therefore, be considered as lost. Under these circumstances it is difficult to form a definite opinion as to the relative value of the text recension which this MS. represented, especially as we cannot test the accuracy and extent of the collation made by $A_3$. Readings of $A_3$, which set right evident defects of Ratnakaṇṭha's text, are frequent enough, but on the other hand, in numerous cases, they appear to be *lectiores leviores* of no consequence.

We derive much less help for the reconstruction of the text of the Râjataraṅgiṇî from the annotations and additions of $A_3$ in the last two cantos than in the preceding part of the work. The corrections and various readings of $A_3$ are not as numerous in the seventh taraṅga, as before, and become of distinctly rare occurrence in the eighth. On the other hand, lacunae of $A_1$ which $A_3$ has omitted to fill in, make their first appearance in the seventh canto and increase in an aggravating fashion towards the end of the work.

Why the revision of $A_3$ should have been so much less thorough in this part of the text than in the preceding one, cannot in the absence of the original MS. from which $A_3$ obtained its corrections, be stated with certainty. As we meet with occasional supplements by $A_3$ as

---

* Compare, *e. g.*, the glosses of $A_2$ on topographical points : i. 96, 168, 302 ; v. 39, 144 ; on details of the ancient Hindu administration : iv. 691 ; v. 389 ; on obsolete customs : iv. 710.

† See iv. 498, 646 ; vii. 248, 264 इत्यन्यादर्शे ; v. 478 इत्यादर्शान्तरे पाठः.

far down as viii. 3153, it cannot be assumed that in the original of $A_3$ the eighth canto was entirely missing.

Besides the two old annotators $A_2$ and $A_3$ who on account of the materials they used, possess independent critical value, we find in the codex archetypus additions from two other hands which cannot claim such importance. $A_4$ who writes in a small and modern hand (see the note at the foot of fol. 103 *reverse*, reproduced in the facsimile) has added a number of notes and glosses which assist us but little in the interpretation. Glosses like the one to v. 150, in which *Ṭakkadeśa*,* the country neighbouring on *Gûrjara* (*Gujrât* in the Punjab) is identified with *Skardo*, or Little Thibet, cannot inspire with confidence in the judgment of the glossator or the reliability of his information. There is nothing to show that $A_4$ copied any of his glosses from an older MS., nor have any of them been reproduced in the Śâradâ MS. R described below which was copied from the archetypus in Laukika Saṁvat 99, *i. e.*, A. D. 1823. As this MS. gives all the other notes and glosses to be found in A we may safely conclude that the additions of $A_4$ have been made subsequent to that date, probably by some member of Paṇḍit Kesávarâm's family.

Another modern hand, marked $A_5$ in the Edition, has re-written certain portions of the last seven folia of the codex archetypus which had become difficult to read on account of the worn state of the original leaves. As these supplements of $A_5$ show in several instances mistakes which are not found in the Śâradâ transcripts described below, it is evident that they are of a very recent date.

A diligent search has been made on my behalf by my Kashmirian friends since 1888 with a view of discovering if possible an old MS. of the Râjataraṅgiṇî which might prove independent of A; but these endeavours have produced no better result than Professor Bühler's efforts in 1875. The remaining critical materials referred to in the present Edition require, therefore, but a short notice.

All Kashmir MSS. of the Râjataraṅgiṇî which I have seen or of which I have been able to obtain information, are known to be recent transcripts from Ratnakaṇṭha's codex prepared either directly or with the help of another copy.

Among these copies the two MSS. mentioned above as belonging to *Paṇḍit Râzdân Balabhadra* and *Paṇḍit Govind Kaul* of Śrînagar, may be considered the earliest as well as the most reliable; and accordingly only these two MSS. have been consulted wherever a reference to later copies was necessary on account of the present defective state of the archetypus.

The MS. of Paṇḍit Râzdân Balabhadra, marked R in the Edition, forms a Volume of 353 folia, carefully written on modern paper. The colophon† states that it was written by one *Bhaṭṭa Govardhana*, of the *Yaksha* family, in the Laukika year 99, the figures for the century being omitted as usual in dates of that Era. Sons of a copyist of this name are still living in Śrînagar, and as the paper and writing is certainly not more than a 100 years old, there can be no doubt that the year meant is Laukika Saṁvat 4899 or A. D. 1823. *Bhaṭṭa Govardhana's* copy is well written but by no means free from misreadings and blunders. In copying the scribe has followed indifferently either the text of Ratnakaṇṭha or the various

* See Cunningham, *Ancient Geography*, p. 149; *Siyuki* (transl. by Beal) i. 165 *seqq.*

† लिखिता चैषा मया यक्षजात्यन्वितभट्टगोवर्धनाभिधेन द्विजातिना काष्ठूलवासिना ताशावनविषये (*Kâthul* and *Tâshâvan* are names of parts of Śrînagar) । संवत् ९९ का वति ८ परे ९ एषा समाप्तिमगमत् ॥

readings of $A_2$ and . This has been the case also in the other copies made from A, and hence the frequent d repancies between these transcripts to which allusion has already been made. *Bhaṭṭa G. ardhana* has copied also the glosses and notes of $A_2$ and $A_3$. A later hand has revised the MS. from A correcting mistakes and adding in many places the variae lectiones indicated in A. The lacunae of the last two cantos have been filled in by a different hand in accordance with the emendations of the Calcutta Edition.

The other MS. copied from the archetypus and now in possession of Paṇḍit Govind Kaul (marked G) closely resembles in its appearance the copy R. The name of the copyist is not given nor the date when it was written. But the similarity of the writing makes it probable that it was copied by the same scribe early in the present century. None of the glosses and notes found in the archety s are copied in G; but in many instances the various readings of $A_2$ or $A_3$ have been followed by the scribe or marked by him in the margin. The MS. has been revised by several later hands which have entered other variae lectiones from A and have marked besides numerous corrections in cantos vii. and viii. Most of the corrections are taken from the Calcutta Edition; others are of different origin and of greater value for conjectural criticism. Many of the happiest emendations marked *secundâ manu* in G are from the hand of the present owner of the MS., Paṇḍit Govind Kaul, to whose learning and critical acumen they amply testify.

We know from Mr. Troyer's statement* that the editio princeps of the Râjataraṅgiṇî was printed with the help of a copy which Mr. Moorcroft had forwarded from Kashmir to the Asiatic Society of Bengal. Professor Bühler has already pointed out that according to the tradition of the Kashmir Paṇḍits Mr. Moorcroft's copy was transcribed from the codex archetypus. This tradition is fully confirmed by the versified colophon found at the end of the Calcutta Edition after the *Râjataraṅgiṇîsaṃgraha*.†

Here we read that "*Śrîmurkarâphaka Sâhibha*" obtained the Annals of the Kings of Kashmir includin Kalhaṇa's Râjataraṅgiṇî, from the learned *Śivarâma* who is praised for having preserved in his house the only copy of the work in Kashmir. Paṇḍit Śivarâma, commonly called *Śivopadhyâya*, was the grandfather of Paṇḍit Keśavarâma in whose possession our codex archetypus was found by Professor Bühler.

I have not had an opportunity of inspecting Mr. Moorcroft's copy, but an examination of the Calcutta Edition shows clearly that most of the corruptions in the first six cantos are caused by faulty transcriptions of the Śâradâ characters in A, for which Ratnakaṇṭha's peculiar handwriting must be held largely responsible.

Other deviations from A are due to corrections which the editors have wrongly introduced in their text. This has been frequently the case in passages in which Kalhaṇa

---

* Troyer, Râjataraṅgiṇî, Tom. I., iv.

† श्रीमत्कोम्पानिभूपस्य प्रियः श्रीमुर्कराफकः। साहिभनामा मन्त्री यो जीयात्संवत्सरं शतम् ॥ श्रीमुर्कराफको मन्त्री प्रापत्कश्मीरमण्डले। राज्ये श्रीरणजित्सिंहभूपतेः प्रियदर्शनः॥ श्रीमन्त्रिकेश्वरप्रेम्णा प्राप्ता राजतरङ्गिणी। मुर्कराफकधीरेण गृहाच्छ्रीशिवस्वामिनः॥ श्रीमच्छ्रीशिवरामस्य गृहे राजावली शुभा। कश्मीरमण्डले नित्यं वर्तते नान्यसद्मनि ॥ श्रीमद्विबुधेन्द्रशिवोपाध्यायाय नमो नमः ॥ येनोपाध्यायेन पञ्चसहस्रवर्षाणां महाप्रभावसहिता राजावली स्वगृहे पालिता प्रयत्नेन श्रीविभोर्दयया चेति भद्रम् ॥ वर्तते च गृहे यस्य शुभा राजतरङ्गिणी। स जीवन्मुक्त एव स्यान्मृतः स्वर्गमवाप्नुयात् ॥ संवत् १८८० ॥. For श्रीमन्त्रिकेश्वर° above read श्रीमच्चिकेश्वर°; Mr. Moorcroft obtained his copy through the intercession of some member of the *Trika* family to which *Śivarâma* and his descendants to the present day have been attached as hereditary "*gurus*" and which has held for several generations past an influential position in Kashmir.

refers to details of Kashmir topography and similar topics, which the Calcutta Paṇḍits naturally found it difficult to explain.*

For such corrections the last two cantos with their frequently defective text afforded a large scope. The editors have invariably filled up the lacunae of A even where they extended to several *pâdas*, and have frequently altered the text near such lacunae in an unscrupulous manner so as to suit the supposed context. No critical value can, therefore, be attached to the readings of the editio princeps apart from that which they may claim as conjectural emendations.

It now remains for me to indicate shortly the lines which I have followed in preparing the text of the present Edition from the materials furnished by the codex archetypus. I have endeavoured to show above that besides the text which Ratnakaṇṭha copied from some now lost codex, only the readings of one other independent MS. (similarly lost) have been preserved for us in the corrections and additions of $A_3$. Under these circumstances Ratnakaṇṭha's copy, as revised by $A_2$ from the same original, was the only possible basis of the present Edition. From this I have departed in favor of $A_3$ only where the readings of the latter hand appeared to me distinctly preferable and to represent a closer approach to Kalhaṇa's original. In every such case the text of $A_1$ has been carefully indicated in the footnotes. This has also been done in every instance where the text of $A_1$ had been corrected by $A_2$. Whenever the readings of $A_1$ appeared to me superior or equal to the variations of $A_3$, and accordingly were retained in the text, the readings of $A_3$ have been recorded in the notes. All words or letters which $A_3$ has supplied either where $A_1$ had marked a lacuna, or elsewhere, have been distinctly noted. Wherever the relative value of the readings cannot be settled by reference to grammar or dictionary, I must reserve a statement of the reasons which guided me in the selection, for the exegetical notes of the second Volume. I am aware that in such cases I may have frequently erred; but I trust that the care which has been taken to record in all cases both the readings of $A_1$ and of the later annotators, will render such errors of less consequence.

I have naturally felt much more serious doubts and apprehensions in dealing with passages where the text actually found in A left me only the choice of accepting readings which were undoubtedly corrupt, or of deviating from the authority of our only MS. Attention has already been called to the fact that blunders of copying and evident corruptions which are of very rare occurrence in the first six cantos, make their appearance more frequently in the seventh canto. These corruptions increase in number and extent in the eighth taraṅga, especially towards its end, where they create serious obstacles to the interpretation of the work. The majority of the mistakes found in A is of such a nature that if we are allowed to take it for granted that Kalhaṇa was as careful to conform to the rules of grammar and prosody in the last two as in the preceding six cantos, we can indicate with perfect certainty the needed corrections. But in other passages the obscurity of the context and the defective state of whole verses make emendations much more hazardous.

I have considered it part of my duty as an editor to aid towards the interpretation of the work by indicating such emendations as appeared to me indispensable. Wherever this was done by placing the corrected reading in the text, attention has been called to the emen-

* See for local names thus metamorphosed in the Calcutta Edition, *e. g.*, i. 102, 173; iii. 10; v. 232; vii. 1081.

dation and a reference given to the reading of A which was carefully noted below. In other more doubtful cases where I was unable to find a satisfactory emendation, I had to content myself with marking the passage as corrupt in the notes and showing the corrections, if any, to be found in the Editions or later MSS. Wherever an emendation was based upon the evidence of parallel passages in Kalhaṇa's Râjataraṅgiṇî, the latter have been quoted in the critical notes. Where the reasons for an emendation could not be given in this concise form, they will be set forth in the second Volume. It is scarcely necessary, perhaps, to mention that in all cases where corrupt passages had to be restored, close attention has been paid to the palaeographical features of the Śâradâ characters, as the text of A must be traced back through MSS. which, including Kalhaṇa's original copy, have all been written in th[illegible]e characters.

I have endeavoured to keep constantly before my eyes the dangers with which any attempt at emendation is beset in the case of so difficult a text as the Râjataraṅgiṇî and have accordingly tried to exercise the greatest caution. This may have led me sometimes to accept the text of A as correct where a closer examination may prove it to be defective; but I hope that those who are competent to judge will more readily pardon such shortcomings than errors in the opposite direction. For the same reasons I have abstained from suggesting emendations for passages in which the *lacunae* of $A_1$ have not been filled up by $A_3$, except where only a few *aksharas* are missing and can be restored from the nature of the context or by reference to related passages with a reasonable degree of certainty.

I am too well aware of the many and serious difficulties which the eighth taraṅga presents, not to feel that its text, as printed in the present Edition, stands still in need of further searching revision. I should have willingly undertaken the labor involved in this, but for the delay in publication which, from the limited amount of leisure at my disposal, would have been in that case inevitable. As most of what is of interest in Kalhaṇa's work is contained in the preceding cantos the text of which is on the whole in a fair state of preservation, I did not feel justified in postponing the issue of the present Edition.

The complete restoration of Kalhaṇa's text in the eighth taraṅga is an end which if at all attainable with our present materials, would require continued application for many years. I have spared no trouble in recording as carefully as I could, the readings actually found in our only MS., and I hope that the materials thus furnished will enable others, specially qualified for the task, to free the text from its present blemishes more thoroughly than I have been able to do.

While endeavouring to acquaint the reader with the exact state of the text as found in A, I have not considered it necessary to reproduce all purely orthographical peculiarities of that codex. The orthography of A agrees on the whole with that followed in the old Śâradâ MSS., but Ratnakaṇṭha is by no means so consistent in certain particulars as the writers of many birch-bark MSS. of an earlier date.

Thus the two spirants *Jihvâmûlîya* and *Upadhmanîya** (*ḳh* and *p̣h*) are only occasionally used in A in place of the *visarga*, and instead of the final *s* being assimilated before an initial sibilant which is the rule in old Śâradâ MSS., we find it in A often written as

* See Professor Bühler's *Kashmir Report*, p. 32.

visarga. In view of such inconsistencies I have thought it best to follow in regard to details of *saṁdhi* the uniform practice adopted in European Editions. But whenever a reading of A had to be shown for critical purposes in the notes I have printed there the form actually found in the MS. The sign of *avagraha* (ऽ) is employed by Ratnakaṇṭha not in the manner of the printed texts, but in order to mark in doubtful cases the division of parts of compounds. I have for this reason, in accordance with the system followed, *e. g.*, in the Bombay Sanskrit Series, refrained from using in the Edition the avagraha as a sign to mark the elision of an initial *a*. A uses the *anusvâra* sign to indicate assimilated final *m* in external combination, but does not employ it regularly. I have adhered also in this respect to the uniform rule followed in the Editions of the Bombay Sanskrit Series.

As regards the orthography of individual words I had occasion to depart from A only in a small number of cases. We find the letters *b* and *v* used in A as in other Kashmirian MSS., in words which are more correctly spelt with *v* and *b*, respectively. A list of such words is given below.* Several words show almost regularly a duplication of consonants which is not justified by their etymology.† I have followed in all the above cases the spelling adopted in the St. Petersburg Dictionaries. This I have done also with regard to a few other words in which the spelling of A differs from that adopted by European Editors ‡; in such isolated cases, however, the discrepancies of spelling have been marked in the footnotes.

It will be clear from the remarks made above that it would have served no useful critical purpose if I had burdened the footnotes with a list of all the variations and mistakes which occur in the printed Editions of the Râjataraṅgiṇî. Their readings have, therefore, been referred to only where the text of A is defective or doubtful. On the other hand I have thought it necessary to record in the notes all glosses and explanatory notes written by $A_2$ or $A_3$. Many of the glosses are of importance for the interpretation of the Râjataraṅgiṇî and careful reference to them will bear good results in the interesting work of identifying the ancient sites mentioned in Kalhaṇa's narrative. They enable us to check and verify the present oral tradition of the Kashmirian Paṇḍits on this and kindred subjects, and their publication in a complete form has, therefore, been considered essential. These glosses and notes go back evidently to different sources, and I have, therefore, not thought it advisable to correct the occasional mistakes of grammar and spelling which are found in them. Of the annotations by $A_4$ which have been shown to be of recent origin, I have reproduced only the few which appeared to me to contribute to the interpretation of the text.

The system of distinguishing the names of persons, tribes, localities, &c., by heavier type will, I hope, facilitate reference to the text and occasionally prove useful also for its interpretation. That it has not always been easy to carry out this plan will be readily understood by those who know the difficulties which arise in the explanation of the Râjataraṅgiṇî from Kalhaṇa's references to obscure details of the ancient topography and ethnography of Kashmir. In showing certain words like *Mahâsarit*, *Ḍhakka*,

---

* A writes अरबिन्द, तीव्र, ब्रीडा, ब्रीहि and again उल्वण, क्लीव, निवर्हण, पिवन्तं, वलक्ष, वालिश, वाष्प, शवल.

† Thus we find in A क्षेत्त्र, गृद्ध्र, चित्त्र, बद्ध्यतां, व्यावृत्त्य instead of क्षेत्र, गृध्र, चित्र, बध्यतां, व्यावृत्य of our Editions.

‡ Thus A always writes जरढ, फाल्गुण, रुप्य, वदन्य, विमर्ष, स्कन्द for जरठ, फाल्गुन, रूप्य, वदान्य, विमर्श, स्कन्ध.— Here it may also be noted that in Ratnakaṇṭha's handwriting the ligatures ङ्ग and ङ्ग which are very much alike in all Śâradâ MSS., cannot be distinguished.

*Ḍámara, Divira*, as proper names, it was necessary to assume what has yet to be proved in the second Volume.*

A visit which I paid to Europe during the Summer of 1890, enabled me to submit the materials I had collected, to Prof. Bühler who granted me his valuable advice in all questions connected with the proposed Edition. It was chiefly due to the continued help and encouragement of this scholar who has done, perhaps, more than any living Sanskritist to lay open the true sources of ancient Indian History, that I was able on my return to India in the Autumn of 1890 to take up without further delay the preparation of the text for the present Edition.

Among those who have assisted me in carrying out this task, I must mention in the first place *Paṇḍit Govind Kaul* of Śrînagar, whose help in connection with the Râjataraṅgiṇî I was fortunate enough to secure during my first visit to Kashmir. Paṇḍit Govind Kaul accompanied me to Lahore in 1888, and has since rendered me very valuable assistance by communicating the oral traditions of the Kashmirian Paṇḍits as well as the results of his own researches on many points connected with Kalhaṇa's narrative and with the ancient topography of the country. Paṇḍit Govind Kaul's spirit of scientific enquiry and his thorough acquaintance with the history and geography of his country which attracted already in 1875 the notice of Professor Bühler†, have enabled him to find new explanations for many difficult passages of the Râjataraṅgiṇî. These explanations which will be duly noticed in the second Volume, have frequently influenced me in the selection of readings for my text. I owe to Paṇḍit Govind Kaul a careful collation of the MSS. R G, which was made before I obtained the use of the archetypus. Paṇḍit Govind Kaul's aid has also facilitated my collating the archetypus for the first half of the text, and when his subsequent absence from Lahore prevented him from assisting me further in this task, he still continued to render valuable help in connection with the reading of proofs. I have received equally useful assistance for the second half of the text from a younger Kashmirian scholar, *Paṇḍit Mukundarâm*, who also prepared under my directions provisional indices to the Râjataraṅgiṇî of which I have availed myself with advantage when revising the text of cantos vii. and viii. I am indebted to both scholars for much information on Kashmirian topics without which a correct comprehension of Kalhaṇa's text is unattainable, and I gladly take this opportunity to thank them publicly for the unflagging zeal and industry which they have shown in collecting it. I trust that the services they have thus rendered to all students of the Chronicle of Kashmir, will meet with due recognition in their own country.

If I have left it to the last to mention my friend *Paṇḍit Dâmodar*, Head Paṇḍit of His Highness the Mahârâja's Pâṭhaśâlâ at Śrînagar, it is merely because the distance at which we were placed from each other, did not allow me to appeal as frequently as I wished, to his wide learning in matters relating to the text of Kalhaṇa. Paṇḍit Dâmodar possesses a very intimate acquaintance with all that the Sanskrit poets of Kashmir have produced, and is thus, perhaps, better qualified than anybody else to expound the intricacies of Kalhaṇa's

* Here I may mention that for convenience of reference the terms नगर and पुर where they stand for श्रीनगर and प्रवरपुर, and a few other abbreviations of this kind have been treated as proper names.

† See Professor Bühler's *Kashmir Report*, p. 27.

style. He has always been most ready to help me in collecting MSS. of texts bearing on the Râjataraṅgiṇî.*

Ever since I first visited the Vale of Kashmir and formed the plan of editing the Chronicle of its earliest rulers, I have enjoyed every facility and help for my work which its present Government could afford me. It has, therefore, been a source of sincere satisfaction to me to be permitted to dedicate this Edition to His Highness MAHÂRÂJA PARTÂB SINGH, G.C.S.I., as a slight mark of my deep gratitude and respect.

I must record my sincere thanks to His Highness RÂJA AMAR SINGH, K.C.S.I., Prime Minister of the State, who has helped me on all occasions and who by encouraging every effort directed towards the preservation of the monuments of the ancient culture and literature of Kashmir, worthily continues the best traditions of the rule of His Highness the late Mahârâja Ranbîr Singh. Under the presidency of His Highness Râja Amar Singh, the Kashmir State Council sanctioned a liberal grant towards the publication of the Râjataraṅgiṇî. This has made it possible for me to bring out the present Edition in a form which, I hope, will not be found unworthy of the distinguished patronage it has received. By a further grant which the State Council was pleased to sanction at the proposal of His Highness Râja Amar Singh, I was enabled to undertake during the Summer vacation of 1891 an archæological tour in the Eastern part of the valley of Kashmir and in the adjoining alpine districts, and to collect, partly by means of excavations, fresh materials for the study of the antiquities of the country. These I hope to utilize in the second Volume of the present work.

My thanks are due to Colonel W. F. Prideaux, BO.S.C., Resident in Kashmir, for having recommended my work for the patronage of the State Council. Himself a scholar deeply interested in the History and Geography of the East, he has never failed to accord me his generous support and aid in all matters affecting the progress of my researches in Kashmir.

The late Lieutenant-Governor of the Punjab, Sir James Lyall, G.C.I.E., K.C.S.I., at the recommendation of the Director of Public Instruction, J. Sime, Esq., LL.D., was pleased to aid this publication by a liberal subscription for which I offer my grateful acknowledgment.

For the drawing reproduced in the *Vignette* of the title page, I am indebted to my friend Fred H. Andrews, Esq., Vice-Principal of the Lahore School of Arts, who gave me his valuable help during part of last year's archæological tour in Kashmir. Mr. Andrews' drawing shows the temple of *Mârtaṇḍ*, famous in the Annals of Kashmir, as we saw it in its present state of ruin.

I must lastly thank the Superintendent of the Education Society's Press for his ready assistance in all matters relating to the typography of the Volume. It will be due largely to his care if the number of misprints is not found so large as might have been anticipated from the difficulties under which the reading of the proofs had sometimes to be carried on.

---

* At the time that these pages are passing through the press, news reaches me that this most learned and amiable of all Kashmirian scholars has fallen a victim to the epidemic now raging in the Valley. By the death of Paṇḍit Dâmodar who in scholarly acquirements and poetic gifts was *facile princeps* among the Paṇḍits of Śrînagar, Sanskrit learning in Kashmir has suffered a severe loss. My lamented friend had set himself the task of continuing the Râjataraṅgiṇî from the time of Akbar to the present date, and from what I had seen of the parts composed I may say that had he been spared to complete it, his work would have shewn that Kalhaṇa could have found for generations past no worthier successor.

I hope to give in the second Volume of this Edition exegetical notes on the text of the Râjataraṅgiṇî with a running commentary on those points of Kalhaṇa's narrative which are of interest for the history, archæology and topography of Kashmir. It will also contain an introduction to the work, complete indices and, if possible, a map showing the ancient geography of the country as ascertained from the Râjataraṅgiṇî and other Kashmirian texts. The second Volume will be published as soon as the scanty leisure I can spare from teaching and office duties will permit me to complete the arrangement of the materials which I have collected during the last four years.

M. A. STEIN.

Senate Hall, Lahore:

*June 7th*, 1892.

## LIST OF ABBREVIATIONS.

A=*Râjânaka Ratnakaṇṭha's codex.*

$A_1$=*Râjânaka Ratnakaṇṭha's own handwriting.*

$A_2$, $A_3$, $A_4$, $A_5$=*Later annotators of Râjânaka Ratnakaṇṭha's codex* (see Preface, pp. x.—xii.).

R=*MS. of P. Râzdân Balabhadra.*

G=*MS. of P. Govind Kaul.*

C=*Calcutta Edition, 1835.*

P=*Paris Edition, 1840.*

Edd.=*Calcutta and Paris Editions.*

corr.=*corrected.*

cf.=*compare.*

*N.B.—The figures preceded by* C., *shown at the foot of the pages, refer to the verse numbers as marked on the margin of the Calcutta Edition.*

# राजतरङ्गिणी ।

## ॥ प्रथमस्तरङ्गः ॥

ॐ स्वस्ति ॥ श्रीगणेशाय नमः ॥

भूषाभोगिफ[1]णारत्नरोचिःसिचयं[2]चारवे । नमः प्रलीनमुक्ताय ह[3]रकल्पमहीरुहे ॥१॥
भालं वह्निशिखाङ्कि[1]तं दधद्[2]धिश्रोत्रं वहन्संभृतक्रीडत्कुण्डलि[3]जृम्भितं जलधिज[4]च्छायाच्छकण्ठच्छविः ।
वक्षो बिभ्रदहीनकञ्चुक[5]चितं बद्धाङ्गनार्धस्य वो भागः पुंगवलक्ष्मणोस्तु यशसे वामोथ वा दक्षिणः ॥२॥
वन्द्यः कोपि सुधास्यन्दास्कन्दी स सुकवेर्गुणः । येना[1]याति यशःकायः स्थैर्यं स्वस्य परस्य च ॥३॥
कोन्यः कालमतिक्रान्तं नेतुं प्रत्यक्षतां क्षमः । कविप्रजा[1]पतींस्त्यक्त्वा रम्यनिर्माणशालिनः ॥४॥
न पश्येत्सर्वसंवेद्यान्भावान्प्रतिभया यदि । तदन्यद्दिव्यदृष्टित्वे किमिव ज्ञापकं कवेः ॥५॥ 5
कथादैर्घ्यानुरोधेन वैचित्र्येप्यप्रपञ्चिते । तदत्र किंचिदस्त्येव वस्तु यत्प्रीतये सताम् ॥६॥
श्लाघ्यः स एव गुणवान्रागद्वेषबहिष्कृता । भूतार्थकथने यस्य स्थेयस्ये[1]व सरस्वती ॥७॥
पूर्वैर्बद्धं कथावस्तु मयि भूयो निबध्नति । प्रयोजनमनाकर्ण्य वैमुख्यं नोचितं सताम् ॥८॥
दृष्टं दृष्टं नृपोदन्तं बद्ध्वा प्रमयमीयुषाम् । अर्वाक्कालभवैर्वार्ता यत्प्रबन्धेषु पूर्यते ॥९॥
दाक्ष्यं कियदिदं तस्मादस्मिन्भूतार्थवर्णने । सर्वप्रकारं स्खलिते योजनाय ममोद्यमः ॥१०॥ युगलकम् ॥ 10
विस्तीर्णाः प्रथमे ग्रन्थाः स्मृत्यै संक्षिपतो वचः । सुव्रतस्य प्रबन्धेन छिन्ना राजकथाश्रयाः ॥११॥
या प्रथामगमन्नैति सापि वाच्यप्रकाशने । पाटवं दुष्टवैदुष्यतीव्रा सुव्रतभारती ॥१२॥
केनाप्यनवधानेन कविकर्माणि सत्यपि । अंशोपि नास्ति निर्दोषः क्षेमेन्द्रस्य नृपावलौ ॥१३॥
दृग्गोचरं पूर्वसूरिग्रन्था राजकथाश्रयाः । मम त्वेकादश गता मतं नीलमुनेरपि ॥१४॥
दृष्टैश्च पूर्वभूभर्तृप्रतिष्ठावस्तुशासनैः । प्रशस्तिपट्टैः शास्त्रैश्च शान्तोशेषभ्रमक्लमः ॥१५॥ 15
द्वापञ्चाशतमाम्नायभ्रंशाद्यान्नास्मरन्नृ[1]पान् । तेभ्यो नीलमताद्दृष्टं गोनन्दादिचतुष्टयम् ॥१६॥
बद्धा द्वादशभिर्ग्रन्थसहस्रैः पार्थिवावलि[1]ः । प्राड्महाव्रतिना येन[2] हेलाराज[3]द्विजन्मना ॥१७॥

---

१. [1]) The *aksharas* गिफ written at the end of the first line in $A_1$ have been destroyed in binding; G and Edd. read as above; R भूषाहीनफणा°, afterwards corrected as above.—[2]) $A_2$ gloss वस्त्र.—[3]) हर being effaced at the end of the second line, has been supplemented by $A_4$. २. [1]) $A_4$ gloss अग्निज्वाला कुङ्कुमं च.—[2]) These three *aksharas* being faintly visible in the handwriting of $A_1$ have been repeated by $A_4$.—[3]) $A_4$ gloss सर्पः कुण्डलं च.—[4]) $A_3$ gloss विषं; $A_4$ gloss विषं शङ्खश्च.—[5]) $A_1$ कञ्चुकि°; ि smeared over. ३. [1]) Thus corrected by $A_1$ or later hand from येन; G and R येना°. ४. [1]) The *aksharas* जाप effaced in A. ७. [1]) $A_3$ gloss दृढा. १६. [1]) $A_2$ gloss कवयः. १७. [1]) Thus corrected by $A_2$ from $A_1$ °स्रैर्या नृपावलिः; पार्थिवावलिः also in G R.—[2]) To this word, marked by brackets in A, seems to refer a much effaced gloss or *varia lectio* written by $A_2$ or $A_3$ in the margin, looking like कङ्का (?). [3]) The *akshara* ला written at the beginning of a line has become unreadable; हेलाराजद्वि repeated in margin by $A_4$.

तन्मतं पूर्व[1]मिहिरो दृष्ट्वाशोकादिपूर्वगान्[2] । अष्टौ लवादीन्नृपतीन्स्वस्मिन्ग्रन्थे न्यदर्शयत् ||१८|| युगलकम् ||

येप्यशोकादयः पञ्च श्रीच्छ[1]विल्लाकरोब्रवीत् । तान्द्वापञ्चाशतो मध्याच्छ्लोकस्तस्य तथा ह्ययम् ||१९||

20 आशोकाद[1]भिमन्योर्ये प्रोक्ताः पञ्च महीभुजः । ते द्वापञ्चाशतो[2] मध्यादेव लब्धाः पुरातनैः ||२०||

इयं नृपाणामुल्लासे ह्रासे वा देशकालयोः । भैषज्यभूतसंवादिकथा युक्तोपयुज्यते ||२१||

संक्रान्तप्राक्तनानन्तव्यवहारः सु[1]चेतसः । कस्येदृशो न संदर्भो यदि वा हृदयंगमः ||२२||

क्षणभङ्गिनि जन्तूनां स्फुरिते परिचिन्तिते । मूर्धाभिषेकः शान्तस्य रसस्यात्र विचार्यताम् ||२३||

तदमन्दरसस्यन्दसुन्दरेयं निपीयताम् । श्रोत्रशुक्तिपुटैः स्पष्टमङ्ग राजतरङ्गिणी ||२४||

25 पुरा सतीसरः कल्पारम्भात्प्रभृति भूरभूत् । कुक्षौ हिमाद्रेरर्णोभिः पूर्णं मन्वन्तराणि षट् ||२५||

अथ वैवस्वतीयेस्मिन्प्राप्ते मन्वन्तरे सुरान् । द्रुहिणोपेन्द्ररुद्रादीनवतार्य प्रजासृजा ||२६||

कश्यपेन तदन्तःस्थं घातयित्वा जलोद्भवम् । निर्ममे तत्सरोभूमौ कश्मीरा इति मण्डलम् ||२७||युगलकम्||

उद्यद्वैतस्तनिःष्यन्द[1]दण्डकुण्डातपत्रिणा । यत्सर्वनागाधीशेन नीलेन[2] परिपाल्यते ||२८||

गुहोन्मुखी नागमुखापीतभूरिपया रुचिम् । गौरी यत्र वितस्तात्वं यातायुज्झति नोचिताम्[1] ||२९||

30 शङ्खपद्ममुखैर्नागैर्नानारत्नावभासिभिः । नगरं धनदस्येव निधिभिर्यन्निषेव्यते ||३०||

यत्तार्क्ष्यभीत्या प्राप्तानां नागानां गुप्तये ध्रुवम् । प्रसारितभुजं पृष्ठे शैलप्राकारलीलया ||३१||

भुक्तिमुक्तिफलप्राप्तिः काष्ठ[1]रूपमुमापतिम् । पापसूदनतीर्थान्तर्यत्र संस्पृशतां भवेत् ||३२||

संध्यादेवी[1] जलं यस्मिन्धत्ते[2] निःसलिले गिरौ[3] । दर्शनं पुण्यपापानामन्वयव्यतिरेकयोः ||३३||

स्वयंभू[1]र्यत्र हुतभुग्भु[2]वो गर्भात्समुन्मिषन् । जुह्वतां प्रतिगृह्णाति ज्वालाभुजवनैर्हविः ||३४||

35 देवी भेडगिरे[1]ः शृङ्गे गङ्गोद्भेदशुचौ स्वयम् । सरोन्तर्दृश्यते यत्र हंसरूपा[2] सरस्वती ||३५||

नन्दिक्षेत्रे[1] हरावासप्रासादे द्युचरार्पिताः । अद्यापि यत्र व्यज्यन्ते पूजाचन्दनबिन्दवः ||३६||

आलोक्य शारदां[1] देवीं यत्र संप्राप्यते क्षणात् । तरङ्गिणी मधुमती वाणी च कविसेविता ||३७||

---

१८. [1]) पूर्व of $A_1$ has been struck out and पद्म written above by $A_2$; पद्म also in G R.—[2]) Thus $A_1$: some of the letters having become faint, $A_4$ (?) has written in margin पूर्वजान्; $A_4$ adds the gloss अशोकादीनां पूर्वजान्. १९. [1]) च्छ corrected by $A_1$; original reading, smeared over, perhaps श. २०. [1]) $A_3$ marginal gloss अभिमन्योः सकाशात् अशोकात् आ अशोकमभिव्याप्य ये पञ्च राजानः उक्ताः.—[2]) Thus A; G R Edd. read °शतो. २२. [1]) सु of $A_1$ corrected by a later hand into स; G R read सु. २८. [1]) A °निष्ष्यन्द°.—[2]) $A_2$ gloss in margin विरिविषयस्थितेन नीलनागेन विरिनाग इति प्रसिद्धेन; $A_4$ interlinear gloss विरनागस्थितेन. २९. [1]) The following gloss has been written in margin by $A_2$ in red ink and partly retraced by the same hand in black ink. Words shown in brackets, having now become illegible in A, have been restored from copy in R: गुहोन्मुखी कु[मारसम्मुखी कन्दराभि]मुखी च नागमुखापीतभूरिपयाः [नागमुखेन गजवदनेन आपीतं भूरि]पयः दुग्धं यस्याः सा । नागानां मुखेन आपीतं भूरि पयो यस्याः यया वा गौरी पार्वती वित[स्तात्वं] यातापि उचितां रुचिम् इच्छां नोज्झति न त्यजति स्वरु[चि से. .]दिकां नात्य[जदि]त्यर्थः गौरीत्वोचितां रुचिं गुहोन्मु[खीत्या]दिकां वित[स्तात्वे]पि न त्यजति त[त्रा]पि तत्करण.... ३२. [1]) $A_2$ adds between the lines the gloss कपटेश्वरं and in margin कोटिहिरग्रामे कोटहाडाख्यविषये. ३३. [1]) $A_2$ gloss भृङ्गनामविषये देवलग्रामसमीपस्थले.—[2]) Thus $A_1$; corrected by $A_1$ into दत्ते which has been copied in G and R.—[3]) $A_2$ gloss (smeared over) नीलगिर् इति प्रसिद्धे. ३४. [1]) $A_2$ gloss क्रमरा[ज्ये] स्वैम् इति प्रसिद्धः; $A_4$ adds क्रमराज् क्रमराज्याख्ये विषये.—[2]) भु supplied between the lines by $A_3$. ३५. [1]) $A_2$ marginal gloss भेडा ब्राडू इति प्रसिद्धा.—[2]) $A_2$ gloss हंसरागीश्वरी. ३६. [1]) $A_2$ gloss नरनामग्रामे. ३७. [1]) $A_2$ marginal gloss श्रीशैले हरेल् इति प्रसिद्धे स्थाने दरद्देशाभ्यर्णवर्तिनि.

चक्रभृद्विजयेशादिकेशवेशानभूषिते। तिलांशोपि न यत्रास्ति पृथ्व्यास्तीर्थैर्बहिष्कृतः ॥३८॥
विजीयते पुण्यबलैर्बलैर्यत्तु न शस्त्रिणाम्। परलोकात्ततो भीतिर्यस्मिन्निवसतां परम् ॥३९॥
सोष्मस्नानगृहाः शीते स्वस्थतीरास्पदा रये। यादोविरहिता यत्र निम्नगा निरुपद्रवाः ॥४०॥ 40
असन्तापार्हतां जानन्यत्र पित्रा विनिर्मिते। गौरवादिव तिग्मांशुर्धत्ते ग्रीष्मेप्यतीव्रताम् ॥४१॥
विद्यावेश्मानि तुङ्गानि कुङ्कुमं सहिमं पयः। द्राक्षेति यत्र सामान्यमस्ति त्रिदिवदुर्लभम् ॥४२॥
त्रिलोक्यां रत्नसूः श्लाघ्या तस्यां धनपतेर्हरित्। तत्र गौरीगुरुः शैलो यत्तस्मिन्नपि मण्डलम् ॥४३॥
तत्र कौरवकौन्तेयसमकालभवान्कलौ। आ गोनन्दात्स्मरन्ति स्म न द्वापञ्चाशतं नृपान् ॥४४॥ 
तस्मिन्काले ध्रुवं तेषां कुकृतैः काश्यपीभुजाम्। कर्तारः कीर्तिकायस्य नाभूवन्कविवेधसः ॥४५॥ 45
भुजवनतरुच्छायां येषां निषेव्य महौजसां जलधिरशना मेदिन्यासीदसावकुतोभया।
स्मृतिमपि न ते यान्ति क्ष्मापा विना यदनुग्रहं प्रकृतिमहते कुर्मस्तस्मै नमः कविकर्मणे ॥४६॥
येप्यासन्निभकुम्भशायितपदा येपि श्रियं लेभिरे येषामप्यवसन्पुरा युवतयो गेहेष्वहश्चन्द्रिकाः।
तांल्लोकोयमवैति लोकतिलकान्स्वप्नेप्यजातानिव भ्रातः सत्कविकृत्य किं स्तुतिशतैरन्धं जगत्त्वां विना ॥४७॥
अष्टषष्ट्यधिकाब्दद्दशतद्वाविंशतिं नृपाः। अपीपलंस्ते कश्मीरान्गोनन्दाद्याः कलौ युगे ॥४८॥
भारतं द्वापरान्तेभूद्वार्तयेति विमोहिताः। केचिदेतां मृषा तेषां कालसंख्यां प्रचक्रिरे ॥४९॥ युग्मम् ॥
लब्धाधिपत्यसंख्यानां वर्षान्संख्याय भूभुजाम्। भुक्तात्कालात्कलेः शेषो नास्त्येवं तद्विवर्जितान् ॥५०॥ 50
शतेषु षट्सु सार्धेषु त्र्यधिकेषु च भूतले। कलेर्गतेषु वर्षाणामभूवन्कुरुपाण्डवाः ॥५१॥
लौकिकेब्दे चतुर्विंशे शककालस्य सांप्रतम्। सप्तत्याभ्यधिकं यातं सहस्रं परिवत्सराः ॥५२॥
प्रायस्तृतीयगोनन्दादारभ्य शरदां तदा। द्वे सहस्रे गते त्रिंशदधिकं च शतत्रयम् ॥५३॥
वर्षाणां द्वादशशती षष्टिः षड्भिश्च संयुता। भूभुजां कालसंख्यायां तद्द्वापञ्चाशतो मता ॥५४॥
ऋक्षादृक्षं शतेनाब्दैर्यात्सु चित्रशिखण्डिषु। तच्चारे संहिताकारैरेवं दत्तोत्र निर्णयः ॥५५॥ 55

---

३८. [1]) $A_2$ gloss चक्रभृत् केशवः चक्रधर इति प्रसिद्धः विजयेशः ईशानः विज्यभ्राडो इति प्रसिद्धः. ३९ [1]) Thus corrected by $A_3$ from $A_1$ मुख्य°; G and R read पुण्य°, the latter with the *v. l.* मोक्ष°. ४०. [1]) Thus emended in G; A R सुस्थ°. ४१. [1]) $A_1$ असन्तापहतां; corrected in margin by $A_2$ as above.—[2]) $A_2$ gloss कश्यपेन. ४२. [1]) $A_3$ adds a gloss in margin which has partially become effaced; words in brackets supplemented from copy in R : [विद्या]दिकं द्रा[क्षापर्य]न्तं इत्येत[द्द्रव्यजातं त्रिदिवेपि] दुर्लभं [स]त् यत्र कश्मीरमण्डले सामान्यं साधारणमस्ति सर्वजनोपभोग्यं सुलभमिति यावत् विद्यादिकं अनुपमं अत्युत्कृष्टं यत्रैवास्ति त्रिदिवेपि दुर्लभत्वा[द]न्यत्र साधारणं नास्तीति व्याख्याकरणेन। यत्रासामान्यमिति पाठान्तरं यद्यपि सङ्गच्छत इव तथापि नैतत्समीचीनम्। छन्दोभङ्गापातात् अनुष्टुभि हि सर्वपादेषु पञ्चमा[क्षरस्य] लघुतयैव सर्वत्र दर्शनात्। यदुक्तं पञ्च[मं लघु सर्वत्र इत्यादि]. ४३. [1]) G has the reading भूः in margin. ४४. [1]) $A_1$ had आनन्दात्; गो supplemented by $A_3$; $A_2$ adds a gloss in margin which has become partially effaced (words in brackets from R): आ गोनन्दात् तृतीयगोनन्दात् आ तृतीय[गो ... व[र्ज]यित्वा आदिगोनन्दमा[र]भ्य [अन्ये क]वयो न स्मर[न्ति स्म अस्माभि ........]. ४५. [1]) Thus $A_1$; corrected ... hand into कुकृत्यैः which reading is found also into G and R.—[2]) $A_3$ gloss राज्ञां. ४६. [1]) A has भुजतरुव... gures indicating transposition, written by an old hand; G and R read ...s above. ४७. [1]) $A_1$ writes शरा abov... smeared over by later hand.—[2]) $A_3$ in margin सर्वोप्य°; R सर्वो by ...ther hand. ४८. [1]) $A_1$ gloss अन्यम... नाह.—[2]) $A_2$ gloss द्वापञ्चाशतिसङ्ख्याः. ४९. [1]) $A_2$ gloss युग्मं.—[2]) $A_1$ ...ote first °षां but altered thereafter as above. ५१. [1]) $A_2$ marginal gloss त्रिपञ्चाशदधिके वर्षशतषट्के कलियुगस्य ...तेति इत्यर्थः. ५२. [1]) $A_3$ marginal gloss अद्य जयसिंहसमये. ५३. [1]) $A_3$ तथा. ५५. [1]) $A_1$ उचारे; corrected by $A_3$ into तच्चारे and explained by marginal gloss तेषां चारे. (The mistake of $A_1$ is due to the resemblance of Śâradâ त and उ).

आसन्मघासु मुनयः शासति पृथ्वीं युधिष्ठिरे नृपतौ[1] । षड्द्विकपञ्चद्वियुतः शककालस्तस्य राज्यस्य ॥५६॥
कश्मीरेन्द्रः स गोनन्दो वेल्लद्गङ्गादुगूलया । दिशा कैलासहासिन्या प्रतापी पर्युपास्यत ॥५७॥
विहाय देहं शेषाहेर्विषाश्लेषभयादिव । भूर्गारुत्मतरत्नाङ्के भेजे तस्य भुजे स्थितिम् ॥५८॥
साहायकार्थमाहूतो जरासंधेन बन्धुना । स संरुरोध कंसारेर्मथुरां पृथुभिर्बलैः ॥५९॥
60 तेनोपकूलं कालिन्द्याः स्कन्दावारं निबध्नता । यादवीहसितैः[1] सार्धं योधानां मीलितं यशः ॥६०॥
एकदा सर्वतो भग्नाः स्वसेनास्त्रातुमुद्यतः । तं संरुरोध योद्धारं संगरे लाङ्गलध्वजः ॥६१॥
तयोस्तुल्यौजसोर्युद्धे चिराय करवर्तिनी । मम्लौ विजयसंदेहे किं जयस्रग्[1]जयश्रियः ॥६२॥
अथ शस्त्रक्षतैरङ्गैरालिलिङ्ग रणाङ्गने । भुवं काश्मीरिको[1] राजा यादवस्तु जयश्रियम् ॥६३॥
गतिं प्रवीरसुलभां तस्मिन्सुक्षत्रिये गते । श्रीमान्दामोदरो नाम तत्सूनुरभृत क्षितिम् ॥६४॥
65 भोगयोग्योर्जितं राज्यं प्राप्तवानपि भूपतिः । ध्यायन्पितृवधं मानी नोपलेभे स निर्वृतिम् ॥६५॥
अथोपसिन्धु गान्धारैः सज्जे कन्यास्वयंवरे । निमन्त्र्य शुश्रावा[1]नीतान्वृष्णीन्दर्पोष्णदोर्द्रुमः ॥६६॥
ततस्तस्यातिसंरम्भात्तानदूरस्थितान्प्रति । यात्राभूद्ध्वजिनीवाजिरेणुग्रस्तनभस्तला ॥६७॥
तदाहवे विवाहोत्का निघ्नति[1] स्म पतिंवरा । आसीत्तु सुपुरन्ध्रीणां गान्धारेषु स्वयंवरः ॥६८॥
तदा[1]क्रान्तासुहृच्चक्रः स चक्रा[2]युधसंगरे । चक्रधाराध्वना धीरश्चक्रवर्ती दिवं ययौ ॥६९॥
70 अन्तर्वत्नीं तस्य पत्नीं तदा यदुकुलोद्वहः । राज्ये यशोवतीं[1] नाम द्विजैः कृष्णोऽभ्यषेचयत् ॥७०॥
तस्मिन्काले स्वसचिवा[1]न्सासूयान्विन्यवीवरत्[2] । इमं पौराणिकं श्लोकमुदीर्य मधुसूदनः ॥७१॥
कश्मीराः पार्वती[1] तत्र राजा ज्ञेयो हरांशजः[2] । नावज्ञेयः स दुष्टोऽपि विदुषा[3] भूतिमिच्छता ॥७२॥
पुंसां निर्गौरवा भोज्ये इव याः स्त्रीजने दृशः । प्रजानां मातरं तास्तामपश्यन्देवतामिव ॥७३॥
अथ वैजनने मासि सा देवी[1] दिव्यलक्षणम् । निर्दग्धस्यान्वयतरोरङ्कुरं सुषुवे सुतम् ॥७४॥
75 तस्य राज्याभिषेकादिविधिभिः सह संभृताः । द्विजेन्द्रैर्निरवर्त्यन्त जातकर्मादिकाः क्रियाः ॥७५॥
स नरेन्द्रश्रिया सार्धं लब्धवान्बालभूपतिः । नाम गोनन्द इत्येवं नप्त्रा पैतामहं क्रमात् ॥७६॥
आस्तां बालस्य संनद्धे द्वे धात्र्यौ तस्य वृद्धये । एका[1] पयःप्रस्नविणी[2] सर्वसंपत्प्रसूः परा[3] ॥७७॥

---

५६. [1]) See *Bṛihat Saṁhitā* XIII. 3.—$A_2$ marginal gloss रत्नकोशाख्ये ज्योतिर्ग्रन्थे एषा आर्या । यत्सारमानीय रत्नमाला विहिता श्रीपतिना.—In A a later hand, not met with elsewhere, adds in margin a gloss which has faded in parts (words in brackets supplied from R): आसन्मघास्विति एकैकस्मिन्धिष्ण्ये शतं शतं चरन्ति वर्षाणामिति वचनात् तत्समये मघास्वव-स्थानात्सप्तर्षीणां कश्मीरेष्वतिप्रसिद्धलौकिकसंवत्सरपरिज्ञानार्थमेतदुक्तमन्यग्रन्थेपीहानीतम् । षट्द्विकेति तस्य राज्यस्य युधिष्ठिरी-यराज्यस्य यः शककालः पूर्वोक्तः शतेषु षट्सु सार्धेष्वित्यादिकः त्रिपञ्चाशदधिकषट्शत[रूपः स] षट्द्विकपञ्चद्वियुतः २५२६ एता[व]ता वर्षवृन्देन युतः गोगैकगुण[तुल्यो भ]वति ३१७९ अयं शककालो वर्तमानशककालो भवति इत्यध्याहारः] गणितव्यवहारार्थं लौकिकः शककालः शालिवाहनीयः भवति इत्यर्थः ३१७९ एतावत्परिमिते कलेर्गताब्दवृन्दे याते शालिवाहनोभूदित्यर्थः तदुक्तं ब्रह्मसिद्धान्ते । कल्प-परार्धं मनवः षट् तस्याब्दाश्चतु[र्युगं त्रि]घनम् त्रीणि कृतादीनि पुनर्गोगैकगु[णाः शक]नृपान्तेब्दा इति ६०. [1]) $A_1$ writes in place of the last three *akṣharas* य...; $A_3$ has filled up the lacuna with हसितैः, striking out य. ६२. [1]) Thus $A_1$; $A_2$ reads वरणस्रग्°; G and R follow $A_1$. ६३. [1]) Thus corrected by $A_1$ from °रको. ६६. [1]) Thus corrected by $A_3$ from $A_1$ शुश्रुवा°. ६८. [1]) Doubtful. Thus $A_1$; $A_3$ reads विद्यते, also copied in R; G has विघ्नति. ६९. [1]) Thus $A_1$; $A_3$ तत्रा°.—[2]) Thus corrected by $A_3$; $A_1$ reads °चक्र सश्चक्रा°. ७०. [1]) Thus $A_1$; $A_3$ यशोमतीं. ७१. [1]) Thus corrected by $A_3$ from A1 स्वसिवा°.—[2]) $A_2$ gloss शमयामास. ७२. [1]) Thus corrected by $A_2$ from $A_1$ °रा॰ पर्वती.—[2]) A later hand (perhaps $A_3$) in margin ज्ञेयदिश्यवांशजः.—[3]) $A_2$ in margin स्वात्मनो. ७४. [1]) $A_2$ gloss यशोवती. ७७. [1]) $A_3$ gloss उपमाता.—[2]) $A_3$ reads प्रसविनी.—[3]) $A_3$ has the marginal gloss भूमिः below which यशोवती is written, perhaps, by the same hand.

तस्यावन्ध्यप्रसादत्वं रक्षन्तः पितृमन्त्रिणः । पार्श्वगेभ्यो ददुर्वित्तमनिमित्तस्मितेष्वपि ॥७८॥

अबुद्धा[1]ननुतिष्ठन्तस्तस्याव्यक्तं शिशोर्वचः । कृतागसमिवात्मानममन्यन्ताधिकारिणः[2] ॥७९॥

पितुः सिंहासनं तेन क्रामता बालभूभुजा । नोत्कण्ठा पादपीठस्य लम्बमानाङ्घ्रिणा हृता ॥८०॥ 80

तं चामरमरुल्लोलकाकपक्षं नृपासने । विधाय मन्त्रिणोऽशृण्वन्प्रजानां धर्मसंशयम् ॥८१॥

इति काश्मीरिको राजा वर्तमानः स शैशवे । साहायकाय समरे न निन्ये कुरुपाण्डवैः ॥८२॥

आम्नायभङ्गान्निर्नष्टनामकृत्यास्ततः परम् । पञ्च[1]त्रिंशन्महीपाला मग्ना विस्मृतिसागरे ॥८३॥

अथाभवल्लवो नाम भूपालो भूमिभूषणम् । वेल्लद्यशोदुगूलायाः प्रीतिपात्रं जयश्रियः ॥८४॥

यस्य सेनानिनादेन जगदौन्निद्र्यदायिना । निन्यिरे वैरिणश्चित्रं दीर्घनिद्राविधेयताम् ॥८५॥ 85

तेन षोडशभिर्लक्षैर्विहीनामश्मवेश्मनाम् । कोटिं[1] निष्पाद्य नगरं लोलोरं[2] निरमीयत ॥८६॥

दत्त्वाग्रहारं लेदर्यां लेवारं द्विजपर्षदे । स द्यामनिन्द्यशौर्यश्रीरारुरोह महाभुजः ॥८७॥

कुशे[1]शयाक्षस्तत्पुत्रः प्रतापकुशलः कुशः । कुरुहारा[2]ग्रहारस्य दाताभूत्तदनन्तरम् ॥८८॥

ततस्तस्य सुतः प्राप रिपुनागकुलान्तकः । धुर्यः शौर्याश्रय श्रीमान्खगेन्द्रः पार्थिवेन्द्रताम् ॥८९॥

स खागिखोनमुषयोः कर्ता मुख्याग्रहारयोः । हरहाससितैः कृत्यैः क्रीतांल्लोकान्क्रमाद्ययौ ॥९०॥ 90

अनर्घमहिमा दीर्घमघवत्ताबहिष्कृतः । अथ साश्चर्यचर्योभूत्सुरेन्द्रस्तत्सुतो नृपः ॥९१॥

शतमन्युः शान्तमन्योर्गोत्रभिद्गोत्ररक्षिणः । लेभे यस्य[1] सुरेन्द्रस्य सुरेन्द्रो नोपमानताम्[2] ॥९२॥

दरद्देशान्तिके कृत्वा सोरकाख्यं स पत्तनम् । श्रीमान्विहारं विदधे नरेन्द्रभवनाभिधम् ॥९३॥

तेन स्वमण्डलेखण्डयशसा पुण्यकर्मणा । विहारः सुकृतोदारो निर्मितः सौरसा[1]भिधः ॥९४॥

तस्मिन्निःसंततौ राज्ञि प्रशान्तेन्यकुलोद्भवः । बभार गोधरो नाम सभूधरवरां धराम् ॥९५॥ 95

गोधरा[1]हस्तिशालाख्यमग्रहारमुदारधीः । स प्रदाय द्विजन्मभ्यः पुण्यकर्मा दिवं ययौ ॥९६॥

तस्य सूनुः सुवर्णाख्यस्ततोभूत्स्वर्णदोऽर्थिनाम् । सुवर्णमणिकुल्यायां[1] करालें[2] यः प्रवर्तकः ॥९७॥

तत्सूनुर्जनको नाम प्रजानां जनकोपमः । विहारमग्रहारं च जालोराख्यं च निर्ममे ॥९८॥

शचीनरस्तस्य सूनुः क्षितिं क्षितिशचीपतिः । ततः श्रीमान्क्षमाशीलो ररक्षाक्षतशासनः ॥९९॥

राजाग्रहारयोः कर्ता[1] शमाङ्गासाशनारयोः[2] । सोभूदपुत्रः सुत्रामविष्टरार्धसमाश्रयी ॥१००॥ 100

७९. [1]) $A_3$ अबुद्धमनु°.—[2]) $A_3$ gloss मन्त्रिणः. ८३. [1]) $A_3$ adds the following notes in the margin: द्वापञ्चाशन्नृपमध्यात् अस्माकं पञ्चत्रिंशन्नृपा विस्मृताः अन्येषां तु द्वापञ्चाशति नृपाः। यत्पूर्वमुक्तं आगोनन्दात्स्मरन्ति स्म न द्वापञ्चाशतं नृपानिति ॥ द्वापञ्चाशतो मध्यात्सप्तदश नृपा अस्माभिर्वर्णिताः । पञ्चत्रिंशन्नृपास्तु हस्तविषयं न प्राप्ताः । तत्र आदिगोनन्दादयः बालगोनन्दान्ताः चत्वारः पूर्वं वर्णिताः। लवनृपादारभ्य शचीनरान्ता अष्टौ वर्णिताः। ततः अथावहदशोकाख्य इत्यादिना अशोकादारभ्य अभिमन्युपर्यन्तं पञ्च नृपा वर्णयिष्यते (*sic*)। एवं सप्तदश नृपा ग्रन्थान्तरान्वीक्ष्य वर्णिताः। अवशिष्टाः पञ्चत्रिंशद्विस्मृता एव ॥ एवं सर्वे द्वापञ्चाशति नृपाः ॥ ८६. [1]) $A_3$ marginal gloss चतुरशीतिसहस्रगृहं नगरमित्यर्थः.—[2]) A gloss below this word has been smeared over with yellow paint; it appears to be लो᷆व (*Lolab* ?). ८८. [1]) Thus corrected by $A_3$ from $A_1$ °शयाख्य°; °याक्ष° also in G and R.—[2]) An old gloss, apparently गह्वर् (?), has been smeared over with yellow paint; $A_4$ adds कुलट्. ९२. [1]) Thus corrected by $A_3$ from $A_1$ तस्य.—[2]) $A_3$ in margin न सुरेन्द्रः समानताम्. ९४. [1]) $A_3$ reads सोर°. ९६. [1]) $A_2$ has the glosses गोधर् and अस्तीहिल्. ९७. [1]) $A_2$ gloss in margin स्वभ्रमय् नाडो, smeared over and repeated between the lines by $A_4$.—[2]) $A_2$ gloss आर्धवने. १००. [1]) This word has been left out by $A_1$ and supplied by $A_3$.—[2]) $A_4$ writes the glosses श्वाङ्गस् and श्वार् over older glosses, apparently by $A_2$, which have been smeared over with yellow paint; the older glosses which can be traced only in single letters, seem to have been identical with those written above them by $A_4$. R has the glosses श्वाङ्गस् and श्वार् (*sic*). $A_1$ puts a small *daṇḍa* after शमाङ्गासा, indicating the division of words.

प्रपौत्रः शकुनेस्तस्य भूपतेः प्रपितृव्यजः । अथावहदशोकाख्यः सत्यसंधो वसुंधराम् ॥१०१॥

यः शान्तवृजिनो राजा प्रपन्नो जिनशासनम् । [1]शुष्कलेत्रवितस्तात्रौ तस्तार स्तूपमण्डलैः[2] ॥१०२॥

धर्मारण्यविहारान्तर्वितस्तात्र[1]पुरेभवत् । यत्कृतं चैत्यमुत्सेधावधिप्राप्यक्षमेक्षणम् ॥१०३॥

स षण्णवत्या गेहानां लक्षैर्लक्ष्मीसमुज्ज्वलैः । गरीयसीं पुरीं श्रीमांश्चक्रे श्रीनगरीं नृपः ॥१०४॥

105 जीर्णं श्रीविजयेशस्य विनिवार्य सुधामयम्[1] । निष्कल्मषेणाश्ममयः प्राकारो[2] येन कारितः[3] ॥१०५॥

सभायां विजयेशस्य समीपे च विनिर्ममे । शान्तावसादः[1] प्रासादावशोकेश्वरसंज्ञितौ ॥१०६॥

म्लेच्छैः संच्छादिते देशे स तदुच्छित्तये नृपः । तपःसंतोषिताल्लेभे भूतेशात्सुकृती सुतम् ॥१०७॥

सोथ भूभुज्जलौकोभूद्भूलोकसुरनायकः[1] । यो यशःसुधया[2] शुद्धं व्यधाद्ब्रह्माण्डमण्डलम् ॥१०८॥

यस्य दिव्यप्रभावस्य कथाः श्रुतिपथं गताः । आश्चर्याचार्यतां[1] यान्ति नियतं[2] द्युषदाम[3]पि ॥१०९॥

110 [1]कोटिवेधिनि[2] सिद्धे हि स रसे हाटकार्पणैः । आसीत्सुषिरतां[3] हर्तुं[4] हेमाण्डस्य[5] ध्रुवं क्षमः ॥११०॥

संस्तम्भ्याम्भः प्रविष्टेन तेन नागसरोन्तरम् । तारुण्यं फणिकन्यानां निन्ये संभोगभव्यताम् ॥१११॥

तत्कालप्रबलप्रेद्धबौद्धवादिसमूहजित् । अवधूतोभवत्सिद्धस्तस्य ज्ञानोपदेशकृत् ॥११२॥

विजयेश्वरनन्दीशक्षेत्रज्येष्ठेशपूजने । तस्य सत्यगिरो राज्ञः प्रतिज्ञा सर्वदाभवत् ॥११३॥

ग्रामे ग्रामे स्थितैरश्वैर्धावनं प्रतिषिद्धवान् । स्वेनावहत्तं सततं नागः कोपि सुहृत्तया ॥११४॥

115 स रुद्धवसुधान्म्लेच्छान्निर्वास्याखर्वविक्रमः । जिगाय जैत्रयात्राभिर्महीमर्णवमेखलाम् ॥११५॥

ते य[1]त्रोज्झटितास्[2]तेन म्लेच्छाश्छादितमण्डलाः । स्थानमुज्झटडिम्बं तज्जनैरद्यापि गद्यते ॥११६॥

जित्वोर्वीं कन्यकुब्जाद्यां तत्रत्यं स[2] न्यवेशयत् । चातुर्वर्ण्यं निजे देशे धर्म्यांश्च व्यवहारिणः ॥११७॥

यथावद्वृद्धिमप्राप्ते[1] व्यवहारधनादिभिः । सामान्यदेशवद्राज्यं[2] तावदस्मिन्हि मण्डले ॥११८॥

धर्माध्यक्षो धनाध्यक्षः कोशाध्यक्षश्चमूपतिः । दूतः पुरोधा दैवज्ञः सप्त प्रकृतयोभवन् ॥११९॥ युगलकम् ॥

120 कर्मस्थानानि धर्म्याणि तेनाष्टादश कुर्वता । ततः प्रभृति भूपेन कृता यौधिष्ठिरी स्थितिः ॥१२०॥

स विक्रमप्रभावाभ्यां समुपार्जितया श्रिया । विदधे वारबाला[1]दीनग्रहारानुदग्रधीः ॥१२१॥

द्वारादिषु[1] प्रदेशेषु प्रभावोग्राण्युदग्रया । ईशानदेव्या तत्पत्न्या मातृचक्राणि चक्रिरे ॥१२२॥

---

१०२. [1]) $A_3$ writes the gloss इखलेत्रो between the lines and adds in margin: शुष्कलेत्रश्च वि[त]स्ता[त्र]श्च तौ शुष्कलेत्रवितस्तात्रौ । द्वितीया द्विवचनमेतत्. G adds to the gloss इखलेत्र another: उत्तरहिल्.—[2]) $A_2$ gloss बौधविहारैः. १०३. [1]) $A_2$ gloss विथवत्रो ; another gloss in margin smeared over with yellow paint and illegible. १०५. [1]) $A_3$ gloss सौधम्.—[2]) $A_3$ reads प्रासादो.—[3]) $A_1$ had first written निर्मितः (?) and then erased it. १०६. [1]) $A_4$ gloss आलस्यं. १०८. [1]) G gloss इन्द्रः.—[2]) Thus corrected by $A_3$ from $A_1$ श्रद्धया. १०९. [1]) $A_3$ reads भाश्चर्यचर्यतां.—[2]) Thus corrected by $A_2$ from $A_1$ निश्चयं. —[3]) Emended; A R G द्युस°. ११०. [1]) $A_3$ adds a marginal note, the last line of which has become faded ; this has been copied by a different hand below and is shown in brackets: सिद्धे रसे कोटिवेधिनि सति । हाटकार्पणैः स्वर्णदानैः कृत्वा स राजा ब्रह्माण्डस्य सुषिरतां शून्यतां हर्तुं दूरीकर्तुं ध्रुवं निश्चयेन क्षमः समर्थोभूत् । कोटिवेधिसिद्धरसप्राप्तिवशात्तादृशं सुवर्णं दातुं [शक्तोभूद्येन ब्रह्माण्डस्यापि पूरणं संभवेदिति भावः].—[2]) $A_3$ reads °वेदिनि.—[3]) $A_3$ reads सुरिक्ततां.—[4]) Thus corrected by $A_3$ from $A_1$ कर्तुं; thus also in R and G.—[5]) $A_3$ reads in margin ब्रह्माण्डस्य. ११६. [1]) The *akshara* य has been effaced in A at the beginning of a line and supplied by $A_4$ at the end of the preceding one ; G and R also यत्रो°.—[2]) $A_3$ gloss निकर्षिता. ११७. [1]) $A_3$ reads °कुब्जादौ.—[2]) $A_1$ had सं°; corrected into स which is found also G and R. ११८. [1]) Thus corrected by later hand from $A_1$ °प्रासं; G and R read as above.—[2]) $A_3$ reads °राज्ञां. १२१. [1]) $A_3$ reads वनबाला°. R has the gloss बारवलो. १२२. [1]) The faded gloss of $A_3$ [ह]स्तिशालादिषु has been repeated in margin by $A_4$.

श्रुतनन्दिपुराणः स व्यासान्तेवासिनो नृपः। सेवनं सोदरादीनां नन्दीशस्पर्धया व्यधात् ||१२३||
प्रतिष्ठां ज्येष्ठरुद्रस्य श्रीनगर्यां वितन्वता। तेन नन्दीशसंस्पर्धा न मेने सोदरं विना ||१२४||
विस्मारितो नित्यकृत्यं कार्यव्यग्रतयैकदा। विदूरसोदरजलाप्लावनालाभदुर्मनाः ||१२५|| 125
अपश्यन्निर्जलात्स्थानादकस्मादुत्थितं पयः। स सोदराविसंवादि[1] वर्णास्वादादिभिर्गुणैः ||१२६|| युगलकम् ||
प्रादुर्भूते ततस्तस्मिंस्तीर्थे कृतनिमज्जनः। स नन्दिरुद्रस्पर्धायां मानी पर्याप्तिमासदत् ||१२७||
तेन जातु[1] परीक्षार्थं निक्षिप्तः सोदरान्तरे। सपिधानाननः स्वर्णभृङ्गारः सुषिरोदरः[2] ||१२८||
दिनद्वयेन सार्धेन श्रीनगर्युद्भवाम्भसः। उन्मग्नः स महीभर्तुस्तस्य चिच्छेद संशयम् ||१२९||
नूनं नन्दीश एवासौ भोक्तुं भोगानवातरत्। दृष्टादृष्टक्रियासिद्धिर्न भवेत्तादृगन्यथा ||१३०|| 130
राज्ञस्तस्य कदाचित्तु व्रजतो विजयेश्वरम्। ययाचे काचिदबला भोजनं मार्गमध्यगा ||१३१||
यथेष्टम[1]शनं दातुं ततोनेन प्रतिश्रुते। व्यवृणोद्विकृता भूत्वा सा नृमांसाश्रयां स्पृहाम् ||१३२||
स सत्त्वहिंसाविरतस्तस्यै मांसं[1] स्वविग्रहात्। अनुज्ञां प्रददौ भोक्तुं यदा सैवं तदाब्रवीत् ||१३३||
बोधिसत्त्वोसि भूपाल कोपि सत्त्वोर्जितव्रतः। कारुण्यं प्राणिषु दृढं यस्येदृक्के महात्मनः ||१३४||
बौद्धभाषामजानानो माहेश्वरतया नृपः। को बोधिसत्त्वो यं भद्रे मां वेत्सीति जगाद ताम् ||१३५|| 135
पुनर्बभाषे सा भूपं श्रोतव्यं मत्प्रयोजनम्। अहं ह्युत्थापिता बौद्धैः क्रोधाद्विप्रकृतैस्त्वया ||१३६||
लोकालोकाद्रिपार्श्वस्थास्तामस्यः कृत्तिका वयम्। बोधिसत्त्वैकशरणाः काङ्क्ष्न्त्यस्तमसः[1] क्षयम् ||१३७||
लोके भगवतो लोकनाथादारभ्य केचन। ये जन्तवो गतक्लेशा बोधिसत्त्वानवेहि तान् ||१३८||
सागसेपि न कुप्यन्ति क्षमया[1] चोपकुर्वते। बोधिं[2] स्वस्यैव नेष्यन्ति[3] ते विश्वधरणोद्यताः[4] ||१३९||
विहारतूर्यनिर्घोषैरुन्निद्रः प्रेरितः खलैः। पुरा भवान्व्यधात्क्रोधाद्विहारोद्दलनं यदा[1] ||१४०|| 140
महाशाक्यः[1] स नृपतिर्न शक्यो बाधितुं त्वया। तस्मिन्दृष्टे तु कल्याणि भविता ते तमःक्षयः ||१४१||
अस्मद्गिरा प्रेरणीयो विहारकरणाय सः[1]। दत्त्वा स्वहेमसंभारं त्वया मलिनितः[2] खलैः ||१४२||
तस्मिन्कृते न जायेत विहारच्छेदवैशसम्। तस्यं[1] तत्प्रेरकाणां च प्रायश्चित्तं कृतं भवेत् ||१४३||
क्रुद्धैर्बौद्धैरनुध्याता त्वद्वधाय[1] प्रधाविता। अनुशिष्टा समाहूय बोधिसत्त्वैस्तदेत्यहम् ||१४४|| कुलकम् ||
तस्मात्सत्त्वातिरेकस्ते[1] मिषादेवं परीक्षितः। क्षीणपापाद्य संवृत्ता[2] स्वस्ति ते साधयाम्यहम्[3] ||१४५|| 145
कृतप्रतिश्रवे राज्ञि विहारकृतये पुनः[1]। प्रहर्षोत्फुल्लनयना कृत्यादेवी तिरोदधे ||१४६||
अथ कृत्याश्रमे कृत्वा विहारं वसुधाधिपः। तत्रैव क्षीणतमसं कृत्यादेवीमसंधयत्[1] ||१४७||
विधाय सोऽश्म[1]प्रासादं नन्दिक्षेत्रे क्षमापतिः। भूतेशाय क्षमां[2] कोशैः पूजां रत्नमयीं ददौ ||१४८||

---

१२६. [1]) $A_3$ gloss सदृश. G has the marginal gloss सोदरबल् गगरिबल्. १२८. [1]) $A_4$ reads तत्र. This various reading is not found in G and R.—[2]) $A_3$ gloss रिक्त. १३२. [1]) Thus $A_1$; also G and R. In A the various reading यथेच्छम् is indicated between the lines, perhaps by $A_1$. १३३. [1]) Thus corrected by $A_3$ from $A_1$ दातुं. G and R read मांसं. १३७. [1]) $A_2$ reads तपसः. १३९. [1]) $A_3$ कृपया.—[2]) $A_3$ हितं.—[3]) $A_3$ नेच्छन्ति.—[4]) $A_3$ विश्वोद्धर°. १४०. [1]) $A_3$ marginal gloss तदा बोधिसत्त्वैरहमित्यनुशिष्टा इत्यनेन वक्ष्यमाणेन संबन्धः. १४१. [1]) Thus corr. by later hand from $A_1$ °शाक्यः; $A_3$ °सत्त्वः. G and R have both °शाक्यः and °सत्त्वः. १४२. [1]) $A_3$ gloss राजा.—[2]) $A_3$ gloss मलिनः कृतः. १४३. [1]) $A_3$ gloss राज्ञः. १४४. [1]) $A_3$ बोधाय (?) in margin; struck out. १४५. [1]) $A_3$ gloss सत्त्वाधिक्यं.—[2]) $A_3$ जाता. G reads °पापोद्यसंवृत्तः.—[3]) $A_3$ gloss षिधु गत्याम्. १४६. [1]) $A_2$ ततः. १४७. [1]) $A_2$ °बन्धयत्. G has both readings, R only that of $A_2$. १४८. [1]) $A_3$ as above; $A_1$ सोष्म°.—[2]) Thus $A_1$; $A_3$ समं.

चीरमोचनतीर्थान्तर्गणरात्रं तपस्यता । ब्रह्मासननिविष्टेन ध्याननिःस्पन्दमूर्तिना ॥१४९॥

150 राज्ञा कनकवाहिन्याः सुचिरात्पुण्यकर्मणा । नन्दीशस्पर्शनोत्कण्ठा तेनानीयत कुण्ठताम् ॥१५०॥

ह्लादोदयान्नृत्तगीतक्षणे नर्तितुमुत्थितम् । प्रददौ ज्येष्ठरुद्राय स्वावरोधवधूशतम् ॥१५१॥

भुक्त्वैश्वर्यं स पर्यन्ते प्रविष्टश्चीरमोचनम् । पत्न्या समं ययौ राजा सायुज्यं गिरिजापतेः ॥१५२॥

अथाशोककुलोत्पन्नो यद्वान्याभिजनोद्भवः । भूमिं दामोदरो नाम जुगोप जगतीपतिः ॥१५३॥

ऋद्ध्या जाज्वलितस्योच्चैर्माहेश्वरशिखामणेः । अद्यापि श्रूयते यस्य प्रभावो भुवनाद्भुतः ॥१५४॥

155 हरप्रसादपात्रेण सच्चरित्रानुरागिणा । बबन्ध सुखिना सख्यं येन वैश्रवणः स्वयम् ॥१५५॥

कुबेर इव यो राज्ञामग्र्यः स्वाज्ञाविधायिनः । आदिश्य गुह्यकान्दीर्घं गुड्डसेतुमबन्धयत् ॥१५६॥

सूदे दामोदरीये यत्तस्यासीत्स्वकृतं पुरम् । सेतुना तेन तत्रैच्छत्कर्तुं सोम्भःप्रतारणम् ॥१५७॥

हितं लोकोत्तरं किंचिच्चिकीर्षोरुन्नतात्मनः । रोहन्ति हा धिक्प्रत्यूहा मितपुण्यतया नृणाम् ॥१५८॥

स हि कारयितुं यत्नैर्यतते स्म स्वमण्डले । दीर्घानश्ममयान्सेतूंस्तोयविप्लवशान्तये ॥१५९॥

160 तपोविभूतयोचिन्त्या द्विजानामुग्रतेजसाम् । तादृशामपि ये कुर्युः प्रभावस्य विपर्ययम् ॥१६०॥

दायादादिबलैर्नष्टा दृष्टा भूयः समुत्थिता । श्रीर्विप्रावज्ञया राज्ञामपुनःसंभवा पुनः ॥१६१॥

श्राद्धार्थमुत्थितः स्नातुं द्विजैः कैश्चिद्बुभुक्षितैः । प्राक्स्नानाद्भोजनं राजा स कदाचिदयाच्यत ॥१६२॥

यियासुना वितस्तान्तर्यदा तेनावधीरितम् । तदा प्रभावात्ते तस्य तां धुनीमग्रतो व्यधुः ॥१६३॥

सेयं वितस्ता दृष्ट्वैनां भोजयास्मान्स तैरिति । उक्तोपि मायाविहितामशासीत्सरिदाहृतिम् ॥१६४॥

165 भोज्यं ददामि नास्नातो विप्राः सर्पत सांप्रतम् । तेनेत्युक्तास्तमशपंस्ततः सर्पो भवेति ते ॥१६५॥

अशेषमेकेनैवाह्ना श्रुत्वा रामायणं तत्र । शापस्य शान्तिर्भवितेत्यूचिरे ते प्रसादिताः ॥१६६॥

स दामोदरसूदान्तर्धावन्दूरमुदन्यया । शापोष्णश्वासधूमेन जनैरद्यापि लक्ष्यते ॥१६७॥

अथाभवन्स्वनामाङ्कपुरत्रयविधायिनः । हुष्कजुष्ककनिष्काख्यास्त्रयस्तत्रैव पार्थिवाः ॥१६८॥

स विहारस्य निर्माता जुष्को जुष्कपुरस्य यः । जयस्वामिपुरस्यापि शुद्धधीः संविधायकः ॥१६९॥

170 ते तुरुष्कान्वयोद्भूता अपि पुण्याश्रया नृपाः । शुष्कलेत्रादिदेशेषु मठचैत्यादि चक्रिरे ॥१७०॥

प्राज्ये राज्यक्षणे तेषां प्रायः कश्मीरमण्डलम् । भोज्यमास्ते स्म बौद्धानां प्रव्रज्यार्जिततेजसाम् ॥१७१॥

तदा भगवतः शाक्यसिंहस्य परनिर्वृतेः । अस्मिन्महीलोकधातौ सार्धं वर्षशतं ह्यगात् ॥१७२॥

बोधिसत्त्वश्च देशेस्मिन्नेको भूमीश्वरोभवत् । स च नागार्जुनः श्रीमान्षडर्हद्वनसंश्रयी ॥१७३॥

अथ निष्कण्टको राजा कण्टकोत्सामहारदः । अभीर्बभूवाभिमन्युः शतमन्युरिवापरः ॥१७४॥

---

१५०. 1) G has the *v. l.* स्पर्धनो° in margin.— 2) Thus $A_3$; $A_1$ कुण्डताम्. १५१. 1) $A_3$ सोवरोध°. १५३. 1) $A_3$ gloss कुलं. १५४. 1) Thus $A_3$; $A_1$ अस्यापि. १५५. 1) Thus $A_3$; $A_1$ °प्रासादमात्रेण. १५६. 1) $A_3$ gloss गुडसुथो इति भाषया. १५७. 1) $A_3$ gloss दान्दुर् ओडर्. १६०. 1) Thus corr. by $A_3$ from $A_1$ °तयश्चिन्त्या.— 2) $A_3$ gloss दामोदरनृपसदृशानां. १६१. 1) $A_3$ °बलान्नष्टा. १६३. 1) 2) 3) $A_3$ glosses ब्राह्मणः, नदीं, चक्रुः. १६४. 1) $A_3$ स्पृष्ट्वै°.— 2) $A_3$ gloss राजा.— 3) $A_3$ gloss मायया. १६५. 1) $A_2$ gloss ब्राह्मणाः. १६६. 1) Thus $A_1$; $A_3$ च in margin. G and R follow $A_3$. १६७. 1) $A_2$ gloss तृष्णया.— 2) $A_3$ शोषोष्ण°. १६८. 1) $A_2$ glosses above these names उष्कोरो, जोकोरो, कानेस्पुर्. १६९. 1) $A_2$ gloss जोकोरस्य.— 2) $A_3$ जिहासपुर. १७०. 1) $A_3$ पुण्याशया.— 2) $A_2$ gloss हुखलेत्रो.— 3) $A_3$ °चैत्यानि. १७१. 1) $A_3$ gloss व्रतं नाम. १७३. 1) Thus corr. by $A_3$ from $A_2$ भूम्येश्वरो.— 2) $A_2$ वसत्.— 3) Thus corr. by $A_2$ from $A_1$ °हृन्वन; $A_2$ gloss हर्वन् ग्रामे. १७४. 1) $A_3$ gloss कण्डोर्.

स्वनामाङ्कं[1] शशाङ्काङ्क[2]शेखरं विरचय्य सः । पराध्यविभवं श्रीमानभिमन्युपुरं व्यधात् ॥१७५॥ 175
चन्द्राचार्यादिभिर्लब्ध्वा देशात्तस्मात्[1]तदागमम् । प्रवर्तितं महाभाष्यं स्वं च व्याकरणं[2] कृतम् ॥१७६॥
तस्मिन्नवसरे बौद्धा देशे प्रबलतां ययुः । नागार्जुनेन सुधिया बोधिसत्त्वेन पालिताः ॥१७७॥
ते वादिनः पराजित्य वादेन निखिलान्बुधान् । क्रियां नीलपुराणोक्तामच्छिन्दन्नागमद्विषः ॥१७८॥
मण्डले विप्लुताचारे विच्छिन्नबलिकर्मभिः । नागैर्जनक्षयश्चक्रे प्रभूतहिमवर्षिभिः ॥१७९॥
हिमान्यां बौद्धबाधाय पतन्त्यां प्रतिवत्सरम् । शीते दार्वाभिसारादौ[1] षण्मासान्पार्थिवोवसत् ॥१८०॥ 180
तदा प्रभावः कोप्यासीद्बलिहोमविधायिनः[1] । नानश्यन्यद्दशाद्विप्रा बौद्धाश्च निधनं गताः ॥१८१॥
नीलमुद्दिश्य देशस्य रक्षितारमहीश्वरम् । काश्यपश्चन्द्रदेवाख्यस्तपस्तेपे[1] ततो द्विजः ॥१८२॥
तस्य प्रत्यक्षतां यातो नीलस्तुहिनविप्लवम् । न्यवारयज्जगादापि स्वपुराणविधिं पुनः ॥१८३॥
आद्येन चन्द्रदेवेन शमितो यक्षविप्लवः । द्वितीयेन तु देशेस्मिन्दुःसहो भिक्षु[1]विप्लवः ॥१८४॥
राजा तृतीयो गोनन्दः प्राप्तो राज्ये[1] तदन्तरे । यात्रायागादि[2] नागानां प्रावर्तयत पूर्ववत् ॥१८५॥ 185
राज्ञा प्रवर्तिते तेन पुनर्नीलोदिते विधौ । भिक्षवो हिमदोषाश्च सर्वतः प्रशमं ययुः ॥१८६॥
काले काले प्रजापुण्यैः संभवन्ति महीभुजः । यैर्मण्डलस्य क्रियते दूरोत्सन्नस्य योजनम् ॥१८७॥
ये प्रजापीडनपरास्ते विनश्यन्ति सान्वयाः[1] । नष्टं तु ये योजयेयुस्तेषां वंशानुगाः श्रियः ॥१८८॥
इत्येतत्प्रतिवृत्तान्तं देशे[1]स्मिन्वीक्ष्य लक्षणम् । भाविनां भूमिपालानां प्राज्ञैर्ज्ञेयं शुभाशुभम् ॥१८९॥
नवीकृतवतो देशं तस्य[1] वंश्यैरियं मही । सिद्धैः प्रवरसेनाद्यैश्चिरं भुक्ता सुकर्मभिः ॥१९०॥ 190
गोनन्दान्वयिनामाद्यः स रघूणां रघुर्यथा । नृपतिः काश्यपीं वर्षान्पञ्चत्रिंशतिमन्वशात् ॥१९१॥
वर्षषष्टिं सषण्मासैः षड्भिर्वर्षैर्विवर्जिताम् । विभीषणाभिधोरक्षत्क्षितिं गोनन्दनन्दनः ॥१९२॥
इन्द्रजिद्रावणावास्तां पितापुत्रौ नृपौ क्रमात् । पञ्चत्रिंशत्सहार्धाश्च वर्षास्त्रिंशद्ययोर्ययुः ॥१९३॥
बिन्दुरेखाच्छविर्यस्य दृष्टा भाव्यर्थशंसिनी । स रावणस्य[1] पूजार्थं[2] लिङ्गं भाति वटेश्वरः ॥१९४॥
चतुःशालामठस्यान्तःकृतायादायि भूभुजा । वटेश्वराय निखिलं तेन कश्मीरमण्डलम् ॥१९५॥ 195
पञ्चत्रिंशतमब्दानां क्ष्मां बुभोज महाभुजः । रावणक्षोणिभृत्सूनुः सार्धमन्यो विभीषणः ॥१९६॥
किंनरापरनामाथ किंनरैर्गीतविक्रमः । विभीषणस्य पुत्रोभून्नरनामा नराधिपः ॥१९७॥
सदाचारोपि स नृपः प्रजाभाग्यविपर्ययैः । व्यधाद्विषयदोषेण महानर्थपरंपराम् ॥१९८॥
विहारे निवसन्नेकः किंनरग्राम[1]वर्तिनि । तस्य योगबलात्कोपि श्रमणो[2]पाहरत्प्रियाम् ॥१९९॥
विहाराणां सहस्राणि तत्कोपान्निर्ददाह सः । अजिग्रहच्च तद्ग्रामान्द्विजैर्मध्यमठाश्रयैः ॥२००॥ 200
ऋद्धापणं राजपथैर्नौयानोज्ज्वलनिम्नगम् । स्फीतपुष्पफलोद्यानं स्वर्गस्येवाभिधान्तरम् ॥२०१॥

---

१७५. 1) $A_1$ seems to have read °ङ्क ; corr. as above by $A_3$.— 2) $A_2$ reads शशाङ्कार्ध°. १७६. 1) $A_1$ originally as above; $A_1$ or a later hand has altered this to °देशं तस्मात्, but $A_3$ has restored the first reading. G and R have °देशं in text and °देशात् in margin.— 2) $A_2$ gloss चन्द्रव्याकरणं. १८०. 1) $A_2$ gloss भेम्भेर् दानगले देशे. १८१. 1) $A_3$ °धायिनाम्. १८२. 1) $A_1$ ततस्तेपे ; corr. by $A_2$ as above. १८४. 1) $A_2$ बौद्धवि°. १८५. 1) $A_1$ as above; a later hand corr. तृतीयगोनन्दः प्राप्तराज्यस्तद°.— 2) $A_4$ gloss तीर्थेषु. १८८. 1) $A_2$ नश्येयुः सहान्वयाः. १८९. 1) Thus $A_3$; $A_1$ देवे. १९०. 1) $A_2$ gloss गोनन्दस्य. १९४. 1) $A_2$ gloss राज्ञः.— 2) $A_3$ पूजार्हं. १९९. 1) $A_2$ gloss कानीर् ग्रामः प्रसिद्धः.— 2) $A_3$ gloss बौद्धः.

दिग्जयोपार्जितैर्वित्तैर्जितविश्वेश[1]पत्तनम् । वितस्तापुलिने तेन नगरं निरमीयत ॥२०२॥ युगलकम् ॥
तत्रैकस्मिन्किलोद्याने स्वच्छस्वादुजलाञ्चितम् । आसीत्सुश्रवसो नाम्नो नागस्य वसतिः सरः ॥२०३॥
कदाचित्तस्य दूराध्वक्लान्तो मध्यंदिने[1] युवा । छायार्थी तत्सरःकच्छं विशाखाख्योविशद्द्विजः ॥२०४॥
205 सच्छायपादपतले समीरैः शमितक्लमः । शनैर्जल[1]मुपस्पृश्य भोक्तुं सक्तून्प्रचक्रमे ॥२०५॥
तान्पाणौ गृह्णतैवाथ तेन तीरविहारिभिः । पूर्वमाकर्णितो हंसैः शुश्रुवे नूपुरध्वनिः ॥२०६॥
निर्गते[1] मञ्जरीकुञ्जादपश्यत्पुरतस्ततः । कन्ये नीलनिचोलिन्यौ स केचिच्चारुलोचने ॥२०७॥
कर्णिका[1]पद्मरागाञ्जनाललीलायितस्पृशा । मनोज्ञधवलापाङ्गे तनीयोञ्जनरेखया ॥२०८॥
हारिनेत्राञ्चलै[1]र्मन्दमारुतान्दोलनाकुलैः । सनाथांसयुगे रूपपताकापल्लवैरिव ॥२०९॥ तिलकम् ॥
210 ते शशाङ्कानने दृष्ट्वा शनैरभ्यर्णमागते । विररामाशनारम्भान्मुहुर्व्रीडाजडीकृतः ॥२१०॥
भुञ्जाने कच्छगुच्छानां[1] शिम्बी[2]रम्बुजलोचने । ते पुनर्दृष्टवानग्रे किंचिद्व्यापारितेक्षणः ॥२११॥
आकृतेर्हा धिगीदृश्या भोज्यमेतदिति द्विजः । ध्यायन्कृपार्द्रः संमान्य स[1] ते सक्तूनभोजयत् ॥२१२॥
उपनिन्ये च संगृह्य पुटकैश्चटसीकृतैः[1] । तयोः पानाय पानीयं सरसः स्वच्छशीतलम्[2] ॥२१३॥
आचान्ते[1] शुचितां प्राप्ते कृतासनपरिग्रहे । ततश्च वीजयन्पर्णतालवृन्तैरभाषत ॥२१४॥
215 भवत्यौ पूर्वसुकृतैः कैश्चित्संप्राप्तदर्शनः । चापलाद्विप्रसुलभात्प्रष्टुमिच्छत्ययं जनः ॥२१५॥
कल्याणिनीभ्यां कतमा पुण्या जातिः परिष्कृता । कुत्र वा क्रान्तमेतादृग्विरसं येन भुज्यते ॥२१६॥
एका तमूचे विद्ध्यावामस्य सुश्रवसः सुते । स्वादुभोक्तव्यम[2]प्राप्तं किमीदृग्नोपभुज्यते ॥२१७॥
पित्रा विद्याधरेन्द्राय प्रदातुं परिकल्पिता । इरावत्यहमेषा च चन्द्रलेखा यवीयसी ॥२१८॥
पुनर्द्विजोभ्यधादेवं नैष्किंचन्यं किमस्ति वः । ताभ्यामवादि तातोत्र हेतुं वेत्ति स पृच्छ्यताम् ॥२१९॥
220 ज्यैष्ठे[1]त्र कृष्णद्वादश्यां यात्रायै तक्षकस्य तम् । आगतं चूडया[2] तोयस्यन्दिन्या ज्ञास्यसि ध्रुवम् ॥२२०॥
द्रक्ष्यस्यावामपि तदा तदभ्यर्णकृतस्थिती । इत्युक्त्वा फणिकन्ये ते क्षणादास्तां तिरोहिते ॥२२१॥
क्रमात्प्रववृते सोथ नटचारणसंकुलः । प्रेक्षि[1]लोकसमाकीर्णस्तत्र यात्रामहोत्सवः ॥२२२॥
द्विजोपि कौतुकाकृष्टः पर्यटन्नङ्गमञ्जसा । कन्योक्तचिह्नज्ञातस्य नागस्यान्तिकमाययौ ॥२२३॥
पार्श्वस्थिताभ्यां कन्याभ्यां पूर्वमावेदितो[1]र्थ सः । द्विजन्मने व्याजहार स्वागतं नागनायकः ॥२२४॥
225 ततः कथान्तरे क्वापि पृष्टः कारणमापदाम् । जगाद तं द्विजन्मानं निःश्वस्य श्वसनाशनः[1] ॥२२५॥
अभिमानवतां ब्रह्मन्युक्तायुक्तविवेकिनाम् । युज्यतेवश्यभोग्यानां दुःखानामप्रकाशनम् ॥२२६॥
परदुःखं समा[1]कर्ण्य स्वभावसुजनो जनः । उपकारासमर्थत्वात्प्राप्नोति हृदयव्यथाम् ॥२२७॥

---

२०२. 1) $A_3$ gloss कुबेर. २०४. 1) $A_3$ gloss मध्याह्ने. २०५. 1) $A_3$ सरोजल°. २०७. 1) $A_3$ gloss द्विवचनम्. २०८. 1) $A_2$ gloss कर्णिकायां कर्णाभरणे. २०९. 1) $A_3$ gloss अंशुक. २११. 1) 2) $A_3$ glosses कछ्यधान्ये, हिम इति भाषया. २१२. 1) $A_3$ gloss विप्रः २१३. 1) Thus corr. from $A_1$ °श्चटसीत्कृतैः by $A_3$ which adds the note चटसीकृतैः जलाहरणभाण्डतया विरचितैः पुटकैः पत्रपुटैः सङ्गृह्य सम्यग्गृहीत्वा पानीयं चोपनिन्ये। चटसं कुम्भाद्यभावे कृत्रिममुदकोत्क्षेपणभाण्डम्। इति विवरणकाराः। चटसीकृतवल्पुटैर्जलानयनवर्णनाऽन्यत्रापि कृता। यथा कौसल्यां प्रति सुमंत्रो रामवनगमनदशां श्रावयति। विहितशयनोनिकन्यासैरनोकहपल्लवैः कलितकलशीकार्यैः कुम्भीदलैश्चटसीकृतैः। अथ विरचितः किञ्चिन्म्लानप्रभोह्वि सुतेन ते परिसरसरिज्जम्बूकुञ्जे निकेतपरिग्रह इति ॥.—2) Thus corr. by $A_3$ from $A_1$ °शीत्कृतम्. २१४. 1) $A_3$ gloss चमु अदने. २१७. 1) This verse is supplied in margin by a hand resembling $A_3$; found in G R Edd.— 2) $A_2$ gloss किञ्चित्. २२०. 1) Emended; A R G ज्येष्ठे.— 2) Thus corr. by $A_1$ from चूलया. २२२. 1) $A_3$ gloss प्रेक्षकः. २२४. 1) $A_3$ °वेदिताय. २२५. 1) $A_3$ gloss नागः. २२७. 1) $A_3$ यदा.

वृत्तिं स्वां बहु मन्यते हृदि शुचं धत्तेनुकम्पोक्तिभिर्व्यक्तं निन्दति योग्यतां मितमतिः[1] कुर्वन्स्तुतीरात्मनः[2] ।
गर्ह्योपायनिषेवणं कथयति स्थास्नुं वदन्व्यापदं श्रुत्वा दुःखमरुंतुदां वितनुते पीडां जनः[3] प्राकृतः ॥२२८॥
अत एव विवेक्तॄणां यावदायुः स्वमानसे । जीर्णानि सुखदुःखानि दहत्यन्ते चितानलः ॥२२९॥
कः स्वभावगभीराणां लक्षयेद्बहिरापदम् । बालापत्येन भृत्येन यदि सा न प्रकाश्यते ॥२३०॥ 230
तदस्मिन्नेतयोर्बाल्याद्वस्तुनि व्यक्तिमागते । तवाग्रे गोपनं साधो न ममाप्युपपद्यते ॥२३१॥
त्वयाप्यस्मद्धितार्थाय[1] निसर्गसरलात्मना । ईषत्प्रयासः कल्याणिन्क्रियतां यदि शक्यते ॥२३२॥
योयं तरुतले मुण्डश्चूडालो दृश्यते व्रती । अमुना सस्यपालेन कान्दिशीकाः कृता वयम् ॥२३३॥
अभुक्ते मान्त्रिकैरन्ने नवे[1] नागैर्न भुज्यते । अयं नात्ति च तत्तेन समयेन हता वयम् ॥२३४॥
क्षेत्राणि रक्षत्येतस्मिन्दृष्ट्वापि फलसंपदम् । भोक्तुं नैव समर्थाः स्मः प्रेता इव सरिज्जलम् ॥२३५॥ 235
तथा कुरु यथा भ्रश्येत्समयादेष नैष्ठिकः । योग्यां प्रतिक्रियां विद्मो वयमप्युपकर्तृषु ॥२३६॥
स तथेति ततो नागमुक्त्वा यत्नपरो द्विजः । अचिन्तयद्दिवारात्रं[1] सस्यपालस्य वञ्चनाम् ॥२३७॥
गूढं तस्य बहिःक्षेत्रकुटीगर्भकृतस्थितेः । पच्यमानान्नभाण्डान्तर्नवान्नं न्यक्षिपत्[1]ततः ॥२३८॥
भुञ्जान एव तत्तस्मिन्क्षणादेव जहार सः । अहीन्द्रः करकासारवर्षी स्फीतां फलश्रियम् ॥२३९॥
तं च व्युत्क्रान्तदारिद्र्यः सरसोभ्यर्णमागतम् । कृतोपकारमन्येद्युर्निजोर्वीमनयद्द्विजम् ॥२४०॥ 240
स तत्र पितुरादेशात्कन्याभ्यां विहितार्हणः । अमर्त्यसुलभैर्भोगैरतोष्यत दिने दिने ॥२४१॥
कालेन सर्वानामन्त्र्य स्वां भुवं गन्तुमुद्यतः । प्रतिश्रुतवरं नागं चन्द्रलेखामयाचत ॥२४२॥
संबन्धायोग्यमपि तं कृतज्ञत्ववशंवदः । संविभेजे स भुजगः कन्यया च धनेन च ॥२४३॥
एवं नागवरावाप्तश्रियस्तस्य द्विजन्मनः । महान्नरपुरे कालस्तैस्तैर्नित्योत्सवैर्ययौ ॥२४४॥
भुजगेन्द्रतनूजापि तं पतिं पतिदेवता । अतोषयत्परार्ध्यश्रीः शीलाचारादिभिर्गुणैः ॥२४५॥ 245
तस्यां कदाचित्सौधाग्रस्थितायां प्राङ्गणाद्बहिः । आतपायोज्झितं धान्यं बुभुजे विहरन्हयः ॥२४६॥
तं वारयितुमाहूता भृत्या नासन्गृहे यदा । शिञ्जानमञ्जुमञ्जीरा सा तदावातरत्स्वयम् ॥२४७॥
एकहस्तधृतावेगस्रस्तशीर्षांशुकान्तया । तया पाणिसरोजेन धावित्वा सोथ ताडितः ॥२४८॥
भोज्यमुत्सृज्य यातस्य फणिस्त्रीस्पर्शतस्ततः । सौवर्णी पाणिमुद्राङ्के[1] तुरगस्योदपद्यत ॥२४९॥
तस्मिन्काले नरो राजा चारैस्तां चारुलोचनाम् । श्रुत्वा द्विजवधूं तस्थौ प्रागेवाङ्कुरितस्मरः ॥२५०॥ 250
तस्य धावन्तमुन्मत्तमन्तःकरणवारणम् । बलान्नियमितुं नासीदपवादभयाङ्कुशः ॥२५१॥
तस्मिन्नुद्वृत्तरागाग्निविप्लवे भूपतेः पुनः । उवाह हयवृत्तान्तो दृप्तवातानुकारिताम् ॥२५२॥
चक्रे पर्यस्तमर्यादः सरलाङ्गुलिशोभिना । स काञ्चनकराङ्केन शशाङ्केनेव वारिधिः ॥२५३॥
व्रीडानिगडनिर्मुक्तो दूतैराकूतशंसिभिः । तामुपच्छन्दयन्सोथ सुन्दरीमुदवेजयत् ॥२५४॥
सर्वोपायैरसाध्यां च विप्रस्तत्पतिरप्यसौ । तेनायाच्यत लुब्धेन रागान्धानां कुतस्त्रपा ॥२५५॥ 255

---

२२८. [1]) Thus corr. by $A_3$ from $A_1$ °मतेः.— [2]) Thus corr. by $A_2$ from $A_1$ स्तुतेरा°.— [3]) $A_2$ पुनः; $A_3$ gloss नीचो जनः. २३२. [1]) $A_2$ °द्धिताशने. २३४. [1]) $A_3$ अभुक्तं मान्त्रिकैरन्नं नवं. २३७. [1]) Thus $A_3$; $A_1$ °रात्रौ. २३८. [1]) Thus $A_1$; a later hand alters this into नवान्नान्यक्षिपत्, found also in G and R. २४९. [1]) Thus $A_3$; $A_1$ °मुद्राङ्कं.

अथ निर्भर्त्सनां तस्मादपि प्राप्तवतासकृत् । हठेन हर्तुं तां राज्ञा समादिश्यन्त सैनिकाः ॥२५६॥
तैर्गृहाग्रे कृतास्कन्दो निर्गत्यान्येन वर्त्मना । त्राणार्थी नागभवनं सजानिः प्राविशद्द्विजः ॥२५७॥
ताभ्यामभ्येत्य वृत्तान्ते ततस्तस्मिन्निवेदिते । क्रोधान्धः सरसस्तस्मादुज्जगाम फणीश्वरः ॥२५८॥
उद्गर्जज्जिह्मजीमूतजनितध्वान्तसंततिः । स घोराशनिवर्षेण ददाह सपुरं नृपम् ॥२५९॥
260 दग्धप्राण्यङ्गविगलद्वसासृक्स्नेहवाहिनी । मयूरचन्द्रकाङ्केव वितस्ता समपद्यत ॥२६०॥
शरणाय प्रविष्टानां भयाच्चक्रधरान्तिकम् । मुहूर्तान्निरदह्यन्त सहस्राणि शरीरिणाम् ॥२६१॥
मधुकैटभयोर्मेदः प्रागुर्वीरिव चक्रिणम् । दग्धानां प्राणिनां तत्तत्तदा सर्वाङ्गमस्पृशत् ॥२६२॥
स्वसा सुश्रवसो नागी रमण्याख्याद्रिगह्वरात् । साहायकायाश्मराशीन्समादाय तदाययौ ॥२६३॥
सा योजनाधिके शेषे मार्गस्यारात्सहोदरम् । कृतकार्यं निशम्याश्मवर्षं ग्रामेषु तज्जहौ ॥२६४॥
265 योजनानि ततः पञ्च जाता ग्रामधरा खिला । सा रमण्याटवीत्यद्याप्यस्ति स्थूलशिलाबिला ॥२६५॥
घोरं जनक्षयं कृत्वा प्रातः सानुशयोप्यहिः । लोकापवादनिर्विण्णः स्थानमुत्सृज्य तद्ययौ ॥२६६॥
दुग्धाब्धिधवलं तेन सरो दूरगिरौ कृतम् । अमरेश्वरयात्रायां जनैरद्यापि दृश्यते ॥२६७॥
श्वशुरानुग्रहान्नागीभूतस्यापि द्विजन्मनः । जामातृसर इत्यन्यत्तत्र च प्रथितं सरः ॥२६८॥
प्रजानां पालनव्याजान्निःशङ्कं क्षयकारिणः । अकस्मादन्तकाः केचित्संभवन्ति तथाविधाः ॥२६९॥
270 अद्यापि तत्पुरं दग्धं श्वभ्रीभूतं च तत्सरः । उपचक्रधरं दृष्ट्वा कथेयं स्मर्यते जनैः ॥२७०॥
राज्ञां रागः कियान्नाम दोषः स्वल्पदृशां मते । तत्तस्य तेन संवृत्तं यन्नाभूत्क्वापि कस्यचित् ॥२७१॥
सतीदैवतविप्राणामप्येकस्य प्रकोपतः । श्रुतो हि प्रतिवृत्तान्तं त्रैलोक्यस्यापि विप्लवः ॥२७२॥
चत्वारिंशतमब्दान्स मासैश्चोनां त्रिभिः समाम् । भुवं भुक्त्वा क्षितिवृषा दुर्नयेन क्षयं ययौ ॥२७३॥
अप्यल्पकालसंदृष्टप्राकाराट्टालमण्डलम् । तत्किंनरपुरं लेभे गन्धर्वनगरोपमाम् ॥२७४॥
275 एकस्तु तनयस्तस्य वैचित्र्यात्कर्मणां गतेः । स्वधात्र्या विजयक्षेत्रं नीतः प्राणैर्न तत्यजे ॥२७५॥
राजा सिद्धाभिधः सोथ तथा निःशेषितं जनम् । नवीचकार जलदो दावदग्धमिवाचलम् ॥२७६॥
इति वृत्तं महाश्चर्यं तस्य पित्र्यं महामतेः । संसारासारताज्ञाने प्राप पुण्योपदेशताम् ॥२७७॥
भोगयोगेन मालिन्यं नेतुं मध्यगतोपि सः । न शक्यते स्म पङ्केन प्रतिमेन्दुरिवामलः ॥२७८॥
दर्पज्वरोष्णभूपालमध्ये निर्ध्यायतोनिशम् । सुधासूतिकलामौलिं तस्यैवोल्लाघतोद्ययौ ॥२७९॥
280 गणितं गुणिना तेन मणींस्तृणमिवोज्झता । खण्डेन्दुमण्डनार्चायां मण्डनत्वमखण्डितम् ॥२८०॥
राज्ञस्तस्यैव राजश्रीः परलोकानुगाभवत् । यस्तामयोजयद्भर्तौ धर्मेणाव्यभिचारिणा ॥२८१॥
षष्टिमब्दान्प्रशास्योर्वीमासन्नानुचरान्वितः । आरुरोह सदेहोसौ लोकाञ्शशिशिखामणेः ॥२८२॥

---

२५६. 1) $A_3$ gloss तस्याः भर्तुः.—2) $A_3$ gloss चन्द्रलेखां. २६२. 1) $A_3$ तं तु तश. २६३. 1) $A_3$ gloss रमण्या नागी. २६४. 1) Thus $A_2$; $A_1$ °रान्महोदरम्. २६५. 1) $A_2$ gloss रमण्याटवी रमेआडू इति प्रसिद्धः.— 2) $A_1$ originally °व्यस्थि, altered by later hand as above. G and R °व्यस्ति. २६७. 1) $A_2$ adds the note अमरेश्वरयात्रायां प्रागुद्दिष्टोयं नागः सुश्रवा इत्याख्यः सुश्रम् नाग इति भाषया प्रसिद्धः तस्यैवोपरि [निक]टस्थले जामा[त्र]नाग इति भाषया प्रसिद्धः स विशाखनामा ब्राह्मण एव निजश्वशुरानुग्रहेण नागीभूतो नाग इत्यर्थः. The *aksharas* in brackets are effaced in A and have been supplied here from R. २६९. 1) A G R निशङ्कं°.— 2) 3) $A_3$ glosses राजानः, नरनामसदृशाः. २७१. 1) $A_3$ राज्ञो.—2) Emended; A G R कियन्नाम. २७३. 1) $A_3$ gloss इन्द्रः. २७४. 1) $A_3$ अत्यल्प°. २८१. 1) Thus $A_1$; $A_3$ धर्मेण व्य°.

भृत्या नरं समाश्रित्य प्रययुः शोचनीयताम् । तद्धतं तु समालम्ब्य प्रभुं भुवनवन्द्यताम्[1] ॥२८३॥
यात्याश्रितः किल समाश्रयणीयलभ्यां निन्द्यां गतिं जगति सर्वजनार्चितां वा ।
गच्छत्यधस्तृणगुणः श्रितकूपयन्त्रः पुष्पाश्रयी सुरशिरोभुवि रूढिमेति ॥२८४॥
सिद्धः सिद्धः सदेहोयमिति शब्दं सुरा दिवि । प्राघोषयंस्ताडयन्तः[1] पटहं सप्त वासरान् ॥२८५॥ 285
उत्पलाक्ष इति ख्यातिं पेशलाक्षतया[1] गतः । तत्सूनुस्त्रिंशतं सार्धां वर्षाणामन्वशान्महीम् ॥२८६॥
तस्य सूनुर्हिरण्याक्षः स्वनामाङ्कं[1] पुरं व्यधात् । क्ष्मां सप्तत्रिंशतिं[2] वर्षान्सप्त मासांश्च भुक्तवान् ॥२८७॥
हिरण्यकुल इत्यस्य हिरण्योत्सकृदात्मजः । षष्टिं षष्टिं वसुकुलस्तत्सूनुरभवत्समाः ॥२८८॥
अथ म्लेच्छगणाकीर्णे मण्डले चण्डचेष्टितः । तस्यात्मजोभून्मिहिरकुलः कालोपमो नृपः ॥२८९॥
दक्षिणां सान्तकामाशां स्पर्धया जेतुमुद्यता । यन्मिषादुत्तरहरिद्बभारान्यमिवान्तकम् ॥२९०॥ 290
सांनिध्यं[1] यस्य सैन्यान्तर्हन्यमानाशनोत्सुकान् । अजानन्गृध्रकाकादीन्दृष्ट्वाग्रे धावतो जनाः ॥२९१॥
दिवारात्रं हतप्राणिसहस्रपरिवारितः । योभूद्भूपालवेतालो विलासभवनेष्वपि ॥२९२॥
बालेषु करुणा स्त्रीषु घृणा वृद्धेषु गौरवम् । न बभूव नृशंसस्य यस्य घोराकृतेर्गतः ॥२९३॥
स जातु देवीं संवीतसिंहलां[1]शुककञ्चुकाम् । हैमपादाङ्कितकुचां दृष्ट्वा जज्वाल मन्युना ॥२९४॥
सिंहलेषु नरेन्द्राङ्घ्रिमुद्राङ्कः क्रियते पटः । इति कञ्चुकिना पृष्टेनोक्तो यात्रामदात्ततः ॥२९५॥ 295
तत्सेनाकुम्भिदानाम्भोनिम्नगाकृतसंगमः । यमुनालिङ्गनप्रीतिं प्रपेदे दक्षिणार्णवः ॥२९६॥
स सिंहलेन्द्रेण समं संरम्भादुदपाटयत् । चिरेण चरणस्पृष्टप्रियालोकनजां रुषम्[1] ॥२९७॥
दूरात्तत्सैन्यमालोक्य लङ्कासौधैर्निशाचराः । भूयोपि राघवोद्योगमाशङ्क्य प्रचकम्पिरे ॥२९८॥
स तत्रान्यं नृपं दत्त्वा तीव्रशक्ति[1]रुपाहरत् । पटं यमुषदेवाख्यं मार्तण्डप्रतिमाङ्कितम् ॥२९९॥
व्यावृत्य चोलकर्णाटलाटादींश्च नरेश्वरान् । सिन्धुरानिव गन्धेभो गन्धेनैव व्यदारयत् ॥३००॥ 300
तस्मिन्प्रयाते प्रातिभ्यः शशंसुस्तत्पराभवम् । नगर्यो नरनाथेभ्यस्त्रुटचदट्टालमेखलाः ॥३०१॥
काश्मीरं द्वारमा[1]साद्य श्वभ्रभ्रष्टस्य दन्तिनः । श्रुत्वा स त्रासजं घोषं तोषरोमाञ्चितोभवत् ॥३०२॥
तदाकर्णनसंरम्भे सहर्षोथ विरुद्धधीः । शतमन्यद्गजेन्द्राणां हठेन निरलोठयत् ॥३०३॥
स्पर्शोङ्गानि यथा वाचं कीर्तनं पापिनां तथा । संदूषयेदतो नोक्ता तस्यान्यापि नृशंसता ॥३०४॥
को वेत्त्यद्भुत[1]चेष्टानां कृत्यं [illegible]कृतचेतसाम् । धर्मं सुकृतसंप्राप्तिहेतोः सोपि यदाददे ॥३०५॥ 305
[illegible]ीनगर्यां हि दुर्बुद्धिर्विदधे मिहिरेश्वरम् । होलडायां[1] स मिहिरपुराख्यं पृथुपत्तनम् ॥३०६॥
[illegible]ग्रहाराञ्जगृहिरे गान्धारा ब्राह्मणास्ततः । समानशीलास्तस्यैव ध्रुवं तेपि द्विजाधमाः ॥३०७॥

२८३. [1]) Thus corr. by $A_2$ from $A_1$ °वन्ध्यताम्. २८५. [1]) Thus $A_3$; $A_1$ प्रोद्घोषयन्ताड°. २८६. [1]) Thus corr. by later hand from $A_1$ पेशलाक्षितया. २८७. [1]) $A_2$ gloss रण्येल्, with note स्वनामाङ्कपुरप्रणीरित्यपि पाठः.—[2]) A सप्तार्त्रिं°. २९१. [1]) $A_2$ gloss हन्यमानानां लोकानां यदशनं । अदनं । तत्रोत्सुकाः. २९४. [1]) $A_2$ gloss सिङ्गालद्वीप. २९७. [1]) Thus corr. by $A_1$ from रुजम्. २९९. [1]) [illegible]hus corr. by $A_3$ from $A_1$ °शक्तिरपा°. ३०२. [1]) $A_2$ gloss तदारभ्य हस्तिवञ्ज इति प्रसिद्धः प्रदेशवर्त्म येन आयातो मिहिरकुलः. ३०५. [1]) $A_3$ वेत्युद्वृत्त°. ३०६. [1]) Emended; A होलाळायां. Cf. vii. 1228. viii. 733. 1432 (*C.*). 2909 (*C.*). 3216 (*C.*).

मेघागमः फणिभुजं प्रथितान्धकारः प्रीणाति हंसममलो जलदात्ययश्च ।
प्रीतेः समानरुचितैव भवेन्नितान्तं[2] दातुः प्रतिग्रहकृतश्च[3] परस्परस्य ॥३०८॥
स वर्षसप्ततिं भुक्त्वा भुवं भूलोकभैरवः । भूरिरोगार्दितवपुः प्राविशज्जातवेदसम् ॥३०९॥
310 सोयं त्रिकोटिहा मुक्तो यः स्वात्मन्यपि निर्घृणः । देहत्यागेस्य गगनादुच्चचारेति भारती ॥३१०॥
इत्यूचुर्ये मते तेषां स एव परिहारदः। खण्डयन्वीतघृणतामग्रहारादिकर्मभिः ॥३११॥
आक्रान्ते दारदैर्भौट्टैर्म्लेच्छैरशुचिकर्मभिः । विनष्टधर्मे देशेस्मिन्पुण्याचारप्रवर्तनम् ॥३१२॥
आर्यदेश्यान्स संस्थाप्य व्यतनोद्दारुणं तपः । संकल्प्य स्ववपुर्दाहं प्रायश्चित्तक्रियां व्यधात् ॥३१३॥
अत एवाग्रहाराणां सहस्रं प्रत्यपादयत् । गान्धारदेशजातेभ्यो द्विजेभ्यो विजयेश्वरे ॥३१४॥
315 क्षुरखड्गासिधेन्वादिपूर्णैयःफलके तदा । वह्निप्रदीप्ते सहसा पर्यन्ते स्वां तनुं जहौ ॥३१५॥
इत्येतस्मिञ्जनाम्नाये केचिदव्यभिचारिणि । प्राहुः पुरुषसिंहस्य क्रौर्यं तस्याविगर्हितम् ॥३१६॥ कुलकम् ॥
ये नागेन रुषा प्लुष्टे नगरे प्राभवन्खशाः । तेषां नाशाय वृत्तान्तं पूर्वोक्तं जगदुः परे ॥३१७॥
अवतारयतस्तस्य चन्द्रकुल्याभिधां नदीम् । अशक्योन्मूलना मध्ये शिलाभूद्विघ्नकारिणी ॥३१८॥
ततः कृततपाः स्वप्ने देवैरुक्तः स भूपतिः । यक्षः शिलायां बलवान्ब्रह्मचार्यत्र तिष्ठति ॥३१९॥
320 साध्वी स्पृशति चेदेनां निरोद्धुं न स[1] शक्नुयात् । ततोपरेद्युः स्वप्नोक्तं शिलायां तेन कारितम् ॥३२०॥
तासु तासु कुलस्त्रीषु व्यर्थयत्नास्वथाचलत् । चन्द्रवत्याख्यया स्पृष्टा कुलाल्या सा महाशिला ॥३२१॥
कोटित्रयं नरपतिः क्रुद्धस्तेनागसा ततः । सपतिभ्रातृपुत्राणामवधीत्कुलयोषिताम् ॥३२२॥
इयं चान्यमते ख्यातिः प्रथते तथ्यतः पुनः । अभव्या सनिमित्तापि प्राणिहिंसा गरीयसी ॥३२३॥
एवं क्षुद्रोपि यद्राजा संभूय न हतो जनैः । तत्कर्म कारयद्भिस्तैर्दैवतैरेव रक्षितः ॥३२४॥
325 प्रजापुण्योदयैस्तीव्रैश्चिरात्तस्मिन्क्षयं गते । बक[1]स्तत्प्रभवः पौरैः सदाचारोभ्यषिच्यत ॥३२५॥
तत्रापि पूर्वसंस्कारादुक्त[1]त्रासं दधे जनः । श्मशानविहिते लीलावेश्मनीव नृपास्पदे ॥३२६॥
अतिसंतापदाज्जातः स जनाह्लादकोभवत् । जलौघो जलदश्यामात्तपात्ययदिनादिव ॥३२७॥
लोकान्तरादिवायातं मेने धर्मं तदा जनः । अभयं च परावृत्तं प्रवासाद्गहनादिव ॥३२८॥
स बकेशं बकश्वभ्रे बकवत्यापगां तथा । कृत्वा पुरं परार्ध्यश्रीर्लवणोत्साभिधं व्यधात् ॥३२९॥
330 तत्र त्रिषष्टिर्वर्षाणां सत्रयोदशवासरा । अत्यवाह्यत भूपेन तेन पृथ्वीं प्रशासता ॥३३०॥
अथ योगेश्वरी काचिद्भट्टाख्या रजनीमुखे । कृत्वा कान्ताकृतिं काम्यामुपतस्थे विशां पतिम् ॥३३१॥
तया मनोहरैस्तैस्तैर्व[1]चनैर्ग्लपितस्मृतिः । स यागोत्सवमाहात्म्यं द्रष्टुं हृष्टो न्यमन्त्र्यत ॥३३२॥
पुत्रपौत्रशतोपेतः प्रातस्तत्र ततो गतः । चक्रवर्ती तया निन्ये देवी[illegible]हारताम् ॥३३३॥
कर्मणा तेन सिद्धाया व्योमाक्रमणसूचकम् । जानुमुद्राद्वयं तस्या दृशद्यद्यापि दृश्यते ॥३३४॥

---

३०८. 1) Edd. add before this verse the following verses, not found in A G R: भगिनीवर्गसम्भोगनिर्लज्जाम्लेच्छवंशजाः। स्नुषासङ्गतिसक्ताश्च दारदाः सन्ति पापिनः॥ वस्तुभावैस्तथा भाट्टा भार्याविक्रयकारिणः। परोपभोगितास्तेषां निर्लज्जास्तर्हि योषितः॥.—2) $A_2$ °न्निमित्तं.—3) Thus $A_3$; $A_1$ °ग्रहहृतश्च. ३२०. 1) Thus corr. by $A_3$ from $A_1$ न च. ३२५. 1) Emended; A R G एकस्त°. ३२६. 1) G उक्ताचासं. ३३२. 1) Thus corr. by $A_2$ from $A_1$ °हरैस्तैस्तैर्व°.

देवः शतकपालेशो मातृचक्रं शिला च सा । खेरीमठेषु तद्वार्तास्मृतिमद्यापि यच्छति ||३३५|| 335

देव्या कुलतरोः कन्दः क्षितिनन्दोवशेषितः । ततस्तस्य सुतस्त्रिंशद्वत्सरानन्वशान्महीम् ||३३६||

द्वापञ्चाशतमब्दान्क्ष्मां द्वौ च मासौ तदात्मजः । अपासीद्वसुनन्दाख्यः प्रख्यातस्मरशास्त्रकृत् ||३३७||

नरः षष्टिं तस्य सूनुस्तावतोक्षश्च तत्सुतः । वर्षानभूद्विभुर्ग्रामं योक्षवालमकारयत् ||३३८||

जुगोप गोपादित्योथ क्ष्मां सद्वीपां तदात्मजः । वर्णाश्रमप्रत्यवेक्षा[1]दर्शितादियुगोदयः ||३३९||

सखोलखागिकाहाडिग्राम[1]स्कन्दपुरा[2]भिधान् । शमाङ्गास[3]मुखांश्चाग्रहारान्यः प्रत्यपादयत् ||३४०|| 340

ज्येष्ठेश्वरं प्रतिष्ठाप्य गोपाद्रावा[1]र्यदेशजाः । गोपाग्रहारान्कृतिना येन स्वीकारिता द्विजाः ||३४१||

भूक्षीरवाटिकायां[1] यो निर्वास्य लशुनाशिनः । खासटायां[2] व्यधाद्विप्रा[3]न्निजाचारविवर्जितान् ||३४२||

अन्यांश्चानीय देशेभ्यः पुण्येभ्यो वच्चिकादिषु[1] । पावनानग्रहारेषु ब्राह्मणान्स न्यरोपयत् ||३४३||

उत्तमो लोकपालोयमिति लक्ष्म प्रशस्तिषु । यः प्राप्तवान्विना यज्ञं चक्षमे न पशुक्षयम् ||३४४||

सषड्दिनां[1] वर्षषष्टिं पालयित्वा स मेदिनीम् । भोक्तुं पुण्यपरीपाकं लोकान्सुकृतिनामगात् ||३४५|| 345

गोकर्णस्तत्सुतः क्षोणीं गोकर्णेश्वरकृद्दधे । अष्टपञ्चाशतं वर्षांस्त्रिंशत्याह्नां विवर्जितान् ||३४६||

सूनुर्नरेन्द्रादित्योस्य खिङ्खिलान्याभिधोभवत् । भूतेश्वरप्रतिष्ठानामक्षयिण्याश्च[1] कारकः[2] ||३४७ ||

दिव्यानुग्रहभागुग्राभिधो यस्य गुरुर्व्यधात् । उग्रेशं मातृचक्रं च प्रभावोदग्रविग्रहः ||३४८||

भूत्वा षट्त्रिंशतं वर्षाञ्शतं चाह्नां विभुर्भुवः । स दीर्घैरनघांल्लोकानासदत्सुकृतैः कृती ||३४९||

युधिष्ठिराभिधानोभूदथ राजा तदात्मजः । यः सूक्ष्माक्षतया[1] लोकैः कथितोन्धयुधिष्ठिरः ||३५०|| 350

तेन क्रमागतं राज्यं सावधानेन शासता । अनुजग्मे मितं कालं पूर्वभूपालपद्धतिः ||३५१||

काले कियत्यपि ततो यात्यभाग्यवशादसौ । सिषेवे श्रीमदक्षीबो यत्किंचनविधायिताम् ||३५२||

नान्वग्रहीदनुग्राह्यान्न संजग्राह धीमतः । न प्रवृत्तोपचाराणां प्रागिवासीत्प्रियंकरः ||३५३||

दुर्विद्यपर्षदा साकं निर्विशेषं सभाजितैः । परिजह्रे[1] स दुर्जातो जाततेजोवधैर्बुधैः ||३५४||

सर्वत्र समदृष्टित्वं गुणोयं खलु योगिनः । अकीर्तिहेतुः स महान्दोषस्तु पृथिवीपतेः ||३५५|| 355

नयद्भिर्गुणतां दोषान्दोषतां च गुणान्विटैः । स लुप्तप्रतिभश्चक्रे शनकैः स्त्रीजितोपमः ||३५६||

वाङ्मर्मच्छेदिनी दीर्घं नर्म शश्वत्कथा विटैः । अनीश्वरोचिता तस्य क्रीडापि भयदाभवत् ||३५७||

पुरो मिथ्या गुणग्राही परोक्षं दोषदर्शकः । असुस्थिरादरो भूभृत्सोभूद्वेष्योनुजीविनाम् ||३५८||

मनागनवधानेन स्खलतस्तस्य भूपतेः । इत्थं राज्यस्थितिरगादचिरेण विसूत्रताम् ||३५९||

उपेक्षितस्य निर्द्रोहैर्[1]यतन्ताजितात्मनः । अथ लब्धबलास्तस्य नाशाय द्रोहिमन्त्रिणः ||३६०|| 360

---

३३९. 1) Thus corr. by $A_3$ from $A_1$ प्रत्यनीक्षा°. ३४०. 1) $A_2$ gloss आडेग्राम्.—2) $A_2$ gloss खन्दोर्.—3) $A_2$ शमाजासा, with gloss ड्रिमन् जासव्. ३४१. 1) $A_2$ gloss गोपकार् इति प्रसिद्धस्थले. ३४२. 1) $A_2$ gloss भुछवेवाडू इति भाषया प्रसिद्धस्थले.— 2) $A_2$.gloss सोदरबले.—3) Emended; A R व्यधान्वि°; G व्यथान्वि°. ३४३. 1) $A_2$ gloss वच्चियग्रामादिषु. ३४५. 1) $A_3$ सषण्मासां. ३४७. 1) Thus corr. from $A_1$ °न्याश्च by $A_2$ which adds the glosses अविच्छिन्नमन्नदानमक्षयिणी धर्मभक्तमिति च प्रसिद्धा, and अक्षयिण्या इति पार्वतीयदेशादौ कश्मीरोपकण्ठवर्तिनि अछयीण्या इति प्रसिद्धाः यासु ($A_3$ यस्यां) सदक्षिणं भूरिब्राह्मणभोजनं वितीर्यते. Of a third gloss by $A_2$ which has been smeared over with ink, only the following can be read: उद्यापनं यज्ञमित्यक्षयि-----.—2) Thus corr. by $A_3$ from $A_1$ कारसः. ३५०. 1) Thus $A_3$; $A_1$ सूक्ष्माक्षितया. ३५४. 1) Thus $A_3$; $A_1$ °जिहे. ३६०. 1) $A_3$ gloss मंत्रिभिः.

I. 361

प्रभोः संकोचिताशैस्तैश्चरद्भिर्निरवग्रहम् | राज्यं जिहीर्षवो भूपाश्चक्रिरे भूम्यनन्तराः ||३६१||

तदनुप्राणिताः सर्वे ते ते[1] नानादिगाश्रयाः | आसन्राज्यामिषं प्राप्तुं श्येना इव ससंभ्रमाः ||३६२||

अथोत्पन्नभयो राजा न शशाक निजस्थितिम् | व्यवस्थापयितुं यन्त्र[1]च्युतां कारुः शिलामिव ||३६३||

चिरं क्षुण्णे क्षमाभर्तुस्तस्मिन्राज्ये विसंस्थुले | उपायोस्य स्थितेर्हेतुर्नैकः कश्चन[1] पप्रथे ||३६४||

365 दृष्टदोषान्स्थितिं प्राप्तो[1] हन्यादस्मानसंशयम् | विचिन्त्येति न सामास्य जगृहुर्निजमन्त्रिणः ||३६५||

अथ निरुरुधुस्ते संनद्धा बलैर्नृपमन्दिरं व्यवहितजनाक्रन्दं भेरीरवैरतिभैरवैः |

मदकरिघटाकेतुच्छायानिरुद्धरविप्रभा भवनवलभीः संतन्वन्तो दिवापि तमोवृताः ||३६६||

तैर्गन्तुं स्वभुवो निवारितरणैर्दत्तेवकाशे[1] ततस्त्यक्तश्रीर्नगरान्तरात्स नृपतिस्तात्पर्यतो निर्ययौ |

आजानेयरजोङ्कराजललनाप्रस्थानसंदर्शनक्षुभ्यत्पौरजनास्त्रुलाजकणिकाकीर्णेन राजाध्वना ||३६७||

राज्याच्च्युतस्य बहुशः परिवाररामा[1]कोशादि तस्य रिपवो व्रजतोपजह्रुः[2] |

उर्वीरुहो विगलितस्य[3] नगेन्द्रशृङ्गाद्वल्लीफलादि रभसादिव गण्डशैलाः ||३६८||

रम्यैः शैलपथैर्व्रजञ्श्रमवशाच्छायां श्रितः शाखिनामासीनप्रचलायितेन[1] सुमहद्दुःखं विसस्मार सः |

दूरात्पामरपूत्कृतैः श्रुतिपथप्राप्तैः प्रबुद्धस्त्वभूद्दृष्टो निर्झरवारिभिः सह मनः[2]श्वभ्रे निमज्जन्निव ||३६९||

नानावीरुत्तृणपरिमलैरुग्रगन्धा वनोर्वीरम्भःक्षोभप्रतिहतशिलाः पिच्छिलाश्चाद्रिकुल्याः |

370 क्रान्त्वा श्रान्तैर्बिसकिसलयच्छायमुग्धाङ्गलेखैरभ्युत्सङ्गं[1] निहिततनुभिर्मूर्छितं तस्य दारैः ||३७०||

पर्यन्ता[1]द्रितटाद्विलोक्य सुचिरं दूरीभवन्मण्डलं द्रागामन्त्रयितुं जहत्सु[2] नृपतेर्दारेषु पुष्पाञ्जलीन् |

क्षोणीपृष्ठविकीर्णपक्षतिनमत्तुण्डं स्वनीडस्थितैः सावेगं गिरिकन्दरासु पततां वृन्दैरपि क्रन्दितम् ||३७१||

स्तनयुगतलनद्धस्रस्तमूर्धांशुकानां त्रिकवलनविलोलं वीक्ष्य दूरात्स्वदेशम् |

अवहत रुदतीनां मौलिविन्यस्तहस्तं पथि नृपवनितानाम[1]स्रुभिर्निर्झराम्भः[2] ||३७२||

प्रीतिस्थैर्यैरुचितवचनाक्षिप्तया शोकशान्त्या निर्व्याजाज्ञाग्रहणगुरुभिस्तैश्च तैश्चोपचारैः |

तस्य स्नेहादुपगतवतो राज्यविभ्रंशदुःखं मन्दीचक्रुः स्वभुवि सुजना भूपतेर्भूमिपालाः ||३७३||

[1]इति काश्मीरिकमहामात्यश्रीचण्पकप्रभुसूनोः कल्हणस्य कृतौ राजतरङ्गिण्यां प्रथमस्तरङ्गः ||
चतुर्दशा[2]धिकं वर्षसहस्रं नव वासराः | मासाश्च विगता ह्यस्मिन्नेकविंशति[3]राजसु ||

---

३६२. [1]) $A_1$ had written च after ते ते; struck out. $A_3$ तदनुप्राणिता वैरिनृपा नाना°. ३६३. [1]) $A_2$ gloss यन्त्रवद
सेनायां युद्धार्थं प्रसिद्धम्. ३६४. [1]) Thus corr. by $A_3$ from $A_1$ कस्य न. ३६५. [1]) Thus corr. by $A_3$ from $A_1$ प्राप्त
३६७. [1]) $A_3$ gloss धर्मद्वारे. ३६८. [1]) Thus corr. by $A_3$; $A_1$ °रामा‸कों°.—[2]) Thus corr. by $A_2$ from $A_1$ °विजह
[3]) $A_3$ विचलितस्य. ३६९. [1]) G has *sec. manu* the *v. l.* आसीनः प्रलयायितेन.—[2]) Thus $A_1$; $A_3$ gives the *v. l.* महत
मनः between the lines and another *v. l.* पुनः in margin. ३७०. [1]) $A_3$ अभ्युत्सङ्गं. ३७१. [1]) Thus $A_3$; $A_1$ पर्यस्ता
[2]) $A_3$ क्षिपत्सु. ३७२. [1]) $A_2$ बलमबलानां, with gloss अबलानां बलं कर्तृ.—[2]) $A_2$ gloss कर्म. *Colophon.* [1]) $A_3$ adds be
this the note रा ३८ || मं || ३७२ ||.—[2]) $A_3$ चतुर्विंशा°.—[3]) Thus $A_3$; $A_1$ °न्नष्टात्रिंशति रा°.

## ॥ द्वितीयस्तरङ्गः ॥

विहितमजगोशृङ्गाग्राभ्यां[1] धनुर्घटितं तथा नरकरटिनोर्देहार्धाभ्यां गणं परिगृह्णतः[2] ।
विविधघटनावाल्लभ्यानां निधेरुचिता[3] विभोर्जयति ललनापुंभागाभ्यां शरीरविनिर्मितिः ॥१॥
भूयोराज्यार्जनोद्योगस्तेनात्यज्यत भूभुजा । जरसा शमि[1]वाण्या च कर्णमूलमवाप्तया ॥२॥
अनयद्विनयोदात्तः समं स्वविषयेण तान् । विषयान्वशिनामग्र्यः स तान्पञ्चापि विस्मृतिम् ॥३॥
धावन्राज्येच्छया दुर्गागलिकायां[1] स्वमन्त्रिभिः । कालेन स्थापितो बद्धेत्यभ्यधायि तु कैरपि ॥४॥
अथ प्रतापादित्याख्यस्तैरानीय दिगन्तरात् । विक्रमादित्यभूभर्तुर्ज्ञातिरत्राभ्यषिच्यत ॥५॥
शकारिर्विक्रमादित्य इति स भ्रमम[1]श्रितैः । अन्यैरत्रान्यथालेखि विसंवादि[2] कदर्थितम् ॥६॥
इदं स्वभेदविधुरं हर्षादीनां धराभुजाम् । कंचित्कालमभूद्भोज्यं ततः प्रभृति मण्डलम् ॥७॥
असपूर्वापि तेनोर्वी सपूर्वेव महीभुजा । लालिता हृदयज्ञेन पत्या नववधूरिव ॥८॥
भुक्त्वा द्वात्रिंशतं वर्षान्भुवं तस्मिन्दिवं गते । जलौकास्तत्सुतो भूमेर्भूषणं समपद्यत ॥९॥
पितुरेव समं कालं वृद्धिहेतोः स दिद्युते । विषुवत्पूर्णशीतांशुरिव शीतेतरार्चिषः ॥१०॥
अथ वाक्पुष्टया सार्धं देव्या दिव्यप्रभावया । भुवं तत्प्रभवो भुञ्जंस्तुञ्जीनोरञ्जयत्प्रजाः ॥११॥
दंपतिभ्यामियं ताभ्यामभूष्यत वसुंधरा । गङ्गामृगाङ्कखण्डाभ्यां जटाभूरिव धूर्जटेः ॥१२॥
मण्डलं साध्वधत्तां तौ नानावर्णमनोरमम् । शतहृदापयोवाहौ माहेन्द्रमिव कार्मुकम् ॥१३॥
चक्राते च महाभागौ विभ्रमाभरणं भुवः । तुङ्गेश्वरं हरावासं कतिका[1]ख्यं च पत्तनम् ॥१४॥
क्वचिन्मडवराज्यान्तःस्थाने चण्डातपोज्ज्वले[1] । तत्प्रभावेण फलितं वृक्षैस्तत्क्षणरोपितैः ॥१५॥
नाट्यं सर्वजनप्रेक्ष्यं यश्चक्रे स महाकविः[1] । द्वैपायनमुनेरंशस्तत्काले चन्दकोभवत् ॥१६॥
तयोः प्रभावमाहात्म्यजिज्ञासार्थमिवोद्यता । प्रजासु दुःसहा जातु व्यापद्दैवी[1] व्यजृम्भत ॥१७॥
पाकोन्मुखशरच्छालिच्छन्नकेदारमण्डले । मासि भाद्रपदेकस्मात्पपात तुहिनं महत् ॥१८॥
तस्मिन्विश्वक्षयोद्युक्तकालाट्टहसितोपमे । न्यमज्जञ्शालयः साकं प्रजानां जीविताशया ॥१९॥
अथासीत्क्षुत्परिक्षामजनप्रेतकुलाकुलः । प्राकारो[1] निरयस्येव घोरो दुर्भिक्षविप्लवः ॥२०॥
पत्नीप्रीतिं सुतस्नेहं पितृदाक्षिण्यमातुरः । कुक्षिंभरिः क्षुदुत्तप्तो विसस्माराखिलो जनः ॥२१॥

---

१. [1]) Thus corr. by $A_3$ from $A_1$ °गोःशृङ्गा°.—[2]) Thus corr. by $A_3$ from $A_1$ प्रतिगृह्यतः.—[3]) $A_4$ gloss अभ्यस्ता.
२. [1]) $A_2$ gloss जितेन्द्रियाणां. ४. [1]) $A_2$ gloss दुर्गाज्यन्. ६. [1]) $A_3$ स इति भ्रमम°; R G follow this reading and write °दित्य :.—[2]) $A_2$ विसंवादक°. १४. [1]) $A_2$ gloss कैय्. १५. [1]) $A_3$ °तपोल्बणे. १६. [1]) Thus $A_3$, also R G; $A_1$ °कवेः.
१७. [1]) $A_3$ gloss देवैः कृतत्वाद्देवानां संबन्धिनी दैवी. २०. [1]) Thus $A_1$; altered by $A_3$ into प्रकारो.

लोको[1] लक्ष्मीकटाक्षितः ||२२||

क्षुत्तापाद्यस्मरल्लज्जामभिमानं कुलोन्नतिम् | अशनाहंक्रियाग्रातो

क्षामं कण्ठगतप्राणं याचमानं सुतं पिता | पुत्रो वा पितरं त्यक्त्वा चकार स्वस्य पोषणम् ||२३||

स्नाय्वस्थिशेषे बीभत्से स्वदेहेहंक्रियावताम् | अभूद्भोज्यार्थिनां युद्धं प्रेतानामिव देहिनाम् ||२४||

रूक्षाभिभाषी क्षुत्क्षामो घोरो दिक्ष्वक्षिणी क्षिपन् | एक एको जगज्जीवैरियेष स्वात्मपोषणम् ||२५||

25 तस्मिन्महाभये घोरे प्राणिनामतिदुःसहे | ददृशे लोकनाथस्य तस्यैव करुणार्द्रता ||२६||

निवारितप्रतीहारः स रत्नौषधिशोभिना | दर्शनेनैव दीनानामलक्ष्मीक्लममाच्छिनत् ||२७||

सपत्नीको निजैः कोशैः संचयैर्मन्त्रिणामपि | क्रीतान्नः स दिवारात्रं प्राणिनः समजीवयत् ||२८||

अटवीषु श्मशानेषु रथ्यास्ववसथेषु च | क्षुत्क्षामः क्ष्माभुजा तेन नहि कश्चिदुपैक्ष्यत[1] ||२९||

ततो निःशेषितधनः क्षीणान्नां वीक्ष्य मेदिनीम् | क्षपायामेकदा देवीमेवमूचे स[1] दुःखितः ||३०||

30 देव्यस्मदपचारेण ध्रुवं केनापि दुस्तरा | जाता निरपराधानां जनानां व्यापदीदृशी ||३१||

धिङ्मामधन्यं यस्याग्रे लोकोयं शोकपीडितः | पश्यन्नशरणामुर्वीमनुग्राह्यो विपद्यते ||३२||

प्रजा निःशरणा एता अन्योन्यं बान्धवोज्झिताः | अरक्षतो भयेमुष्मिन्किं कार्यं जीवितेन मे || ३३ ||

यथा कथंचिल्लोकोयं दिनान्येतानि यत्नतः | मयातिवाहितः सर्वो न च कोपि व्यपद्यत ||३४||

अतिक्रान्तप्रभावेयं कालदौरात्म्यपीडिता | निष्किंचनाद्य संजाता पृथिवी गतगौरवा ||३५||

35 तदिमाः सर्वतो मग्ना दारुणे व्यसनार्णवे | उपायः कतमस्तावत्समुद्धर्तुं क्षमः प्रजाः ||३६||

निरालोको हि लोकोयं दुर्दिनग्रस्तभास्करः | कालरात्रिकुलैर्विश्वक्परीत इव वर्तते ||३७||

हिमसंघातदुर्लङ्घ्य[1]क्षितिभृद्रुद्धनिर्गमाः | बद्धद्वारकुलाय[2]स्थखगवद्विवशा जनाः ||३८||

शूराश्च मतिमन्तश्च विद्यावन्तश्च जन्तवः | कालदौरात्म्यतः पश्य जाता निहतयोग्यताः ||३९||

आशाः काञ्चनपुष्पकुट्मलकुलच्छन्ना न काः क्ष्मातले सौजन्यामृतवर्षिभिस्तिलकितं सेव्यैर्न किं मण्डलम्

40 पन्थानः सुचिरो[1]पचाररुचिरैर्व्याप्ता न कैः संस्तुतैस्तेषा[2]मत्र वसन्ति निह्नुतगुणाः कालेन ये[3] मोहिताः ||४०||

तदेष गलितोपायो जुहोमि ज्वलने तनुम् | नतु द्रष्टुं समर्थोस्मि प्रजानां नाशमीदृशम् ||४१||

धन्यास्ते पृथिवीपालाः सुखं ये निशि शेरते | पौरान्पुत्रानिव पुरः सर्वतो वीक्ष्य निर्वृतान् ||४२||

इत्युक्त्वा करुणाविष्टो मुखमाच्छाद्य वाससा | निपत्य तल्पे निःशब्दं[1] रुरोद पृथिवीपतिः ||४३||

निवातस्तिमितैर्दीपैरुद्ग्रीवैः कौतुकादिव | वीक्षमाणाथ तं देवी जगाद जगतीभुजम् ||४४||

45 राजन्प्रजानां कुकृतैः कोयं मतिविपर्ययः | येनेतर इव स्वैरमधीरोचितमीहसे ||४५||

यद्यसाध्यानि दुःखानि छेत्तुं न प्रभविष्णुता | तन्महीपाल महतां महत्त्वस्य किमङ्कनम् ||४६||

कः शक्रः कतमः स्रष्टा वराकः कतमो यमः | सत्यव्रतानां भूपानां कर्तुं शासनलङ्घनम् ||४७||

पत्यौ भक्तिर्व्रतं स्त्रीणामद्रोहो मन्त्रिणां व्रतम् | प्रजानुपालनेनन्यकर्मता भूभृतां व्रतम् ||४८||

---

२२. [1]) $A_1$ लोकोऽलक्ष्मी°. २९. [1]) Thus corr. by $A_3$ from $A_1$ उपेक्ष्यते. ३०. [1]) Thus corr. by $A_3$ from $A_1$ ह
३८. [1]) $A_3$ हिमसंपातदुर्लक्षक्षि°.—[2]) $A_2$ gloss नीडं. ४०. [1]) $A_3$ प्रचुरो°.—[2]) $A_3$ संस्तुतैरेषा°, with gloss एषां शूरमतिमदादीन
निह्नुतगुणाः ये शूराद्या अत्र अस्मिन्नेव देशे वसन्ति देशान्तरं न गच्छन्ति ते कालेन मोहिताः.—[3]) $A_2$ ते. ४३. [1]) Thus corr.
$A_3$ from $A_1$ °शङ्कं.

उत्तिष्ठ व्रतिनामग्र्य क्व विपर्येति मद्वचः | प्रजापाल प्रजानां ते नास्त्येव क्षुत्कृतं भयम् ||४९||
इति संरम्भतः प्रोक्ते तयानुध्याय देवताः[1] | प्रतिगेहं गतप्राणः कपोतनिवहोपतत् ||५०|| 50
प्रातस्तन्नृपतिर्वीक्ष्य व्यरंसीन्मरणोद्यमात् | प्रजाश्च प्रत्यहं प्राप्तैः कपोतैर्जीवितं दधुः ||५१||
वस्त्वन्तरं किमपि तत्साध्वी नूनं ससर्ज सा | जनताजीवितावाप्त्यै न कपोतास्तु तेभवन्[1] ||५२||
तादृशां नहि निर्व्याजप्राणिकारुण्यशालिनाम् | हिंसया धर्मचर्यायाः शक्यं क्वापि कलङ्कनम् ||५३||
अभवन्निर्मलं व्योम देवीकृत्यैः सह क्रमात् | साकं भूपालशोकेन दुर्भिक्षं च शमं ययौ ||५४||
सा भूतिविभवोदग्रमग्रहारं द्विजन्मनाम् | सती कृतीमुषं[1] चक्रे रामुषं[2] चापकल्मषा ||५५|| 55
वर्षैः षट्त्रिंशता शान्ते पत्यौ विरहजो ज्वरः | तत्यजे उ  नज्वालानलिनप्रच्छदे तया ||५६||
सा यत्र शुचिचारित्रा विपन्नं पतिमन्वगात् | स्थानं जनैस्तद्वा.पुष्टाटवीत्यद्यापि गद्यते ||५७||
चारुचारित्रया तत्र तया सत्त्रेवतारिते | नानापथागतानाथसार्थैरद्यापि भुज्यते ||५८||
आभ्यामभ्यधिकं कर्तुं शक्तिः कस्येति निश्चितम् | विचिन्त्यारोचकी धाता नापत्यं निर्ममे तयोः ||५९||
वेधाः परां धुरमुपैति परीक्षकाणामिक्षोः फलप्रजननेन कृतश्रमो यः |
विस्मारितोद्धुरसुधारसयोग्यतां त[1]त्तस्मादुदेत्थं[2] किमिवाभ्यधिकं विदध्यात् ||६०|| 60
दीर्घदुर्दिननष्टार्कं राष्ट्रमात्मापचारतः | ज्ञात्वा राज्यमिसाद्देहं सा चकारेति केचन ||६१||
ततोन्यकुलजो राजा विजयोष्टावभूत्समाः | पत्तनेन परीतं यश्चकार विजयेश्वरम् ||६२||
सुतो महीमहेन्द्रस्य जयेन्द्रस्तस्य भूपतेः | क्ष्मामाजानुभुजो राजा बुभोजाथ पृथुप्रथः ||६३||
अलो[1]लकीर्तिकल्लोलदुगूलवलनोज्ज्वलाम् | बभार यद्भुजस्तम्भो जयश्री[2]सालभञ्जिकाम्[3] ||६४||
तस्याभूदद्भुतोदन्त[1]भवभक्तिविभूषितः | राज्ञः संधिमतिर्नाम मन्त्री मतिमतां वरः ||६५|| 65
नास्त्युपायः स संसारे कोपि योपोहितुं क्षमः | भूपालमत्तकरिणामेषां चपलकर्णताम् ||६६||
अत्यद्भुतमतिः शङ्क्यः सोयमुक्तेति यद्विटैः | तस्मिन्धीसचिवे द्वेषस्तेनामाह्यत भूभुजा ||६७|| युग्मम् ||
निवारितप्रवेशोथ सकोपस्तमहेतुकम् | निनाय हृतसर्वस्वं यावदायुर्दरिद्रताम् ||६८||
तस्य भूपतिविद्वेषग्रीष्मोष्मपरिशोषिणः | आप्यायं राजपुरुषा वार्तयापि न चक्रिरे ||६९||
गिरं गभीरो गृह्णाति क्ष्माभृद्यावत्तदग्रगाः | उक्तानुवादिनस्तावद्व्यक्तं प्रतिरवा इव ||७०|| 70
स तु राजविरुद्धत्वदारिद्र्याभ्यां न विव्यथे | गतप्रत्यूहया प्रीतः प्राप्तया हरसेवया ||७१||
अथ भाव्यर्थमाहात्म्यात्पप्रथे प्रति[1]मन्दिरम् | राज्यं संधिमतेर्भावीत्यश्रुतापि सरस्वती ||७२||
नाचोदिता वाक्चरतीत्याप्तेभ्यः श्रुतवान्नृपः | ततः संभूत[1]संत्रासः कारावेश्मनि तं न्यधा[2]त् ||७३||

---

५०. 1) $A_3$ देव्या. ५२. 1) $A_3$ पतन्. ५५. 1) $A_2$ gloss कैमोह्.—2) $A_2$ gloss रामोह्. ६०. 1) Thus $A_1$; $A_3$ योग्यतात्तत्; G योग्यतात्तात्, explained by योग्यतयात्तो गृहीतः and subsequently corrected into योग्यता तु.—2) $A_3$ gloss उत्पादयित्वा. ६४. 1) G आलोल°.—2) Thus corr. by $A_3$ from $A_1$ °स्त्री°.—3) $A_2$ gloss पुत्तलिकाम्. ६५. 1) $A_3$ °शान्तो. ६८. 1) $A_3$ कोपात्तम्. ७२. 1) Thus corr. by $A_2$ from $A_1$ नवम°; $A_2$ had explained in margin the original reading by a note which has been struck out: राज्यं सन्धिमतो (sic) भावीत्यश्रुतापि सरस्वती एव नवमन्दिरं पप्रथे सन्धिमतेर्वैराकस्य विषमपूर्ववृत्त्यपरिपोषकरूपस्थानवमनिद्ररूपं तन्मात्रश्रुतवाक् श्रवणमभूदित्यर्थः येन च तदुपरि राजातीव क्रूरचेष्टोभूदिति भावः. ७३. 1) Thus corr. by $A_2$ from $A_1$ सद्भूत°.—2) Thus corr. by $A_3$ from $A_1$ व्यधात्.

तत्र तस्योग्रनिगडैः पीडिताङ्घ्रेर्विशुष्यतः । पूर्णोभूद्दशमो वर्षो भूपतेश्चायुषोवधिः ॥७४॥
तत्र तस्योग्रनिगडैः पीडिताङ्घ्रेर्विशुष्यतः । पूर्णोभूद्दशमो वर्षो भूपतेश्चायुषोवधिः ॥७४॥

निष्पुत्रः स महीपालो मुमूर्षुर्दाहमादधे । रोगोत्थया पीडया च चिन्तया च तदीयया ॥७५॥

75 ऊष्मायमाणो विद्वेषवह्निना ज्वलतानिशम् । न विना तद्वधं मेने भवितव्यप्रतिक्रियाम् ॥७६॥

भाव्यर्थस्याबुधाः[1] कुर्युरुपायं स्थगनाय यम् । स एवापावृतं द्वारं ज्ञेयं दैवेन कल्पितम् ॥७७॥

दग्धाङ्गारकदम्बके विलुठतः स्तोकोन्मिषत्तेजसो वेधा वह्निकणस्य शक्तिमतुलामाधातुकामो हठात् ।
तन्निर्वापणमिच्छतः प्रतनुते पुंसः समीपस्थिते[1] संतापद्रुतभूरिसर्पिषि घटे पानीयकुम्भभ्रमम् ॥७८॥

अथ राजाज्ञया क्रूरैर्वधकर्माधिकारिभिः । निशि संधिमतिः शूले समारोप्य विपादितः ॥७९॥

80 प्रोतशूले श्रुते तस्मिञ्शोकशङ्कुर्महीपतेः । निरगाद्रोगभग्नस्य पूर्वं पश्चात्तु जीवितम् ॥८०॥

सप्तत्रिंशतिवर्षेषु यातेष्वस्मिन्निरन्वये । प्रशान्तभूमिपालाभूत्कतिचिद्दिवसानि भूः ॥८१॥

अथ संधिमतिं बुद्ध्वा तथा व्यापादितं गुरोः । ईशानाख्यस्य हृदयं विवशं वशिनोप्यभूत् ॥८२॥

शिरीष इव संसारे सुखोच्छेद्ये मनीषिणाम् । हन्तानृशंस्यं तद्वृन्तमिवैकमवशिष्यते ॥८३॥

स श्मशानभुवं प्रायादनाथस्येव शुष्यतः । कर्तुं विनयिनस्तस्य स्वोचितामन्तसत्क्रियाम् ॥८४॥

85 तं चास्थिशेषमद्राक्षीत्कृष्यमाणं बलाद्वृकैः । शूलमूलावबद्धास्थिखण्डावष्टंभनिश्चलम् ॥८५॥

समीरणसमाकीर्णमुण्डरन्ध्राग्रनिर्गतैः[1] । ध्वनितैरनुशोचन्तमिवावस्थां तथाविधाम् ॥८६॥

हा वत्स द्रष्टुमीदृक्त्वे जीवाम्यद्येति वादिना । तस्याकृष्यत शूलान्तःप्रोतं तेनाथ कीकसम् ॥८७॥

वेष्टिताङ्घ्रिः शिरःशीर्णैस्तत्कचैर्धूलिधूसरैः । अनैषीत्तं स कङ्कालं वारयन्भषतो वृकान् ॥८८॥

उचितां सत्क्रियां कर्तुं ततस्तस्य समुद्यतः । भाले विधातृलिखितं श्लोकमेतमवाचयत् ॥८९॥

90 यावज्जीवं दरिद्रत्वं दश वर्षाणि बन्धनम् । शूलस्य पृष्ठे मरणं पुना[1] राज्यं भविष्यति ॥९०॥

पादत्रयस्य दृष्टार्थः[1] श्लोकस्यासीत्स योगवित् । द्रष्टव्ये तुर्य[2]पादार्थ[3]प्रत्यये कौतुकान्वितः ॥९१॥

अचिन्तयच्च संभ्रान्तः कथमे[1]तद्भविष्यति । उवाच च विधेः शक्तिमचिन्त्यां कलयंश्चिरम् ॥९२॥

तत्तत्कर्मव्यतिकरकृतः पारतन्त्र्यानुरोधात्सज्ज्ञाः सर्वे व्यवसितहठोन्मूलनाय प्रयत्नात् ।
चित्रं तत्राप्युदयति विधेः शक्तिरत्यद्भुतेयं यन्माहात्म्याद्विविधघटनासिद्धयो निर्निरोधाः ॥९३॥

मणिपूरपुरे पार्थं निहतं समजीवयत् । फणिकन्याप्रभावेण सर्वाश्चर्यनिधिर्विधिः ॥९४॥

95 द्रोणपुत्रास्त्रनिर्दग्धं मातुर्गर्भे परीक्षितम् । जीवयन्कृष्णमाहात्म्याद्धाता धुर्योधिकारिणाम् ॥९५॥

कचं भस्मीकृतं दैत्यैर्नागांस्तार्क्ष्येण भक्षितान् । पुनर्जीवयितुं को वा दैवादन्यः प्रगल्भते ॥९६॥

इत्युक्त्वा भाविनोर्थस्य द्रष्टुं सिद्धिं समुद्यतः । तत्रैव बद्धवसतिः कङ्कालं स ररक्ष तम् ॥९७॥

अथार्धरात्रे निर्निद्रस्तयैवाद्भुतचिन्तया । धूपाधिवासमीशानो घ्रातवान्दिव्यमेकदा ॥९८॥

उच्चण्डलाडनाद[1]ण्डोद्घृष्टघण्टौघटांकृतैः । चण्डैर्डमरुनिर्घोषैर्घ[2]र्घरं श्रुतवान्ध्वनिम् ॥९९॥

---

७७. [1]) Thus corr. by later hand from $A_1$ °र्थस्य बुधाः. ७८. [1]) Another hand alters this to °स्थितैः. ८६. [1]) A
पूर्णमु° with gloss शिरः over मुण्ड. ९०. [1]) Thus $A_1$; $A_3$ पुनराज्यं. ९१. [1]) Thus corr. by later hand from $A_1$ °
[2]) $A_2$ gloss चतुर्थ —[3]) Thus corr. by later hand from $A_1$ °पादार्थे. ९२. [1]) Thus corr. by $A_2$ from $A_1$ कार्यमे°. ९
gloss लाडना अन्तर्गता शलाका आण्टु इति भाषया.—[2]) $A_3$ °डमरुघोष्यैश्च.

[C. II. 76

उद्घाटिततमोरिः[1] स ततः पितृवनावनौ । ददर्श योगिनीस्तेजःपरिवेषान्तरस्थिताः ॥१००॥

तासां संभ्रममालक्ष्य कङ्कालं चापवाहितम् । ईशानस्तां श्मशानोर्वीं धृतासिश्चकितो ययौ ॥१०१॥

अथापश्यत्तरुच्छन्नः शायितं मण्डलान्तरे । संधीयमानसर्वाङ्गं कङ्कालं योगिनीगणैः ॥१०२॥

उल्लसद्वरसंभोगवाञ्छा मद्यपदेवताः[1] । वीरालाभात्समन्विष्य कङ्कालं तमपाहरन्[2] ॥१०३॥

एकमेकं स्वमङ्गं च विनिधाय क्षणादथ । कुतो[1]प्यानीय पुंलक्ष्म[2] पूर्णाङ्गं तं प्रचक्रिरे ॥१०४॥

अथ पुर्यष्टकं भ्राम्यद[1]नाक्रान्तान्यविग्रहम् । योगेनाकृष्य योगेश्यस्[2]तत्र संधिमतेर्न्यधुः ॥१०५॥

ततः सुप्तोत्थित[1] इव प्रत्तदिव्यविलेपनः । समभुज्यत ताभिः स यथेच्छं चक्रनायकः ॥१०६॥

ईशानस्[1]तस्य देवीनां वितीर्णाङ्गाहतिं पुनः । क्षपायां क्षीयमाणायां चकितः पर्यशङ्कत ॥१०७॥

तदंस्तद्रक्षया धीरः स च तत्स्थानमाययौ । तच्च योगेश्वरीचक्रं क्षिप्रमन्तरधीयत ॥१०८॥

[illegible]थाश्रूयत वाक्तासां माभूदीशान भीस्तव । नास्त्यङ्गहानिरस्माकं वृते चास्मिन्न वञ्चना ॥१०९॥

अस्मद्वराद्दिव्यवपुःसंधितः संधिमानसौ । आर्यत्वादार्यराजश्च ख्यातो भुवि[1] भविष्यति ॥११०॥

ततो दिव्याम्बरः स्रग्वी दिव्यभूषणभूषितः । ववन्दे संधिमान्प्रह्वः प्राप्तपूर्वस्मृतिर्गुरुम् ॥१११॥

ईशानोपि तमालिङ्ग्य स्वप्नेष्वपि सुदुर्लभम् । भूमिकामालम्बे कामिति को वक्तुमर्हति ॥११२॥

असारं च विचित्रं च संसारं ध्यायतोर्मिथः । विवेकविशदा तत्र प्रावर्तत तयोः कथा ॥११३॥

अथ वार्तां विदित्वेमां कुतोपि नगरौकसः । सबालवृद्धाः सामात्यास्तमेवोद्देशमाययुः ॥११४॥

पूर्वाकृतिविसंवादाद्भ्रमो नायं स इत्यथ । तेनाच्छिद्यत संवादिनिखिलान्पृच्छता वचः ॥११५॥

अर्थनां शासितुं राष्ट्रं पौराणामपराजकम् । सोन्वमन्यत कृच्छ्रेण निःस्पृहः शासनाद्गुरोः ॥११६॥

प्रापय्योपवनोपान्तं तं दिव्याकृतिशोभिनम् । सतूर्यं स्नापयामासुरभिषेकाम्बुभिर्द्विजाः ॥११७॥

नवराजोचिताचारे न स शिक्षामपैक्षत । दृष्टकर्मा समस्तास्तु निस्तुषाः प्रक्रिया व्यधात् ॥११८॥

स राजोचितनेपथ्यः पौराशीर्घोषशोभिनीम् । सौधोन्मिषल्लाजवर्षां ससैन्यैः[1] प्राविशत्पुरीम् ॥११९॥

तस्मिन्विरजसि प्राज्यमाक्रामति नृपासनम् । आचक्राम प्रजा व्यापन्न दैवी न च मानुषी ॥१२०॥

अहरन्हृदयं तस्य शृङ्गाररहितविभ्रमाः[1] । नितम्बिन्यो वनभुवः शमिनो[2] न तु योषितः ॥१२१॥

वनप्रसूनसंपर्कपुण्यगन्धैस्तपस्विनाम् । कर्पूरधूपसुरभिः करैः स्पृष्टः स पिप्रिये ॥१२२॥

भूतेशवर्धमानेशविजयेशानपश्यतः । नियमो राजकार्येषु तस्याभूत्प्रतिवासरम् ॥१२३॥

हरायतनसोपानक्षालनाम्भःकणाञ्चितैः । संस्पृष्टः पवनैः सोभूदानन्दास्पन्दविग्रहः ॥१२४॥

पूर्वपूजापनयने निराडम्बरसुन्दरः[1] । तेनैव द्रष्टुमज्ञायि स्नपितो विजयेश्वरः ॥१२५॥

लिङ्गपीठलुठत्स्नानकुम्भाम्भःक्षोभभूर्ध्वनिः । शयानस्याप्यभूत्तस्य वल्लभो वल्लकीद्विषः ॥१२६॥

---

१००. [1]) $A_2$ gloss तमोरिः चाव् इति भाषया. १०३. [1]) Thus corr. by $A_3$ from $A_1$ मध्यमदे°; $A_2$ in margin मद्यमदेन ताः इत्यन्यादर्शे.—[2]) Thus corr. by $A_2$ from $A_1$ तमुपाहरन्. १०४. [1]) Thus corr. by later hand from $A_1$ ततो.—[2]) Thus corr. by $A_3$ from $A_1$ पुंलिङ्ग°. १०५. [1]) Thus corr. by $A_1$ from भ्राम्यन्मना°.—[2]) $A_3$ योगिन्यः. १०६. [1]) त supplied by $A_3$. १०७. [1]) Thus corr. by $A_3$ from $A_1$ ईशानतस्य. ११०. [1]) $A_3$ राजा. ११९. [1]) Thus corr. by $A_3$ from $A_1$ ससैन्यां. १२१. [1]) $A_3$ gloss शृङ्गेषु अरहितः न त्यक्तः वीनां पक्षिणां भ्रमः भ्रमणं याभिः ताः.—[2]) $A_3$ gloss शान्तस्य. १२५. [1]) Thus corr. by $A_3$ from $A_1$ निजड°.

तापसैर्भस्मरुद्राक्षजटाजूटाङ्कितैर्बभौ । तस्य माहेश्वरी पर्षदिव भूमिपतेः सभा ||१२७||

शिवलिङ्गसहस्रस्य प्रतिष्ठाकर्मणि प्रभोः । प्रतिज्ञा प्रत्यहं तस्य नाभूद्विघटिता क्वचित् ||१२८||

प्रमादात्तदनिष्पत्तौ शिलामुत्कीर्य कल्पिता । सहस्रलिङ्गी तद्भृत्यैः सर्वतोऽद्यापि दृश्यते ||१२९||

130 तासु तासु स वापीषु लिङ्गव्याजादरोपयत् । स्वपुण्यपुण्डरीकानां[1] जन्मनेक्षपरंपराम् ||१३०||

स्थाने स्थाने जलान्तश्च बहुसंख्यैर्निवेशितैः । अनयन्नर्मदाभङ्गिं शिवलिङ्गैस्तरङ्गिणीः ||१३१||

प्रतिलिङ्गं महाग्रामाः प्रत्यपाद्यन्त तेन ये । पर्षदामद्य तद्भोगः कालेनान्तर्धिमागतः ||१३२||

अकरोत्स महाहर्म्यैर्महालिङ्गैर्महावृषैः । महात्रिशूलैर्महतीं महामाहेश्वरो महीम् ||१३३||

कृत्वा संधीश्वरं[1] देहसंधानपितृकानने । ईशानस्य गुरोर्नाम्ना व्यधादीशेश्वरं[2] हरम् ||१३४||

135 थेदां च भीमदेवीं च देशांश्चान्यान्पदेपदे । स मठप्रतिमालिङ्गैर्हर्म्यैर्निन्ये महार्घताम् ||१३५||

स्वयंभूमिश्च तीर्थैश्च पूतं भक्तिविभूषितः[1] । स एव भोक्तुमज्ञासीत्प्राज्ञः[2] कश्मीरं[3] मण्डलम् ||१३६||

स्नातस्य निर्झराम्भोभिः पुष्पलिङ्गार्चनोत्सवैः । राज्ञस्तस्य वनोर्वीषु मासः पुष्पाकरो ययौ ||१३७||

स चातिरम्यः काश्मीरो ग्रीष्मस्त्रिदिवदुर्लभः । हिमलिङ्गार्चनैः प्रायाद्वनान्तेषु कृतार्थताम् ||१३८||

फुल्लाब्जषण्डरुद्धाशाः प्राप्य पुष्करिणीतटीः । लक्ष्मीसखः स खण्डेन्दुचूडध्यान[1]परोऽभवत् ||१३९||

140 नीलोत्पलवतीर्वापीरगस्त्योदयनिर्विषाः । अवगाह्य हरार्चाभिः शरदं निर्विवेश सः ||१४०||

सार्धं तपोधनैस्तैस्तैर्भजतो जागरोत्सवान् । तस्याभूवन्भुवो भर्तुरमोघा माघरात्रयः ||१४१||

अत्यद्भुतं राज्यलाभमित्थं सफलयन्कृती । पञ्चाशतं त्रिवर्षोनामत्यक्रामत्स वत्सरान् ||१४२||

शमव्यसनिनस्तस्य राज्यकार्याण्यपश्यतः । तस्मिन्काले प्रकृतयो विरागं प्रतिपेदिरे ||१४३||

अन्वैष्यत नृपस्ताभिः कश्चिद्राज्याय शुश्रुवे । राजपुत्रो जिगीषुश्च श्रीमान्यौधिष्ठिरे कुले ||१४४||

145 जुगोप गोपादित्याख्यं[1] कश्मीरेन्द्रजिगीषया । युधिष्ठिरप्रपौत्रं हि गान्धाराधिपतिस्तदा ||१४५||

वसन्नप्राप्त[1]साम्राज्यः स तत्र तनयं क्रमात् । अवाप लक्षणैर्दिव्यैरमोघं मेघवाहनम् ||१४६||

स तत्र[1] पितुरादेशाद्वैष्णवान्वयजन्मनः । राष्ट्रं प्राग्ज्योतिषेन्द्रस्य ययौ कन्यास्वयंवरे ||१४७||

तत्र तं वारुणं छत्रं छायया राजसंनिधौ । भेजे वरस्रजा राजकन्यका चामृतप्रभा ||१४८||

तेन तस्य निमित्तेन वृद्धिमागामिनीं जनाः । अजानन्नम्बुवाहस्य पाश्चात्त्येनेव वायुना ||१४९||

150 राज्ञा हि नरकेणैतद्वरुणाद्दुर्णवारणम् । आनीतमकरोच्छायां न विना चक्रवर्तिनम् ||१५०||

तमन्तिकं पितुः प्राप्तं पत्न्या लक्ष्म्या च संश्रितम् । भुवा निमन्त्रयामासुर्मन्त्रिणो वंशयोग्यया ||१५१||

अथार्यराजो विज्ञाय स्वराज्यं भेदजर्जरम् । प्रतिचिक्रे न शक्तोऽपि तस्थौ तु त्यक्तुमुत्सुकः ||१५२||

अचिन्तयच्च सत्यं मे संप्रीतो भूतभावनः । सिद्धिविघ्नानमून्दीर्घानपाकर्तुं समुद्यतः ||१५३ ||

कृत्ये बहुनि निष्पाद्ये श्रमात्कौसीद्यं[1]माश्रयन्[2] । प्रावृषीवाध्वगो दिष्ट्या मोहितोऽस्मि न निद्रया ||१५४||

155 स्वकाले[1] त्यजता लक्ष्मीं विरक्तां[2] बन्धकीमिव । हठनिर्वासनव्रीडा दिष्ट्या नासादिता मया ||१५५||

१३०. [1]) Thus corr. by $A_3$ from $A_1$ °पुण्डरीकाक्षज°. १३४. [1]) The *aksharas* श्वरं supplied by $A_3$ in space left by $A_1$.— [2]) $A_2$ gloss ईशभ्राडू इति प्रसिद्धस्थले. १३६. [1]) $A_3$ °विशेषतः.—[2]) Thus $A_3$ ; $A_1$ प्राज्यः.—[3]) Thus corr. by later hand from $A_1$ काश्मीर°. १३९. [1]) Thus corr. by later hand from $A_1$ चूडाध्या°. १४५. [1]) Thus corr. by $A_2$ from °त्याख्यः. १४६. [1]) Thus $A_3$; $A_1$ वसन्नपास्तसा°. १४७. [1]) $A_3$ युवा. १५४. [1]) $A_2$ glosses आलस्यम् and---न कर्म कौसीद्यं.—[2]) Thus corr. by $A_3$ from $A_1$ °श्रयम्. १५५. [1]) Thus $A_1$ ; $A_3$ स्वकुले.—[2]) Thus corr. by $A_3$ from $A_1$ सरक्ताम्.

शैलूषस्येव मे राज्यरङ्गेस्मिन्वल्गतश्चिरम् । निर्व्यूढम[1]पि वैरस्यं दिष्ट्या न प्रेक्षका गताः ॥१५६॥
दिष्ट्या सदैव वैमुख्यमुच्चैरुद्घोषयञ्श्रियः । त्यागक्षणे न भीतोस्मि विकत्थन इवाहवे ॥१५७॥
इति संचिन्तयन्नंतः सर्वत्यागोन्मुखो नृपः । मनोराज्यानि कुर्वाणो दरिद्र इव पिप्रिये ॥१५८॥
अन्येद्युः प्रकृतीः सर्वाः संनिपत्य सभान्तरे । ताभ्यः प्रत्यर्पयन्न्यासमिव राज्यं सुरक्षितम् ॥१५९॥
उज्झितं स्वेच्छया तच्च[1] प्रयत्नेनापि नाशकत् । तं स्वीकारयितुं कश्चित्फणीन्द्रमिव कञ्चुकम् ॥१६०॥ 160
अर्चालिङ्गमुपादाय सोथ प्रायादुदङ्मुखः । धौतवासा निरुष्णीषः पद्भ्यामेव प्रजेश्वरः ॥१६१॥
तस्य पादार्पितदृशो व्रजतो मौनिनः प्रभोः । पन्थानं जगृहुः पौरा निःशब्दस्रवदस्रवः ॥१६२॥
स विलङ्घितगव्यूतिरुपविश्य तरोरधः । जनमेकैकमुद्बाष्पं न्यवर्तयत सान्त्वयन् ॥१६३॥
पथि शिखरिणां मूले मूले विलम्ब्य जहज्जनान्वितपरिकरो गच्छन्नूर्ध्वं क्रमात्समदृश्यत ।
गहनवसुधाः संपूर्योच्चैर्व्रजन्स निजात्पदान्नद इव विनिर्यातः स्तोकैः कृतानुगमो[1] जलैः ॥१६४॥
निःशेषं निकटात्स लोकमटवीमध्ये निरुन्धन्प[1]दं शोकावेशसबाष्पगद्गदपदं संमान्य चोत्सार्य च ।
भूर्जत्व[2]क्परिरोधमर्मर[3]मरुन्निद्राणसिद्धाध्वगश्रेणीमौलि[4]मणिप्रभोज्ज्वलगुहागे[5]हं जगाहे वनम् ॥१६५॥ 165
अथ वनसरसीतटद्रुमाधः पुटकघटोदरसंभृताम्बुपूराम् ।
वसतिमकृत वासरावसाने शुचितरुपल्लवकल्पितोच्चतल्पाम् ॥१६६॥
शृङ्गासक्तासितातपाः शबलितच्छायाभुवः शाद्वलैरुत्फुल्ला[1]मलमल्लिकातलमिलत्सुप्तव्रजस्त्रीजनाः ।
सध्वाना वनपालवेणु[2]रणितोन्मिश्रैः प्रपाताम्बुभिः श्रान्तं दृक्पथमागतास्तमनयन्निद्रामदूराद्रय[3]ः ॥१६७॥
वनकरि[1]रसितैः पदे पदे स प्रतिभटतां पटहध्वनै[2]र्दधानैः ।
अमनुत रटितैश्च कर्करेटोः परिगलितां गमनोन्मुखस्त्रियामाम् ॥१६८॥
अन्येद्युर्विधिवदुपास्य पूर्वसंध्यामासन्ने नलिनसरस्यपास्तनिद्रः ।
क्ष्मापालः परिचितसोदराम्बुतीर्थं नन्दीशाध्युषितमवाप भूतभर्तुः ॥१६९॥
नन्दिक्षेत्रे त्रिभुवनगुरोः सोग्रतस्तत्र यावत्तस्थौ तावत्[1]स्वयमभिमतावाप्तये जायते स्म ।
भस्मस्मेरः सुघटितजटाजूटबन्धोक्षसूत्री रुद्राक्षाङ्को जरठमुनिभिः सस्पृहं वीक्ष्यमाणः ॥१७०॥ 170
भ्राम्य[1]ञ्श्रीकण्ठदत्तव्रतजनितमहासत्क्रियो भैक्षहेतोर्भिक्षादानोद्यतासु प्रतिमुनिनिलयं संभ्रमात्तापसीषु ।
वृक्षैर्भिक्षाकपाले शुचिफलकुसुमश्रेणिभिः पूर्यमाणे मान्यो वैराग्ययोगे[2]ष्वनुपनत[3]परप्रार्थनालाघवोभूत् ॥१७१॥

६ ॥ १७१ ॥ आदितः ४३ ॥ ग्रं ५४३ ॥

**इति श्रीकाश्मीरिकमहामात्यश्रीचण्पकप्रभुसूनोः कल्हणस्य कृतौ राजतरङ्गिण्यां द्वितीयस्तरङ्गः ॥**

**शतद्वये वत्सराणामष्टाभिः परिवर्जिते । अस्मिन्द्वितीये व्याख्याताः षट्प्रख्यातगुणा नृपाः ॥**

---

१५६. 1) Thus $A_1$; the *v. l.* of $A_2$ निर्व्यूढावपि has been struck out again; G R निर्व्यूढमपि. १६०. 1) Thus corr. by later hand from $A_1$ तं च. १६४. 1) Thus corr. by $A_3$ from $A_1$ स्तोकानुगमो. १६५. 1) Thus $A_3$; $A_1$ निरुद्धयत्परं.— 2) Thus corr. by later hand from $A_1$ भूर्जत्वत्प°.— 3) Thus corr. by $A_3$ from $A_1$ मर्जर°.— 4) The *akshara* लि supplied by $A_3$ in space left by $A_1$.— 5) The gloss भोमजोवो, written by $A_4$ at the foot of the page, probably refers to this word. १६७. 1) Thus corr. by $A_2$ from $A_1$ शाद्वलैरुल्लासामल°; the latter reading repeated in margin by $A_3$.— 2) Thus G *sec. manu* and P; A R C °पालरेणु°.— 3) $A_3$ gloss पर्वताः. १६८. 1) $A_3$ वनहरि°.— 2) Thus corr. by later hand from $A_1$° ध्वनैर्दं°.— १७०. 1) $A_1$ यावत्तावत्; supplemented as above by $A_2$. १७१. 1) $A_3$ भ्राम्यच्छ्री°.— 2) Thus corr. by $A_3$ from $A_1$ °योग्यो· 3) $A_1$ writes °व्यनुपतन°, with figures indicating transposition.

## ॥ तृतीयस्तरङ्गः ॥

मुञ्चेभाजिनमस्य[1] कुम्भकुहरे मुक्ताः कुचाग्रोचिताः किं भालज्वलनेन कज्जलमतः स्वीकार्यमक्ष्णोः कृते ।
संधाने वपुरर्धयोः प्रतिवदन्नेवं निषेधेष्वहेः कर्तव्ये प्रिययोत्तरानुसरणोद्युक्तो हरः पातु वः ॥१॥
अथोल्लसत्पृथुश्लाघमानिन्युर्मेघवाहनम् । गान्धारविषयं गत्वा सचिवाधिष्ठिताः प्रजाः ॥२॥
रक्तप्रजस्य भूभर्तुः पश्चाल्लोकानुरञ्जनम् । तस्याज्ञायि जनैर्धौतक्षौमक्षालनसंनिभम् ॥३॥
स पुनर्बोधिसत्त्वानामपि सत्त्वानुकम्पिनाम् । चर्यामुदात्तचरितैरत्यशेत महाशयः ॥४॥
5 तस्याभिषेक एवाज्ञां धारयन्तोधिकारिणः । सर्वतोमार[1]मर्यादापटहानुदघोषयन् ॥५॥
कल्याणिना प्राणिवधे तेन राष्ट्रान्निवारिते । निष्पापां प्रापिता वृत्तिं स्वकोशात्सौनिकादयः ॥६॥
तस्य राज्ये जिनस्येव मारविद्वेषिणः प्रभोः । क्रतौ घृतपशुः पिष्टपशुर्भूतबलावभूत् ॥७॥
स मेघवननामानमग्रहारं विनिर्ममे । मयुष्टग्रामकृत्पुण्यज्येष्ठं[1] मेघमठं तदा[2] ॥८॥
भोगाय देश्य[1]भिक्षूणां वल्लभास्यामृतप्रभा । विहारमुच्चैरमृतभवनाख्यमकारयत् ॥९॥
10 देशैकदेशा[1]ल्लोर्नाम्नः प्राप्तस्तस्याः पितुर्गुरुः । स्तुन्पा[2] तद्भाषया प्रोक्तो लोस्तोन्पास्तूपकार्यकृत् ॥१०॥
चक्रे नडवने राज्ञो यूक[1]देव्यभिधा वधूः । विहारमद्भुताकारं सपत्नीस्पर्धयोद्यता ॥११॥
अर्धे यद्भिक्षवः शिक्षाचारास्तत्रार्पितास्तया । अर्धे गार्हस्थ्यगर्ह्याश्च सस्त्रीपुत्रपशुस्त्रियः ॥१२॥
अथेन्द्रदेवीभवनमिन्द्रदेव्यभिधा व्यधात् । विहारं सचतुःशालं स्तूपं भूपप्रियापरा ॥१३॥
अन्याभिः खादनासम्माप्रमुखाभिर्निजाख्यया । देवीभिस्तस्य महिता विहारा बहवः कृताः ॥१४॥
15 अर्वाक्कालोद्भवस्यापि राज्यकालेस्य भूपतेः । न्यक्कृतादिनृपोदन्तैर्वृत्तान्तैरद्भुतोभवत् ॥१५॥
स बहिर्विहरञ्जातु भूभृद्भीतैरुदीरितम् । चौरश्चौरोयमित्याराद्शृणोत्क्रन्दितध्वनिम् ॥१६॥
कः कोत्र बध्यतां चौर इत्युक्ते तेन सक्रुधा । शशामाक्रन्दितध्वानो न च चौरो व्यभाव्यत ॥१७॥
पुनर्द्वित्रैर्दिनैस्तस्य निर्गतस्याग्रतस्ततः । अभवन्नभयार्थिन्यो ह्रिन्ना दिव्यप्रभाः स्त्रियः ॥१८॥
ताः संश्रुतेप्सितास्तेन रुद्धाश्वेन कृपालुना । अभ्यभाषन्त सीमन्तपुञ्जिताञ्जलयो वचः ॥१९॥
20 देव दिव्यप्रभावेण भुवने भवता धृते । अपरस्माद्भयं जातु कस्य स्यात्करुणानिधे ॥२०॥
तदानीं तोयदा भूत्वा छादयन्तो नभस्तलम् । अकाण्डकरकापातशङ्किभिः कार्षकैर्मृषा ॥२१॥
पक्वशालिवनस्फीति[1]रक्षाक्षुभितमानसैः । नागास्त्वत्कोपसंरम्भभूमितां[2] गमिताः प्रभो ॥२२॥

---

१. 1) $A_2$ gloss इभस्य. ५. 1) $A_3$ gloss अमारः अहिंसा. ८. 1) $A_3$ °ज्येष्ठो.—2) $A_3$ तथा. ९. 1) Thus $A_3$; $A_1$ चैत्य°.
१०. 1) Thus $A_1$; corr. by later hand into देश्यैक°.—2) $A_2$ स्तुम्पा. ११. 1) $A_3$ यूख°. १४. 1) $A_3$ gloss नृपस्त्रीभिः.
२२. 1) $A_3$ °स्फाति°.—2) $A_3$ भूमिं ते.

तेस्माकं पतयश्चौरश्चौर इत्यार्तभाषितम् । श्रुत्वा देवेन बध्यन्तामित्यवादि यदा क्रुधा ॥२३॥
तदा त्वदाज्ञामात्रेण न्यपतन्पाशवेष्टिताः । प्रसादः क्रियतां तेषामस्मत्करुणयाधुना ॥२४॥ चक्कलकम् ॥
तदाकर्ण्यावदद्राजा प्रसादविशदाननः । सर्वे ते बन्धनान्नागास्त्यज्यन्त्वामिति सस्मितः ॥२५॥
तया तस्याज्ञया राज्ञो नागा विधुतबन्धनाः । प्रणम्य चरणौ तूर्णं प्रययुः सपरिग्रहाः ॥२६॥
अथ ग्राहयितुं भूपानाज्ञां हिंसानिवृत्तये । स दिग्जयाय निर्व्याजधर्मचर्यो विनिर्ययौ ॥२७॥
अभूदभीतजनतावेक्षणश्लाघ्यविक्रमः । स्पृहणीयो जनस्यापि तदीयविजयोद्यमः ॥२८॥
प्रभावविजितान्कृत्वा सोहिंसादीक्षितान्नृपान् । अर्णसां पत्युरभ्यर्णमवापावर्णवर्जितः ॥२९॥
तत्र तालीवनच्छायासुखविश्रान्तसैनिकः[1] । युक्तिं द्वीपान्तराक्रान्तौ क्षणमन्तर्व्यचिन्तयत् ॥३०॥
अथ वेलावनोपान्तात्तेनार्ताक्रन्दितध्वनिः । मेघवाहनराज्येपि हतोहमिति शुश्रुवे ॥३१॥
तत्प्रायःशङ्कुनेवान्तर्व्रणितः स द्रुतं ततः । संचारिणातपत्रेण सत्रा तां वसुधामगात् ॥३२॥
अपश्यदथ केनापि चण्डिकायतनाग्रतः । नरं शबर[1]सेनान्या हन्यमानमधोमुखम् ॥३३॥
अनात्मज्ञ धिगेतत्ते कुकर्मेति महीभुजा । तर्जितः स भयादेवं शबरस्तं व्यजिज्ञपत् ॥३४॥
शिशुर्मुमूर्षुर्मे राजन्नयं रोगार्दितः सुतः । कर्मैतद्दैवतैरुक्तमस्य श्रेयोलवावहम् ॥३५॥
उपहारनिरोधेन सद्य एवं[1] विपद्यते । बन्धुवर्गमशेषं च विद्ध्येतज्जीवजीवितम् ॥३६॥
अरण्यगहनाल्लब्धमनाथं देव रक्षसि । बहुलोकाश्रयं बालं कथमेतमुपेक्षसे ॥३७॥
अथाभ्यधान्महात्मा स वचोभिः शबरस्य तैः । वध्यस्य दृष्टिपातैश्च विक्लवैर्विवशीकृतः ॥३८॥
किरात कातरो मा भूः स्वयं संरक्ष्यते मया । बहुबन्धुस्तव सुतो वध्योप्ययमबान्धवः ॥३९॥
उपहारीकरोम्येष चण्डिकायै स्वविग्रहम् । मयि प्रहर निःशङ्कं जीवत्वेतज्जनद्वयम् ॥४०॥
तदद्भुतमहासत्त्वचित्तोदात्तत्वविस्मितः । उन्मिषद्रोमहर्षस्तं ततः स शबरोभ्यधात् ॥४१॥
अतिकारुण्यमिषतस्तवायं पृथिवीपते । कश्चिन्मतिविपर्यासप्रकारो हृदि रोहति ॥४२॥
त्रैलोक्यजीवितेनापि यो रक्ष्यो हेलयैव तम् । पृथिवीभोगसुभगं कथं कायमुपेक्षसे ॥४३॥
न मानं न यशो नार्थान्न दारान्न च बान्धवान् । न धर्मं न सुतान्भूपा रक्षन्ति प्राणतृष्णया ॥४४॥
तत्प्रसीद प्रजानाथ मा वध्येस्मिन्कृपां कृथाः । शिशुश्चैष प्रजाश्चैता जीवन्तु त्वयि जीवति ॥४५॥
उपाजिहीर्षुरात्मानं दन्तद्योतार्घडम्बरैः । अर्चयन्निव चामुण्डामथोवाच स पार्थिवः ॥४६॥
सदाचारसुधास्वादे के भवन्तो वनौकसः । जाह्नवीमज्जनप्रीतिं न जानन्ति मरुस्थिताः ॥४७॥
ध्रुवापायेन कायेन क्रीणतः कीर्तिमव्ययाम् । ममाभीष्टं[1] प्रमार्ष्टुं ते मूढ रूढोयमाग्रहः ॥४८॥
मा वोचः किंचिदपरं प्रहर्तुं चेद्घृणा तव । न किं निजः कृपाणो मे शक्तः प्रक्रान्तसिद्धये ॥४९॥
इत्युक्त्वा स स्वयं देहमुपहर्तुं समुद्यतः । खण्डनाय स्वमुण्डस्य विकोशं शस्त्रमादधे ॥५०॥
ततः प्रहर्तुकामस्य तस्य द्युकुसुमैः शिरः । करश्च दिव्यवपुषा रुद्धः केनाप्यजायत ॥५१॥

---

३०. [1]) Thus corr. by later hand from A₁ °कैः. ३३. [1]) A R G here and elsewhere शवर°. ३६. [1]) A₃ एव. ४८. [1]) Thus corr. by later hand from A₁ °भीष्टां.

न चण्डिकां न तं वध्यं न किरातं न दारकम् ॥५२॥
अथापश्यत्तथाभूतः कंचिद्दिव्याकृतिं पुरः । विद्धि मध्यमलोकेन्दो वरुणं करुणानिधे ॥५३॥
स तं दिव्यस्तदावादीन्मां त्वं सत्त्ववशीकृतम् । महाबलोहरद्धीमः पुराणश्वशुरस्तव ॥५४॥
यदेतत्त्वामुपास्तेद्य छत्त्रं तन्मत्पुरात्पुरा । उपद्रवाः प्राणहराः पौराणां नः पदे पदे ॥५५॥
55 रसातलैकतिलकं माहात्म्यवदिदं विना । कारुण्यमय मायेयं निरमायि मयेदृशी ॥५६॥
तदिदं प्राप्तुकामेन त्वदौदार्यं परीक्षितुम् । प्रायश्चित्तममारेण चरसीव तदेनसः[1] ॥५७॥
त्वदादिर्यो व्यधाज्जन्तून्व्यसून्वसुकुलात्मजः[1] । शेषदेहे विषोद्गारफणारत्नौघयोरिव ॥५८॥
भयस्पृहाजनकयोर्धरणीधारणोचिते । उषर्बुधे धूमजालज्वालापल्लवयोरिव ॥५९॥
तमःप्रकाशावहयोस्तेजःक्रान्तदिगन्तरे । प्रावृट्पयोदच्छन्नेह्नि संतापासारयोरिव ॥६०॥
60 क्षमाप्यायक्रियाभाजो रुद्धतेजस्विमण्डले । तस्य त्रिकोटिहन्तुश्च तवाहिंसस्य च प्रभोः ॥६१॥ चक्कलकम् ॥
द्वयोरालोकितं चित्रं जन्मैकस्मिन्महाकुले । चकार पूजां स्तोत्रेण छत्त्रेण च कृताञ्जलिः ॥६२॥
नम्रः सम्राडथैवं स वदतो यादसां प्रभोः । जगाद गुणिनामग्र्यो वरुणं धरणीधरः ॥६३॥
तं च स प्रतिगृह्णन्तं प्रणयादुष्णवारणम् । अर्थिनां प्रार्थिताः पूर्वं फलन्त्यन्ये स्वयं यतः ॥६४॥
कल्पद्रुमाश्च सन्तश्च नार्हन्ति समशीर्षिकाम् । तत्प्रार्थयिष्यते[1] न चेदार्तोपकृतये भवान् ॥६५॥
65 भवालम्बिष्यत छत्त्रं कथं नः पुण्यपण्यताम् । छाययाप्याययन्दद्यात्[3]फलान्यपि महीरुहः ॥६६॥
वदान्यः[1] संविभाग्येभ्यः[2] पूर्णं कुर्यादनुग्रहम् । जनोयं भगवन्किंचिद्दूरं प्रार्थयते परम् ॥६७॥
तदेवं[1] विहितोदात्तसंविभागाभिचोदितः । जेतुं द्वीपान्कथ्यतां तु युक्तिः पाथोधिलङ्घने ॥६८॥
वशीकृतेयं पृथिवी कृत्स्ना भवदनुग्रहात् । तितीर्षौ भवति स्तम्भं नीयतेम्भो मयाम्बुधेः ॥६९॥
इत्यर्थ्यमानोकथयद्भूमिपालं जलेश्वरः । तिरोबभूव भगवान्वरुणः सोष्णवारणः ॥७०॥
70 ततो महान्प्रसादोयमित्युक्ते पृथिवीभुजा । प्रभावस्तम्भितक्षोभं[1] प्रोत्ततार स वारिधिम् ॥७१॥
अन्येद्युर्विस्मयस्मेरैर्बलैः सीमन्तयञ्जलम् । नानारत्नाकरं सैन्यैरारुरोहाथ रोहणम् ॥७२॥
गुणरत्नाकरः शैलं स रत्नाकरशेखरम् । प्रीत्या लङ्काधिराजस्तमुपतस्थे विभीषणः ॥७३॥
तत्र तालीतरुवनच्छायाध्यासितसैनिकम् । वन्दिनादा[1]श्रुतान्योन्य[2]प्रथमालापसंभ्रमः ॥७४॥
समागमः स शुशुभे नरराक्षसराजयोः । अमर्त्यसुलभाभिस्तं विभूतिभिरुपाचरत् ॥७५॥
75 अथ रक्षःपतिर्लङ्कां नीत्वालंकरणं क्षितेः । तदा तदाज्ञाग्रहणे प्रापि तद्रूढिशब्दताम् ॥७६॥
यदासीत्पिशिताशा इत्यन्वर्थं नाम रक्षसाम् । सनाथशिखरान्प्रादात्तस्मै रक्षःपतिर्ध्वजान् ॥७७॥
रक्षःशिरःप्रतिच्छन्दैः[1] स्थिरप्रणतिसूचकैः । राज्ञां यात्रासु निर्यान्ति ख्याताः पारध्वजाः पुरः ॥७८॥
पाराद्वारिनिधेः प्राप्ताः कश्मीरेष्वधुनापि ये । स्वमण्डलं प्रति कृती न्यवर्तत नराधिपः ॥७९॥
इत्थमाराक्षसकुलं प्राणिहिंसां निषिध्य सः ।

५७. [1]) The *aksharas* न्व्यसून्वसुकु and मारेण चरसीव तदेनसः supplied by $A_3$ in spaces left by $A_1$. ५८. [1]) भयस्पृहाजन supplied by $A_3$, as above. ६५. [1]) त supplied by $A_3$. ६६. [1]) Emended; A R G वदन्यः.—[2]) $A_1$ gloss अर्थिभ्यः.—[3]) Thus corr. by $A_3$ from $A_1$ दध्यात. ६७. [1]) Thus corr. by $A_3$ from $A_1$ तदयं. ७१. [1]) Thus $A_1$; $A_3$ जलं. ७४. [1]) दा supplied by $A_3$.—[2]) न्योन्य supplied by $A_3$ in space left by $A_1$. ७७. [1]) $A_1$ gloss प्रतिमाभिः.

ततः प्रभृति तस्याज्ञा सार्वभौमस्य भूपतेः । हिंसाविरतिरूपा सा न कैश्चिदुदलङ्घ्यत ॥८०॥ 80
क्षुद्रैरुधादिभिर्नाप्सु सिंहाद्यैर्गहने न च । न श्येनप्रमुखैर्व्योम्नि तद्राज्ये जन्तवो हताः ॥८१॥
अतिक्रामति कालेथ कोपि शोकाकुलो द्विजः । पुत्रं गदार्तमादाय द्वारि चक्रन्द भूपतेः ॥८२॥
दुर्गया प्रार्थितं राजन्पश्वाहारं[1] विनैष मे । अनन्यसंततेः सूनुर्ज्वरेणाद्य विपद्यते ॥८३॥
यद्यहिंसाग्रहेणेमं क्षितिपाल न रक्षसि । एतद्विपत्तौ तत्कोन्यो निमित्तं प्रतिभाति मे ॥८४॥
निर्णयो वर्णगुरुणा त्वयैवैष प्रदीयताम् । ब्राह्मणस्य पशोर्वा स्यात्प्राणानां कियदन्तरम् ॥८५॥ 85
तपःस्थानपि ये जघ्नुर्ब्राह्मणप्राणलब्धये । हा मातस्तेधुना भूमे प्रजापालास्तिरोहिताः ॥८६॥
इति ब्रुवति साक्षेपं शोकरूक्षाक्षरं द्विजे । आपन्नार्तिहरो राजा चिरमेवं व्यचिन्तयत् ॥८७॥
न वध्याः प्राणिन इति प्राङ्मया समयः कृतः । विप्रार्थमपि किं कुर्यां स प्रतिज्ञातविप्लवम् ॥८८॥
निमित्तीकृत्य मामद्य विपद्येत द्विजो यदि । तत्राप्यत्यन्तपापीयानर्थः संकल्पविप्लवः ॥८९॥
नैति मे संशयभ्रान्तमेकपक्षावलम्बनम् । संभेदावर्तपतितं प्लवनमिव मानसम् ॥ ९०॥ 90
तत्स्वदेहोपहारेण दुर्गां तोषयता मया । प्रतिज्ञया समं न्याय्यं रक्षितुं जीवितं द्वयोः ॥९१॥
इति संचिन्त्य सुचिरं देहदानोद्यतो नृपः । श्वः प्रियं तव कर्तास्मीत्युक्त्वा विप्रं व्यसर्जयत् ॥९२॥
क्षपायां क्ष्मापतिमथ स्वमुपाहर्तुमुद्यतम् । निषिध्य दुर्गा व्यधित प्रकृतिस्थं द्विजन्मजम् ॥९३॥
इत्याद्यद्यतनस्यापि चरितं तस्य भूपतेः । पृथग्जनेष्वसंभाव्यं वर्णयन्तस्त्रपामहे ॥९४॥
अथवा रचनानिर्विशेषमार्षेण वर्त्मना । प्रस्थितां[1] नानुरुन्धन्ति श्रोतृचित्तानुवर्तनम्[2] ॥९५॥ 95
तस्मिन्नस्तंगते भुक्त्वा क्ष्मां चतुस्त्रिंशतं समाः । अनादित्यमिवाशेषं निरालोकमभूज्जगत् ॥९६॥
अथ क्ष्माभृद्ररक्ष क्ष्मां श्रेष्ठसेनस्तदात्मजः । आहुः प्रवरसेनं यं तुञ्जीनं चाञ्जसा जनाः ॥९७॥
दोःस्तम्भसंभृतासक्तौ कृपाणमणिदर्पणे । संक्रान्तेवोन्मुखी यस्य भुवनश्रीर्व्यभाव्यत ॥९८॥
समातृचक्रं निर्माय यः पूर्वं प्रवरेश्वरम् । पुण्याः पुराणाधिष्ठाने प्रतिष्ठा विविधा व्यधात् ॥९९॥
गृहाङ्गनमिव क्षोणीं गणयन्वशवर्तिनीम् । त्रिगर्तोर्वी ग्राममध्ये[1] प्रवरेशाय यो ददौ ॥१००॥ 100
ईशो नृपाणां निःशेषक्ष्माकेदारकुटुम्बिनाम् । स समास्त्रिंशतं भूभृदनिस्त्रिंशाशयोभवत् ॥१०१॥
हिरण्यतोरमाणाख्यौ व्यधत्तामथ तत्सुतौ । साम्राज्ययुवराजत्वभाजने रञ्जनं क्षितेः ॥१०२॥
बलाहतानां[1] प्राचुर्यं विनिवार्यासमञ्जसम् । तोरमाणेन दीन्नाराः[2] स्वाहताः[3] संप्रवर्तिताः ॥१०३॥
मामवज्ञाय राज्ञेव कस्मादेतेन वल्गितम् । इति तं पूर्वजो राजा क्रोधनो बन्धने व्यधात् ॥१०४॥
चिरंस्थितित्यक्तशुचस्तत्र तस्याञ्जनाभिधा । ऐक्ष्वाकस्यात्मजा राज्ञी वज्रेन्द्रस्यास्त गुर्विणी ॥१०५॥ 105
आसन्नप्रसवा भर्त्रा सा त्रपार्तेन[1] बोधिता । सुतं प्रविष्टा प्रासोष्ट कुलालनिलये क्वचित् ॥१०६॥
स कुम्भकारगेहिन्या काक्येव पिकशावकः । पुत्रीकृतो राजपुत्रः पर्याप्तं पर्यवर्धत ॥१०७॥

---

८०—८१. [1])—[1]) These two verses have been supplied in margin by $A_3$. ८३. [1]) $A_3$ राजन्नुपहारं. ८८. [1]) $A_2$ प्राग्यास्मि समकल्पयम्. ९५. [1]) This verse is supplied by $A_3$ in margin.—[2]) $A_3$ gloss जनाः. १००. [1]) Thus $A_3$; $A_1$ सख्ये १०३. [1]) Thus A; G R Edd. बाला°.—[2]) $A_3$ gloss सुवर्णमया रजतताम्रमयाश्च.—[3]) $A_3$ gloss स्वाहताः स्वनामाक्षरमुद्राङ्कुरानेन आहताः संप्रवर्तिताः व्यवहारविषयाः कृताः. १०४. [1]) $A_3$ gloss तोरमाणेन. १०६. [1]) $A_3$ gloss त्रपार्तेन सलज्जेन.

जनयित्र्याः कुलाल्याश्च रक्षित्र्या विदितोभवत् । रत्नसूतेर्भुजंगयाश्च प्रच्छन्न इव शेवधिः ॥१०८॥

पौत्रः प्रवरसेनस्य गिरा मातुर्नृपात्मजः । पैतामहेन नाम्नैव कुलाल्या ख्यापितोभवत् ॥१०९॥

110 वर्धमानः स संपर्कं न सेहे सहवासिनाम् । तेजस्विमैत्रीरसिकः शिशुः पद्म इवाम्भसाम् ॥११०॥

तं कुलीनैश्च शूरैश्च विद्याविद्भिश्च दारकैः । अन्वीतमेव ददृशुः क्रीडन्तं विस्मयाज्जनाः ॥१११॥

स्ववृन्दस्यात्युदारौजा राजा चक्रे स दारकैः । मृगेन्द्रशावः क्रीडद्भिर्वने बालमृगैरिव ॥११२॥

संविभेजेनुजग्राह वशीचक्रे च सोर्भकान् । अराजोचितमाचारं नैव कंचिदसेवत ॥११३॥

भाण्डादि कर्तुं मृत्पिण्डं कुम्भकारैः समर्पितम् । स्वीकृत्य चक्रिरे तेन शिवलिङ्गपरंपराः ॥११४॥

115 तथा साश्चर्यचर्यः स क्रीडञ्जातु व्यलोक्यत । मातुलेन जयेन्द्रेण सादरं चाभ्यनन्द्यत ॥११५॥

आवेद्यमानं शिशुभिस्तं जयेन्द्रोयमित्यसौ । भूपालवत्सावहेलं पश्यन्नन्वग्रहीदिव ॥११६॥

संभाव्य सत्त्वावष्टम्भात्तमसामान्यवंशजम् । सादृश्याद्भगिनीभर्तुर्भागिनेयमशङ्कत ॥११७॥

सत्वरस्तत्त्वजिज्ञासारसेनानुससार तम् । प्राप्तस्तद्गृहमौत्सुक्यात्स्वसारं च व्यलोकयत् ॥११८॥

सा स चान्योन्यमुन्मन्यू पश्यन्तौ भ्रातरौ चिरात् । निःश्वासद्विगुणोष्माणि मुहुरस्रूण्यमुञ्चताम् ॥११९॥

120 कुलाल्या दारको मातः काविताविति पृष्टवान् । अकथ्यतेत्थं वत्सैषा मातायं मातुलश्च ते ॥१२०॥

पितुर्बन्धेन सक्रोधं तं कालापेक्षयाक्षमम् । शिक्षयित्वा जयेन्द्रोथ कार्यशेषाय निर्ययौ ॥१२१॥

उत्पिञ्जोत्पादनासज्जे तस्मिन्भ्रात्रा यदृच्छया । बन्धात्त्यक्तो नृतरणिस्तोरमाणोस्तमाययौ ॥१२२॥

निवार्य मरणोद्योगं मातुर्निर्वेदखेदितः । ययौ प्रवरसेनोथ तीर्थौत्सुक्याद्दिगन्तरम् ॥१२३॥

रक्षित्वा दशमासोनाः क्ष्मामेकत्रिंशतिं समाः । तस्मिन्क्षणे हिरण्योपि शान्तिं निःसंततिर्ययौ ॥१२४॥

125 तत्रानेहस्युज्जयिन्यां श्रीमान्हर्षापराभिधः । एकच्छत्त्रश्चक्रवर्ती विक्रमादित्य इत्यभूत् ॥१२५॥

भूपमद्भुतसौभाग्यं श्रीर्बद्धरभसाभजत् । विहाय हरिवाहूंश्च चतुरः सागरांश्च यम् ॥१२६॥

लक्ष्मीं कृत्वोपकरणं गुणे येन प्रवर्धिते । श्रीमत्सु गुणिनोद्यापि तिष्ठन्त्युद्धुरकन्धराः ॥१२७॥

म्लेच्छोच्छेदाय वसुधां हरेरवतरिष्यतः । शकान्विनाश्य येनादौ कार्यभारो लघूकृतः ॥१२८॥

नानादिगन्तराख्यातं गुणवत्सुलभं नृपम् । तं कविर्मातृगुप्ताख्यः सर्वास्थानस्थमासदत् ॥१२९॥

130 स गम्भीरस्य भूभर्तुरनुभावं महाद्भुतम् । विविधास्थानसंवृद्धस्तस्याभ्यूह्य व्यचिन्तयत् ॥१३०॥

सोयमासादितः पुण्यैः क्षोणिपालो गुणिप्रियः । परभागोपलम्भाय पूर्वमुष्य महीभुजः ॥१३१॥

यस्मिन्नाजनि तत्त्वज्ञैः सूरिभिः संभृतश्रुतैः । नाञ्जलिर्दीयते जातु मानाय च गुणाय च ॥१३२॥

भङ्ग्यामुष्मिन्विदधती स्वाभिप्रायप्रकाशनम् । वैदग्ध्यवन्ध्यतां नैति बुद्धिः कुलवधूरिव ॥१३३॥

खिलीकृतखलालापे युक्तायुक्तविवेक्तरि । नायाति सेव्यमानेस्मिन्स्वगुणोनर्थकारिताम् ॥१३४॥

135 अनाप्नुवद्भिः सावद्यदुर्विद्यसमशीर्षिकाम् । जीवन्मरणमस्याग्रे गुणिभिर्नानुभूयते ॥१३५॥

---

१०८. ¹) $A_3$ gloss भूमेः. ११२. ¹) $A_2$ gloss अतिशयेन उदारं ओजः यस्य. ११३. ¹) Thus corr. by later hand from A किंचिद्°. ११६. ¹) $A_3$ gloss प्रवरसेनः. १२२. ¹) Thus $A_1$; $A_1$ has given a *varia lectio* in margin of which only उत्पिञ्जो-द्वास-is legible (उत्पिञ्जोद्वासनासज्जे?). $A_3$ उत्पिञ्जोत्पादने सज्जे, with gloss द्वन्द्वयुद्धस्य कोलाहले सज्जे सति. १२७. ¹) G Edd. गुणो येन प्रवर्धते. १२८. ¹) $A_3$ gloss कर्किनाम्नः. १२९. ¹) G *sec. manu* and Edd. सभास्था°. १३२. ¹) $A_3$ अस्मिन्ना°.

संभावनानुसारेण[1] प्रवृत्तोस्माद्विवेकिनः । शोच्यते नाञ्चितोच्छ्वासं प्रीतिदायो महाशयैः ॥१३६॥
गृह्णन्यथागुणं स्वान्तमुचितप्रतिपत्तिभिः[1] । अन्तरज्ञः समस्तानामयमुत्साहवर्धनः ॥१३७॥
सेवया दृष्टकष्टस्य दाक्षिण्योत्पादने श्रमः । अस्य यो न स भृत्यानां हिमाद्रौ हिमविक्रयः ॥१३८॥
मिथ्याख्यातगुणो नाप्तो नामात्यः कलहप्रियः । असत्यसंधः स्थेयो वा नास्थानेस्य महीपतेः ॥१३९॥
अश्लीलालापिनोन्योन्यं नर्मोक्त्या मर्मभेदिनः । अन्यप्रवेशासहनाः संहता नास्य सेवकाः ॥१४०॥ 140
छन्दानुवर्तिनामेष निजविज्ञानवन्दिनाम् । सर्वज्ञंमन्यतान्धानां मुखप्रेक्षी न पार्थिवः ॥१४१॥
अनेन सह संजातः संलापो विपुलोदयः । लभ्यते नान्तराच्छेत्तुं दुर्जातैर्जातु दुर्जनैः ॥१४२॥
सर्वदोषोज्झितं सेव्यं नृपमेवमिमं मम । समासादयतः पुण्यैरदूरे स्वार्थसिद्धयः ॥१४३॥
गम्भीरश्च गुणज्ञश्च स्थिरबुद्धिश्च पार्थिवः । एष क्लेशभयं त्यक्त्वा निषेव्यः प्रतिभाति मे ॥१४४॥
न चास्माद्धनमादाय रञ्जितादन्यराजवत् । भ्राम्यतो[1] भूतलेमुष्मिन्सेव्योन्यः प्रतिभाति मे ॥१४५॥ 145
इति संचिन्त्य सुदृढं स नवामिव तां सभाम् । नारञ्जयन्[1] चास्ते स्म गुणिगोष्ठीषु मध्यगः ॥१४६॥
मृदुपूर्वं गुणानेवं दर्शयन्तं विशांपतिः । विशिष्टयोग्यताज्ञप्त्यै विवेदाराधनोन्मुखम् ॥१४७॥
अचिन्तयच्च नायं स्याद्गुणिमात्रं महाशयः । उदात्तं सत्क्रियार्हत्वं वदत्यस्य गभीरता ॥१४८॥
इति संचिन्त्य राज्ञापि ज्ञातुं तस्यान्तरं मतेः । नाक्रियन्त परीक्षार्थं यथावल्लाभसत्क्रियाः ॥१४९॥
स तेनानुपचारेण तमुदात्ताशयं नृपम् । स्वीकर्तारं विदन्धीमान्सिषेवे प्रीतिमाश्रितः ॥१५०॥ 150
क्रमोपचीयमानेन सेवाभ्यासेन धीमतः । तस्य नोद्वेगमगमत्स्वकाय इव पार्थिवः ॥१५१॥
नातीव स्वल्पया स्थित्या नातीवाप्यथ दीर्घया । शरन्निशाक्षणेनेव राजा[1] निन्ये[2] प्रसन्नताम् ॥१५२॥
नर्मभिर्गर्भचेटानां द्वाःस्थानां विक्रियाक्रमैः । मिथ्यास्तवैर्विटानां च न स क्षोभमनीयत ॥१५३॥
प्रसन्नालापसंप्राप्तौ छायाग्रह इवाचलः । प्रतिस्पर्धीव च क्रुध्यन्नावज्ञायामभूत्प्रभोः ॥१५४॥
वीक्षणं राजदासीनां राजद्विष्टैः[1] सहासनम् । राजाग्रे च कथां नीचैः कालविन्नाचचार सः ॥१५५॥ 155
स्वभावाद्राजपुरुषैः सजनै राजनिन्दकैः । नास्मात्[1]प्रभोरुपालम्भो लेभे पैशुन्यजीविभिः ॥१५६॥
वदद्भिरादरास्थैर्यं वैफल्याद्यन्वहं प्रभोः । निन्ये नोत्साहशैथिल्यं सेवोत्साहासहिष्णुभिः ॥१५७॥
अन्योत्कर्षानपि वदन्प्रसङ्गेन निराग्रहः । स्वविद्याद्योतकः सोभूत्सभ्यानां हृदयंगमः ॥१५८॥
एवं स सेवमानस्तमुद्योगेन बलीयसा । अनिर्विण्णो[1] मातृगुप्तः षड्ऋतूनत्यवाहयत् ॥१५९॥
अथ तं कृशसर्वाङ्गं धूसरं जीर्णवाससम् । बहिर्जातु विनिर्यातो राजा वीक्ष्य व्यचिन्तयत् ॥१६०॥ 160
वैदेशिको निःशरणो गुणवान्बान्धवोज्झितः । दार्ढ्यं जिज्ञासुना कष्टं सोयमायासितो मया ॥१६१॥
कोस्याश्रयः किमशनं कानि प्रावरणानि वा । इत्यैश्वर्यविमूढेन मया हन्त न चिन्तितम् ॥१६२॥
वसन्तेनेव न मया शोभयाद्यापि योजितः । शीतवातातपैः शुष्यन्सोयं पुरुषपादपः ॥१६३॥

---

१३६. [1]) संभावनानुसा supplied by $A_3$ in space left by $A_1$. १३७. [1]) $A_3$ gloss प्रतिपत्तिः सत्कारः सत्क्रिया पूजनं माननमिति यावत्. १४५. [1]) Thus corr. by $A_3$ from $A_1$ भ्राम्यते. १४६. [1]) Thus corr. by $A_3$ from $A_1$ नारञ्जन्°. १५२. [1]) $A_1$ gloss राजा चन्द्रोपि.—[2]) $A_3$ gloss मातृगुप्तेन. १५५. [1]) $A_3$ gloss राजशत्रुभिः. १५६. [1]) $A_3$ gloss मातृगुप्तात्. १५९. [1]) Thus corr. by $A_3$ from $A_1$ अनिर्विन्नो.

अस्य ग्लानस्य भैषज्यं निर्विण्णस्य विनोदनम् । श्रान्तस्य वा क्रमच्छेदं को विदध्यादसंपदः ॥१६४॥
नास्मै चिन्तामणिं दध्यां नामृतं वा निषेवितः[1] । मया यदयमेतावद्व्यामूढेन परीक्ष्यते ॥१६५॥
165 तदमुष्य गुणित्वस्य तीव्रसेवाश्रमस्य च । प्रतिपत्त्या[1] कतमया तावदानृण्यमाप्नुयाम् ॥१६६॥
इति चिन्तयतस्तस्य राज्ञस्तं सेवकं प्रति । स्वप्रसादोचिता काचित्प्रत्यभा[1]न्नैव सत्क्रिया ॥१६७॥
ततः प्रावर्तत स्फारनीहारलववाहिभिः । दहन्निवाङ्गं प्रालेयपवमानैर्हिमागमः ॥१६८॥
संततध्वान्तमिषतस्तीव्रशीतवशीकृताः । आशाश्चकाशिरे नीलनिचोलाच्छादिता इव ॥१६९॥
शीतार्त्या द्युमणावौर्वदहनोष्माभिलाषतः । द्रुतं यातीव जलधिं दिनानि लघुतां ययुः ॥१७०॥
170 अथ दीपोज्ज्वले धाम्नि लसद्दीप्रहसन्तिके[1] । कदाचिन्नृपतिर्दैवादर्धरात्रे व्यबुध्यत ॥१७१॥
स हेमन्तानिलैर्भूरिभांकारपरुषैः पुरः । दीपान्प्रकम्पितानीषत्प्रविष्टैर्धाम्नि दृष्टवान् ॥१७२॥
तानुज्ज्वलयितुं भृत्यानन्विष्यन्नभ्यधात्ततः । यामिकेषु[1] बहिः सज्जः को वर्तत इति स्फुटम् ॥१७३॥
सुखसुप्तेषु सर्वेषु बाह्यकक्ष्यान्तरात्ततः । राजन्नयमहं मातृगुप्त इत्यशृणोद्वचः ॥१७४॥
प्रविशेति स्वयं राज्ञा दत्तानुज्ञस्ततो गृहम् । लक्ष्मीसांनिध्यरम्यं तदपृष्टो[1]न्यैर्विवेश सः ॥१७५॥
175 दीपानुज्ज्वलयेत्युक्तो निष्पाद्य चतुरैः पदैः । बहिर्यियासुरूचेऽथ[1] क्षणं तिष्ठेति भूभुजा ॥१७६॥
स भयद्विगुणीभूतशीतकम्पः प्रभोः पुरः । किं स्विद्वक्ष्यतीति विमृषन्नातिदूरेऽभ्युपाविशत् ॥१७७॥
अथ पप्रच्छ भूपालः कियत्यस्ति निशेति तम् । सोऽभ्यधाद्द्वेव यामिन्या यामः सार्धोऽवशिष्यते ॥१७८॥
ततो भूभृदुवाचैनं कथं सम्यङ्गिशाक्षणः । त्वयावधारितो निद्रा कथं नाभूच्च ते निशि ॥१७९॥
अथ कृत्वा क्षणाच्छ्लोकमेतं तं स व्यजिज्ञपत् । अवस्थावेदनादा[1]शां दैन्यं वा त्यक्तुमुद्यतः ॥१८०॥
180 शीतेनोद्धूषितस्य माषशिमिवच्चिन्तार्णवे मज्जतः शान्ताग्निं स्फुटिताधरस्य धमतः क्षुत्क्षामकण्ठस्य मे ।
निद्रा क्वाप्यवमानितेव दयिता संत्यज्य दूरं गता सत्पात्रप्रतिपादितेव वसुधा न क्षीयते शर्वरी ॥१८१॥
तदाकर्ण्य महीपालः साधुवादैः परिश्रमम् । अभिनन्द्य कवीन्द्रं तं पूर्वस्थानं व्यसर्जयत् ॥१८२॥
अचिन्तयच्च धिङ्मां यः सगुणात्खिन्नचेतसः । दुःखोत्तप्तं वचः शृण्वन्नेवमेवाधुना स्थितः ॥१८३॥
निरर्थकान्साधुवादानन्यस्येव विदन्मम । अयमज्ञातहृदयो दुःखमास्ते ध्रुवं बहिः ॥१८४॥
185 चिरं चिन्तयतो यत्नात्सदृशीमस्य सत्क्रियाम् । देयं महार्हमद्यापि न किंचित्प्रतिभाति मे ॥१८५॥
अथ वास्यैव सूक्तेन[1] स्मारितोऽस्म्यधुना यथा । वर्तते राजरहितं काम्यं कश्मीरमण्डलम् ॥१८६॥
पात्रायास्मै मही तस्मात्सा मया प्रतिपाद्यते । अवधीर्य महीपालान्महतोऽप्यर्थनापरान् ॥१८७॥
इति निश्चित्य चतुरं क्षपायामेव पार्थिवः । गूढं व्यसर्जयद्दूतान्काश्मीरीः प्रकृतीः प्रति[1] ॥१८८॥
आदिदेश च तान्यो वो दर्शयेच्छासनं मम । मातृगुप्ताभिधो राज्ये निःशङ्कं सोऽभिषिच्यताम् ॥१८९॥
190 अथ दूतेषु यातेषु लेखयित्वा स्वशासनम् । क्ष्मापतिस्तं क्षपाशेषं कृतकृत्योऽत्यवाहयत् ॥१९०॥

१६५. [1]) $A_3$ gloss अनेन इत्यर्थः. १६६. [1]) $A_3$ gloss सत्क्रियया. १६७. [1]) $A_3$ gloss चित्तविषयं न गता इत्यर्थः. १७१. [1]) $A_3$ gloss हसन्तिका मन्नासिका. १७३. [1]) $A_3$ gloss रात्रिजागरेषु पुरुषेषु. १७५. [1]) $A_3$ तदद्दृष्टो. १७६. [1]) Thus corr. by $A_3$ from $A_1$ °रूचे च. १८०. [1]) $A_1$ gloss अवस्थायाः आवेदनं तस्मात्. १८६. [1]) $A_3$ gloss सत्पात्रेत्यादिना. १८८. [1]) $A_3$ gloss सचिवान् प्रति.

मातृगुप्तस्तु नृपतेः संलापमपि निष्फलम् । ध्यायन्गृहीतनैराश्यस्त्यक्तभार इवाभवत् ॥१९१॥
अन्तर्दध्यौ च कर्तव्यं कृतं शान्तोद्य संशयः । आशापिशाचिकात्यक्तश्चरिष्याम्यधुना सुखम् ॥१९२॥
गतानुगतिकत्वेन कोयमासीन्मम भ्रमः । जनप्रवादात्सेव्यत्वं येनास्य ज्ञातवानहम् ॥१९३॥
भुञ्जानाः पवनं सरीसृपगणाः प्रख्यापिता भोगिनो गायद्भृङ्गनिवारका निगदिता विस्तीर्णकर्णा गजाः ।
यश्चाभ्यन्तरसंभृतोष्मविकृतिः प्रोक्तः शमी स द्रुमो लोकेनेति निरर्गलं प्रलपता सर्वं विपर्यासितम् ॥१९४॥
अथ वा विद्यतेमुष्य न काप्यनभिगम्यता । लक्ष्मीप्रणयिनो येन कृताः प्रणयिनां गृहाः ॥१९५॥ 195
त्यागिनो निष्कलङ्कस्य को दोषोस्य महीपतेः । ममापुण्यं तु तन्निन्द्यं यच्छ्रेयःप्रतिबन्धकम् ॥१९६॥
रत्नोज्ज्वलाः प्रविकिरंल्लहरीः समीरैरब्धिः क्रियेत यदि रुद्धतटाभिमुख्यः ।
दोषोर्थिनः स खलु भाग्यविपर्ययाणां[1] दातुर्मनागपि न तस्य तु दातृतायाः ॥१९७॥
उत्तानफललुब्धानां वरं राजोपजीविनः । न तु तत्स्वामिनं[1]स्तीव्रपरिक्लेशैः फलन्ति ये ॥१९८॥
तिष्ठन्ति ये पशुपतेः किल पादमूले संप्राप्यते झटिति तैर्नहि भस्मनोन्यत् ।
ये तद्वृषस्य तु समुज्ज्वलजातरूपप्राप्त्या न कानि सुदिनानि सदैव तेषाम् ॥१९९॥
चिन्तयन्नपि पश्यामि न कंचिद्दोषमात्मनः । यातो विरक्तिं यं ज्ञात्वा सेव्यमानोप्ययं नृपः ॥२००॥ 200
अथ वानादृतोन्येन संप्राप्नोन्तिकमाप्नुयात् । कः फलेनाभिसंबन्धं गतानुगतिकात्प्रभोः ॥२०१॥
अन्तर्यै सततं लुठन्त्य[1]गणितास्तानेव पाथोधरैरात्तानापततस्तरङ्गवलयैरालिङ्ग्य गृह्णन्नसौ ।
व्यक्तं मौक्तिकरत्नतां जलकणान्संप्रापयत्यम्बुधिः प्रायोन्येन कृतादरो लघुरपि प्राप्नोच्यते[2] स्वामिभिः ॥२०२॥
इदं संचिन्तयन्सोभूत्सेव्ये तस्मिन्निरादरः । खिन्नस्य हि विपर्यैति तत्त्वज्ञस्यापि शेमुषी ॥२०३॥
प्रभातायां विभावर्यामथास्थानस्थितो नृपः । आकार्यतां मातृगुप्त इति क्षत्तारमा[1]दिशत् ॥२०४॥
ततः प्रधावितानेकप्रतीहारप्रवेशितः । प्रविवेश महीभर्तुस्त्यक्ताश इव सोन्तिकम् ॥२०५॥ 205
तस्मै कृतप्रणामाय मुहूर्तादेव पार्थिवः । भ्रूसंज्ञितेन व्यतरल्लेखं लेखाधिकारिणा ॥२०६॥
स्वयं च तमुवाचाङ्ग कश्मीरान्वेत्ति किं भवान् । गत्वा तत्राधिकारिभ्य एतच्छासनमर्प्यताम् ॥२०७॥
स शापितोस्मदङ्घ्रिभ्यां यो लेखं वाचयेत्पथि । संविदे[1]षा प्रयत्नेन विस्मर्तव्या न जातु चित् ॥२०८॥
अविज्ञाताशयो राज्ञस्तामाज्ञां क्लेशशङ्कितः । सोबुद्ध दहनज्वालां न तु रत्नाङ्कुरद्युतिम् ॥२०९॥
यथादेशस्तथेत्युक्त्वा मातृगुप्ते विनिर्गते । निर्गर्वः पूर्ववद्राजा तस्थावाप्तैः सहालपन् ॥२१०॥ 210
अथा[1]क्लेशोचितं क्षाममपाथेयमबान्धवम् । दृष्ट्वा यान्तं मातृगुप्तं निनिन्देति नृपं जनः ॥२११॥
अहो नरेश्वरस्येयं यत्किंचनविधायिता । पृथग्जनोचिते कर्मण्यर्हतो[1] निदधाति यः ॥२१२॥
दुराशया धृतक्लेशं सेवमानमहर्निशम् । ध्रुवं क्लेशार्हमेवैनं ज्ञातवानबुधो नृपः ॥२१३॥
उपायं यं[1] पुरस्कृत्य सेवते सेवकः प्रभुम् । अनन्तरज्ञस्तत्रैव योग्यं तं किल मन्यते ॥२१४॥

---

१९७. [1]) $A_3$ °पर्ययेण. १९८. [1]) $A_1$ glosses राजोपजीविनः पुरुषाः, तत्स्वामिनः तेषां स्वामिनः कर्तारः न वरं. २०२. [1]) Thus corr. by later hand from $A_1$ लुठन्ति ग°.—[2]) Thus $A_3$; $A_1$ °र्च्यते. २०४. [1]) $A_1$ gloss द्वास्स्थं. २०८. [1]) $A_3$ gloss शिक्षा. २११. [1]) Thus corr. by later hand from $A_1$ अथ क्ले°. २१२. [1]) $A_3$ gloss पूज्यान्. २१४. [1]) Doubtful emendation; on account of an ink blot only the following is legible in the handwriting of $A_1$ : उपाय--- स्कृत्य. $A_4$ reads उपायनं पुरस्कृत्य; this reading is found also in R. G and Edd. read उपायं तं.

सुखार्थी नागारिप्रतिभयशमात्प्रत्युत सुखं जहौ शेषस्तल्पीकृततनु निषेव्यासुररिपुम् ।
यतस्तेनामुष्मिन्नधिगतवता क्लेशसहतां श्रमादायि न्यस्तं निरवधि धराभारवहनम् ॥२१५॥

215 अयमेतद्गृहीतेषु गुणवत्सु गुणाधिकम् । आत्मानं गुणवान्पश्यन्नास्थयैनमशिश्रियत् ॥२१६॥

अनन्तरज्ञः[1] कोन्योस्माद्गुणान्दर्शयतेधिकान् । अस्मै गुणवते पूजां यश्चकार किलेदृशीम् ॥२१७॥

यो नानाद्युतिमत्पदार्थरसिकोसारेपि शक्रायुधे सप्रेमा स विलोक्य बर्हमिह मे किं किं न कुर्यात्प्रियम् ।
इत्याविष्कृतबर्हराजि नटते यो बर्हिणोम्भोलवान्नान्यन्मुञ्चति तं विहाय[1] जलदं कोन्योस्ति शून्याशयः ॥२१८॥

गच्छतो मातृगुप्तस्य निर्दैन्यस्यैव वर्त्मसु । नाभून्द्राव्यर्थमाहात्म्याद्विकल्पः कोपि चेतसि ॥२१९॥

अहंपूर्विकयोद्यद्भिर्निमित्तैः शुभशंसिभिः । स वितीर्णकरालम्भ इव न श्रममाददे ॥२२०॥

220 अपश्यत्स फणाकोटौ खञ्जरीटमहेः पथि । स्वप्ने प्रासादमारुह्य स्वं चोल्लङ्घितसागरम् ॥२२१॥

अचिन्तयच्च शास्त्रज्ञो निमित्तैः शुभशंसिभिः । एतैर्भूभर्तुरादेशो ध्रुवं मे स्याच्छुभावहः ॥२२२॥

फलं मम तनीयोपि कश्मीरेषु भवेद्यदि । अनर्घदेशमाहात्म्यात्किं किं नातिशयेत तत् ॥२२३॥

अकृच्छ्रलङ्घ्याः पन्थानो वल्लभातिथयो गृहाः । उपानमन्गच्छतोस्य सत्क्रियाश्च पदे पदे ॥२२४॥

225 इत्थं विलङ्घिताध्वा स लोलानोकह[1]शाद्वलम् । मङ्गल्यदधिपात्राभं ददर्शाग्रे हिमाचलम् ॥२२५॥

सरलस्यन्दसुभगा गङ्गाशीकरवाहिनः । प्रत्युद्ययुस्तं मरुतः पाल्यायाः[1] संस्तुता भुवः ॥२२६॥

क्रमवर्ताभिधाने स प्रदेशे प्राप्तवांस्ततः । ढक्कं काम्बुवनामानं योद्य शूरपुरे स्थितः ॥२२७॥

नानाजनपदाकीर्णे स्थाने तत्राथ शुश्रुवान् । काश्मीरिकान्महामात्यान्स्थितान्केनापि हेतुना ॥२२८॥

ततोपनीतप्राग्वेषः प्रावृतो धवलांशुकैः । स जगामान्तिकं तेषां दातुं नृपतिशासनम् ॥२२९॥

230 तं प्रयान्तं समुद्यद्भिः शकुनैः सूचितोदयम् । पान्थाः केप्यन्वयुर्द्रष्टुं निमित्तानां फलोद्गमम् ॥२३०॥

श्रुत्वाथ विक्रमादित्यदूतः प्राप्त इति द्रुतम् । द्वाःस्थाः काश्मीरमन्त्रिभ्यस्तमासन्नं न्यवेदयन् ॥२३१॥

आगच्छत प्रविशतेत्युच्यमानोथ सर्वतः । स तान्समस्तसामन्तानाससादानिवारितः ॥२३२॥

यथाप्रधानं सचिवैर्विहितोचितसत्क्रियः । ततः परार्ध्यमध्यास्त तन्निदर्शितमासनम् ॥२३३॥

कृतार्हणैरथामात्यैराज्ञां पृष्टो महीभुजः । शनैस्तच्छासनं तेभ्यो लज्जमान इवार्पिपत् ॥२३४॥

235 तेभिवन्द्य प्रभोर्लेखमुपांशु[1] मिलितास्ततः । उन्मुच्य वाचयित्वैतमवोचन्विनयान्विताः ॥२३५॥

मातृगुप्त इति श्लाघ्यं भवतामेव नाम किम् । एवमेवैतदित्यूचे सोपि तान्विहितस्मितः ॥२३६॥

कः कोत्र संनिधातॄणामित्यश्रूयत वाक्ततः । राज्याभिषेकसंभारो दृश्यते स्म च संभृतः ॥२३७॥

ततः कलकलोत्तालभूरिलोकसमाकुलः । प्रदेशः क्षणमात्रेण सोभूत्क्षुभ्यन्निवार्णवः ॥२३८॥

अथ प्राङ्मुखसौवर्णभद्रपीठप्रतिष्ठितः । संनिपत्य प्रकृतिभिर्मातृगुप्तोभ्यषिच्यत ॥२३९॥

240 तस्य विन्ध्यतटव्यूढवक्षसः परिनिर्लुठत् । सशब्दमभिषेकाम्बु रेवास्रोत[1] इवाबभौ ॥२४०॥

अथ स्नातानुलिप्ताङ्गं सर्वाङ्गामुक्तभूषणम् । व्यजिज्ञपंस्तं राजानं क्रान्तराजासनं प्रजाः ॥२४१॥

---

२१७. [1]) $A_3$ gloss मूर्खपुरुषः. २१८. [1]) $A_3$ विलोक्य जलदमित्यन्यादर्शे. २२५. [1]) Thus $A_1$ ; corr. by $A_3$ into °नौकह°, as also in G R. २२६. [1]) $A_1$ gloss पाल्याया इति प्रभूर्भविष्यता तेनैवेत्यर्थः. २३५. [1]) $A_1$ gloss परैर्न श्रूयते यत्तदुपांशु परिकीर्तितम् ; $A_3$ adds मन्त्रकरणे. २४०. [1]) Thus $A_3$ ; $A_1$ °स्रेव, corr. by later hand into °स्रव.

अर्थितेन स्वयं त्रातुं विक्रमादित्यभूभुजा । निर्दिष्टः स्वसमानस्त्वं शाधि नः पृथिवीमिमाम् ॥२४२॥
मण्डलानि विलभ्यन्ते[1] येनानेन प्रतिक्षणम् । मा मंस्था मण्डलं राजन्विलब्धं[2] तदिदं परैः ॥२४३॥
कर्मभिः स्वैरवाप्तस्य जन्मनः पितरौ यथा । राज्ञां तथान्ये राज्यस्य प्रवृत्तावेव कारणम् ॥२४४॥
इत्थं स्थितेपरं कंचित्त्वदीयोस्मीति शंसता । न नेया भवता राजन्[1]वयमात्मा च लाघवम् ॥२४५॥ 245
इति तैस्तथ्यमुक्तोपि संस्मरन्स्वामिसत्क्रियाम् । मातृगुप्तो[1] महीपालः क्षणमासीत्कृतस्मितः ॥२४६॥
दानेन सुदिनं कुर्वन्नवराज्योर्जितेन सः । तत्रैव मङ्गलोदग्रं तदहो निरवर्तयत्[1] ॥२४७॥
पुरप्रवेशायान्येद्युरर्थ्यमानोथ मन्त्रिभिः । अद्भुतप्राभृतं दूतं राज्यदातुर्व्यसर्जयत् ॥२४८॥
देशौन्नत्यानुसारेण स्पर्धामिव च तां विदन् । स्वामिनो मनसि ह्रीतः सागसं स्वममन्यत ॥२४९॥
अथाहूयापरान्भृत्यान्वक्तुं सेवास्मृतिं प्रभोः । अल्पार्घाण्यपि सात्म्यानि[1] प्राहिणोत्प्राभृतानि सः ॥२५०॥ 250
असामान्यान्गुणांस्तस्य स्मरन्पर्यस्तुलोचनः । स्वयं लिखित्वा श्लोकं च स्वकमेकं व्यसर्जयत् ॥२५१॥
नाकारमुद्वहसि नैव विकत्थसे त्वं दित्सां न सूचयसि मुञ्चसि सत्फलानि ।
निःशब्दवर्षणमिवाम्बुधरस्य राजन्संलक्ष्यते फलत एव तव[1] प्रसादः ॥२५२॥
ततः प्रविश्य नगरं सैन्यैः पिहितदिक्तटैः । क्रमागतामिव महीं यथावत्पर्यपालयत् ॥२५३॥
त्यागे वा पौरुषे वापि तस्यौचित्योन्न[1]तात्मनः । क्षमाभुजस्तर्कुकस्येव[2] नाभूत्परिमितेच्छता ॥२५४॥
यष्टुं यज्ञान्धृतोद्योगस्त्यागी विततदक्षिणान् । पशुबन्धमनुध्याय करुणाकूणितो[1]भवत् ॥२५५॥ 255
अमारमादिदेशाथ यावद्राज्यं स्वमण्डले । चूर्णीकृत्य सुवर्णादि प्रददौ च करम्भकम् ॥२५६॥
करम्भके कीर्यमाणे मातृगुप्तेन भूभुजा । वैतृष्ण्यमुन्मिषत्तोषो न को नाम न्यषेवत ॥२५७॥
गुणी च दृष्टकष्टश्च वदान्यश्च[1] स पार्थिवः । विक्रमादित्यतोप्यासीदभिगम्यः शुभार्थिनाम् ॥२५८॥
विवेचकतया तस्य श्लाघ्यया सुरभीकृताः । लक्ष्मीविलासाः क्ष्माभर्तुरशोभन्त मनीषिषु ॥२५९॥
हयग्रीववधं[1] मेण्ठस्तदग्रे दर्शयन्नवम् । आसमाप्ति ततो नापत्साध्वसाध्विति वा वचः ॥२६०॥ 260
अथ ग्रथयितुं तस्मिन्पुस्तकं प्रस्तुते न्यधात् । लावण्यनिर्याणभिया तदधः[1] स्वर्णभाजनम् ॥२६१॥
अन्तरज्ञतया तस्य तादृश्या कृतसत्कृतिः । भर्तृमेण्ठः कविर्मेने पुनरुक्तं श्रियोर्पणम् ॥२६२॥
स मातृगुप्तस्वाम्याख्यं निर्ममे मधुसूदनम् । कालेनादत्त यद्ग्रामान्मम्मः स्वसुरसद्मने[1] ॥२६३॥
इत्यासादितराज्यस्य शासतः क्ष्मां क्षमापतेः । त्रिमासोना ययुस्तस्य सैकाहाः पञ्च वत्सराः ॥२६४॥
कृतार्थतां तीर्थतोयैराज्ञ्नेयो[1]नयन्पितॄन् । जातं तादृशमश्रौषीत्स्वस्मिन्देशे पराक्रमम्[2] ॥२६५॥ 265
पितृशोकार्द्रता तस्य क्रोधेनान्तरधीयत । तरोरिवार्कतापेन नैशाम्बुलवसिक्तता ॥२६६॥
श्रीपर्वते पाशुपतव्रतिवेषस्तमा[1]गतम् । आचख्यावश्वपादाख्यः सिद्धः कन्दाशनं ददत् ॥२६७॥

---

२४३. [1]) [2]) $A_1$ indicates the *vv. ll.* विडीयन्ते and विदत्तं. २४५. [1]) Thus $A_3$; $A_1$ राजा. २४६. [1]) Thus corr. by later hand from $A_1$ °गुप्तम°; G R as above. २४७. [1]) $A_3$ gloss अत्यवाहयत्. २५०. [1]) Thus $A_1$; $A_3$ स्वात्म्यानि, also G R; Edd. खाद्यानि. २५२. [1]) तव supplied by $A_3$. २५४. [1]) Thus corr. by later hand from $A_1$ °चित्यौन्न°.—[2]) $A_3$ gloss याचकस्येव. २५५. [1]) Thus A; G R °कूजितो; Edd. °कुञ्चितो. २५८. [1]) Emended: A R G वदन्यश्च. २६०. [1]) $A_3$ gloss काव्यं. २६१. [1]) $A_3$ राजाधः. २६३. [1]) $A_1$ gloss स्वरैवगृहाय. २६५. [1]) $A_3$ gloss प्रवरसेनः.—[2]) $A_3$ पराभवम्. २६७. [1]) $A_3$ gloss प्रवरसेनं.

वाञ्छामपृच्छं राज्यार्थमभिलाषस्तु तेभवत् ||२६८||

जन्मान्तरे लब्धसिद्धिस्त्वामस्म्युं[1]परि साधकम् | अथ मामित्थमादिक्षे[1]ल्क्षपारमणशेखरः[2] ||२६९||

सयत्नं तव कर्तुं तन्मनोरथमनन्यथा | जन्मान्तरेस्य राज्येच्छां कुर्यामहमनन्यथा ||२७०||

270 गणोयं मामकः सिद्धो यस्तवोपरि साधकः | साफल्यं नेष्यतीत्येवमभिधाय तिरोदधे[1] ||२७१||

भावं भवस्तद्भवतो भगवान्दत्तदर्शनः | लब्धस्मृति[2]ः सिद्धगिरा प्रददौ दर्शनं शिवः ||२७२||

साम्राज्येच्छोः समामेकां तत्र तस्यं[1] तपस्यतः | स जगन्निर्जयोन्निद्रं नरेन्द्रत्वमयाचत ||२७३||

व्रतिवेषं तमादिष्टवाञ्छितार्थसमर्पणम् | इति जिज्ञासुना भावं शंभुना सोभ्यधीयत ||२७४||

उपेक्ष्य मोक्षं किं क्ष्माभृद्भोगानिच्छसि भङ्गुरान् | अभ्यधामिदमद्धा त्वं न स देवो जगद्गुरुः ||२७५||

275 स तं बभाषे शंभुं त्वां बुद्ध्वा व्याजतपोधनम् | उदन्यया[2] वदान्यो[3]दाद्दुग्धाब्धिं सं[4] पयोर्थिने ||२७६||

महान्तो ह्यर्थिताः स्वल्पं फलन्त्यल्पेतरं[1]स्त्वयम् | नो वेत्स्यभिजनस्याभिभूतिं[1] मर्मव्यथावहाम् ||२७७||

अस्य वैकल्यकैवल्यलाभनिश्चलचेतसः | कृत्वा प्रादुष्कृतवपुस्ततो भूयोभ्यभाषत ||२७८||

जगत्परिवृढः[1] प्रौढप्रीतिस्तं सफलार्थनम्[2] | मदाज्ञयाश्वपादस्ते संज्ञां काले करिष्यति ||२७९||

मज्जतो राज्यसौख्येषु सायुज्या[1]वाप्तिदूतिकाम् | आ[1]गच्छदश्वपादं तमापृच्छ्याभिमतां भुवम् ||२८०||

280 इत्युक्त्वान्तर्हिते देवे स कृतव्रतपारणः | निषिध्य सविधा[2]यातानमात्यानब्रवीद्वचः ||२८१||

ततो विदितवृत्ता[1]न्तो मातृगुप्ताभिषेणनात् | मातृगुप्तं प्रति न नो रोषेणारूषितं मनः ||२८२||

विक्रमादित्यमुत्सिक्तमुच्छेत्तुं यतते मनः | ये तदुन्मूलने शक्ता जिगीषा तेषु शोभते ||२८३||

अप्रियैरपि निष्पिष्टैः किं स्यात्क्लेशासहिष्णुभिः |

यान्यब्जान्युदयं द्विषन्ति शशिनः कोन्यस्ततो[1]संमतस्तन्निर्माथिकरीन्द्रदन्तदलनं यन्नाम कोयं नयः |

सामर्थ्यप्रथनाय चित्रमसमैः[2] स्पर्धां विधूयोन्नता ये तेषु प्रभवन्ति तत्र जहति व्यक्तं प्ररूढा रुषः ||२८४||

285 त्रिगर्तानां भुवं जित्वा स व्रजन्नथ भूपतिः | विक्रमादित्यमशृणोत्कालधर्ममुपागतम् ||२८५||

तस्मिन्नहनि भूभर्त्रा शोकान्निःश्वसं[1]तानिशम् | नाह्वायि नाशि नास्वापि स्थितेनावनताननम ||२८६||

अन्येद्युर्भुवमुत्सृज्य कश्मीरेभ्यो विनिर्गतम् | शुश्राव मातृगुप्तं स नातिदूरे कृतस्थितिम् ||२८७||

कैश्चिन्निर्वासितो मा स्विन्मदीयैरिति शङ्कितः | ययौ प्रवरसेनोस्य पार्श्वं मितपरिच्छदः ||२८८||

कृतार्हणं सुखासीनं ततः पप्रच्छ तं शनैः | विनयावनतो राजा[1] राज्यत्यागस्य कारणम् ||२८९||

290 बभाषे तं क्षणं स्थित्वा सं[1] निःश्वस्यं[2] विहस्य च | गतः स सुकृती[3] राजन्येन भूमिभुजो वयम् ||२९०||

यावन्मूर्ध्नि रवेः पादास्तावद्द्योतयते दिशः | द्योतते नान्यथा किंचिद्[1]द्रावैत्र तपनोपलः[2] ||२९१||

---

२६८. [1]) मस्म्यु supplied by $A_3$ in space left by $A_1$. २६९. [1]) [2]) $A_3$ glosses आदिदेश and ईश्वरः. २७१. [1]) $A_3$ gloss अश्वपादः. २७२. [1]) $A_3$ gloss प्रवरसेनस्य.—[2]) Thus $A_1$; corr. by later hand into °स्मृतेः, as found also in R. २७६. [1]) $A_1$ gloss स्वल्पमर्थिता बहु फलन्ति महान्तः.—[2]) $A_1$ gloss उदन्यया पिपासया.—[3]) Emended : A R G वदन्यो.—[4]) $A_3$ gloss शिवः. २७७. [1]) $A_3$ gloss पराभवं. २७८. [1]) $A_3$ gloss प्रभुः.—[2]) Thus corr. by $A_3$ from $A_1$ स फलार्थिनम्. २७९. [1]) Thus $A_1$; corr. by later hand into सांयुज्या°. २८०. [1]) $A_3$ अगच्छ°. २८१. [1]) त्त supplied by $A_3$ in space left by $A_1$.—[2]) $A_3$ gloss निकटं. २८४. [1]) $A_3$ gloss तेभ्यः.—[2]) $A_3$ gloss नीचैः. २८६. [1]) Emended ; A निश्वस°. २८९. [1]) $A_3$ gloss प्रवरसेनः. २९०. [1]) $A_3$ gloss मातृगुप्तः.—[2]) Thus corr. by later hand from $A_1$ निश्वस्य.—[3]) $A_3$ gloss विक्रमादित्यः. २९१. [1]) Thus $A_1$; corr. by $A_3$ into द्योतयेन्नान्यथा किं न which reading is found also in G R Edd.—[2]) $A_3$ gloss सूर्यकान्तः.

अथ राजाभ्यधात्केन राजन्नपकृतं तव । यत्प्रत्यप[1]चिकीर्षायै तमीशमनुशोचसि ॥२९२॥
मातृगुप्तस्ततोवादीत्कोपस्मितसिताधरः । अस्मानुत्सहते कश्चिन्नापकर्तुं बलाधिकः ॥२९३॥
नयता गण्यतामस्मानन्तरज्ञेन तेन[1] हि । न भस्मनि हुतं सर्पिर्नोप्तं वा सस्यमूषरे ॥२९४॥
उपकारं स्मरन्तस्तु कृतज्ञत्ववशंवदा[1]ः । पदवीमुपकर्तॄणां यान्ति निश्चेतना अपि ॥२९५॥ 295
निर्वाणमनुनिर्वाति तपनं तपनोपलः । इन्दुमिन्दुमणिः किं च शुष्यन्तमनुशुष्यति ॥२९६॥
पुण्यां वाराणसीं गत्वा तस्माच्छमसुखोन्मुखः । इच्छामि सर्वसंन्यासं कर्तुं द्विजजनोचितम् ॥२९७॥
मणिदीपमिवेशं[1] तमन्तरेणान्धकारिताम् । बिभेमि द्रष्टुमप्युर्वीं भोगयोगे कथैव का ॥२९८॥
इत्यौचित्यनिधेस्तस्य वाणीमाकर्ण्य विस्मितः । धीरः प्रवरसेनोपि व्याजहारोचितं वचः ॥२९९॥
सत्यं विश्वंभरा देवी भूपते रत्नसूरियम् । उत्पत्त्या द्योतते धर्म्यैः कृतज्ञैर्या भवादृशैः ॥३००॥ 300
अन्तरज्ञतया श्लाघ्यः कोन्यस्तस्मान्महीभुजः[1] । इत्थं जडे जगत्येकस्त्वां यथावद्विवेद यः ॥३०१॥
चिरं खलु खिलीभूताः कृतज्ञत्वस्य वीथयः । धीर त्वयैव न त्वासु[1] संचारो यदि दर्श्यते[2] ॥३०२॥
पाकश्चेन्न शुभस्य मेद्य तदसौ प्रागेव नादात्किमु स्वार्थश्चेन्न मयास्य किं न भजते दीनान्स्वबन्धूनयम् ।
मत्तो रन्ध्रदृशोस्य भीर्यदि न तल्लुब्धः किमेष त्यजेदित्यन्तः पुरुषाधमः कलयति प्रायः कृतोपक्रियः ॥३०३॥
अत्युदात्तगुणेष्वेषा कृतपुण्यैः प्ररोपिता । शतशाखीभवत्येव यावन्मात्रापि सत्क्रिया ॥३०४॥
तत्त्वं गुणवतामग्र्यस्तत्त्वज्ञैश्चाभिनन्दितः । परीक्षितो मणिरिव व्यक्तं बहुमतः सताम् ॥३०५॥ 305
तस्मादनुगृहाणास्मान्मा स्म त्याक्षीर्नरेन्द्रताम् । ममापि ख्यातिमायातु गुणवत्पक्षपातिता ॥३०६॥
पूर्वं तेनाथ चरमं मयापि प्रतिपादिताम् । भवान्प्रतिप्र[1]णयिनीं विदधातु पुनर्भुवम् ॥३०७॥
अव्याजौदार्यचर्यस्य श्रुत्वेति नृपतेर्वचः । कृतस्मितो मातृगुप्तः शनैर्वचनमब्रवीत् ॥३०८॥
यान्यक्षराण्[1]यन्तरेण वाच्यं वक्तुं न पार्यते । का गतिस्तदुपादाने मर्यादोल्लङ्घनं विना ॥३०९॥
अ[1]तः परुषमप्यद्य किंचिदेव मयोच्यते । अव्याजार्जवमप्येतदार्यत्वमवधीर्यते ॥३१०॥ 310
सर्वः स्मरति सर्वस्य प्रागवस्थासु लाघवम् । आत्मैव वेत्ति माहात्म्यं वर्तमाने क्षणे पुनः ॥३११॥
पूर्वावस्था मदीया ते त्वदीया या च मे हृदि । ताभ्यां विमोहितावावां न विद्वोन्योन्यमाशयम् ॥३१२॥
राजा भूत्वा कथं मादृक्प्रतिगृह्णातु संपदः । कथमेकपदे सर्वमौचित्यं परिमार्जतु ॥३१३॥
असाधारणमौदार्यमाहात्म्यं तस्य भूपतेः । भोगमात्रकृते मादृक्किं साधारणतां नयेत् ॥३१४॥
अपि च स्पृहयालुः स्यां भोगेभ्यो यदि भूपते । ध्रियमाणेभिमाने मे केन ते[1] विनिवारिताः ॥३१५॥ 315
यन्ममोपकृतं तेन तद्विना प्रत्युपक्रियाम् । जीर्णमेवाधुनाङ्गेषु प्रभवत्वेष निश्चयः ॥३१६॥
या गतिर्भूभुजोमुष्य मया तामनुगच्छता । पात्रापात्रविवेक्तृत्वख्यातिर्नेया प्रकाश्यताम् ॥३१७॥
एतावत्येव कर्तव्ये यातेस्मि[1]न्कीर्तिशेषताम् । भोगमात्रपरित्यागाद्विदध्यां सत्यसंधताम् ॥३१८॥

---

२९२. [1]) Thus corr. by later hand from $A_1$ यत्प्रत्युप°. २९४. [1]) $A_3$ gloss तेन हर्षदेवेन. २९५. [1]) $A_3$ °वशीकृताः. २९८. [1]) $A_3$ gloss विक्रमादित्यं. ३०१. [1]) $A_3$ gloss हर्षदेवात्. ३०२. [1]) $A_3$ gloss वीथीषु.—[2]) दर्श्यते supplied by $A_3$ in space left by $A_1$. ३०७. [1]) Thus $A_1$; $A_3$ °न्पाणिप्र°. ३०९. [1]) Thus corr. by $A_3$ from $A_1$ यान्यक्षारा°. ३१०. [1]) This verse has been omitted by $A_1$ and supplied in margin by $A_3$; found in R G. ३१५. [1]) $A_3$ gloss ते भोगा इत्यर्थः. ३१८. [1]) $A_3$ gloss विक्रमादित्ये.

इत्युक्त्वा विरते तस्मिञ्जगाद जगतीपतिः । त्वदीया न मया स्पृश्यास्त्वयि जीवति संपदः ॥३१९॥

320 अथ वाराणसीं गत्वा कृतकाषायसंग्रहः । सर्वं संन्यस्य सुकृती मातृगुप्तोऽभवद्यतिः ॥३२०॥

राजा प्रवरसेनोऽपि काश्मीरोत्पत्तिमञ्जसा । निखिलां मातृगुप्ताय प्राहिणोद्दृढनिश्चयः ॥३२१॥

स हठापतितां लक्ष्मीं भिक्षाभुक्प्रतिपादयन् । सर्वार्थिभ्यः कृती वर्षान्दश प्राणानधारयत् ॥३२२॥

अन्योन्यं साभिमानानामन्योन्यौचित्यशालिनाम् । त्रयाणाम[1]पि वृत्तान्त एष त्रिपथगापयः ॥३२३॥

राजा प्रवरसेनोऽथ नमयन्नवनीधरान् । अकृच्छ्रलङ्घ्याः ककुभो वृद्धस्य यशसो व्यधात् ॥३२४॥

325 पीताब्धिर्लङ्घितोर्वीभृत्कुम्भयोनिरिवानयत् । तस्य प्रतापः प्रभवन्भुवनानि[1] प्रसन्नताम् ॥३२५॥

शुष्यत्तमालपत्त्राणि शीर्णताडीदलानि च । तत्सेनार्णवतीराणि चक्रेरिस्त्रीमुखानि च ॥३२६॥

स गङ्गालिङ्गिताङ्गस्य पूर्ववारिनिधेर्व्यधात् । सैन्येभमदनिष्पन्दैः कालिन्दीसंगमश्रियम् ॥३२७॥

रोधस्यपरपाथोधेः कटकैः स्पृष्टदिक्तटैः । चकारोत्पाट्य सौराष्ट्रानसौ राष्ट्रविपाटनम् ॥३२८॥

यशोऽर्थिनः पार्थिवेषु द्वेषरागबहिष्कृतः । ववृधे धर्मविजयस्तस्य क्षितिशतक्रतोः ॥३२९॥

330 वैरिनिर्वासितं पित्र्ये विक्रमादित्यजं न्यधात् । राज्ये प्रतापशीलं स शीलादित्यापराभिधम् ॥३३०॥

सिंहासनं स्ववंश्यानां तेनाहितहृतं ततः । विक्रमादित्यवसतेरानीतं स्वपुरं पुनः ॥३३१॥

हेतूनुदीर्य विविधानमन्वानं पराजयम् । सप्त वारान्स[1] तत्याज जित्वा मुम्मुनि[2]भूभुजम् ॥३३२॥

धाष्टर्यादथाष्टमे वारे हेतुमाख्यातुमुद्यतम् । धिक्पशून्बध्यतां सोऽयमित्यूचे नृपतिः क्रुधा ॥३३३॥

अवध्योऽहं पशुत्वेन वीरेत्युक्त्वाभयोत्सुकः । मध्येसभं ननर्तास्य सोऽनुकुर्वन्कलापिनम् ॥३३४॥

335 नृत्तं केकां च शिखिनो[1] दृष्ट्वास्मै द्रविणं नृपः । अभयेन समं प्रादात्तालाव[2]चरणोचितम् ॥३३५॥

वसतोऽस्य दिशो जित्वा नप्तुः पैतामहे पुरे । कर्तुं पुरं स्वनामाङ्कं प्रथते स्म मनोरथः ॥३३६॥

रात्रौ क्षेत्रं च लग्नं च दिव्यं ज्ञातुमथैकदा । स वीरो वीरचर्यायां निर्ययौ पार्थिवार्यमा ॥३३७॥

गच्छतः क्ष्मापतेस्तस्य मौलिरत्नाग्र[1]बिम्बितः । बभार ताराप्रकरो रक्षासर्षपविभ्रमम् ॥३३८॥

अथानन्तचितालोकस्पष्टभीमतटद्रुमाम् । श्मशानप्रान्ततटिनीं पर्यटन्नाससाद सः ॥३३९॥

340 ततस्तस्य सरित्पारे मुक्तसंरावमग्रतः । ऊर्ध्वबाहु महद्भूतं प्रादुरासीन्महौजसः ॥३४०॥

नृपतिस्तस्य दृक्पातैर्ज्वलद्भिः कपिशीकृतः । उल्काज्योतिःकृताश्लेषः कुलाद्रिरिव दिद्युते ॥३४१॥

तमथ प्रतिशब्देन घोरेणापूरयन्दिशः । अत्रासं विहसन्नुच्चैरुवाच क्षणदाचरः ॥३४२॥

संत्यज्य विक्रमादित्यं सत्त्वोद्रिक्तं च शूद्रकम् । त्वां च भूपाल पर्याप्तं धैर्यमन्यत्र दुर्लभम् ॥३४३॥

वसुधाधिपते वाञ्छासिद्धिस्तव विधीयते । सेतुमेतं समुत्तीर्य पार्श्वमागम्यतां मम ॥३४४॥

345 इत्युदीर्य निजं जानुं रक्षः पाराव्यसारयत्[1] । तन्महासरितो वारि सेतुसीमन्तितं व्यधात् ॥३४५॥

अङ्गेन रक्षःकायस्य ज्ञात्वा सेतुं प्रकल्पितम् । वीरः प्रवरसेनोऽथ विकोशां क्षुरिकां दधे ॥३४६॥

---

३२३. [1]) $A_1$ gloss त्रयाणां विक्रमादित्यमातृगुप्तप्रवरसेनानाम्. ३२५. [1]) $A_3$ gloss जलान्यपि. ३३२. [1]) $A_3$ gloss प्रवरसेनः.—[2]) Doubtful emendation: मुंमु has been supplied by $A_3$ in space left by $A_1$; $A_3$ has marked a different division of the words, जित्वाऽमुं । मुनिभूभुजम्, which is also indicated by the interlinear gloss of $A_3$ प्रतापशीलं; C reads मुम्मुनि°. For the name मुम्मुनि see iv. 167; v. 516; viii. 2180 (*C.*).—३३५. [1]) $A_3$ gloss शिखिवद्दृष्ट्वा.—[2]) Thus $A_1$; $A_3$ तालार्धचरणो°. ३३८. [1]) Thus $A_3$; $A_1$ °त्नाङ्ग°. ३४५. [1]) Thus apparently $A_1$; $A_3$ °यन्.

स तयोत्कृत्य तन्मांसं कृतसोपानपद्धतिः । अतरद्यत्र तत्स्थानं क्षुरिकाबलं[1] उच्यते ॥३४७॥

पार्श्वस्थं तं लग्नमुक्त्वा प्रातर्मत्सूत्रपातनम् । दृष्ट्वा पुरं विधेहीति वदन्भूतं तिरोदधे ॥३४८॥

देव्या शारिकयाष्टेन यक्षेणाधिष्ठिते[1] च सः । ग्रामे शारीटके[2] पश्यत्सूत्रं वेतालपातितम् ॥३४९॥

भक्त्या प्रतिष्ठां प्राक्तस्मिन्निनीषौ प्रवरेश्वरम् । जयस्वामी स्वयं पीठे भित्त्वा यन्त्रमुपाविशत् ॥३५०॥ 350

वेतालावेदितं लग्नं जानतो जगतीभुजा । स्थपतेः स जयाख्यस्य[1] नाम्ना प्रख्यापितोभवत् ॥३५१॥

नगराप्रातिलोम्याय भक्त्या तस्य विनायकः । प्रत्यङ्मुखः प्राङ्मुखतां भीमस्वामी स्वयं ययौ ॥३५२॥

सद्भावश्र्यादिका देव्यस्तेन श्रीशब्दलाञ्छिताः । पञ्च पञ्चजनेन्द्रेण पुरे तस्मिन्निवेशिताः ॥३५३॥

वितस्तायां स भूपालो बृहत्सेतुमकारयत् । ख्याता ततः[1] प्रभृत्येव तादृग्नौसेतुकल्पना ॥३५४॥

श्रीजयेन्द्रविहारस्य बृहद्बुद्धस्य च व्यधात् । मातुलः स नरेन्द्रस्य जयेन्द्रो विनिवेशनम्[1] ॥३५५॥ 355

बुभोज सिंहलादीन्यो द्वीपान्स सचिवोकरोत् । मोराकनामा मोराकभवनं भुवनाद्भुतम् ॥३५६॥

षट्त्रिंशद्गृहलक्षाणि पुरं तत्पप्रथे पुरा । यस्यास्तां वर्धनस्वामी विश्वकर्मा च सीमयोः ॥३५७॥

दक्षिणस्मिन्नेव पारे वितस्तायाः पुरा किल । निर्मितं तेन नगरं विभक्तैर्युक्तमापणैः ॥३५८॥

ते तत्राभ्रंलिहाः सौधा यानध्यारुह्य दृश्यते । वृष्टिस्निग्धं निदाघान्ते चैत्रे चोत्कुसुमं जगत् ॥३५९॥

तद्विना नगरं कुत्र पवित्राः सुलभा भुवि । सुभगाः सिन्धुसंभेदाः क्रीडावसथवीथिषु ॥३६०॥ 360

दृष्टः क्रीडानगोन्यत्र न मध्येनगरं क्वचित् । यतः सर्वौकसां लक्ष्मीः संलक्ष्या द्युपथादिव ॥३६१॥

वैतस्तं वारि वास्तव्यैर्बृहत्तुहिनशर्करम्[1] । ग्रीष्मोग्रेह्नि स्ववेश्माग्रात्क ततोन्यत्र लभ्यते ॥३६२॥

प्रतिदेवगृहं कोशास्ते तस्मिन्नर्पिता नृपैः । सहस्रशः शक्यते यैः क्रेतुं भूः सागराम्बरा ॥३६३॥

पुरे निवसतस्तस्मिंस्तस्य राजप्रजासृजः । शनैः साम्राज्यलाभस्य षष्टिः संवत्सरा ययुः ॥३६४॥

ललाटे शूलमुद्राङ्के जराशुक्लाः शिरोरुहाः । तस्य शंभुभ्रमासङ्गिगङ्गाम्भोविभ्रमं दधुः ॥३६५॥ 365

अथाश्वपादेनेशाननिदेशा[1]त्तत्क्षणागतः । काश्मीरिको जयन्ताख्यो द्विजन्मायोजि पार्श्वगः ॥३६६॥

श्रान्तोस्यध्वन्य नान्यस्माद्देशात्तेभिमतं भवेत् । राज्ञे प्रवरसेनाय लेख एष प्रदर्श्यताम् ॥३६७॥

इत्युक्त्वार्पितलेखोसावसमर्थः पथः पृथून् । गन्तुं प्रस्थानखिन्नोस्मि सद्यस्तेनेत्यगद्यत ॥३६८॥

स्नाह्यद्य तावत्त्वं स्पृष्टो द्विजः कापालिना मया । उक्त्वेति तेन क्षिप्तोसावासन्ने दीर्घिकाजले ॥३६९॥

उन्मीलितेक्षणोद्राक्षीत्स्वं स्वदेशादथोत्थितम् । तस्थुषश्चार्चने राज्ञो भृत्यान्व्यग्राञ्जलाहृतौ ॥३७०॥ 370

स्वमावेदयितुं नद्या नीयमाने नृपान्तिकम् । अव्याक्षिप्तोक्षिपल्लेखं स स्नानकलशे ततः ॥३७१॥

प्रवरेशं स्नापयता स्रस्तं तत्कलशात्पुनः । राज्ञा लेखं वाचयित्वा जयन्तः प्रापितोन्तिकम् ॥३७२॥

कृतं कृत्यं महद्दत्तं भोगा भुक्ता वयो गतम् । किमन्यत्करणीयं ते एहि गच्छ शिवालयम् ॥३७३॥

ततस्तं वृत्तसंकेतः संतोष्याभिमतार्पणात् । भित्त्वा तमश्मप्रासादं जगाहे विमलं नभः ॥३७४॥

जनैः स ददृशे गच्छन्कैलासतिलकां दिशम् । विशदे घटयन्व्योम्नि द्वितीयतपनोदयम् ॥३७५॥ 375

---

३४७. [1]) Thus corr. by $A_3$ from $A_1$ °भाल ; G °बाल. ३४९. [1]) Thus corr. by later hand from $A_1$ °ष्ठितं.—[2]) $A_2$ gloss शारदद्द. ३५१. [1]) स्य supplied by $A_3$. ३५४. [1]) Thus corr. by $A_3$ from $A_1$ तदा. ३५५. [1]) $A_3$ gloss स्थापनम्. ३६२. [1]) $A_3$ °र्वहत्तु°. ३६६. [1]) Thus corr. by $A_3$ from $A_1$ °निर्दे°.

जयन्तेनाद्भुतोदन्तहेतुनावाप्य संपदः । स्वनामाङ्काग्रहारादिकर्मभिर्निर्मलाः कृताः ॥३७६॥
एवं स भुवनैश्वर्यं भुक्त्वा[1] भूमिभृतां वरः । अनेनैव शरीरेण भेजे भूतपतेः सभाम् ॥३७७॥
प्रासादे प्रवरेशस्य सिद्धिक्षेत्रे क्षमापतेः । स्वर्गद्वारप्रतिभटं द्वारम[1]द्यापि लक्ष्यते ॥३७८॥
तस्य रत्नप्रभादेव्यां जातो राजा युधिष्ठिरः । अपासीन्नवमासोनाः क्ष्मां चत्वारिंशतिं[1] समाः ॥३७९॥
380 सर्वरत्नजयस्कन्दगुप्तशब्दाङ्किताभिधाः । आसन्विहारचैत्यादिकृत्यैस्तत्सचिवा वराः ॥३८०॥
भवच्छेदा[1]भिधं ग्रामं स्तुत्यं चैत्यादिसिद्धिभिः । यो व्यधात्सोस्य वज्रेन्द्रोप्यासीन्मन्त्री जयेन्द्रजः ॥३८१॥
दिक्कामिनीमुखोत्कीर्णकीर्तिचन्दनचित्रकाः । आसन्कुमारसेनाद्यास्तस्यान्येप्यग्र्यमन्त्रिणः ॥३८२॥
पद्मावत्यां सुतस्तस्य नरेन्द्रादित्य इत्यभूत् । लःखणा[1]परनामा यो नरेन्द्रस्वामिनं व्यधात् ॥३८३॥
वज्रेन्द्रतनयौ वज्रकनकौ यस्य मन्त्रिणौ । अभूतां सुकृतोदन्तौ राज्ञी च विमलप्रभा ॥३८४॥
385 स विधायाधिकरणं लिखितस्थितये निजम् । द्यां त्रयोदशभिर्वर्षैरारुरोह महाभुजः ॥३८५॥
तस्यानुजो धरणिभृद्रणादित्यस्ततोभवत् । तुञ्जीनापरनामानं यं जनाः प्राहुरञ्जसा ॥३८६॥
जगद्विलक्षणं यस्य शङ्खमुद्राङ्कितं शिरः । अपूर्वशर्वरीशान्तर्लीनभानुश्रियं दधे ॥३८७॥
रिपुकण्ठाटवीष्वासीद्यस्य धाराधरः पतन् । तद्वधूनेत्रकुण्डैस्तु जलाधिक्यमधार्यत ॥३८८॥
अपूर्वो यत्प्रतापाग्निः प्रविश्योर्वीं द्विषां न्यधात् । नारीनेत्रेषु नीरोर्मीन्मन्दिरेषु तृणाङ्कुरान् ॥३८९॥
390 यस्य पाणिप्रणयितां कृपाणे समुपागते । कबन्धेभ्यः परो नृत्तं न व्यधत्त द्विषद्बले[1] ॥३९०॥
तस्याव्यपोह्यमाहात्म्या देवी दिव्याकृतेः प्रिया । विष्णुशक्तिः क्षितिं प्राप्ता रणारम्भाभिधाभवत् ॥३९१॥
स हि जन्मान्तरे पूर्वं द्यूतकारोभवत्किल । कदापि प्राप निर्वेदं सर्वस्वं कितवैर्जितः ॥३९२॥
देहत्यागोद्यतोप्यासील्प्राप्यं किंचिद्विचिन्तयन् । न पर्यन्तेप्युपेक्षन्ते कितवाः स्वार्थसाधनम् ॥३९३॥
अवन्ध्यदर्शनां विन्ध्ये देवीं भ्रमरवासिनीम् । द्रष्टुमैच्छद्वराकाङ्क्षी निर्व्यपेक्षः स्वजीविते ॥३९४॥
395 भ्रमरैः शङ्कुपुच्छाद्यैः खण्ड्यमानस्य देहिनः । तदास्पदं हि विशतो दुर्लङ्घ्या पञ्चयोजनी ॥३९५॥
स वज्रशङ्कुपुच्छानां धीमांस्तेषां प्रतिक्रियाम् । देहेवश्यपरित्याज्ये मन्वानोभूददुष्कराम् ॥३९६॥
प्रागयोवर्मणा देहं ततो महिषचर्मणा । तेन छादयता दत्तो मृल्लेपोथ सगोमयः ॥३९७॥
अथ भानुकरोच्छुष्कमृल्लेपाम्रेडिताङ्गकः । स लोष्ट इव संचारी प्रतस्थे क्रूरनिश्चयः ॥३९८॥
सरलां सरणिं त्यक्त्वा जीवितस्पृहया समम् । गुहा तेन ततः सान्द्रतमोभीमा व्यगाह्यत ॥३९९॥
400 अथोदतिष्ठन्गर्तेभ्यो घोरा भ्रमरमण्डलाः । पक्षशब्दैः श्रुतिं घ्नन्तो मृत्युतूर्यरवैरिव ॥४००॥
ते तमुच्छुष्कमृल्लेपरेणुव्रणितलोचनाः । सहसा नाक्रमन्ते स्म प्रहरन्तोपि बाधितुम् ॥४०१॥
रेणुभिर्येन्धितदृशस्ते न्यवर्तन्त षट्पदाः । तेखण्डयंस्तु मृल्लेपं न्यपतन्ये नवा नवाः ॥४०२॥
तैः खण्ड्यमानमुच्चण्डैर्व्रजतो योजनत्रयीम् । क्रमान्मृत्कवचं तस्य पथि संक्षयमाययौ ॥४०३॥
ततो मुहुः प्रहरतां तेषां महिषचर्मणि । घोरश्चटचटाघोषः प्रादुरासीद्भयंकरः ॥४०४॥

---

३७७. [1]) Thus $A_2$; $A_1$ त्यक्त्वा. ३७८. [1]) $A_3$ च्छिद्रं. ३७९. [1]) Thus corr. by $A_3$ from $A_1$ चतुर्विंशतिं. ३८१. [1]) $A_1$ gloss भौछौं. ३८३. [1]) $A_1$ ल×खणा°. ३९०. [1]) $A_2$ indicates a *varia lectio* in the marginal note अन्यत् कबन्धेभ्यः परं नृत्तं न व्यधत्त द्विषद्दलम्; over the last word the gloss कर्ते by the same hand.

चतुर्थयोजनस्यार्धमतिक्रम्य विवेद सः । रणत्कारैर्द्विरेफांस्तानयोवर्मनिपातिनः ॥४०५॥ 405

धावंस्ततोतिवेगेन खण्ड्यमानेन षट्पदैः । स शस्त्रवर्मणामोचि चित्तं[1] धैर्येण नो पुनः ॥४०६॥

गव्यूतिमात्रमासन्ने देवीधामनि धैर्यवान् । धुन्वन्कराभ्यां मधुपान्धावति स्म स धीरधीः ॥४०७॥

अथ स्नाय्वस्थिशेषाङ्गो लूनमांसः षडङ्घ्रिभिः । कराभ्यामक्षिणी रक्षन्देव्यायतनमासदत् ॥४०८॥

प्रशान्ते भृङ्गसंपाते प्रकाशमवलोकयन् । स देव्याः पादयोरग्रे पपातोद्भ्रान्तजीवितः ॥४०९॥

स्तोकावशेषप्राणं तं देव्याश्वासयितुं ततः । अभिरामं वपुः कृत्वा पस्पर्शाङ्गेषु पाणिना ॥४१०॥ 410

दिव्येन पाणिस्पर्शेन तेन पीयूषवर्षिणा । स क्षिप्रासादितस्वास्थ्यो दिक्षु चिक्षेप चक्षुषी ॥४११॥

प्रविष्टमात्रः प्रैक्षिष्ट सिंहविष्टरसीम्नि याम् । घोराकारां स तां देवीं तदाद्राक्षीन्न तां पुनः[1] ॥४१२॥

ददर्श पुनरुद्यानलतावासे विलासिनीम् । स्थितां पुष्करिणीतीरे श्यामां पुष्करलोचनाम् ॥४१३॥

गृहीतहारमुक्तार्घां बद्ध्वा[1] पीनस्तनाञ्जलिम् । महार्हैः कान्तिकुसुमैर्यौवनेनार्चिताङ्गकाम् ॥४१४॥

यावकाहारिणौ पादौ दधतीं कृच्छ्रचारिणौ । स्तनच्छन्नमुखं द्रष्टुं तपस्यन्ताविवान्वहम् ॥४१५॥ 415

भास्वद्बिम्बाधरां कृष्णकेशीं सितकराननाम् । हरिमध्यां शिवाकारां सर्वदेवमयीमिव ॥४१६॥

तां विभाव्यानवद्याङ्गीं निर्जने यौवनोर्जिताम् । निन्ये[1]वारितवामेन स कामेन विधेयताम् ॥४१७॥

दधती रूपमाधुर्यपूरच्छन्नामधृष्यताम् । अप्सराः प्रत्यभात्तस्य सा हि चित्ते न[1] देवता ॥४१८॥

कृपामृदुरवादीत्तं व्यथितोसि चिरं पथि । मुहुः सौम्य समाश्वस्य प्रार्थ्यतामुचितो वरः ॥४१९॥

स तां बभाषे शान्तो मे भवत्या दर्शनाच्छ्रमः । अदेवी किं तु भवती वरं दातुं कथं क्षमा ॥४२०॥ 420

देवी जगाद तं भद्र कोयं ते मनसि भ्रमः । देवी वा स्यामदेवी वा वरीतुं त्वां तु शक्नुयाम् ॥४२१॥

इति सोभीष्टसंप्राप्तौ कारयित्वा प्रतिश्रवम् । दूरमुत्क्रान्तमर्यादः संगमं तामयाचत ॥ ४२२॥

तमभ्यधात्सा दुर्बुद्धे कोयं तेनुचितो विधिः । प्रार्थयस्वेतरद्यस्मात्साहं भ्रमरवासिनी ॥४२३॥

देवीं तां जानतोप्यस्य नाभूदवहितं मनः । निरुद्धा वासनाः केन जन्मान्तरनिबन्धनाः ॥४२४॥

स तामुवाच सत्यां[1] चेद्देवि स्वां गिरमिच्छसि । प्रमाणीकुरु मद्वाणीमहमन्यन्न कामये ॥४२५॥ 425

पूर्वमेव हि जन्तूनां योधिवासो निलीयते । तिलानामिव तेषां स पर्यन्तेपि न शीर्यते ॥४२६॥

देवी वा भव कान्ता वा भीमा वा शोभनापि वा । यादृशीं पूर्वमद्राक्षं तादृश्येवावभासि मे ॥४२७॥

तमित्थं कथयन्तं सा ज्ञात्वा निश्चलनिश्चयम् । एवं जन्मान्तरे भावीत्यभ्यधादनुरोधतः ॥४२८॥

उत्सहन्ते हि संस्प्रष्टुं न दिव्या[1] मर्त्यधर्मिणः । तद्गच्छ क्रूरसंकल्पेत्युक्त्वा सान्तर्दधे ततः ॥४२९॥

अशून्यजन्मा भूयासं तया देव्येति चिन्तयन् । प्रयागवटशाखाग्रादहासीत्स वपुस्ततः ॥४३०॥ 430

सोजायत रणादित्यो रणारम्भा च सा भुवि । मर्त्यभावेपि या नैव जहौ जन्मान्तरस्मृतिम् ॥४३१॥

रतिसेनाभिधश्चोलराजः सज्जोब्धिपूजने । तां तरङ्गान्तराल्लेभे रत्नराजिमिवोज्ज्वलाम् ॥४३२॥

---

४०६. [1]) $A_3$ चित्रं. ४१२. [1]) Thus $A_1$ ; $A_3$ G पुरः; R and Edd. read पुनः. ४१४. [1]) Thus $A_1$ ; altered by $A_3$ to °मुक्तार्घान्बद्धा. $A_3$ reads in margin गृहीतहारमुक्तार्घां बद्धपीनस्तनाञ्जलिम्, with gloss मुक्ता एवार्घाः. G and R follow $A_1$. ४१७. [1]) $A_1$ writes ऽ after निन्ये. ४१८. [1]) This division of the words is indicated by $A_1$. ४२५. [1]) Thus corr. by later hand from $A_1$ सत्यं ; सत्यां also in G and R. ४२९. [1]) $A_3$ देव्यो.

आ बाल्याद्व्यक्तदिव्योक्तिं तामलंकृतयौवनाम् । दिव्यार्हां पृथिवीशेभ्यो नार्थिभ्योपि ददौ नृपः ॥४३३॥
रणादित्यनृपामात्ये दूत्यायाते तथैव तम् । प्रत्याख्यानेच्छुमाचख्यौ सैव तद्वरणं वरम् ॥४३४॥
435 तदर्थमेव कथितस्वोत्पत्तिं तां ततः पिता । व्रतं कुलूतभूभर्तुः सुहृदः प्राहिणोद्गृहान् ॥४३५॥
प्रहृष्टो विप्रकृष्टं तं देशं गत्वा व्यधत्त ताम् । परिणीय रणादित्यः शुद्धान्तस्याधिदेवताम् ॥४३६॥
मर्त्यसंस्पर्शभीरुः सा महादेवी भवन्त्यपि । तं मायया मोहयन्ती न पस्पर्श कदाचन ॥४३७॥
व्यधान्मायामयीं राज्ञस्तल्पे स्वसदृशीं स्त्रियम् । स्वयं सा भ्रमरीरूपा निर्जगाम बहिर्निशि ॥४३८॥
स नाम्ना स्वस्य देव्याश्च कृत्वा सुरगृहद्वयम् । माहेश्वरः शैललिङ्गे कारयामास कारुभिः ॥४३९॥
440 श्वः प्रतिष्ठाप्रसङ्गेथ सज्जे तल्लिङ्गयोर्द्वयम्[1] । देशान्तरागतः कश्चिद्दूषयामास दैववित् ॥४४०॥
स दृष्टप्रत्ययः शश्वत्तयोर्घटितलिङ्गयोः । अश्मखण्डैः समण्डूकैर्बभाषे गर्भमावृतम् ॥४४१॥
किंकर्तव्यतया मूढं प्रतिष्ठाविघ्नविह्वलम् । दिव्यदृष्टिः स्वयं देवी ततो राजानमब्रवीत् ॥४४२॥
राजन्गिरिसुतोद्वाहे पौरोहित्यं पुरा भजन् । स्वमर्चादेवमादत्त[1] पूजाभाण्डात्प्रजापतिः ॥४४३॥
तां विष्णोः प्रतिमां वीक्ष्य पूजितां तेन धूर्जटिः । शून्यामिव तदा मेने शक्तिरूपां विना शिवम् ॥४४४॥
445 निमन्त्रितैर्ढौकितानि रत्नान्यथ सुरासुरैः । पिण्डीकृत्य स्वयं चक्रे लिङ्गं भुवनवन्दितम् ॥४४५॥
तां विष्णुप्रतिमां तच्च लिङ्गमीशानपूजितम् । स्वयं प्रजासृजः पूज्यं कालेनादत्त रावणः ॥४४६॥
तेनाप्यभ्यर्च्यमानं तल्लङ्कायामभवच्चिरम् । देवद्वयं रावणान्ते नीतमासीच्च वानरैः ॥४४७॥
तिर्यक्तया ते कपयो मुग्धा हिमनगौकसः । शान्तौत्सुक्याः शनैर्देवौ न्यधुरुत्तरमानसे ॥४४८॥
प्रागेव सरसस्तस्मात्कुशलैः शिल्पिभिर्मया । तावुद्धृतौ प्रातरत्र प्राप्तौ द्रक्ष्यस्यसंशयम् ॥४४९॥
450 तयोः प्रतिष्ठा क्रियतामित्युक्त्वा पृथिवीभुजम् । देवी प्रयाता शुद्धान्तं सिद्धान्सस्मार खेचरान् ॥४५०॥
ते[1] ध्यातमात्राः[2] संप्राप्ता देव्यादेशेन पाथसः[3] । उद्धृत्य नृपतेर्धाम्नि देवौ हरिहरौ न्यधुः[4] ॥४५१॥
दिव्यैः प्रसूनैः संवीतौ हरनारायणौ जनः । प्रातर्नृपगृहे दृष्ट्वा परं विस्मयमाययौ ॥४५२॥
सज्जे प्रतिष्ठालग्ने[1]थ माहेश्वरतया नृपः । रणेश्वरप्रतिष्ठायां पूर्वं यावत्समुद्यतः ॥४५३॥
रणारम्भानुभावेन तावदेवाद्भुतावहः । स्वयं पीठे रणस्वामी भित्त्वा यन्त्रमुपाविशत् ॥४५४॥
455 कर्तुं प्रभावजिज्ञासां राज्ञ्या[1] दत्तधनस्ततः । स स्वयंभूः स्वयं भक्तां[2]स्तांस्तान्ग्रामानदापयत् ॥४५५॥
कुम्भदासतया छन्नः सिद्धो ब्रह्माभिधो वसन् । परिज्ञाय तयो[1]र्देव्या प्रतिष्ठाकर्म कारितः ॥४५६॥
स वृत्तप्रत्यभिज्ञः सन्प्रतिष्ठाप्य रणेश्वरम् । व्योम्ना व्रजन्रणस्वामिप्रतिष्ठां गूढमादधे ॥४५७॥
जनास्त्वलक्षयन्यत्स स्वयं पीठमवातरत् । इति केषामपि हृदि प्रवादो[1]द्यापि वर्तते ॥४५८॥
सा[1] ब्रह्मप्रतिमं सिद्धं देवी ब्रह्मविदां वरम् । अकारयत्तमुद्दिश्य परार्ध्यं[2] ब्रह्ममण्डपम्[3] ॥४५९॥
460 रणारम्भास्वामिदेवौ दंपतिभ्यां व्यधीयत । मठः पाशुपतानां च ताभ्यां प्रद्युम्नमूर्धनि[1] ॥४६०॥

४४०. 1) $A_3$ gloss शिवलिङ्गद्वयम्. ४४३. 1) Thus $A_3$; $A_1$ °धत्त. ४५१. 1)2)3) Thus corr. by later hand from $A_1$ तं, °मात्र, पाथस.—4) Thus $A_3$; $A_1$ व्यधुः. ४५३. 1) Thus $A_1$; $A_3$ °लिङ्गे. ४५५. 1) Thus corr. by $A_3$ from $A_1$ राज्ञा.—2) Thus $A_3$; $A_1$ भक्तैस्तां°. ४५६. 1) $A_3$ gloss हरिहरयोः. ४५८. 1) Thus $A_3$; $A_1$ प्रवचो. ४५९. 1) Thus corr. by later hand from $A_1$ स.—2) Thus corr. by $A_3$ from $A_1$ पराख्यं.—3) Thus $A_3$; $A_1$ °सत्तमम्. ४६०. 1) $A_3$ gloss प्रद्युम्नमूर्धनि शारिकागिरौ.

आरोग्यशाला निरघाप्युल्लाघत्वाय रोगिणाम् । तेन सेनामुखीदेवीभयशान्त्यै च कारिता ॥४६१॥
ख्यातिं रणपुरस्वामिसंज्ञया सर्वतो गतम् । स सिंहरोत्सिकाग्रामे मार्तण्डं प्रत्यपादयत् ॥४६२॥
अमृतप्रभया तस्य राज्ञः पत्न्यान्यया कृतः । दक्षिणेस्मिन्रणेशस्य पार्श्वे देवोमृतेश्वरः ॥४६३॥
मेघवाहनभूभर्तृपत्न्या भिन्नाख्यया कृते । विहारेपि तया बुद्धबिम्बं साधु निवेशितम् ॥४६४॥
राज्ञे देव्यनुरक्ताय सानुक्रोशाय सैकदा । पातालसिद्धिदं मन्त्रं प्रददौ हाटकेश्वरम् ॥४६५॥ 465
मा भून्मोघास्य मत्प्राप्तिरिति मत्वा तयार्पितम् । असाधयत्स तं प्राप्य वशान्तं[1] वत्सरान्बहून् ॥४६६॥
कृत्वेष्टिकापथे कष्टं तपो[1] नन्दिशिलां गतः । भूरिभिर्वत्सरैर्मन्त्रसिद्धेः प्रणयितां ययौ ॥४६७॥
स्वप्नैश्च सिद्धिलिंगैश्च जाताभङ्गुरनिश्चयः । चन्द्र[1]भागाजलं भित्त्वा नमुचेः प्राविशद्बिलम् ॥४६८॥
बिलेपावृततां याते दिवसान्येकविंशतिम् । प्रविश्य पौरान्प्राग्निन्ये दैत्यस्त्रीभोगभोगिताम् ॥४६९॥
एवं स भूपतिर्भुक्त्वा[1] भुवं वर्षशतत्रयम् । निर्वाणश्लाघ्यनिर्व्यूढि पातालै[2]श्वर्यमासदत् ॥४७०॥ 470
सानुगे नृपतौ याते दैतेयदयितान्तिकम् । देवी सा वैष्णवी शक्तिः श्वेतद्वीपमगाहत ॥४७१॥
राजवंशेष्वनेकेषु राज्ञोर्वंशद्वये परम् । द्वयोरेवात्र निर्व्यूढिं प्रजावात्सल्यमागतम् ॥४७२॥
रणादित्यस्य गोनन्दवंशे रामस्य राघवे[1] । लोकान्तरसुखस्यापि ययो[2]रंशभुजः प्रजाः ॥४७३॥
विक्रमाक्रान्तविश्वस्य विक्रमेश्वरकृत्सुतः । तस्यासीद्विक्रमादित्यस्त्रिविक्रमपराक्रमः ॥४७४॥
राजा ब्रह्मगलूना[1]भ्यां सचिवाभ्यां समं महीम् । सोपासीद्वासवसमो द्वाचत्वारिंशतिं समाः ॥४७५॥ 475
चक्रे ब्रह्ममठं ब्रह्मा गलूनो लूनदुष्कृतः । रत्नावल्याख्यया वध्वा विहारं निरमापयत् ॥४७६॥
राज्ञोनन्तरजस्तस्य राजाभूत्तदनन्तरम् । तापितारातिभूपालो बालादित्यो बलोर्जितः ॥४७७॥
लवणार्णवपानेन तर्षोत्कर्षमिवोद्वहन् । यत्प्रतापो रिपुस्त्रीणां सनेत्राम्भोभजन्मुखम् ॥४७८॥
आसन्येरिमनोगाधबोधदण्डा इवाहताः । यस्याद्यापि जयस्तम्भाः सन्ति ते पूर्ववारिधौ ॥४७९॥
प्रभावाङ्केन वङ्गालाञ्जित्वा येन व्यधीयत । काश्मीरिकनिवासाय का[1]लम्ब्याख्यो जनाश्रयः ॥४८०॥ 480
कश्मीरेषु धनोदग्रमग्रहारं द्विजन्मनाम् । राजा मडवराज्ये यो भेडरा[1]ख्यमकारयत् ॥४८१॥
विशां विपाटितारिष्टमरिष्टोत्सादने[1] व्यधात् । वल्लभा यस्य बिम्बोष्ठी बिम्बा बिम्बेश्वरं हरम् ॥४८२॥
भ्रातरो मन्त्रिणस्तस्य त्रयो मठसुरौकसोः । सेतोश्च कारका[1] आसन्खङ्गशत्रुघ्नमालवाः ॥४८३॥
बभूव तस्य भूभर्तुर्भुवनाद्भुतविभ्रमा । तनयानङ्गलेखाख्या शृङ्गारोदधिकौमुदी ॥४८४॥
तां वीक्ष्य लक्षणोपेतां मृगाक्षीं पितुरन्तिके । अमोघप्रत्ययो व्यक्तं व्याजहारेति दैववित् ॥४८५॥ 485
भविता तत्र जामाता जगतीभोगभाजनम् । त्वदन्तमेव साम्राज्यं गोनन्दान्वयजन्मनाम् ॥४८६॥
सुतासंतानसाम्राज्यमनिच्छन्नथ पार्थिवः । दैवं पुरुषकारेण जेतुमासीत्कृतोद्यमः ॥४८७॥

---

४६६. [1]) Thus A ; R G वंशान्तं ; Edd. वसन्तं. ४६७. [1]) Thus $A_3$ ; $A_1$ ततो. ४६८. [1]) Thus corr. by later hand from $A_1$ चान्द्र°. ४७०. [1]) Thus corr. by $A_3$ from $A_1$ भूत्वा.—[2]) Thus $A_3$ ; $A_1$ °लेश्वरम्. ४७३. [1]) $A_1$ gloss वंशे.—[2]) $A_3$ gloss ययोः रामरणादित्ययोः. ४७५. [1]) Emended ; A R G °गलूरा°. ४८०. [1]) The words from कालम्ब्याख्यो to कारका in verse 483 have been supplied by $A_1$ at a later date and in a smaller handwriting, partly in space left for this purpose, partly in margin. ४८१. [1]) Thus corr. by $A_3$ from $A_1$ भेरडा°. ४८२. [1]) $A_3$ gloss रहोसाने. ४८३. [1]) See note to verse 480 above.

अराजान्वयिने[1] दत्ता नेयं साम्राज्यहारिणी । मत्वेति प्रददौ कन्यां न कस्मैचन भूभुजे ॥४८८॥

हेतुं स रूपतामात्रं कृत्वा जामातरं[1] नृपः । अथाश्वघासकायस्थं चक्रे दुर्लभवर्धनम् ॥४८९॥

490 मातुः कार्कोटनागेन सुस्नातायाः समीयुषा[1] । राज्यायैव हि संजातो राज्ञा नाज्ञायि तेन सः[2] ॥४९०॥

निश्चिन्वते हि ज्ञंमन्या यमेवायोग्यमाग्रहात् । जिगीषयेव तत्रैव निदधाति विधिः शुभम् ॥४९१॥

मात्सर्येण जहद्द्रुहा[1]न्विसदृशे धूमध्वजे योग्यतां ज्ञात्वा स्वां निदधत्त्विषं दिनपतिर्ह्रास्यः प्रशान्त्युन्मुखः ।
दैवं वेत्ति न यः शिखी तु[2] परतो[3] नामास्तु तत्संभवाः स्युर्दीपा अपि यद्दशेन जगतस्तिग्मांशुविस्मारकाः ॥४९२॥

धिया भाग्यानुगामिन्या चेष्टमानो नयोचितम् । अभूत्सर्वस्य चक्षुष्यः स तु दुर्लभवर्धनः ॥४९३॥

प्रज्ञया द्योतमानं तं प्रज्ञादित्य इति प्रथाम् । कौवीरभाग्यस्वाम्यं च शनकैः श्वशुरोनयत् ॥४९४॥

495 पित्रोः प्रेयस्तयोद्वृत्ता[1] तारुण्यादिमदेन च । राजपुत्री यथावत्तु गणयामास नैव तम् ॥४९५॥

स्वैरिणीसंगमो भोगा युवानोग्रे पितुर्गृहम् । पत्युर्मृदुत्वमित्यस्याः किं नाभूच्छीलविघ्नकृत् ॥४९६॥

सा नित्यदर्शनाभ्यासाच्छनकैर्विशता मनः । अनङ्गलेखा खङ्खेन संप्रा[1]युज्यत मन्त्रिणा ॥४९७॥

छन्नप्रेमसुखाभ्यासनष्टह्रीभीतिसंभ्रमा । धाष्टर्यं दिनाह्निं यान्ती ततस्तन्मयतां ययौ ॥४९८॥

स मन्त्री दानमानाभ्यां वशीकृतपरिच्छदः । अन्तःपुरे यथाकामं विजहार तया सह[1] ॥४९९॥

500 उपलेभे च शनकैस्तस्यास्तं शीलविप्लवम् । विरागलिङ्गैरुद्यद्भिर्धीमान्दुर्लभवर्धनः ॥५००॥

सखीमध्ये रहः स्मेरा विवर्णा भर्तृदर्शने । अकाण्ड एव प्रोत्थाय पश्यन्ती सस्मितं पथः ॥५०१॥

पत्युः कोपे कृतावज्ञा भ्रूनेत्रचिबुकाञ्चनैः । तदप्रियं भाषमाणे सस्मितं न्यस्तलोचना ॥५०२॥

तत्तुल्यगुणनिर्विण्णा तद्विपक्षस्तुतौ रता । रिरंसां तस्य संलक्ष्य सखीभिर्बद्धसंकथा ॥५०३॥

तच्चुम्बने भुग्नकण्ठी तदाश्लेषेसहाङ्गका । तत्संभोगे त्यक्तहर्षा तत्तल्पे व्याजनिद्रिता[1] ॥५०४॥

505 भवेद्धि प्रायशो योषित्प्रेमविक्रीतचेतना । निवेदयन्ती दौःशील्यपिशाचावेशवैकृतम् ॥५०५॥ कुलकम् ॥

निगूढदारदौरात्म्यचिन्ताकृशवपुस्ततः । शुद्धान्तमविशज्जातु निशि दुर्लभवर्धनः ॥५०६॥

सोपश्यत्सुरतक्लान्तिसुलभस्वापनिःसहाम् । दुर्जार[1]भर्तुरङ्केषु प्रत्युप्तामिव वल्लभाम्[2] ॥५०७॥

श्वासैरगलितावेगैः कम्पयद्भिः कुचाङ्कुरौ । निवेदयन्तीं[1] तत्कालमेव निर्वहणं रतेः ॥५०८॥

अन्यस्यापि क्रुधो हेतुं पुनरप्यक्षमावहाम् । तां तथावस्थितां वीक्ष्य स प्रजज्वाल मन्युना ॥५०९॥

510 प्रजिहीर्षुः स रोषेण विमर्शेन निवारितः । प्रहृत्येव प्रहृत्येव निवृत्तं स्वममन्यत ॥५१०॥

ततस्तथाविधः क्षुभ्यत्प्रकोपावेशसागरः । विचारवेलया तस्य बलाच्छममनीयत ॥५११॥

नमस्तस्मै ततः कोन्यो गण्यते वशिनां धुरि । जीर्यन्ते येन पर्याप्ता ईर्ष्याविषविषूचिकाः ॥५१२॥

सोचिन्तयदहो कष्टा श्रेष्ठा[1]रागानुगा इमाः । विचारवन्ध्याः क्षिप्यन्ते क्षिप्रं याभिरधो नराः ॥५१३॥

---

४८८. [1]) $A_3$ gloss न्यूनकुलोद्भवाय दत्ता. ४८९. [1]) कृत्वा जामा supplied by $A_3$ in space left by $A_1$. ४९०. [1]) Thus corr. by $A_3$ from $A_1$ समेयुषा.—[2]) Thus corr. by $A_3$ from $A_1$ सा. ४९२. [1]) Emended; A R G जहन्म°.—[2]) Thus $A_3$; $A_1$ स.—[3]) $A_3$ gloss दूरे इत्यर्थः. ४९५. [1]) $A_3$ gloss उल्लंघितमर्यादा. ४९७. [1]) Emended; A संप्रयु°. ४९९. [1]) $A_3$ समम्. ५००. [1]) The text from मान्दुर्लभवर्धनः to the end of verse 507 below has been supplied by $A_3$, partly in space left by $A_1$, partly in margin. ५०४. [1]) Emended with Edd.; A °निद्रता. ५०७. [1]) $A_3$ दुर्जात°, with *v. l.* as above.—[2]) See note to verse 500 above. ५०८. [1]) Thus corr. by $A_3$ from $A_1$ °यन्तौ. ५१३. [1]) Thus corrected by $A_3$ from $A_1$ कष्टाः श्रेष्ठा°.

त्वीति नामेन्द्रियार्थोयमिन्द्रियार्था यथा परे । तथैव सर्वसामान्या वशिनामत्र काः क्रुधः ॥५१४॥
निसर्गतरला नारीः को नियन्त्रयितुं क्षमः । नियन्त्रणेन किं वा स्याद्यत्सतां स्मरणोचितम् ॥५१५॥ 515
यः शुनोरिव संघर्ष[1] एकार्थाभिनिविष्टयोः । रागिणोर्यदि मानः स कोवमानस्ततः परः ॥५१६॥
ममकारो मृगाक्षीषु क इवायं सचेतसाम् । स्वदेहेनुपपन्नोपि यः सोन्यत्र कथं मतः ॥५१७॥
उद्वेगोत्पादनादेषा वध्या चेत्प्रतिभाति मे । रागस्तद्विस्मृतः कस्मान्मूलमुद्वेगशाखिनः ॥५१८॥
सप्तपातालनिक्षिप्तमूलो रागमहीरुहः । भूमिभूतमनुत्पाद्य द्वेषमुन्मूल्यते कथम् ॥५१९॥
द्वेषो नामैष दुर्धर्षो जितो येन विवेकिना । क्षणार्धेनैव रागस्य तेन नामापि नाशितम् ॥५२०॥ 520
वीक्ष्यैतद्ध्रियया दृष्ट्वा रागिणां वाच्यमौषधम् । ईर्ष्या जेया ततो रागः स्वयमाशाः पलायते ॥५२१॥
इति ध्यात्वालिखद्वर्णान्खड्ग[1]स्यांशुकपल्लवे । वध्योपि न हतो यत्त्वं स्मर्तव्यं तत्त्वेत्यसौ ॥५२२॥
जनैरलक्ष्यमाणेथ याते दुर्लभवर्धने । त्यक्तनिद्रः स मन्त्री तं[1]दृष्ट्वा वर्णानवाचयत् ॥५२३॥
दाक्षिण्यात्प्राणदस्यास्य खड्गः स मनसा तदा[1] । विसस्मारानङ्गलेखां दध्यौ तु प्रत्युपक्रियाम् ॥५२४॥
तस्योपकर्तुरुचितं प्रतिकारमिच्छोश्चिन्ताविशन्न तु मनः स्मरबाणपंक्तिः ।
दृग्गोचरे परिचयप्रणयं प्रपेदे निर्निद्रता न तु कदाचन राजपुत्री ॥५२५॥ 525
भूत्वा सप्त[1]त्रिं[2]शतिमब्दान्स चतुर्भिर्मासैर्वन्ध्यां मूर्धनि रत्नं नृपतीनाम् ।
तस्मिन्काले लोकमवापोज्ज्वलकृत्यो बालादित्यो बालशशाङ्काङ्कितमौलेः ॥५२६॥
पूर्वं विपन्नतनयेभिजनस्य शेषे गोनन्दसंततिरजायत तत्र[1] शान्ते ।
प्राग्दन्तिभुग्ननलिनाथ हठप्रविष्टतोयौघपाटितबिसा नलिनीव दीना ॥५२७॥
अथ शिथिलितमुख्यामात्यवैमत्यविघ्नः कनकघटविमुक्तैः पावनं तीर्थतोयैः ।
कथमपि स[1] कृतज्ञो राजजामातुरुच्चैर्व्यधित विधिवदिष्टं मूर्ध्नि राज्याभिषेकम् ॥५२८॥
कार्कोट[1]प्रभवः प्रभुः स मुकुटप्रत्युप्तमुक्ताकणद्योतश्रेणिफणाङ्कुराङ्कितबृहद्बाहुर्महीमुद्वहन् ।
ज्ञातिप्रीतिसतोषशेषफणभृत्संफुल्लदृक्पल्लवन्यासावर्जकहाटकाब्जपटलस्रग्धामशोभोभवत् ॥५२९॥
अथ विगलिता गोनन्दोर्वीभुजोभिजनाच्छुचेरतिशुचिनि भूः कार्कोटाहेः कुले व्यधित स्थितिम् ।
चिरपरिचितात्स्वर्गाभोगाध्वनः पतनं श्रिता त्रिभुवनगुरोः शंभोर्मौलाविवामरनिम्नगा ॥५३०॥ 530

१० ॥ ५३६ ॥ आदितः ५३ ॥ ग्रं १०६९॥

इति श्रीकाश्मीरिकमहामात्यश्रीचण्पकप्रभुसूनोः कल्हणस्य कृतौ राजतरङ्गिण्यां तृतीयस्तरङ्गः ॥[1]

---

५१६. [1]) $A_3$ gloss विरोधः. ५२२. [1]) Thus corr. by $A_3$ from $A_1$ °न्खड्गस्या°. ५२३. [1]) मन्त्री त supplied by $A_3$ in space left by $A_1$. ५२४. [1]) तदा वि supplied by $A_3$ in space left by $A_1$. ५२६. [1]) Thus $A_1$; altered by $A_3$ to सप्तार्त्रि°.— [2]) $A_3$ gloss ऊनामित्यर्थः. ५२७. [1]) $A_3$ gloss तस्मिन्. ५२८. [1]) $A_3$ gloss खड्गः. ५२९. [1]) Thus corr. by $A_3$ from $A_1$ कर्कोट°. *Colophon.* [1]) $A_1$ adds here लिखितश्चैष मया राजानकरत्नकण्ठेन.

# ॥ चतुर्थस्तरङ्गः ॥

तद्वीतव्यतिरेकमद्रितनयादेहेन मिश्रीभवन्निष्प्रत्यूहमिह व्यपोहतु वपुः स्थाणोरभद्राणि वः ।
वेण्या भोगिवधूशरीरकुटिलश्यामत्विषा वेष्टिता जूटाहेरपि यत्र भाति दयितामूर्त्यैव पृक्ता तनुः ॥१॥

स महीं राजकन्यां च प्राप्तवानेकतः कुलात् । रत्नानां च सुतानां च राजाभूद्भाजनं शनैः ॥२॥

पतिगोपितदौःशील्या तुल्यसौभाग्यगौरवा । अनङ्गभवनं चक्रे विहारं नृपतिप्रिया ॥३॥

शिशुरेवायुषोल्पत्वं दैवज्ञोक्तं विचिन्तयन् । राज्ञः सुतो मल्हणाख्यो मल्हणस्वामिनं व्यधात् ॥४॥

5 पारेविशोककोटादौ प्रदत्तप्रतिपत्तिना । अदीयत द्विजेन्द्रेभ्यश्चन्द्रग्रामः क्षमाभुजा ॥५॥

श्रीनगर्यां प्रतिष्ठाप्य दुर्लभस्वामिनं हरिम् । षट्त्रिंशता स वर्षाणां क्ष्मावृषास्तमुपाययौ ॥६॥

अनङ्गदेव्यां संभूतस्तस्य दुर्लभकः सुतः । शशास वासवसमस्ततो वसुमतीं कृती ॥७॥

मातामहस्य यो मात्रा दौहित्रस्तनयीकृतः । प्रतापादित्य इत्याख्यां तत्कुलानुगुणां दधे ॥८॥

औडेनैडविडात्प्राप्तश्रिया यन्मन्त्रिणा कृताः । अग्रहारा हनुमता पुण्यानुमतसंपदा ॥९॥

10 प्रतापतापितारातिः प्रतापपुरं[1]पत्तनम् । मघवन्नगरस्पर्धि दीर्घबाहुर्व्यधत्त सः ॥१०॥

नानादिगन्तरायाततत्तत्क्रयिकसंकुले । नोणाभिधोवसत्तस्य देशे रौहीतको वणिक् ॥११॥

रौहीतदेशे जातानां निवेशायं[1] द्विजन्मनाम् । महागुणो नोणमठं पुण्यज्येष्ठं चकार सः ॥१२॥

स जातु राजभवने राज्ञा प्रीत्या निमन्त्रितः । अर्चितोभवदेकाहमुपचारैर्नृपोचितैः ॥१३॥

प्रातः सुखासिकां प्रेम्णा पृष्टोथ पृथिवीभुजा । शीर्षव्यथामकथयत्प्रजातां[1] दीपकज्जलैः ॥१४॥

15 ततः क्रमेण नृपतिस्तेन जातु कृतार्थनः[1] । वसंस्तदास्पदेद्राक्षीत्क्षपायां मणिदीपकान् ॥१५॥

विलासित्वेन लक्ष्म्या च तादृश्या तस्य विस्मितः । अथ द्वित्राण्यहान्यासीत्तत्रैव स कृतार्हणः ॥१६॥

एकदा तेन तत्कान्ता व्यलोकि ललिताकृतिः । श्रीनरेन्द्रप्रभा नाम हर्म्ये हिमकरानना ॥१७॥

उरोजपूर्णकुम्भाङ्का सदूर्वाहितविभ्रमा । मूर्तिमन्मङ्गलमिव स्मरस्य[2] च गृहस्य च ॥१८॥

हर्म्यस्य निर्जनतया स निःशङ्कविहारिणीम् । तां विलोक्यानवद्याङ्गीमभिलाषेण पस्पृशे ॥१९॥

20 सापि दर्शितमालीभिः किंचित्साचीकृतानना । अपश्यत्काश्यपीकान्तं श्रोत्रविश्रान्तया दृशा ॥२०॥

प्राग्जन्मप्रेमबन्धाद्वा निदेशाद्वा[1] मनोभुवः । सपक्षपातं सा तस्य दृष्टचैव विदधे मनः ॥२१॥

क्षणादलब्धस्पर्शोपि तां सौभाग्यसुधामयीम् । मज्जानमपि[1] संस्पृश्य स्थितामिव विवेद सः ॥२२॥

---

१०. [1]) $A_3$ gloss तापर्. १२. [1]) $A_3$ gloss स्थितये. १४. [1]) Thus corr. by $A_3$ from $A_1$ प्रजानां. १५. [1]) Thus corr. by $A_3$; $A_1$ seems to have read कृताननः. १८. [1]) $A_1$ gloss सन्तौ च तावूरू सवूरू ताभ्यां आहितो विभ्रमो यया.—[2]) व स्मरस्य supplied by $A_3$ in space left by $A_1$. २१. [1]) Thus corr. by $A_3$ from $A_1$ निर्देशाद्वा. २२. [1]) Thus corr. by later hand from $A_1$ मज्जानामपि.

हर्म्यस्तम्भच्छन्नगात्री क्षणं भूत्वा जगाम सा । व्यावर्त्य वक्त्रं पश्यन्ती पार्थिवं तं मुहुर्मुहुः ॥२३॥
गृहीतहृदयस्तन्व्यास्तावतैव महीपतिः । स चिन्ताजिह्मनयनो राजधानीं शनैर्ययौ ॥२४॥
तत्र तस्य तदाकारध्यानावहितचक्षुषः । सममन्तःपुरप्रीत्या प्रपेदे तानवं तनुः ॥२५॥
अचिन्तयत्स धिक्कष्टं रूढोयमशुभावहः । अस्मिन्मे मानसोद्याने रागनामा विषद्रुमः ॥२६॥
अहो नु सुभगा रागवृत्तिश्चित्तं विजित्य या । विवेकादीन्व्यधाद्दूरे सुहृदः परिपन्थकान् ॥२७॥
भाव्यं कौलीनभीतेन येन भूमिभृता सता । तस्य मे दुःसहः कोयं सदाचार[1]विपर्ययः ॥२८॥
यत्र दारापहरणं राजैव कुरुते विशाम् । परः को नाम तत्रास्तु शासिता[1] नीत्यतिक्रमे ॥२९॥
विमृष्यन्निति भूपालो[1] विस्मर्तुमभवत्क्षमः । न पद्धतिं साधुसेव्यां न च तां दीर्घलोचनाम् ॥३०॥
तमथ प्रथितास्वास्थ्यं नेदीयोमरणं वणिक् । स जनाज्ज्ञातवृत्तान्तः सुजनो विजनेब्रवीत् ॥३१॥
इमामवस्थां प्राप्तोसि किं धर्मेण निरुध्यसे । न प्राणसंशये जन्तोरकृत्यं नाम किंचन ॥३२॥
यन्मतानि प्रतीक्ष्यन्ते विबुधैर्धर्मसंशये । तेषामपीदृशे कृत्ये श्रूयते संयमव्ययः ॥३३॥
यशोनुरोधादुचितं[1] नापि देहमुपेक्षितुम् । स्वकीर्तिर्न परासूनां कीर्णा[2] कर्णरसायना ॥३४॥
माभून्मदनुरोधस्ते त्वत्प्रियार्थं हि पार्थिव । प्राणा अपि न मे गण्या इन्द्रियार्थेषु का कथा ॥३५॥
एवमुक्तोपि नादत्से तां चेत्तत्सा[1] सुरास्पदात्[2] । गृह्यतां नर्तकीभूत्वा नृत्तज्ञत्वान्मयार्पिता ॥३६॥
तेनेति प्रेर्यमाणः स बलिना च मनोभुवा । प्राग्लज्जामथ जग्राह कथंचित्तां सुलोचनाम् ॥३७॥
कृत्यैरुदात्तैः सापास्ततादृक्चारित्रलाघवा । नरेन्द्रमहिषी चक्रे श्रीनरेन्द्रेश्वरं हरम् ॥३८॥
क्रमेण च प्रजापुण्यैश्चन्द्रापीडाभिधं सुतम् । प्रासोष्ट पार्थिवबधूर्निधानमिव मेदिनी ॥३९॥
तस्याभिजनमालिन्यं[1] स्वच्छैरच्छेदि तद्गुणैः । शाणाश्मकषणैः[2] कार्ष्ण्यमाकरोत्थं मणेरिव ॥४०॥
धूमाद्गाढ[1]मलीमसाच्छुचि पयः सूते घनस्योद्गमो लोहस्यातिशितस्य जातिरचलात्कुण्ठाश्ममालामयात् ।
किंचात्यन्तजडाज्जलाद्युतिमतो ज्वालाध्वजस्योद्भवो[2] जन्मावन्य[3]नुकारिणो न महतां सख्यं स्वभावाः क्वचित् ॥४१॥
तारापीडोपि तनयः क्रमात्तस्यामजायत । अविमुक्तापीडनामा मुक्तापीडोपि भूपतेः ॥४२॥
वज्रादित्योदयादित्यललितादित्यसंज्ञकाः । प्रतापादित्यजाः ख्याताश्चन्द्रापीडादयोपि ते ॥४३॥
वर्षान्पञ्चाशतं भुक्त्वा भुवं दुर्लभभूपतिः । पुण्यनिःश्रेणिभिः पुण्यामारुरोह दिवं शनैः ॥४४॥
राजचूडामणिः श्रीमांश्चन्द्रापीडस्ततोभवत् । पीडितेन्दुत्विषा कीर्त्या कलेः पीडां चकार यः ॥४५॥
एकपादाकृतिर्धर्मः समस्यैवोज्झितो नृपैः । शुद्धश्लोककृता येन पादैः संयोजितस्त्रिभिः ॥४६॥
यं क्षमाविक्रममुखाः परस्परविरोधिनः । सिषेविरे गुणास्तुल्यं दिव्योद्यानमिवर्तवः ॥४७॥
स्थाने स्थाने यदीया श्रीस्तुल्यमाप्याययन्त्यभूत् । द्रुमानुद्यानकुल्येव निखिलाननुजीविनः ॥४८॥
दोषांस्त्यक्त्वान्यभूपेषु यं शुद्धा श्रीरशिश्रियत् । मार्गाद्रिष्वोघकालुष्यं क्षिप्त्वा सिन्धुरिवार्णवम् ॥४९॥

---

२८. 1) चार supplied by $A_3$ in space left by $A_1$. २९. 1) सिता supplied by $A_3$ in space left by $A_1$. ३०. 1) पालो supplied by $A_3$ in space left by $A_1$. ३४. 1) Thus corr. by $A_3$ from $A_1$ °दुरितं.—2) Thus corr. by $A_3$ from $A_1$ कीर्णक°. ३६. 1) $A_3$ तदा.—2) $A_1$ gloss देवगृहात्. ४०. 1) $A_3$ gloss कुलदोषं.—2) Thus corr. by $A_3$ from $A_1$ °ककणैः. ४१. 1) Thus corr. by $A_1$ from धूमोद्गा°.—2) Thus corr. by $A_3$ from $A_1$ °ध्वलस्यो°.—3) Thus $A_1$ with $A_3$ gloss भूमि. R G Edd. wrongly जन्मावध्य°.

50 कार्यज्ञो यो न तच्चक्रे यत्फलेभूद्विविभ्रधीः । परं समाचरं[1]स्तुल्यं स्तूयमानस्त्रपां दधे ॥५०॥
व्यनीयत न योमात्यै[1]र्विनयं तान्स्वशिक्षयत् । वज्रं न भिद्यते कैश्चिद्भि[2]नत्त्यन्यान्मणींस्तु तत् ॥५१॥
यस्या[1]धर्मभयादासीत्संत्याज्यो धर्मसंशये । निजोपि पक्षः कुलिशत्रासादिव गरुत्मतः[2] ॥५२॥
न्याय्यं दर्शयता वर्त्म तेन राज्ञा प्रवर्तिताः । स्थितयो वीतमन्देहा[1] भास्वतेव दिनक्रियाः ॥५३॥
नियन्त्रिता[1] यन्नणितिस्तद्गुणोदीरणादियम् । अतिप्रसङ्गभङ्गात्तन्नेयत्तावाप्तितः पुनः ॥५४॥
55 तस्य त्रिभुवनस्वामिप्रासादारम्भकर्मणि । चर्मकृत्कोपि न प्रादात्कुटीं क्षेत्रोपयोगिनीम् ॥५५॥
शश्वत्प्रतिश्रुतार्थानां नवकर्माधिकारिणाम् । नैसर्गिकाग्रहग्रस्तः सूत्रापातं न चक्षमे ॥५६॥
विज्ञापितोथ तैरेत्य तमर्थं पृथिवीपतिः । तानेव सागसो मेने चर्मकारं न तं पुनः ॥५७॥
सोभ्यधात्तान्धिगेतेषामप्रेक्षापूर्वकारिताम् । प्रागेव यैरपृष्ट्वा तं प्रविष्टं नवकर्मणि ॥५८॥
नियम्यतां विनिर्माणं यद्वान्यत्र विधीयताम् । परभूम्यपहारेण सुकृतं कः कलङ्कयेत् ॥५९॥
60 ये द्रष्टारः सदसतां ते धर्मविगुणाः क्रियाः । वयमेव विदध्मश्चेद्यातु न्याय्येन कोध्वना ॥६०॥
इत्युक्तवति भूपाले प्रेषितो मन्त्रिपर्षदा । पार्श्वात्पादूकृतस्तस्य दूतः प्राप्तो व्यजिज्ञपत् ॥६१॥
इच्छति स्वामिनं द्रष्टुं स च ब्रूते न चेन्मम । युक्तः प्रवेश आस्थाने बाह्यालयवसरेस्तु तत् ॥६२॥
अन्येद्युरथ भूपेन स बहिर्दत्तदर्शनः । पुण्यकर्मणि नो विघ्नः किं त्वमेवेत्यपृच्छ्यत ॥६३॥
प्रतिभाति गृहं तच्चेद्रम्यं तत्र ततोधिकम् । तदर्थ्यतां धनं वापि भूर्येवं चाभ्यधीयत ॥६४॥
65 तूष्णीं स्थितं ततो भूपं चर्मकारो व्यजिज्ञपत् । दन्तांशुसूत्रैस्तत्सत्त्वमानं ज्ञातुमिवोद्यतः ॥६५॥
राजन्विज्ञाप्यते[1] किंचिद्यदस्माभिर्यथाशयम्[2] । न स्थेयमवलिप्तेन तत्र द्रष्ट्रा सता त्वया ॥६६॥
नाहमूनः शुनो नास्ति[1] काकुत्स्थात्पार्थिवः पृथुः । क्षुभ्यन्तीवाद्य तत्सभ्याः संलापेस्मिन्किमावयोः ॥६७॥
जातस्य जन्तोः संसारे भङ्गुरः कायकञ्चुकः । अहंताममताख्याभ्यां शङ्कुभ्यामेव बध्यते ॥६८॥
कङ्कणाङ्गदहारादिशोभिष्टं भवतां यथा । निष्किंचनानामस्माकं स्वदेहेहंक्रिया तथा ॥६९॥
70 देवस्य राजधान्येषा यातुशी सौधहासिनी । कुटी घटमुखानद्धतमोरिस्तादृशी मम ॥७०॥
आ जन्मनः साक्षिणीयं तावृतेव सुखदुःखयोः । मठिका लोठ्यमानाद्य नेक्षितुं क्षम्यते मया ॥७१॥
नृणां यद्वेश्महरणे दुःखं ऽोख्यातुमीश्वरः । तद्विमानच्युतोमर्त्यो राज्यभ्रष्टोथ पार्थिवः ॥७२॥
एवमप्येत्य[1] मद्वेश्म सा चेद्देवेन[2] याच्यते । सदाचारानुरोधेन दातुं तदुचितं मम ॥७३॥
इति तेनोत्तरे दत्ते भूभृद्गत्वा तदास्पदम् । कुटीं जग्राह वित्तेन नाभिमानः शुभार्थिनाम् ॥७४॥
75 अवोचच्चर्मकारस्तं तत्र[1] स व्यञ्जिताञ्जलिः । राजन्धर्मानुरोधेन परवत्ता तवोचिता ॥७५॥
श्वविग्रहेण धर्मेण पाण्डुसूनोः पुरा यथा । धार्मिकत्वं तथा तेद्य मयास्पृश्येन[1] वीक्षितम् ॥७६॥
स्वस्ति तुभ्यं चिरं स्थेया धर्म्या वृत्तान्तपद्धतीः । दर्शयन्नीदृशीः शुद्धाः श्रद्धेया धर्मचारिणाम् ॥७७॥

---

५०. [1]) Thus $A_3$; $A_1$ °चरस्तुल्यं. ५१. [1]) Thus $A_3$; $A_1$ मान्यैर्वि°. G R Edd. follow $A_3$.—[2]) $A_3$ gloss रत्नैः. ५२. [1]) Thus corr. by $A_3$ from $A_1$ यस्य ध°.—[2]) Thus $A_3$; $A_1$ °त्मता. ५३. [1]) $A_1$ gloss मन्देहा नाम राक्षसविशेषाश्च. ५४. [1]) $A_3$ gloss अस्माभिः. ६१. [1]) $A_1$ gloss चर्मकारस्य. ६६. [1]) $A_3$ विज्ञप्यसे.—[2]) Thus corr. by $A_1$ from यथायथम. ६७. [1]) $A_3$ नासि. ७३. [1]) $A_3$ उपेत्य.—[2]) Thus corr. by later hand from $A_1$ देव न; $A_3$ gloss नृपेण. ७५. [1]) $A_3$ ततः. ७६. [1]) $A_1$ मयाऽस्पृश्येन; $A_3$ gloss अधमेन.

एवं निष्कल्मषाचारः स चक्रे पावनीं भुवम् । राजा त्रिभुवनस्वामिकेशवस्य प्रतिष्ठया ॥७८॥
कृत्यैः प्रकाशदेव्याख्या प्रकाशाकाशकान्तिभिः । प्रकाशिकाविहारस्य तत्पत्नी कारयित्र्यभूत् ॥७९॥
गुरुर्मिहिरदत्ताख्यस्तस्योदात्तगुणोभवत् । विश्वंभरस्य[1] गम्भीरस्वामिनाम्नो[2] विधायकः ॥८०॥
सर्वाधिकरणस्थैर्योच्छेत्ता छलितकाभिधः । नगराधिकृतस्तस्य छलितस्वामिनं व्यधात् ॥८१॥
कदाचन सभासीनं पृष्टा धर्माधिकारिभिः । प्रायोपविष्टा राजानं ब्राह्मणी काचिदब्रवीत् ॥८२॥
त्वयि प्रशासति महीमहो गर्हानिवर्हणे । सुखसुप्तस्य मे पत्युर्[1]हतं केनापि जीवितम् ॥८३॥
एषैव महती लज्जा सदाचारस्य भूपतेः । यदकालभवो मृत्युस्तस्य संस्पृशति प्रजाः ॥८४॥
कलिकालबलात्तं[1]चेत्त्वादृशैरपि दृश्यते । पापात्पापतरेमुष्मिन्दोषे कथमुदास्यते ॥८५॥
चिन्तयन्त्यपि नावैमि भर्तुः कंचिद्विरोधिनम् । निर्दोषस्य हि तस्यासन्सर्वतः शीतला दिशः ॥८६॥
अनसूयो निरुत्सेकः[1] प्रियवाग्गुणवत्सलः । पूर्वाभिभाषी निर्लोभो न विद्वेष्यो हि कस्यचित् ॥८७॥
तस्य तुल्यवया बाल्यात्प्रभृत्यध्ययनेधमः । माक्षिकस्वामिवास्तव्यो विप्रः शङ्क्योभिचारवित् ॥८८॥
गुणदारिद्र्यनिर्निद्रैः क्षुद्रैः कौशलशालिनाम् । प्रसिद्धिस्पर्धया वन्ध्यै[1]र्बाध्यन्तेसूययासवः ॥८९॥
नापुंश्चलेयो दुःशीलो नाद्रोहो नित्यशङ्कितः । नावाचालो मृषाभाषी नाकायस्थः कृतघ्नधीः ॥९०॥
नादातृगृहजो लुब्धो नानीर्ष्यो नित्यदुःखितः । नास्त्रीजितः सर्वहास्यो नावृद्धः स्निग्धभाषितः ॥९१॥
नानन्यजः पितृद्वेषी नारागी निरपत्रपः । नाक्षुद्रविद्यः पापीयानिति भूतार्थसंग्रहः ॥९२॥ तिलकम् ॥
इत्युक्तवत्यां ब्राह्मण्यां तच्छङ्कावसतिं द्विजम् । आनीय परिशुध्यस्वेत्यभ्यधाद्वसुधाधिपः ॥९३॥
भूयो ब्राह्मण्यवादीत्तं ख्यातः खार्खोदविद्यया । निःसंभ्रमः स्तम्भयितुं देव दिव्यक्रियामयम् ॥९४॥
म्लायद्वक्त्र इवावादीत्ततस्तां[1] मेदिनीपतिः । अदृष्टदोषे किं कुर्मो वयमत्राधिकारिणः ॥९५॥
नान्यस्मिन्नपि[1] दण्डस्य प्रसङ्गोनिश्चितागसि । किं पुनर्ब्राह्मणो दण्ड्यो यो दोषेपि[2] वधं विना ॥९६॥
उक्त्वेति विरते तस्मिन्द्विजजायाब्रवीत्पुनः । चतस्रः क्षणदाः क्षीणा राजन्ननशनस्य मे[1] ॥९७॥
नान्वगां परिणेतारं हन्तुः[1] प्रतिचिकीर्षया । तत्राविहितदण्डेस्मिंस्त्यजाम्यनशनैरसून् ॥९८॥
तथा स्थितायां ब्राह्मण्यां कृतप्रायोपवेशनः । स्वयं त्रिभुवनस्वामिपादानुद्दिश्य सोभवत् ॥९९॥
त्रिरात्रोपोषितं तत्र राजानं रजनीक्षये । स्वप्नेस्वप्नोत्तमोवोचत्सत्योक्ति सत्यवाहनः[1] । १००॥
ईदृङ्न युज्यते राजन्सत्यस्यान्वेषणं कलौ । निशीथे[1] कस्यं सामर्थ्यं कर्तुं दिवि विकर्तनम्[2] ॥१०१॥
भवच्छत्त्य[1]नुरोधेन सकृदेतत्प्रवर्त्यते । मत्प्रासादाङ्गनेमुष्मिन्शालिचूर्णं[2] विकीर्यताम् ॥१०२॥
प्रदक्षिणं कुर्वतोस्य त्रिरत्र यदि दृश्यते । ब्रह्म[1]हत्यापादमुद्रा पादमुद्रा[2]नुयायिनी ॥१०३॥

८०. [1]) $A_3$ gloss नारायणस्य.—[2]) $A_2$ gloss गम्भीरसङ्कमम्. ८३. [1]) $A_1$ *varia lectio* मत्पत्युः. ८५. [1]) $A_3$ gloss अकालमरणं. ८७. [1]) $A_3$ gloss निरहङ्कारः. ८९. [1]) $A_3$ gloss रहितैः. ९५. [1]) Thus corr. by later hand from $A_1$ तं. ९६. [1]) $A_3$ gloss शूद्रादौ.—[2]) $A_3$ gloss सति. ९७. [1]) Thus $A_3$; $A_1$ राजन्नपि न शस्यते. ९८. [1]) $A_3$ gloss हन्तरि. १००. [1]) $A_3$ glosses नारायणः and सत्यस्तु गरुडे ध्रुवे. १०१. [1]) Thus corr. by $A_3$ from $A_1$ निर्षीथे.—[2]) $A_3$ gloss सूर्यं. १०२. [1]) $A_3$ भवद्भक्त्य°.—[2]) $A_3$ gloss पिष्टम्. १०३. [1]) A later hand, not met with elsewhere, adds in margin of A the following note: ब्रह्महत्या इति । यः कश्चिद्ब्रह्महत्यां करोति तस्य ब्रह्महत्या मूर्तिमती अदृष्टा वा अनुगामिनी भवति । द्रुहिणशिरच्छेदेन महादेववत् । इत्यभिप्रायवानाह ब्रह्महत्यादि विकीर्णे शालिचूर्णे प्रासादाङ्गने त्रिः परिक्रम्य यदि ब्रह्महत्यायाः कृत्याविशेषस्य पादमुद्रा चरणस्थापनमुद्रायुगलं अस्य वधकस्य पादमुद्रानुगामिनी दृश्यते । ब्रह्महत्याचरणद्वयमुद्रा वधकद्विजपादद्वयमुद्रा च यद्यनुभवविपर्यीभवति तर्हि एष एव द्विजो वधकः तर्हि शालिचूर्णयुक्तेङ्गने पादचारोवश्यं कारयितव्यः तेनानुमानं । अनेनैव वधः कृतः यतः पादमुद्राद्वयं अधिकं जातं । एवं ब्रह्महत्याचरणमुद्रानुगच्छतीति स्वयं भगवता उपायः सूचितः.—[2]) $A_3$ gloss द्विजसंबन्धि.

तदेव वधको भूत्वा सदृशं दण्डमर्हति । रात्रावेष विधिः कार्यो दिने पापहदर्यमा ॥१०४॥

105 अथ तत्कारयित्वा स दृष्टदोषे द्विजन्मनि । दण्डं दण्डधरश्चक्रे द्विजत्वाद्वधवर्जितम् ॥१०५॥

महीमघोना भर्तृघ्ने तस्मिन्विहितशासने । ततो द्विजन्मजाया सा कृताशीरभ्यधादिदम् ॥१०६॥

इयत्यवनिभृत्सर्गे गूढपापानुशासनम् । कार्तवीर्यस्य वा दृष्टं त्वत्र वा पृथिवीपते ॥१०७॥

दण्डधारे त्वयि क्ष्माप क्षितिमेतां प्रशासति । को वैरस्नेहयोः पारमनासाद्यावसीदति ॥१०८॥

इत्थं कृतयुगध्येयैर्धर्म्यवृत्तान्तवस्तुभिः । स्वल्पोऽपि राज्यकालोऽस्य पर्याप्तैः पर्यपूर्यत ॥१०९॥

110 स्रष्टुर्विष्टरपाथोजसंसर्गेण निरर्गलः । निबिडं जडिमा जाने व्यधत्त धियि संनिधिम् ॥११०॥

विभक्तवर्णशोभस्य तस्यासावन्यथा[1] कथम् । माहेन्द्रस्येव धनुषो विदधे दृष्टनष्टताम्[2] ॥१११॥

कारयित्वाभिचारं तं निग्रहोग्ररुषं द्विजम् । तं यशःशेषतामीशं तारापीडोऽनुजोऽनयत् ॥११२॥

दुष्कर्मदुर्भगान्भोगान्भोक्तुं पापा गुणोन्नतम् । मृद्नन्ति कण्टकान्प्राप्तुं करभा इव केतकम् ॥११३॥

ततः प्रभृति भूपानां राज्येच्छूनां गुरून्प्रति । दुष्टाः प्रवृत्ता राज्येऽस्मिन्नभिचारादिकाः क्रियाः ॥११४॥

115 श्रीचन्द्रापीडदेवस्य तत्क्षमित्वमपश्चिमम् । संस्मर्यमाणं कुरुते न कस्योत्पुलकं वपुः ॥११५॥

मुमूर्षुर्यत्स लब्ध्वापि तं कृत्या[1]धायिनं द्विजम् । वराकेऽन्यप्रयुक्तेऽस्मिन्को दोष इति नावधीत् ॥११६॥

विस्मृतः स कृतक्ष्माभृत्पङ्क्तिमध्येऽ[1]पि वेधसा । दत्त्वा काकपदं[2] नूनं न्यस्तः कलिनृपावलौ ॥११७॥

अष्टौ वर्षान्साष्टमासाननुगृह्येति मेदिनीम् । प्रविवेश वशी स्वर्गमनिशं[1] च सतां मनः ॥११८॥

भ्रातृद्रोहात्सुहृदां[1] प्रतापेन भयावहः । उवाह[2] तारापीडः स चण्डः क्ष्मामण्डलं[3] ततः ॥११९॥

120 पूर्णपात्रप्रतिभटं[1] द्विषां लुण्टयता यशः । शिशोः प्रतापस्योत्पत्तौ कबन्धा येन नर्तिताः ॥१२०॥

तस्यातिदुष्टचेष्टस्य लक्ष्मीर्दीप्तापि सर्वतः । अभूदुद्वेगजननी श्मशानाग्नेरिव द्युतिः ॥१२१॥

मन्त्रैः प्रभावसांनिध्यं देवानां क्रियते द्विजैः । मत्वेति देवद्वेषी स द्विजानां दण्डमत्यजत्[1] ॥१२२॥

मासं[1] षड्भिर्दिनैरूनं चतस्रश्च समा भुवि । स प्राभवद्गुरुद्रोहप्ररोहत्पुण्यकृतात्ययः[2] ॥१२३॥

अथ गूढाभि[1]चारेण विहितायुःक्षयो द्विजैः । स भ्रातुः सदृशीं शान्तिं प्रपेदे न पुनर्गतिम् ॥१२४॥

योऽयं परापकरणाय सृजत्युपायं तेनैव तस्य नियमेन भवेद्विनाशः ।

125 धूमं प्रसौति नयनान्ध्यकरं यम[1]ग्निर्भूत्वाम्बुदः स शमयेत्सलिलैस्तमेव ॥१२५॥

राजा श्रीललितादित्यः सार्वभौमस्ततोऽभवत् । प्रादेशिकेश्वरस्रष्टुर्विधेर्बुद्धेरगोचरः ॥१२६॥

प्रतापांशुच्छटाकूटैः पटवाससधर्मभिः । जम्बुद्वीपद्विपेन्द्रस्य येनातन्यत मण्डनम् ॥१२७॥

नयाञ्जलिषु बद्धेषु राजभिर्विजयोद्यमे । पार्थिवः पृथुविक्रान्तिर्युधि क्रोधं मुमोच यः ॥१२८॥

विनिःसरज्जनतया भयाद्गर्भानिवामुचन् । द्विषां वसतयो यस्य निशम्यास्कन्ददुन्दुभिम् ॥१२९॥

---

१११. [1]) $A_3$ gloss ब्रह्मा जाड्यं विना.—[2]) $A_3$ gloss आदौ दृष्टः पश्चान्नष्टः. ११६. [1]) $A_3$ gloss उच्चाटना. ११७. [1]) $A_3$ gloss चन्द्रापीडः कृतयुगराजपङ्क्तिमध्ये.—[2]) $A_3$ gloss काकपदं काव[च्छे]दो । इति भाषया लिपिर्यथा +. ११८. [1]) $A_3$ स्वर्गं विषदं (*विषादं). ११९. [1]) $A_3$ भ्रातृद्रोहासुसुहृदा.—[2]) Thus corr. by $A_3$ from $A_1$ उवाच.—[3]) Thus $A_1$; $A_3$ मण्डलीं. १२०. [1]) $A_3$ gloss सदृशं. १२२. [1]) $A_3$ gloss अक्षिपदित्यर्थः. १२३. [1]) Thus corr. by $A_3$ from $A_1$ मासैः.—[2]) $A_3$ gloss पुण्यनाशः. १२४. [1]) The text from here to नयनान्ध्यकरं यम in following verse has been supplied by $A_3$ in space left by $A_1$. १२५. [1]) See note to preceding verse.

विलोलतिलकान्तैर्यः सनेत्राम्भोभिराननैः । निवापाञ्जलिदानानि द्विषां नारीरकारयत्[1] ॥१३०॥
क्षितिं प्रदक्षिणयतो रवेरिव महीपतेः । जिगीषोः प्रायशस्तस्य यात्रास्वेव वयो ययौ ॥१३१॥
करं पूर्वदिशो गृह्णन्प्रतापानलसंनिधौ । अन्तर्वेद्यां[1] महाराजः स्वकीर्त्युष्णीषभृद्बभौ ॥१३२॥
कन्यानां यत्र कुब्जत्वं व्यधाद्गाधिपुरे मरुत् । तत्रैव शंसनीयः स पुंसां चक्रे भयस्पृशाम्[1] ॥१३३॥
यशोवर्माद्रिवाहिन्याः क्षणात्कुर्वन्विशोषणम् । नृपतिर्ललितादित्यः प्रतापादित्यतां[1] ययौ ॥१३४॥
मतिमान्कन्यकुब्जेन्द्रः प्रत्यभात्कृत्यवेदिनाम् । दीप्तं यल्ललितादित्यं पृष्ठं दत्त्वा न्यषेवत ॥१३५॥
तत्सहायास्ततोऽप्यासन्निकाममभिमानिनः । कुसुमाकरतोऽप्युच्चैः सुरभिश्चन्दनानिलः ॥१३६॥
श्रीयशोवर्मणः संधौ सांधिविग्रहिको न यत् । नयं नियमनालेखे मित्रशर्मास्य चक्षमे ॥१३७॥
सोऽभूत्संधिर्यशोवर्मललितादित्ययोरिति । लिखितेनादिनिर्देशादनर्हत्वं विदन्प्रभोः ॥१३८॥ युगलकम्[2] ॥
सुदीर्घविग्रहाशान्तैः सेनानीभिरसूयित्वम्[1] । औचित्यापेक्षतां[2] तस्य क्षितिभृद्बद्धमन्यत ॥१३९॥
[1]प्रीतः पञ्चमहाशब्दभाजनं तं व्यधत्त सः । यशोवर्मनृपं तं तु समूलमुदपाटयत् ॥१४०॥
अष्टादशानामुपरि प्राक्सिद्धानां तदुद्भवैः । कर्मस्थानैः स्थितिः प्राप्ता ततः प्रभृति पञ्चभिः ॥१४१॥
महाप्रतीहारपीडा[1] स महासंधिविग्रहः । महाश्वशालापि महाभाण्डागारश्च पञ्चमः ॥१४२॥
महासाधनभागश्चेत्येता यैरभिधाः श्रिताः । शाहिमुख्या येष्वभवन्नध्यक्षाः पृथिवीभुजः ॥१४३॥
कविर्वाक्पतिराजश्रीभवभूत्यादिसेवितः । जितो ययौ यशोवर्मा तद्गुणस्तुतिवन्दिताम् ॥१४४॥
किमन्यत्कन्य[1]कुब्जोर्वी यमुनापारतोऽस्य सा[2] । अभूदाकालि[3]कातीरं[2] गृहप्राङ्गनवद्वशे ॥१४५॥
यशोवर्माणमुल्लङ्घ्य हिमाद्रिमिव जाह्नवी । सुखेन प्राविशत्तस्य वाहिनी पूर्वसागरम् ॥१४६॥
पश्यद्भिर्जन्मवसुधां[1] सेर्ष्याधोरणभर्त्सितैः । तन्मातङ्गैः कलिङ्गेभ्यः[1] कथंचित्प्रस्थितं पथि ॥१४७॥
आकृष्टलक्ष्मीपर्यङ्कदन्तिसख्यादिवागताः । अशिश्रियंस्तं निःशेषा दन्तिनो गौडमण्डलात् ॥१४८॥
कटकेभघटाहस्तकृतवीचिकचग्रहः । अदृश्यतामगैस्तस्य गृहीतः पूर्ववारिधिः ॥१४९॥
वनराजिश्यामलेन दिशं वैवस्वताङ्किताम्[1] । स प्रतस्थेऽब्धितीरेण तत्कृपाणेन[2] तु द्विषः ॥१५०॥
तस्योर्ध्वजूटाः कर्णाटाः कृतप्रणतयोऽनयन् । सुवर्णकेतकीस्त्यक्त्वा प्रतापमवतंसताम् ॥१५१॥
तस्मिन्प्रसङ्गे रट्टाख्या[1] कर्णाटी चटुलेक्षणा । अपासीन्नृपतिर्भूत्वा पृथुश्रीर्दक्षि[2]णापथम् ॥१५२॥
विन्ध्याद्रिमार्गाः पर्याप्ता निष्पर्यन्तप्रभावया । दुर्गयेव तया देव्या कृता निहतकण्टकाः ॥१५३॥
ललितादित्यपादाब्जनखदर्पणमण्डले । स्वमूर्तिं वीक्ष्य संक्रान्तां प्रणता सापि पिप्रिये ॥१५४॥

---

१३०. [1]) Thus corr. by $A_3$ from $A_1$ °कारयन्. १३२. [1]) $A_3$ gloss प्रयागेरो गङ्गायमुनयोरन्तरालभूमिरन्तर्वेदी. १३३. [1]) $A_3$ gloss कुब्जत्वं. १३४. [1]) $A_3$ प्रलयादित्यतां. १३८. [1]) $A_3$ gloss सः मित्रशर्मा.—[2]) युगलकम् added by $A_3$. १३९. [1]) Thus corr. by later hand from $A_1$ °तम्.—[2]) Thus A G R; Edd. °पेक्षितां. १४०. [1]) $A_1$ has left before this verse a blank space for four lines, writing in the middle न किंचित्पतितम्. १४२. [1]) Thus A G R: perhaps to be emended to °पीडं. Cf. महाप्रतीहारपीडाधिकारं iv. 485. १४५ [1]) Thus corr. by later hand from $A_1$ कान्य°.—[2]) तोऽस्य ..ा and कातीरं supplied by $A_3$ in spaces left by $A_1$.—[3]) Thus $A_3$; $A_1$ अभूद्दशालि°, altered by later hand to अभूद्दशालि°. १४७. [1])–[1]) These words have been written twice by $A_1$, at the end of fol. 62 (here struck out again) and at the head of fol. 63. १५०. [1]) [2]) $A_1$ gives the notes यमचिह्नितां दक्षिणां दिशं and तस्य राज्ञः कृपाणेन खड्गेन तु पुनर्द्विषो रिपवो वैवस्वताङ्कां दिशं प्रतस्थिरे इत्यर्थः. १५२. [1]) ट्टा supplied by $A_3$ in space left by $A_1$.—[2]) $A_1$ पृथुश्रीदक्षि°, corr. by later hand into °श्रीः.

155 तालीतरुतलाचान्तनारिकेरसुरोर्मयः[1] । कावेरीतीरपवनैस्तद्योधाः क्लममत्यजन् ॥१५५॥

चन्दनाद्रिस्[1]तदास्कन्दत्[2]त्रासभ्रश्यदहिच्छलात् । श्रीखण्डद्रुमदोःषण्डान्[3]मण्डलाग्रा[4] इवापतन् ॥१५६॥

उत्तराश्मस्विव[1] पदं क्षिप्त्वा द्वीपेष्वविघ्नतः । स कुल्याया इवाम्भोधेः क्षिप्रं चक्रे गतागतम् ॥१५७॥

ततोऽब्धिवीचिनिर्घोषैरुद्गीतजयमङ्गलः । प्रतस्थे पश्चिमामाशां जिगीषूणामपश्चिमः ॥१५८॥

आक्रम्य क्रमुकान्सप्त[1] कौङ्कणान्सप्त तापयन् । तुरगानिव तिग्मांशोः[2] प्रतापस्तस्य पप्रथे ॥१५९॥

160 पश्चिमाब्धेर्मरुद्व्यस्तवीचेराविर्भवन्त्यभूत् । द्वारका तस्य सैन्यानां प्रवेशौत्सुक्यदायिनी ॥१६०॥

विन्ध्याद्रिस्तद्बलक्षुण्णधातुरेण्वावृताम्बरः[1] । प्रत्यभात्त्यक्तमर्यादः कोपताम्र इवोन्नमन् ॥१६१॥

विशतां दशनश्रेण्यस्तस्यावन्तिषु दन्तिनाम् । महाकालकिरीटेन्दुज्योत्स्नया खण्डिताः परम् ॥१६२॥

सर्वतोदिक्कमालोक्य जितप्रायांस्ततो नृपान् । स प्राविशत्सुविस्तीर्णमपथेनोत्तरापथम् ॥१६३॥

राजभिस्तस्य तत्रोग्रैः संग्रामोऽभूत्पदे पदे । कुलाद्रिभिरिवेन्द्रस्य पक्षच्छेदोद्यमस्पृशः ॥१६४॥

165 काम्बोजानां वाजिशाला जायन्ते स्म हयोज्झिताः । ध्वान्तच्छलात्तद्द्विरदैर्निरुद्धा महिषैरिव ॥१६५॥

तुःखाराः[1] शिखरश्रेणीर्यान्तः संत्यज्य वाजिनः । कुण्ठभावं[2] तदुत्कण्ठां निन्युर्दृष्ट्वा हयाननान्[3] ॥१६६॥

त्रीन्वारान्समरे जित्वा जितं मेने स मुम्मुनिम्[1] । सकृज्जयमरेर्वीरा मन्यन्ते हि घुणाक्षरम् ॥१६७॥

चिन्ता न दृष्टा भौट्टानां[1] वक्त्रे प्रकृतिपाण्डुरे । वनौकसामिव[2] क्रोधः स्वभावकपिले मुखे ॥१६८॥

तस्य प्रतापो दरदां न सेहेनारतं मधु । दरीणामोषधिज्योतिः प्रत्यूषार्क इवोदितः ॥१६९॥

170 कस्तूरीमृगसंस्पर्शी धूतकुङ्कुमकेसरः । सैन्यसीमन्तिनीस्तस्य संचस्कारोत्तरानिलः ॥१७०॥

शून्ये प्राग्ज्योतिषपुरे निर्जिहानं ददर्श सः । धूपधूमं वनप्लुष्टात्कालागुरुवनात्परम् ॥१७१॥

मरीचिकावितीर्णार्णोविभ्रमे वालुकाम्बुधौ । तद्गजेन्द्रा महाग्राहसमूहसमतां ययुः ॥१७२॥

तद्योधान्विगलद्धैर्यान्स्त्रीराज्ये स्त्रीजनोऽकरोत् । तुङ्गौ स्तनौ पुरस्कृत्य न तु कुम्भौ कवाटिनाम् ॥१७३॥

स्त्रीराज्यदेव्यास्तस्याग्रे वीक्ष्य कम्पादिविक्रियाम् । संत्रासमभिलाषं वा निश्चिकाय न कश्चन ॥१७४॥

175 उत्तराः कुरवोऽविक्षंस्तद्भयाज्जन्मपादपान् । उरगान्तकसंत्रासाद्बिलानीव महोरगाः ॥१७५॥

जयार्जितधनः सोऽथ प्रविवेश स्वमण्डलम् । भिन्नेभमौक्तिकापूर्णपाणिः सिंह इवाचलम् ॥१७६॥

जालंधरं लोहरं च मण्डलानीतराणि च । प्रसादीकृत्य विदधे राजत्वं सोऽनुजीविनाम् ॥१७७॥

पराजयव्यञ्जनार्थं नाना लिङ्गानि पार्थिवाः । उग्रेण ग्राहितास्तेन वहन्त्यद्यापि निर्मदाः ॥१७८॥

बन्धमुद्राभिधानाय पश्चाद्बाहू तदाज्ञया । तुरुष्का दधते व्यक्तं मूर्धानं चार्धमुण्डितम् ॥१७९॥

180 क्षितिभृद्दाक्षिणात्यानां तिर्यक्त्वज्ञापनाय सः । पुच्छं महीतलस्पर्शि चक्रे कौपीनवाससि ॥१८०॥

न तत्पुरं न स ग्रामो न सा सिन्धुर्न सोऽर्णवः । न स द्वीपोऽस्ति यत्रासौ प्रतिष्ठां न विनिर्ममे ॥१८१॥

---

१५५. [1]) Thus $A_3$; $A_1$ °रसोर्मयः. १५६. [1]) $A_3$ gloss मलयात्.—[2]) $A_3$ gloss प्रसभमवमर्दनमास्कन्दः.—[3]) $A_3$ gloss श्रीखण्डद्रुमाः चन्दनवृक्षा एव दोष्षण्डाः भुजसमूहा यस्य सः तथाविधात्.—[4]) $A_3$ gloss खड्गाः. १५७. [1]) $A_2$ gloss उत्तरणार्थं अश्मानः उत्तराश्मानः ये कुल्यायां मध्ये भवन्ति; to this gloss $A_3$ has added उटवटपल इति भाषया. १५९. [1]) Thus $A_1$; $A_3$ क्रमुकश्यामान्कौ°.—[2]) Thus $A_3$; $A_1$ तिग्मांशुः. १६१. [1]) Thus corr. by $A_3$ from $A_1$ °रेणुवृता°. १६६. [1]) $A_1$ तु × खाराः; $A_3$ G R तुखाराः.—[2]) Thus corr. by later hand from $A_1$ °भावां.—[3]) Thus $A_3$; $A_1$ °ननाम्. १६७. [1]) Thus A; misread दुस्सनिम् in G R and Edd. $A_4$ gloss मुमेन खान्. Cf. iii. 332; v. 516; viii. 2180 (*C*). १६८. [1]) Thus $A_1$; corr. by later hand into भोट्टानां.—[2]) $A_3$ gloss वानराणां.

क्वचिच्चेष्टासमुचितं क्वचिच्च समयानुगम् । बाहुल्येन प्रतिष्टानां स मानी[1] नाम संदधे ॥१८२॥
सुनिश्चितपुरं चक्रे दिग्जये कृतनिश्चयः । सगर्वो[1] दर्पितपुरं कृतवान्[2]कृतकेशवम् ॥१८३॥
फलं गृह्णन्फलपुरं पर्णोत्सं पर्णमाददत् । क्रीडारामविहारं[1] च क्रीडन्राजा विनिर्ममे ॥१८४॥
एकमूर्ध्वं नयद्रत्नमधः कर्षत्तथापरम् । बद्ध्वा[1] व्यधान्निरालम्बं स्त्रीराज्ये नृहरिं च सः ॥१८५॥ 185
दिगन्तरस्थे भूपाले तस्मिंस्तत्कर्मकृ[1]त्किल । पुरं विधाय तन्नाम्ना तत्को[2]पफलमन्व[2]भूत् ॥१८६॥
ललिताख्ये[1] पुरे तस्मिन्नादित्याय स भूपतिः । सग्रामां कन्यकुब्जोर्वीमभिमानोर्जितो ददौ ॥१८७॥
तेन हुष्कपुरे श्रीमान्मुक्तस्वामी व्यधीयत । बृहद्विहारो भूपेन सस्तूपश्च महात्मना ॥१८८॥
एकां कोटिं गृहीत्वा स दिग्जयाय विनिर्गतः । भूतेशाय ददौ शुद्ध्यै कोटीरेकादशागतः ॥१८९॥
स तत्र ज्येष्ठरुद्रस्य शिलाप्रासादयोजनम् । भूमिग्राम[1]प्रदानं च विदधे वसुधाधिपः ॥१९०॥ 190
चक्रे चक्रधरे[1] तेन वितस्ताम्भःप्रतारणम् । विनिर्मायारघट्टालीस्तांस्तान्ग्रामान्प्रयच्छता ॥१९१॥
सोऽखण्डिताश्मप्राकारं प्रासादान्तर्व्यधत्त च । मार्तण्डस्याद्भुतं दाता द्राक्षास्फीतं च पत्तनम् ॥१९२॥
लोकपुण्ये पुरं[1] कृत्वा नानोपकरणावलीम् । प्रतिपादितवाञ्जिष्णुर्ग्रामैः[2] साकं स विष्णवे ॥१९३॥
ततः परं[1] परीहासशीलो भूलोकवासवः । विहसद्वासवावासं परिहासपुरं[2] व्यधात् ॥१९४॥
विरेजे राजतो देवः श्रीपरीहासकेशवः । लिप्तो रत्नाकरस्वापे मुक्ताज्योतिर्भरैरिव ॥१९५॥ 195
नाभीनलिनकिञ्जल्कपुञ्जेनेवानुरञ्जितः । अचका[1]त्काञ्चनमयः श्रीमुक्ताकेशवो हरिः ॥१९६॥
महावराहः शुशुभे काञ्चनं कवचं दधत् । पाताले तिमिरं हन्तुं[1] वहन्निव रविः[2] प्रभाः ॥१९७॥
गोवर्धनधरो देवो राजतस्तेन कारितः । यो गोकुलपयःपूरैरिव पाण्डुरतां दधे ॥१९८॥
चतुष्पञ्चाशतं हस्तान्[1]रोपयित्वा महाशिलाम् । ध्वजाग्रे दितिजारातेस्तार्क्ष्यस्तेन निवेशितः ॥१९९॥
चक्रे बृहच्चतुःशालाबृहच्चैत्यबृहज्जिनैः । राजा राजविहारं स विरजाः सततोर्जितम् ॥२००॥ 200
तोलकानां सहस्राणि [1]चतुर्भिरधिकानि सः । अशीतिं निदधे हेम्नो मुक्ताकेशवविग्रहे ॥२०१॥
तावन्त्येव सहस्राणि पलानां रजतस्य च । संधाय शुद्धधीश्चक्रे श्रीपरीहासकेशवम् ॥२०२॥
रीतिप्रस्थसहस्रैस्तु तेन तावद्भिरेव सः । व्योमव्यापिवपुः श्रीमान्बृहद्बुद्धो व्यधीयत ॥२०३॥
चतुःशालां च चैत्यं च तावता तावता व्यधात् । धनेनैवेति तस्यासन्पञ्च निर्मितयः समाः ॥२०४॥
राजतान्क्वापि सौवर्णान्क्वापि देवान्विनिर्ममे । पार्श्वेषु मुख्यदेवानां पार्षदो[1] धनदोपमः ॥२०५॥ 205
कियन्ति तत्र रत्नानि ग्रामान्परिकरां[1]स्तथा । स प्रादादिति कः शक्तः परिच्छेत्तुमियत्तया ॥२०६॥
अवरोधैरमात्यैश्च सेवकैश्च नरेश्वरैः । तत्र प्रतिष्ठाः शतशो विहिता भुवनाद्भुताः ॥२०७॥

---

१८२. [1]) Thus corr. by $A_3$ from $A_1$ मुनी. १८३. [1]) $A_3$ सदर्पो.—[2]) $A_3$ कृतधीः. १८४. [1]) $A_3$ क्रीडाराजवि°. १८५. [1]) Thus corr. by $A_3$ from $A_1$ बुद्धा. १८६. [1]) $A_4$ पुरनिर्माणाधिकारी.—[2]) त्को and न्व supplied by $A_3$. १८७. [1]) $A_2$ gloss लितपुर. १९०. [1]) Thus corr. by later hand from $A_1$ भूमिग्रामे. १९१. [1]) Thus $A_3$; $A_1$ °धरस्तेन. १९३. [1]) Thus corr. by $A_3$ from $A_1$ पुरे.—[2]) Thus $A_3$; $A_1$ जिष्णुग्रामैः. १९४. [1]) Thus corr. by later hand from $A_1$ °पारं.—[2]) Over हासपुरं $A_2$ has written सपुर (for परिसपुर). १९६. [1]) $A_3$ अकाचत्, with gloss काच दीप्तिबन्धनयोः. १९७. [1]) Thus corr. by $A_3$ from $A_1$ हर्तुं.—[2]) Thus G *sec. manu*; A रविप्रभाः. १९९. [1]) Thus corr. by later hand from $A_1$ हस्ताद्रो°. २०१. [1]) The words from चतुर्भिर° to सहस्राणि in the following verse have been omitted by $A_1$ and supplied by $A_3$ in margin. २०५. [1]) Thus $A_1$; $A_3$ पार्थिवो. २०६. [1]) Thus $A_3$; $A_1$ °करं तथा.

राज्ञी कमलवत्यस्य कमलाहट्टकारिणी । राजतं विपुलाकारं कमलाकेशवं व्यधात् ॥२०८॥
अमात्यो मित्रशर्मापि चक्रे मित्रेश्वरं हरम् । श्रीकय्यस्वामिनं चक्रे लाटः कय्याभिधो नृपः ॥२०९॥
210 श्रीमान्कय्यविहारोपि तेनैव विदधेद्भुतः । भिक्षुः सर्वज्ञमित्रोभूत्क्रमाद्यत्र जिनोपमः ॥२१०॥
तुःखारश्चङ्कुणश्चक्रे स चङ्कुणविहारकृत् । भूपचित्तोन्नतं स्तूपं जिनान्हेममयांस्तथा ॥२११॥
ईशानदेव्या तत्पत्न्या खाताम्बु प्रतिपादितम् । सुधारसमिव स्वच्छमारोग्याधायि रोगिणाम् ॥२१२॥
ललितादित्यभूभर्तुर्वल्लभा चक्रमर्दिका । सहस्राण्योकसां सप्त तत्र चक्रपुरं व्यधात् ॥२१३॥
आचार्यो भप्पटो नाम विदधे भप्पटेश्वरम् । अन्येपि रक्कटेशाद्या बहवो बहुभिः कृताः ॥२१४॥
215 अधिष्ठानान्तरेप्यत्र चङ्कुणेनाग्र्यमन्त्रिणा । सचैत्यः सुकृतोदारो विहारो निरमीयत ॥ २१५॥
भिषगीशानचन्द्राख्यः स्यालश्चङ्कुणमन्त्रिणः । विहारमकरोल्लब्ध्वा तक्षकानुग्रहाच्छ्रियम् ॥ २१६॥
एवं हेममयीमुर्वीं स कुर्वन्नुर्वरापतिः । गुणैरौदार्यशौर्याद्यैर्मेघवाहनमलङ्घयत् ॥२१७॥
हेलयापि विनिर्यान्ती वक्त्राद्वसुमतीपतेः । न कदाचन तस्याज्ञा देवैरप्युदलङ्घ्यत ॥२१८॥
तथाहि पूर्वपायोधेस्तटे सकटको वसन् । आनीयन्तां कपित्थानीत्यादिदेश स जातु चित् ॥२१९॥
220 किंकर्तव्यतयान्धेषु पुरोगेषु स्थितेष्वथ । उपानयत्कपित्थानि दिव्यः कोपि पुमान्पुरः ॥२२०॥
अग्राद्युपायनं गृह्णन्कृतसंज्ञो भुवा प्रभोः । कस्य त्वमिति पप्रच्छ प्रतीहारः प्रसृत्य तम् ॥२२१॥
सौम्यधात्तं कपित्थानि दत्त्वा राज्ञः प्रियाण्यहम् । प्रहितोद्य महेन्द्रेण नन्दनोद्यानपालकः ॥२२२॥
रहो महेन्द्रसंदिष्टं वक्तव्यं किंचिदस्ति मे । इति श्रुत्वा प्रतीहारः सभां चक्रे स निर्जनाम् ॥२२३॥
ततो दिव्यः पुमानूचे शक्रस्त्वां वक्ति भूपते । क्षन्तव्यं पथ्यमप्येतत्सौजन्यान्निष्ठुरं वचः ॥२२४॥
225 तुर्ये युगेपि भूपाल दिक्पाला अपि ते वयम् । बिभृमो यत्प्रणम्याज्ञां श्रूयतां तत्र कारणम् ॥२२५॥
पुरा ग्रामगृहस्थस्य कस्यचित्पृथुसंपदः । जन्मान्तरे कर्मकरो हालिकोभूद्भवान्किल ॥२२६॥
एकदा तस्य ते ग्रीष्मे वाहयित्वा महावृषान् । श्रान्तस्य निर्जलेरण्ये क्षीणप्रायमभूदहः ॥२२७॥
ततः स्वामिगृहात्क्षुत्तृट्खिन्नस्य भवतोन्तिकम् । वारिकुम्भीमपूपं च गृहीत्वा कश्चिदाययौ ॥२२८॥
निर्धौतपाणिपादस्त्वं भोक्तुं संप्रस्तुतस्ततः । विप्रं कण्ठगतप्राणमपश्यः पुरतोतिथिम् ॥२२९॥
230 स त्वामवोचन्मा भुङ्क्ष्व दुर्भिक्षोपहतस्य मे । कण्ठे यियासवः प्राणा वर्तन्ते भोजनं विना ॥२३०॥
वारितः पार्श्वगेनापि तस्मै त्वं प्रीतिपूर्वकम् । पूपार्धं वारिकुम्भीं च प्रादाः प्रियमुदीरयन् ॥२३१॥
पात्रे प्रसन्नचित्तस्य काले दानेन तेन ते । अखण्डितानामाज्ञानां शतमासीत्त्रिविष्टपे ॥२३२॥
तेन वारिप्रदानेन वाञ्छामात्रेपि दर्शिते । प्रादुर्भवन्ति सुस्वादा नद्यो मरुपथेष्वपि ॥२३३॥
सत्क्षेत्रप्रतिपादितः प्रियवचोबद्धालवालावलिर्निर्दोषेण मनःप्रसादपयसा निष्पन्नसेकक्रियः ।
दातुस्तत्तदभीप्सितं किल फलन्कालेतिबालोप्यसौ राजन्दानमहीरुहो विजयते कल्पद्रुमादीनपि ॥२३४॥

---

२०८. [1]) Thus $A_2$; $A_3$ कमलदेव्य°. २११. [1]) $A_1$ तु×खार°. २१२. [1]) Thus corr. by $A_3$ from $A_1$ सुधासरसमिव. २१३. [1]) Thus $A_3$; $A_1$ वल्लभादित्य°. G R copy both readings, Edd. follow $A_3$. २१४. [1]) Emended with Edd.; A भपटो.—[2]) Thus $A_1$; $A_3$ कर्कटेशा°. २१७. [1]) Thus corr. by $A_3$ from $A_1$ उर्वरी°. २२०. [1]) $A_1$; $A_3$ °यार्तेषु.—[2]) Thus corr. by $A_3$ from $A_1$ °नयन्कापि°. २२१. [1]) $A_4$ gloss राज्ञोग्रे इत्यर्थः. २२६. [1]) Thus corr. by later hand from $A_1$ ग्रामे. २३०. [1]) Thus $A_3$; $A_1$ भुङ्क्ता (for भुङ्क्था?). २३४. [1]) $A_3$ °प्रतिरोपितः.—[2]) $A_3$ वेत्ति तत्तदभीप्सितं किल फलं काले इत्यन्यादर्शे.

अल्पावशेषास्तास्त्वद्य सन्त्याज्ञास्तव भूपते । वचोलङ्घं क्षपयतो यत्र तत्राविचारतः ॥२३५॥ 235

अपि चेतरभूपाल[1]सुलभं महतः सतः । कस्माद्विचारशून्यत्वं तवापि हृदि रोहति ॥२३६॥

दिनानि कतिचिद्यानि कश्मीरेषु घनागमे । जायन्ते तानि पूर्वाब्धौ फलानि शिशिरे कुतः ॥२३७॥

विगाहसे दिशं यां यां तत्र तत्रैव तत्पतेः[1] । त्वदाज्ञाग्रहणे यत्नः पूर्वदानप्रभावतः ॥२३८॥

आशां श्रितस्य माहेन्द्रीमाज्ञा स्वल्पापि तेधुना । गृहीता कथमप्येषा शक्रेणाभग्नशक्तिना ॥२३९॥

विना प्रयोजनं मुख्यं तस्मादाज्ञास्त्वया[1] क्वचित् । नैवमेव पुनर्देया विरलाः सन्ति ता यतः ॥२४०॥ 240

इत्युक्त्वान्तर्हिते तस्मिन्भूपालो विपुलाशयः । चिन्तयन्दानमाहात्म्यं परं विस्मयमाययौ ॥२४१॥

ततः प्रभृति तादृक्षयोग्यार्थप्राप्तिलालसः । परिहासपुरे चक्रे स्थिरां गुर्वीं स पार्थिवीम् ॥२४२॥

सहस्रभक्तमित्येवं प्रख्यातायां सदक्षिणम् । लक्षमेकोत्तरं भक्तपात्राणां यत्र दीयते ॥२४३॥

अभिप्रायेण तेनैव पत्तनान्यूषरेषु सः । चक्रे यद्येषु तृष्णार्तः कश्चिज्जातु पिबेदपः ॥२४४॥

संजग्राह स देशेभ्यस्तांस्तानन्तरविन्नरान् । विकचान्सुमनःस्तोमान्पादपेभ्य इवानिलः ॥२४५॥ 245

तेन कङ्कणवर्षस्य रससिद्धस्य सोदरः । चङ्कुणो नाम भुःखार[1]देशान्नीतो[2] गुणोन्नतः ॥२४६॥

स रसेन समातन्वन्कोशे बहुसुवर्णताम् । पद्माकर इवाब्जस्य भूभृतोभूच्छुभावहः ॥२४७॥

रुद्धः पञ्चनदे जातु दुस्तरैः सिन्धुसंगमैः । तटे स्तम्भित[1]सैन्योभूद्राजा चिन्तापरः क्षणम् ॥२४८॥

ततोम्बुतरणोपायं तस्मिन्पृच्छति मन्त्रिणः । अगाधेम्भसि रोधःस्थश्चङ्कुणो मणिमक्षिपत् ॥२४९॥

तत्प्रभावाद्विधाभूतं सरिन्नीरं ससैनिकः । उत्तीर्णो नृपतिस्तूर्णं परं पारं समासदत् ॥२५०॥ 250

मणिमन्येन मणिना चङ्कुणोप्याचकर्ष तम् । सलिलं प्रागवस्थं च क्षणेन सरितामभूत् ॥२५१॥

परिभाव्या[1]द्भुतं तत्स प्रशंसामुखराननः । प्रणयाच्चङ्कुणं राजा मणियुग्ममयाचत ॥२५२॥

स तमाह स्म विहसन्कर्मेमौ कुरुतो मणी । योग्यौ मत्पाणिगावेव किं स्यात्स्वीकरणेन वः ॥२५३॥

सामान्येष्वेव लभते सोत्कर्षं वस्तु संप्रथाम् । महत्सु तस्य का शोभा विविधोत्कृष्टवस्तुषु[1] ॥२५४॥

प्रस्यन्दनं शशिमणे[1]र्गणयन्ति तावद्यावत्स्थितो जलनिधेः पुलिनैकदेशे ।

स[2] स्वीक्रियेत यदि तेन[3] ततस्तदास्य स्यन्दः[4] स्फुरन्नपि न तत्सलिले विभाव्यः[5] ॥२५५॥ 255

इत्युक्त्वा विरते तस्मिन्राजा सस्मितमब्रवीत् । संभावयसि किं रत्नमाभ्यामभ्यधिकं मम ॥२५६॥

अतो[1]धिकतरं यद्वा किंचित्त्वं[2] मम पश्यसि । तदादाय प्रयच्छेदं निष्क्रयेण मणिद्वयम् ॥२५७॥

ततो महान्प्रसादोयमित्युक्त्वा चङ्कुणोब्रवीत् । स्वायत्ते स्वामिनो रत्ने मह्यमिष्टं तु दीयताम् ॥२५८॥

गजस्कन्धेधिरोप्यैतन्मागधेभ्यो यदाहृतम् । दत्त्वा सुगत[1]बिम्बं तज्जनोयमनुगृह्यताम् ॥२५९॥

सलिलोत्तरणोपायो मणी देवेन गृह्यताम्[1] । संसारोत्तरणोपायः सुगतो मह्यमर्प्यताम् ॥२६०॥ 260

---

२३६. [1]) Thus $A_3$; $A_1$ चेतसि भूपाल सु°. २३८. [1]) $A_4$ gloss तद्दिक्पालस्य. २४०. [1]) Thus $A_3$; $A_1$ °शाज्ञा स्वया. २४६. [1]) A भु × खार°.—[2]) Thus corr. by $A_3$ from $A_1$ °देशानीतो. २४८. [1]) Thus $A_1$: $A_3$ स्तिमित°. २५२. [1]) $A_3$ प्रतिभाव्या°. २५४. [1]) $A_3$ °त्कृष्टभूमिषु. २५५. [1]) $A_3$ gloss चन्द्रकान्तस्य.—[2]) $A_3$ gloss शशिमणिः.—[3]) $A_3$ gloss जलनिधिना.—[4]) Thus corr. by $A_3$ from $A_1$ स्यन्दं.—[5]) Thus corr. by $A_3$ from $A_1$ वभाव्यः. २५७. [1]) Thus $A_3$; $A_1$ ततो.—[2]) Thus $A_1$; $A_3$ in margin कोशे त्वं. २५९. [1]) $A_3$ gloss बुद्ध. २६०. [1]) $A_2$ gloss मणी एव संसारतरणोपाय इत्यारोपः। अत एव गृह्यतामित्येकवचनान्तं क्रियापदम् मणी एव संसारतरणोपायस्त्वया गृह्यतामित्यन्वयः.

इति तेनार्थितो युक्त्या जिनबिम्बं ददौ नृपः । वाग्मिनां कस्य सामर्थ्यं परिपन्थयितुं वचः ॥२६१॥
स्वविहारेथ भगवान्स तेन विनिवेशितः । कपिशाभिः सकाषाय इव यो[1] भाति कान्तिभिः ॥२६२॥
दृश्यतेद्यापि कटकैरायसैः परिवेष्टितः । गजस्कन्ध[1]निबद्धस्य सूचकौ[2] यस्य विष्टरः ॥२६३॥
अभिप्रायानुसारेण प्रकटीकुरुते प्रियम् । अहो महाप्रभावाणां भूपतीनां वसुंधरा ॥२६४॥
265 अशिक्षितं कदाचित्स स्वयं दमयितुं हयम् । निनायारण्यमेकाकी हयविद्याविशारदः ॥२६५॥
दूरान्निर्मानुषे तत्र ललनां ललिताकृतिम् । एकां ददर्श गायन्तीं नृत्यन्तीमपरामपि ॥२६६॥
क्षणाच्च ते समापय्य गीतनृत्ते मृगीदृशौ । प्रणम्य किंचिद्गच्छन्त्यावपश्यद्भ्रमयन्हयम् ॥२६७॥
तुरगं तं समारुह्य तत्रागच्छद्दिने दिने । दृष्ट्वा तथैव ते कान्ते गत्वापृच्छत्सविस्मयः ॥२६८॥
तमूचतुस्ते नर्तक्यावावां देवगृहाश्रिते । यः शूरवर्धमानोयं ग्रामस्तत्रावयोर्गृहम् ॥२६९॥
270 इहत्यजीवनभुजां मातृणामुपदेशतः । अस्मत्कुलेन[1] नियतं नृत्तमत्र[2] विधीयते ॥२७०॥
रूढिः परंपरायाता सेयमस्मद्गृहे स्थिता । आवामन्योपि वा नात्र निमित्तं ज्ञातुमीश्वरः ॥२७१॥
एवं वचस्तयोः श्रुत्वा नृपोन्येद्युः सविस्मयः । तदुक्त्यां[1] मेदिनीं कृत्स्नां[2] कारुभिर्निरदारयत् ॥२७२॥
दूरं[1] निर्हतमृद्भिस्तैरथाद्राक्षीन्निवेदितम् । नृपतिः पिहितद्वारं जीर्णं देवगृहद्वयम् ॥२७३॥
उद्घाटितारर्विर्णै[1]ः पीठोत्कीर्णैर्निवेदितौ । अपश्यत्केशवौ तत्र रामलक्ष्मणनिर्मितौ ॥२७४॥
275 परिहासहरेः पार्श्वे पृथक्कृत्वा शिलागृहम् । स रामस्वामिनः श्रीमान्प्रतिष्ठाकर्म निर्ममे ॥२७५॥
देवोपि लक्ष्मणस्वामी तथैवाभ्यर्थ्य पार्थिवम् । चक्रमर्दिकया चक्रेश्वरपार्श्वे निवेशितः ॥२७६॥
दिग्जये पुरुषः कश्चिद्दृत्तप्रत्ययनिग्रहः । अग्रे न्यक्षिपदात्मानं गजारूढस्य भूभुजः ॥२७७॥
तं कृत्तपाणिघ्राणादिव्रणैः शोणितवर्षिणम् । त्राणार्थिनं कारुणिकः स्वोदन्तं पृष्टवान्नृपः ॥२७८॥
स तस्मै सिकतासिन्धुसविधस्थस्य भूपतेः । प्रख्यातमूचे[1] सचिवमात्मानं हितकाङ्क्षिणम् ॥२७९॥
280 प्रणतिर्ललितादित्यनृपतेः क्रियतामिति । [1]हितं कथयतः स्वस्य निग्रहं च ततो नृपात् ॥२८०॥ युग्मम् ॥
प्रतिजज्ञे च भूपेन ततस्तत्स्वामिनिग्रहः । रूढव्रणोगदंकारैः स चाकार्यत सत्कृतैः ॥२८१॥
ततो विहितयात्रं तं स मन्त्री कृतसत्क्रियः । कदाचिदेवमवदद्विजने[1] जगतीभुजम् ॥२८२॥
एवंविधस्य कायस्य राजन्यत्परिरक्षणम् । तत्र वैरविशुद्ध्याशा विडम्बयति मामियम् ॥२८३॥
बाष्पैर्जलाञ्जलिं दत्त्वा दुःखाय च सुखाय च । कृतकृत्यो ध्रुवं जह्यां[1]मवमानहतानसून् ॥२८४॥
285 अपकृत्याधिकं शत्रोरपकारं जयेन्मितम् । गम्भीरं प्रतिनद्येव निनादं नदतो गिरिः ॥२८५॥
इतो मासैस्त्रिभिर्गम्या भूः प्राप्या त्वरितं कथम् । यदा वा प्राप्यते वैरी तदा तत्रैव किं वसेत् ॥२८६॥
मासार्धलङ्घ्यं पन्थानं तस्मादुपदिशामि ते । गृहीत्वा स[1] जलं गम्यश्चमूनां किं तु निर्जलः ॥२८७॥
तद्भूमिजा बन्धवो मे न वक्ष्यन्ति त्वदागमम् । सामात्यान्तःपुरो राजा छद्मनानेन गृह्यते ॥२८८॥

---

२६२. 1) Thus corr. by $A_3$ from $A_1$ यस्य. २६३. 1) Thus emended with Edd.; $A_1$ °स्कन्द°.—2) Thus $A_1$; $A_3$ सूचकैर्यस्य. २७०. 1) 2) $A_4$ glosses अस्मत्कुलजेन and देवगृहे. २७२. 1) Thus corr. by $A_1$ from तदुक्तौ; $A_3$ °क्तां.—2) Thus $A_3$; $A_1$ कृच्छ्रां. २७३. 1) Thus $A_1$; altered by later hand to दूरनि°. २७४. 1) $A_1$ gloss अक्षरैः. २७९. 1) Thus corr. by $A_3$ from $A_1$ °माख्यातं. २८०. 1) $A_4$ gloss ललितादित्याय प्रणामं कुर्विति मदुक्तं हितमहितं श्रुत्वा तेन राज्ञा मम कर्णनासाद्यवयवाः कृत्ताः. २८२. 1) Thus $A_3$; $A_1$ °द्विजन. २८४. 1) Thus $A_2$; $A_1$ जह्याव°. २८७. 1) $A_2$ gloss पन्थाः.

इत्युक्त्वा सोकरोत्तस्य प्रवेशं वालुकार्णवे । पक्षे क्षीणे च कटको निस्तोयः समपद्यत ॥२८९॥
तत्राप्यहानि द्वित्राणि वहन्नेवाभवन्नृपः । तृष्णार्तं वीक्ष्य सैन्यं च मन्त्रिणं तमभाषत ॥२९०॥ 290
उक्तकालाधिका यावद्वासरा गमिताः पथि । मुमूर्षु तृष्णया सैन्यं तदध्वा शिष्यते कियान् ॥२९१॥
ततो विहस्य सोवादीज्जिगीषो शेषमध्वनः । किं पृच्छस्यरिराष्ट्रस्य यमराष्ट्रस्य वा भवान् ॥२९२॥
त्वं हि स्वामिहितार्थैव समुपेक्ष्य स्वजीवितम् । मृत्युवक्त्रं सकटको मया युक्त्या प्रवेशितः ॥२९३॥
नेदं मरुमहीमात्रं भीमोयं वालुकार्णवः । नाम्भोत्र लभ्यते क्वापि कस्त्राता तेद्य भूपते ॥२९४॥
श्रुत्वेति पृतना कृत्स्ना समभूद्गीतसौष्ठवा । करका[1]भ्रंशितफला स्तम्भशेषेव शालिभूः ॥२९५॥ 295
संत्यक्तजीविताशानां भीरूणां क्रन्दितध्वनिम् । भुजमुद्यम्य शमयंस्ततो नृपतिरब्रवीत् ॥२९६॥
अमात्य तव कृत्येन प्रीताः स्वामिहितैषिणः । मरावप्यत्र शीतार्ता इव रोमाञ्चिता वयम् ॥२९७॥
अभेद्यसारे मयि तु व्यक्तमेवंविधोपि ते[1] । प्रयासः[2] कुण्ठतां यातो लोहं वज्रमणाविव ॥२९८॥
मणिभ्रमाद्वह्नि[1]कणं गृह्णन्दग्धा इवाङ्गुलीः । त्वं मिथ्यावयवांल्लूनानद्य शोचिष्यसि ध्रुवम् ॥२९९॥
निदेशेनै[1]व मे पश्य पयः सूतेद्य मेदिनी । रसितेनाम्बुवाहस्य रत्नं वैडूर्यभूरिव ॥३००॥ 300
इत्युक्त्वा सोम्बु निष्क्रष्टुं कुन्तेनोर्वीं व्यदारयत् । उज्जिहीर्षुर्वितस्ताम्भः शूलेनेव त्रिलोचनः ॥३०१॥
अथोज्जगाम पातालक्ष्मीलीलास्मितच्छविः । रसातलात्सरित्साकं सैन्यानां जीविताशया ॥३०२॥
तस्य सेनाचराणां सा क्लमं चिच्छेद वाहिनी । वृथाव्ययीकृताङ्गस्य मन्त्रिणस्तस्य चेष्टितम् ॥३०३॥
लूनाङ्गोमङ्गलाशंसी स मन्त्री विफलश्रमः । स्वस्य भर्तुर्विवेशादौ नगरीमन्तकस्ततः[1] ॥३०४॥
राज्ञापि कुटिलाचारो निगृह्य स महीपतिः । निजस्य मन्त्रिणस्तस्य तुल्यावस्थो व्यधीयत ॥३०५॥ 305
यथोपयोगं तेनैव स्थाने स्थाने प्रवर्तिताः । अद्यापि कुन्तवाहिन्यः प्रवहन्त्युत्तरापथे ॥३०६॥
सहस्रशः संभवन्तोप्यपरे भुवनाद्भुताः । अतिप्रसङ्गभङ्गेन तद्वृत्तान्ता न दर्शिताः ॥३०७॥
यन्निःशब्दजला घनाश्मपरुषे देशेतिघोरारवा यच्चाच्छाः समये पयोदमलिने कालुष्यसंदूषिताः ।
दृश्यन्ते कुलनिम्नगा अपि परं दिग्देश[1]कालाविमौ तत्सत्यं महतामपि स्वसदृशाचारप्रवृत्तिप्रदौ ॥३०८॥
कलेर्वायं प्रभावः स्यान्नरनाथासनस्य वा । यत्सोपि भीमकलुषाः प्रवृत्तीः समदर्शयत् ॥३०९॥ युग्मम् ॥
अवरोधसखो राजा परिहासपुरे स्थितः । स जातु मदिराक्षीवः सचिवानेवमन्वशात् ॥३१०॥ 310
कृतं प्रवरसेनेन यदेतत्प्रवरं पुरम् । तन्निर्दहथ मन्यध्वे मत्पुरस्येव[1] चेच्छ्रियम् ॥३११॥
घोरामलङ्घिताज्ञस्य श्रुत्वेत्याज्ञां महीपतेः । गत्वाश्व[1]घासकूटानि तेदहन्वातुलानके ॥३१२॥
हर्म्याग्राद्वीक्षमाणस्तद्वह्निज्वालोज्ज्वलाननः । उल्कामुख इवाभूत्स हर्षाट्टहसितोत्कटः ॥३१३॥
द्वेषादिवैकृतवतः प्रतिभासतेन्यो मिथ्यैव चित्रमधिको विशदात्मनोपि ।
चन्द्रादि पश्यति पुरो द्विगुणं प्रकृत्या तेजोमयं तिमिरदोषहतं हि चक्षुः ॥३१४॥

---

२९५. [1]) $A_3$ gloss दुष्टवर्षणं. २९८. [1]) Thus corr. by $A_3$; $A_1$ °मेवोविधोपि तु.—[2]) Thus $A_3$; $A_1$ प्रयोगः. २९९. [1]) Thus corr. by $A_3$ from $A_1$ वज्जकणं. ३००. [1]) Thus Edd. and G *sec. manu*; A R and G *prima manu* दिनेशेनैव. ३०४. [1]) $A_2$ gloss ललितादित्य एव यमः. ३०८. [1]) Thus corr. by $A_2$ from $A_1$ धिग्देश°; $A_2$ gloss दिशि देशः दिग्देशः स च कालश्च तौ. ३११. [1]) Thus $A_1$; $A_3$ मत्पुरस्यैव. ३१२. [1]) Thus corr. by $A_3$ from $A_1$ गत्वाश्रुवास°.

315 नैवं चेदेकमपि तत्पुरं प्रवरभूपतेः । असंख्यपुरनिर्माता स विवेदाधिकं कुतः ॥३१५॥ युग्मम् ॥

क्षीणक्षैण्योथ निर्ध्याय नगरप्लोषकिल्बिषम् । उष्णनिःश्वाससुहृदा पस्पर्शेनुशयाग्निना ॥३१६॥

तत्कुर्वतेन्तःसुषिरा[1] गूढं[2] येनातनुक्षयम्[3] । दह्यन्ते[4] जीर्णतरवः कोटरस्थानला इव ॥३१७॥

प्रातस्तमथ शोचन्तं सदुःखं वीक्ष्य मन्त्रिणः । चिन्तानिवर्तनायोचुः पुरप्लोषं मृषैव तत् ॥३१८॥

श्रुतेप्रनष्टे नगरे निःशोकोभून्महीपतिः । स्वप्नान्तर्हारिते पुत्रे प्रबुद्धोग्र इव स्थिते ॥३१९॥

320 कार्यं न जातु तद्वाक्यं यत्क्षीवेन मयोच्यते । तान्युक्तकारिणोमात्यान्प्रशंसन्निति सोब्रवीत् ॥३२०॥

प्रियमनुचितं क्ष्मापण्यस्त्रीक्षणप्रभुरीश्वरो रमयति यतो धिक्तान्भृत्यान्स्ववृत्तिसुखार्थिनः ।

नृपमपथगं पान्ति प्राणानुपेक्ष्य निजानपि प्रसभमिह ये तैः पूतेयं महात्मभिरुर्वरी ॥३२१॥

अतीन्द्रमपि माहात्म्यं राज्ञस्तस्याधितिष्ठतः । अयमन्योपि दोषोभूदितरक्षितिपोचितः ॥३२२॥

दत्त्वापि यत्स मध्यस्थं श्रीपरीहासकेशवम् । जघान तीक्ष्णपुरुषैस्त्रिग्राम्यां गौडपार्थिवम् ॥३२३॥

गौडोपजीविनामासीत्सत्त्वमत्यद्भुतं तदा । जहुर्यै जीवितं धीराः परोक्षस्य प्रभोः कृते ॥३२४॥

325 शारदादर्शनमिषात्कश्मीरान्संप्रविश्य ते । मध्यस्थदेवावसथं संहताः समवेष्टयन् ॥३२५॥

दिगन्तरस्थे भूपाले प्रविविक्षूनवेक्ष्य तान् । परिहासहरिं चक्रुः पूजकाः पिहितारम् ॥३२६॥

ते रामस्वामिनं प्राप्य राजतं विक्रमोर्जिताः । परिहासहरिभ्रान्त्या चक्रुरुत्पाद्य रेणुशः ॥३२७॥

तिलं तिलं तं कृत्वा च चिक्षिपुर्दिक्षु सर्वतः । नगरान्निर्गतैः सैन्यैर्हन्यमानाः पदे पदे ॥३२८॥

श्यामला रक्तसंसिक्तास्तेपतन्निहता भुवि । अञ्जनाद्रिदृषत्खण्डा धातुस्यन्दोज्ज्वला इव ॥३२९॥

330 तदीयरुधिरासारैः समभूदुज्ज्वलीकृता । स्वामिभक्तिरसामान्या धन्या चेयं वसुंधरा ॥३३०॥

वज्राद्वज्रकृतं भयं विरमति श्रीः पद्मरागाद्भवेन्नानाकारमपि प्रशाम्यति विषं गारुत्मतादश्मनः ।

एकैकं क्रियते प्रभावनियमात्कर्मेति[1] रत्नैः परं पुंरत्नैः पुनर[2]प्रमेयमहिमोन्नद्धैर्न किं साध्यते ॥३३१॥

क्व दीर्घकाललङ्घ्योध्वा शान्ते भक्तिः क्व च प्रभौ । विधातुरप्यसाध्यं तद्यद्गौडैर्विहितं तदा ॥३३२॥

लोकोत्तर[1]स्वामिभक्तिप्रभावाणि पदे पदे । तादृशानि तदाभूवन्भृत्यरत्नानि भूभृताम् ॥३३३॥

राज्ञः प्रियो रक्षितोभूद्गौडराक्षसविप्लवे । रामस्वाम्युपहारेण श्रीपरीहासकेशवः ॥३३४॥

335 अद्यापि दृश्यते शून्यं रामस्वामिपुरास्पदम् । ब्रह्माण्डं गौडवीराणां सनाथं यशसा पुनः ॥३३५॥

एवं नानाविधोदन्तैर्वासराः क्ष्मापतेर्ययुः । विरलाः स्वपुरे तस्य भूयांसस्तु दिगन्तरे ॥३३६॥

अनन्या[1]क्रान्तपृथिवीसमालोकनकौतुकी । अपारं प्रविवेशाथ पुनरेवोत्तरापथम् ॥३३७॥

कर्तुं प्रभावजिज्ञासां प्रहितैर्धनदादिभिः । नैरृतैः सह वृत्तान्तास्तस्य ते ते तदाभवन् ॥३३८॥

नाद्यापि या भुवो दृष्टा जाने भानुकरैरपि । राज्ञस्तस्य बभूवाज्ञा तत्र[1] स्वैरविहारिणी ॥३३९॥

340 चिरमज्ञातवृत्तान्तैर्मन्त्रिभिः प्रहितस्ततः । प्रत्यावृत्तस्तस्य पार्श्वाद्दूतस्तानेवमुक्तवान् ॥३४०॥

---

३१७. [1]) $A_3$ gloss अन्तश्छिद्राः.—[2]) $A_3$ gloss मध्ये एव.—[3]) $A_3$ gloss क्रियाविशेषणम्.—[4]) $A_3$ gloss कर्मकर्तरि लकारः स्वयमेव दह्यन्ते। अन्तश्छिद्राः पुरुषास्तत्कार्यं कुर्वते। येन कार्येण अतनुक्षयं यथा भवति तथा स्वयमेव दह्यन्ते। यथा कोटरस्थाग्नयस्तरवः स्वयमेव गूढं अन्तरेव दह्यन्ते॥. ३३१. [1]) Thus corr. by $A_3$ from $A_1$ कर्मांति°.—[2]) Thus corr. by $A_3$ from $A_1$ परम°. ३३३. [1]) र supplied by $A_3$. ३३७. [1]) Thus corr. by $A_3$ from $A_1$ अनन्यक्रा°. ३३९. [1]) $A_3$ तासु.

इत्यादिशति वः स्वामी कोयं मोहो भवादृशाम् । क्ष्मामिमां मे प्रविष्टस्य प्रतीक्षध्वे यदागमम् ॥३४१॥
नवं नवं प्रतिदिनं संत्यज्य विजयार्जनम् । स्वराष्ट्रं संप्रविष्टस्य किं कार्यं मम पश्यथ ॥३४२॥
विनिर्गतानां स्वभुवः सरितां सलिलाकरः । न निर्व्याजजिगीषूणां दृश्यते ह्यवधिः क्वचित् ॥३४३॥
तस्मादाचारसारं वो वक्ष्ये स्वविषयोचितम् । राज्यं तदनुसारेण निर्विघ्नं कुरुतानघाः ॥३४४॥
अत्रस्थैः सर्वदा रक्ष्यः स्वभेदः प्रभविष्णुभिः । चार्वाकाणामिवैषां हि भयं न परलोकतः ॥३४५॥ 345
अपराधं विनाप्यत्र दण्ड्या गह्वरवासिनः । ते हि संभृतवित्ताः स्युर्दुर्भेद्या दुर्गसंश्रयाः ॥३४६॥
वर्षोपभोग्यान्यन्नानि क्षेत्रभूसंमिता वृषाः । ग्राम्याणां नातिरिच्यन्ते यथा कार्यं तथासकृत् ॥३४७॥
अधिकीभूतवित्ता हि वत्सरेणैव ते भृशम् । भवेयुर्डामराः क्रूरा नृपाज्ञातिक्रमक्षमाः ॥३४८॥
वस्त्रं स्त्रियः क्षुधा भोज्यमलंकारा हया गृहाः । आसाद्यन्ते यदा जातु ग्रामीणैर्नगरोचिताः ॥३४९॥
महादुर्गाण्युपेक्ष्यन्ते संरक्ष्याणि यदा नृपैः । यदा चानन्तरज्ञत्वं तेषां भृत्येषु दृश्यते ॥३५०॥ 350
प्रदेशादेकतो रूढा यदा वृत्तिश्च शस्त्रिणाम् । अन्योन्योद्वाहसंबन्धैः कायस्थाः संहता यदि ॥३५१॥
कर्मस्थानानि वीक्षन्ते क्ष्मापाः कायस्थवद्यदा । तदा निःसंशयं ज्ञेयः प्रजाभाग्यविपर्ययः ॥३५२॥ चक्कलकम् ॥
चेष्टानुसारेणोन्नीय गूढमाशयसंविदम् । मयोक्तं हृदये कार्यमन्तरं राजबीजिनाम् ॥३५३॥
प्रत्यासत्तिं मदकरटिनो दानगन्धेन वायुर्गर्जोद्भूतिं प्रकटितरुचिश्चञ्चलैवाम्बुदस्य ।
चेष्टा स्पष्टं वदति मतिमन्नैपुणोन्नेयतत्त्वा जन्तोर्जन्मान्तरपरिचितां निश्चलां चित्तवृत्तिम् ॥३५४॥
पुत्रः कुवलयादित्यो वज्रादित्यश्च मे समौ । भिन्नशीला तयोर्भ्रात्रोर्धीर्द्विमातुरयोः पुनः ॥३५५॥ 355
ज्यायान्राज्येभिषेक्तव्यः स च स्याद्बलवान्यदा । तस्याज्ञातिक्रमः कार्यो भवद्भिर्नियमात्तदा ॥३५६॥
उत्सृजञ्जीवितं वापि राज्यं वापि स पार्थिवः । शोचनीयो न केनापि स्मरतेदं वचो मम ॥३५७॥
कार्यः कनीयांश्च नृपः प्रमादोत्क्रियते यदि । नोल्लङ्घनीया तस्याज्ञा रक्ष्यश्च विषमोपि सः ॥३५८॥
पौत्रेषु मे कनीयान्यो जयापीडोस्ति दारकः । पितामहसमो भूया इति वाच्यः स सर्वदा ॥३५९॥
भर्तुर्गृहीतनैराश्याः साभिप्रायां प्रणम्य ताम् । आनर्चुः पश्चिमामाज्ञां ते बाष्पार्धकणत्यजः ॥३६०॥ 360
उवाच चङ्कुणो जातु संनिपत्याखिलाः प्रजाः । बाष्पैः पतिवियोगाग्नितप्तां सिञ्चन्वसुंधराम् ॥३६१॥
राज्ये कुवलयापीडो राजपुत्रोभिषिच्यताम् । सुगृहीताभिधो राजा गतः स सुकृती दिवम् ॥३६२॥
ससृजे यस्य कृतिनो दैवतैः कोशवृद्धये । रससिद्धिरकस्मान्मे यस्मात्सास्तमुपागता ॥३६३॥
दूरस्थोपि हि भूभृत्स भाग्यशक्त्या कयाचन । कार्याणि घटयन्नासीद्दुर्घटान्यपि हेलया ॥३६४॥
अम्भोजानि घनाघनव्यवहितोप्युल्लासयत्यंशुमान्दूरस्थोपि पयोधरोतिशिशिरस्पर्शी करोत्यातपम् ।
शक्तिः काप्यपरिक्षतास्ति महतां स्वैरं दविष्ठान्यहो यन्माहात्म्यवशेन यान्ति घटनां कार्याणि निर्यन्त्रणाम् ॥३६५॥ 365
सैकादशदिनान्सप्त मासान्षट्त्रिंशतं समाः । एवमाहृत्य स महीं प्रजाचन्द्रोस्तमाययौ ॥३६६॥

---

३४१. [1]) The words from प्रतीक्षध्वे to संप्रविष्टस्य in the following verse have been omitted by $A_1$ and supplied in margin by $A_3$. ३४३. [1]) Thus corr. by later hand from $A_1$ निर्व्याजं. ३४६. [1]) Thus $A_1$; altered by later hand to दुर्भेदा which is found in R G. ३५४. [1]) $A_2$ gloss करटी हस्ती. ३५६. [1]) $A_4$ gloss कुवलयापीडः.—[2]) Emended; A °षिक्तव्यः. ३६५. [1]) Thus corr. by $A_2$ from $A_1$ °यन्त्रणम्.

तुषारवर्षैर्बहलैस्तमकाण्डनिपातिभिः । आर्याणकाभिधे देशे विपन्नं केचिदूचिरे ॥३६७॥

राजप्रष्ठां[1] प्रतिष्ठां स रक्षितुं चिरसंचिताम् । संकटे क्वापि दहनं प्राविक्षदिति केचन ॥३६८॥

केषांचित्तु मते भूभृद्वीयस्युत्तरापथे । सोमर्त्यसुलभां भूमिं प्रविष्टः कटकान्वितः ॥३६९॥

370 अत्यद्भुतानि कृत्यानि श्रुतान्यस्य यथा किल । विपत्तिरपि भूभर्तुस्तथैवात्यद्भुता श्रुता ॥३७०॥

यातोस्तं द्युमणिः पयोधिसलिलं कैश्चित्प्रविष्टोपरैः संप्राप्तो दहनं गतः किल परैर्लोकान्तरं[1] कीर्त्यते ।

जायन्ते महतामहो निरुपमप्रस्थानहेवाकिनां निःसामान्यमहत्त्वयोगपिशुना वार्ता विपत्तावपि ॥३७१॥

ततः कुवलयापीडो भेजे कुवलयेशताम्[1] । जातः कमलदेव्या यः श्रीमाञ्शक्र इवादितेः ॥३७२॥

त्यागेन चक्रे विशदां योनुरक्तां नृपश्रियम् । महोरगस्त्वचमिव स्वभावमलिनामपि ॥३७३॥

भ्रात्रा तुल्यप्रभावेण कंचित्कालं हतप्रभः । स हुताशोष्मणाक्रान्तः प्रदीप इव नारुचत् ॥३७४॥

375 भृङ्गैरिवानुगैर्दानलोभात्पर्यायवृत्तिभिः । श्रीर्दुःस्थाभूत्तयोरन्तर्मत्तेभकटयोरिव ॥३७५॥

अथोभयधनादायिभृत्यचक्रिकया[1] समम् । राजा कुवलयापीडो बभञ्जानुजमञ्जसा ॥३७६॥

राज्यं निष्कण्टकं कृत्वा ततः प्राप्तबलो नृपः । दिग्जयायोर्जितक्रान्तिः सोभूत्संभृतसाधनः ॥३७७॥

एकस्तस्मिन्क्षणे मन्त्री तस्याज्ञामुदलङ्घयत् । स्मरन्वा तत्पितुर्वाचं भजन्वा दर्पविक्रियाम् ॥३७८॥

प्राप्तायामथ यामिन्यां तल्पे कोपाकुलो नृपः । तमाज्ञातिक्रमं ध्यायन्न निद्रां क्षणमप्यगात् ॥३७९॥

380 एवं[1] कृतागसं हन्तुं सस्पृहस्य तदाश्रयात् । बहवः प्रत्यभासन्त वध्यास्तस्योद्यतक्रुधः ॥३८०॥

विचारशैलमथिता तस्य चित्तमहोदधेः । प्रकोपकालकूटस्य पश्चाच्छमसुधोदगात् ॥३८१॥

दध्यौ सोथ गतक्रोधः प्रवृद्धः प्राणिसंक्षयः । एतावान्कस्य नु कृते कर्तव्यः प्रत्यभान्मम ॥३८२॥

अकार्याण्यपि पर्याप्य कृत्वापि वृजिनार्जनम् । विधीयते हितं यस्य स[1] देहः कस्य सुस्थिरः ॥३८३॥

कृतघ्नस्यास्य कायस्य हेतोरगलितस्मृतेः । हन्तव्याः कस्य पन्थानः प्रतिभान्त्यनपायिनः ॥३८४॥

385 विदन्ति जन्तवो हन्त पच्यमानस्य नात्मनः । अवस्थां कालसूदेन कृतां तां तां क्षणे क्षणे ॥३८५॥

ह्यः पश्यद्भिरकारणस्मितसितं पाथोजकोशाकृति श्मश्रूद्भेदकठोरमद्य[1] रभसादुत्तप्तताम्रप्रभम् ।

प्रातर्जीर्णवलक्षकेशविकृतं वृद्धाजशीर्षोपमं वक्त्रं नः परिहस्यते ध्रुवमिदं भूतैश्चिरस्थायुभिः ॥३८६॥

इत्याद्यनित्यताचिन्तादत्तशान्तिसुखादरः । राज्यं संत्यज्य स वनं प्लक्षप्रस्रवणं[1] ययौ ॥३८७॥

गच्छ भद्र वनायैव तपस्याधीयतां मनः । सापायाः क्षणभङ्गिन्य एवंप्राया विभूतयः ॥३८८॥

तेन संत्यजता राज्यं लिखितेन निजासने । वैराग्यवासनोत्सेकः श्लोकेनानेन सूचितः ॥३८९॥

390 अभग्नशमसंवेगलब्धसिद्धिर्नराधिपः । श्रीपर्वतादावद्यापि भव्यानामेति दृक्पथम् ॥३९०॥

तथा याते प्रभोः पुत्रे मित्रशर्मा[1] शुचान्वितः । वितस्तासिन्धुसंभेदे सभार्यो जीवितं जहौ ॥३९१॥

राज्यं समां समासार्धां कृत्वा स वसुधाधिपः । निःश्रेयसाप्तिनिःश्रेणीं सुधीः सिद्धिं समासदत् ॥३९२॥

---

३६८. [1]) Thus $A_1$; $A_3$ °प्रष्ठः. ३७१. [1]) Thus corr. by $A_3$ from $A_1$ परो°. ३७२. [1]) Thus corr. by $A_2$ from $A_1$ भूवलये°; $A_2$ adds the gloss कोः भूमेः. वलयः कुवलयः. ३७६. [1]) A चक्रि°. ३८०. [1]) This and the following verse have been omitted by $A_1$ and supplied in margin by $A_3$. ३८३. [1]) $A_3$ देहं तत्कस्य सुस्थिरम्. ३८६. [1]) Thus $A_3$; $A_1$ श्मश्रूद्बोध°. ३८७. [1]) $A_3$ gloss नैमिषारण्यं. ३९१. [1]) $A_4$ gloss मन्त्री.

वज्रादित्यो बप्पियको ललितादित्य[1] इत्यपि । ख्यातोथ भूभृदभवद्यन्माता चक्रमर्दिका ॥३९३॥
स क्रूरचरितो भ्रातुः प्रजाह्लादविधायिनः । सुधांशोरिव दुर्वासा नूनं[1] विसदृशोभवत् ॥३९४॥
परिहासपुरात्पित्र्यां नानोपकरणावलीम् । स जहार दुराचारो भूभुक्लोभवशंवदः ॥३९५॥ 395
रागिणो भूमिपालस्य भूयस्योन्तःपुरस्त्रियः । बीजाश्वस्येव वडवास्तास्ताः समभवन्प्रियाः ॥३९६॥
विक्रयेण प्रयच्छन्स म्लेच्छेभ्यः पुरुषान्बहून् । म्लेच्छोचितां व्यवहृतिं प्रावर्तयत मण्डले ॥३९७॥
सप्ताब्दान्वसुधां भुक्त्वा सोतिसंभोगजन्मना । जगाम संक्षयं क्ष्माभृत्क्षयरोगेण किल्बिषी ॥३९८॥
तस्मान्मञ्जरिकादेव्यां जातो राजा प्रजान्तकः । ततः पृथिव्यापीडोभूत्समासाश्चतुरः समाः ॥३९९॥
जातो मम्माभिधानायां बप्पियात्सप्त वासरान्[1] । संग्रामापीडनामाथ तमुत्पाद्याभवन्नृपः ॥४००॥ 400
भ्रातरौ तौ समासाद्य राज्यं नैव व्यराजत । हेमन्तशिशिरावाप्य चण्डांशोरिव मण्डलम् ॥४०१॥
शान्तेथ संग्रामापीडे कनीयान्बप्पियात्मजः । राजा श्रीमाञ्जयापीडः प्राप राज्यं ततः क्रमात् ॥४०२॥
पितामहसमो भूयादित्यमात्यवचः स्मरन् । जिगीषुः संभृतबलो दिग्जयाय स निर्ययौ ॥४०३॥
स्वदेशादेव नयविद्वशं नीतैः समं नृपैः । वृद्धान्पप्रच्छ निर्गच्छन्कश्मीरद्वारगोचरान् ॥४०४॥
पितामहस्य नः सैन्यं कियन्निर्गच्छतोभवत् । इति ब्रूताद्य यात्रासु यूयं संख्यातसैनिकाः ॥४०५॥ 405
कृतस्मितास्तमूचुस्ते किं प्रश्नेनामुना प्रभो । वस्तु कश्चिदतिक्रान्तं नानुकर्तुं क्षमोधुना ॥४०६॥
कर्णीरथानां तस्यासीत्सपादं लक्षमीशितुः । अशीतिस्तु सहस्राणि देवस्याद्य जयोद्यमे ॥४०७॥
तदाकर्ण्य जयापीडो बहु मेने न निर्जयम् । क्षिप्रं क्षितेः संकुचन्त्याः कालस्य बलवत्तया ॥४०८॥
जिगीषोः क्ष्माभुजस्तस्य भावमालोक्य तादृशम् । दध्युर्भावज्ञतां वृद्धा ललितादित्यभूपतेः ॥४०९॥
तस्य दूरप्रयातस्य स्यालो जज्जाभिधो बलात् । द्रोहेणाक्रम्य कश्मीरान्स्वयं भेजे नृपासनम् ॥४१०॥ 410
दिने दिने राजसैन्यात्स्वदेशस्मारिणस्ततः । सैनिकाः संन्यवर्तन्त[1] स्वामिभक्तिपराङ्मुखाः ॥४११॥
प्रख्यापयिष्यन्स्वामेव शक्तिं परिकरं विना । निश्चिकाय जयापीडो युक्तां कांचित्तु संविदम् ॥४१२॥
अभङ्गुरास्तेभिमानास्तस्यैवासन्मनस्विनः । अत्यवर्तत यैरेष वैधात्रीरपि वामताः ॥४१३॥
स विसृज्य भुवं स्वां स्वां भूपतीननुयात्रिकान् । प्रयागमगमत्सैन्यैः परिमेयैर्निजैः समम् ॥४१४॥
तत्रावशिष्टानुच्चित्य वाजिनः स मनोजवान् । द्विजेभ्यो लक्षमेकोनं प्रददौ भूरिदक्षिणम् ॥४१५॥ 415
संपूर्णमन्यो लक्षं यः प्रदद्यादत्र वाजिनाम् । तन्मुद्रयेयं मन्मुद्रा विनिवार्येत्युदीर्य च ॥४१६॥
श्रीजयापीडदेवस्येत्यक्षरैरुपलक्षिताम् । दिग्देशगामिनो मुद्रां गाङ्गस्य पयसो ददौ ॥४१७॥
तन्मुद्राङ्कं पयः पीत्वा गाङ्गमद्यापि निर्मलम् । चित्ते प्रवर्धते तापो भूपानामभिमानिनाम् ॥४१८॥
स्वदेशगमनानुज्ञां सैन्यस्याप्तमुखेन[1] सः । दत्त्वा[2] निशायामेकाकी निर्ययौ कटकान्तरात् ॥४१९॥
मण्डलेषु नरेन्द्राणां पयोदानामिवार्यमा । गौडराजाश्रयं गुप्तं जयन्ताख्येन भूभुजा ॥४२०॥ 420
प्रविवेश क्रमेणाथ नगरं पौण्ड्रवर्धनम् । यस्मिन्सौ[1]राज्यरम्याभिः प्रीतः[1] पौरविभूतिभिः ॥४२१॥

---

३९३. [1]) $A_3$ ललितापीड. ३९४. [1]) $A_3$ नूरं. ४००. [1]) Thus $A_1$ R G; $A_3$ वत्सरान्. ४११. [1]) Thus $A_3$; $A_1$ स्वा न्यवर्तन्त. ४१९. [1]) Thus corr. by $A_3$ from $A_1$ °तमुखोथ सः.—[2]) Thus corr. by $A_3$ from $A_1$ कृत्वा (?). ४२१. [1]) Thus corr. by $A_3$ from $A_1$ तस्मि° and प्रीतिं.

लास्यं स द्रष्टु[1]मविशत्कार्तिकेयनिकेतनम् । भरतानुगमा[2]लक्ष्यनृत्तगीतादिशास्त्रवित् ॥४२२॥

ततो देवगृहद्वाराशिलामध्यास्त स क्षणम् ।[1] .............................. ॥४२३॥

तेजोविशेषचकितैर्जनैः परिहृतान्तिकम् । नर्तकी कमला नाम कान्तिमन्तं ददर्श तम् ॥४२४॥

425 असामान्याकृतेः पुंसः सा ददर्श सविस्मया । अंसपृष्ठेन[1] धावन्तं करं तस्यान्तरान्तरा ॥४२५॥

अचिन्तयत्ततो गूढं चरन्नेष भवेद्ध्रुवम् । राजा वा राजपुत्रो वा लोकोत्तरकुलोद्भवः ॥४२६॥

एवं[1] महीतुं[2]मभ्यासः पृष्ठस्थाः पर्णवीटिकाः । अंसपृष्ठेन येनायं लसत्पाणिः[3] प्रतिक्षणम् ॥४२७॥

लोलश्रोत्रपुटो मदोत्कमधुपापातात्ययेपि द्विपः सिंहो[1]स्त्यपि पृष्ठतः करिकुले व्यावृत्य विप्रेक्षिता ।

मेघौन्मुख्यशमेप्यशान्तवदनोद्गीर्णस्वरो बर्हिणश्चेष्टानां विरमेन्न हेतुविगमेप्यभ्यासदीर्घा स्थितिः ॥४२८॥

इत्यन्तश्चिन्तयन्ती सा कृत्वा संक्रान्तसंविदम् । सखीमभिन्नहृदयां विससर्ज तदन्तिकम् ॥४२९॥

430 प्राग्वत्पृष्ठं गते पाणौ पूगखण्डांस्तयार्पितान् । वक्त्रेक्षिपज्जयापीडः परिवृत्य ददर्श ताम् ॥४३०॥

भ्रूसंज्ञयासि कस्य त्वं पृष्टाया इति सुभ्रुवः । ददत्या[1] वीटिकास्तस्या वृत्तान्तमुपलब्धवान् ॥४३१॥

तया जनितदाक्षिण्यस्तैस्तैर्मधुरभाषितैः । सख्याः समाप्तनृत्ताया निन्ये स[1] वसतिं शनैः ॥४३२॥

अग्राम्यपेशलालापां तथा तं सा विलासिनी । उपाचरत्पराध्यश्रीः सोप्यभूद्विस्मितो यथा ॥४३३॥

ततः शशाङ्कधवले संजाते रजनीमुखे । पाणिनालम्ब्य भूपालं शय्यावेश्म विवेश सा ॥४३४॥

435 ततः काञ्चनपर्यङ्कशायी मैरेयमत्तया । तयार्थितोपि शिथिलं विदधे नाधरांशुकम् ॥४३५॥

प्रवेशयन्निव बृहद्वक्षस्तां सत्रपां ततः । दीर्घबाहुः समाश्लिष्य स शनैरिदमब्रवीत् ॥४३६॥

न त्वं पद्मपलाशाक्षि न मे हृदयहारिणी । किं तु कालानुरोधोयं सापराधं करोति माम् ॥४३७॥

दासस्तवायं कल्याणि गुणैः क्रीतोस्म्यकृत्रिमैः । अचिराज्ज्ञातवृत्तान्ता ध्रुवं दाक्षिण्यमेष्यसि ॥४३८॥

कार्यशेषमनिष्पाद्य सज्जं मानिनि कंचन । अभोगे कृतसंकल्पं सुखानां त्वमवेहि माम् ॥४३९॥

440 तामेवमुक्त्वा पर्यङ्कं साङ्गुलीयेन पाणिना । वादयन्निव[1] निःश्वस्य श्लोकमेतं पपाठ सः ॥४४०॥

असमाप्तजिगीषस्य स्त्रीचिन्ता का मनस्विनः । अनाक्रम्य जगत्कृत्स्नं[1] नो संध्यां भजते रविः ॥४४१॥

श्लोकेनात्मगतं तेन पठितेन महीभुजा । सा कलाकुशलाज्ञासीन्महान्तं कंचिदेव तम् ॥४४२॥

गन्तुकामं च तं प्रातर्नृपं प्रणयिनी बलात् । अर्थयित्वा चिरं[1] कालमप्रस्थानमयाचत ॥४४३॥

एकदा वन्दितुं संध्यां प्रयातः सरितस्तटम्[1] । चिरायातो गृहं तस्या ददर्श भृशविह्वलम्[2] ॥४४४॥

445 किमेतदिति पृष्टाथ तमूचे सा शुचिस्मिता । सिंहोत्र सुमहान्रात्रौ निपत्याहन्ति देहिनः ॥४४५॥

नरनागाश्वसंहारः कृतस्तेन दिने दिने । त्वय्यभूत्वं चिरायाते तद्भयेन समाकुला ॥४४६॥

राजानो राजपुत्रा वा तद्भयेन विसूत्रिताः । गृहेभ्यो नात्र निर्यान्ति प्रवृत्ते क्षणदाक्षणे ॥४४७॥

तामिति ब्रुवतीं[1] मुग्धां निषिध्य च विहस्य च । सव्रीड इव तां रात्रिं जयापीडोत्यवाहयत् ॥४४८॥

---

४२२. [1]) द्रष्टु supplied by $A_3$ in space left by $A_1$.—[2]) $A_4$ gloss भरताचार्यकृतगीतशास्त्रसदृशं ज्ञात्वा. ४२३. [1]) Here two pâdas seem to be wanting. ४२५. [1]) Thus $A_1$; $A_3$ °पृष्ठेथ. ४२७. [1]) $A_3$ नूनं.—[2]) Emended; A गृहीतु°.—[3]) $A_3$ धावत्पा°. ४२८. [1]) Thus corr. by $A_3$ from $A_1$ सिंहः. ४३१. [1]) Thus corr. by $A_3$ from $A_1$ ददन्त्या. ४३२. [1]) Thus corr. by $A_3$ from $A_1$ स्व. ४४०. [1]) $A_3$ कथयन्निव. ४४१. [1]) Thus $A_3$; $A_1$ जगच्चित्रं. ४४३. [1]) $A_3$ मितं. ४४४. [1]) $A_3$ स सरित्तटम्.—[2]) Thus $A_1$; altered by later hand to °ह्वलाम्. ४४८. [1]) Thus corr. by later hand from $A_1$ ब्रुवतां.

अपरेद्युर्दिनापाये निर्गतो नगरान्तरात् । सिंहागमप्रतीक्षोभून्महावटतरोरधः ॥४४९॥

अदृश्यत ततो दूरादुत्फुल्लबकुलच्छविः । अट्टहासः कृतान्तस्य संचारीव मृगाधिपः ॥४५०॥ 450

अध्वनान्येन यान्तं तमथ मन्थरगामिनम् । राजसिंहो[1] नदन्सिंहं समाह्वयत हेलया ॥४५१॥

स्तब्धश्रोत्रो व्यात्तवक्त्रः कम्र[1]कूर्चः प्रदीप्तदृक् । उदस्तपूर्वकायस्तं सगर्जः समुपाद्रवत् ॥४५२॥

तस्य न्यस्याननबिले कफोणिं पततः क्रुधा । क्षिप्रकारी जयापीडो वक्षः क्षुरिकया[1]भिनत् ॥४५३॥

शोणितं जग्धगन्धेभसिन्दूराभं विमुञ्चता । एकप्रहारभिन्नेन तेनात्यज्यत जीवितम् ॥४५४॥

आमुक्तव्रणपट्टः स कफोणिमथ गोपयन् । प्रविश्य नर्तकीवेश्म निशि सुष्वाप पूर्ववत् ॥४५५॥ 455

प्रभातायां विभावर्यां श्रुत्वा सिंहं हतं नृपः । प्रहृष्टः कौतुकाद्द्रष्टुं जयन्तो निर्ययौ स्वयम् ॥४५६॥

स दृष्ट्वा तं महाकायमेकप्रहृतिसंहतम् । साश्चर्यो निश्चयान्मेने प्रहर्तारममानुषम् ॥४५७॥

तस्य दन्तान्तराल्लब्धं केयूरं पार्श्वगार्पितम् । श्रीजयापीडनामाङ्कं ददर्शाथ सविस्मयः ॥४५८॥

स्यात्कुतोत्र स भूपाल इति ब्रुवति पार्थिवे । जयापीडागमाशङ्कि पुरमासीद्भयाकुलम् ॥४५९॥

ततः पौरान्विमृश्यैवं जयन्तः क्षितिपोब्रवीत् । प्रहर्षावसरे मूढाः कस्माद्वो भयसंभवः ॥४६०॥ 460

श्रूयते हि जयापीडो राजा भुजबलोर्जितः । केनापि हेतुना भ्राम्यन्नेकाक्येव दिगन्तरे ॥४६१॥

राजपुत्रः कल्हट इत्युक्ता कल्याणदेव्यसौ । तस्मै नियमिता दातुं निष्पुत्रेण सता मया ॥४६२॥

सोन्वेष्यश्चेत्स्वयं प्राप्तस्तद्रत्नाहरणेच्छया[1] । रत्नद्वीपं प्रतिष्ठासोर्निधानासादनं गृहात् ॥४६३॥

अस्मिन्नेव पुरे तेन भाव्यं भुवनशासिना । ब्रूयादेनं समान्वेष्य योस्मै दद्यामभीप्सितम् ॥४६४॥

वाचि सप्रत्यया[1]: पौरा भूपतेः सत्यवादिनः । अन्विष्य कमलावासवर्तिनं तं न्यवेदयन् ॥४६५॥ 465

सामात्यान्तःपुरोभ्येत्य प्रयत्नेन प्रसाद्य तम् । ततः स्ववेश्म नृपतिर्निनाय विहितोत्सवः ॥४६६॥

कल्याणदेव्यास्तेनाथ कल्याणाभिनिवेशिना । राजलक्ष्म्या व्यपास्ताया इव सोजनि पहल्करम् ॥४६७॥

व्यधाद्दिनापि सामग्रीं तत्र शक्तिं प्रकाशयन् । पञ्च गौडाधिपाञ्जित्वा श्वशुरं तदधीश्वरम् ॥४६८॥

गतशेषं[1] प्रभुत्यक्तं सैन्यं संवाहयन्स्थितः । मित्रशर्मात्मजो देवशर्मामात्यस्तमाययौ ॥४६९॥

निजदेशं प्रति ततः स प्रतस्थे तदर्थितः । अग्रे जयश्रियं कुर्वन्पश्चात्तेथ सुलोचने[1] ॥४७०॥ 470

सिंहासनं जितादाजौ[1] कन्यकुब्जमहीभुजः । स राज्यककुदं राजा जहारोदारपौरुषः ॥४७१॥

तस्मिन्प्रविष्टे स्वभुवं स्फूर्जदूर्जितविक्रमे । सैन्यैः समं समित्सज्जैर्जज्जो योद्धुं विनिर्ययौ ॥४७२॥

शुष्कलेत्राभिधे ग्रामे तेन सार्धं सुदारुणः । जयापीडस्य संग्रामः सुबहूनि दिनान्यभूत् ॥४७३॥

अनुरक्तप्रजो राजा जज्जराज्यासहिष्णुभिः । युधि सोन्वीयमानो[1]भूद्ग्राम्याटविकमण्डलैः ॥४७४॥

श्रीदेवो ग्रामचण्डालः प्राप्तो ग्राम्यैः समं युधि । कोत्र जज्ज इति भ्राम्यन्योधान्पप्रच्छ सर्वतः ॥४७५॥ 475

तृष्णार्तं स्वर्णभृङ्गारात्पिबन्तं वारि तस्य ते । रणमध्ये हयारूढं तं दूरात्समदर्शयन् ॥४७६॥

---

४५१. [1]) Thus corr. by $A_3$ from $A_1$ °सिंहं. ४५२. [1]) Thus corr. by $A_3$ from $A_1$ कम्प°. ४५३. [1]) $A_3$ gloss खञ्जर. ४६३. [1]) $A_2$ gloss कृष्टान्तोयम्. ४६५. [1]) $A_4$ gloss सविश्वासाः. ४६९. [1]) $A_2$ gloss प्रकृतं कथासम्बन्धं स्मारयति गतशेषमिति. ४७०. [1]) $A_4$ gloss कमलानर्तकीं कल्याणदेवीं च. ४७१. [1]) Thus $A_3$; $A_1$ °दाशौ. ४७४. [1]) Thus $A_3$; $A_1$ सोन्विष्यमानो.

भ्रमयन्क्षेपणीयं स क्षिप्त्वाश्मानं तदानने । सोयं हतो मया जज्ज इत्यमोघक्रियोनदत् ॥४७७॥
साहायकाय[1] राज्ञोहं यामीत्युक्त्वार्थिताशनैः[2] । मातुर्हसन्त्या जज्जस्य प्रतिज्ञायाययौ वधम् ॥४७८॥
अश्मसंरुग्ण[1]भीमास्यं मुमूर्षुं पतितं हयात् । विवेष्टमानं मेदिन्यां जज्जं त्यक्त्वा ययुर्निजाः ॥४७९॥
480 स समर्थाहितापातचिन्तासततदुःस्थितः । द्रोहार्जितेन[1] राज्येन त्रिभिर्वर्षैर्व्ययुज्यत ॥४८०॥
न्यासापहाराद्वणिजां वेश्यानां कामिवञ्चनात् । द्रोहाच्चोपनता[1] राज्ञामस्थिरा एव संपदः ॥४८१॥
हते जज्जे जयापीडः प्रत्यावृत्य निजां श्रियम् । जग्राह दोष्णा भूभारं कृत्येन च सतां मनः ॥४८२॥
प्रपेदे यत्र कल्याणं स विरोधिवधान्नृपः । देशे कल्याणपुरकृत्तत्र कल्याणदेव्यभूत् ॥४८३॥
राजा मल्हाणपुर[1]कृच्चक्रे विपुल[2]केशवम् । कमला सा[3] स्वनाम्नापि कमलाख्यं[4] पुरं व्यधात् ॥४८४॥
485 महाप्रतीहारपीठा[1]धिकारं प्रतिपद्य सः । कल्याणदेवी[2]दाक्षिण्यादकरोदधिकोन्नतिम्[2] ॥४८५॥
उत्पत्तिभूमौ देशेस्मिन्दूरदूरतिरोहिता[1] । कश्यपेन वितस्तेव तेन विद्यावतारिता ॥४८६॥
वचोमूर्खोयमित्येव कस्मैचिद्वदते स्फुटम् । सर्वज्ञाना[1]न्ददच्चक्रे सर्वान्विद्याभियोगिनः ॥४८७॥
देशान्तरादागमय्य[1] व्याचक्षाणा[2]न्क्षमापतिः । प्रावर्तयत विच्छिन्नं महाभाष्यं स्वमण्डले ॥४८८॥
क्षीराभिधाच्छ[1]ब्दविद्योपाध्यायात्संभृतश्रुतः । बुधैः सह ययौ वृद्धिं स जयापीडपण्डितः ॥४८९॥
490 भूपतेरात्मना स्पर्धां चक्षमे न स कस्यचित् । आत्मनस्तु बुधैः स्पर्धी शुद्धधीर्बह्वमन्यत ॥४९०॥
तावत्पण्डितशब्देभूद्राजशब्दादपि प्रथा । तैस्तैर्दोषैर्न तु म्लानिं कालान्तरवदाययौ ॥४९१॥
नृपतौ विद्वदायत्ते राजसां[1]मुख्यकाङ्क्षिभिः । गृहा बभूवुर्विदुषां व्याप्ताः सेवागतैर्नृपैः ॥४९२॥
समग्रहीत्तथा राजा सोन्विष्य निखिलान्बुधान् । विद्वद्दुर्भिक्षमभवद्यथान्यनृपमण्डले ॥४९३॥
अध्यक्षो भक्तशालायां शुक्रदन्तस्य मन्त्रिणः । विद्वत्तया थक्किया[1]ख्यस्तेन स्वीकृत्य वर्धितः ॥४९४॥
495 विद्वान्दीनारलक्षेण प्रत्यहं कृतवेतनः । भट्टो[1]भूदुद्भटस्तस्य भूमिभर्तुः सभापतिः ॥४९५॥
स दामोदरगुप्ताख्यं कुट्टनीमतकारिणम्[1] । कविं कविं[2] बलिरिव धुर्यं धीसचिवं व्यधात् ॥४९६॥
मनोरथः शङ्खदन्तश्चटकः संधिमांस्तथा । बभूवुः कवयस्तस्य वामनाद्याश्च मन्त्रिणः ॥४९७॥
स स्वप्ने[1] पश्चिमाशायां लक्षयन्नुदयं रवेः । देशे धर्मोत्तराचार्यं[2] प्रविष्टं साध्वमन्यत ॥४९८॥
सचेताः संस्तवव्यक्तविवक्तृत्वो बभूव सः । भावानां भुज्यमानानामास्वादान्तरविन्नृपः ॥४९९॥
500 अपश्यद्भिर्महास्वादान्भावान्स्वादुविवेकिभिः । किं ज्ञेयमशनादन्यत्क्ष्मापैरन्धैरि[1]वोक्षभिः ॥५००॥

---

४७८. [1]) $A_2$ indicates by asterisks and the marginal note मण्डलैः साहायकाय, a different reading in which this verse followed after verse 474.—[2]) Thus $A_3$; $A_1$ हिताशनैः. ४७९. [1]) Thus $A_1$; $A_3$ °संरोध°. ४८०. [1]) Thus $A_3$; $A_1$ द्रोहार्ज्जितेन. ४८१. [1]) Thus corr. by $A_3$ from $A_1$ °चोपहता. ४८४. [1]) $A_1$ gloss मलरों इति भाषया.—[2]) Doubtful: thus $A_2$; $A_1$ विरलके°; $A_3$ मरलकेशवम्.—[3]) Thus corr. by $A_3$ from $A_1$ स्वा.—[4]) $A_2$ gloss कलमपुरं. ४८५. [1]) Thus corr. by $A_2$ from $A_1$ °पेडाधि°. Cf. महाप्रतीहारपीडा iv. 142.—[2]) Thus $A_1$; $A_3$ °देवीं and °न्नताम्. ४८६. [1]) Thus G R Edd.; A °हितो. ४८७. [1]) वैज्ञाना supplied by $A_3$ in space left by $A_1$. ४८८. [1]) $A_3$ gloss प्रापय्य.—[2]) Thus $A_3$; $A_1$ °चक्षाणः. ४८९. [1]) $A_2$ gloss क्षीरस्वामिनः. ४९२. [1]) Thus corr. by $A_1$ from राज्य°. ४९४. [1]) Thus corr. by later hand from $A_1$ थाकया°. ४९५. [1]) $A_2$ gloss महोद्भट आलङ्कारिकः. ४९६. [1]) $A_3$ °कारणम्.—[2]) $A_3$ gloss शुक्रं°. ४९८. [1]) Thus $A_3$; $A_1$ सुस्वप्नं.—[2]) Thus according to marginal note of $A_3$: देशे धर्मोत्तराचार्यमित्यन्यादर्शे ; $A_1$ देशे धर्मोत्तराचार्ये. ५००. [1]) Thus corr. by $A_2$ from $A_1$ °रन्धैरि°.

आरूढस्य चितां कृतानुमरणोद्योगप्रियालिङ्गनं[1] पुण्ड्रेक्षुद्रवपानमुल्बणमहामोहप्रलुप्तस्मृतेः ।
वीतासारवतंसमाल्यवलयामोदश्च यादृग्भवेद्भावानां सुभगः स्वभावमहिमा निश्चेतसस्तादृशः ॥५०१॥
सत्त्वविक्रमयोस्तस्य द्वयोर्दर्पणयोरिव । एकैव बिम्बिता मूर्तिः सहस्रगुणतां ययौ ॥५०२॥
आंकुर्वन्विगुणामाज्ञां[1] लङ्केन्द्रांत्पञ्च[2] राक्षसान् । तेनानयेति जगदे दूतो जातु पुरः स्थितः ॥५०३॥
सांधिविग्रहिकः[1] सोथ गच्छन्पोताच्युतोम्बुधौ । प्राप पारं तिमिग्रासं तिमिमुत्पाट्य निर्गतः ॥५०४॥
प्रियमर्त्यो रामभक्त्या नृपाज्ञालेखदायिनम् । स्वदेशमनयत्तं रक्षोभिस्तं विभीषणः ॥५०५॥ 505
दूतं वित्तैः पूरयित्वा सरोगाधं च राक्षसैः । चक्रे जयपुरं कोट्टं त्रिविष्टपसमं नृपः ॥५०६॥
बुद्ध[1]त्रयं महाकारं विहारं च विधाय सः । नगरान्तर्जयादेवीं पुण्यकर्मा स निर्ममे ॥५०७॥
तत्पुरे चतुरात्मा च शेषशायी च केशवः । विष्णुलोकस्थितिं त्यक्त्वा ध्रुवं बध्नाति संनिधिम् ॥५०८॥
अन्यत्कर्मान्तरं किंचित्कारयित्वा स राक्षसान् । व्यधात्कारुभिरेवाम्भ इति शंसन्ति केचन ॥५०९॥
स हि स्वप्ने जलान्तर्मे कुरु द्वारवतीमिति । उक्तः कंसारिणा चक्रे विनिर्माणं तथाविधम् ॥५१०॥ 510
श्रीद्वारवत्यधिष्ठानं बाह्यं[1] कोट्टं तथा ह्यसौ । अभ्यंतरं[2] जयपुरं ब्रूतेद्याप्यखिलो जनः ॥५११॥
मन्त्री पञ्चमहाशब्दभाजनं जगतीभुजः । तस्मिञ्जयपुरे कोट्टे जयदत्तो व्यधान्मठम् ॥५१२॥
राजश्वशुरः प्रमोदस्य जामाता मथुरापतेः[1] । आचाभिधो व्यरचयच्छुचिराचेश्वरं हरम् ॥५१३॥
पुनः संभृतसामर्थ्यो दिग्जयाय विनिर्ययौ । बलैर्जलधिवेलाद्रीन्द्राघयन्नलघुद्विपैः ॥५१४॥
संप्रविष्टापि पूर्वाब्धिमविच्छिन्ना[1] हिमाचले । भगीरथस्य गङ्गेव रेजे तस्यानुगा चमूः ॥५१५॥ 515
सार्धं प्रचण्डैश्चण्डालैरटन्तः कटकाद्बहिः । तस्यासन्यामिका रात्रौ मुम्मुनिप्रमुखा नृपाः ॥५१६॥
नामान्यद्विनयादित्य इति प्रख्यापयन्नृपः । पूर्वाशां विनयादित्यपुरेणालंकृतां व्यधात् ॥५१७॥
अत्युत्सेकेन महसा[1] साहसाध्यवसायिनाम्[2] । श्रीरारोहति संदेहं महतामपि भूभृताम् ॥५१८॥
भीमसेनाभिधानस्य स दुर्गं पूर्वदिक्पतेः[1] । निःशब्दो व्रतिभिः सार्धं व्रतिलिङ्गी विवेश यत् ॥५१९॥
तं रन्ध्रान्वेषिणं तत्र परिज्ञाय चिरस्थितः । भ्राता जज्जस्य सिद्धाख्यो गत्वा राज्ञे न्यवेदयत् ॥५२०॥ 520
भूपतिं[1] भीमसेनोथ राजाकस्माद्बबन्ध तम् । नहुषाजगरो भीममिव भीमपराक्रमम् ॥५२१॥
तस्मिन्वीरे तथा बद्धे धुर्ये पुरुषकारिणाम् । पौरुषद्वेषिणा जाने दैवेनोन्नमितं शिरः ॥५२२॥
जयापीडस्त्वसंमूढो व्यसनेष्यतिदारुणे । तांस्तान्संचिन्तयन्नासीदुपायानुदयोन्मुखः ॥५२३॥
अत्रान्तरे नरपतेः पौराणामतिदुस्तरा । लूता[1]मयकृता व्यापदुदपद्यत मण्डले ॥५२४॥

---

५०१. [1]) $A_2$ note in margin : आरूढस्येत्यादिस्थाने षण्ढस्योन्मदबालपङ्कजमुखीपीनस्तनालिङ्गनमित्यपि पाठो रम्यः. ५०३. [1]) The original reading of $A_1$, अकुर्वन्वि°, has been corrected into आंकुर्वन्वि° by a later hand, probably $A_2$; $A_2$ explains the latter reading by the gloss विगुणामपि आज्ञामांकुर्वन् आं अङ्गीकारे. $A_3$ gives the interlinear note अकुर्वन्विगुणामित्यन्यादर्शे, and explains this reading in margin : दूतः किं कुर्वन् आज्ञां राजसम्बन्धिनीं विगुणां निष्फलां अकुर्वन् न विरचयन् मानयन्नाज्ञामित्यर्थः.—[2]) Thus corr. by $A_2$ from $A_1$ लङ्केन्द्रान्पञ्च. ५०४. [1]) Thus corr. by later hand from $A_1$ °ग्रहकः. ५०७. [1]) बुद्ध supplied by $A_3$ in space left by $A_1$; found also in G R; C पुर°. ५११. [1]) Thus A R G; C राज्यं.—[2]) $A_3$ gloss अन्तर्कोट इति भाषया. ५१३. [1]) Thus corr. by $A_2$ from $A_1$ मधुरा°. ५१५. [1]) Thus corr. by $A_3$ from $A_1$ °द्रिं. ५१८. [1]) Thus $A_3$; $A_1$ सहसा.—[2]) Thus corr. by $A_3$ from $A_1$ सहसाध्यवसायिनाम्; $A_3$ gloss साहसेन हिताहितानपेक्षेण कर्मणा अध्यवसायो येषां. ५१९. [1]) Thus $A_3$; $A_1$ °भूपतेः. ५२१. [1]) Thus corr. by $A_3$ from $A_1$ °पतिर्भीम°. ५२४. [1]) $A_2$ gloss उच्छूनो रक्तवर्णः पिटकाकृतिविस्तृतः सञ्चारी च त्वचि रोगविशेषः लूताख्यः लोत् इति प्रसिद्धः.

525 आमयः स्पर्शसंचारी[1] तत्र व्यापादकश्च सः । देशदोषादतो जन्तुर्लूताव्याप्तो विवर्ज्यते ॥५२५॥

तदाकर्ण्य जयापीडो जातोपायप्रयुक्तधीः । स्वभृत्येनोपयुक्तानि द्रव्याण्यानीतवान्रहः ॥५२६॥

तैः पित्तोद्रेचकैर्भुक्तैर्ज्वलत्पित्तोत्वहज्ज्वरम् । वच्चवृक्षपयश्चाङ्गे क्षिप्त्वा सपिटकोभवत् ॥५२७॥

तं लूताव्याप्तमाकर्ण्य विपक्षो रक्षिणां मुखात् । विपत्स्यते ध्रुवमिति ध्यात्वा देशाद्बहिर्व्यधात् ॥५२८॥

एवं स्वमतिमाहात्म्यात्संतीर्णो विपदर्णवात् । व्याप्तव्योमाग्रहीद्दुर्गं यशश्च परिपन्थिनः ॥५२९॥

यः सर्वकालमबुधैः परिहस्यमानो मूलाङ्कुरादपि न जातु पुरस्करोति ।

530 व्यापत्सु शास्त्रविटपी स फलं प्रसूय पुंसः किलैकपद एव लुनात्यलक्ष्मीम् ॥५३०॥

तमैच्छदभिसंधातुं विद्याविक्रमसंयुतः । मायाव्यरमुडिर्नाम राजा नेपालपालकः ॥५३१॥

अकृतप्रणतिस्तस्य[1][2] प्रविष्टस्य स्वमण्डलम् । अग्रात्तुदूरमध्वानं ससैन्योपससार सः ॥५३२॥

जिगीषोस्तस्य[1] तु तथा तत्तत्पार्थिवनिर्जयः । पृथक्प्रयत्ननिर्वर्त्यो नाभूत्तदनुसारिणः ॥५३३॥

मग्नं क्वापि क्वचिद्दृश्यं प्रतिदेशं स वैरिणम् । श्येनः[1] कपोतं कक्ष्यान्तरिवान्विष्यञ्[2]जगाम सः ॥५३४॥

535 ततो निःशेषितापाये तस्मिन्कुर्वन्स दिग्जयम् । आसन्नाब्धेस्तटे सिन्धोः[1] समुपावेशयद्बलम् ॥५३५॥

प्रतस्थे दिवसैर्द्वित्रैरथ पूर्वार्णवोन्मुखः । कर्षन्वेलानिलस्पर्शोत्सृष्टध्वजपटाश्चमूः ॥५३६॥

ततस्तस्मिन्सरित्पारे दक्षिणस्मिन्क्षमापतेः । तस्थावरमुडिः सैन्यं स्वच्छत्राङ्कं प्रकाशयन् ॥५३७॥

भूरिभेरीरवोद्गारि प्रबलं वीक्ष्य तद्बलम् । प्रजज्वाल जयापीडः पीतसर्पिरिवानलः ॥५३८॥

स जानुदघ्नं निर्विघ्नं पश्यन्नग्रे सरिज्जलम् । अपूर्वत्वादभूमिज्ञः क्रुद्धस्तत्तु[1] व्यगाहत ॥५३९॥

540 मध्यं प्राप्ते नृपे पूर्णा वेलया वर्धमानया । अकालेभूदगाधाम्भाः सार्णवाभ्यर्णगा सरित् ॥५४०॥

नरनागाश्वबहुलं तथा सैन्यं महीपतेः । प्रवृद्धया प्लाव्यमानं क्षणात्संक्षयमाययौ ॥५४१॥

नृपतिर्वीचिसंमर्द[1]भ्रंशिताभरणांशुकः । बाहुभ्यां लहरीश्छिन्दञ्जलैर्दूरमनीयत ॥५४२॥

एकस्य करुणाक्रन्दैः सैन्यस्यान्यस्य गर्जितैः । सरित्तरङ्गघोषैश्च बभूवुस्तुमुला दिशः ॥५४३॥

क्षिप्रकारी सदृतिभिः[1] संनद्धैः सरितोन्तरात् । स चाकृष्य जयापीडं बबन्ध विहितोत्सवः ॥५४४॥

दैवस्याम्बुमुचश्च नास्ति नियमः कोप्यानुकूल्यं प्रति व्यञ्जन्यः प्रियमुत्कटं घटयते जन्तोः क्षणादप्रियम् ।

545 क्षिप्रं दीर्घनिदाघवासरविपत्संतापनिर्वापणं प्रादुष्कृत्य वनस्पतेः प्रकुरुते विद्युद्विसर्गं च यः ॥५४५॥

स कालगण्डिकातीराश्रयात्युचाश्मवेश्मनि । निचिक्षेप जयापीडमाप्तानां[1] रक्षिणां करे ॥५४६॥

तथा काश्मीरिको राजा निमग्नो व्यसने पुनः । स किंकर्तव्यतामूढः शुचा गूढमदह्यत ॥५४७॥

कलावत्तु शशाङ्कोपि तेजस्विष्वर्यमापि तम् । न ददर्श यथा धीमान्स ररक्ष तथा नृपः ॥५४८॥

अपश्यन्निर्गतः[1] किंचिदालोकन्यस्तलोचनः[2] । आसन्नां तटिनीमासीदुपायांश्च स चिन्तयन् ॥५४९॥

---

५२५. [1]) Thus corr. by $A_1$ from सर्वसं°. ५३२. [1]) $A_4$ gloss आरमुडिः.—[2]) $A_4$ gloss जयापीडस्य.—[3]) Thus $A_1$; $A_3$ अगास्तु°; G R have both readings. ५३३. [1]) $A_4$ gloss जयापीडस्य. ५३४. [1]) $A_3$ gloss श्येनः कपोतं भक्षयतीति प्रसिद्धिः.—[2]) Emended; A G R °न्वेष्य°. ५३५. [1]) $A_2$ gloss सरितः. ५३७. [1]) Thus corr. by $A_3$ from $A_1$ तस्थावुरमुडेः. ५३९. [1]) Thus corr. by $A_2$ from $A_1$ °स्तंतं. ५४२. [1]) Thus corr. by $A_2$ from $A_1$ °मर्म°. ५४४. [1]) $A_2$ gloss दृतिः जलोत्तरणार्थं भ्राहा इति प्रसिद्धा. ५४६. [1]) Thus corr. by $A_3$ from $A_1$ °पीडं सप्तानां. ५४९. [1]) Thus corr. by later hand from $A_1$ निर्गतं.—[2]) $A_3$ gloss आलोक्यतेनेनेत्यालोकः वातायनं । तस्मिन् न्यस्ते लोचने येन सः.

अत्रस्थात्रेदकास्तत्र[1] ग्रथिताः पृथिवीभुजा । आर्द्रान्तःकरणैः श्लोकाः स्मर्यन्तेद्यापि सूरिभिः ॥५५०॥ 550

तथा तस्मिन्स्थिते[1] मानी देवशर्मैव मन्त्रिषु । चिन्तयन्स्वामिसंमानमनिशं पर्यतप्यत ॥५५१॥

भर्तुः स्वदेहत्यागेन[1] स हितं कर्तुमुद्यतः । दूतैररमुडे[2]श्चक्रे प्रियवाग्भिः प्रलोभनम्[3] ॥५५२॥

जयापीडश्रिया साकं राज्यं कश्मीरमण्डले । दास्यामि तुभ्यमित्यस्य दूतैः स श्रावितोभवत् ॥५५३॥

प्राप्तेषु प्रतिदूतेषु पूर्णायामथ संविदि । गृहीतकटको मन्त्री नेपालविषयं ययौ ॥५५४॥

स कालगण्डिकासिन्धोरर्वाचि कटकं तटे । स्थापयित्वा परं पारं ययौ मितपरिच्छदः ॥५५५॥ 555

सामन्तैरग्रमायातैस्तां सभां संप्रवेशितम् । सत्कृत्यारमुडिः[1] प्रह्वं न्यवेशयत विष्टरे ॥५५६॥

अध्वश्रान्त इति क्षिप्रं प्रतिमुक्तः[1] क्षमाभुजा । तद्विसृष्टोपचारस्तन्निनायावसथे दिनम् ॥५५७॥

स चारमुडिभूभृच्च पीतकोशौ[1] परस्परम् । आसतां निर्जनेन्येद्युः कर्तव्यकृतनिश्चयौ ॥५५८॥

नृपमूचेथ सचिवो जयापीडार्जितं धनम् । अस्ति सैन्ये तदाप्तानां तस्य वा विदितं च तत् ॥५५९॥

दानेन भविता मोक्षस्तवेत्युक्त्वा विमोहयन् । तस्मात्त्वं प्रष्टुमिच्छामि क्व वसु न्यस्तमित्यहम् ॥५६०॥ 560

अत एव मया सैन्यं संहतं न प्रवेशितम् । यदेत[1]न्मध्यगाः शक्या न बन्द्धुं[2] न्यासधारिणः ॥५६१॥

तस्मादेकैकमाहूय तेषु बद्धेषु सैनिकाः । कोपमज्ञातहृदया न यास्यन्ति विवक्षवः ॥५६२॥

एवं विमोहितात्तस्मात्प्राज्ञोनुज्ञां[1] स लब्धवान् । बद्धस्य प्रययौ पार्श्वं जयापीडमहीभुजः ॥५६३॥

तदालोकनजं शोकं गोपयन्[1]धैर्यसागरः । गृहं तन्निर्जनं कृत्वा क्षिप्रं पप्रच्छ तं नृपम् ॥५६४॥

अपि त्वया निजं तेजो भित्तिभूतं न हारितम् । तस्मिन्हि सति सिध्यन्ति साहसालेख्यकल्पनाः ॥५६५॥ 565

स तं बभाषे निःशस्त्रो मन्त्रिन्नेवं व्यवस्थितः । अद्भुतं कर्म किं कुर्यां ध्रियमाणेन तेजसा ॥५६६॥

मन्त्री तमूचे तेजश्चेद्राजन्न निसृतं तव । जानीहि तत्क्षणेनैव लङ्घितं विपदर्णवम् ॥५६७॥

अपि वातायनादस्मात्पतित्वा निम्नगाम्भसि । पारं गन्तुं समर्थोसि सैन्यं ह्यत्र निजं तत्र ॥५६८॥

राजा जगाद तं नास्मात्पतित्वोत्थीयतेम्भसः । विना दृतिं दृतिश्चात्र दूरपाताद्विदीर्यते ॥५६९॥

तस्मान्नायमुपायोत्र न च नाम विमानितः । बहु मन्ये तनुत्यागमनिर्मथ्यापकारिणम् ॥५७०॥ 570

ततो[1] निश्चित्य सोमात्यस्तमवादीन्महीपते । बहिः केनाप्युपायेन वहेस्त्वं[2] नालिकाद्वयम्[3] ॥५७१॥

प्रविश्यैकाकिनैवाथ द्रष्टव्यः संभृतो मया । सरिदुत्तरणोपायः सोनुष्ठेयोप्यशङ्कितम् ॥५७२॥

श्रुत्वेति निर्गतो गत्वा पायु[1]क्षालनवेश्म सः । सविलम्बं बहिर्वेलां[2] तदुक्तामत्यवाहयत् ॥५७३॥

एकाकी संप्रविष्टोथ तं ददर्श च्युतं क्षितौ । विपन्नं गलमुद्बध्य दृढया चेलचीरया ॥५७४॥

---

५५०. [1]) $A_3$ gloss बन्धनवेश्मानि. ५५१. [1]) Thus corr. by later hand from $A_1$ °न्स्थितो. ५५२. [1]) न supplied by $A_3$.—[2]) Emended; $A_1$ °रारमुडैश्चक्रे, changed by later hand to °मुडेश्चक्रे.—[3]) Thus corr. by later hand from $A_1$ °ग्भिर्विलोभनम्. ५५६. [1]) Thus corr. by $A_3$ from $A_1$ °डेः. ५५७. [1]) Thus $A_1$; $A_3$ प्रतिक्षिप्तः. ५५८. [1]) $A_2$ gloss पीतकोशौ कृतद्रौहिकावित्यर्थः; to द्रौहिका° $A_2$ adds the note शपथः. ५६१. [1]) Thus corr. by $A_3$ from $A_1$ यदि तन्म°; $A_3$ gloss एतन्मध्यगाः संहतसैन्यमध्यगाः इत्यर्थः.—[2]) Thus corr. by $A_3$ from $A_1$ बन्धुं. ५६३. [1]) Thus $A_3$; $A_1$ प्राज्ञोप्याज्ञां; R G follow $A_3$. ५६४. [1]) Thus corr. by $A_3$ from $A_1$ दर्शय°. ५७१. [1]) Thus corr. by $A_3$ from $A_1$ इति.—[2]) Thus corr. by later hand from $A_1$ वहस्त्वं; $A_3$ gloss वहेः गमयेत्यर्थः.—[3]) $A_3$ gloss घटिकाद्वयमित्यर्थः. ५७३. [1]) Thus corr. by $A_2$ from $A_1$ पाद°.—[2]) $A_3$ gloss घटिकाद्वयरूपां.

575 सद्यो[1] व्यापादिततनुः श्वासापूरितविग्रहः[2] । अभेद्योहं तव दृतिर्मा[3]मा[4]रुह्य तरापगाम् ॥५७५॥

आरोढुरूरु[1]बन्धाय स्वोर्वोरुष्णीषपट्टिका[2] । बद्धा मया तां प्रविश्य क्षिप्रमेव पताम्भसि ॥५७६॥

नखनिर्भिन्नगात्रास्रलिखितामिति संविदम् । दृष्ट्वा चावाचयत्कण्ठनिबद्धांशुकपल्लवे ॥५७७॥ तिलकम् ॥

विस्मयस्नेहयोः पश्चात्पूर्वं स सरितस्ततः । प्रवाहे पतितो राजा परं पारं समासदत् ॥५७८॥

प्राप्तसैन्यः प्रविश्याथ क्षणेनैव निनाय सः । तमशेषं सभूपालं नेपालविषयं क्षयम् ॥५७९॥

580 रक्षिगोपि न यावत्तमजानन्बन्धनाच्युतम् । तावदेव कथाशेषं विषयं तं चकार सः ॥५८०॥

नृत्यत्कबन्धः स्वर्गस्त्रीमुक्तस्रक्तूर्यघोषवान् । भूपतेर्बन्धनान्मोक्षे बभूव समरोत्सवः ॥५८१॥

दावानलोल्बणभुवो गिरयो निदाघे यत्रैव दूरमितरे परिवर्जनीयाः ।
तत्रैव संभवति सान्द्रहिमद्रवार्द्रश्चित्रं तुषारशिखरी नितरां निषेव्यः ॥५८२॥

जज्जादीनां क्षणे[1] यत्र जन्म स्वामिद्रुहामभूत् । तत्रैव मन्त्रिणश्चित्रं कृतिनो देवशर्मणः ॥५८३॥

नाभूद्धि सदृशः[1] सूनुः स पितुर्मित्रशर्मणः । तमोमयो भासुरस्य[2] भानोरिव शनैश्चरः ॥५८४॥

585 रक्षारत्नोपमे तस्मिन्सचिवेस्तमुपागते । प्राप्तामपि श्रियं मेने नृपतिर्हारितामिव ॥५८५॥

तस्य दिग्विजयस्यान्ते मानम्लानिर्विनिर्ययौ । मानसात्पृथिवीभर्तुर्नामात्योपक्रिया पुनः ॥५८६॥

चित्रं जितवतस्तस्य स्त्रीराज्ये मण्डलं महत् । इन्द्रियग्रामविजयं बहुमन्यन्त भूभुजः ॥५८७॥

कर्णश्रीपटमाबध्य स्त्रीराज्यान्निर्जिताद्धृतम् । धर्माधिकरणाख्यं च कर्मस्थानं विनिर्ममे ॥५८८॥

द्वितीयं चलगञ्जाख्यं कर्मस्थानमपि व्यधात् । उपयुक्तं प्रयाणेषु गञ्जे दूरस्थिते निजे ॥५८९॥

590 किमन्यत्तद्भुजावासनिवासिन्या जयश्रियः । चत्वारोम्बुधयोभूवन्विलासमणिदर्पणाः ॥५९०॥

पुनः प्रविश्य कश्मीरान्स भूपैः परिवारितः । चिराय बुभुजे राजा विजयोपार्जितां श्रियम् ॥५९१॥

तं कदाचिन्नृपं स्वप्ने सर्वाशाविजयोर्जितम् । पुमान्दिव्याकृतिः कोपि व्याजहार कृताञ्जलिः ॥५९२॥

सुखं त्वद्विषये राजन्वसन्नस्मि सबान्धवः । नागेन्द्रोहं महापद्मनामा त्वां शरणं श्रितः ॥५९३॥

द्राविडो मान्त्रिकः कश्चिन्मामितो नेतुमुद्यतः । जलाकाङ्क्षिणि वित्तेन विक्रेतुं मरुमण्डले ॥५९४॥

595 तस्माच्चेत्पासि मां तत्ते स्वर्णधातुयुतं गिरिम् । स्वदेशे दर्शयिष्यामि स्फीतोपकृतिकारिणः ॥५९५॥

राजा स्वप्ने निशम्येति दिक्षु संप्रेरितैश्चरैः[1] । कुतोपि प्राप्तमानीय तं पप्रच्छ चिकीर्षितम् ॥५९६॥

दत्ताभयः स नागोक्तं यथावत्सर्वमुक्तवान् । सविस्मयेन भूभर्त्रा स्वयं भूयोप्यपृच्छ्यत ॥५९७॥

भूरियोजनविस्तीर्णात्सरसोभ्यन्तरात्त्वया । नागः प्रभावोत्कृष्टः स निष्क्रष्टुं शक्यते कथम् ॥५९८॥

स तं व्यजिज्ञपद्राजन्नचिन्त्या मन्त्रशक्तयः । ताश्चेद्दिदृक्षसे क्षिप्रमेत्याश्चर्यं विलोक्यताम् ॥५९९॥

600 अथानुगम्यमानः स राज्ञा प्राप्तः सरोन्तिकम् । अभिमन्त्र्योज्झितैर्बाणैर्बद्धाशोशोषयज्जलम् ॥६००॥

---

५७५. [1]) $A_2$ gloss सद्यो व्यापादिततनुरित्यादि पताम्भसीत्यन्ता शिक्षा राज्ञः कृते नखनिर्भिन्नस्वशरीररक्तेन लिखिता तेन कृतज्ञेन मंत्रिवरेण स्वकीयकण्ठनिबद्धे वस्त्रखण्डे.—[2]) $A_2$ gloss अत एव दृतिवदित्यर्थः.—[3]) $A_1$ originally दृतेर्मा° ; to this reading refers the gloss of $A_2$: दृतेः सकाशादप्यभेद्योहमित्यर्थः. On altering the reading to दृतिर्मा°, $A_2$ has struck out the first gloss and added a fresh one: अहमभेद्यो दृतिरस्मि.—[4]) $A_2$ gloss मां दृतिरूपं. ५७६. [1]) Thus corr. by later hand from $A_1$ °रूढ-बन्धाय.—[2]) $A_2$ gloss उष्णीषपट्टिका वेष्टनाञ्चलद्वयपट्टिकेत्यर्थः. ५८३. [1]) Thus corr. by later hand from $A_1$ क्षणं. ५८४. [1]) Thus A R G ; C नाभूद्विसदृशः.—[2]) Thus $A_1$; $A_3$ भास्वरस्य. ५९६. [1]) Thus $A_1$; $A_3$ °प्रेषितैश्च°.

राजापश्यत्ततः पङ्के लुठन्तं मानुषाननम् । वितस्तिदेश्यमुरगं भूरिह्रस्वोरगान्वितम् ॥६०१॥
मन्त्रसंकोचितं राजन्गृह्णाम्यमुमिति ब्रुवन् । मा ग्रहीरिति भूपेन सोभिधाय[1] न्यषिध्यत ॥६०२॥
तूर्णं राजाज्ञया तेन[1] मन्त्रवीर्येथ संहृते । सरोभूत्प्रागवस्थं तत्पुनर्व्याप्तदिगन्तरम् ॥६०३॥
द्राविडं द्रविणं दत्त्वा विसृज्याचिन्तयन्नृपः । दद्यान्नाद्याप्यसौ नागः कथं स्वर्णाकरं गिरिम् ॥६०४॥
ध्यायन्तमेव तं स्वप्ने ततः प्रोवाच पन्नगः । केनोपकारेण गिरिः स्वर्णसूस्तव दर्श्यते ॥६०५॥ 605
स्वदेशोयं विदेशोयमिति बुद्धेः प्रवर्तकः । अन्वयव्यतिरेकाभ्यां स्थित्यभ्यासः शरीरिणाम् ॥६०६॥
शरणं त्वामहमगामवमानभयात्पुनः । शरण्येन सता तत्तु भवतैव प्रदर्शितम् ॥६०७॥
उदन्वानिव योक्षोभ्यो ज्ञायते संश्रितैः प्रभुः । का ह्रीस्ततोन्या सोन्यैर्यत्तेषामग्रेभिभूयते[1] ॥६०८॥
याभिरन्याभिभूताभिरीक्षितस्त्रातुमक्षमः । तासां केनाभिमानेन स्त्रीणां द्रक्ष्याम्यहं मुखम् ॥६०९॥
येकारणं[1]सधर्माणो व्यामूढस्य भवाम ते । विडम्ब्यमानाः क्रीडायै ते वयं प्राकृता इव ॥६१०॥ 610
अथ वा श्रीमदान्धानामप्रेक्षापूर्वकारिणाम् । यत्किंचनविधायित्वं पार्थिवानां किमद्भुतम् ॥६११॥
मन्यन्ते क्ष्माभुजः क्रीडामुन्नतानां विमाननाम्[1] । यावज्जीवं तु सश्वासं मरणं तां विदन्ति ते ॥६१२॥
उपेक्ष्य[1]पक्षे भूपानां मानः स्वार्थस्य सिद्धये । स तु प्राणानुपेक्ष्यापि ग्राह्यपक्षे मनस्विनाम् ॥६१३॥
महतो येवमन्यन्ते घटन्ते च विमानितैः । मनःस्वरूपाभिज्ञत्वं तेषां केनानुमीयते ॥६१४॥
भवन्त इव तत्रापि न वयं व्यर्थदर्शनाः । ताम्रधातुरसस्यन्दी दर्श्यते तद्गिरिस्तव ॥६१५॥ 615
इत्युक्त्वा संविदं तस्मै स्वप्न एव स तां ददौ । यथा प्रबुद्धः प्रत्यूषे प्राप ताम्राकरं गिरिम् ॥६१६॥
स तस्मात्क्रमराज्यस्थात्ताम्रमाकृष्य निर्ममे । शतं दीनार[1]कोटीनामेकोनं स्वाभिधाङ्कितम् ॥६१७॥
पूर्णं कोटिशतं कुर्याद्यः स मां निर्जयेदिति । दर्पभङ्गाय भूपानां समयं स्थापयन्नृपः ॥६१८॥
समस्या इव स क्ष्माभृत्सावशेषैर्विचेष्टितैः । चिक्षेप तुल्यनिर्माणकुण्ठत्वायेति भूभृताम् ॥६१९॥
अथाकस्मान्महीपालः प्रजाभाग्यविपर्ययैः । त्यक्त्वा पैतामहं मार्गं ययौ पित्र्येण सोध्वना ॥६२०॥ 620
किं दिग्जयादिभिः क्लेशैः स्वदेशादर्ज्यतां धनम् । इत्यर्थ्यमानः कायस्थैः स्वमण्डलमदण्डयत् ॥६२१॥
शिवदासादिभिर्लुब्धैर्धनस्थानाधिकारिभिः[1] । प्रविवर्धितवित्तेच्छः सोभूल्लोभवशंवदः ॥६२२॥
काश्मीरिका[1]णामुत्पन्नं निजाज्ञाव्यवधायकम् । कायस्थवक्त्रप्रेक्षित्वं ततः प्रभृति भूभृताम् ॥६२३॥
मन्त्रस्तस्य महीभर्तुर्योभूत्तत्तन्नृपग्रहे । वास्तव्यबन्धचिन्तायां स एव स्थैर्यमाययौ ॥६२४॥
यत्सतां प्रशमाधायि पापस्योपदिदेश तत् । जयापीडस्य पाण्डित्यं प्रजापीडनशौण्डताम् ॥६२५॥ 625
स सौदास इवानेकलोकप्राणापहारकृत् । अस्तुत्यकृत्यसौहित्यं स्वप्नेपि न समाययौ ॥६२६॥
कुर्मः किल्बिषमेतदेव हृदये कृत्वेति कौतूहलात्स्वैरिण्यः क्षितिपाश्च धिक्चपलतां क्रौर्यं च कुर्युः सकृत् ।
पापाक्रान्तधियो भवन्त्यथ तथा[1] नान्त्यान्स्पृशन्त्योपि ता दूयन्ते न च ते यथा स्वपितरौ घ्नन्तोपि शान्तत्रपाः ॥६२७॥

६०२. [1]) Emended; A सोभ्यधाय. ६०३. [1]) Thus corr. by $A_3$ from $A_1$ याते. ६०८. [1]) Thus corr. by $A_3$ from $A_1$ °भूतये. ६१०. [1]) $A_1$ येऽकारण°. ६१२. [1]) Thus corr. by later hand from $A_1$ विमानिनाम्. ६१३. [1]) $A_2$ gloss त्याज्य. ६१७. [1]) Thus $A_1$; $A_3$ दीन्नार°. ६२२. [1]) Thus corr. by $A_3$ from $A_1$ °कारादिभिः. ६२३. [1]) Thus corr. by $A_3$ from $A_1$ काश्मीरका°. ६२७. [1]) Thus $A_3$; $A_1$ यथा.

लोभाभ्यासात्तथा क्रौर्यं स ययौ वत्सरत्रयम् । सह कार्षकभागेन यथाहार्षीच्छरत्फलम् ॥६२८॥

लुब्धत्वध्वस्तधीर्भूभृत्स्वल्पवित्तलवप्रदान् । सर्वस्वहारिणो मेने कायस्थान्हितकारिणः ॥६२९॥

सामुद्रास्तिमयो नृपाश्च सदृशा एके हताद[1]म्भसः स्वस्मादेव कणान्घनस्य जहतो जानन्ति ये दातृताम् ।

630 सर्वस्मात्स्फुटलुण्ठिताद्वि[2]तरतो लेशान्किलान्येपि ये दुष्कायस्थकुलस्य हन्त कलयन्त्यन्तर्हिताधायिताम् ॥६३०॥

सर्वकालं ब्राह्मणानामहो धैर्यमकुण्ठितम् । निस्त्रिंशस्य बभूवुर्ये तस्यापि परिपन्थिनः ॥ ६३१ ॥

देशान्तरं प्रयातेभ्यो ये शेषास्ते व्यरंसिषुः । विक्रोशन्तो न मरणाद्धरणान्नापि पार्थिव[1]ः ॥६३२॥

विप्राणां शतमेकोनमेकाहे[1]न विपद्यते । निवेद्यमेतदित्यूचे क्रौर्याक्रान्तोथ पार्थिवः ॥६३३॥

विपर्यस्तचरित्रस्य तस्य क्रूरस्य भूपतेः । एवं स्तुतिविपर्यासः काव्येष्वपि बुधैः कृतः ॥६३४॥

635 नितान्तं कृतकृत्यस्य गुणवृद्धिविधायिनः । श्रीजयापीडदेवस्य पाणिनेश्च किमन्तरम् ॥६३५॥

भाष्यव्याख्याक्षणे श्लोकै[1]र्वैचक्षण्यहतैः कृतः । सोयं तस्य विपर्यासो[2] बुधैरेवं प्रवर्तितः[3] ॥६३६॥

कृतविप्रोपसर्गस्य भूतनिष्ठावि[1]धायिनः । श्रीजयापीडदेवस्य पाणिनेश्च किमन्तरम् ॥६३७॥

तूलमूल्यां[1]पहर्ता च चन्द्रभागातटे स्थितः । विप्राणां शतमेकोनमशृणोत्तज्जले मृतम् ॥६३८॥

ततोग्रहारहरणादेव प्रविरतोभवत् । वास्तव्यानां हतां भूमिं न तु निःशेषतो जहौ ॥६३९॥

640 अथ विज्ञप्तिसमये तूलमूल्यौ[1]कसो द्विजाः । चुक्रुशुर्जातु तस्याग्रे प्रतीहारकराहताः ॥६४०॥

मनुमान्धातृरामाद्या बभूवुः प्रवरा नृपाः । अन्वभावि तदग्रेपि ब्राह्मणैर्न विमानना ॥६४१॥

सेन्द्रं स्वर्गं सशैलां क्ष्मां सनागेन्द्रं रसातलम् । निर्दग्धुं हि क्षणेनैव विप्राः शक्ताः प्रकोपिताः ॥६४२॥

तदाकर्ण्यास्त सामन्तत्यक्तपृष्ठः क्षमापतिः । उल्लासितैकभ्रूलेखो दर्पाद्वचनमब्रवीत् ॥६४३॥

भिक्षाकणभुजां कोयं शठानां वो मदज्वरः । येनर्षय इव ब्रूथ प्रभावख्यापकं[1] वचः ॥६४४॥

645 भीमभ्रूभङ्गभीतेषु तेषु तू[1]ष्णीं स्थितेष्वथ । इट्टि[2]लाख्यस्तमाह स्म ब्रह्मतेजोनिधिर्द्विजः ॥६४५॥

राजन्युगानुरूप्येण भावाभावानुवर्तिनः[1] । शासितुस्तेनुसारेण न कस्मादृषयो वयम् ॥६४६॥

आह स्म विश्वामित्रो वा वसिष्ठो वा तपोनिधिः । त्वमगस्त्योथ वा किं स्या इति दर्पेण तं नृपः ॥६४७॥

ज्वलन्निव ततः स्फूर्जत्तेजोदुष्प्रेक्ष्य[1]विग्रहः । स फणीवोत्फणस्ताम्यन्कोपान्नृपतिमब्रवीत् ॥६४८॥

[1]भवान्यत्र हरिश्चन्द्रस्त्रिशङ्कुर्नहुषोपि वा । विश्वामित्रमुखेभ्योहं तत्रैको भवितुं क्षमः ॥६४९॥

650 विहस्योवाच तं राजा विश्वामित्रादिकोपतः । हरिश्चन्द्रादयो नष्टास्त्वयि क्रुद्धे तु किं भवेत् ॥६५०॥

पाणिना ताडयन्नुर्वीं ततः क्रुद्धोभ्यधाद्विजः । मयि क्रुद्धे क्षणादेव ब्रह्मदण्डः पतेन्न किम् ॥६५१॥

तच्छ्रुत्वा विहसन्राजा कोपाद्ब्राह्मणमब्रवीत् । पततु ब्रह्मदण्डोसौ किमद्यापि विलम्बते ॥६५२॥

नन्वयं पतितो जाल्मेत्यथ विप्रेण भाषिते । राज्ञः कनकदण्डोङ्गे वितानस्खलितोपतत् ॥६५३॥

---

६३०. 1) Thus $A_1$; $A_2$ हतान°.—2) Thus $A_1$; $A_3$ °तान्वि°. ६३३. 1) Thus $A_1$; $A_3$ °काहे चेद्वि°. ६३६. 1) Thus $A_1$; $A_3$ श्लोकं वै°.—2) Thus corr. by $A_3$ from $A_1$ विपर्यासे.—3) Thus corr. by $A_3$ from $A_1$ विवर्तितः. ६३७. 1) $A_3$ gloss निष्ठाशब्द इह नाशवाची. ६३८. 1) Thus corr. by $A_2$ from $A_1$ तूलमूला°. ६४०. 1) Thus $A_2$; $A_1$ तूलमूलौ°. $A_2$ gloss तूलमूलाख्यो ग्रामः ६४४. 1) Thus corr. by $A_3$ from $A_1$ °व्यापकं. ६४५. 1) Thus corr. by $A_3$ from $A_1$ तूर्णीं.—2) Thus corr. by $A_2$ from $A_1$ इहिला°. ६४६. 1) $A_3$ विप्रा भूपानुवर्तिनः इत्यन्यादर्शे. ६४८. 1) Thus $A_1$; $A_3$ दुष्प्रेक्ष°. ६४९. 1) $A_2$ gloss भवान्यत्रेति विश्वामित्रशापाद्धरिश्चन्द्रो भ्रष्टः स्वपदात् वसिष्ठशापात्त्रिशङ्कुर्भ्रष्टः अगस्त्यशापाच्च नहुषो भ्रष्टः इति तद्दृष्टान्तोत्र वृत्तः.

कृतव्रणः स तेनाङ्गे विमर्द[1]क्लिन्नविग्रहः । कीर्यमाणक्रिमिकुलः क्रकचैश्चारितैरभूत् ॥६५४॥
अनुभाव्य व्यथां भाविनिरयक्लेशवार्णिकाम् । गणरात्रेण तं प्राणाः काङ्क्षितापगमा जहुः ॥६५५॥ 655
ब्रह्मदण्डकृतं दण्डं भुक्त्वा दण्डधराधिपः । अकाण्डदण्डसृष्टोऽथ ययौ दण्डधरान्तिकम् ॥६५६॥
तस्यानियतचित्तस्य त्रिंशतं परिवत्सरान् । एवं प्रतापिनः सैकान्भूभोगो भूपतेरभूत् ॥६५७॥
तथा भूभृन्मत्स्या द्रविणकलुषाम्भःकृततृषः स्थितिं[1] स्वामुज्झन्तो विदधति कुमार्गानुसरणम् ।
क्रियन्ते कार्तान्तानुगविकृतकैवर्तनिवहैर्यथा ह्येतेकस्मात्स्थिरनिरयजालप्रणयिनः ॥६५८॥
कृतपापं तमुद्दिश्य विपन्नममृतप्रभा । मृतोद्धाराय तन्माता व्यधत्तामृतकेशवम् ॥६५९॥
ललितापीडनामाभूत्ततो वसुमतीपतिः । देव्यां दुर्गाभिधायां यो जयापीडादजायत ॥६६०॥ 660
बभूव रागिणो राज्ये राज्यकार्याण्यपश्यतः । यस्य वाराङ्गनाभोज्यं राज्यं दुर्नयदूषितम् ॥६६१॥
दुष्कृतेनार्जितं वित्तं पित्रा निरयभागिना । य[1]श्चारणादिषु न्यस्यन्ननुरूपं व्ययं व्यधात् ॥६६२॥
बन्धकीबन्धुभावेन प्राप्तराजगृहाश्रयाः । तं पौंश्चलीयविद्यानामन्तरङ्गं व्यधुर्विटाः ॥६६३॥
केशान्स्त्रीदशनच्छिन्नान्वक्षस्तन्नखलाञ्छितम् । वपुषो मण्डनां मेने किरीटकटकोज्झितः ॥६६४॥
यो यो वेश्याकथाभिज्ञो[1] यो यो नर्मविचक्षणः । स स तत्प्रियतां लेभे न शूरो न च पण्डितः ॥६६५॥ 665
अतृप्तः स्त्रीभिरल्पाभिरुग्ररागः स पार्थिवः । जडं मेने जयापीडं स्त्रीराज्यान्निर्गतं जितात् ॥६६६॥
दिग्विजयव्यसनिनः पूर्वभूपाञ्जहास सः । गणिकाभोगसुखितः स्वसामयिकमध्यगः ॥६६७॥
संकोचकारिणो वृद्धान्नर्मोक्त्योद्वेज्य वारयन् । तस्माद्विटजनो लेभे संप्रीतात्पारितोषकम् ॥६६८॥
अड्डचेट इव स्पष्टपरिहासविचक्षणः । सोलज्जयन्मन्त्रिवृद्धानास्थाने गणिकासखः ॥६६९॥
बन्धकीपादमुद्राङ्कं चारु प्रावरणादि सः । गौरवार्हान्दुराचारः सचिवान्पर्यधापयत् ॥६७०॥ 670
मानी मनोरथो मन्त्री पुरं परिजहार तम्[1] । अशक्नुवन्नयमयितुं मध्यपातपराङ्मुखः ॥६७१॥
कुकृत्यं योगराहित्यं[1] वैधुर्यं द्रोहवृत्तिता । ······[2] दुर्वृत्तस्य प्रभोरन्यत्परिहारान्न भेषजम् ॥६७२॥
सुवर्णपार्श्वं[1] विप्रेभ्यो दधत्फलपुरं[2] तथा । भूभृत्स लोचनोत्सं च द्वादशाब्दानभूद्विभुः ॥६७३॥
कल्याणदेव्यां संजातो जयापीडमहीभुजः । संग्रामापीडनामाथ बभूव भुवनेश्वरः ॥६७४॥
पृथिव्यापीड इत्यन्यन्नाम बिभ्रत्स भूपतिः । समाप्तिं सप्तभिर्वर्षैः साम्राज्यस्य समासदत् ॥६७५॥ 675
श्रीचिप्पटजयापीडो बृहस्पत्यपराभिधः । ललितापीडजो राजा शिशुर्देश्यस्ततोऽभवत् ॥६७६॥
रागग्रहगृहीतस्य ललितापीडभूपतेः । वेश्यायां कल्यपाल्यां यो जयादेव्यामजायत ॥६७७॥
उप्पाख्यस्याखुवग्रामकल्यपालस्य[1] तां सुताम् । रूपलुब्धोऽवरुद्धा[2]त्वमनैषीत्स हि भूपतिः ॥६७८॥
पद्मोत्पलककल्याणमम्मधर्मैः[1] स मातुलैः । बालकैः पाल्यमानोऽभूत्पृथिवीभोगभागिभिः ॥६७९॥

---

६५४. [1]) Thus corr. by $A_3$ from $A_1$ विसर्प°. ६५८. [1]) Thus corr. by $A_2$ from $A_1$ क्षितिं. ६६२. [1]) $A_1$ seems to have read यश्चा°; corrected by $A_3$. ६६५. [1]) Thus corr. by $A_3$ from $A_1$ °कथादिज्ञो. ६७१. [1]) Thus corr. by $A_3$ from $A_1$ तत्. ६७२. [1]) Thus corr. by $A_3$ from $A_1$ योगवाहित्वं.—[2]) Here seems to be a *lacuna* in the text. ६७३. [1]) $A_2$ gloss सुनपाह्.—[2]) $A_2$ gloss परिहासपुरसमीपे. ६७८. [1]) $A_3$ gloss कल्यं सुरां पालयतीति कल्यपालः कलवाल् इति भाषया.—[2]) Thus corr. by $A_3$; two aksharas of $A_1$, corresponding to रुद्धा, are illegible on account of an ink blot. $A_3$ gloss अवरुद्धा उरद्धा इति भाषया. ६७९. [1]) Thus $A_1$; $A_3$ °धर्म्मैः.

680 तस्य पञ्च महाशब्दाञ्ज्यायानुत्पलकोग्रहीत् । अन्ये जगृहिरेन्यानि कर्मस्थानानि[1] मातुलाः ॥६८०॥
आयत्तीकृतसाम्राज्यैर्भ्रातृभिर्वन्दिताज्ञया । भूभृज्जनन्या विदधे जयादेव्या जयेश्वरः ॥६८१॥
राज्ञां कृपणवित्तैर्यत्प्रविष्टैर्दूष्यते धनम् । अचिरान्नीयते शान्तिमपूर्वैः कैश्चिदेव तत् ॥६८२॥
जयापीडस्य यत्किंचित्सूनुना[1] हि व्ययीकृतम् । सूनुस्यालैरशेषं तत्तैः क्रमेण हृतं वसु ॥६८३॥
भगिनीभगसौभाग्यसंभवैर्विभवैः कृताः । तेभङ्गुराणां भोगानां भोक्तारो भाग्यभागिनः । ६८४॥
685 निरङ्कुशं चेष्टमानाः शनकैस्त्यक्तशैशवात् । ते स्वस्रीयान्नृपान्नाशमकुलीनाः शशङ्किरे ॥६८५॥
अथाभिचारक्रियया मिथः संमन्त्र्य पापिभिः । राज्येच्छया तैः स्वस्रीयः स्वामी च स नृपो हतः ॥६८६॥
भुक्तक्षितौ द्वादशाब्दांस्तस्मिन्व्यापादिते तथा । नैच्छन्नेकस्य ते राज्यं परस्परमहंकृताः ॥६८७॥
तेशामाक्रान्तदेशानां[1] नाममात्रमहीपतीन् । तांस्तान्कर्तुमसामान्यां[2]न्विरोधेन्योन्यमुद्ययौ[3] ॥६८८॥
अथ मेघावलीदेव्यां जातो बप्पियभूपतेः । ज्येष्ठोप्यचाक्रिकतया योभूद्राज्यविवर्जितः ॥६८९॥
690 सोयं त्रिभुवनापीडो जयादेव्यामजीजनत् । राजानमजितापीडं तं बलादुत्पलो व्यधात् ॥६९०॥ युग्मम्[1]॥
शेडा[1]दिगणनास्थाननिष्यन्दोत्थान्नृपाय ते । [2]पञ्चमाद्गणनास्थानादशनाच्छादने ददुः ॥६९१॥
एकसंभाषणात्खेदं यात्स्वन्येषु दिने दिने । पञ्च तुल्यमुखान्नै[1]च्छद्दुःस्थो राजा तदाश्रितः ॥६९२॥
ते राजन्यजितापीडे राज्योत्पत्त्यपहारिणः । पुरदेवगृहादीनां प्रतिष्ठाकर्म चक्रिरे ॥६९३॥
सापत्यास्ते बुभुजिरे राज्यं स्वामिविवर्जितम् । निर्जने महिषं शान्तं मिथः सेर्ष्या वृका इव ॥६९४॥
695 उत्पलेनोत्पलस्वामी तथोत्पलपुरं कृतम् । पद्मस्य पद्मस्वाम्यास्ते कृतिः पद्मपुरं तथा ॥६९५॥
वधूर्व्यधत्त पद्मस्य गुणादेवी गुणोज्ज्वला । मठमेकमधिष्ठाने द्वितीयं विजयेश्वरे ॥६९६॥
धर्मो धर्मोद्यमी हेतुर्धर्मस्वामिविनिर्मितेः । कल्याणवर्मा सत्कर्मा कल्याणस्वामिकेशवे ॥६९७॥
दीन्नाराणां सहस्राणि पञ्चोपकरणं कृती । एकैकस्याः सुधीर्धेनोः कृत्वा मम्मो महाधनः ॥६९८॥
पञ्चाशीतिसहस्राणि गवां दत्त्वा प्रकल्पयन् । कुम्भप्रतिष्ठासंभारं यो मम्मस्वामिनं व्यधात्[1] ॥६९९॥
700 तस्यैकस्यैव सामर्थ्यं कः संख्यां कर्तुमर्हति । भ्रातॄणां किं पुनस्तेषां सर्वेषां भूरिसंपदाम् ॥७००॥
द्रोहार्जितास्तु वा लक्ष्मीः सुकृतोपार्जिताथ वा । सर्वेषां स्पृहणीयैव तेषां दातृतया तया ॥७०१॥
कृता देवगृहास्तैर्ये तत्पार्श्वेन्यसुरास्पदैः । दिङ्मातङ्गसमीपस्थकलभौपम्यमाश्रितम् ॥७०२॥
एकोननवते वर्षे स्वस्रीये शान्तिमागते । निर्विघ्नभोगास्तेभूवन्षड्विंशाब्दात्ययावधि ॥७०३॥
अथ मम्मोत्पलकयोरुदभूद्दारुणो रणः । रुद्धप्रवाहा यत्रासीद्वितस्ता सुभटैर्हतैः ॥७०४॥
705 कविर्बुधमनःसिन्धुशशाङ्कः शङ्कुका[1]भिधः । यमुद्दिश्याकरोत्काव्यं भुवनाभ्युदयाभिधम् ॥७०५॥

---

६८०. 1) $A_2$ gloss कर्मस्थानानि कारखान इति प्रसिद्धानि. ६८३. 1) $A_4$ glosses ललितापीडेन and पद्मोत्पलकादिभिः. ६८८. 1) Thus corr. by $A_3$ from $A_1$ °देहानां.—2) $A_1$ wrote °मसामान्याद्वि°; $A_2$ altered this to °मसम्मत्या; $A_3$ has struck out the reading of $A_2$ and has written above °मसामान्याल्वि°.—3) Thus corr. by $A_3$ from $A_1$ °माययौ. ६९०. 1) युग्मम् added by $A_3$. ६९१. 1) Thus corr. by a later hand from $A_1$ देडा°; R Edd. शेडा°; G देडा°. Cf. viii. 578 (*C.*).—2) $A_2$ gives the marginal note शलस्थूलं नामेल्याणकं मिथान नवग्रामादि एषां चतुर्णां सम्बन्धी एकोत्पत्तिप्रवेशः स पञ्चमगणनास्थानमिति लोकाम्नायः. ६९२. 1) Thus $A_1$; $A_2$ °मुखान्यै°. ६९९. 1) To this verse seems to refer the gloss of $A_2$: मलुनायां. ७०५. 1) $A_2$ gloss श्रीशङ्कुकाभिधः प्रसिद्ध आलङ्कारिकः यस्य मतं रसनिरूपणे काव्यप्रकाशे चतुर्थोल्लासे श्रीमम्मटाचार्येण निरूपितम्.

मम्मसूनुर्यशोवर्मा संग्रामाग्रे व्यपाहरत् । स यत्र तेजः शूराणां नक्षत्राणामिवार्यमा ॥७०६॥

अथोत्पाट्याजितापीडं संग्रामापीडसंभवः । अनङ्गापीडनामाभूत्कृतो मम्मादिभिर्नृपः ॥७०७॥

मम्मोत्साहासहिष्णुत्वात्संभृतामर्षवैकृतः । तस्य राज्यं द्विषन्नासीत्सुखवर्मोत्पलात्मजः ॥७०८॥

वर्षत्रयेणोत्पलके ततः प्रमयमागते । स[1] चकारोत्पलापीडमजितापीडजं नृपम् ॥७०९॥

तेषामाश्वयुजीराजं[1]सदृशानां महीभुजाम् । भूत्वापि भृत्याः कृतिनो[2] विभूतिं केपि लेभिरे ॥७१०॥ 710

सांधिविग्रहिकस्तस्य रत्नो नाम विभूतिभाक् । तस्मिन्कालेपि यश्चक्रे रत्नस्वामिसुरास्पदम् ॥७११॥

भेजुर्दार्वाभिसारादीन्देशानुत्तमस्य भूपताम् । विमलाश्वा ग्रामभुजो नराद्या व्यवहारिणः ॥७१२॥

राज्ञां कार्कोटवंश्यानां क्षीणप्रायमभूत्कुलम् । वंशस्तूत्पलकुल्यानां भुवि वैपुल्यमाययौ ॥७१३॥

सामर्थ्योपनतप्रायपार्थिवत्वो व्यपद्यत । विद्वेषात्सुखवर्माथ शुङ्काख्येन स्वबन्धुना ॥७१४॥

ततः शूराभिधो मन्त्री सुखवर्मात्मजेकरोत् । राज्ययोग्योयमित्यास्थां सगुणेवन्तिवर्मणि ॥७१५॥ 715

एकत्रिंशे स वर्षेथ प्रजाविप्लवशान्तये । विनिवार्योत्पलापीडं तमेव[1] नृपतिं व्यधात् ॥७१६॥

यत्कृते विफलक्लेशा आसन्पितृपितामहाः । पौत्रेण हेलया प्राप्ता सा सिद्धिः पुण्यकर्मणा ॥७१७॥

कुम्भाः पयोनिधिपयोहरणप्रवृत्ता नित्यं वहन्ति किल ये विफलश्रमत्वम् ।
चित्रं क्षणादिह तदेकसमुद्भवेन संदर्शिता निखिलवारिधिपानलीला ॥७१८॥

अभूत तदनु[1] मूर्ध्नि राजलक्ष्मीघटितकटाक्षकृतादिपट्टबन्धे ।
कनकघटमुखान्नवाभिषेकं झटिति पतन्तमवन्तिवर्मदेवः ॥७१९॥

संप्राप्तावुपदेष्टुमिन्दुतपनावुक्तं[1] स्ववंशोद्भवैर्भूपालैर्नवराज्यतन्त्रमिव स श्रोत्रद्वये धारयन् ।
राजा मण्डनकुण्डलद्वयमिषात्स्वच्छातपत्रच्छलाल्लक्ष्मीविष्टरपुण्डरीकघटितच्छायोदयो दिद्युते ॥७२०॥ 720

[1]इति श्रीकाश्मीरिकमहामात्यचण्पकप्रभुसूनोः कल्हणस्य कृतौ राजतरङ्गिण्यां चतुर्थस्तरङ्गः ॥
समाशतद्वये षष्ट्युने मासेषु षट्सु च । निर्दशाहेषु कार्कोटवंशे सप्तदशाभवन् ॥

---

७०९. [1]) $A_4$ gloss सुखवर्मा. ७१०. [1]) Thus corr. by $A_1$ from °युजे मासस°; $A_2$ gloss आश्वयुजे मासि चश्वर्यर्थं ये निर्गच्छन्ति ते हेयारया इति प्रसिद्धास्तत्सदृशानां.—[2]) Thus $A_3$; $A_1$ कठिना. ७१६. [1]) $A_4$ gloss अवन्तिवर्माणम्. ७१९. [1]) Thus corr. by $A_3$ from $A_1$ तदुरु. ७२०. [1]) Thus $A_1$; $A_3$ °तपनौ युक्तं. *Colophon.* [1]) $A_3$ inserts before this the following note: रा १७ मं ७१६ आदितः राजानः ७० मे १७८६.

## ॥ पञ्चमस्तरङ्गः ॥

काप्र्येतेषु[1] रुचिः कचेषु फणिनां पुंस्कोकिलस्येव ते गोभिः कण्ठतटस्य हृष्यति पुरो दृक्पश्य चक्षुःश्रुतेः ।
संधानेभिनवे मिथो भगवतोर्जिह्वापृथक्स्पन्दिनी[2] भिन्नार्थां सदृशाक्षरामपि वदन्त्येवं गिरं पातु वः ॥१॥
अवन्तिवर्मा साम्राज्यं प्राप्य पाटितकण्टकः । चकार चरितैश्चित्रं सतां कण्टकितं वपुः ॥२॥
आसतां क्षितिपामात्यौ तौ द्वावपि परस्परम् । आज्ञादाने[1] परिवृढौ भृत्यावाज्ञापरिग्रहे ॥३॥
कृतज्ञः क्षान्तिमान्क्ष्माभृन्मन्त्री भक्तः स्मयोज्झितः । अभङ्गुरोयं संयोगः सुकृतैर्जातु दृश्यते ॥४॥
5 विवेक्ता प्राप्तराज्यः स क्ष्माभृद्वीक्ष्य नृपश्रियम् । अविलुप्तस्मृतिर्धीमानन्तरेवमचिन्तयत् ॥५॥
गोभुजां वल्लभा लक्ष्मीर्मातङ्गोत्सङ्गलालिता । सेयं स्पृहां समुत्पाद्य दूषयत्युन्नतात्मनः ॥६॥
स नास्ति कश्चित्प्रथमं यः प्रदर्श्यानुकूलताम्[1] । संताप्यते न चरमं नीचप्रीत्येव नानया ॥७॥
चपलाभिः प्रवृद्धेयं स्ववैरयाभिः सहाम्बुधौ । तदेकचारिणीवृत्तमनया शिक्षितं कुतः ॥८॥
निःस्नेहा नान्वगात्कांश्चित्सुचिरं संस्तुताप्यसौ । परलोकाध्वगान्भूपानपाथेयानबान्धवान् ॥९॥
10 हेमभोजनभाण्डादि भाण्डागारे यदर्जितम् । कस्मादस्य न[1] नाथास्ते लोकान्तरगता नृपाः ॥१०॥
अन्योच्छिष्टेषु पात्रेषु भुक्तैतेषु महीभुजः । कस्मान्न लज्जामवहञ्शौचचिन्तां न वा दधुः ॥११॥
स्थूलेषु राजतस्थालकपालेष्ववलोकितैः । प्रेतभूपालनामाङ्कैः शङ्का कस्य न जायते ॥१२॥
कुष्टाः प्रविष्टे ये कालपाशे कण्ठान्मुमूर्षताम् । अशस्ता अपवित्राश्च ते हाराः कस्य हारिणः ॥१३॥
संदूष्य बाष्पैर्दुःखोष्णैस्त्यक्तान्पूर्वैर्मुमूर्षुभिः । स्पृशन्नेतानलंकारान्न कः संकोचमाप्नुयात् ॥१४॥
या वारिराशिसलिलान्तरसंनिधानसंसेवयापि सततं मलिनैव लक्ष्मीः ।
15 पात्रेषु रोर[1]शिखिभागिषु सा विमुक्ता वैमल्यमेति हरिणीव हुताशशौचा[2] ॥१५॥

---

१. [1]) $A_3$ gloss: काप्र्येतेषु इति। एतेषु प्रत्यक्षविषयेषु फणिनां सर्पाणां कचेषु बन्धनेषु ते कापि रुचिः कश्चिदप्यभिलाषोस्ति। जटाजूटकक्ष्यादिबन्धनार्थमत्यन्तं सर्पानभिलषसीति देवीवचनम्। बन्धनस्थानानां कण्ठप्रकोष्ठकक्ष्यादीनां बहुत्वाद्बन्धानामपि बहुवचनम्। एतेषु कचेषु केशेषु फणिनां सम्बन्धिनी अर्थान्मोहकारिणी कापि रुचिरनिर्वचनीया कान्तिस्तवास्ति तव केशानामजगराणामिव दर्शनेनातीव मोहो जायते इति महादेववचनम्। पुंस्कोकिलस्येव तव कण्ठतटस्य गोभिर्वचनैः चक्षुःश्रुतेः सर्पस्य दृक् नेत्रं हृष्यति मोदते। कोकिलरुतमिव तव कण्ठध्वनिं श्रुत्वा सर्पस्य दृग्हर्षः सर्पाणां चक्षुरेव श्रवणस्थानीयमित्यतो दृक् हृष्यतीत्युक्तम्। गीतप्रियो हि सर्पः। यदुक्तम्। शिशुर्वेत्ति पशुर्वेत्ति वेत्ति गीतरसं फणी। साहित्यामृतसारस्य शङ्करो वेत्ति वा न वेति॥ इति महादेववचनम्॥ देवीवचनं तु। तव कण्ठतटस्य कोकिलस्येव करैः पुरोग्रे नेत्रं हृष्यति। गोभिः किरणैः। कोकिलतुल्यवर्णकण्ठतटनैल्यदर्शनेन सर्पस्य दृग्हर्षः दृग्विकासः कोकिलरुतं श्रुत्वा सर्पाणां नेत्रविकासो जायते शीतसमये तु संकोच इति लौकिकाः॥.—[2]) Thus $A_3$; $A_1$° स्पर्धिनी. ३. [1]) Thus corr. by $A_3$ from $A_1$ °धाने. ७. [1]) Thus corr. by later hand from $A_1$ °कूल्यताम्. १०. [1]) न supplied by $A_3$. १५. [1]) $A_3$ gloss रोरः दारिद्र्यं.—[2]) $A_1$ °शौचे altered by later hand to °शौचा; $A_3$ glosses: अग्निशौचानां मृगाणां अग्निना लोमशुद्धिः अग्निशौचवसनवत्, and हुताशेनाग्निना शौचं शुद्धिर्यस्याः सा हुताशशौचा। हरिणी मृगी इव यथा सा अग्नौ प्रक्षिप्तदेहा सती शुद्धलोमा भवति तद्वत्.

इति निर्ध्याय नृपतिर्नीत्वा स्वर्णादि[1] चूर्णताम् । निर्जैरञ्जलिभिः प्रादाद्द्विजन्मभ्यः करम्भकम्[2] ॥१६॥
साधु भूपेति वक्तव्ये हर्षान्निर्गौरवं द्विजः । साध्ववन्तिन्निति वदन्नेकः प्रापाञ्जलीन्बहून् ॥१७॥
लक्ष्मीं कृत्वार्थिसात्कृत्स्नां कृतिनावन्तिवर्मणा । विभूतिश्चामरच्छत्रमात्रशेषा व्यधीयत ॥१८॥
अनन्तसंपत्संपन्नभूरिगोत्रजविप्लवे । राजश्रीर्दुर्जरा तस्य नवत्वे भूभुजोभवत् ॥१९॥
विप्लुतान्समरे भ्रातॄन्भ्रातृव्यांश्च विजित्य सः । चकार भूरिभिर्वारै राज्यं विगतकण्टकम् ॥२०॥ 20
राज्यं निष्पाद्य निर्विघ्नमथ वात्सल्यपेशलः । विभज्य बन्धुभृत्येषु बुभुजे पार्थिवः श्रियम् ॥२१॥
भ्राता द्वैमातुरस्तेन शूरवर्माभिधः सुधीः । ज्ञातिप्रियेण वितते यौवराज्येभ्यषिच्यत ॥२२॥
खाधूया[1]हस्तिकर्णा[2]ख्यावग्रहारौ प्रदाय[3] यः । शूरवर्मस्वामिनं च गोकुलं च विनिर्ममे ॥२३॥
संपूर्णः पूर्णमहि[1]मामर्त्य[2]माहात्म्यमन्दिरम् । पञ्चहस्ता[3]प्रदश्चक्रे मठं सुकृतकर्मठः ॥२४॥
भ्राता व्यधत्त नृपतेरपरः समराभिधः । केशवं चतुरात्मानं समरस्वामि[1]नं तथा ॥२५॥ 25
द्वौ शूरावरजौ धीरविन्नपाख्यौ निजाख्यया । व्यधत्तां त्रिबुधावासौ द्वावन्यौ गणनापती ॥२६॥
भूत्वा वातूलता[1]च्छन्नप्रभावानुभवौ भुवि । गतौ[2] सविग्रहावेव हरावासाग्र्यसभ्यताम् ॥२७॥ युग्मम् ॥
राजदौवारिकः श्रीमाञ्शूरस्यासीन्महोदयः । महोदयस्वामि[1]नो यः प्रतिष्ठां समपादयत् ॥२८॥
रामटाख्यमुपाध्यायं ख्यातव्याकरणश्रमम् । व्याख्यातृपदकं चक्रे स तस्मिन्सुरमन्दिरे ॥२९॥
अमात्येन महीभर्तुः श्रीप्रभाकरवर्मणा । कृतं प्रभाकरस्वामिनाम्नो विष्णोर्निकेतनम् ॥३०॥ 30
आयातेन शुकैः सार्धं[1] दत्ता गृहशुकेन यः । मुक्ताः प्राप्य प्रतिष्ठायां चक्रे ख्यातां शुकावलीम्[2] ॥३१॥
विच्छिन्नप्रसरा विद्या भूयः शूरेण मन्त्रिणा । सत्कृत्य विदुषः सभ्यान्देशेस्मिन्नवतारिता ॥३२॥
युग्यैः क्षितिभुजां योग्यैरुह्यमाना महर्द्धयः । बुधाः प्रवृद्धसत्कारा विविशुर्भूपतेः सभाम् ॥३३॥
मुक्ताकणः शिवस्वामी कविरानन्दवर्धनः[1] । प्रथां रत्नाकरश्चा[2]गात्साम्राज्येवन्तिवर्मणः ॥३४॥
आस्थाने कृतमन्दारो वन्दी शूरस्य मन्त्रिणः । संकल्पस्मृतिमाधातुमिमामार्यां सदापठत् ॥३५॥ 35
अयमवसर उपकृतये प्रकृतिचला यावदस्ति संपदियम् । विपदि सदा[1]भ्युदयिन्यां पुनरुपकर्तुं कुतोवसरः ॥३६॥
कृतः सुरेश्वरीक्षेत्रे बहुगेहविधायिना । शिवयोर्मिश्रयोस्तेन प्रासादः सोव्ययस्थितिः ॥३७॥
शूरेश्वरं[1] प्रतिष्ठाप्य स्ववेश्मेव समुन्नतम् । चक्रे शूरमठं धीमान्स भोगाय तपस्विनाम् ॥३८॥
स्वकृते पत्तनवरे तेन शूरपुराभिधे । क्रमवर्त[1]प्रदेशस्थो ढक्को[2]भूद्विनिवेशितः ॥३९॥
सुरेश्वरीप्राङ्गनतश्चक्रे भूतेश्वरं हरम् । मठं शूरमठान्तश्च शूरजो रत्नवर्धनः ॥४०॥ 40
काव्यदेव्यभिधा शूरवधूः शुद्धान्वया व्यधात् । सदाशिवं सुरेश्वर्यां काव्यदेवीश्वराभिधम् ॥४१॥

---

१६. [1]) $A_2$ gloss आदिशब्देन मौक्तिकादेः परिग्रहः.—[2]) $A_2$ glosses हम्बलं and करम्बं व्यामिश्रं खिचड़ू इति भाषया. २३. [1]) $A_2$ gloss धुधखोहा.—[2]) $A_2$ gloss व्याघ्राश्रमे वागहामे.—[3]) $A_3$ विधाय. २४. [1]) Thus $A_1$; $A_3$ सपूर्णपुण्यमहिमा.—[2]) Thus $A_1$; $A_3$ मन्त्रमा°.—[3]) $A_2$ gloss पाञ्चथ्. २५. [1]) $A_2$ gloss शाल्यानग्रामे समरभोग्. २७. [1]) तू written above the line by $A_3$; corresponding letter of $A_1$ smeared over. $A_3$ gloss इमौ वातूलावुन्मत्ताविति स्वस्य तद्भावमिव विधाय लोकविषये गोपितनिजप्रभावावित्यर्थः.—[2]) Thus corr. by $A_3$ from $A_1$ गुरौ. २८. [1]) $A_2$ gloss मडवाश्रमे. ३१. [1]) सार्धं supplied by $A_3$ in space left by $A_1$.—[2]) Thus corr. by later hand from $A_1$ ख्यानशुका°. ३४. [1]) $A_2$ gloss आनन्दवर्धनः काव्यालङ्कारध्वनिग्रन्थकारः.—[2]) $A_2$ gloss रत्नाकरः हरविजयकारः. ३६. [1]) Thus corr. by $A_3$ from $A_1$ समाभ्यु°. ३८. [1]) $A_2$ gloss शूरपुरे. ३९. [1]) $A_2$ gloss कामेलनकोट्टस्थः.—[2]) $A_2$ gloss द्रङ्गः.

निर्मत्सरोवन्तिवर्मा सोदरेभ्योनपायिनीम् । शूराय च सपुत्राय नृपतिप्रक्रियां ददौ ||४२||

छन्दानुवर्ती भूपालो दैवतस्येव मन्त्रिणः । आ बाल्याद्वैष्णवोप्यासीच्छैवतामुपदर्शयन् ||४३||

क्षेत्रे विश्वैकसाराख्ये[1] मृतानामपवर्गदे । भूरिभोगास्पदं राज्ञा[2] तेनावन्तिपुरं कृतम् ||४४||

45 अवन्तिस्वामिनं तत्र प्राग्राज्याधिगमात्कृती । विधाय प्राप्तसाम्राज्यश्चक्रेवन्तीश्वरं तदा ||४५||

त्रिपुरेश्वरभूतेशविजयेशेषु भूभृता । स्नानद्रोण्या रूप्यमय्या तेन पीठत्रयं कृतम् ||४६||

शूरस्यापि नरेन्द्रं तं ध्यायतः स्वाधिदैवतम् । तत्प्रियार्थमुपेक्ष्योभूद्धर्मः प्राणाः सुतोपि वा ||४७||

तथा चार्चयितुं जातु[1] यातो भूतेश्वरं नृपः । विभवानुगुणे स्वस्मिन्पूजोपकरणेर्पिते ||४८||

ददर्श पीठे देवस्य पूजकैरुपपादितम् । वन्यमुत्पलशाकाख्यं तिक्तशाकमवस्थितम् ||४९||

50 तत्रस्थाः क्ष्माभुजा पृष्टास्तन्निवेदनकारणम् । व्यजिज्ञपन्क्षितिन्यस्तजानुप्राञ्जलयस्ततः ||५०||

डामरो धन्वनामास्ति लहरे[1] विषये बली । शूरस्य मन्त्रिणो देव सेवको यः सुतोपमः ||५१||

हृतेषु तेन ग्रामेषु निरवग्रहशक्तिना । निवेद्यमेतदेवास्मै भूतेशाय निवेद्यते ||५२||

अकाण्डशूलजनितां पार्थिवः कथयन्व्यथाम् । श्रुतमश्रुतवत्कृत्वा त्यक्तपूजोथ निर्ययौ ||५३||

पूजां संत्यज्य गमनं शूलं चाकस्मिकं प्रभोः । सहेतुकं विदञ्शूरो वृत्तान्तान्वेषकोभवत् ||५४||

55 ज्ञाततत्त्वस्ततस्तूर्णं भूतेशाभ्यर्णवर्तिनः । क्रुद्धः समातृचक्रस्य[1] भैरवस्याविशद्गृहम् ||५५||

निषिद्धजनवाहुल्याद्[1]भूत्वा विरलपार्श्वगः । प्राहिणोद्धन्वमानेतुं ततो दूतान्पुनः पुनः ||५६||

स क्षितिं पत्तिपृतनासंमर्देन प्रकम्पयन् । अप्रकम्पतनुः प्राप क्रूरः शूरान्तिकं शनैः[1] ||५७||

तस्य प्रविष्टमात्रस्य शस्त्रिणः शूरचोदिताः । मुण्डं सजीवितस्यैव चिच्छिदुर्भैरवाग्रतः ||५८||

आसन्ने सरसि क्षिप्त्वा रुधिरोद्गारि तद्वपुः । क्ष्मापतेः क्षालितामर्षो धीरः शूरो विनिर्ययौ ||५९||

60 तस्य श्रुत्वा शिरश्छिन्नं स्वपुत्रस्येव मन्त्रिणा । क्षीर्ण[1]मन्युः क्षितिपतिः सवैलक्ष्य इवाभवत् ||६०||

शूरोथ पृष्टकुशलो निर्व्यथोस्मीति भाषिणम् । उत्थाप्य तल्पात्तं देवं पूजाशेषमकारयत् ||६१||

इत्थं समस्तकृत्येषु भावज्ञः स महीपतेः । अनुक्त्वैव हितं तत्तत्प्राणांस्त्यक्त्वाप्यसाधयत् ||६२||

परस्परमनुत्पन्नमन्युकालुष्यदूषणौ । न दृष्टौ न श्रुतौ वान्यौ तादृशौ राजमन्त्रिणौ ||६३||

श्रीमेघवाहनस्येव साम्राज्येवन्तिवर्मणः । अशेषप्राणिनामासीदमारो दश वत्सरान् ||६४||

65 जलं जहद्भिः शिशिरं तटानेत्याकुतोभयैः । तत्कालं सेवितः पृष्ठे पाठीनैः शरदातपः ||६५||

अनुग्रहाय लोकानां भट्टश्रीकल्लटादयः । अवन्तिवर्मणः काले सिद्धा भुवमवातरन् ||६६||

चरित्रे बहुवक्तव्ये येषामेकस्य पावनः । अयं प्रासङ्गिकः कश्चिद्वृत्तान्तो वर्णयिष्यते ||६७||

देशः प्रबलतोयोयं महापद्मसरोजलैः । कूलिनीभिश्च शबलः स्वल्पोत्पत्तिः सदाभवत् ||६८||

ललितादित्यभूभर्तुरुद्योगेन बलीयसा । किंचिदाकृष्टसलिलः प्रापोत्पत्तिं मनाक्ततः ||६९||

---

४४. [1]) $A_2$ gloss विश्वैकसाराख्ये भारसो इति ग्रामे.—[2]) Thus corr. by later hand from $A_1$ राजा. ४८. [1]) Thus corr. by later hand from $A_1$ जातो. ५१. [1]) $A_3$ gloss लार् इति प्रसिद्धे राष्ट्रे. ५५. [1]) $A_2$ separates स from the following and gives the gloss शूरः to स. ५६. [1]) Thus $A_1$; $A_2$ °बाहुल्यो भूत्वा. ५७. [1]) Thus $A_3$; $A_1$ पुरः. ६०. [1]) Thus corr. by $A_2$ from $A_1$ क्षण°.

जयापीडे क्रमायाते स्वल्पवीर्येषु राजसु । सलिलोपप्लवैरासीत्पुनरेवावृता क्षितिः ॥७०॥ 70

दीन्नाराणां दशशती पञ्चाशत्यधि[1]काभवत् । धान्यखारी[2]क्रये हेतुर्देशे दुर्भिक्षविक्षते ॥७१॥

अवन्तिवर्मणः पुण्यैर्जन्तूञ्जीवयितुं ततः । स्वयमन्नपतिः श्रीमान्सुय्यः क्षितिमवातरत् ॥७२॥

यस्याविज्ञातसंभूतेस्तुर्ये[1] कालेपि निश्चितम् । अयोनिजत्वं कृतिनश्चरितैर्भुवनाद्भुतैः ॥७३॥

पुरा रथ्यारजःपुञ्जं संमार्जन्ती पिधानवत् । सुय्या[1]भिधाना चण्डाली मृद्भाण्डं प्राप नूतनम् ॥७४॥

तस्मिन्पिधानमुद्धृत्य सापश्यन्मध्यशायिनम् । बालं कमलपत्राक्षं धयन्तं स्वकराङ्गुलीः ॥७५॥ 75

मात्रा कयापि त्यक्तोसौ सुन्दरो मन्दभाग्यया । अथेति चिन्तयन्त्यासीत्सा स्नेहात्प्रस्नुतस्तनी ॥७६॥

अदूषयन्त्या[1] स्पर्शेन धात्र्याः शूद्रस्त्रियो गृहे । तया विहितवृत्तिः स शिशुर्वृद्धिमनीयत ॥७७॥

स सुय्यनामा मतिमान्प्रवृद्धः शिक्षिताक्षरः । कस्याप्यासीद्गृहपतेरर्भकाध्यापको गृहे ॥७८॥

व्रतस्नानादिनियमैस्तं सतां हृदयंगमम् । गोष्ठीषु विशदप्रज्ञं विदग्धाः पर्यवारयन् ॥७९॥

तेषां कथाव्यवस्थासु निन्दतां जलविप्लवम् । धीरस्ति मे निरर्थस्तु किं कुर्यामिति सोब्रवीत् ॥८०॥ 80

उन्मत्तस्येव वदतस्तस्य तन्नियमाद्वचः । निशम्य भूभृच्चारेभ्यश्चिरमासीत्सविस्मयः ॥८१॥

ततस्तमानीय नृपः किं ब्रूष इति पृष्टवान् । धीरस्तीत्यादि राजाग्रेप्यवोचत्सोप्यसंभ्रमः[1] ॥८२॥

वातूलोसाविति निजैरुक्तोप्यथ महीपतिः । धियं दिदृक्षुर्विदधे तस्यायत्तं निजं धनम् ॥८३॥

कोशाद्दीन्नारभाण्डानि बहून्यादाय हेलया । ययौ मडवराज्यं स नावमारुह्य रंहसा ॥८४॥

ग्रामे तत्र प्रवृद्धाम्बुनिमग्ने नन्दकाभिधे । एकं निक्षिप्य दीन्नारभाण्डं व्यावर्तत द्रुतम् ॥८५॥ 85

सत्यं वातूल एवासौ सभ्येष्वपि वदत्स्वपि । वार्तां निशम्य तां राजा तन्निष्ठान्वेषकोभवत् ॥८६॥

क्रमराज्यं स संप्राप्य देशे यक्षदराभिधे[1] । अञ्जलिभ्यां निचिक्षेप दीन्नारान्सलिलान्तरे ॥८७॥

यत्र तीरद्वयालम्बिशैलनिर्लुठिताः शिलाः । चक्रुर्वितस्तां निष्पीड्य पयः प्रतिपथोन्मुखम् ॥८८॥

दुर्भिक्षोपहता ग्राम्या दीन्नारान्वेषिणस्तदा । शिलाः प्रवाहादुद्धृत्य वितस्तां समशोधयन् ॥८९॥

एवं दिनानि द्वित्राणि पयो युक्त्या विकृष्य तत् । वितस्तामेकतः स्थानात्कर्मकृद्भिरबन्धयत् ॥९०॥ 90

पाषाणसेतुबन्धेन सुय्येनाद्भुतकर्मणा । सप्ताहमभवद्बद्धा निखिला नीलजा सरित् ॥९१॥

अधः प्रवाहं संशोध्य कुण्डदश्मप्रतिक्रियाम् । कृत्वा बद्धैः शिलाबन्धैः सेतुबन्धमपाटयत् ॥९२॥

चिरकालनिरोधेन सोत्कण्ठेवाम्बुधिं प्रति । ततः [illegible] जवाद्गन्तुं सागरगामिनी ॥९३॥

जम्बालाङ्का स्फुरन्मीना भूर्बभौ सलिलोज्झिता [illegible] काण्र्या सनक्षत्रा निर्मेघेव नभःस्थली ॥९४॥

यत्र यत्र विवेदौघवैधं सलिलविप्लवे । तत्र [illegible] तस्तायाः प्रवाहान्नूतनान्व्यधात् ॥९५॥ 95

मूलस्रोतोग्र्यनिष्ठ्यूतभूरिस्रोता बभौ सरित् । एकभोगाश्रयानेकफणेवासितपन्नगी ॥९६॥

वामेन सिन्धुस्त्रिग्राम्या वितस्ता दक्षिणेन तु । यान्त्यौ ये समगं[1]सातां प्राग्वैन्यस्वामिनोन्तिके ॥९७॥

वर्तेतेद्य महानद्योः कल्पापायेप्यनत्ययः । संगमो नगरोपान्ते स सुय्योपक्रमस्तयोः ॥९८॥

---

७१. [1]) Thus $A_1$; $A_3$ पञ्चाशदधि°.—[2]) Thus corr. by $A_3$ from $A_1$ °खारेः. ७३. [1]) $A_2$ gloss चतुर्थे युगे. ७४. [1]) Thus $A_1$; $A_3$ पूयाभि°. ७७. [1]) Thus corr. by later hand from $A_1$ °न्त्याः. ८२. [1]) Thus corr. by $A_3$ from $A_1$ °सम्भवः. ८७. [1]) $A_2$ gloss द्वारगलाख्ये. ९७. [1]) समगं supplied by $A_3$ in space left by $A_1$.

अद्याप्यास्तां[1] फलपुरपरिहासपुरस्थितौ । विष्णुस्वामी संगमस्य वैन्यस्वामी च तीरयोः ॥९९॥
100 सुन्दरीभवनाभ्यर्णप्राप्तस्याद्यतनस्य तु । योगशायी हृषीकेशः सुय्यस्याभ्यर्चितस्तटे ॥१००॥
दृश्यन्तेद्यापि सरितां पूर्वस्रोतस्तटोद्भवाः[1] । निषादाकृष्टनौरज्जुरेखाङ्का जीर्णपादपाः ॥१०१॥
स्फुरत्तरङ्गजिह्वाः स नदीर्मार्गमजिग्रहत् । तास्ताः स्वेच्छानुसारेण मान्त्रिकः पन्नगीरिव ॥१०२॥
बद्ध्वा शैलमयान्सेतून्वितस्तां सप्रयोजनीम् । महापद्मसरोवारि स चकार नियन्त्रितम् ॥१०३॥
महापद्मसरःकुण्डाद्वितस्ता येन योजिता । जवान्निर्याति[1] कोदण्डयन्त्रादिषुरिवाध्वना ॥१०४॥
105 उद्धृत्य सलिलादुर्वीमेवमादिवराहवत् । अनेकजनसंकीर्णान्ग्रामान्नानाविधान्व्यधात् ॥१०५॥
पालीभिरम्भः संरोध्य यान्कुण्डसदृशान्व्यधात् । कुण्डलानीति सर्वान्नसमृद्धान्ब्रुवते जनाः ॥१०६॥
उत्खातकीलनिवहान्नद्योद्यापि शरत्कृशाः । व्यञ्जन्ति जलगन्धेभबन्धनस्तम्भसंनिभान् ॥१०७॥
दीन्नारभाण्डानौ[1]ज्झीत्स यदगाधजलान्तरे । नन्दके निर्गतजले स्थलान्तात्तदलभ्यत ॥१०८॥
अदेवमातृकान्ग्रामान्परीक्ष्य विविधाः क्षितीः । संविभेजे विभक्तेन नादेयेन स वारिणा ॥१०९॥
110 असिञ्चच्च जलैर्ग्रामान्ग्रामान्मृदमुपाहृताम् । या यावता क्षणेनागाच्छोषं तां तावता हृदि ॥११०॥
कालेन मत्वा सेकार्हां प्रतिग्रामं जलप्लुतेः । परिमाणं विभागं च परिकल्प्य निरत्ययम् ॥१११॥
चकार चानूलाद्याभिः सिन्धुभिः सर्वतो दिशः । सत्फलोदारकेदारसंपत्संपन्नविभ्रमाः ॥११२॥ तिलकम्[1] ॥
न कश्यपेनोपकृतं न यत्संकर्षणेन वा । हेलया मण्डलेमुष्मिंस्तत्सुय्येन सुकर्मणा ॥११३॥
भूमेर्जलादुद्धरणं द्विजक्षेत्रे तथार्पणम् । सेतुबन्धोश्मभिस्तोये यमनं कालियस्य च ॥११४॥
115 चतुर्षु सिद्धमि[1]ति यद्विष्णोः सत्कर्मजन्मसु । सुय्यस्य तत्पुण्यराशेरेकस्मिन्नेव जन्मनि ॥११५॥ युग्मम्[2] ॥
यस्मिन्महासुभिक्षेषु दीन्नाराणां शतद्वयी । धान्यखारे[1]ः प्राप्तिहेतुरा सर्गादभवत्पुरा ॥११६॥
ततः प्रभृति तत्रैव चित्रं कश्मीरमण्डले । षट्त्रिंशता[1] धान्यखारेर्दीन्नारैरुदितः क्रयः ॥११७॥
निर्गतायां[1] महापद्मसलिलात्स्वर्गसंनिभम् । वितस्तायास्तटे चक्रे स्वनामाङ्कं स पत्तनम् ॥११८॥
स्वकृता स्थापिता तेन सरसि व्याप्तदिक्तटे । आसंसारं स्थितामारि[1]मर्यादा झषपक्षिणाम् ॥११९॥
120 सुय्या[1]कुण्डलनामानं ग्रामं कृत्वा द्विजातिसात् । सुय्या[2]मुद्दिश्य तन्नाम्ना सुय्या[3]सेतुं स निर्ममे ॥१२०॥
तेनोद्धृतासु सलिलाद्भूषु ग्रामाः सहस्रशः । अवन्तिवर्मप्रमुखैर्जयस्थल[1]मुखाः कृताः ॥१२१॥
ईदृशैर्धर्म्यवृत्तान्तैः प्रवर्तितकृतोदयः । अवन्तिदेवः पातिस्म मान्धातेव वसुंधराम् ॥१२२॥
प्राणप्रयाणसोद्योगरोगग्रस्तस्ततो ययौ । क्षेत्रं स त्रिपुरेशाद्रिनिष्ठज्येष्ठेश्वराश्रितम् ॥१२३॥
आत्मनस्तत्र निश्चित्य विपत्तिं चिरगोपिताम् । प्राणान्ते प्राञ्जलिः शूरो वैष्णवत्वमदर्शयत् ॥१२४॥
125 तेनान्ते भगवद्गीताः शृण्वता भावितात्मना । ध्यायता वैष्णवं धाम निरमुच्यत जीवितम् ॥१२५॥

९९. 1) Emended; $A_1$ अध्यप्या°, altered by later hand to अधप्या°. १०१. 1) Thus G and Edd.; A °द्भवः. १०४. 1) Thus G and Edd.; A °र्यान्ति. १०८. 1) Emended; A °भाण्डान्नौ°. ११२. 1) Supplied by $A_2$. ११५. 1) Thus corr. by $A_2$ from $A_1$ यत्सिद्ध°.—2) युग्मम् supplied by $A_2$. ११६. 1) Thus corr. by $A_1$ from खारी. ११७. 1) $A_2$ gloss द्वादशदीनाराणां बाहगन्ये इति कश्मीरदेशभाषया परिगणने षट्त्रिंशद्दीन्नाराः त्रिबाहगन्य इति ज्ञेयाः. ११८. 1) Thus corr. by $A_3$ from $A_1$ निर्गता वा.—2) $A_2$ gloss सुय्यपुराख्यम्. ११९. 1) Thus corr. by $A_3$ from $A_1$ स्थिरासार°. १२०. 1) Thus corr. by later hand from $A_1$ सुय्यकु°.—2) Emended; A सय्या°.—3) Thus corr. by later hand from $A_1$ सय्या°. १२१. 1) $A_2$ gloss जिथन्.

आषाढशुक्लपक्षस्य तृतीयस्यां क्षमापतिः[1] । वर्षे एकोनषष्ठे स क्ष्मावृषास्तमुपाययौ ॥१२६॥
तस्मिन्प्रशान्ते प्रत्येकं विभवोत्सिक्तचेतसाम् । तुल्यमुत्पलवंश्यानां राज्येच्छा भूयसामभूत् ॥१२७॥
ततश्चक्रे प्रतीहारः प्रयत्नाद्रत्नवर्धनः । नृपं शंकरवर्माणमवन्तिनृपतेः सुतम् ॥१२८॥
कर्णपो विन्नपामात्यस्[1]तनूजं शूरवर्मणः[2] । तद्वेषात्सुखवर्माख्यं यौवराज्येऽप्ययोजयत् ॥१२९॥
अतस्तयोरभूद्वैरं क्षितीशयुवराजयोः । यस्मिन्क्षणे क्षणे राज्यमासीद्दोलामिवाश्रयत् ॥१३०॥ 130
शिवशक्त्यादयो वीराः स्वामिकार्योज्झितासवः । यत्राभूवन्स्वसत्त्वस्य परीक्षाक्षणलाभिनः ॥१३१॥
कुर्वतां स्वामिशत्रूणां दानमानप्रतिश्रवम् । सत्त्वैकाग्र्यान्न ते यस्मादानुकूल्यमशिश्रयन् ॥१३२॥
पिण्डस्पृहां परित्यज्याहंकृताः शिक्षिताः क्वचित् । तावन्न वीततमसः श्ववृत्तिमनुजीविनः ॥१३३॥
कथंचिदथ निर्जित्य युवराजं[1] महौजसम् । प्राज्यः स्वविजयोंकारश्चक्रे शंकरवर्मणा ॥१३४॥
सम्राट्समरवर्माद्यैर्वितीर्णसमरोत्सवः । कीर्तिं श्रिया प्रणयिनीं लब्धयाधिविवेद सः ॥१३५॥ 135
अथ निर्जित्य दायादांल्लब्ध्वा लक्ष्मीं क्षितीश्वरः । जिष्णुर्दिग्विजयं कर्तुं श्रीमानासीन्महोद्यमः ॥१३६॥
तस्य कालबलाद्देशे प्रक्षीणजनसंपदि । लक्षाणि नव पत्तीनां द्वारान्निष्क्रामतोऽभवन् ॥१३७॥
स्वपुरस्योपकण्ठेऽपि योऽभूत्कुण्ठितशासनः । स एव रत्नोत्तंसेषु राज्ञामाज्ञां न्यवेशयत् ॥१३८॥
गच्छन्नाम्नायविच्छेदसंप्रदायः ककुब्जये । स्वप्रज्ञया समुन्नीतो राज्ञा शंकरवर्मणा ॥१३९॥
तत्सेना नरनाथानां पृतनाभिः पदे पदे । कुलापगेव कुल्याभिर्विशन्तीभिरवर्ध्यत ॥१४०॥ 140
दार्वाभिसार[1]राजेन[2] त्रस्यता[3] समुपाश्रिताः । अद्रिद्रोण्यो न वाहिन्य[4]स्तत्सेनानादमादधुः ॥१४१॥
जनोल्बणैर्हरिगणैर्गृह्णन्हरिगणं क्षणात् । अनासादितदुर्गं स चक्रे दुर्गान्तरातिथिम् ॥१४२॥
लक्षाणि नव पत्तीनां वारणानां शतत्रयी । लक्षं च वाजिनामासीद्यस्य सेनापुरःसरम् ॥१४३॥
स गुर्जर[1]जयव्यग्रः स्वप्राभवशङ्किनम् । त्रैगर्तं[2] पृथिवीचन्द्रं निन्ये तमसि हास्यताम् ॥१४४॥
पुत्रं भुवनचन्द्राख्यं नीविं[1] प्रागेव दत्तवान् । स ह्यभूत्प्रणतिं कर्तुं तस्याभ्यर्णमुपागतः ॥१४५॥ 145
अथ तत्कटकं भ्राम्यद्भूरिमण्डलनायकम् । वीक्ष्य संमुखमायान्तं महार्णवमिवोल्बणम् ॥१४६॥
समागमक्षणे यस्माच्छङ्कमानः स्वबन्धनम् । पलाय्य प्रययौ दूरं नि[1]र्वाणौजोविजृम्भितः ॥१४७॥ तिलकम्॥
यमप्रतिमसौन्दर्यमद्याप्याहुः पुराविदः । तमेवाद्राक्षुरुत्त्रस्ता नृपाः कालमिवोल्बणम् ॥१४८॥
उच्चखानालखानस्य संख्ये गुर्जरभूभुजः । बद्धमूलां क्षणाल्लक्ष्मीं शुचं दीर्घामरोपयत् ॥१४९॥
तस्मै दत्त्वा टक्कदेशं[1] विनयादङ्गुलीमिव । स्वशरीरमिवापासीन्मण्डलं गुर्जराधिपः ॥१५०॥ 150
हृतं भोजाधिराजेन स साम्राज्यमदापयत् । प्रतीहारतया भृत्यीभूते थक्कियकान्वये ॥१५१॥

१२६. [1]) Thus corr. by $A_3$ from $A_1$ °पतेः. १२९. [1]) Thus $A_3$; $A_1$ °पापत्य°.—[2]) $A_4$ gloss अवन्तिवर्मभ्रातुः. १३४. [1]) $A_4$ gloss सुखवर्माणम्. १३९. [1]) Thus $A_1$; altered by later hand to °विच्छेदं. १४१. [1]) $A_2$ gloss दर्वाभिसारः दान-गलो इति भाषया.—[2]) $A_4$ gloss नरवाहननाम्ना.—[3]) $A_3$ भ्राम्यता.—[4]) $A_4$ gloss दार्वाभिसारनृपस्य सेनाः. १४४. [1]) $A_2$ gloss गुर्जरेति अत्र गूर्जरः लघुगोज्यराद इति प्रसिद्धो देशः.—[2]) $A_2$ gloss त्रिगर्तो नगरकोट्टः तदधीशः. १४५. [1]) $A_1$ writes in margin the gloss : नीविः । नेय इति देशभाषया प्र, which $A_2$ continues with सिद्धः यः स्वप्रतिनिधिः न्यूनबलेन माण्डलिकेनाधिकबलस्य राज्ञः प्रतीत्यर्थं समर्प्यते ॥. १४७. [1]) नि supplied by $A_3$ in space left by $A_1$. १५०. [1]) $A_4$ gloss तक्कदेशः अह्निनदीतटे शकरदो नाम भुट्टदेशाद्दूरं वर्तमानो योजनविंशतिकेन.

दरत्तुरुष्काधिपयोर्यः केसरिवराहयोः । हिमवद्विन्ध्ययोरासीदार्यावर्त इवान्तरे ॥१५२॥
उदभाण्डपुरे तस्थुर्यदीये निर्भया नृपाः । पक्षच्छेदव्यथात्रस्ता महार्णव इवाद्रयः ॥१५३॥
नक्षत्रेष्विव भूपेषु नभसीवोत्तरापथे । यस्यैव विपुला ख्यातिर्मार्ताण्डस्येव मण्डलम् ॥१५४॥
155 स श्रीमांल्लल्लियः शाहिरलखानाश्रयः क्रुधा । निराकरिष्णोः साम्राज्यात्तस्य सेवां न लब्धवान् ॥१५५॥
एवं दिग्विजयं कृत्वा प्राप्तः स निजमण्डलम् । प्रदेशे पञ्चसत्राख्ये स्वनाम्ना विदधे पुरम् ॥१५६॥
तस्य श्रीस्वामिराजस्य तनयोदक्पथप्रभोः । पूर्णिमेव क्षपाबन्धोः सुगन्धाख्याभवत्प्रिया ॥१५७॥
तया समं पुरवरे सुरराजोपमो नृपः । तस्मिञ्शंकरगौरीशसुगन्धेशौ विनिर्ममे ॥१५८॥
द्विजस्तयोर्नायकाख्यो गौरीशङ्करसद्मनोः । चातुर्विद्यः कृतस्तेन वाग्देवीकुलमन्दिरम् ॥१५९॥
160 परकाव्येन कवयः परद्रव्येण चेश्वराः । निर्लोण्ठितेन स्वकृतिं पुष्णन्त्यद्यतने क्षणे ॥१६०॥
स्वल्पसत्त्वो नरपतिः स्वपुरख्यापनाय सः । सारापहारमकरोत्परिहासपुरस्य यत् ॥१६१॥
ख्यातिहेतुः पट्टवानं पशूनां क्रयविक्रयौ । इत्यादि यत्पत्तनेस्ति तत्तस्मिन्हि पुरेभवत् ॥१६२॥
राज्यप्रदेन नृपते रत्नवर्धनमन्त्रिणा । श्रीरत्नवर्धनेशाख्यो व्यधीयत सदाशिवः ॥१६३॥
चित्रं नृपद्विपाः पूतमूर्तयः कीर्तिनिर्झरैः । भवन्ति व्यसनासक्तिपांसुस्नानमलीमसाः ॥१६४॥
165 अथ क्रमेण नृपतिर्लोभाभ्यासेन भूयसा । आधीयमानचित्तोभूत्प्रजापीडनपण्डितः ॥१६५॥
आरब्धैर्व्यसनैर्भूम्ना क्षीणकोशः क्षणे क्षणे । देवादीनां स सर्वस्वं जहारायासयुक्तिभिः ॥१६६॥
कर्मस्थाने पुरगृहग्रामादिधनहारिणा । तेनाट्टपतिभागाख्यगृहकृत्याभिधे कृते ॥१६७॥
धूपचन्दनतैलादिविक्रयोत्थं समाददे । द्रविणं देववेश्मभ्यः क्रयमूल्यकलाच्छलात् ॥१६८॥
प्रत्यवेक्षां मुखे दत्त्वा विभक्तैरधिकारिभिः । चतुःषष्टिं सुरगृहान्मुमोषेतरदञ्जसा ॥१६९॥
170 ग्रामान्देवगृहग्राह्यान्राजा प्रतिकरेण सः । स्वयं स्वीकृत्य चोत्पत्तिं क्ष्मां कार्षक इव व्यधात् ॥१७०॥
तुलां कृत्वा त्रिभागोनां वर्षदेयां स पर्षदे । भुक्तिकम्बलमूल्यादिदम्भादभ्यधिकं ददौ ॥१७१॥
दिगन्तरस्थो ग्रामीणानूढभाराननागतान् । तद्देशार्घैर्भारमूल्यं वर्षमेकमदण्डयत् ॥१७२॥
वर्षेपरस्मिन्निखिलान्भारमूल्यं निरागसः । तयैव संख्यया ग्राम्यान्प्रतिग्राममदण्डयत् ॥१७३॥
इत्येषा रूढभारोढिः प्रथमं तेन पातिता । दारिद्र्यदूती ग्रामाणां या त्रयोदशधा स्थिता ॥१७४॥
175 स्कन्दकग्रामकायस्थमासवृत्त्यादिसंग्रहैः । अन्यैश्च विविधायासैर्व्यधाद्ग्रामान्स निर्धनान् ॥१७५॥
तुलापहारोपचयग्रामदण्डादिसंग्रहैः । इत्येष तेन संवाहो गृहकृत्ये प्रवर्तितः ॥१७६॥
व्यधत्त पञ्च दिविरान्स तस्मिन्भिन्नकर्मणि । षष्ठं तथा गञ्जवरं शाकचं लवटाभिधम् ॥१७७॥

---

१५३. 1) This verse is added in margin by $A_3$; found in G R. १५४. 1) $A_1$ विपुलख्याति मा°; $A_3$ has altered this to विपुला ख्यातिर्मा°, but has subsequently restored the reading of $A_1$. G follows $A_1$, R reads as $A_3$. १५५. 1) Thus corr. by $A_3$; $A_1$ °ल्लियः.—2) Thus corr. by $A_1$ from °रिष्णुः; R G °रिष्णोः. १५६. 1) $A_3$ gloss शङ्करवर्मा.—2) $A_2$ gloss शङ्करपोर. १५७. 1) $A_3$ gloss शङ्करवर्मणः.—2) $A_3$ gloss कन्या. १५८. 1) Emended; A गौरेश°. १६५. 1) Thus corr. by $A_3$ from $A_1$ अधेयमान°. १६८. 1) Thus $A_1$; $A_3$ °नचैला°.—2) Thus corr. by later hand from $A_1$ °मूल्ये.—3) $A_2$ gloss कलालाभः. १६९. 1) Thus $A_3$; $A_1$ मुमोचेत°. १७१. 1) Thus $A_1$; $A_3$ भुक्त°.—2) दम्भा supplied by $A_3$ in space left by $A_1$. १७७. 1) Thus $A_1$. Cf. vi. 130; vii. 111, 119; misread शिविरान्स in R G Edd.

आत्मनो निरयं मूढः सोऽङ्गीकृत्येत्युपक्रियाम् । भाविनामकरोद्राज्ञां पापी[1] यद्वा[2] नियोगिनाम् ॥१७८॥
निमित्तं मण्डलेमुष्मिन्सर्वविद्यानामनादरे । राज्ञां प्रतापहानौ च नान्यः शंकरवर्मणः ॥१७९॥
मुख्येन गुणिनां राज्ञा धनहान्या प्रथापहाः । मूर्खेण येन कायस्था दास्याः पुत्राः प्रवर्तिताः ॥१८०॥ 180
तथा कायस्थभोज्या भूर्जाता तत्प्रत्यवेक्षया । यथा संजायतेवर्णं[1] हरणादिव भूभुजाम् ॥१८१॥
तस्मिन्घोरे प्रजादुःखे कृपार्द्रः पृथिवीपतिम् । पुत्रो गोपालवर्माख्यः कदाचिदिदमब्रवीत् ॥१८२॥
प्रदातुस्तात भवतः पूर्वं न्यासीकृतः स्थितः । वरो यः सत्यसंधस्य सोऽधुना प्रार्थ्यते मया ॥१८३॥
कायस्थप्रेरणादेतैर्देवेनाद्य प्रवर्तितैः । आयासैः श्वासशेषैव प्राणवृत्तिः शरीरिणाम् ॥१८४॥
न च नामास्ति तातस्य काचिल्लोकद्वयोचिता । मनागपि हितप्राप्तिरेतया जनपीडया ॥१८५॥ 185
अदृष्टविषयां वार्तां गहनां विवृणोति कः । दृष्टेप्यनिष्टादन्यन्न कर्मणानेन दृश्यते ॥१८६॥
एकतो व्याधिदुर्भिक्षप्रमुखा विपदोऽखिलाः । प्रजानामेकतस्त्वेका लुब्धता वसुधापतेः ॥१८७॥
भूभुजोभ्यस्तलोभस्य श्रीः कैश्चिन्नाभिनन्द्यते । अकालकुसुमस्येव फलसंभावनोज्झिता ॥१८८॥
दानं च सूनृता सूक्तिर्विश्वसंवननं प्रभोः । लोभः पूर्वं तयोरेव विनाशाय महोद्यमः ॥१८९॥
प्रतापमायतिं शोभां हेमन्ताहस्य वारिदः । स्मृतिशेषां करोत्येव लोभश्च पृथिवीभुजाम् ॥१९०॥ 190
दायादा व्ययभीरुतापरिहतारब्धैर्भवन्त्युन्नता भृत्याः प्रत्युपकारकातरमतेः कुर्युर्न केपि प्रियम् ।
राशीभूतधनस्य जीवितहृतौ शश्वद्यतेरन्निजा भूभर्तुः क्रियते द्विषेव रभसाल्लोभेन किं नाप्रियम् ॥१९१॥
राजसंवाहनामायं नवायासो जनासुहृत् । तदेष लोभप्रभवः प्रजानाथ निवार्यताम् ॥१९२॥
श्रुत्वेति राजपुत्रस्य सौजन्येनोज्ज्वलं वचः । स्मितधौताधरो राजा शनैर्वचनमब्रवीत् ॥१९३॥
तवाकृत्यविसंवादि वचः सौजन्यपेशलम् । स्मारयत्यद्य मामेतच्चित्तवृत्तिं पुरातनीम् ॥१९४॥
कुमारभावे पूर्वं मे तवेवार्द्रान्तरात्मनः । प्रजावत्सलता वत्स पर्याप्ता पर्यवर्धत ॥१९५॥ 195
सोऽहं घर्मे महद्धर्मं शीते दत्त्वाच्छमंशुकम्[1] । पदातिरपपादत्रः पित्रा संचारितोऽभवम् ॥१९६॥
मृगव्यादौ हयैः सार्धमटन्तं[1] कण्टकक्षतम् । अन्तर्बाष्पं मां विलोक्य तमसूयिषुरग्रगाः ॥१९७॥
स तानुवाच सामान्यो भूत्वाहं राज्यमाप्तवान् । काले काले सेवकानां जाने सेवापरिश्रमम् ॥१९८॥
ईदृग्दुःखमयं भुक्त्वा ज्ञास्यत्यन्यव्यथां ध्रुवम् । प्राप्तैश्वर्यो भवेन्मूढो गर्भेश्वरतयान्यथा ॥१९९॥
उपायैरीदृशैर्योऽहं कृतः पित्रा सुशिक्षितः[1] । तेनापि प्राप्तराज्येन मयैवं पीडिताः प्रजाः ॥२००॥ 200
गर्भवासव्यथां जातः शरीरी विस्मरेद्यथा । प्राप्तराज्यस्तथा राजा नियतं पूर्वचिन्तनम्[1] ॥२०१॥
त्वयैव तस्मादेकोद्य वरो मह्यं प्रदीयताम् । प्राप्तराज्यः प्रजापीडां मा कार्षीस्त्वमतोऽधिकाम् ॥२०२॥
सासूयमिति तेनोक्तः कृतान्योन्यस्मितैर्विटैः । राजाप्तैर्वीक्षितश्चासीत्कुमारो ह्रीनताननः ॥२०३॥
त्यागभीरुतया तस्मिन्गुणिसङ्गपराङ्मुखे । आसेवन्तावरा वृत्तीः कवयो भल्लटादयः ॥२०४॥
निर्वेतनाः सुकवयो भाविको लवटस्त्वभूत् । प्रसादात्तस्य दीन्नारसहस्रद्वयवेतनः ॥२०५॥ 205

१७८. [1]) Thus A ; *varia lectio* in R G पापीयस्त्वा.—[2]) Thus corr. by $A_3$ from $A_1$ वियोगि°. १८१. [1]) $A_2$ gloss अपयशः. १९६. [1]) Thus $A_3$; $A_1$ °दत्त्वोश्चमं°. १९७. [1]) Thus corr. by $A_3$ from $A_1$ °टन्तः. २००. [1]) Thus corr. by $A_3$ from $A_1$ °क्षिताः. २०१. [1]) $A_3$ °चिन्तितम्.

कल्यपालकुले जन्म तत्तेनैव प्रमाणितम् । क्षीवोचितापभ्रंशोक्तेर्दैवी वाग्यस्य नाभवत् ॥२०६॥
वेष्टितश्मश्रुरुष्णीषो प्राणस्याग्रे प्रदेशिनी । ध्यानैकाग्रा दृगित्यासीत्सुखराजस्य[1] मन्त्रिणः ॥२०७॥
योयमार्योचितो वेषो दुर्नयासेविनः प्रभोः । छन्दानुवृत्त्या स प्राप नटस्येव विडम्बनाम् ॥२०८॥ युग्मम्॥
सोनुगैः सह निर्द्रोहं जघान द्रोहशङ्कया । शूरं दार्वाभिसारेशं शर्वर्यां नरवाहनम् ॥२०९॥
210 प्रजाभिशापे पतिते नृपस्योन्मार्गवर्तिनः । त्रिंशद्विंशाः[2] सुतास्तस्य व्यपद्यन्तामयं विना ॥२१०॥
वंशः श्रीर्जीवितं दारा नामापि पृथिवीभुजाम् । क्षणादेव क्षयं याति प्रजाविप्रियकारिणाम् ॥२११॥
इत्युक्तं वक्ष्यते चाग्रे व्यक्तमेतत्तु चिन्त्यताम् । प्रनष्टं तस्य नामापि यथा क्रूरेण कर्मणा ॥२१२॥
नाम्ना पत्तनमित्येव[1] प्रख्यातं स्वपुरं कृतम् । कस्यान्यस्याभिधाध्वंसि यथा शंकरवर्मणः ॥२१३॥
स्वस्त्रीयः सुखराजस्य तेन द्वाराधिपः कृतः । वीरानका[1]भिधे स्थाने प्रमादादासदद्व[2]धम् ॥२१४॥
215 तत्कोपात्स स्वयं राजा दत्तयात्रो मदोर्जितः । वीरानकं समुन्मूल्य प्रविवेशोत्तरापथम् ॥२१५॥
सिन्धुकूलाश्रयान्देशाञ्जित्वा भूरीन्भयातुरैः । कृतानतिर्महीपालैः प्रत्यावृत्तोभवत्ततः ॥२१६॥
उरशां[1] विशतस्तस्य वास्तव्यैरौरशैः समम् । निकेतहेतोः सैन्यानामकस्मादुदभूत्कलिः ॥२१७॥
गिरिशृङ्गाधिरूढेन श्वपाकेन निपातितः । वेगवाही शरस्तस्य प्रमादादविशद्गलम् ॥२१८॥
मुमूर्षुराप्तान्कटकं संरक्ष्य नयतेति सः । उक्त्वा कर्णीरथारूढः[1] स्थानात्तस्माद्विनिर्ययौ ॥२१९॥
220 हीनदर्शनसामर्थ्यः परिज्ञाय शनैर्गिरा । क्रन्दन्त्या वपुरालिङ्ग्य[1] स्थितायाः क्षामभाषितः ॥२२०॥
पुत्रं गोपालवर्माख्यं न्यासीकृत्य च रक्षितुम् । शिशुदेदयं महादेव्याः सुगन्धाया अबान्धवम् ॥२२१॥
फाल्गुने कृष्णसप्तम्यां वत्सरे सप्तसप्ततौ । उत्खायमानविशिखो मार्ग एव व्यपद्यत ॥२२२॥ तिलकम्॥
सुखराजादयः[1] सैन्यं रक्षन्तः परभूमिषु । वृत्तान्तैर्गो[2]पयन्तस्तं यान्त एवाभवन्पथि ॥२२३॥
तं यन्त्रसूत्रैस्ते मूर्ध्नो नम्रतोन्नम्रतावहैः । प्रतिग्रामं प्राप्तानां सामन्तानामकारयन् ॥२२४॥
225 षड्भिर्दिनैर्निजे स्थाने प्राप्ते बोल्यासका[1]भिधे । चक्रिरे गतसंत्रासास्ततस्तस्यान्तसत्क्रियाम् ॥२२५॥
तिस्रः सुरेन्द्रवत्याद्या राज्ञ्यो राजानमन्वयुः । वेलावित्तः[1] कृतज्ञश्च जयसिंहाह्वयः कृती ॥२२६॥
द्वौ लाडो वज्रसारश्च तं भृत्यावनुजग्मतुः । इति षड्भिश्चितारूढैः सहसाक्रियताग्निसात् ॥२२७॥
ततो जुगोप गोपालवर्मा धार्मिकतोज्ज्वलः । सुगन्धया पाल्यमानः सत्यसंधो वसुंधराम् ॥२२८॥
मध्ये ललितकादीनां[1] दुर्वृत्तानां वसन्नपि । अनतिक्रान्तबाल्योपि दुःसंस्कारान्न सोग्रहीत् ॥२२९॥
230 भूपालजननी भोगैर्वैधव्येधिकमुन्मदा । सा प्रभाकरदेवाख्यमचीकमत मन्त्रिणम् ॥२३०॥
तया निर्भरसंभोगप्रीतया स व्यधीयत । सौभाग्यपदशृङ्गारमौलिचक्रत्रयाङ्कितः ॥२३१॥
कोशाध्यक्षेण रागिण्यास्तस्या लुण्ठितसंपदा । उदभाण्डपुरे[1] तेन शाहिराज्यं व्यजीयत[2] ॥२३२॥

२०७. 1) Thus corr. by $A_3$ from $A_1$ °रागस्य. २१०. 1) न supplied by $A_3$.—2) $A_1$ writes below this word ५०. २१३. 1) $A_2$ gloss पट्टन्. २१४. 1) $A_2$ gloss द्वारविषयायां वीराणकं.—2) $A_4$ gloss सुखराजस्वस्त्रीयः. २१७. 1) $A_2$ gloss उडू. २१९ 1) Thus $A_2$; $A_1$ °रूढान्स्था°. २२०. 1) Thus corr. by later hand from $A_1$ °लिङ्ग्या. २२३. 1) $A_3$ gloss मन्त्रिणः.—2) Thus $A_1$; $A_3$ वृत्तान्तं गो°. २२५. 1) Thus A R G; $A_2$ gloss वराहमलसमीपे द्वारवत्यां. २२६. 1) Emended: A R वालावित्तः; G वालाविभुः. Cf. वेलावित्तः vi. 73, 106, 324. २२९. 1) $A_3$ gloss ललितकाः पदातयः. २३२. 1) Thus corr. from $A_1$ उद्दाभाण्ड° by $A_2$ which adds the gloss हैभङ्; R G read as $A_2$. Cf. उदभाण्डपुरे v. 153.—2) Thus $A_1$; $A_3$ व्यधीयत; G R follow $A_3$.

आज्ञातिक्रमिणः शाहेः कृत्वा कमलुकाभिधाम्[1] । तोरमाणाय[2] स प्रादाद्राज्यं लाल्लियसूनवे ॥२३३॥
प्रत्यावृत्तोथ नगरं विवेश विजयोर्जितः । शौर्यशृङ्गारवसतौ साभिमानः स्वविग्रहे ॥२३४॥
स राजजननीजारः साहंकारो[1] जयार्जनात् । मानं[2]क्षतिमधिक्षेपैर्वीराणां व्यधितान्वहम् ॥२३५॥ 235
क्षुद्रेण कामिना वेश्यावेश्मनीव नृपास्पदे । तेनावृते संप्रवेशो नाभूदन्यस्य कस्यचित् ॥२३६॥
शनैर्विज्ञातवार्तस्य धनमाना[1]पहारकृत् । सोभूदक्षिगतोत्यर्थं राज्ञो गोपालवर्मणः ॥२३७॥
विद्यते यन्न गञ्जेस्मिंस्तत्सर्वं शाहिविग्रहे । गतमित्यब्रवीद्रूपं स कोशगणनोद्यतम् ॥२३८॥
अथ गञ्जाधिपो[1] राजभीतः खार्खोदवेदिनम् । रामदेवाह्वयं बन्धुमभिचारमकारयत् ॥२३९॥
तयाभिचारक्रियया भुक्तभूर्वत्सरद्वयम् । गोपालवर्मनृपतिर्जातदाहो व्यपद्यत ॥२४०॥ 240
व्यक्तीभूतकुकर्मा स राजदण्डभयाकुलः । रामदेवोवधीत्पापः स्वयमेव स्वविग्रहम् ॥२४१॥
रथ्यागृहीतो गोपालवर्मभ्राताथ संकटः । बभूव प्राप्तराज्यः स दशभिर्दिवसैर्व्यसुः ॥२४२॥
अथ वंशक्षये वृत्ते राज्ञः शंकरवर्मणः । प्रजाप्रार्थनया राज्यं सुगन्धा[1] विदधे स्वयम्[2] ॥२४३॥
गोपालपुरं[1]गोपालमठगोपालकेशवान् । सा पुरं च स्वनामाङ्कं विदधे धर्मवृद्धये ॥२४४॥
गोपालवर्मणो जाया नन्दानिन्द्यान्वयोद्भवा । शिशुरप्यभवन्नन्दामठं[1]केशवधारिणी ॥२४५॥ 245
अन्तर्वत्न्याः क्षणे तस्मिन्पत्न्या गोपालवर्मणः । जयलक्ष्म्यां बबन्धास्थां श्वश्रूः संतानकाङ्क्षिणी ॥२४६॥
तस्यां विपन्नापत्यायां प्रसवान्तेतिदुःखिता । साभूदन्वयिने राज्यं कस्मैचिद्दातुमुद्यता ॥२४७॥
तस्मिन्काले महीपालनिग्रहा[1]नुग्रहक्षमम् । तत्र तन्त्रि[2]पदातीनां कृतसंहत्यभूत्कुलम् ॥२४८॥
ततः सभाश्रितैकाङ्गा स्वयं संवत्सरद्वयम् । सुगन्धा विदधे राज्यं सा[1] मित्रत्वेन तन्त्रिणाम्[2] ॥२४९॥
योग्याय दातुं साम्राज्यं कस्मैचित्सा किलैकदा । मन्त्राय मन्त्रिसामन्तां[1]स्तन्त्र्यैकाङ्गानढौकयत् ॥२५०॥ 250
अवन्तिवर्मवंशान्ते नप्तारं शूरवर्मणः । गग्गायाः स्वकुटुम्बिन्याः संजातं सुखवर्मणा ॥२५१॥
अनुव्रतो मे संबन्धिस्नेहादेवं भवेदिति । राज्ये निर्जितवर्माख्यं कर्तुं तस्या मनोभवत् ॥२५२॥ युग्मम् ॥
तया तदुक्तं विषयव्यसनित्वेन जागरात् । रात्रौ दिवाशयतया योप्यनुत्थानदूषितः ॥२५३॥
नाम पङ्गुरिति[1] प्राप राज्ये का तस्य योग्यता । इत्युदीर्याभवन्घ्नन्तो यावत्केचन मन्त्रिणः ॥२५४॥
संहतैर्भेदनिर्यातैस्तावन्निर्जितवर्मजः । दशवर्षः कृतो राजा पार्थस्तन्त्रिपदातिभिः ॥२५५॥ तिलकम् ॥ 255
ते[1] गञ्जाधिपवाक्यानां सुगन्धोत्पाटनात्कृतम् । प्रायश्चित्तममन्यन्त मानक्षतिविधायिनाम् ॥२५६॥
सा राज[1]धान्याः साम्राज्यपरिभ्रष्टा विनिर्ययौ । कृता[2]धिकारा हारस्य पतितैर्बाष्पबिन्दुभिः ॥२५७॥
शरणं प्रत्यभाद्भृत्यो यो यस्तस्याः क्रमागतः । तं तमैक्षिष्ट निर्यान्ती विपक्षैः सह संगतम् ॥२५८॥
वर्षे एकान्न[1]नवते संभूयैकाङ्गसैनिकाः । गत्वा सुगन्धामानिन्युः पुनर्हुष्कपुरं[2]स्थिताम् ॥२५९॥

---

२३३. [1]) Thus corr. by later hand from $A_1$ °धम्.—[2]) Thus $A_2$; $A_1$ तोमराणाय. २३५. [1]) Thus $A_2$; $A_1$ °जननीसङ्गात्साभिमानो.—[2]) Thus corr. by $A_3$ from $A_1$ मनः°. २३७. [1]) Thus corr. by $A_3$ from $A_1$ °मालाप°. २३९. [1]) $A_4$ gloss प्रभाकरः. २४३. [1]) $A_2$ gloss गोपालवर्मसङ्कटयोर्माता सुगन्धा.—[2]) Thus corr. by $A_2$ from $A_1$ पुरम्. २४४. [1]) $A_2$ gloss गुरीपुरम्. २४५. [1]) $A_2$ gloss नन्दीमठं. २४८. [1]) Thus corr. by $A_3$ from $A_1$ विग्रहा°.—[2]) Thus $A_2$; $A_1$ तत्र. २४९. [1]) Thus emended; A G R समित्र°.—[2]) $A_3$ *v. l.* मन्त्रिणाम्; struck out. २५०. [1]) Thus $A_3$; $A_1$ °न्तात्तन्त्र्यै°. २५४. [1]) $A_2$ gloss निर्जितवर्मा. २५६. [1]) $A_2$ gloss कोट्टरक्षाः. २५७. [1]) Thus corr. by later hand from $A_1$ राज्य°.—[2]) Thus $A_3$; $A_1$ हृता°. २५९. [1]) Thus $A_1$; $A_3$ एकोन°.—[2]) $A_2$ gloss वराहमूले.

260 तामापतन्तीमाकर्ण्य पार्थानुग्रहका मदात् । चैत्रान्ते तन्त्रिणः सर्वे निर्ययुः समरोन्मुखाः ॥२६०॥
ते जित्वा नवते वर्षे वैशाखे भिन्नसंहतीन् । एकाङ्गान्व्यूढसंघातान्बबन्धुस्तां पलायिताम् ॥२६१॥
निष्पालकविहारान्तस्तैर्बद्धा सा व्यपद्यत । अनित्यपतनोच्छ्राया विचित्रा भाग्यवृत्तयः ॥२६२॥
अस्मिन्धनजनक्षैण्यनिमित्तं मण्डलोत्तमे । सर्वतोदिक्कमुत्तस्थावथानर्थपरंपरा ॥२६३॥
जनकः पालको भूत्वा पङ्गु[1]र्बालस्य भूपतेः । सामात्योपीडयल्लोकमुत्कोचग्रहतत्परः ॥२६४॥
265 भूभुजो ग्रामकायस्था इवान्योन्यविपाटनम् । दत्ताधिकाधिकोत्कोचा विदधुस्तन्त्रिसेवया ॥२६५॥
यद्राजैः[1] कन्यकुब्जाद्या विलब्धास्तत्र मण्डले । तन्त्रिणां हुण्डिकादानाद्भूभुजां जीविकाभवत् ॥२६६॥
विष्णुः पुराणाधिष्ठाने[1] मेरुवर्धनमन्त्रिणां[2] । श्रीमेरुवर्धनस्वामिनामा येन व्यधीयत ॥२६७॥
तदात्मजाः[1] क्षणे तस्मिन्गहनद्रोहचाक्रिकाः । चक्रुर्निगूढराज्येच्छाः प्रजायासैर्धनार्जनम् ॥२६८॥ युग्मम् ॥
सार्धं सुगन्धादित्येन[1] गूढं शंकरवर्धनः । तेषां ज्येष्ठो बद्धसख्यो[2] मुमोष नृपमन्दिरम् ॥२६९॥
270 क्षीणप्रजे क्षणे तस्मिन्क्षारपात इव क्षते । उदीपः[1] प्लाविताशेषशरच्छालिरजृम्भत ॥२७०॥
खार्यां सहस्रक्रेयायां दुर्लभे भोजनेभवत् । वर्षे त्रिनवते[1] घोरे दुर्भिक्षेण जनक्षयः ॥२७१॥
शवैश्चिरप्रविष्टाम्बुसंसेकोच्छूनविग्रहैः । वितस्ता सर्वतश्छन्ना दुर्लक्ष्य[1]सलिलाभवत् ॥२७२॥
विश्वतोस्थिमये जाते[1] नैविड्यात्क्षितिमण्डले । सर्वभूतभयादायि श्मशानैक्यमजायत ॥२७३॥
महार्ह[1]धान्यसंभारविक्रयप्राप्तसंपदः । मन्त्रिणः क्ष्मापतेः प्रापुस्तन्त्रिणश्च धनाढ्यताम् ॥२७४॥
275 आधेयः[1] क्ष्माभुजः सोभून्मन्त्री यस्तादृशीः प्रजाः । विक्रीय वाहयन्नासीत्तन्त्रिणां हुण्डिकाधनम् ॥२७५॥
अटव्यां वृष्टि[1]संपाते वातवर्षैरुपद्रुतम् । बहिः सर्वं जनं पश्यन्कश्चित्प्राप्तोष्णमन्दिरः ॥२७६॥
यथा तथा जनं दुःस्थं वीक्ष्य कापुरुषश्चिरम् । राजधानीस्थितः पङ्गुः स्वसुखं बह्वमन्यत ॥२७७॥युग्मम्॥
तुञ्जीनचन्द्रापीडादिप्रजापालप्रियाः प्रजाः । एवं तस्मिन्क्षणे नीताः संक्षयं राजराक्षसैः ॥२७८॥
प्रापुश्चिरमवस्थानं पार्थिवा न तदा क्वचित् । धारासंपातसंभूता बुद्बुदा इव दुर्दिने ॥२७९॥
280 पार्थः पितरमुत्पाद्य कदाचित्प्राभवत्स्वयम् । कदाचित्स तमुत्पाद्य तन्त्रिचाक्रिकयाप्यभूत् ॥२८०॥
अप्रीणयत्पङ्गुवधूवडवामण्डलं युवा । सुगन्धादित्य[1]बीजाश्वो व्यवाय[2]विधिसेवया ॥२८१॥
राज्ञ्यां[1] वप्पटदेव्याः स निर्दयैः सुरतोत्सवैः । खण्डयामास कण्डूतिं साप्यस्यार्थैषणां धनैः ॥२८२॥
भगिनीभगसौभाग्यबद्धराज्याः स्वयं ददुः । यां पङ्गवे मनोज्ञाङ्गीं मेरुवर्धनसूनवः ॥२८३॥
सुगन्धादित्यमौत्सुक्यात्सापि देवी मृगावती । स्वयं संबुभुजेभ्यर्थ्य कान्ता कामितकामिनी ॥२८४॥
285 पर्यायेणाभवद्भृत्यः स तयोर्भोग[1]वृद्धये । दरिद्रयोषितोरेकं भुक्तिपात्रमिवान्वहम् ॥२८५॥

---

२६४. [1]) $A_2$ gloss निर्जितवर्मा. २६६. [1]) Thus $A_1$; altered by later hand to यद्राज्यैः. २६७. [1]) $A_2$ gloss पांयद्रठन् इति प्रसिद्धे ग्रामे.—[2]) $A_4$ gloss पङ्गुश्वशुरेण. २६८. [1]) $A_2$ gloss निर्जितवर्मजाः तदात्मजाः चक्रवर्मा शूरवर्मा । शम्भुवधर्नः शंकरवर्धनः मेरुवर्धनपुत्राः २६९. [1]) $A_2$ gloss मन्त्रिणा.—[2]) $A_4$ सुगन्धादित्येन सह. २७०. [1]) Thus corr. by later hand from $A_1$ उद्धूपः; $A_4$ gloss द्योपो (Kaśmîrî). २७१. [1]) $A_4$ gives the full date *Saptarshi* ३९९३. २७२. [1]) Thus $A_1$; altered by later hand to दुर्लक्ष°. २७३. [1]) जाते supplied by $A_3$ in space left by $A_1$. २७४. [1]) $A_3$ महार्घ°. २७५. [1]) Thus $A_1$; $A_3$ आदेयः. २७६. [1]) Thus corr. by $A_3$ from $A_1$ दृष्टि°. २८१. [1]) $A_3$ gloss मन्त्री.—[2]) $A_3$ gloss व्यवायः मैथुनम्. २८२. [1]) $A_4$ gloss चक्रवर्ममातुः. २८५. [1]) $A_4$ gloss तयोर्वप्पटदेवीमृगावत्योः पङ्गुपत्न्योः.

पुत्रयो राज्यलाभाय स्पर्धयाभ्यां स्वमन्त्रिणे । दत्ता निधुवनश्रद्धा धनदानै[1]ः सदक्षिणा ॥२८६॥

अथ पार्थं समुत्पाद्य तत्पिता पङ्गुराश्रितः । तन्त्रिभिः सप्तनवते वर्षे पौषेभिषेचितः ॥२८७॥

माघेष्टानवते वर्षे सोभिषिच्य शिशुं सुतम् । चक्रवर्माभिधं राज्ये क्षीणपुण्यो व्यपद्यत ॥२८८॥

पैतृकं वाञ्छतो राज्यं पार्थस्यानुचरा व्यधुः । एकाङ्गैः सह संग्रामं तत्र तन्त्रिपदातयः ॥२८९॥

मातुर्बप्पटदेव्याः स कंचित्कालं शिशुर्नृपः । मातामह्याः क्षिल्लिकाया[1]ः पाल्यस्त्वासीत्समा दश ॥२९०॥ 290

बाल्यादव्यक्तदौःशील्ये तस्मिंस्तत्पालनं तयोः । निर्दोषमासीदण्डस्थफणिलालनसंनिभम् ॥२९१॥

जातः पङ्गोर्मृगावत्यां[1] नवमेब्देथ तन्त्रिभिः[2] । चक्रवर्माणमुत्पाद्य शूरवर्मा नृपः कृतः ॥२९२॥

निःस्नेहा मातुलामात्याः प्रययुः स्वार्थतत्पराः । अदत्त्वा तन्त्रिणां देयं तस्योत्पाटनहेतुताम् ॥२९३॥

अदुर्वृत्तोपि स क्ष्माभृद्विना भूरिधनार्पणम् । गुणवानिव वेश्यानां तन्त्रिणां नाभवत्प्रियः ॥२९४॥

वर्षे गते तमुत्पाद्य दृष्टोत्पत्तितया नृपम् । बह्वर्थदं पुनः पार्थं व्यधुतन्त्रिपदातयः ॥२९५॥ 295

अभूत्साम्बवती वेश्या साम्बे[1]श्वरविधायिनी । पार्थप्रिया तन्त्रिचक्रसंग्रहे ज्ञातचक्रिका ॥२९६॥

कालापेक्षी चक्रवर्मा ततोप्यैच्छद्धनं बहु । एकादशाब्दस्याषाढे कृतो भूयोपि तन्त्रिभिः ॥२९७॥

पार्थादीन्यैः[1] समुत्पाद्य भुक्तं चक्रिकया पुरा । तैस्तैः स्थानैश्च ये तेभ्यो[2] जीवनाद्युपलेभिरे ॥२९८॥

पिता[1] भ्राता[2] च यैरस्य[3] राज्यादुत्पाटितोभवत् । संबन्धिभ्योपि यैर्द्रुग्धं कन्यां[4] दत्त्वै[5]तरेतरम् ॥२९९॥

अकरोद्दृष्टदोषाणां तेषामेव स नष्टधीः । मेरुवर्धनपुत्राणामधिकारसमर्पणम् ॥३००॥ तिलकम् ॥ 300

कृतोक्षपटलाधीशस्तेन शंकरवर्धनः । गृहकृत्येप्यसत्कृत्यो दाम्भिकः शंभुवर्धनः ॥३०१॥

पौषे तस्यैव वर्षस्य धनाभावात्स तन्त्रिणाम् । अदत्तहुण्डिकादेयः पलायिष्ट भयाकुलः ॥३०२॥

स्थिते मडवराज्यान्तस्तस्मिञ्शंकरवर्धनः । राज्यार्थी तन्त्रिणां दूतं प्राहिणोच्छंभुवर्धनम् ॥३०३॥

आवर्जितैः स निखिलैरधिकोत्कोचचर्चया । वञ्चयित्वाग्रजं राज्ये तैः स्वमेवाभ्यषेचयत् ॥३०४॥

तीर्थस्थितः स्वकुलजांस्तिमिरत्ति भुङ्क्ते मौनी बकस्तिमिमुपेत्य वनान्तवासी ।
व्याधो निहन्ति तु बकं प्रभवन्ति ते ते पात्राण्युपर्युपरि वञ्चनचञ्चुताया[1]ः ॥३०५॥ 305

भ्रष्टश्रीश्चक्रवर्माथ निशि श्रीढक्कवासिनः । एकदा डामराग्र्यस्य संग्रामस्याविशद्गृहम् ॥३०६॥

ज्ञात्वा कान्तिविशेषेण राजानं स कृताञ्जलिः । प्रणम्य ग्राहयामास संभ्रमान्निजमासनम् ॥३०७॥

राज्यभ्रंशादिवृत्तान्तमुक्त्वा साहायकार्थिनम् । तं विपत्पेशलं प्रह्वो विचिन्त्योवाच डामरः ॥३०८॥

तन्त्रिणां वा तृणानां वा राजन्का गणना रणे । त्वत्सेवनार्थं सामर्थ्यं कस्मिन्न मम कर्मणि ॥३०९॥

प्राप्तोत्साहः पुनर्नूनमस्माने[1]व हनिष्यसि । विस्मरन्त्युपकारं हि कृतकार्या महीभुजः ॥३१०॥ 310

ऊर्ध्वारोहे य आलम्बहेतुर्भूभृच्छिनत्ति तम् । कुठारिकस्तरुस्कन्धमिवाधोगमनोन्मुखः ॥३११॥

धीधैर्यादिप्रकर्षेण येनोपक्रियते नृपः । प्राप्तोदयः स तेनैव शङ्क्यं वेत्त्युपकारिणम् ॥३१२॥

---

२८६. [1]) $A_2$ reads धनधान्यैः. २९०. [1]) Thus corr. by later hand from $A_1$ क्षल्लि°. २९२. [1]) $A_4$ gloss मेरुवर्धनपुत्र्यां.— [2]) Thus $A_3$; $A_1$ मन्त्रिभिः. २९६. [1]) $A_2$ gloss साम्बोरणग्रामे. २९८. [1]) $A_4$ gloss अत्र सर्वत्र यच्छब्देन मेरुवर्धनपुत्रपरामर्शः.— [2]) $A_4$ पार्थादिभ्यः. २९९. [1]) $A_4$ gloss पङ्गुः.— [2]) $A_4$ gloss पार्थः शूरवर्मा वा.— [3]) $A_4$ gloss चक्रवर्मणः.— [4]) $A_4$ gloss मृगावतीं.— [5]) $A_4$ gloss पङ्गवे. ३०५. [1]) Emended; A चुञ्चु°. ३१०. [1]) Thus corr. by $A_3$ from $A_1$ °स्मान्नेव.

अस्मिन्स्थिते विपदभूदिति संचिन्त्य वर्ज्यते । मूढैः परिवृढैरापत्सेवको मङ्गलेच्छुभिः ||३१३||

संपद्यापत्सहायस्य विस्मृतोपक्रिया नृपाः । मध्ये प्रमादस्खलितमुत्पन्नं हृदि कुर्वते ||३१४||

315 आमयार्तिरिपुत्रासक्षुदादौ दृष्टवैकृतान् । लब्धोदया ह्रीभयेन क्ष्मापा घ्नन्त्यनुयायिनः ||३१५||

राज्ञः[1] सतोपि नाश्वासो यस्येभस्येव कर्णयोः । अविशुद्ध[2]प्रकृतयो ध्वनन्ति मधुपा इव ||३१६||

दिवसे संनिधानेन पिशुनप्रेरणा प्रभोः । ईर्ष्यालुना स्वैरिणीव रक्षितुं यदि पार्यते ||३१७||

राजन्नजन्युपाध्यायो देवी यच्छिक्षयेद्रहः । तत्र प्रजागरः कर्तुमसर्वज्ञैर्न शक्यते ||३१८||

कथंचिदह्नि हृदये कुशलैर्विनिवेशिता । शिक्षा गौर[1]खरेणेव राज्ञा विस्मार्यते निशि ||३१९||

320 न के लोभं[1] समुत्पाद्य जिह्वया स्निग्धदीर्घया । पिपीलका इव ग्रस्ताः क्ष्मापालैः शल्यकैरिव ||३२०||

जानाति हन्तुं हन्तव्यमासन्नं न तु दूरगम् । एको बकः परः[1] सत्यं द्रोहवृत्तिर्महीपतिः ||३२१||

न नाम कण्टकाकीर्णः कौटिल्यं लक्ष्यतां नयेत् । कालापेक्षी क्षितिपतिः शरीरमिव जाहकः[1] ||३२२||

नमन्नपि हरिर्हन्यादाश्लिष्यन्नपि पन्नगः । विहसन्नपि वेतालः स्तुवन्नपि महीपतिः ||३२३||

अद्रोहवृत्त्या तस्मात्त्वं द्रक्ष्यस्यस्मान्सदा यदि । ससैन्यस्ते तदेषोहं प्रातरेव पुरःसरः ||३२४||

325 तदाकर्ण्याब्रवीद्राजा लज्जास्मितसिताधरः । स्वात्मेव यूयं संरक्ष्या मम पूर्वोपकारिणः||३२५||

ततो निक्षिप्य चरणं रक्ताक्ते मेषचर्मणि । कोशं[1] चक्रतुरन्योन्यं सखड्गौ नृपडामरौ ||३२६||

अथ संघटितासंख्यचण्डडामरमण्डलः । चक्रवर्माकरोद्यात्रां प्रत्यूषे नगरोन्मुखः ||३२७||

तस्मिन्क्षणे पुरस्कृत्य योद्धुं शंकरवर्धनम् । विनिर्ययुः सिताष्टम्यां चैत्रे तन्त्रिपदातयः ||३२८||

कालानुवृत्तिप्रच्छन्नं तेषां संभावनोज्झितम् । स तत्वरे पुरस्कर्तुं चक्रवर्मा स्वविक्रमम् ||३२९||

330 अथ प्रवृत्ते संग्रामे घोरे पद्मपुराद्बहिः । जघान प्रेरितहयः पूर्वं शंकरवर्धनम् ||३३०||

हते सेनाधिपे तत्र शतधा तन्त्रिवाहिनी । प्रययौ पवनाघातप्रेरिता[1] नौरिवार्णवे ||३३१||

पृष्ठानुसरणो[1]द्युक्तो नृपस्तेषामपाहरत् । गतिं तुरगवेगेन शिरःश्रेणिं तथासिना ||३३२||

भ्रमतः समरे बभ्रु[1]र्वीरपट्टाञ्चलच्छटाः[2] । चक्रवर्ममृगेन्द्रस्य सटापटलविभ्रमम् ||३३३||

किमन्यत्पञ्चषाण्यासन्सहस्राणि रणाङ्गने । पतितानि क्षणादेव हतानां तत्र तन्त्रिणाम् ||३३४||

335 तन्त्रिणो रणसंरम्भपरिश्रान्ताः क्ष्मातले । गृध्रपक्षकृतच्छाये शायिताश्चक्रवर्मणा ||३३५||

विशुद्धवंश्यैर्गुणिभिर्निहतैः[1] संश्रितैः समम् । अभूषयद्वीरशय्यां शूरः शंकरवर्धनः ||३३६||

उदयं संहता एव संहता एव च क्षयम् । प्रयान्तः स्पृहणीयत्वं तन्त्रिणः कस्य नागमन् ||३३७||

माननीयानधृष्यांश्च महावंश्यान्महीपतीन् । अहीनिव खिलीकृत्य भिक्षयन्तः क्षणे क्षणे ||३३८||

---

३१६. [1]) $A_3$ note न विशुद्धा प्रकृतिर्येषां ते । अविशुद्धप्रकृतयः सूचकाः यस्य राज्ञः कर्णयोर्विषये ध्वनन्ति । तस्य सतोपि साधोरपि स्वयं नाश्वासः । इभस्येव । यथा हस्तिनः कर्णयोर्मलिनाः मधुपा ध्वनन्ति ॥.—[2]) $A_2$ gloss कुटिलाः. ३१९. [1]) $A_3$ गोपख°. ३२०. [1]) $A_3$ भोगं. ३२१. [1]) Thus corr. by later hand from $A_1$ परं. ३२२. [1]) Thus $A_1$ and R; misread in G and Edd. जार्यकः; $A_3$ gloss जार्यको घूकमार्जारखटाकैरण्डकासु चेति विश्वः. ३२६. [1]) $A_3$ gloss दिव्यमित्यर्थः । उभौ मैत्रीसम्बन्धार्थं रक्ताक्ते मेषचर्मणि (gloss भस्त्रायां) परस्परं पादप्रक्षेपं कुरुत इति शपथसंप्रदायः दिव्ये च कोशः पुष्पादिकुड्मलासिपिधानयोरिति मङ्खः. ३३१. [1]) $A_3$ विशीर्णा. ३३२. [1]) Thus corr. by later hand from $A_1$ °सारणो°. ३३३. [1]) $A_2$ gloss अधारयन्.—[2]) $A_2$ gloss शिरस्त्रबन्धनार्थं दत्तो यो वीरपट्टः डोपट इति प्रसिद्धः तस्य अञ्चलच्छटाः फिते इति प्रसिद्धाः. ३३६. [1]) Thus $A_1$; altered by later hand to °हतः.

अनयन्क्रीडया व्रीडां माद्यन्तो जीविकाकृते | प्रागाहितुण्डिकाः क्रूरा इव ये गर्ह्यवृत्तयः ||३३९||
ते तन्त्रिणः क्षणाद्दग्धा गूढवैरविषाग्निना | विमाननाविविभिन्नेन चक्रवर्ममहाहिना ||३४०|| तिलकम् || 340
अथ द्वितीये दिवसे भग्नानामपि तन्त्रिणाम् | वीरः संघटनां यावदकरोच्छंभुवर्धनः ||३४१||
तावन्मिलितसामन्तसचिवैकाङ्गलालितः | सैन्यैर्नानापथायातैर्नदद्भिर्व्याप्तदिक्पथः ||३४२||
वल्गन्मध्येश्ववाराणां नृत्यतेवाग्र्यवाजिना | वल्गाङ्किनोद्वहंल्लम्बं शिरस्त्रं वामपाणिना ||३४३||
सस्वेदेतर[1]हस्ताग्रवेष्टनोल्लासनस्पृशः | खड्गस्य बिम्बितार्कस्य भाभिर्द्योतितकुण्डलः ||३४४||
कवचोत्सेधसंर[1]ब्धकण्ठायासेन ताम्यता | बद्धभ्रु[2]कुटिबन्धेन वदनेन भयावहः ||३४५|| 345
तर्जयन्कृतहुंकारांल्लुण्ठकां[1]ल्लुण्ठितापणान् | शिरोक्षिसंज्ञया त्रस्तवास्तव्यकृतसान्त्वनः ||३४६||
भेरीरवैः श्रुतिं भिन्दन्पौराशीर्घोषरोधिभिः | संग्रामजयशोभाङ्कश्चक्रवर्माविशत्पुरम् ||३४७|| कुलकम् ||
तस्मिन्सिंहासनं प्राज्यमाक्रामति[1] जयोर्जिते | बद्ध्वा कुतश्चिदानिन्ये भूभटः शंभुवर्धनम् ||३४८||
राज्ञः पुरस्तात्तं शस्त्रपातभीमीलितेक्षणम् | भक्तिं प्रदर्शयन्पापश्चण्डाल इव सोवधीत् ||३४९||
उज्झतां धर्ममर्यादां भृत्यानां जनकोपमान् | हन्तुं नरेन्द्रान्द्रोहेण प्रारंभः शंभुवर्धनः[1] ||३५०|| 350
प्राप्य निष्कण्टकं राज्यं चक्रवर्मनृपः क्रमात् | अजायत धृतोत्सेको नृशंसविषमक्रियः ||३५१||
स्वविक्रमकथास्तोत्ररोमन्थप्रियताहतः | सोभवद्विटवन्द्यादिचाटुकारविधेयधीः ||३५२||
आत्मानं दैवतमिव स्तुतिमोहितचेतसः | जानतः प्राभवंस्तस्य विवेकविगुणाः क्रियाः ||३५३||
तस्मिन्प्रसङ्गे रंगाख्यः प्रख्यातो डोम्बगायनः | वैदेशिकोभवद्राज्ञा वितीर्णावसरो बहिः ||३५४||
प्राप्तान्सचिवसामन्तान्निन्यस्यन्तो यथाक्रमम् | प्रतीहारा नृपस्याग्रमनयन्त विविक्तताम् ||३५५|| 355
विबभौ धवलोष्णीषा सभा दीपप्रभोज्ज्वला | शेषशय्येव मणिभिः कृतालोका फणोद्भवैः ||३५६||
कृतावरोधधम्मिल्लमालान्दोलनकेलिभिः | प्रदोषपवनैश्चक्रे शिशिरैर्घ्राणतर्पणम् ||३५७||
जातगीतदिदृक्षाणां गवाक्षावलयो बभुः | आसवामोदिभिर्वक्त्रैरवरोधमृगीदृशाम् ||३५८||
हारकङ्कणकेयूरपारिहार्यादिशोभिना | स्ववृन्देनानुयातोथ प्राविशड्डोम्बगायनः ||३५९||
हंसी नागलता चास्य सुते ललितलोचने | चक्रतुः कौतुकोद्ग्रीवां सभां चित्रार्पितामिव ||३६०|| 360
तयोर्विलासवलितैश्चलितापाङ्गविभ्रमैः | द्वितीयपुष्पप्रकरो व्यकीर्यत सभान्तरे ||३६१||
गायनैर्जय जीवेति कृतकोलाहलैरभूत् | सदः सशब्दं कुर्वद्भिस्तत्तन्नृ[1]पगुणग्रहम् ||३६२||
भुक्तोत्तरोचितोदञ्चत्पञ्चमस्थानचारिणः | वंशे रागविशेषस्य दत्ते स्थाने[1] ततः शनैः ||३६३||
अविक्रियशिरःकम्पभ्रूनेत्रभ्रमशोभितः | अभिन्न इव गायन्त्यो[1]र्गीतिध्वनिरजृम्भत ||३६४||
अथ ताम्बूलरोमन्थत्यागनिश्चलमूर्तिना | जातं राजकुरङ्गेण प्रमोदास्पन्ददृष्टिना ||३६५|| 365
गायन्त्यौ[1] भावमा[2]लक्ष्य तस्य स्निग्धमगायताम् | अधिकोद्रेचिताभिख्यं विलासस्मितविभ्रमैः ||३६६||

---

३४४. [1]) Thus $A_1$; $A_3$ स वामेतर°. ३४५. [1]) $A_3$ संरुद्ध°.—[2]) $A_3$ वक्रभ्रु°. ३४६. [1]) Thus corr. by $A_3$ from $A_1$ °लुब्धकां°. ३४८. [1]) Thus $A_3$; $A_1$ °क्राम्यति. ३५०. [1]) $A_3$ °वर्धनात्. ३६२. [1]) Thus G Edd.; A °स्तस्तन्नृप°. ३६३. [1]) $A_3$ ताने. ३६४. [1]) Thus corr. by later hand from $A_1$ गायन्त्योर्गी°. ३६६. [1]) Thus corr. by later hand from $A_1$ गायन्त्यौ.—[2]) $A_3$ gloss आशयं.

राज्ञस्तयोश्च संसक्तचित्तयोरितरेतरम् । दृग्व्यापारैः स्वसंवेद्यैः संलाप इव पप्रथे ॥३६७॥

नृपं हारितचित्तं तं विज्ञायैकः प्रियो विटः । तत[1]ः प्रसङ्गे प्रोवाच प्रीतिवृद्धिकरं वचः ॥३६८॥

देव गीतमिदं यातं संप्राप्यैते मनोरमे । कर्पूरपारीपतितं मैरेयमिव हारिता[1]म् ॥३६९॥

370 गायन्त्यो[1]र्मार्जितामेतां रागा[2]इन्तचतुष्किका[3]म् । अनयोः प्रतिमाव्याजाच्चुम्बतीव निशाकरः ॥३७०॥

करन्यस्तकपोलान्तमुद्गायन्त्याविमे ध्रुवम् । कटाक्षैः कुरुतो व्योम्नि वैमानिकविमोहनम् ॥३७१॥

जानत्या स्वाश्रयां चर्चामनयोरेकयात्रयोः । असूयास्मितगर्भोयं कटाक्षः पश्य पातितः ॥३७२॥

गायन्त्येकानतमुखी कर्णव्यालोलकुण्डला । विपरीतरतोद्रेककृतारम्भेव शोभते ॥३७३॥

सफलं तस्य तारुण्यमीदृश्यो निर्जने स्त्रियः । औत्सुक्याद्विरहे यस्य गायन्त्येवंविधैः स्वरैः ॥३७४॥

375 उपपत्तिपरित्यक्तशास्त्रानुष्ठानमोहितैः । एकसार्थप्रयातेभ्यः कथमेको विवर्ज्यते ॥३७५॥

नेत्रस्य रूपं श्रोत्रस्य ध्वनिं संस्पृशतो न चेत्[1] । तदङ्गस्या[2]न्यकान्ताङ्गं स्पृशतो दुष्कृतं कुतः ॥३७६॥

अभिलाषाङ्कुरः सिक्त इव तैर्विटभाषितैः । राज्ञः स्वभावलोलस्य शतशाखत्वमाययौ ॥३७७॥

ये[1] विस्तारितवर्ण[2]संकररुचः संदर्श्य गोत्रान्तकृ[3]द्बद्धावस्थितिचापलङ्घनमलं पार्श्वे ध्वनन्त्युद्धताः ।
नीय[4]न्ते विपथा[5]वपातपरतां लब्धोदयैस्तैः क्षणात्सिहा वारिधरैरमी च रभसाद्भू[6]पालसिंहा विटैः ॥३७८॥

वस्तु क्षणादनुपपत्त्युपपत्तियुक्तं कृत्वा जडान्यदि विमोहयितुं समर्थाः ।
न स्युर्विटा अथ कुतर्कपथस्थिताश्च नित्योद्वसे[1]षु निरयेषु मृगाश्चरेयुः ॥३७९॥

380 संतोष्य हारकेयूरकुण्डलैर्डोम्बमण्डलम् । अमार्गत्यागराधे[1]यः शुद्धान्तमगमन्नृपः ॥३८०॥

कान्तोस्याः क्षितिवल्लभोयम[1]भिधेत्युर्वीपतेरेकतो[2] ब्रूतेसाव[3]तिचण्डताण्डवयुतं डोम्बः स्व[4]नामान्यतः ।
मध्ये यत्कि[5]मपीति गीतरचना काव्यं[6] यदेतद्विदो[7] यल्लक्ष्मीं[8] क्षपयन्ति[9] तान्धिगबुधान्कीर्त्यर्थिनः पार्थिवान् ॥३८१॥

वेश्यानुरागस्य महेन्द्रचापधाम्नो हरिद्रारसरञ्जनस्य । उपाङ्गगीतस्य च हारिणोपि सौन्दर्यमस्थैर्यहतप्रकर्षम् ॥३८२॥

दर्शनाभ्याससंवृद्धचक्षूरागः क्षमापतिः । विना श्वपाककन्ये ते न पुनः प्राप निर्वृतिम् ॥३८३॥

गायन्त्यौ शयनोपान्ते शनैर्विहितचुम्बनम् । नृपं रतिसुखाभिज्ञं तं हठात्ते प्रचक्रतुः ॥३८४॥

385 समागमेन नव्येन तयोर्वैयात्यशोभिना । चक्रे क्षपितसामर्थ्यः स लज्जोद्वहनाक्षमः ॥३८५॥

रत्यन्तसुलभोद्भेदैर्निःसृतैः स्वेदबिन्दुभिः । भाग्योष्मसंक्षयजडं वपुस्तस्य व्यधीयत ॥३८६॥

रागान्धेन कृता हंसी महादेवी महीभुजा । भेजे राजवधूमध्ये वालव्यजनवीजनम् ॥३८७॥

---

३६८. 1) $A_2$ तत्र. ३६९. 1) $A_3$ gloss हरति मन इति हारी तस्य भावः तत्ता तां यातमिति सम्बन्धः. ३७०. 1) Thus corr. by $A_3$ from $A_1$ गायन्त्योः.—2) Thus $A_3$; $A_1$ क्रमाइ°.—3) $A_2$ gloss दन्तपङ्क्तिचतुष्टयं. ३७६. 1) $A_3$ gloss दुष्कृतं.—2) $A_3$ gloss त्वगिन्द्रियस्य. ३७८. 1) $A_3$ gloss वारिधराः विटाश्च.—2) $A_2$ gloss वर्णाः नीलपीताद्याः ब्राह्मणाद्याश्च.—3) $A_3$ gloss गोत्रान्तकृति इन्द्रे बद्धा अवस्थितिर्येन स चासौ चापः धनुः इन्द्रचापः तस्य लङ्घनं । गोत्रान्तकृद्भिः कुलक्षयकारिभिः पापिभिः बद्धा स्थितिर्यस्य । तत् चापलं प्रदर्श्य ध्वनन्ति इति च घनं निविडं इति चापलविशेषणं.—4) Thus corr. by later hand from गीयन्ते.—5) $A_3$ कुपथाव°.—6) $A_3$ तरसा भू°. ३७९. 1) $A_3$ gloss नित्यशून्येषु. ३८०. 1) $A_3$ gloss अपात्रत्यागे कर्णः. ३८१. 1) $A_3$ gloss अयं क्षितिवल्लभः राजा अस्याः कस्याश्चित्कान्तः अस्यां विषये अयं राजा लग्नः इत्यभिधा कथितमेकतः.—2) $A_3$ gloss डोम्बेनोच्चारिता उर्वीपतेः अभिधा नामधेयं एकतः इत्यस्ति इति कथमिति कान्तोस्या इति.—3) $A_3$ gloss उर्वीपतिः.—4) $A_3$ डाम्बस्य नामा°.—5) $A_3$ मध्येन्यत्किम°.—6) $A_3$ gloss यत्किमपीति । यत्किञ्चिद्वालजालप्रायं लौकिकं गीतं । तस्य रचना एव काव्यं.—7) $A_3$ gloss एतत् गीतिरचनाकाव्यं विदन्ति एतद्विदः.—8) $A_3$ gloss येषां पार्थिवानां लक्ष्मीः यल्लक्ष्मीः तां.—9) $A_3$ gloss अपहरन्ति.

तस्या यैर्भुक्तमुच्छिष्टं ते यथा चक्रवर्मणः । नृपान्तराणामन्येषामप्यभूवन्सभासदः ॥३८८॥
मन्त्रिणामक्षपटल[1]प्रख्यमुख्याधिकारदा । प्रवृद्धिहेतुतां प्राप डोम्बसेवनचक्रिका ॥३८९॥
मौर्ख्यात्सचिवतां केचिच्छ्वपाका न व्यधुः स्वयम् । केचित्त्वकुर्वन्नीतिज्ञा राजकार्याणि मन्त्रिवत् ॥३९०॥ 390
मन्त्रिणस्तस्करा राज्ञी श्वपाकी श्वपचाः प्रियाः । किं न लोकोत्तरमभून्नृपतेश्चक्रवर्मणः ॥३९१॥
ऋतुस्नातार्तवाङ्कानि श्वपाकी स्वांशुकान्यदात् । तदाच्छादनदृप्तेच्छा मन्त्रिणः प्राविशन्सभाम् ॥३९२॥
कैश्चित्क्षितिभुजा वैरमङ्गीकृत्यापि तत्क्षणम् । यैर्नाशि श्वपचोच्छिष्टं तेभूवन्सोमपैः समाः ॥३९३॥
मण्डलेस्मिन्प्रभावोग्रा न देवा न्यवसन्ध्रुवम् । तद्वेश्मानि तदा नो चेच्छ्वपाकी प्राविशेत्कथम् ॥३९४॥
तां रणस्वामिनं द्रष्टुं तिलद्वादश्यहे गताम् । सामन्तेभ्यः साभिमाना नान्वयुर्डामराः परम्[1] ॥३९५॥ 395
राजकौटुम्ब्यदृप्तानां डोम्बानां निर्गता मुखात् । राज्ञामिवाज्ञा दुर्लङ्घ्या न केनाप्युदलङ्घ्यत ॥३९६॥
राज्ञा प्रदत्ते रङ्गाय हेलु[1]ग्राममग्रहारवत् । लिलेख पट्टोपाध्यायो न यदा दानपट्टकम् ॥३९७॥
तदाक्षपटलं गत्वा रङ्गः कोपात्तमब्रवीत् । रङ्गस्स हेलु दिण्णेति दासीसुत न लिख्यते ॥३९८॥
लिलेख सोथ संत्रासाद्रङ्गभ्रूभङ्गतर्जितः । को[1] न राजनि दुर्वृत्ते भवे[2]न्नीतिव्यतिक्रमः ॥३९९॥
अन्त्यागमनपापस्य पापः पृच्छन्स निष्कृतिम् । विटैर्हास्यावहान्येव प्रायश्चित्तानि कारितः ॥४००॥ 400
हिमेनैव हिमं शाम्येद्दुष्कृतेनैव दुष्कृतम् । सोनुशिष्टो विटैरेवं दधत्पामरसारतां[1] ॥४०१॥
पवित्रास्पर्शतोस्पृश्यास्पर्शपापं जिहीर्षुणा । तेनादूष्यत विप्रस्य योषिन्मासोपवासिनः ॥४०२॥
ततोपि पापिनोभूवन्केपि तस्मिन्क्षणे द्विजाः । तस्मादप्यग्रहारान्ये जगृहुर्गृहभोजिनः ॥४०३॥
चक्रे चक्रमठं सोपि पापः पाशुपताश्रयम् । तस्मिन्हतैर्धनैर्निष्पन्नं तद्वधूर्यम[1]योजयत् ॥४०४॥
पूर्वोपकारान्विस्मृत्य डामरान्स निरागसः । नृपतिः श्वपचाकामी विश्वस्तांश्छद्मनावधीत् ॥४०५॥ 405
हन्तुं व्याजेन विश्वस्ताः केचिड्डामरतस्कराः । तस्थुस्तस्यान्तिके द्रोहच्छिद्रानेहःप्रतीक्षिणः ॥४०६॥
श्वपाकीशयनावासासन्नावस्करमन्दिरे । शौचस्थितं तं निःशस्त्रं ते रात्रौ प्रापुरेकदा ॥४०७॥
अथ तैः प्राप्तसमयैरकस्मात्तस्य सर्वतः । क्षिप्रं न्यपात्यताशेषशातशस्त्रपरंपरा ॥४०८॥
सुप्तस्तटाद्ह्रदे भ्रष्ट इव निद्रालसेक्षणः । प्रबुद्धः शस्त्रपातैः स व्यमुचद्भैरवान्रवान् ॥४०९॥
निःशस्त्रः शस्त्रमन्विष्यन्क्षरत्क्षतजनिर्झरः । अनुद्रुतोरिभिर्धावञ्छय्यावेश्म विवेश तत् ॥४१०॥ 410
अप्राप्तहेतिं क्रन्दन्त्या श्वपाक्यालिङ्गिताङ्गकम् । तत्कुचोत्सङ्गलग्नाङ्गं जघ्नुस्तेनुप्रविश्य तम् ॥४११॥
स्वैरेव प्रेरिता दारैस्ते तस्य नृपतेः किल । मुमूर्षोर्जानुनी स्वैरं शि[1]लयां समचूर्णयन् ॥४१२॥
त्रयोदशाब्दे ज्यैष्ठस्य शुक्लाष्टम्यां क्षपाक्षणे । श्वपाकभोग्यः स श्वेवावस्करे तस्करैर्हतः ॥४१३॥
उन्मत्तावन्तिनामाथ पार्थसूनुर्दुराशयः । अभ्यषिच्यत वैधेयैः सचिवैः शर्वटादिभिः ॥४१४॥
श्वपाकीकामुके पापे निहते निशि तस्करैः । प्रजानां पाप्मना सोभूत्पापात्पापतरो नृपः ॥४१५॥ 415

३८९. [1]) $A_2$ gloss गणनार्थं गणनाधिपतिस्थानस्य अक्षपटलस्य अड्ले इति भाषया नाम शिष्टदेश इति केचित्. ३९२. [1]) $A_2$ gloss रजः. ३९५. [1]) $A_3$ gloss केवलं. ३९७. [1]) Thus corr. by later hand here and in following verse from $A_1$ हलु°. [1]) $A_3$ gloss रङ्गस्य हेलुः दत्ता. ३९९. [1]) Thus corr. by $A_3$ from $A_1$ के.—[2]) Thus corr. by $A_3$ from $A_1$ भवन्नी°. ४०१. [1]) $A_3$ दधर्पापरमातरमित्यन्यादर्शे. ४०४. [1]) Thus corr. by $A_3$ from $A_1$ °र्यस्यो°; $A_3$ gloss मठं. ४१२. [1]) Thus A; G R Edd. शिलायां. ४१३. [1]) Thus G Edd.; A ज्येष्ठस्य.

स्थगिता तत्कथापापस्पर्शभीत्या सरस्वती । कथंचिच्चक्षुरश्चेव सेयं प्रस्थाप्यते मया ॥४१६॥
आसीत्पितृकुलं तस्य भक्ष्यं दुर्नृपरक्षसः । और्वाभिधस्य हव्याशविशेषस्येव जीवनम् ॥४१७॥
तस्यासंश्टक्कराघातसटांकारकरोटिकाः । प्राणस्कन्दादिवाद्यज्ञाः सभायां मुख्यमन्त्रिणः ॥४१८॥
तेमात्याश्चारणत्वेन निर्लज्जास्तमरञ्जयन् । कालान्तरेण यैरेव भूमिपालैर्भविष्यते ॥४१९॥
420 पर्वगुप्तोभवत्तस्य सर्वेभ्योप्यधिकं प्रियः । आस्थाने नर्तनं कुर्वन्नपाकृतकटीपटः ॥४२०॥
आ तन्त्रिविप्लवाद्दृष्ट्वा कीटप्रायान्महीपतीन् । पर्वगुप्तः सर्वदाभूद्राज्यावाप्तिकृतोद्यमः ॥४२१॥
तदा निगूढराज्येच्छः सख्यं मुख्यैः स मन्त्रिभिः । पीतकोशैः प्रविदधे पञ्चभिर्भूभटादिभिः ॥४२२॥
भूभटः शर्वटश्छोजः कुमुदः सोमृताकरः । पर्वगुप्तेन संबन्धं चक्रिरे कोशपीथिनः ॥४२३॥
गवाक्षासरसि प्राप्तश्रीजलोवागलद्विजः । संग्रामडामरगृहे यो रक्कः ख्यातपौरुषः ॥४२४॥
425 पदातिमात्रो भूपेन दृष्टशौर्यः स संयुगे । महोदरो महाकायः प्रापितो मुख्यमन्त्रिताम् ॥४२५॥
यादृशी तेन ददृशे देवी श्रीः सरसोन्तरे । तादृग्रक्कजयादेवीत्यभिधानेन निर्ममे ॥४२६॥
राज्यं निष्कण्टकं कृत्वा धूर्तेनापजिहीर्षुणा । प्रेरितः पर्वगुप्तेन भूभृच्चक्रे कुलक्षयम् ॥४२७॥
तेन लुण्ठितसर्वस्वः पार्थस्तस्थौ कलत्रवान् । श्रीजयेन्द्रविहारान्तः श्रमणैर्दत्तभोजनः ॥४२८॥
शिशून्शंकरवर्मादीन्भ्रातॄन्द्वारान्निरोध्य सः । तत्र स्थितानननशनैरुत्क्रान्तासूनकारयत् ॥४२९॥
430 उद्यतः पितरं हन्तुं मन्त्रिणोनुमतप्रदान् । बद्धपट्टान्व्यधाद्बद्धनिगडानितरान्पुनः ॥४३०॥
एकदा मन्त्रिसामन्ततन्त्रिकायस्थसैनिकाः । पार्थं तदाज्ञामासाद्य निशायां पर्यवेष्टयन् ॥४३१॥
म्लानक्षीणाम्बरां पत्नीं रुद्धद्वारां निपात्य ते । आलिङ्ग्यमानां क्रन्दद्भिस्तर्णकैरिव दारकैः ॥४३२॥
केशानालम्ब्य कर्षन्तः शर्करोत्पाटिताङ्गकम् । विपन्नं गोकुलाद्दान्तमिव निर्हृत्य तं गृहात् ॥४३३॥
क्षुत्क्षामरूक्षं क्रन्दन्तं निजघ्नुर्नग्नविग्रहम् । चण्डाला इव निःशस्त्रं कुमुदाद्या नृपप्रियाः ॥४३४॥
435 पितरं निहतं श्रुत्वा राजा संजातकौतुकः । प्रातः स्वसचिवैः सार्धं गत्वा हृष्टोथ दृष्टवान् ॥४३५॥
अत्राङ्गेस्य प्रहारोयं मद्दत्त इति वादिनः । तस्याग्रे राजपुरुषाः शशंसुर्निजविक्रमम् ॥४३६॥
न्यक्कृत्य स्वीकृतो राज्ञा तदा तद्रञ्जनोद्यतः । अचूचुदत्पर्वगुप्तो देवगुप्ताभिधं सुतम् ॥४३७॥
पार्थस्य निहतस्याङ्गे सोक्षिपत्क्षुरिकां ततः । रञ्जितो येन भूपालो जातहासोभवच्चिरम् ॥४३८॥
डामरैर्लुण्ठितो देशः प्रणाशे चक्रवर्मणः । उत्थाप्य पापान्कायस्थांस्तेन भूयोपि दण्डितः ॥४३९॥
440 संप्रेरितः कुसचिवैः शस्त्राभ्यासं चकार सः । पाटयन्क्षुरिकाघातैः कोटवीस्तनकोटरम् ॥४४०॥
गर्भिणीनां च जठरं गर्भान्द्रष्टुमपाटयत् । काठिन्यस्य परीक्षार्थमङ्गं कर्मकृतामपि ॥४४१॥
प्रतिग्रहाग्रहाद्घोराद्यद्वा वधभयाद्द्विजाः । प्रत्यगृह्णन्नग्रहारांस्तस्मादपि नृपाधमात् ॥४४२॥
क्रूरपापानुरूपेण क्षयरोगेण पार्थिवः । ततोनुबाध्यमानोभूदपर्यन्तव्यथातुरः ॥४४३॥
व्यथया तस्य तादृश्या प्रजा एव न केवलम् । तुतुषुर्निजशुद्धान्तमहिष्योपि चतुर्दश ॥४४४॥

---

४२६. [1]) Thus corr. by $A_2$ from $A_1$ तावद्रक्क°. ४३२. [1]) Thus corr. by later hand from $A_1$ निपत्य. ५४०. [1]) Thus corr. by later hand from $A_1$ कौटवी°. ४४२. [1]) Thus corr. by later hand from $A_1$ द्विजः.

अथान्तःपुरदासीभिर्यः कुतश्चिदुपाहृतः । क्षितिपालात्प्रजातोयमिति प्रख्यापितो मृषा ॥४४५॥ 445

तं शिशुं शूरवर्माख्यं विनिवेश्य नृपासने । हस्ते निक्षिप्य सामन्तसचिवैकाङ्गतन्त्रिणाम् ॥४४६॥

कम्पनाधिपतेर्बद्धद्वेषः कमलवर्धनात् । बिभ्यन्मडवराज्यस्थाड्डामरोत्पाटनक्षमात् ॥४४७॥

आसन्ननिरयप्राप्तिः[1] पितृहा पार्थिवाधमः । शुचौ पञ्चदशाब्दस्य प्रजापुण्यैः क्षयं ययौ ॥४४८॥ चक्कलकम् ॥

पितृघातिसुतो राजा जयस्वामिविरोचनम् । आषाढ[1]शुक्लसप्तम्यां शिशुर्द्रष्टुं विनिर्ययौ ॥४४९॥

नवा विरेजे राजश्रीर्बालस्य पृथिवीपतेः । कृपाणवेणिललिता छत्रचामरहासिनी ॥४५०॥ 450

अत्रान्तरे जवायातैश्चारै[1]रावेदितश्रुतः । सामन्तैर्नगरोपान्तं प्राप्तः कमलवर्धनः ॥४५१॥

एकाङ्गतन्त्रिसामन्तस्यालहारकसादिभिः । नगरं प्रविशञ्श्रान्तः समं सैन्यैररुध्यत ॥४५२॥

विरुद्धडामरानीकान्युद्ध्वा मार्गेषु निर्गतः । श्रान्तोप्यसौ वैरिसेनामजयद्विक्रमोर्जितः ॥४५३॥

सहस्रमश्ववाराणां विद्राव्य तुरगैर्मितैः । राजधानीमसंरुद्धः प्रविवेश ततः क्षणात् ॥४५४॥

तं लब्धजयमाकर्ण्य सैन्यैस्त्यक्तं पलायितैः । एकाकिनं क्वाप्यनयज्जननी शिशुभूपतिम् ॥४५५॥ 455

प्राक्कर्मभिर्मोहितो वा प्रेरितो वा कुमन्त्रिभिः । नाभूत्सिंहासनारूढो मूढः कमलवर्धनः ॥४५६॥

तदानीं स्वगृहान्यातो राज्यकामोन्यवासरे । संघट्ट[1]यन्द्विजान्सर्वानचूचुददनीतिवित् ॥४५७॥

प्रौढं शक्तं च कुरुत क्ष्मापं कंचित्स्वदेशजम् । मामेव कुर्युः सामर्थ्यादिति मूढः स चिन्तयन् ॥४५८॥

एकाकिनीं रहः क्षीवां लब्ध्वा दुर्लभयोषितम् । अप्रौढोनुपभुज्यान्यदिने दूत्यार्थयेत यः[1] ॥४५९॥

विभूतिं रभसावाप्तां यश्च संत्यज्य तत्क्षणम् । नीत्या कामयतेन्येद्युः शोच्यस्ताभ्यां परोस्ति कः ॥४६०॥ युग्मम् ॥ 460

अथो[1]त्पल[2]कुले छिन्ने स्थूलकम्बलवाहिनः । अभृङ्गोक्षनिभा विप्राः समगंसत गोकुले ॥४६१॥

धूमनिर्दग्धकूर्चानां राज्ञस्तांस्तांश्चिकीर्षताम् । राज्यव्यवस्थोपन्यासस्तेषां चिरमवर्धत ॥४६२॥

वैमत्येन मिथस्तेषां नान्यः कोप्यभ्यषिच्यत । कूर्चा[1] भाषणनिष्ठ्यूतैः स्वकूर्चष्ठीवनैः परम् ॥४६३॥

राज्यार्हान्वेषिभिर्विप्रैः प्राप्तैः[1] स्वस्मृतिक्लृप्तये । अवार्यतेष्टकाघातैर्मुग्धः कमलवर्धनः ॥४६४॥

पञ्चषाणि दिनान्येव यावत्तस्थुर्द्विजातयः । काहलाकांस्यतालादिवाद्यकोलाहलाकुलम् ॥४६५॥ 465

उत्पताकध्वजच्छत्त्रशोभि युग्यार्पितासनम्[1] । अशेषं पारिषद्यानां तावत्तत्रामिलद्बलम् ॥४६६॥ युग्मम् ॥

स्वपत्नीं बन्धकीभूतामिवान्यवशवर्तिनीम् । वीक्ष्य राजश्रियं शोचन्नासीत्कमलवर्धनः ॥४६७॥

पितृघातिवधूश्छन्नपुत्रराज्यार्थिनी ततः । प्राहिणोद्राजपुरुषान्पार्श्वं प्रायोपवेशिनाम् ॥४६८॥

पिशाचकपुरग्रामे वीरदेवाभिधस्य यः । कुटुम्बिनः कामदेवनामा सूनुरजायत ॥४६९॥

स शिक्षिताक्षरो लब्ध्वा मेरुवर्धनमन्दिरे । बालाध्यापकतां स्नानशीलादिगुणभूषितः ॥४७०॥ 470

क्रमाद्गञ्जाधिकार्यासीदथ तस्यात्मजः शनैः । लेभे गञ्जाधिकारित्वं राज्ञः शंकरवर्मणः ॥४७१॥

---

४४८. [1]) Thus corr. by $A_3$ from $A_1$ °प्राप्तैः. ४४९. [1]) Thus corr. by $A_3$ from $A_1$ अषाढे. ४५१. [1]) श्चारै supplied by $A_3$. ४५७. [1]) Thus $A_1$; $A_3$ संघट्टय. ४५९. [1]) G *sec. manu* अप्रौढो नोपभुङ्क्तेन्यदिने दूत्यार्थयेत्तु यः. ४६१. [1]) $A_3$ अथौत्पल°.—[2]) $A_3$ gloss उत्पलो नाम कल्यपालः तेन चिप्पटजयापीडं स्वस्रीयं निहत्याभिचारक्रियया स्वकीयभ्रातुःपुत्रः अजितापीडः राज्ये स्थापितः । ततः प्रभृति कल्यपालकुलराज्यं । उन्मत्तावन्तिपर्यन्तं प्राप्य कल्यपालकुलस्य च्छेदः । अत एवोक्तं । उत्पलकुले च्छिन्ने इति ।. ४६३. [1]) Thus $A_1$; $A_3$ रूक्षभा°. ४६४. [1]) $A_3$ प्राप्तैः. ४६६. [1]) तासनम् supplied by $A_3$ in space left by $A_1$.

यः प्रभाकरदेवोपि सुगन्धाच्छन्नकामुकः । लक्ष्म्या सरस्वतीद्वेषाद्देशविप्लवतोथ वा[1] ॥४७२॥
विद्वान्यशस्करो नाम तत्पुत्रोत्यन्तदुर्गतः । सख्या फल्गुणकाख्येन समं देशान्तरं गतः ॥४७३॥
सुस्वप्नदर्शनैः पीठदेव्याशीर्भिश्च हर्षुलः । तस्मिन्प्रसङ्गे सोत्साहः प्रत्यावृत्तो निजां भुवम् ॥४७४॥
475 पितृघातिवधूदूतैर्यतैर्बोधयितुं द्विजान् । मध्ये गृहीतो वाग्मित्वात्प्रविवेश तदन्तिकम् ॥४७५॥ कुलकम् ॥
दृष्ट्वैव तं दैववशादैकमत्यस्पृशो द्विजाः । ध्वनिं राजायमेवास्त्वित्युच्चकैरुदचारयन् ॥४७६॥
अथाभ्यषिच्यत क्षिप्रं विप्रैरेत्य यशस्करः । क्ष्माधृतिप्रौढसामर्थ्यैः[1] सानुमानिव तोयदैः ॥४७७॥
दग्धं वेणुवनं परस्परमहासंघर्षजेनाग्निना तन्मूलोद्धृतिरम्भसा क्षणधृतोद्रेकेण संपादिता ।
वात्यावेगविपाटितं विटपिनं प्राप्तं कुतश्चिद्दृढां रूढिं नेतुमहो महाद्रिकुहरे[1] धात्रा न किं सूत्रितम्[2] ॥४७८॥
भृत्यप्रेरणया वंशं पार्थजः स्वं न चेद्दहेत् । तत्पुत्रोत्पाटनं कुर्यान्न चेत्कमलवर्धनः ॥४७९॥
480 अनुच्चकुलजातस्य[1] दारिद्रस्याटतः क्षितिम् । तद्यशस्करदेवस्य राज्यप्राप्तिः कथं भवेत् ॥४८०॥
पद्भ्यां व्रजन्निरनुगो ददृशे जनेन यस्तत्क्षणं निखिललोकसमानमूर्तिः[1] ।
साम्राज्यरम्यममुमीक्षितुमास्त नारीदृङ्नीरजस्तवकितो नरनाथमार्गः ॥४८१॥
नृपतिवसतिं प्रत्यागच्छन्यशस्करभूपतिः पुरमृगदृशामाशीर्मध्ये वचोपि विवक्षितम् ।
स्तिमितवलितापाङ्गं शृण्वन्निमीलदहंकृतिः कृतपरिकरस्तज्ज्ञैर्जज्ञे प्रजापरिपालने ॥४८२॥
प्रतिमितरविदीपोद्भासिशुभ्रातपत्रप्रचयरजतपात्रासूत्रितारात्रिकाश्रीः ।
अथ मुखरितमाशीर्मङ्गलैरङ्गनानामवनिहरिणधामा राजधाम[1] प्रपेदे ॥४८३॥

इति श्रीकाश्मीरिकमहामात्यचण्पकप्रभुसूनोः कल्हणस्य कृतौ राजतरङ्गिण्यां पञ्चमस्तरङ्गः ।
ऽयधिकायां समाशीतौ मासेषु च चतुर्वगात् । कल्यपालाष्टकं रथ्याहृतस्त्रीसाचिवा अपि ॥

४७२. [1]) Thus $A_3$; $A_1$ °तो गतः. ४७७. [1]) $A_3$ gloss क्ष्मायाः भूमेः धृतिः धारणं तास्मिन् प्रौढं सामर्थ्यं यस्य सः. ४७८. [1]) हं supplied by $A_3$.—[2]) $A_3$ दैवेन किं सूत्रितमित्यादर्शान्तरे पाठः. ४८०. [1]) $A_3$ gloss नीचकुलोत्पन्नस्य. ४८१. [1]) Thus $A_3$; $A_2$ °कीर्तिः. ४८३. [1]) $A_3$ glosses अवनौ भूमौ हरिणधामा चन्द्रः and राजासनं.

## ॥ षष्ठस्तरङ्गः ॥

नेदं पर्णसमीरणाशनतपोमाहात्म्यमुक्षोरगौ पश्यैतावत एव संप्रति कृतौ तन्मात्रवृत्ती[1] बहि[2]ः ।
प्रेम्णैवार्धमिदं चराचरगुरोः प्रापेयमात्मस्तुतीरेवं देववधूमुखाच्छ्रुतिसुखा[3]ः शृण्वन्त्यपर्णावतात् ॥१॥

इच्छन्नलङ्घनीयत्वमथ कक्ष्यां विलङ्घयन् । प्रतीहारान्द्विजा दूरं वार्यन्तामिति सोन्वशात् ॥२॥

वेत्रिवित्रास्यमानांस्तु तान्कृताञ्जलिरब्रवीत् । राज्यप्रदाश्च पूज्याश्च यूयं नो दैवतैः समाः ॥३॥

राज्यदानाभिमानेन वर्तिष्यत मदोद्धताः । यत्कार्यकालादन्यत्र नागन्तव्यं मदन्तिकम् ॥४॥

तदाकर्ण्याखिलो लोकस्तमधृष्यममन्यत । व्यस्मरत्सहसंवाससंभूतमपि लाघवम् ॥५॥

खिलीभूताः पूर्वराजव्यवस्थाः प्रतिभाबलात् । उन्नीतवान्स सुकविः प्राक्कविप्रक्रिया इव ॥६॥

अचौराभूत्तथा भूमिर्यथा रात्रौ वणिक्पथाः । अतिष्ठन्विवृतद्वारा मार्गाश्चाविघ्निताध्वगाः ॥७॥

प्रत्यवेक्षापरे तस्मिन्नासीत्सर्वापहारिणाम् । कृष्यध्यक्षत्वमुत्सृज्य कृत्यं नान्यन्नियोगिनाम् ॥८॥

ग्राम्याः कृषिपराधीना नापश्यन्राजमन्दिरम् । विप्राः स्वाध्यायसंसक्ता नाकुर्वञ्शस्त्रधारणम् ॥९॥

न विप्रगुरवः साम गायन्तो मदिरां पपुः । न तापसाः पुत्रदारपशुधान्यान्यढौकयन् ॥१०॥

न मूर्खगु[1]रवो मत्स्यापूपयागविधायिनः । चक्रिरे स्वकृतैर्ग्रन्थैस्तर्कागमपरीक्षणम् ॥११॥

नादृश्यन्त च गेहिन्यो गुरुदीक्षोत्थदेवताः । कुर्वाणा भर्तृशीलश्रीनिषेधं मूर्धधूननैः ॥१२॥

कार्तान्तिको भिषक्सभ्यो गुरुर्मन्त्री पुरोहितः । दूतः स्थेयो[1] लेखको वा न तदाभूदपण्डितः ॥१३॥

प्रा[1]योपवेशाधिकृतैर्बोधितेन महीभृता । प्रायोपविष्टो निकटं प्रापितः कश्चिदब्रवीत् ॥१४॥

अहमाढ्योभवं पूर्वं वास्तव्योत्र महीपते । निष्किंचनत्वं शनकैरगच्छं दैवयोगतः ॥१५॥

उत्तमर्णैः पीडितस्य प्रवृद्धर्णस्य तस्य मे । निश्चयोभूदृणं छित्त्वा परिभ्रान्तुं दिगन्तरे ॥१६॥

अथ विक्रीय सर्वस्वमृणं शोधयता मया । महाधनाय वणिजे विक्रीतं निजमन्दिरम् ॥१७॥

भार्यामुद्दिश्य भर्तव्यामेक एव तु वर्जितः । सोपानकूपो विक्रीतान्महतो वेश्मनस्ततः ॥१८॥

निदाघे पुष्पताम्बूलीपर्णाद्यत्रातिशीतले । न्यस्यद्भिर्मालिकै[1]र्दत्तात्सा जीवेद्भाटकादिति[2] ॥१९॥

ततो दिगन्तराद्भ्रान्त्वा विंशत्या वत्सरैरहम् । लब्धाल्पवित्तः संप्राप्तो जन्मभूमिमिमां पुनः ॥२०॥

अन्विष्यता मया साध्वी स्ववधूर्ददृशेथ सा । विवर्णदेहा जीवन्ती प्रेष्यात्वेनान्यवेश्मसु ॥२१॥

किं दत्तजीविकापि त्वमीदृशीं वृत्तिमाश्रिता । मयेति सा सदुःखेन पृष्टा स्वोदन्तमब्रवीत् ॥२२॥

---

१. [1]) $A_3$ gloss पर्णवातजविनौ.—[2]) $A_3$ gloss एतौ चराचरगुरुणा बहिः कृतौ इत्यन्वयः.—[3]) Thus $A_1$; $A_3$ °सुखाच्छृण्व°.
११. [1]) Thus corr. by later hand from $A_1$ मूर्खा गु°. १३. [1]) $A_3$ gloss विवादपरिनिर्णेता स्थेयः. १४. [1]) $A_3$ gloss मृतावनशने प्रायो बाहुल्ये सदृशे त्रिषु इति कोशः. १९. [1]) $A_3$ gloss पौष्पिकैः.—[2]) $A_3$ gloss भाटी इति भाषया। प्रत्यहं वेतनं भाटी.

सोपानकूपं संप्राप्ता त्वयि याते दिगन्तरम् । लगुडैस्ताडयित्वाहं वणिजा तेन वारिता ॥२३॥
तदन्या कास्त मे वृत्तिरित्युक्त्वा विरराम सा । तदाकर्ण्य निमग्नोहमन्तरे शोककोपयोः ॥२४॥
25 कृतप्रायोपवेशोथ स्थेयैस्तैस्तैः पदे पदे । प्रत्यर्थिनो दत्तजयैः किमप्यस्मि पराजितः ॥२५॥
जडत्वाद्वेद्मि न न्यायं न विक्रीतो मया पुनः । सोपानकूप इत्यस्मिन्नर्थे प्राणा इमे पणः ॥२६॥
सोहं विपद्ये क्षीणार्थो द्वारि शास्तुस्तव ध्रुवम् । वृजिनादस्ति चेद्भीतिर्वस्तु निर्णीयतां स्वयम् ॥२७॥
राजेति तेन विज्ञप्तो दत्त्वा[1] धर्मासनं स्वयम् । संघट्टय्याखिलान्स्थेयानासीत्तत्त्वं विचारयन् ॥२८॥
स्थेयास्तमूचुर्बहुशो विचार्यायं पराजितः । शाठ्यादगणयन्न्यायं दण्ड्यो लिखितदूषकः ॥२९॥
30 सोपानकूपसहितं विक्रीतं गृहमित्यथ । राजा विक्रयपत्रस्थान्स्वयं वर्णानवाचयत् ॥३०॥
ततोधिगतमित्येव सभ्येषु निगदत्स्वपि । अन्तरात्मा जगादेव नृपतेरर्थिनो जयम् ॥३१॥
मुहूर्तमिव संचिन्त्य राजान्याभिरभूच्चिरम् । कथाभिरतिचित्राभिर्मोहयन्सभ्यमण्डलम् ॥३२॥
कथान्तराले सर्वेभ्यो गृह्णन्रत्नानि वीक्षितुम् । हसन्प्रत्यर्थिनो हस्तादुपादत्ताङ्गुलीयकम् ॥३३॥
क्षणादेवा[1]खिलैः स्थेयमित्थमेवेति सस्मितम् । वचो ब्रुवाणः प्रययौ पादक्षालनकैतवात् ॥३४॥
35 अभिज्ञानाय तत्रस्थः स वितीर्याङ्गुलीयकम् । भृत्यमेकं वणिग्वेश्म प्राहिणोद्दत्तवाचिकम् ॥३५॥
स वणिग्गणनाध्यक्षं ययाचे साङ्गुलीयकः । यत्राब्दे पत्रमुत्पन्नं गणनापत्रिकां[1] ततः ॥३६॥
निर्णेया तया कृत्यमस्ति भाण्डपतेरिति । श्रुत्वादाद्गणनाध्यक्षस्तां गृहीताङ्गुलीयकः ॥३७॥
दीन्नाराणां[1] दशशतीं तस्यां भूभृदवाचयत् । व्ययमध्येधिकरणलेखकाय[2] समर्पिताम् ॥३८॥
तस्मै मितधनार्हाय बहुमूल्यार्पणा[1]न्नृपः । रेफे[2] सकारं वणिजा कारितं निश्चिकाय सः ॥३९॥
40 सभायां तत्प्रदर्श्याथ पृष्ट्वा दत्त्वाभयं च तम् । आनीय लेखकं सभ्यान्संजातप्रत्ययान्व्यधात् ॥४०॥
सभ्यैरभ्यर्च्यमानेन राज्ञा सार्धं वणिग्गृहम् । वितीर्णमर्थिने[1] देशात्प्रत्यर्थी च प्रवासितः ॥४१॥
कृताह्निकं भोक्तुकामं तं दिनान्ते च भूपतिम् । अकालावेदनाद्बिभ्यत्क्षत्ता जातु व्यजिज्ञपत् ॥४२॥
देवः समाप्तकृत्योद्य विज्ञप्तौ श्वस्तव क्षणः । इत्युक्तो दर्शने प्राणत्यागी विप्रो बहिः स्थितः ॥४३॥
दत्तप्रवेशादेशोथ रुद्धसूदेन भूभुजा । द्विजः प्रविष्टः पृष्टश्च[1] तीव्रार्तिरिदमब्रवीत् ॥४४॥
45 सुवर्णरूपकशतं भ्रान्त्वा देशान्तरोर्जितम् । गृहीत्वा श्रुतसौराज्यः स्वदेशमहमागतः ॥४५॥
त्वयि राजनि निश्चौरैरध्वभिर्विशतः सुखम् । क्षोभवल्लवणोत्से मे दिनान्ते श्राम्यतः स्थितिः ॥४६॥
दीर्घाध्वलङ्घनक्लान्तस्तत्राहमकुतोभयः । मार्गारामतरोर्मूले त्रियामामत्यवाहयम् ॥४७॥
वेतनं ग्रन्थिबद्धं तदुत्थास्तोरपतन्मम[1] । अरघट्टे समीपस्थे कक्षयोगादलक्षिते ॥४८॥

२८. [1]) Thus A; G has *sec. manu* the conjectural reading दत्त्वा. ३४. [1]) Thus $A_3$; $A_1$ °खिला°. ३६. [1]) $A_2$ gloss गणत् वतूर इति भाषया वहीं इति मध्यदेशीयाः. ३८. [1]) $A_2$ gloss दीन्नाराः धार् इति कश्मीरभाषया.—[2]) $A_2$ gloss यत्सन्निधौ अर्थिप्रत्यर्थिनावुभौ भूमेः क्रयविक्रयं कुरुतः । येन चावस्तरमानं क्रियते सोधिकरणलेखकः । अवस्तरपरिमाणलेखपत्रकारी सराफ् इति भाषया. ३९. [1]) $A_2$ gloss अधिकरणलेखकाय दीन्नारदशशतीदानात्.—[2]) $A_2$ gloss गृहविक्रयिणा वणिजा विक्रयपत्रे लिखितं । सोपानकूपरहितं विक्रीतं गृहमिति । ततस्तेन लुब्धेन वणिजा प्रत्यर्थिना रेफविषये सकारः कारितः अधिकरणलेखकहस्तेन । उत्कोचं दीन्नारदशशत्याख्यं दत्त्वा कूपसहितं गृहं विक्रीतमिति लेखितं । ततोनन्तरं राज्ञानुमितं लेखपत्रचित्रपार्थं किमर्थं दीन्नारदशशती । बहुमूल्यत्वादिति । रेफस्य सकार एव कृतोनेन इति ॥. ४१. [1]) $A_3$ gloss विज्ञप्तिकराय. ४२. [1]) $A_3$ gloss द्वास्स्थः. ४४. [1]) Thus corr. by later hand from $A_1$ पृष्टोथ. ४८. [1]) Thus corr. by $A_3$ from $A_1$ °तद्भुवि.

तस्मिन्दुरवरोहेतिनिर्वसुत्वाज्जहद्वपुः । सोहं हारितसर्वस्वः शोचन्रुद्धश्चिरं जनैः ॥४९॥
एकोध्यवसितः कोपि साहसे[1] पुरुषोब्रवीत् । मह्यं दापितवित्ताय[2] किं ददासीति मां ततः ॥५०॥ 50
तमस्म्यवोचं विवशस्तस्यार्थस्यास्मि कः प्रभुः । तुभ्यं यद्रोचते मह्यं तत्ततो दीयतां त्वया ॥५१॥
अवरुह्याधिरूढोथ रूपकेभ्यो द्वयं मम । स प्रादात्सपटमेवाष्टानवतिं स्वीचकार तु ॥५२॥
व्यवहारा वचोनिष्ठा[1] एव राज्ञि यशस्करे । निन्दन्व्यवस्थां तां लोकैर्न्यक्कृतोस्मीति वादिभिः ॥५३॥
उपचारोक्तिसारल्य[1]च्छलह्नारितवेतनः । सोहं जहाम्यसून्द्वारे दुर्व्यवस्थापकस्य ते ॥५४॥
पुंसस्तस्य स राज्ञाथ पृष्टः प्रकृतिनामनी । वदनप्रत्यभिज्ञे[1]व ममास्तीत्यभ्यभाषत ॥५५॥ 55
प्रातस्तवेप्सितावाप्तिं करिष्यामीति भूभुजा । प्रतिज्ञाय कथंचित्स स्वपार्श्वे कारितोशनम् ॥५६॥
लवणोत्सौकसां दूताहूतानां स विशां ततः । स्थितमन्तर्द्विजोन्येद्युस्तं राज्ञेदर्शयन्नरम् ॥५७॥
पृष्टः स राज्ञा विप्रेण यथैवोक्तं तथैव तत् । सर्वमूचे वाक्प्रतिष्ठं व्यवहारमुदीरयन् ॥५८॥
सत्यवाक्पारतन्त्र्यस्य वस्तुवृत्तस्य चान्तरम् । अलक्षयन्तः प्रैक्षन्त दोलाकुलधियो धराम् ॥५९॥
धर्मासनस्थो राजाथ रूपकाणामभाषत । तमष्टानवतेः पात्रं विप्रमन्यं द्वयस्य तु ॥६०॥ 60
अनुयोक्तृ्ञ्जगादापि दुःसंचिन्त्या महात्मनः । धर्मस्याधर्ममुद्वृत्तं निहन्तुं धावतो गतिः ॥६१॥
सायं हुताशं प्रविशन्नश्ममयं[1] चेन्दुमण्डलम् । स्वतेजसा संविभजन्प्रदीपैर्ज्योत्स्नयाप्यसौ ॥६२॥
तदुत्थाय यथा भानुर्निहन्ति ध्वान्तमुद्धतम् । अनन्यकर्मा धर्मोयं तथाधर्मं व्यपोहति ॥६३॥ युग्मम् ॥
दुःसंलक्ष्यस्तु धर्मोसावधर्मं बाधतेञ्जसा । तिष्ठन्नित्य[1]मधिष्ठाय दाह्यं काष्ठमिवानलः ॥६४॥
ददाति यद्भवान्दत्तां तदित्याद्युक्तमुज्झतः । तुभ्यं रोचत इत्यादि वचोस्य निसृतं तदा ॥६५॥ 65
रुचितास्य बभूवाष्टानवतिर्लोभिनोस्य ताम् । नादादस्मायरुचितं रूपकाणां द्वयं ददत् ॥६६॥
इत्यादिसूक्ष्मेक्षिकया धर्माधर्मान्तरं विदन् । प्रत्यवेक्षापरः क्ष्माभृद्व्यधात्कृतयुगोदयम् ॥६७॥
इत्थं जनं स विनयन्हास्योभून्निजदुर्नयैः । परस्योपदिशन्पथ्यमपथ्याशीव रोगहृत् ॥६८॥
श्रोत्रियेणेव[1] तेनापि मृदम्भःशौचशालिना । डोम्बोच्छिष्टभुजो भृत्याः[2] पार्श्वान्न परिजह्रिरे ॥६९॥
यथोत्तरं संश्रितार्थैरन्योन्यं पृष्ठपातिभिः । नगराधिकृतैश्[1]चक्रे चतुर्भिः सोर्थसं[2]ग्रहम् ॥७०॥ 70
लेभिरे निधनं तस्मात्सत्यंकारात्पदातयः । श्रीरणेश्वरपीठाग्रन्यस्तखड्गादपि प्रभोः ॥७१॥
स ज्येष्ठे भ्रातरि मृते तथाभून्मुदि[1]तश्चिरम् । तदुपज्ञं[2] यथा प्राज्ञैस्तत्रोत्प्रैक्षि[3] रसार्पणम्[4] ॥७२॥
नीतस्य मण्डलेशत्वं वेलावित्तस्य[1] भूभुजा । देवीः कामयमानस्य चक्रे गजनिमीलिका[2] ॥७३॥
रागाच्छुद्धान्तकान्तानां मूर्धानमधिरोपिता । लड्डा नामाभवत्तस्य वेश्या वैवश्यकारिणी ॥७४॥

---

५०. [1]) Thus $A_1$; $A_3$ °सी.—[2]) $A_3$ दापितलब्धाय. ५३. [1]) $A_3$ gloss वचसि वाक्य एव निष्ठा येषां । न तु न्यायविचारणे इति व्यवस्थां निन्दन्. ५४. [1]) Thus corr. by later hand from $A_1$ °सारल्येच्छ°. ५५. [1]) $A_4$ gloss वदनमेव केवलं तदीयं विदितं मम न तु नामप्रकृती इत्यर्थः. ६२. [1]) $A_3$ gloss आप्यं. ६४. [1]) Thus corr. by $A_3$ from $A_1$ तिष्ठन्निष्टम°. ६९. [1]) Thus $A_1$; $A_3$ °येणैव.—[2]) Thus corr. by $A_3$ from $A_1$ °भृत्यान्पा°. ७०. [1]) $A_2$ gloss हट्टरक्षिभिः.—[2]) Thus corr. by $A_3$ from $A_1$ सोथसं°. ७२. [1]) Thus $A_3$; $A_1$ °भूदुदित°.—[2]) Thus corr. by $A_3$ from $A_1$ तदुपज्ञै; Edd. °ज्ञैर्यथा.—[3]) Emended; A R G °त्प्रोक्षि.—[4]) $A_3$ gloss भुवः. ७३. [1]) $A_3$ gloss एतन्नामकसचिवस्य; एतन्नामक struck out again.—[2]) $A_3$ gloss उपेक्षा कृता इत्यर्थः.

75 अवकाशः सुवृत्तानां हृदयान्तर्न योषिताम् । इतीव विहितौ धात्रा सुवृत्तौ तद्बहिः कुचौ ॥७५॥

उत्तमाधमसंसक्तौ जानन्सदृशवृत्तिताम् । नारीणां शुचिबाह्यानामङ्गनात्वं[1] व्यधाद्विधिः ॥७६॥

सा ललितापि राज्ञा यद्बह्वा ललितलोचना । चण्डालयामिकेन[1]गाद्यामिनीषु समागमम् ॥७७॥ युग्मम् ॥

सुभगंकरणं किंचिच्चण्डालतरुणेऽभवत् । तं यत्प्रभावविवशा भेजे राजवधूरपि ॥७८॥

सा वा चण्डालकुलजा स वा कार्मण[1]कर्मवित् । अन्यथा संगमः[2] किं स्यादसंभाव्यस्तथाविधः ॥७९॥

80 सोऽभूत्केन प्रकारेण तया सह समागतः । इत्येष लेभे वृत्तान्तः प्रतिभेदं न कुत्रचित् ॥८०॥

केवलं प्रत्यभात्तां[1]दृक्पापिनोः प्रेम तत्तयोः । दृग्व्यापारेक्षणाल्क्षिप्रं हाडिनाम्नोऽधिकारिणः ॥८१॥

तमर्थमथ तथ्येन वीक्ष्य प्रणिधिभिर्नृपः । प्रायश्चित्तानुचरणक्षामः कृष्णाजिनं दधौ ॥८२॥

कुपितोऽपि स यन्नैनां न्यवधी[1]द्रागमोहितः । तेनैवागात्पुरोभागिवितर्कातङ्कपात्रताम् ॥८३॥

डोम्बोच्छिष्टानुगासङ्गादशुचित्वं यशस्करे । संक्रान्तं कुष्ठिसंस्पर्शात्कुष्ठं दुःखमिवाभवत् ॥८४॥

85 सामान्येन सता कैश्चित्सदृशैः शुभकर्मभिः । जन्मान्तरीयैः साम्राज्यं मया प्रापीति चिन्तयन् ॥८५॥

साम्राज्यकामो नृपतिर्भा[1]विष्वपि स जन्मसु । युक्त्या प्रादान्निरातङ्कां राज्यलक्ष्मीं द्विजन्मने ॥८६॥

भूभुजा दानशौण्डेन पैतृके स्थण्डिले कृतः[1] । छात्राणामार्यदेश्यानां[2] तेन विद्यार्थिनां मठः ॥८७॥

मठाधिपतये तत्र छत्रचामरहासिनीम् । स नरेन्द्रश्रियं[1] प्रादाद्दृङ्क्रान्तःपुरवर्जिताम् ॥८८॥

वितस्तापुलिने राजा नानोपकरणान्वितान् । ब्राह्मणेभ्यः सोऽग्रहारान्[1]पञ्चपञ्चाशतं ददौ ॥८९॥

90 अथ जातोदरव्याधिर्मज्ज्ञातो नायमित्यसौ । जानन्संग्रामदेवाख्यं परिवर्ज्य निजात्मजम्[1] ॥९०॥

समर्प्य सचिवैकाङ्गसामन्तानभ्यषेचयत् । रामदेवात्मजं राज्ये वर्णटं प्रपितृव्यजम् ॥९१॥

शक्ये राज्यादपाकर्तुं शिशावनभिषेचिते । निराशाः समपद्यन्त तदा राज्यजिहीर्षवः ॥९२॥

स पर्वगुप्तकौटिल्यप्रयुक्तेरुदयोन्मुखः । विपाककाल[1]स्तत्राह्नि भङ्गोन्मुख इवाभवत् ॥९३॥

राजधानीस्थितस्यापि वर्णटो राज्यदायिनः । आरोग्यवार्तयाप्यासीन्मुमूर्षोरनिरीक्षकः ॥९४॥

95 ततः सानुशयो राजा ताम्यन्प्रैर्यत मन्त्रिभिः । राज्यं संग्रामदेवाय[1] दातुमाश्वासकारिभिः ॥९५॥

राजाज्ञया निशामेकां बद्धोटस्तम्भमण्डपात् । बहिर्दत्तार्गलाद्यातर्वर्णटो निरवत्स्यत[1] ॥९६॥

भयात्प्रजागराद्वापि तद्भृत्यानां विवेकिनाम् । आस्थानमण्डपं प्राप पायुक्षालनभूमिताम् ॥९७॥

एकाहराजपुरुषस्त[1]दासिं विजयेश्वरे । क्रीडाद्दैवप्रसादाख्यो राजबीजी समर्पयत् ॥९८॥

अथाभिषिच्य संग्रामदेवं तीव्रीभवद्व्यथः । स राजधान्या निर्गत्य मर्तुं निजमठं ययौ ॥९९॥

100 धीः केशश्मश्रुवपने शिरःशाटकवर्जनम् । काषायग्रहणोद्वेगः शस्त्रत्यागग्रहश्च यः ॥१००॥

राजभृत्यैः प्रतिज्ञातः स तस्मिन्निश्चितक्षये । जीवत्येव कृतज्ञत्वव्यञ्जकैः परिवर्जितः ॥१०१॥ युग्मम् ॥

---

७६. 1) Thus corr. by $A_3$; reading of $A_1$ illegible; $A_3$ in margin °ङ्गनाख्यां. ७७. 1) $A_2$ gloss प्रहरजागरूकेण. ७९. 1) $A_3$ gloss वशीकरण.—2) Thus corr. by $A_3$ from $A_1$ सम्भवः. ८१. 1) Thus corr. by $A_3$ from $A_1$ °भार्याद्दृ°. ८३. 1) $A_3$ न्यवधीद्र°. ८६. 1) Thus $A_3$; $A_1$ °कामोऽपि नृपो भा°. ८७. 1) Thus $A_3$; $A_1$ स्थितः.—2) Thus corr. by $A_3$ from $A_1$ °देशानां. ८८. 1) Thus $A_3$; $A_1$ नरेन्द्राश्रितां. ८९. 1) $A_3$ gloss काष्ठिलतीर्थविषये यशस्करस्याग्रहारा अभवन्नित्याहुः लोकाः. ९०. 1) Thus corr. by $A_3$ from $A_1$ नृपा°. ९३. 1) Thus corr. by $A_3$ from $A_1$ विपाकपाकस्त°. ९५. 1) Thus corr. by $A_3$ from $A_1$ °देवस्य. ९६. 1) Thus $A_1$; $A_3$ निरवास्यत; perhaps to be emended निरवत्स्यत. ९८. 1) $A_4$ gloss एकाहं राजभूतस्य वर्णटस्य पुरुषो भृत्यः.

द्वे सहस्रे सुवर्णस्य सार्धे बद्ध्वा[1] पटाञ्चले । यो निर्जगाम राजासौ मुमूर्षुर्निजमन्दिरात् ॥१०२॥
पञ्चभिः पर्वगुप्ताद्यैर्यैतकं तस्य मन्त्रिभिः । हृतं सजीवितस्यैव विभक्तान्योन्यमग्रतः ॥१०३॥ युग्मम् ॥
विवेष्टमानः शय्यायां व्याधिदग्धान्तरो नृपः । तिष्ठन्मठाङ्गनकुटीगर्भे ध्वान्तान्धकारिते ॥१०४॥
अजातसंविद्धंशोषे पश्यन्द्रोहपरान्निजान् । प्राणैरहानि द्वित्राणि न यदा निरमुच्यत ॥१०५॥ 105
तदा सुहृद्बन्धुभृत्यवेलावित्तैः कृतत्वरैः । जिहीर्षुभिश्च साम्राज्यं विषं दत्त्वा विपादितः ॥१०६॥
अवरोधवधूमध्यात्सती तं पतिमन्वगात् । एका त्रैलोक्यदेव्येव स्वप्रभेव विरोचनम् ॥१०७॥
वर्णाश्रमप्रत्यवेक्षाबद्धकक्ष्यः क्षितीश्वरः । चक्रभान्वभिधं चक्रमेलके[1] द्विजतापसम् ॥१०८॥
कृतात्याचारमा[1]लोक्य राजा धर्मवशंवदः । निजग्राह श्वपादेन ललाटतटमङ्कयन् ॥१०९॥
तन्मातुलेन[1] तद्रोषाद्वीरनाथेन योगिना । सांधिविग्रहिकेणार्थ[2] स स्वेनैव न्यगृह्यत ॥११०॥ 110
पूर्वाचार्यप्रभावेण स्वमाहात्म्याधिरोपणम् । प्रख्यापयद्भिर्गुरुभिः श्रद्धयेति यदुच्यते ॥१११॥
तत्ख्यापितैव सप्ताहात्स विपन्न इति श्रुतिः । दीर्घव्याधिहते तस्मिन्नुपपत्तिः कथं भवेत् ॥११२॥
अथासयान्तरेवाभूत्सा वार्तेत्युच्यते यदि । वर्णटाद्यभिशापेपि तदायात्वत्र हेतुताम् ॥११३॥
भुक्तैश्वर्यो नव[1] समाश्चतुर्विंशे स हायने । मासि भाद्रपदे कृष्णतृतीयस्यां व्यपद्यत ॥११४॥
पितामहीं शिशो[1]र्गोप्त्रीं विनिवेश्य नृपासने । भुभटाद्यैः समं प्राभूत्[2]पर्वगुप्तोथ पञ्चभिः ॥११५॥ 115
क्रमात्समं पितामह्या तान्व्यापाद्येतरान्बली । एकः स एवमाक्रान्त[1]ः प्रबभूव नृपास्पदे ॥११६॥
स पार्थिवत्वमन्त्रित्वमिश्रया चेष्टया स्फुरन्[1] । राजा राजानकश्[2]चेति मिश्रामेवं धियं व्यधात् ॥११७॥
सेवमानः स्वयं बालभूपं भोज्यार्पणादिभिः । ऋजूनां प्रत्यभात्पर्वगुप्तो द्रोहबहिष्कृतः ॥११८॥
यान्द्रोहभीरून्संभाव्य संविभेजे यशस्करः । तस्य तत्तनयोच्छेदे त एवासन्प्रयोजकाः ॥११९॥
करभाङ्गरुहापिङ्गि श्मश्रुणि क्षितिपालवत् । स ददौ कुङ्कुमालेपं वर्चः शाद्वलविस्तृते ॥१२०॥ 120
बिभ्यदेकाङ्गसंघातात्प्रकटोत्पाटनाक्षमः । प्रमापणाय प्रायुङ्क्त शिशोः कर्माभिचारिकम् ॥१२१॥
न्याय्यं ते सान्वयस्यास्ति राज्यं चैत्रादिवासरे । अन्यथाचरतो नाशः क्षिप्रं वंशायुषोर्भवेत् ॥१२२॥
इतीमामपि यामिन्यां श्रुतवान्भूतभारतीम् । अभिचारस्य वन्ध्यत्वं निर्ध्यायाधिकशङ्कितः ॥१२३॥
एकाङ्गेभ्यो विभिन्नेभ्यो बिभ्यदुद्भिन्नसंभ्रमः । उदतास्यत्तथा चिन्तालुप्तसंविद्दिवानिशम् ॥१२४॥
यथा महाहिमापातनिःसंचारजने दिने । अकस्मात्संभृतबलो राजधानीं निरुद्धवान् ॥१२५॥ 125
विरोधकारिणं बुद्धाभिधेन सह सूनुना । निर्द्रोहमाहवे हत्वा मन्त्रिणं रामवर्धनम् ॥१२६॥

---

१०२. [1]) Thus corr. by later hand from $A_1$ बद्धा. १०८. [1]) $A_3$ gloss, partly effaced: चक्र...जने...क्ररक्षा ..चक्रमेल ...ये... . १०९. [1]) $A_3$ gloss अतिक्रान्ताचारम्. ११०. [1]) $A_4$ gloss चक्रभानुद्विजमातुलेन.—[2]) $A_3$ gloss सन्धिविग्रहश्रुद्रान्तमुख्यकर्माधिकारी सान्धिविग्रहिकः कटकपालः. ११४. [1]) नव supplied by $A_3$ in space left by $A_1$. ११५. [1]) $A_4$ gloss सङ्ग्रामदेवस्य.—[2]) $A_2$ gloss प्रभुरभूत्. ११६. [1]) Emended with G Edd.; $A_1$ एव साङ्क्रान्तिः which $A_3$ alters to एवमाक्रान्तिः. ११७. [1]) Thus $A_3$; $A_1$ स्फुटन्.—[2]) $A_2$ gloss राजा पार्थिवः राजानकः मन्त्री । राज्ञः अनः प्राणनं । जीवनं धरित्रीरक्षणलक्षणं । यस्मात्तः राजानः अनश्वसप्राणने । राजान एव राजानकः । स्वार्थे कः यद्वा अत्र लिङ्गात् । कः सादृश्ये देवदत्त इव देवदत्तक इतिवत् । यथा प्राणनं विना देहस्थितिर्नास्ति । तथा धीसचिवं मन्त्रिणं विना पार्थिवानां स्वयं कार्याकार्यविवेककौशलातिशयो न सम्भवेदिति । राजानकमपेक्षते राजा ॥ यद्वा राज्ञः अनः प्राण इव राजानक इत्यर्थः॥.

पित्र्येण वेलावित्तेन प्राभृतार्थमुपाहृताम्[1] । गले पुष्पस्रजं बद्ध्वा पातितं पार्थिवासनात् ॥१२७॥
स तं वक्राङ्घ्रिसंग्रामं हतमन्यत्र मन्दिरे । पातयित्वा वितस्तान्तः कण्ठबद्धशिलं निशि ॥१२८॥
चतुर्विंशस्य वर्षस्य दशम्यां कृष्णफाल्गुणे । पापः सखड्गकवचो न्यविक्षत नृपासने ॥१२९॥ चक्रलकम् ॥
130 पारेविशोकं[1] दिविराज्ज्ञातस्याभिनवाभिधात् । सूनुः संग्रामगुप्तस्य स तदा[2] पार्थिवोभवत् ॥१३०॥
केचित्तं प्रत्य[1]वस्थानं ये पुरा प्रतिजज्ञिरे । ते सर्व एव तद्भीताः प्रातरेव प्रणेमिरे ॥१३१॥
पार्थिवैकाङ्गसामन्तमन्त्रिकायस्थतन्त्रिणाम् । तद्भीत्या द्रोहवृत्तीनां द्रोहाद्वै[1]तमदृश्यत ॥१३२॥
एकाङ्गस्य तदास्थाने सुय्याभिजनजन्मनः । प्रमादान्मदनादित्यनाम्नो ढक्का व्यदीर्यत ॥१३३॥
हतांशुकेन भूभर्त्रा कुपितेन खलीकृतः । स निकृत्तकचश्मश्रुस्तपस्वी समपद्यत ॥१३४॥
135 तादृशस्य पुनस्तस्य सस्त्रीपुत्रत्वमीयुषः । अद्याप्यभिजने जाता वसन्ति त्रिपुरेश्वरे ॥१३५॥
कुर्वता पर्वगुप्तेन भूभृता द्रविणार्जनम् । प्रापिताः पुनरुत्साहं प्रजारोगा नियोगिनः ॥१३६॥
व्यधत्त स्कन्दभवनविहारवसुधान्तिके । पर्वगुप्तेश्वरं सोपि वृजिनार्जितया श्रिया ॥१३७॥
श्रीयशस्करभूभर्तृशुद्धान्तस्य विशुद्धधीः । कौली[1]नमलुना[2]दिका गौरीव नृपसुन्दरी ॥१३८॥
सुचिराङ्कुरितप्रीतेः पर्वगुप्तस्य याकरोत् । समागमार्थिनो युक्त्या वञ्चनामुचितां सती ॥१३९॥
140 इदं यशस्करस्वामिसुरवेश्मार्धनिर्मितम् । त्यक्त्वा पत्युर्विपन्नस्य कृत्वा निर्मा[1]णपूरणम् ॥१४०॥
अमोघमस्मि[1] नियमाद्विधास्यामि त्वदीप्सितम् । स ह्युपच्छन्दयन्नेवं सुभ्रुवाभिहितस्तया ॥१४१॥
अथ प्रवृद्धगर्वेण तत्स्वल्पैरेव वासरैः । संपूर्णतां सुरगृहं गमितं तेन भूभुजा ॥१४२॥
सा यागज्वलने राजललना पीतसर्पिषि । पूर्णाहुत्या समं साध्वी जुहाव सहसा तनुम् ॥१४३॥
उपर्यस्या निरस्तासोः पुष्टाः कुसुमवृष्टयः । तत्काङ्क्षिणस्तु न्यपतन्नवर्णमुखरा गिरः ॥१४४॥
145 सुदीर्घसाहसारम्भचिन्तासंरम्भशोषितः । पर्वगुप्तो बभूवाथ तृष्णामयपथातिथिः ॥१४५॥
व्याध्याधिप्रशमायासैर्ज्ञात्वाप्यस्थायिनीं स्थितिम् । मूढाः प्ररूढिं नोज्झन्ति द्रोहश्रीलोभमोहिताः ॥१४६॥
आशङ्क्य तादृङ्क्लिष्टोपि सोकुण्ठैः प्राक्तनैः शुभैः । कैश्चित्सुरेश्वरीक्षेत्रे परासुः समपद्यत ॥१४७॥
षड्विंशवत्सराषाढबहुलेह्नि त्रयोदशे । द्रोहार्जितेन नृपतिः स राज्येन व्ययुज्यत ॥१४८॥
अतीन्द्रियायां परलोकवृत्ताविहैव तीव्राशुभपाकशंसी ।
दृश्येत नाशो यदि नाम नाशु न कः कुकृत्येन यतेत भूत्यै ॥१४९॥
150 क्षेमगुप्ताभिधानोभूदथ राजा तदात्मजः । आसवासेवनोत्सिक्तचित्ततारुण्यसंज्वरः ॥१५०॥
सोभूत्स्वभावदुर्वृत्तो नितरां दुर्जनाश्रयात् । कृष्णक्षपाक्षणो घोरमेघान्ध इव भीतिकृत् ॥१५१॥
स्वतुल्यवेषा[1]लंकाराः शतं लालितका[2] नृपम् । तं फल्गुणप्रभृतयो दुराचाराः सिषेविरे ॥१५२॥
द्यूतासवाङ्गनासेवाव्यसनेपि स पार्थिवः । विटनिर्लुण्ठ्यमानोपि नाभूल्लक्ष्मीबहिष्कृतः ॥१५३॥

---

१२७. [1]) Thus corr. by $A_3$ from $A_1$ °हृतम्. १२९. [1]) चक्रलकम् added by $A_3$. १३०. [1]) Thus corr. by $A_3$ from $A_1$ विशांके.—[2]) Thus $A_3$; $A_1$ तथा. १३१. [1]) Thus $A_1$; $A_3$ केचित्तत्प्रत्य°. १३२. [1]) Thus $A_3$; $A_1$ द्रोहाद्रै°. १३८. [1]) $A_3$ gloss कौलीनं लोकनिन्दां.—[2]) Thus corr. by $A_3$ from $A_1$ °मधुनाद°. १४०. [1]) Thus corr. by $A_3$ from $A_1$ निर्वाण°. १४१. [1]) $A_3$ gloss अस्मीति निपातः अहमित्यर्थे. १५२. [1]) Thus $A_1$; $A_3$ °वेशा°.—[2]) $A_3$ gloss पदातयः.

रागी मधुप्रणयवान्विहिताक्षसक्तिर्यः सख्यमेति मधुपैर्हृतकोशसारैः ।
पद्मे प्रयाति दिनमात्रमपि प्रसक्तिं श्रीस्तत्र चेत्किमिव तन्न कुतूहलाय ॥१५४॥
विटाः प्रविष्टा हृदयं जिष्णुजा वामनादयः । पिशाचस्येव रुचितामशुचिं तस्य चक्रिरे ॥१५५॥ 155
परोपहासकुशलः परनारीरतिप्रियः । परायत्ताशयस्तस्थौ पार्थिवोनर्थतत्परः ॥१५६॥
ष्ठीवनं श्मश्रुमालासु गालयः श्रोत्रपालिषु[1] । तेन क्षिप्ताः प्रतीक्ष्याणां करोटीषु च टक्कराः ॥१५७॥
कटिसंघटनैर्नार्यो[1] मृगव्यज्ञा[2] वनाटनैः । विटाश्चाश्लीलरटनैर्वाल्लभ्यं तस्य लेभिरे ॥१५८॥
पुंश्चलीजाल्मवैधेयबालकद्रोग्धृनिर्भरा । समभूदप्रवेशार्हा राजपर्षन्मनस्विनाम् ॥१५९॥
जिष्णुपुत्रैः क्षेमगुप्तक्ष्माभृद्यन्त्रपुत्रकः । चारणत्वगुणाकृष्टः किं न धूर्तैरनर्त्यत[1] ॥१६०॥ 160
तस्य कङ्कणवर्षोसीत्यभिधानं विधाय ते । तोषिताश्चासकृच्चक्रुर्दोष्णोः कङ्कणवर्षिताम् ॥१६१॥
निर्दोषदोषाविष्कारे नववस्तुप्रदर्शने । अधृष्यटक्कराधाने प्रसादः प्रापि तैर्नृपात् ॥१६२॥
संलक्ष्यकुचकक्ष्यान्ताः कृत्वा निजवधूः पुरः । रागी राजा गृहान्नीतो द्यूते तैर्निर्धनः कृतः ॥१६३॥
संभोगाभग्नसौभाग्यकृतस्पर्धैः परस्परम् । संभुज्यैता भवान्वक्तु विशेषमिति चोदितः ॥१६४॥
उपभोगं स्वभार्याणां निर्लज्जैस्तैः स कारितः । का हृद्येति च रत्यन्ते पृष्टोभीष्टधनप्रदः ॥१६५॥ युग्मम्[1] ॥ 165
तस्य लालितकेष्वास्तां मुख्यौ संभोगढौकने । मात्रोश्चारित्ररक्षित्वाद्भिक्षाकौ[1] हरिधूर्जटी ॥१६६॥
नीत्वा नर्मकथाङ्गतां निजवपुर्मुञ्चन्ति मानोन्नतिं संदूष्य स्वयमङ्गनाः शुचितया त्यक्तं कुलं कुर्वते ।
सौख्यं घ्नन्ति सुदीर्घसेवनसमासक्त्या यदर्थं श्रमः प्रत्याख्याय तदेव वेद्मि न विटैः किं प्रार्थ्यते सेवया॥१६७॥
यशस्करस्य भूत्वापि सचिवो भट्टफल्गुणः । तस्याभूदनुजीव्यन्ते धिग्भोगाभ्यासवासनाम् ॥१६८॥
फल्गुणस्वामिमुख्यानां प्रतिष्ठानां विधायिनः । तस्योपदेशो भूभर्त्रा पर्यहास्यसकृद्रहः ॥१६९॥
गृह्णन्विद्वेषितां[1] हन्तुं टक्करादि बलात्ततः । वृद्धो रक्कः कम्पनेशो दुर्गोष्ठीमध्यगोभवत् ॥१७०॥ 170
तीक्ष्णाक्षेपे संप्रविष्टं हन्तुं संग्रामडामरम् । श्रीजयेन्द्रविहारं स निर्घृणो निरदाहयत् ॥१७१॥
सुगतप्रतिमारीतिं हृत्वा दग्धात्ततोखिलात्[1] । जरद्देवगृहेभ्यश्च संगृह्य[2] ग्रावसंचयम् ॥१७२॥
सुरप्रतिष्ठया दार्ढ्यं मूढः स्वयशसो विदन् । नगरापणवीथ्यन्तः क्षेमगौरीश्वरं व्यधात् ॥१७३॥
एकः प्रयात्युपरमं द्रविणं तदीयं हृत्वापरः[1] प्रसभमुद्वहति प्रमोदम् ।
नो वेत्ति तत्स्वनिधने परकोशगामि धिग्वासनामसममोहकृतान्धकाराम् ॥१७४॥
त्यागिना क्षेमगुप्तेन भुक्त्यर्थं खशभूभुजे[1] । हृत्वा विहारान्निर्दग्धान्ग्रामाः षट्त्रिंशदर्पिताः ॥१७५॥ 175
दुर्गाणां लोहरादीनां शास्ता शतमखोपमः[1] । नृपतिः सिंहराजाख्यस्तस्मै स्वां तनयां ददौ ॥१७६॥
स तस्यां शाहिदौहित्र्यां दिद्दायां सक्तमानसः । दिद्दाक्षेम इति ख्यातिं ययौ लज्जावहां नृपः ॥१७७॥
मातामहेन भूभर्तृवध्वास्तस्या व्यधीयत । श्रीभीमशाहिना[1]दात्तप्रासादो भीमकेशवः ॥१७८॥

१५७. [1]) Corr. by $A_3$ from $A_1$ °पालयः. १५८. [1]) Corr. by $A_3$ from $A_1$ °घटनान्°.—[2]) मृगव्यज्ञा supplied by $A_3$ in space left by $A_1$. १६०. [1]) Corr. by $A_3$ from $A_1$ °नन्द्यत. १६५. [1]) युग्मम् supplied by $A_3$. १६६ [1]) Thus corr. by $A_2$; $A_1$ °रक्षित्वा भिक्षा°. १७०. [1]) Thus $A_3$; $A_1$ °न्विशेषतां. १७२. [1]) Thus $A_3$; $A_1$ दग्ध्वा ततो.—[2]) Thus $A_3$; $A_1$ सङ्ग्राह्य. १७४. [1]) Thus corr. by $A_3$ from $A_1$ कृत्वा. १७५. [1]) $A_4$ gloss सिंहराजाय. १७६. [1]) Thus corr. by $A_3$ from $A_1$ शतमुखो°. १७८. [1]) Thus $A_3$; $A_1$ श्रीभूमिस्वामिनो°. Cf. *Albêrûnî's Indica* ( trans. by Sachau), ii. 13.

चन्द्रलेखाभिधां कन्यां राज्ञे[1] दत्तवताभवत् । फल्गुणद्वारपतिना समं दिद्दा समत्सरा ॥१७९॥

180 गुरूपदेशः सुमहान्कुन्तविद्याश्रमस्तथा । तस्य निर्वहणाद्दर्द्याङ्गभुजो[1] हास्यतां ययौ ॥१८०॥

अमोघपतनान्प्रासा[1]न्यो[2]ग्यान्संग्रामकर्मसु । सृगालमृगयासक्त्या स हि श्लाघ्यानमं[3]न्यत ॥१८१॥

तं वृतं वागुरावाहिडोम्बाटविक[1]पेटकैः । पर्यटन्त श्वभिः सार्धमपश्यन्सततं जनाः ॥१८२॥

तस्य दामोदरारण्यलल्यानशिमिकादिषु । स्थानेषु क्रोष्टुमृगयारसिकस्य वयोगमत् ॥१८३॥

अथ कृष्णचतुर्दश्यां स कुर्वन्मृगयां नृपः । ज्वालामपश्यत्क्रोशन्त्याः सृगाल्या निर्गतां मुखात् ॥१८४॥

185 तदालोकनसंजातसत्रासाकम्पितस्तत[1]ः । लूतामयज्वरेणाभूत्परीतो मृत्युहेतुना ॥१८५॥

मर्तुं ययौ च वाराहक्षेत्रं यत्र विधायकः । श्रीकण्ठक्षेममठयोरासीद्भुष्कपुशान्तिके ॥१८६॥

मसूरविदलाकारलूताक्लिन्नकलेवरः । पौषे चाब्दे चतुस्त्रिंशे नवमेह्नि[1] सिते मृतः ॥१८७॥

क्षेमगुप्तात्मजः क्ष्माभृदभिमन्युरभूत्ततः । शिशुर्निस्त्रिंशधर्मिण्या दिद्दादेव्यानुपालितः ॥१८८॥

सं[1]धिविग्रहशुद्धान्तमुख्यकर्माधिकारिणः । निःसाध्वसं राजवधूमवन्ध्यशयनां व्यधुः ॥१८९॥

190 अभिमन्यौ क्षितिं रक्षत्यकस्मादेव दारुणः । तुङ्गेश्वरापणोपान्तादुज्जगाम हुताशनः ॥१९०॥

वर्धनस्वामिपार्श्वस्थभिक्षुकीपारकावधिः । वेतालसूत्रपातस्थान्स ददाह महागृहान् ॥१९१॥

डोम्बचण्डालसंस्पृष्टभूपसंपर्कदूषितान् । दग्ध्वा महागृहान्वह्निर्भुवः शुद्धिमिवाकरोत् ॥१९२॥

रक्षित्री क्ष्मापतेर्माता स्त्रीस्वभावाद्विमूढधीः । सारासारविचारेण लोलकर्णा न पस्पृशे ॥१९३॥

राज्ञः सुतार्पणाद्वृद्धवैरा तस्थौ पुरा यतः । पतिवत्न्येव[1] सा सार्धं फल्गुणेनाग्र्यमन्त्रिणा ॥१९४॥

195 पत्यौ[1] मृते सपत्नीनां दृष्ट्वानुमरणं[2] ततः । दम्भेनानुमुमूर्षन्तीमनुमेने स तां द्रुतम् ॥१९५॥

निषिषेधानुबन्धात्तु सानुतापां चितान्तिके । कृपालुर्मरणादेताममात्यो नरवाहनः ॥१९६॥

अतो निसर्गपिशुनो रक्कस्तां मन्युदूषिताम् । फल्गुणाद्राज्यहरणाशङ्कां राज्ञीमजिग्रहत् ॥१९७॥

विरागशंसिभिर्लिङ्गैस्तां ज्ञात्वा विषमाशयाम् । समन्युं साखिलामात्यां फल्गुणोप्यास्त शङ्कितः ॥१९८॥

स हि सर्वाधिकारस्थः सर्वस्याक्षिगतोभवत् । दीप्यमानोधिकं मन्त्र[1]शौर्योत्साहादिभिर्गुणैः ॥१९९॥

200 अस्थीनि क्षेमगुप्तस्य गृहीत्वा जाह्नवीं गते । पुत्रे कर्दमराजाख्ये प्रबलैरन्वितो बलैः ॥२००॥

तत्प्रत्यागमपर्यन्तं पर्णोत्से स्थातुमुद्यतः । अविश्वसन्नृपगृहे फल्गुणो वैरिशङ्कितः ॥२०१॥

निर्गत्य नगराद्यावत्सभाण्डागारिसैनिकः । काष्ठवाटान्तिकं प्राप[1] तावद्रक्कादिचोदिता ॥२०२॥

आकलय्य द्रुतं दिद्दा संत्यज्य प्रार्थनादिकम् । पृष्ठे प्रत्युत याष्टीकांस्तस्य हन्तुं व्यसर्जयत् ॥२०३॥

नवावमानखिन्नः स मिलितानन्तसैनिकः । प्रत्यावृत्य ततो मानी वाराहं क्षेत्रमाययौ ॥२०४॥

205 श्रुत्वा समेतसैन्यं तं प्रत्यायातं प्रतापिनम् । आस्कन्दशङ्किनी दिद्दा सामात्या समकम्पत ॥२०५॥

---

१७९. 1) Thus corr. by later hand from $A_1$ राज्ञो. १८०. 1) Thus corr. by $A_3$ from $A_1$ °द्दर्द्याभू°. १८१. 1) Thus corr. by $A_3$ from $A_1$ °प्रतिमान्प्रा°.—2) $A_3$ कुन्तान्.—3) Thus corr. by $A_3$ from $A_1$ श्लाघ्यामम°. १८२. 1) Thus corr. by $A_3$ from $A_1$ °टविटपे°. १८५. 1) Thus corr. by $A_3$ from $A_1$ °तस्थितिः. १८७. 1) Thus corr. by $A_3$ from $A_1$ नवमेब्दे. १८९. 1) Thus corr. by $A_3$ from $A_1$ मन्त्रिवि°. १९४. 1) $A_4$ gloss सभर्तृकेव सती. १९५. 1) Thus corr. by $A_3$ from $A_1$ पत्न्यौ.—2) $A_1$ °नुसरणं. १९९. 1) Thus $A_3$; $A_1$ तन्त्र°. २०२. 1) Thus corr. by later hand from $A_1$ प्राप्य; $A_3$ gloss प्राप्त इत्यर्थः.

तस्मिन्क्षेत्रे गतं शान्तं विलप्य स्वामिनं चिरम् । वराहपादसविधे तेन[1] शस्त्रं समर्पितम् ॥२०६॥

द्रोहसंभावनापापं शस्त्रत्यागेन मन्त्रिणा । स्वस्य संमार्जितं तेन राजमातुश्च साध्वसम् ॥२०७॥

युक्तायुक्तविचारबाह्यमनसः सेवा महद्वैशसं क्रुद्धेस्मिन्प्रतिकारकर्म गहनद्रोहापवादावहम् ।
येन न्यूनगुणेदृशोपकरणीभावोपि तस्मै परं कोपः कोपि विवेकिनः समुचितः शास्त्राय शस्त्राय वा ॥२०८॥

पर्णोत्समेव शनकैः ससैन्ये फल्गुणे गते । विगताध्यापका बाला इवामोदन्त मन्त्रिणः ॥२०९॥

योगक्षेमौ चिन्तयन्ती क्षेमगुप्तवधूरपि । अनिशं प्रजजागार स्वयं कण्टकपाटने ॥२१०॥ 210

राज्यप्रार्थी पर्वगुप्तो मन्त्रिणौ कोशपीथिनौ । अजिग्रहत्करौ पूर्वं पुत्र्योर्यौ[1] छोजभूभटौ ॥२११॥

तयोः प्रजातौ तनयौ ख्यातौ महिमपाटलौ । अवर्धिषातां यौ राजमन्दिरे राजपुत्रवत् ॥२१२॥

तौ तत्रावस्थितावेव तत्कालं राज्यलालसौ । संमन्त्र्य समगंसातामुद्दामैर्हिम्म[1]कादिभिः ॥२१३॥

बलिनौ तावबलया राज्ञ्यापास्तौ नृपास्पदात् । समन्यू स्वगृहादास्तां यावत्कृतगतागतौ ॥२१४॥

एकतः पृष्ठतः प्रादान्महिम्नो निर्गतस्य सा । निर्वासनाय याष्टीकांस्तावत्प्रकटवैकृता ॥२१५॥ 215

शक्तिसेना[1]भिधानस्य श्वशुरस्य निवेशनम् । प्रविवेश स तज्ज्ञात्वा तं ते तत्रापि दुद्रुवुः ॥२१६॥

शक्तिसेनेन याष्टीकाः सान्त्विता नाचलन्यदा । तदा भीतस्य जामातुर्व्यक्तं प्रादात्स संश्रयम् ॥२१७॥

तं[1] लब्धसंश्रयं प्राप हिम्मको मुकुलस्तथा । एरमन्तकनामा च परिहासपुराश्रयः ॥२१८॥

श्रीमानुदयगुप्ताख्योप्यमृताकरनन्दनः । ललितादित्यपुरजा यशोधरमुखा अपि ॥२१९॥

एकैके ते[1] मिथः सैन्यैर्भुवनक्षोभकारिणः । संभूय चक्रुर्दूराज्यं महिम्नः पक्षमाश्रिताः ॥२२०॥ 220

तस्मिन्महाभये दिद्दापक्षं मन्त्री सबान्धवः । एक एव तु तत्याज नाद्रोहो नरवाहनः ॥२२१॥

प्रवर्धमानपृतना योद्धुं बद्धोद्यमास्ततः । पद्मस्वाम्यन्तिकं प्रापुर्दीप्यमानायुधा द्विषः ॥२२२॥

अथ भूरमठे दिद्दा विसृज्यात्मजमाकुला । आपच्छान्तिक्षमांस्तांस्तानुपायान्समचिन्तयत् ॥२२३॥

ललितादित्यपुरजान्द्विजान्स्वर्णेन भूरिणा । तूर्णं स्वीकृत्य विदधे रिपूणां संघभेदनम् ॥२२४॥

एकाक्षेपेखिलैः कोपो विधेय इति वादिभिः । महिम्नः पीतकोशैस्तैः संधिर्देव्या समं कृतः ॥२२५॥ 225

गोष्पदोल्लङ्घने यस्याः शक्तिर्नाज्ञायि केनचित् । वायुपुत्रायितं पङ्गु तया संघाब्धिलङ्घने ॥२२६॥

यत्संग्रहो रत्नमहौषधीनां करोति सर्वव्यसनावसानम् ।
त्यागेन तद्यस्य भवेन्नमोस्तु चित्रप्रभावाय धनाय[1] तस्मै ॥२२७॥

उत्कोचकाञ्चनादानेष्युच्चां ध्यायन्त्युपक्रियाम् । दिद्दा यशोधरादिभ्यः कम्पनादि समार्पयत्[1] ॥२२८॥

अभिचारं महिम्नश्च कृतवत्या मितैर्दिनैः । मण्डलेखण्डिताशत्वं रण्डाया[1]ः समजृम्भत ॥२२९॥

कदाचित्थक्क[1]नाख्यस्य शाहीशस्योपरि क्रुधा । सत्रा स्ववंशजैर्यात्रां कम्पनाधिपतिर्ददौ ॥२३०॥ 230

तद्देशं निम्नगाशैलदुर्गं प्रविशता जवात् । अखण्डशक्तिना तेन बलादग्राहि थक्कनः ॥२३१॥

---

२०६. [1]) Corr. by later hand from $A_1$ तत्र. २११. [1]) Thus corr. by later hand from $A_1$ यो. २१३. [1]) Emended; A R G °हिमका°. २१६. [1]) Thus corr. by $A_3$ from $A_1$ शक्तिसेवाभि°. २१८. [1]) Thus corr. by $A_3$ from $A_1$ तैर्लब्ध°; $A_3$ gloss तं महिमानं. २२०. [1]) Thus $A_3$; $A_1$ एकैकं तं. २२७. [1]) Thus corr. by $A_2$ from $A_1$ नमोस्तु. २२८. [1]) Emended; A R G समर्पयत्. २२९. [1]) Thus $A_3$; $A_1$ दिद्दायाः. Cf. vi. 260. २३०. [1]) Thus corr. by $A_1$ from °चिड्डुकना°.

स कृतप्रणतेस्तस्य करमादाय भूपतेः । अभिषेकाम्बुभिश्चक्रे श्रीलताप्यायनं पुनः ॥२३२॥

लब्धप्रवेशैः समये तस्मिन्नकादिभिः खलैः । कम्पनाधिपतौ राज्ञ्या विद्वेषोग्राहि मूढया ॥२३३॥

उर्वीपतेश्च स्फटिकाश्मनश्च शीलोज्झितस्त्रीहृदयस्य चान्तः ।

असंनिधानात्सततस्थितीनामन्योपरागः कुरुते प्रवेशम् ॥२३४॥

स्वचित्तसंवादि वचो वदन्तो धूर्ता वितन्वन्ति मनःप्रवेशम् ।

235 पृथग्जनानां गणिकावधूनां विटाः प्रभूणामपि गर्भचेटाः ॥२३५॥

द्रोग्धायं थक्कनं रक्षन्धनादायीति पैशुनम् । तथ्यमेव तदीयं सा स्वसंवादादमन्यत ॥२३६॥

अथ स्ववसतिं प्राप्ते कम्पनेशे जयोर्जिते । याष्टीकान्व्यसृजद्दिश्य स्फुटं निर्वासनोद्यता ॥२३७॥

तदाक्षेपं समाकर्ण्य स्मरन्तः कोशसंविदम् । ते हिम्मकैरमन्ताद्याः पूर्ववद्विक्रियां ययुः ॥२३८॥

नरवाहनमुख्यास्तु राज्ञीपक्षं न तत्यजुः । विभेदं पूर्ववत्प्रापदेवं निजबलं पुनः ॥२३९॥

240 प्रविष्टेषु ततः कोपात्पुरं शुभधरादिषु । भट्टारकामठे दिद्दा भूयः पुत्रं व्यसर्जयत् ॥२४०॥

दत्तार्गले नृपगृहे स्थितां तां दैवमोहिताः । ते तदैव विना पुत्रं विमूढा नोदपाटयन् ॥२४१॥

राज्ञ्याः संजघटे लोकः परस्मिन्नेव वासरे । यद्बलेन तदा स्थैर्यं सा किंचित्समदर्शयत् ॥२४२॥

जयाभट्टारिकापार्श्वाद्यावच्छूरमठान्तिकम् । व्याप्य स्थितैर्द्विषत्सैन्यैरथ प्रववृते रणः ॥२४३॥

राजधानीं राजसैन्ये प्रविष्टे त्रासविद्रुते । सिंहद्वारे घटाबन्धमेकाङ्गाः समदर्शयन् ॥२४४॥

245 शरीरनिरपेक्षास्ते भीतं संस्तम्भ्य तद्बलम् । अधावन्विद्विषां सैन्यं चेलुः केचिच्च शात्रवः ॥२४५॥

तस्मिन्नवसरे राजकुलभट्टः समाययौ । तूर्यघोषैर्द्विषां सैन्यं भिन्दन्नानन्दयन्निजम् ॥२४६॥

तस्मिन्प्राप्ते द्विषां सैन्यं विननाश विनश्वरम् । न द्रोहाविनयं जातु सहन्ते शस्त्रदेवताः ॥२४७॥

त्रोटयत्यायसान्बन्धान्स्फोटयत्युपलानिति । यः ख्यातिमवहत्तथ्यां हिम्मको भीमविक्रमः ॥२४८॥

तस्यासिना राजकुलभट्टदेहार्धपातिना । चर्ममात्रं न तुत्रोट कङ्कटस्यातिसंकटे ॥२४९॥

250 विलोक्य तदसंभाव्यं सैन्ये दैन्यं समाश्रिते । अधानि हिम्मको योधैरवाष्टम्भि यशोधरः ॥२५०॥

तथाप्यासीत्स्फुरन्संख्ये य एरमन्तकः क्षणम् । स भग्नासिश्च्युतो वाहाज्जीवग्राहमगृह्यत ॥२५१॥

नाजौ तैरेप्यताधातुं यः श्रीमान्राजबान्धवः । जगामोदयगुप्तः स क्वापि त्यक्त्वा महाहवम् ॥२५२॥

इत्थं लब्धजया राज्ञी तत्क्षणाज्ज्यग्रहीद्रुषा । यशोधरं शुभधरं मुकुलं च सबान्धवम् ॥२५३॥

काश्मीरिकाणां यः श्राद्धशुल्कोच्छेत्ता गयान्तरे । सोप्येरमन्तकः शूरः परिहासपुराश्रयः ॥२५४॥

255 बद्ध्वा महाशिलां कण्ठे वितस्ताम्भसि पातितः । स्वदुर्नयफलं देव्याः प्रकोपेनानुभावितः ॥२५५॥

---

२३२. [1]) $A_2$ gloss श्रीः एव लता. २३३. [1]) Thus corr. by later hand from $A_1$ °वेशः; R G as above. २३४. [1]) Thus corr. by $A_3$ from $A_1$ °न्योन्यरागः. २३६. [1]) Thus $A_1$; $A_3$ स्वसंवादा°. २३८. [1]) $A_3$ gloss एकाक्षेपेखिलैः कोपो विधेय इत्येवंरूपां. २३९. [1]) मुख्या supplied by $A_3$ in space left by $A_1$. २४१. [1]) Thus corr. by $A_3$ from $A_1$ नोपपाट°. २४५. [1]) Thus corr. by $A_3$ from $A_1$ अधावद्वि°.—[2]) The words from चेलुः to सैन्यं in the following verse are omitted by $A_1$ and supplied in margin by $A_3$. २४६. [1]) $A_3$ °न्निजान्. २४७. [1]) Thus $A_1$; $A_3$ G R विनेश्वरम्. २४८. [1]) Thus corr. by later hand from $A_1$ तोट°.—[2]) तिमवहत्त supplied by $A_3$ in space left by $A_1$. २५०. [1]) Emended with C; A R G °रवष्टम्भि. २५१. [1]) Thus A; R G ऐर°. २५४. [1]) Thus corr. by $A_3$ from $A_1$ काश्मीरका°.—[2]) Thus corr. by $A_2$ from $A_1$ °शुल्कोच्छेता.—[3]) Thus corr. by $A_3$ from $A_1$ गमान्तरे.—[4]) Thus corr. by $A_3$ from $A_1$ °हार°.

ये सप्तसप्तताद्वर्षादा गोपालनृपात्पुरा । अभिमन्युं यावदासन्षोडशानां महीभुजाम् ॥२५६॥
वर्षषष्टिं प्रतापायुःश्रीहरा द्रोहवृत्तयः । ते क्षिप्रं मन्त्रिणः सर्वे सान्ववायाः सहानुगाः ॥२५७॥
भीमभ्रूभङ्गमात्रेण दिद्दादेव्या सकोपया । आसन्निःशेषतां नीता दुर्गयेव महासुराः ॥२५८॥ तिलकम् ॥
अभवन्विहिता राज्ञ्या तानुत्पाद्य मदोद्धतान् । रक्कादयः कम्पनादिकर्मस्थानाधिकारिणः ॥२५९॥
इत्थं मन्त्रिप्रकाण्डः स रण्डामाखण्डलोपमाम् । अखण्डमण्डलां चक्रे निर्द्रोहो नरवाहनः ॥२६०॥ 260
राज्ञी कृतज्ञभावेन सापि मन्त्रिसभान्तरे । तमाजुहाव निर्द्रोहं स्वयं राजानकाख्यया ॥२६१॥
सुते सुष्वाप निष्पन्नभोजनेऽस्मिन्नभुङ्क्त सा । हृष्टे जहर्ष निर्विण्णे निर्विवेदानुकूल्यतः ॥२६२॥
आरोग्यान्वेषणं शिक्षाप्रार्थनां गृहवर्तिनः । सात्मवस्तुविसर्गं च नाकृत्वा तस्य पिप्रिये ॥२६३॥
अभूतां युग्यवाहस्य कुय्यनाम्नः सुतौ पुरा । यौ सिन्धुभुय्यौ तज्ज्यायान्सिन्धुर्लालितकः किल ॥२६४॥
पर्वगुप्तगृहे भूत्वा गञ्ज[1]ाध्यक्षे स्थिते[2] क्रमात् । लब्ध्वा गञ्जाधिकारित्वं तस्या राज्ञ्याः शनैरभूत् ॥२६५॥ 265
रूढ्या तयैव गञ्जेशो नवायासवि[1]धायकः । कर्मस्थानस्य निर्माता सिन्धुगञ्जाभिधस्य यः ॥२६६॥
प्रायशो हतराज्यस्ते वर्तते नरवाहनः । इति नेयधियं राज्ञीं सोऽभ्यधत्त दुराशयः ॥२६७॥
सा तथेत्यब्रवीद्यावत्तावत्प्रेम्णा स जातुचित् । मन्त्री तां प्रार्थयामास भोक्तुं निजगृहागमम् ॥२६८॥
सा सानुगां तत्र यातां ध्रुवं त्वामेव भन्त्स्यति[1] । इत्युक्ता सिन्धुनापृच्छत्तत्कर्तव्यं भयाकुला ॥२६९॥
अनुक्त्वैव प्रचलिता राजधानीमलक्षिता । स्त्रीधर्मिण्यस्मि जातेति पश्चाद्वार्तां व्यसर्जयत् ॥२७०॥ 270
संप्रवृत्तोप[1]चारायां गतायां तत्पथात्तथा[2] । राज्ञ्यां नाशममात्यस्य प्रीतिः संविद्य सा ययौ ॥२७१॥
तयोस्ततः प्रभृत्येव निष्कृष्टस्नेहयोः कृतम् । चाक्रिकैरतिरूक्षत्वं तिलपिण्याकयोरिव ॥२७२॥
कुलिशं सर्वलोहानामम्भसां शैलसेतवः । अभेद्याः प्रतिभाव्यन्ते न किंचिदसतां पुनः ॥२७३॥
ये बालादपि संमूढाः प्राज्ञाः सुरगुरोरपि । तेषां न विद्मः के[1] तावन्निर्माणपरमाणवः ॥२७४॥
विश्वासोज्झितधीः शिशून्कलयते काकोऽन्यदीयान्निजान्हंसः क्षीरपयोविभागकुशलस्त्रस्यत्यसाराद्घनात् ।
लोकावेक्षणतीक्ष्णधीः खलगिरं जानाति सत्यां नृपो धिग्वैदग्ध्यविमुग्धताव्यतिकरस्पृष्टं विधानं विधेः॥२७५॥ 275
मूढा चरणहीना सा श्रुतिबाह्यतया तया । वैधेयविप्रप्रकृतिरिव प्रायाद्विगर्ह्यताम् ॥२७६ ॥
उद्वेजितस्तया शश्वत्तथा स नरवाहनः । यथा विमाननोत्तप्तः स्वयं तत्याज जीवितम् ॥२७७॥
प्रकुप्यत्यप्रतीकार्ये स्वतेजस्तप्तचेतसाम् । शरणं मरणं त्यक्त्वा किमिवान्यद्यशोर्थिनाम् ॥२७८॥
शशिहीनेव रजनी सत्यत्यक्तेव भारती । विरराज न राजश्रीर्नरवाहनवर्जिता ॥२७९॥
सा क्रौर्याभ्यासविषमा हन्तुं विततविक्रमान् । संग्रामडामरसुतान्समीपस्थानचिन्तयत् ॥२८०॥ 280
निजमुत्तरघोषं ते तद्भयेन विनिर्गताः । कय्यकह्लारपत्यादीन्कृतारब्धीन्व्यपादयन् ॥२८१॥
उत्पिञ्जभीतया राज्ञ्या त्यक्त्वा परिभवत्रपाम् । ते यत्नात्समघद्यन्त मानः स्वार्थार्थिनां कुतः ॥२८२॥

---

२६५. [1]) $A_3$ gloss खनौ सुरागृहे गञ्जा भण्डागारे पुमानयेति कोशः.—[2]) Thus A R G; perhaps, to be emended with G *sec. manu* गञ्जाध्यक्षस्ततः क्रमात्. २६६. [1]) Thus emended according to conjectural reading (*sec. manu*) in G; A R G (*prima manu*) नवायामवि°. २६९. [1]) Emended; $A_1$ बंत्स्यति; G P बत्स्यति; R भर्त्स्यति; C वत्स्यति. २७१. [1]) $A_3$ °वृत्ताप°.—[2]) $A_3$ तन्मतात्तथा. २७४. [1]) Thus $A_3$; $A_1$ किन्ताव°.

स्थानेश्वरादिभिर्मुख्यैर्डामरैरितरैः समम् । ते भीताः पुरतस्तस्याः पुनरेत्य जजृम्भिरे ।।२८३।।
अथ तद्भीतया राज्ञ्या रक्के प्रमयमागते । आनीतः फल्गुणो भूयो वीरार्थिन्या निजान्तिकम् ।।२८४।।
285 राजकार्याणि कुर्वाणः स भूयः शस्त्रमग्रहीत् । न्यस्तशस्त्रोपि यत्सत्यं दुस्त्यजा भोगवासना ।।२८५।।
महिमा राजपुर्यादिजयिनस्तस्य पश्चिमः । अद्भुतो वृद्धबन्धकथा अवरुद्ध इवाभवत् ।।२८६।।
अभूदुदयराजस्य देवीभ्रातुरतिप्रियः । यः सहायोक्षपटले जयगुप्ताभिधः कुधीः ।।२८७।।
अन्येधिकारिणस्तेन सहिताः क्रूरवृत्तयः । कश्मीरेषु व्यधुर्लुण्ठिं दुष्कृतैस्तदुपार्जितैः ।।२८८।।
दौःशील्यभाजो मातुश्च पाप्मभिर्विधुरीकृतः । अभिमन्युः क्षणे तस्मिन्क्षयरोगेण पस्पृशे ।।२८९।।
290 पण्डितः पुण्डरीकाक्षो विद्वत्पुत्रैरुपस्कृतः । कृतश्रुतः स वैदुष्यतारुण्याभ्यां विदिद्युते ।।२९०।।
तथा विशुद्धप्रकृतेस्तस्य दुष्कृतसंगमः । शोषाधायी शिरीषस्य रविताप इवाभवत् ।।२९१।।
अर्धमानः[1] प्रजाचन्द्रस्तृतीयस्यां स कार्तिके । शुक्लेष्टचत्वारिंशाब्दे ग्रस्तो नियतिराहुणा ।।२९२।।
तत्पुत्रो नन्दिगुप्तस्तु बालश्चक्रे निजासने । वृद्धस्तनयशोकस्तु दिद्दाया हृदये पदम् ।।२९३।।
सा शोकपिहितक्रौर्या तस्थौ प्रशमशीतला । रविरश्मिशलाकेव ध्वान्तच्छन्नोष्मवैकृता ।।२९४।।
295 ततः प्रभृत्यद्भुताभिस्तस्या धर्मप्रवृत्तिभिः । कुकर्मभिरुपोढापि लक्ष्मीः प्राप्ता पवित्रताम् ।।२९५।।
नगराधिपतिर्भुय्यः सिन्धुभ्राता शुभाशयः । तदीयधर्मचर्यायां बभूव परिपोषकः ।।२९६।।
सा तेनोत्पादितानर्घजनरागा गतैनसा । ततः प्रभृत्यभूद्देवी सर्वलोकस्य संमता ।।२९७।।
राज्ञः स सचिवः सत्यं दुष्प्रापो लुप्तचण्डिमा । कुर्याद्यः सुखसेव्यत्वं हेमन्त इव भास्वतः ।।२९८।।
सा निर्मात्री विपन्नस्य सूनोः सुकृतवृद्धये । अभिमन्युस्वामिनोभूदभिमन्युपुरस्य च ।।२९९।।
300 अथ दिद्दापुरोपेतो दिद्दास्वामी तया कृतः । मठश्च मध्यदेशीयलाटगौडोत्रसंश्रयः[1] ।।३००।।
भर्तुः कङ्कणवर्षस्य पुण्योत्कर्षाभिवृद्धये । चकार कङ्कणपुरं रमणी स्वर्णवर्षिणी ।।३०१।।
श्वेतशैलमयं चान्यं सा दिद्दास्वामिनं व्यधात् । धवलं चरणोद्भूतगङ्गाम्भःप्लवनैरिव ।।३०२।।
चक्रे काश्मीरिकाणां च दैशिकानां समाश्रयः[1] । तयात्युच्चचतुःशालो विहारश्चारुसंपदा ।।३०३।।
श्रीसिंहस्वामिनं नाम्ना सिंहराजस्य सा पितुः । मठं च विदधे स्थित्यै[1] दैशिकानां द्विजन्मनाम् ।।३०४।।
305 मठप्रतिष्ठावैकुण्ठनिर्माणाद्यैः स्वकर्मभिः । तयातिपावनश्चक्रे वितस्तासिन्धुसंगमः ।।३०५।।
तेषु तेषु प्रदेशेषु किमुक्तैर्भूरिभिः शुभैः[1] । सा प्रतिष्ठा व्यरचयच्चतुःषष्टिमिति श्रुतिः ।। ३०६।।
जीर्णोद्धारकृता देव्या प्लुष्टप्राकारमण्डलाः । प्रायः सुरगृहाः सर्वे शिलावप्रावृताः कृताः ।।३०७।।
क्रीडाचङ्क्रमणे राज्ञ्याः पङ्क्वा विग्रहवाहिनी । वल्गाभिधा वैवधिकी वल्गामठमकारयत् ।।३०८।।
तीर्थासेवनमौनभागपि तिमिः सक्तः स्वकुल्याशने वाताशान्ग्रसते शिखी घनपयोमात्राशनोप्यन्वहम् ।
विश्वस्ताञ्जलचारिणः प्रकटितध्यानोपि भुङ्क्ते बकः सत्कर्माचरणेपि दोषविकृतौ[1] न प्रत्ययः पापिनाम् ।।३०९।।
310 चर्षणी[1] वर्षमात्रेण शान्तशोका बभूव सा । भोगोत्सुकार्भके तस्मिन्नप्यरि व्यभिचारकृत् ।।३१०।।

---

२९२. [1]) Thus A R G ; Edd. वर्धमानः, found also *sec. manu* in R G. $A_2$ gloss अर्धवयाः खण्डबिम्बश्च. ३००. [1]) Thus A R G. ३०३. [1]) Thus corr. by $A_3$ from $A_1$ जनाश्र°. ३०४. [1]) स्थित्यै omitted by $A_1$ and supplied in margin by $A_2$. ३०६. [1]) Thus $A_3$; $A_1$ श्रुताः. ३०९. [1]) Thus $A_1$; $A_3$ °विरतौ. ३१०. [1]) $A_2$ gloss चर्षणी असती इत्यर्थः.

वर्षे एकान्नपञ्चाशे नीतः पक्षे सिते क्षयम् । स मार्गशीर्षद्वादश्याममार्गव्ययया तया ॥३११॥

पौत्रस्त्रिभुवनो नाम मार्गशीर्षे[1] सितेहनि । पञ्चमेप्येकपञ्चाशे वर्षे तद्वत्तया हतः ॥३१२॥

अथ मृत्युपथे राज्यनाम्नि स्वैरं निवेशितः । क्रूरया चरमः पौत्रो भीमगुप्ताभिधस्तया ॥३१३॥

तस्मिन्नवसरे वृद्धः फल्गुणोपि व्यपद्यत । निगूढकौर्यदौःशील्या दिद्दा यद्गौरवादभूत् ॥३१४॥

बभूव सार्थं[1] सुस्पष्टदुष्टचेष्टाशतोत्कटा । भ्रष्टवक्त्रपटा मत्तदन्तिमूर्तिरिवोत्कटा ॥३१५॥ 315

महाभिजनजातानामपि हा धिङ्गिसर्गतः । सरितामिव नारीणां वृत्तिर्निम्नानुसारिणी ॥३१६॥

स्रोतोधिराज्यमधिगम्य विराजमानात्सिन्धोः प्रसूय कमलाल्पपयोनिकेते ।
जाते सरस्यविरतं जलजे प्रसक्ता नार्यो महाभिजनजा अपि नीचभोग्याः ॥३१७॥

खशस्य बद्दिवासा[1]ख्यपर्णोत्सग्रामजन्मनः । बाणस्य सूनुस्तुङ्गाख्योविशन्महिषपालकः ॥३१८॥

प्रविष्टो जातु कश्मीरांल्लेख[1]हारककर्मणा । सुगन्धिसीहप्रकटनागाट्टयिकषण्मुखैः ॥३१९॥

पञ्चभिर्भ्रातृभिः सार्धं सांधि[1]विग्रहिकान्तिके[2] । देव्या दृग्गोचरं यातो हृदयावर्जकोभवत् ॥३२०॥ तिलकम् ॥ 320

रहःप्रवेशितो दूत्या स भाव्यर्थबलाद्युवा । संभुक्तभूरिजाराया अपि तस्याः प्रियोभवत् ॥३२१॥

तुङ्गानुरागिणी राज्ञी पापा लज्जोज्झिता ततः । रसदानेन वैमुख्यभाजं भुट्यमघातयत् ॥३२२॥

धिङ्गिर्विचारान्कुपतीन्येषां विषमचेतसाम् । फलशून्या स्तुतिस्तोषे दोषे प्राणधनक्षयः ॥३२३॥

रक्कजो देवकलशो वेलावित्तः कृतस्तया । भुट्याधिकारे कौट्टन्यमाचरन्निस्त्रपो विटः ॥३२४॥

येपि कर्दमराजाद्या वीरा द्वारादिनायकाः । तेपि कौट्टन्यम[1]भजन्नन्येषां गणनैव का ॥३२५॥ 325

चतुष्पञ्चानि वर्षाणि तिष्ठन्नृपगृहे शिशुः । भीमगुप्तोभवद्यावत्किंचित्प्रौढीभवन्मतिः ॥३२६॥

राज्यव्यवस्था यावच्च पितामह्याश्च वृत्तयः । दुःस्थिताः प्रत्यभासन्त संस्थाप्यास्तस्य चेतसि ॥३२७॥

अङ्गशीलविहीनाया निर्घृणाया निसर्गतः । तावन्नेयधियस्तस्याः स चिन्त्यः समपद्यत ॥३२८॥

अभिमन्यु[1]वधूस्तं हि चक्रे गूढप्रवेशितम् । महाभिजनजं पुत्रं तस्मात्सोभूत्तथाविधः ॥३२९॥

सा देवकलशेनाथ दत्तमन्त्रा विशङ्किता । त्रपोज्झिता स्पष्टमेव भीमगुप्तमबन्धयत् ॥३३०॥ 330

निगूढे नन्दिगुप्तादिद्रोहे लोकस्य योभवत् । संदेहः स तया तेन व्यक्तकृत्येन वारितः ॥३३१॥

ताभिस्ताभिर्यातनाभिर्भीमगुप्तं निपात्य सा । षट्पञ्चाशेभवद्वर्षे स्वयं क्रान्तनृपासना ॥३३२॥

प्रवृद्धरागया राज्ञ्या दत्तोद्रेको दिने दिने । सर्वाधिकारी तुङ्गोथ बभूवाध[1]रिताखिलः ॥३३३॥

सभ्रातृकेन तुङ्गेन मीलिताः पूर्वमन्त्रिणः । राज्यविप्लवमाधातुमयतन्त विरागिणः ॥३३४॥

तेथ संमन्त्र्य कश्मीराननिन्युः क्रूरपौरुषम् । उग्रं विग्रहराजाख्यं दिद्दाभ्रातुः सुतं नृपम् ॥३३५॥ 335

मुख्याग्रहारान्स प्राप्तो विधातुं राज्यविप्लवम् । धीमान्प्रायोपवेशाय[1] द्रुतं प्रावेशयद्[2]द्विजान् ॥३३६॥

विहितैक्येषु विप्रेषु लोकः सर्वोपि विप्लुतः । अन्विष्यन्नन्वहं तुङ्गं तत्र तत्र जिघांसया ॥३३७॥

---

३११. [1]) Thus $A_1$; $A_3$ एकोनप°. ३१२. [1]) Thus corr. by later hand from $A_1$ मार्गशीर्ष. ३१५. [1]) बभूव सार्थ supplied by $A_3$ in space left by $A_1$. ३१८. [1]) $A_3$ gloss बोदोल ग्रामः. ३१९. [1]) ख supplied by $A_3$ in space left by $A_1$. ३२०. [1]) Corr. by $A_3$ from $A_1$ सन्धि°.—[2]) Thus $A_1$; $A_3$ °कान्तरे. ३२५. [1]) Thus corr. by $A_3$ from $A_1$ कौटिन्य°. ३२९. [1]) Thus corr. by $A_3$ from $A_1$ अभिमन्यव°. ३३३. [1]) धरि supplied by $A_3$ in space left by $A_1$. ३३६. [1]) $A_3$ gloss प्राय भोजनत्यागः.—[2]) Thus $A_1$; $A_3$ प्रायोजयद्द्वि°.

कस्मिंश्चित्पिहितद्वारे तुङ्गं प्रच्छाद्य वेश्मनि । दिनानि कतिचिद्दिद्दा तस्थावास्कन्दशङ्किनी ॥३३८॥
तया स्वर्णप्रदानेन सुमनोमन्तकादयः । ब्राह्मणाः समगृह्यन्त ततः प्रायो न्यवर्तत ॥३३९॥
340 एवं तस्मिन्महाक्षेपे तया दानेन वारिते । ययौ विग्रहराजः स भग्नशक्तिर्यथागतम् ॥३४०॥
अथ दार्ढ्यं समासाद्य तुङ्गाद्याः प्रभविष्णवः । शनैः कर्दमराजादीञ्जग्मुर्विहितविप्लवान् ॥३४१॥
सुलक्कनो रक्कसूनुस्तथान्ये मुख्यमन्त्रिणः । रुष्टैर्निर्वासिता देशात्तुष्टैस्तैः संप्रवेशिताः ॥३४२॥
प्रवर्धमानवैरेण गूढदूतैर्विसर्जितैः । प्रायं विग्रहराजेन ब्राह्मणाः कारिताः पुनः ॥३४३॥
उत्कोचादित्सया विप्रा भूयः प्रायविधायिनः । लब्धस्थैर्येण तुङ्गेन संनिपत्यापहस्तिताः ॥३४४॥
345 तेषां मध्ये वसन्गूढमादित्याख्यः पलायितः । हतो विग्रहराजस्य प्रियः कटकवारिकः ॥३४५॥
शस्त्रक्षतः प्रतीहारो वत्सराजाभिधः पुनः । न्यङ्कोतकादिभिर्धीवञ्जीवग्राहमगृह्यत ॥३४६॥
ते स्वर्णग्राहिणो विप्राः सुमनोमन्तकादयः । सर्वेपि बद्धास्तुङ्गेन कारागारं प्रवेशिताः ॥३४७॥
अथ फल्गुणनाशेन दृप्ते राजपुरीपतौ । तां प्रत्यारब्धिरभवत्क्रुध्यतां सर्वमन्त्रिणाम् ॥३४८॥
निपत्य संकटे वीरः पृथ्वीपालाभिधस्ततः । चक्रे राजपुरीराजः काश्मीरिकाबलक्षयम् ॥३४९॥
350 शिपाटको हंसराजो विपन्नौ तत्र मन्त्रिणौ । चन्द्राद्यैर्दुर्गतिर्दृष्टा[1] मरणं यत्र भैषजम्[2] ॥३५०॥
अथान्येन पथाकस्मात्तुङ्गः सार्धं सहोदरैः । कृत्स्नां राजपुरीं वीरः प्रविश्य सहसादहत् ॥३५१॥
ननाश तेनोपायेन पृथ्वीपालः स पार्थिवः । शेषाणां मन्त्रिणां सैन्यं प्राप मुक्तिं च संकटात् ॥३५२॥
अबलः सन्स भूपालस्तुङ्गाय प्रददौ करम् । एवं कृतं तदा तेन नष्टस्या[1]र्थस्य योजनम् ॥३५३॥
प्रविशन्नगरं तुङ्गस्ततः स्वीकृतकम्पनः । चकार डामरग्रामसंहारं सिंहविक्रमः ॥३५४॥
355 दिद्दाप्युदयराजस्य भ्रातुः पुत्रं परीक्षितम् । चक्रे संग्रामराजाख्यं युवराजमशङ्किता ॥३५५॥
सा हि सर्वाञ्शिशुप्रायान्पुरो भ्रातृसुतान्स्थितान् । परीक्षितुं मुमोचाग्रे पालेवतफलावलिम् ॥३५६॥
शक्तः कियन्ति कः प्राप्तुं फलान्यत्रेतिवादिनी । साभवद्राजपुत्राणां तेषां कलहकारणम् ॥३५७॥
गृहीताल्पफलांश्चप्रहारांस्तान्ददर्श च । संग्रामराजं[1] त्वस्वल्पफलभाजमविक्षतम् ॥३५८॥
अनन्तफलसंप्राप्तावक्षतत्वे च कारणम् । सविस्मयं तया पृष्टः स तामेवं तदाब्रवीत् ॥३५९॥
360 अन्योन्यकलहव्यग्रानेतान्कृत्वा पृथग्वसन् । समवापं फलान्यस्मिन्न चाभूवं परिक्षतः ॥३६०॥
व्यसनं संप्रवेश्या[1]न्यान्स्थितानामप्रमादिनाम् । न काः क्लेशविहीनानां[2] घटन्ते स्वार्थसिद्धयः ॥३६१॥
श्रुत्वेति तस्य सा वाचमप्रमत्तत्वदूतिकाम् । भीरुर्नारीस्वभावेन राज्येमन्यत योग्यताम् ॥३६२॥
शूरस्य लभ्यं शौर्येण भीरोर्भीरुतया यथा । कार्यं हि प्रतिभात्यन्तर्न भवेच्च तदन्यथा ॥३६३॥
काष्ठं वह्न्युज्झितमपि भवेच्छीतशान्त्यै कपीनां लोघ्रं शुद्ध्यै सलिलमनलश्चाग्नि[1]शौचैणकानाम् ।
जन्तोर्भावा विदधति यथा भाविनः[2] कार्यसिद्धिं तत्त्वं तेषां क्वचन सहजं वस्तुतो नास्ति किंचित् ॥३६४॥

---

३५०. 1) Thus $A_3$; $A_1$ °दुर्गतिं दृष्ट्वा.—2) Thus corr. by later hand from $A_1$ भैष°. ३५३. 1) नष्टस्या supplied by $A_3$ in space left by $A_1$. ३५८. 1) राजं omitted by $A_1$ and supplied by $A_3$. ३६१. 1) Thus corr. by $A_3$; $A_1$ व्यसनें संप्रविश्या°.—2) Thus corr. by $A_3$ from $A_1$ °विहीनां. ३६४. 1) $A_3$ gloss अग्निशौचा मृगा अग्निमश्नन्ति विषभूषकाः विषं च न विपद्यन्ते जीविता - - - - -. 2) $A_3$ यथाभावनं.

तस्यामेकान्नशीत्यब्दशुक्लभाद्राष्टमीदिने । देव्यां दिवं प्रयातायां युवराजोभवन्नृपः ॥३६५॥ 365

स्त्रीसंबन्धेन भूपालवंश्यानां भुवनाद्भुतः । तृतीयः परिवर्तोयं वर्ततेमुत्र मण्डले ॥३६६॥

निर्नष्ट[1]कण्टककुले वसुसंपदाढ्ये श्रीसात[2]वाहकुलमाप महीतलेस्मिन् ।
दावाग्निदग्धकुतरौ जलदाम्बुसिक्ते चूतप्ररोह इव केलिवने प्रवृद्धि[3]म् ॥३६७॥

अथ स मृदुतयान्तर्गूढधैर्यानुभावः सुखमवनिमशेषां दोष्णि संग्रामराजः ।
बिसकुलनिभशोभानिह्नुतप्राणसारः फणकुलं[1] उरगाणामीशितेव न्यधत्त ॥३६८॥

इति श्रीकाश्मीरिकमहामात्यचण्पकप्रभुसूनोः कल्हणस्य कृतौ राजतरङ्गिण्यां षष्ठस्तरङ्गः[2] ॥
अत्र वर्षचतुःषष्टौ मासेष्वर्धे दिनेषु च । अष्टस्वभूवन्भूपाला दश भूभोगभोगि[3]नः ॥

---

३६६. [1]) Thus corr. by later hand from $A_1$ °वंशा°. ३६७. [1]) Thus corr. by $A_3$ from $A_1$ निष्पन्नक°.—[2]) Thus corr. by $A_2$ from $A_1$ सालवा°; R G as above.—[3]) $A_3$ प्ररूढिम्. ३६८. [1]) Thus corr. by $A_3$ from $A_1$ फलकुल. *Colophon.* [1]) $A_3$ inserts here the note: रा० ६० ग्रं ३६९ ॥ आदितः रा० ९१ ग्रन्थः २६६३ ॥. —[2]) $A_1$ adds here: लिखितश्चैष राजानकरत्नकण्ठेन.—[3]) $A_3$ भागिनः.

## ॥ सप्तमस्तरङ्गः ॥

मातुस्तेजनि निर्मले[1] पितृकुले श्लाघ्या तनुर्वेधसा त्वं संध्याहितसंनिधिर्मम जपारक्तेधरे खेलसि ।
संध्यावन्दनसाभ्यसूयगिरिजास्तुत्येदृशैर्वाक्छलैर्यः संध्यामपि वन्दते स्म स जगत्प्रीणातु गौरीश्वरः ॥१॥
क्षमां[1] क्षमापतिर्बिभ्रन्मनसा च भुजेन च । गाम्भीर्येण च शक्त्या च सोजयद्वाहिनीपतीन्[2] ॥२॥
जज्ञे राज्ञीक्षये भङ्गो यैस्तुङ्गस्य तदाखिलैः । दिनश्रीविगमे संध्याप्रसङ्गस्येव रागिणः ॥३॥
तत्तत्प्रतिभटाटोपत्रोटनात्प्रत्युतास्य तैः । उदयो ददृशे शश्वद्गतिं को वेत्ति वेधसः ॥४॥ युग्मम् ॥
5 नृपेण जातज्ञातेयः शूरः शक्तिसमन्वितः । सर्वाधिकारयोग्योगा[1]त्तदा चन्द्राकरः क्षयम् ॥५॥
अन्ये भीमतिकाग्रामदिविरस्योरुसंपदः । पुण्याकरस्य तनयाः शूराः शान्तिं प्रपेदिरे ॥६॥
समर्थमन्त्रिविरहादनिच्छन्नपि वेधसा । निन्ये गत्यन्तरत्यक्तस्तुङ्गपक्षं क्षमापतिः ॥७॥
संग्रामराजतुङ्गादीन्देवी कोशमपाययत्[1] । मुमूर्षन्ती पुरा स्थातुमद्रोहेणेतरेतरम् ॥८॥
क्लेशासहो महीपालस्ततः कार्यवशादपि । तुङ्गन्यस्तप्रजाकार्यो भोगाभ्यसालसोभवत् ॥९॥
10 पर्याप्तं तस्य भीरुत्वं कियदन्यत्प्रकाश्यताम् । असमैर्यौनसंबन्धैश्चक्षमे यशसः क्षतिम् ॥१०॥
साहायकार्थी यत्प्रादाच्छ्रीशौर्यादिमते सुताम् । दिङ्गामठाधिपतये प्रेमनाम्ने स लोठिकाम् ॥११॥
क्व लोकोद्दहनोन्नद्धभूभृद्योग्या नृपात्मजा । प्रतिग्रहजलक्लिन्नपाणिः क्वाल्पमना द्विजः ॥१२॥
अथ तुङ्गादिभङ्गाय प्रायं ब्राह्मणमन्त्रिणः । परिहासपुरे विप्रापरिषद्यानकारयन् ॥१३॥
विप्रमन्त्रिमतैक्येन कृतो राज्ञः स विप्लवः । दुःसहः पवमानाग्निसमागमसमोभवत् ॥१४॥
15 राज्ञोप्युत्पाटने सज्जैः कथंचित्प्रार्थितै[1]र्द्विजैः । मतिः क्षान्तिचरुप्राये[2] तुङ्गनिःसारणे कृता ॥१५॥
राज्ञा[1] तुङ्गादिभिश्चैतै[2]र्यावत्तेभ्यः प्रतिश्रुतम् । अन्यत्प्रार्थयितुं लग्नास्तावत्ते शठबुद्धयः ॥१६॥
तुङ्गास्कन्देन विप्रोयं[1] यो मृतस्तद्गृहे[2] वयम् । तं निर्दहाम इत्युक्त्वा शवः कोप्यरघट्टतः ॥१७॥
तैरुद्धृत्य यदानीतः शठैस्तुङ्गगृहान्प्रति । केशहोमाच्च विहिताद्या कृत्योत्थापिताभवत् ॥१८॥
तया प्रतीपपातिन्या निःशौचानां द्विजन्मनाम् । अकस्मान्निरगाच्छस्त्रं विनाशायोत्थिते कलौ ॥१९॥ तिलकम् ॥
20 ततः पलायिता विप्रा यस्तेषां मन्त्रदोभवत् । निगूढं राजकलशस्तद्वेश्म प्राविशन्भयात् ॥२०॥
स व्यक्तीभूतकौटिल्यः संग्रामं सुचिरं व्यधात् । अपद्वारैस्तु ते विप्राः पलाय्य स्वगृहान्ययुः ॥२१॥

---

१. [1]) $A_3$ निर्मिते. २. [1]) $A_3$ gloss भुवं क्षान्तिं च.—[2]) $A_3$ gloss सेनापतीन् समुद्रांश्च. ५. [1]) गा supplied by $A_2$. ८. [1]) $A_3$ gloss कोशं । दिव्यं । अपाययत् अकारयत् । पीतकोशान् कृतवती इत्यर्थः. १५. [1]) Thus corr. by $A_3$ from $A_1$ प्रार्थितो.—[2]) $A_3$ °प्रायैस्तु°. १६. [1]) Thus corr. by $A_3$ from $A_1$ राज्ञस्तु°.—[2]) $A_3$ gloss निःसारणं. १७. [1]) यं supplied by $A_3$.—[2]) $A_4$ gloss तुङ्गगृहे.

विजिते राजकलशे समकार्या द्विजातयः । मन्त्रिणः श्रीधरसुताः सप्तागत्य व्यधुर्मृधम् ॥२२॥
ते कृत्वा सुमहत्कर्म समाप्तिं समरे गताः । निर्भिद्य मण्डलं सप्त सप्तसप्तेर्द्रुतं ययुः ॥२३॥
जितः सुगन्धिसीहेन[1] तेषु शान्तेषु संयुगे । बद्ध्वाथ राजकलशस्तुङ्गेनानायितो गृहम् ॥२४॥
नीयमानोधिरोप्याशु स्कन्दं मार्गेषु विक्षतः । तुङ्गस्य युग्यवाहैः स नर्तितोपहतायुधः ॥२५॥ 25
अन्योपि भूतिकलशो नाम मन्त्री विनिर्जितः । सुतेन राजकाख्येन सह शूरमठं ययौ ॥२६॥
क्रमात्सुगन्धिसीहाद्यैर्मुक्तः करुणया ततः । सपुत्रः सोवमानाभितप्तो देशान्तरं ययौ ॥२७॥
परिहासपुरादेवं जातो यो देशविप्लवः । स दैवयोगात्तुङ्गस्य शुभाय प्रत्युताभवत् ॥२८॥
ततः प्रसादिते राज्ञि गुणदेवेन मन्त्रिणा । आययौ भूतिकलशः कृतगङ्गानिमज्जनः ॥२९॥
पुनर्नृपगृहे तस्मिन्किंचिल्लब्धपदे शनैः । तुङ्गं निहन्तुं राज्ञैनं गूढं दूताः प्रयोजिताः ॥३०॥ 30
ज्ञातवार्तेन तुङ्गेन तस्मिन्नर्थे प्रकाशिते । सपुत्रो भूतिकलशो राज्ञा निर्वासितः पुनः ॥३१॥
अवष्टम्भं मनाग्लेभे चन्द्राकरसुतः शनैः । यो मध्यामन्तकः सोपि तस्मिन्काले व्यपद्यत ॥३२॥
भूत्वा किंचित्क्षणं भूभृत्कन्यासंभोगभाजनम् । राजोपकारकृच्छ्रीमान्प्रेमापि प्रमयं ययौ ॥३३॥
त्रिपेदिरेन्ये गङ्गायाः सर्वेपि नृपतिप्रियाः । अवाशिष्यत भोगाय तुङ्गः सभ्रातृकः परम् ॥३४॥
इति यो यो हि वृत्तान्तस्तस्य नाशाय शङ्कितः । स स दैवानुकूल्येन प्रत्युतोद्रेचको[1]भवत् ॥३५॥ 35
कालक्रमत्रुटितसंश्रयभूः स्वमूलमात्राश्रयी तटतरुः सरितोम्बुपूरैः ।
यैः शङ्क्यते निपततीति वितीर्णमृद्भिस्तैरेव तस्य हि भवेत्स्थितिभूमिदार्ढ्यम् ॥३६॥
नीत्युज्ज्वलं व्यवहरन्प्रजाराधनतत्परः । प्राक्पुण्यसंक्षयात्तुङ्गः शनैस्त्वासीत्स्खलन्मतिः[1] ॥३७॥
यत्स्वभाग्यापहाराय हीनजन्मानमाददे । साहायकाय कायस्थं क्षुद्रं भद्रेश्वराभिधम् ॥३८॥
विड्[1]वाणिज्यं सौनिकत्वं काष्ठविक्रयितादि[2] च । आरामिकस्य यस्यासीत्कृत्यं वंशक्रमोचितम् ॥३९॥
कम्बलोद्घृष्टपृष्ठोथ भोजनार्थमवालगत्[1] । भस्त्रामषीभाण्डवाही यश्च पश्चान्नियोगिनाम् ॥४०॥ 40
अनन्तराजकार्यादिचिन्ताश्रान्तो विधाय तम् । तुङ्गः सहायं नाबुद्ध संसर्गाद्भाग्यसंक्षयम् ॥४१॥
धार्मिकं तेन धर्मार्कं विनिवार्यार्यचेतसम् । गृहकृत्याधिकारे[1] स दुष्कृती विनिवेशितः ॥४२॥
देवगोब्राह्मणानाथातिथिराजोपजीविनाम् । अकालमृत्युर्विदधे वृत्तिच्छेदं स दुर्मतिः ॥४३॥
शवाजीवोपि पुष्णाति क्रूरः कापालिको निजान् । भद्रेश्वरस्तु पापोभून्निजानामपि जीवहृत् ॥४४॥
तुङ्गेन चैत्रे सर्वत्र कृते भद्रेश्वरे प्रभौ । सुगन्धिसीहः प्रययावाषाढे मासि संक्षयम् ॥४५॥ 45
परलोकं गते तस्मिन्सर्वभारसहेनुजे । तुङ्गश्छिन्नोत्तमाङ्गत्वं सदैन्योमन्यतात्मनः ॥४६॥
श्रीत्रिलोचनपालस्य शाहेः साहायकार्थिनः[1] । देशं ततो मार्गशीर्षे मासि तं[2] व्यसृजन्नृपः ॥४७॥
राजपुत्रमहामात्यसामन्तादिनिरन्तरम् । सैन्यं तमन्वगाद्भूरि भुवनक्षोभनक्षमम् ॥४८॥

---

२४. [1]) $A_4$ gloss तुङ्गानुजेन. ३५. [1]) $A_3$ gloss वृद्धिकरः. ३७. [1]) Thus emended with C; A R G °सीद्खल°. ३९. [1]) $A_2$ gloss गोमयविक्रयित्वं.—[2]) Thus corr. by $A_3$ from $A_1$ °क्रयिकादि. ४०. [1]) The first half of this verse has been omitted by $A_1$ and supplied by $A_3$ in margin. ४२. [1]) Thus corr. by $A_3$ from $A_1$ °कारी. ४७. [1]) $A_4$ gloss तुरुष्कसमरे.—[2]) $A_4$ gloss तुङ्गं.

अग्रागतेन सस्तुत[1]ः शाहिना कृतसत्क्रियः । पञ्चषाणि दिनान्यासीत्तद्देशे स यदोन्मदः ॥४९॥

50 प्रजागरचरन्यासशस्त्राभ्यासादिवासनाः । अभियोगोचिताः शाहि[1]रपश्यंस्तं[2] तदाब्रवीत् ॥५०॥ युग्मम् ॥

तुरुष्कसमरे यावन्न यूयं कृतबुद्धयः । आलस्यविवशास्तावत्तिष्ठतास्मिन्गिरेस्तटे ॥५१॥

एवं त्रिलोचनेनोक्तं[1] सोग्रहीन्न हितं वचः । तस्थौ परं समं सैन्यैरुत्सेकादाहवोत्सुकः ॥५२॥

हम्मीरेण[1] तदा सैन्यं जिज्ञासार्थं विसर्जितम् । तौषीपारे[2] मितप्रायैस्ततस्तीर्त्वावधीद्बलैः ॥५३॥

ततस्त[1]माहितोत्सेकमपि शाहिः पुनः पुनः । जगादाहवतत्त्वज्ञः पूर्वोक्तामेव संविदम् ॥५४॥

55 स तस्य नाग्रहीद्वाक्यं रणौत्सुक्यवशंवदः । प्रत्यासन्नविनाशानामुपदेशो निरर्थकः ॥५५॥

प्रातस्ततः स्वयं कोपात्तुरुष्कानीकनायकः । सर्वाभिसारेणाग[1]च्छच्छलाहवविशारदः ॥५६॥

अथ तुङ्गस्य कटकः सहसा भङ्गमाययौ । शाहिसैन्यं परं संख्ये ददृशे विचरत्क्षणम् ॥५७॥

शाहिसैन्ये गतेप्यासीज्जयसिंहः स्फुरन्रणे । श्रीवर्धनश्च सांग्रामि[1]र्विभ्रमार्कश्च डामरः ॥५८॥

घोरे तुरंगतुमुले प्रहरद्भिस्त्रिभिर्भटैः । वीरक्षेत्रे निजे देशे रक्षितस्तैर्यशःक्षयः ॥५९॥

60 कस्त्रिलोचनपालस्य माहात्म्यं वक्तुमीश्वरः । निःसंख्या अपि यं संख्ये न जेतुमशकन्द्विषः ॥६०॥

शुशुभे रुधिरासारवर्षी युद्धे त्रिलोचनः । कल्पान्तदहनज्योतिर्विसारीव त्रिलोचनः ॥६१॥

स योधयित्वा संग्रामे कोटीः कङ्कटवाहिनाम् । एकाकी कार्यमर्मज्ञो निर्ययौ रिपुसंकटात् ॥६२॥

गते त्रिलोचने दूरमशेषं क्षिति[1]मण्डलम् । प्रचण्डचण्डालचमूशलभच्छायमानशे ॥६३॥

संप्राप्तविजयोप्यासीन्न हम्मीरः समुच्छ्वसन् । श्रीत्रिलोचनपालस्य स्मरञ्शौर्यममानुषम् ॥६४॥

65 त्रिलोचनोपि संश्रित्य हास्तिकं स्वपदाच्च्युतः । सयत्नोभून्महोत्साहः प्रत्याहर्तुं जयश्रियम् ॥६५॥

यथा नामापि निर्नष्टं शीघ्रं शाहिश्रियस्तथा । इह प्रासङ्गिकत्वेन वर्णितं न सविस्तरम् ॥६६॥

स्वप्नेपि यदसंभाव्यं यत्र भग्ना मनोरथाः । हेलया तद्विदधतो नासाध्यं विद्यते विधेः ॥६७॥

ईषद्यद्भूमिवैपुल्यं[1] राज्ञः शंकरवर्मणः । वृत्तान्तवर्णने पूर्वममुत्र प्रकटीकृतम् ॥६८॥

स शाहिदेशः सामात्यः सभूभृत्सपरिच्छदः । किमभूत्किमु वा नाभूदिति संचिन्त्यतेधुना ॥६९॥

70 अवतारं तुरुष्काणां दत्त्वाशेषे महीतले । प्राप्तभङ्गस्ततस्तुङ्गः स्वदेशं प्राविशच्छनैः ॥७०॥

सृगालायेव तुङ्गाय लब्धभङ्गाय भूपतिः । न तत्रागसि चुक्रोध स धैर्यसदृशाशयः ॥७१॥

किं तु खेदाय समभूत्तुङ्गायत्तत्वमीशितुः । परायत्ततया चित्तं पशो[1]र्व्युपतप्यते ॥७२॥

तुङ्गात्मजोपि कन्दर्पसिंहः श्रीशौर्यगर्वितः । राजो[1]चितं व्यवहरंस्तस्योद्वेगप्रदोभवत् ॥७३॥

गूढलेखैः क्षणे तस्मिंश्छिद्रान्वेषी स भूभुजम्[1] । भ्राता विग्रहराजोपि प्रैरयत्तुङ्गमारणे ॥७४॥

75 कोशादिस्मरणा[1]द्राजा चिरं दोलायमानधीः । अभीक्ष्णप्रेरणोद्विग्नः प्रेरकानब्रवीत्ततः ॥७५॥

---

४९. [1]) Thus $A_3$; $A_1$ स तथा. ५०. [1]) र supplied by $A_3$ in space left by $A_1$.—[2]) Thus corr. by $A_3$ from $A_1$ ° पश्यत्तं. ५२. [1]) Thus corr. by $A_3$ from $A_1$ °नोक्ताः. ५३. [1]) Thus $A_1$; altered by later hand to हम्मी°; G as above.—[2]) Thus corr. by $A_2$ from $A_1$ °प्राय; $A_3$ gloss तौषी नाम नदी. ५४. [1]) स्त supplied by $A_3$. ५६. [1]) Thus $A_3$; $A_1$ °रेणोद्गच्छ°. ५८. [1]) Thus $A_3$, with gloss सङ्ग्रामस्यापत्यं साङ्ग्रामिः; $A_1$ सङ्ग्रामे. ६३. [1]) Thus $A_3$; $A_1$ रिपुम°. ६८. [1]) $A_3$ gloss यस्य देशस्य भूमेः वैपुल्यं. ७२. [1]) पशोर supplied by $A_3$ in space left by $A_1$. ७३. [1]) Emended; A राज्ञो°. ७४. [1]) Thus $A_1$; altered by later hand to भूभुजाम् which is found also in G R. ७५. [1]) $A_3$ gloss वयं देव्या पीतकोशाः कृता इति स्मरणात्.

एकाक्येव सपुत्रः स गोचरो नः कदाचन । पतेद्यदि क्षणे तस्मिन्पश्यामः किं विदध्महे ॥७६॥
अन्यथा ध्रुवमा[1]क्षिप्तो हन्यादस्मानसौ बलात् । इति कालापहारार्थमुक्त्वाभूद्विरतो नृपः ॥७७॥
तावन्मात्रं वचो बीजभूतं हृदि निधाय ते । विधातुं तदवस्थत्वं तुङ्गस्यासन्कृतोद्यमाः ॥७८॥
षण्मासाभ्यन्तरे तुङ्गो भूपेनाकारितो गृहात्[1] । ससुतो निर्ययौ दृष्टदुःस्वप्नोऽपि विधेर्वशात् ॥७९॥
स प्रविश्य नृपास्थानं स्थित्वा राज्ञोऽग्रतः क्षणम् । पञ्चषैः सहितो भृत्यैः प्राविशन्मन्त्रमण्डपम् ॥८०॥ 80
पश्चात्प्रविष्टास्तत्रैनं पर्वशार्करकादयः । अनुक्त्वापि महीपालं तुङ्गं शस्त्रैरपातयन् ॥८१॥
मन्त्री महारथो नाम योऽभूच्छंकरवर्मणः । तद्वंश्यस्तुङ्गभृत्येषु श्लाघ्यः सिंहरथः परम् ॥८२॥
निःशस्त्रो यः क्षणे तस्मिन्परित्राणविधित्सया । हन्यमानस्य तुङ्गस्य पृष्ठे स्वं वपुरक्षिपत् ॥८३॥
तुङ्गस्य प्रथमाघाते रुद्धैः[1] श्वासोऽभवद्भयात् । राजा तस्मिन्निरुच्छ्वासे सोच्छ्वासः समपद्यत ॥८४॥
आस्थानब्राह्मणस्यासीद्धर्मनाम्नः सुतोऽन्तिके । यः पापकारी तुङ्गस्य पार्थः कङ्कश्च दुर्मतिः ॥८५॥ 85
ताभ्यामाशुविवेकिभ्यां त्राणार्थं स्वाङ्गुलीर्मुखे । क्षिपद्भ्यां पशुवत्तत्र शस्त्रं त्रासवशाज्जहे ॥८६॥
अन्तरङ्गाश्च[1] चङ्गाद्या येऽभूवंस्तुङ्गमन्त्रिणः । तैः स्त्रीवदासितं तूष्णीं त्रस्तैः शस्त्रान्वितैरपि ॥८७॥
अज्ञाततुङ्गमृत्युभ्यस्तुमुले तत्र भूपतिः । तद्भृत्येभ्यः शङ्कमानो वह्निदानाहवादिकम् ॥८८॥
आश्वासाय स्वभृत्यानां छित्त्वा खड्गेन सत्वरम् । पातयामास तुङ्गस्य ससुतस्य शिरो बहिः ॥८९॥
दृष्ट्वा स्वामिशिरश्छिन्नं सैन्ये दैन्यात्पलायिते । भृत्यतामुज्ज्वलीचक्रुः कतिचित्तुङ्गसेवकाः ॥९०॥ 90
भुजंगनामा सामन्तद्विजापत्यो गृहागतः । संग्रामराजं विदधे गेहाद्गेहं पलायितम् ॥९१॥
द्वारं कनकदण्डेन भञ्जन्नर्गलितं ततः[1] । विंशतिं हतवान्योधान्स राजास्थानमण्डपे ॥९२॥
कोशाधिकारी त्रैलोक्यराजनामा हतो रणे । कय्यामन्तकधात्रेयो वीरोऽप्यभिनवाभिधः ॥९३॥
अङ्गने त्रिंशदेकाङ्गा वीरास्तुङ्गोपजीविनः । श्रेणीं बबन्धुर्निहता निःश्रेणीं स्वर्गपद्धतेः ॥९४॥
संग्रामं पद्मराजाख्यः कृत्वापि[1] निःसृ[2]तोऽक्षतः । स्वामिप्रमयदुःखाग्नितापं तीर्थाश्रयाज्जहौ ॥९५॥ 95
अन्ये लोकद्वयत्राणमित्रं शस्त्रं रणाङ्गने । संत्यजन्तो व्ययुज्यन्त यशसा जीवितेन च ॥९६॥
चन्दाख्यः सुभटंमन्यो दैशिकश्चार्जुनाभिधः । हेलाचक्रो डामरश्च त्यक्तशस्त्राः परैर्हताः ॥९७॥
लोठितावसथस्तुङ्गो लुण्ठितश्रीर्महीभुजा । आषाढशुक्लद्वादश्यां कथाशेषो व्यधीयत ॥९८॥
निर्द्रोहवृत्तौ भूभर्त्रा तुङ्गे सतनये हते । लब्धोदया व्यजृम्भन्त खलप्राया नृपास्पदे ॥९९॥
राज्ञो मनः कलुषयन्गूढपैशुनकर्मणा । यो भ्रातृभ्रातृ[1]सुतयोर्विपत्तौ हेतुतां गतः ॥१००॥ 100
स दुष्प्रवादनिर्दग्धो नागो निजकुलान्तकः । तुङ्गभ्राता ततो राज्ञा कम्पनाधिपतिः कृतः ॥१०१॥ युगलकम्॥
भार्या कन्दर्पसिंहस्य क्षेमा परमचर्षणी[1] । नागेन संगमं चक्रे रक्षसेवासितक्षपा[2] ॥१०२॥
प्रशान्ते तुमुले बिम्बा चतुर्भिर्दिवसैः सती । तुङ्गस्नुषा सुता शाहेः प्रविवेश हुताशनम् ॥१०३॥

---

७७. [1]) Thus corr. by $A_3$ from $A_1$ ह्ययमा°. ७९. [1]) Thus corr. by $A_3$ from $A_1$ गृहान्. ८४. [1]) Emended; A R G रुद्धश्वासो°. ८७. [1]) च supplied by $A_3$ in space left by $A_1$. ९२. [1]) Thus corr. by $A_3$ from $A_1$ रञ्जन्तेर्गलितं हतः. ९५. [1]) Thus corr. by $A_3$ from $A_1$ °ख्य कृत्वा.—[2]) $A_1$ निस्सृतो; $A_3$ निसृतो. १००. [1]) Thus corr. by $A_3$ from $A_1$ भ्रातृपुत्रसुत°. १०२. [1]) Emended; A °चर्षिणी.—[2]) $A_3$ gloss रक्षो हि रात्रौ चरति.

मम्मायामवरुद्धायां कन्दर्पो[1] यावजीजनत् । पुत्रं विचित्रसिंहं च मातृसिंहं च विश्रुतौ ॥१०४॥

105 गृहीत्वा तौ स्नुषां तां च मङ्ख्ना तुङ्गवल्लभा । देशाद्विनिर्गता दीना राजपुर्यां स्थितिं व्यधात् ॥१०५॥ युग्मम्[1]॥

तुङ्गस्थाने ततो राज्ञा पापो भद्रेश्वरः कृतः । भूतेश्वरादिदेवानां चक्रे कोशादिलुण्ठनम् ॥१०६॥

कियद्विवेकवैकल्यमस्य राज्ञः प्रकाश्यताम् । तादृशानपि यश्चक्रे पार्थादीनधिकारिणः ॥१०७॥

पार्थः परमदुर्मेधाः ख्यातो भ्रातृकलत्रगः । निर्विचारेण यत्तेन नगराधिकृतः कृतः ॥१०८॥

वधादिपापं पार्थेन सुकृतत्यक्तचेतसा । पवित्रे प्रवरेशस्य रङ्गपीठे प्रवर्तितम् ॥१०९॥

110 चक्रे लुब्धस्य भूभर्तुर्मतङ्गः[1] कृपणाग्रणीः । सिंधोः सुतः कोशवृद्धिं प्रजापीडनपण्डितः ॥११०॥

पुरा देवमुखाख्यस्य दिविरस्य किलाजनि । आपूपिकायां वेश्यायां पुत्रश्चन्द्रमुखाभिधः ॥१११॥

यस्तुङ्गोपाश्रयाल्लब्ध्वा लालितत्वं महीपतेः । वराटकात्प्रभृत्यासीत्कोटीनां कृतसंचयः ॥११२॥

विभूतिमध्ये लुब्धस्य प्राभृतायान्यढौकितैः[1] । अपूपैर्निजभृत्येषु विक्रयोभूत्कुलोचितः ॥११३॥

प्रभूताग्निररोगश्च भूत्वा लब्धोदयः पुनः । यो मन्दाग्निः सरोगश्च तिष्ठंल्लोकैर्व्यहस्यत ॥११४॥

115 एकमेवाभवद्यस्य सुकृतं मरणक्षणे । कोटेस्त्रिभागं यददाच्छ्रीरणेश्वरयोजने ॥११५॥

तदात्मजाः कृता नानभागनन्दिमुखास्त्रयः । अधीशाः पृतनाङ्गस्य राज्ञा तुङ्गोपजीविनः ॥११६॥

हास्यं बभूव भूभर्तुस्तेषां तुङ्गपदार्पणम्[1] । बन्धनं यवकाण्डीनां हेमस्थाने शिशोरिव ॥११७॥

ते तुरुष्काहवे राज्ञा तुङ्गवत्प्रहिताः पुनः । प्रत्यावृत्य ययुर्देशं निजमेव पलायिताः ॥११८॥

इत्थं मन्त्रिष्वयोग्येषु क्षान्तिशीले च भूपतौ । केचिदुद्रेकमभजन्दरद्दिविरडामराः ॥११९॥

120 सा लोठिकामठं कृत्वा लोठिका नृपतेः सुता । तिलोत्तमाया विदधे मातुर्नाम्नापरं मठम् ॥१२०॥

पापिनामपि हन्तेयं कापि सत्कर्मवासना । भद्रेश्वरोपि यच्चक्रे विहारं सुकृतोज्ज्वलम् ॥१२१॥

सत्यं विवेक्ता संग्रामराजो योन्याय्यतोर्जितम् । निजं ब्रुवाणो द्रविणं प्रपामपि न निर्ममे ॥१२२॥

श्रीलेखा पार्थिववधूः श्रीयशोमङ्गलात्मजा । पत्यौ शिथिलसामर्थ्ये स्वैरिणीत्वमसेवत ॥१२३॥

सुतः सुगन्धिसीहस्य जयलक्ष्म्यां[1] बभूव यः । वल्लभो निर्भरं देव्याः सोस्यास्त्रिभुवनोभवत् ॥१२४॥

125 स जयाकरग[1]ञ्जादिगञ्जस्रष्टातितीक्ष्णधीः । कोशोपकारकृत्तस्या जारोप्यासीज्जयाकरः ॥१२५॥

मयग्रामीण[1]गञ्जादिकर्त्री संचयतत्परा । साभूद्भर्तुः प्रसादेन सुभगा भूरिवैभवा ॥१२६॥

स चतुर्थसमाषाढप्रारम्भाहे महीपतिः । हरिराजाभिधं पुत्रमभिषिच्यास्तमाययौ ॥१२७॥

सुमनः[1]सेवितः कुर्वन्नशेषाशा[2]प्रकाशनम् । ह्लादा[3]वहः स सर्वस्य चैत्रोत्सव इवाभवत् ॥१२८॥

अमोघाज्ञेन तेनेमां निश्चौरां कुर्वता महीम् । पण्यवीथ्यां[1] निशीथिन्यां[2] निषिद्धा द्वारसंवृतिः ॥१२९॥

130 अचिरस्थायिनी राज्ञस्तस्याज्ञाचिन्तितोन्नतिः[1] । वन्ध्या नवेन्दुलेखेव पार्थिवानामजायत ॥१३०॥

---

१०४. 1) $A_3$ gloss कन्दर्पसिंहः. १०५. 1) युग्मम्. added by $A_3$. ११०. 1) Emended with G C; A R भूभर्तुः सतङ्गः. ११३. 1) $A_3$ gloss कोशलिकार्थं. ११७. 1) Thus $A_1$; $A_3$ °पदर्पणम्. १२४. 1) Thus corr. by $A_3$ from $A_1$ °लक्ष्मीं. १२५-१२६. 1) The words from गञ्जादिगञ्जस्रष्टा° to मयग्रामीण in the following verse have been omitted by $A_1$ and supplied in margin by $A_3$; they are found in G R. १२८. 1) $A_3$ gloss पण्डितैः पुष्पैश्च.—2) $A_3$ gloss आकाङ्क्षा दिशश्च.—3) $A_3$ gloss शैत्यं तोषश्च. १२९. 1) 2) Thus corr. by $A_3$ from $A_1$ पुण्यवेश्यां and निषीथिन्यां. १३०. 1) Thus $A_3$; $A_1$ °ज्ञाचिन्तनोन्नतिः.

द्वात्रिंशतिमहान्युर्वीं स रक्षित्वा क्षमापतिः । क्षयं ययौ शुचियशाः शुचिशुक्लाष्टमीदिने ॥१३१॥

प्राणिनां द्योतमानानां नक्षत्राणामिव क्षणात् । लक्ष्मीर्ग्रीष्मक्षपेवेयं संगता भङ्गदायिनी ॥१३२॥

समन्योः स्वैरिणीवृत्तिः सुतस्य जननी निजा । अभिचारं चकारास्येत्यविगाना[1] जनश्रुतिः ॥१३३॥

राज्योपकरणे सज्जीकृते राज्यार्थिनी स्वयम् । सा राजमाता श्रीलेखा यावत्स्नात्वा समागता ॥१३४॥

मिलितैस्तावदेकाङ्गैर्भ्रात्रा धात्रेयकेण च । सागराख्येन तत्पुत्रो[1] बालोनन्तो नृपः कृतः ॥१३५॥ युग्मम् ॥ 135

निधिं[1] जिघृक्षोरन्येन हृते तत्र प्रमापणम् । तद्रक्षिणोहेर्लुब्धस्य पापायैव यथा किल ॥१३६॥

राजमातुस्तथा राज्यलुब्धायाः पुत्रनाशनम् । अभूदन्यहृते राज्ये वृजिनायैव केवलम् ॥१३७॥ युग्मम् ॥

सा राज्यविप्रलम्भेन तादृशा व्यथिताशया । व्यस्मरत्तनयस्नेहं धिग्भोगाभ्यासवासनाम् ॥१३८॥

अथाजगाम स्थविरः पितृव्यो बालभूपतेः । राज्यं विग्रहराजाख्यो हर्तुं[1] विततविक्रमः ॥१३९॥

स लोहरात्प्रचलितो दग्ध्वा द्वारमतर्कितः । दिनद्वयेन सार्धेन नगरं सत्वरोविशत् ॥१४०॥ 140

श्रीलेखाप्रेरिताः सेनाः प्रविष्टं[1] लोठिकामठम् । उद्दीपिताग्नयस्तत्र निजघ्नुस्तं सहानुगम् ॥१४१॥

मठद्वयं ततः कृत्वा स्वस्य भर्तुः सुतस्य च । तस्थौ व्ययवती राज्ञी राज्यद्रोहोद्यतानिशम् ॥१४२॥

ततो नरपतिः किंचिच्छनैः शिथिलशैशवः । अतिव्ययादिव्यसनी गर्भेश्वरतयाभवत् ॥१४३॥

तस्यासन्रुद्रपालाद्याः शाहिपुत्राः परं प्रियाः । अनल्पवेतनादानै राज्योत्पत्त्यपहारिणः ॥१४४॥

कृतप्रत्यहनिर्वाहः सार्धलक्षेण भूभुजा । रुद्रपालो दरिद्रत्वं कदाचिदपि नात्यजत् ॥१४५॥ 145

दिद्दापालः क्षमापाललब्धया प्रतिवासरम् । सहस्राणामशीत्यापि शेते स्म न सुखं निशि ॥१४६॥

अनङ्गपालवेतालश्चक्रे क्ष्मापाललालितः । शश्वत्सुवर्णगीर्वाणप्रतिमापाटने[1] मनः ॥१४७॥

रुद्रपालः परित्राता धनप्राणादिहारिणाम् । बभूव चौरचण्डालप्रायाणां वज्रपञ्जरः ॥१४८॥

कायस्था रुद्रपालाप्ताः प्रजानां पीडनं व्यधुः । चकारान्धमठं श्रीमानुत्पलाख्यो यदग्रणीः ॥१४९॥

कियद्रुद्रपालवाल्लभ्यमन्यत्तस्याभिधीयताम् । जालन्धराधिपस्येन्दुचन्द्रस्येन्दुमुखीं सुताम् ॥१५०॥ 150

उपयेमे मनोज्ञत्वाज्ज्येष्ठामासमतिं[1] स्वयम् । यया मठः स्वाभिधया विदधे त्रिपुरेश्वरे ॥१५१॥

तस्याः किंचिद्वयोन्यूनां[1] स्वसारं यो यवीयसीम् । अथ सूर्यमतीं देवीं भूभुजे परिणीतवान् ॥१५२॥

रुद्रेण भूपतिः सख्या स कर्णसुखदायिना । पात्रीकृतो दुर्नयानां कर्णेनेव सुयोधनः ॥१५३॥

कम्पनाधिपतिस्तत्र क्षणे त्रिभुवनो बली । आययौ भूपतेर्हर्तुं राज्यं संभृतडामरः ॥१५४॥

आकृष्टाशेषकटके तस्मिन्योद्धुमुपागते । एकाङ्गाः सहयारोहा राजपक्षं न तत्यजुः ॥१५५॥ 155

असिना लङ्घयन्प्रासानमोघाञ्श्लाघ्यविक्रमः । प्रजहारानन्तदेवः स्वयं त्रिभुवनं रणे ॥१५६॥

संनाहरक्षिताङ्गः स दृढप्रहृतिपीडितः । विदद्रौ[1] वदनेनासृक्स्वप्रतापमिवोद्वमन् ॥१५७॥

विनयच्छन्नशौटीर्यः[1] शिशुप्रायः[2] स भूपतिः । दृष्ट्वा बलमसंभाव्यं तस्मिंस्त्यक्त्वा रणं गते ॥१५८॥

---

१३३. [1]) त्यविगाना supplied by $A_3$ in space left by $A_1$. १३५. [1]) $A_4$ gloss तस्या अपरः पुत्रः. १३६. [1]) Thus $A_3$; $A_1$ रत्नं. १३९. [1]) Thus A R; G C हन्तुं. १४१. [1]) Thus corr. by $A_3$ from $A_1$ प्रविष्टो. १४७. [1]) Thus corr. by $A_3$ from $A_1$ °मापटले. १५०. [1]) प supplied by $A_3$. १५१. [1]) मास supplied by $A_3$ in space left by $A_1$. १५२. [1]) Thus $A_1$; $A_3$ किंचिदिव. १५७. [1]) $A_3$ gloss चचाल. १५८. [1]) $A_3$ gloss शौटीर्यं अभिमानः प्रागल्भ्यं वा.—[2]) $A_3$ gloss शिशुसदृशः.

शमालाडामरं घ्नन्तं प्रासैरभिनवाभिधम् । शालास्थले व्यधाच्छ्लाघ्यविक्रमो मोघविक्रमम्[1] ॥१५९॥

160 मांसासृग्वेष्टनाबद्धीभूतखड्गो भ्रमन्रणे । भुवनक्षोभकृदभूद्भैरवोनन्तभूपतिः ॥१६०॥

पश्यन्प्रहारलूनाङ्गानेकाङ्गान्स पदे पदे । निवेद्यमानानग्रस्थैर्नामग्रहणपूर्वकम् ॥१६१॥

क्षितिभृज्जातदाक्षिण्यो विलब्धिस्थावरे ततः । चाञ्चल्यमक्षपटलादेकाङ्गानां न्यवारयत् ॥१६२॥ युग्मम्[1] ॥

एवं तत्र कृतज्ञेन भृत्येभ्यः प्रतिपादिता । विलब्धिस्तेन दीन्नारकोटिषण्णवतेः क्रमात् ॥१६३॥

राज्ञो रणान्निवृत्तस्य दुग्धसेकैः करात्त्सरुः । स्थिरग्रहदृढः कृष्टश्चिरेणेति जनश्रुतिः ॥१६४॥

165 अहो महत्त्वं भूभर्तुर्दीनो देशान्तरागतः । तादृक्क्षिभुवनो येन संविभेजे विमन्युना ॥१६५॥

ब्रह्मराजाभिधस्तेन बन्धुर्गञ्जाधिपः कृतः[1] । रुद्रपालकृतद्वेषो विरक्तश्चलितो ययौ ॥१६६॥

सप्तभिर्म्लेच्छभूपालैः समं मिलितडामरः । तेना[1]नीतो दरद्राजो यत्नादचलमङ्गलः[2] ॥१६७॥

क्षीरपृष्ठा[1]भिधं ग्रामं प्राप्तस्य समरोत्सुकः । तस्याग्रं विक्रमोदग्रो रुद्रपालो विनिर्ययौ ॥१६८॥

श्वो व्यवस्थापिते युद्धे सैन्याभ्यां दरदीश्वरः । क्रीडन्पिण्डारकाख्यस्य नागस्य भवनं ययौ ॥१६९॥

170 दुर्नयाचरणात्तत्र पार्श्वस्थैर्वारितोपि सः । प्लवमानस्य मत्स्यस्य गात्रे कुन्तमपातयत् ॥१७०॥

अथोज्जगाम गोमायुवपुः कुण्डाद्भुजंगमः । स च तं मृगयौत्सुक्यादधावद्दरदीश्वरः ॥१७१॥

तमापतन्तमालोक्य व्यवस्थोन्मूलनं विदत्[1] । आस्कन्दाशङ्कि भूभर्तुः सैन्यं युद्धाय निर्ययौ ॥१७२॥

अभूत्ततोस्त्रसंघर्षसंजातानलसंहतिः । कृतस्वर्गाङ्गनोद्वाहो वीराणां समरोत्सवः ॥१७३॥

तस्मिन्महाभटाटोपे शिरश्छिन्नं दरत्पतेः । रुद्रस्य रौद्रमहसः संप्ररूढं यशः पुनः ॥१७४॥

175 समरे वधबन्धादि म्लेच्छराजाः प्रपेदिरे । संप्राप हेमरत्नादि पुनः कश्मीरभूपतिः ॥१७५॥

उ[1]त्तंसमुक्ताद्योताम्भःक्षालितास्रझलज्झलम्[2] । रुद्रपालो दरद्राजशिरो भर्तुरुपानयत्[3] ॥१७६॥

भ्रात्रोदयनवत्सेन कृतप्रायैस्तथा द्विजैः । बह्व्यश्चैवं[1]विधास्तस्य बभूवुरवदालिकाः ॥१७७॥

रुद्रपाले ततो लूतामयेन प्रमयं गते । अन्येपि शाहितनयाः क्षिप्रमेव क्षयं ययुः ॥१७८॥

पालस्नेहान्ध्यविगमे शुद्धाशयजुषोभवत् । देवी सूर्यमती भर्तुर्दर्पणस्येव बिम्बिता ॥१७९॥

180 सुभटापरनामा सा गौरीश्वरविधायिनी । पुण्यं वितस्तापुलिने निर्ममे सुभटामठम् ॥१८०॥

गोहेमहयरत्नादिप्रदानैः सुबहून्द्विजान् । सदाशिवप्रतिष्ठायामदरिद्रांश्चकार सा ॥१८१॥

आशाचन्द्रापराख्यस्य कल्लनस्यानुजन्मनः । नाम्ना व्यधापि वात्सल्यात्साग्रहारो मठस्तया ॥१८२॥

सिल्लनाख्यस्य च भ्रातुर्भर्तुश्चाभिधया सती । मठौ चाकारयत्पार्श्वे विजयेशामरेशयोः ॥१८३॥

अष्टोत्तरं चाग्रहारशतं श्रीविजयेश्वरे । ब्राह्मणेभ्यो महापुण्यं विद्वद्भ्यः प्रत्यपादयत् ॥१८४॥

185 पत्युर्नाम्नाप्यग्रहारान्प्रददावमरेश्वरे । त्रिशूलबाणलिङ्गादिप्रतिष्ठाश्च विनिर्ममे ॥१८५॥

---

१५९. [1]) Thus corr. by $A_3$ from $A_1$ मोघवक्रियम्. १६२. [1]) Supplied by $A_3$. १६६. [1]) Emended with G C; A कृपः. १६७. [1]) $A_3$ gloss ब्रह्मराजेन.—[2]) दचलमङ्गलः supplied by $A_3$ in space left by $A_1$; $A_3$ gloss नाम. १६८. [1]) Thus $A_1$; $A_3$ खरपृष्ठा°, with gloss खरोट् इति ग्रामः क्रमराज्ये. १७२. [1]) Emended; A विदन्. १७६. [1]) $A_3$ gloss उत्तंसभूताः या मुक्ताः मुक्तामणयः तासां यो द्योतः दीप्तिः स एवाम्भः तेन क्षालिता अस्रस्य रुधिरस्य झलज्झलाकाचकच्यं प्रकाशः स्फार इति यावत् यस्य तत् इति शिरोविशेषणं। झलज्झला तु शोभायामिति कोशः मुक्ताफलदीप्तेरतिशुक्लत्वादम्भस्त्वेन रूपणम्। जलस्य हि शुक्लं रूपमिति वैशेषिकाः॥.—[2]) Thus corr. by $A_3$ from $A_1$ झलज्जलम्.—[3]) Thus corr. by $A_3$ from $A_1$ °रुपायनम्. १७७. [1]) Thus $A_3$; $A_1$ तथा ह्येवं°.

दंपती राजराजाख्ये मृते पुत्रे प्रचक्रतुः । सदाशिवान्तिके राजवेश्म संत्यज्य तौ स्थितिम् ॥१८६॥
ततः प्रभृति संत्यज्य पूर्वराजकुलस्थितिम् । तथैव रूढ्वा[1] भूपालास्तत्रैव वसतीर्व्यधुः ॥१८७॥
पार्थिवस्याश्वशालीयाः प्रियवाजितया प्रियाः । प्रसादैर्देशलुण्ठ्या[1] च सर्वतः समतां ययुः ॥१८८॥
गर्भेश्वरतया भर्तुर्वल्लभो नर्मकोविदः । अलुण्ठयत्प्रजा नित्यं डल्लको नाम दैशिकः ॥१८९॥
मालवाधिपतिर्भोजः[1] प्रहितैः स्वर्णसंचयैः । अकारयद्येन कुण्डयोजनं कपटेश्वरे ॥१९०॥ 190
प्रतिज्ञा भोजराजेन पापसूदनतीर्थजैः । सततं वदनस्नाने या तोयैर्विहिताभवत् ॥१९१॥
अपूरयत्तस्य यस्तां[1] दुस्तरां नियमादितः । प्रहितैः काचकलशी[2]कुलैस्तद्वारिपूरितैः[3] ॥१९२॥
स तस्य पद्मराजाख्यः पर्णप्राप्ति[1]कदैशिकः । प्रियताम्बूलशीलस्य त्यागिनो वल्लभोभवत् ॥१९३॥ चक्कलकम् ॥
तेन नागरखण्डादिपर्णविक्रयिणा नृपः । देशोत्पत्तिधनं प्रायो निःशेषं दापितस्तदा ॥१९४॥
पञ्चचन्द्रकशोभाङ्कमौलिसिंहासनं[1] नृपात् । बन्धायादत्त लब्धव्ये धने स धनिकोधिके ॥१९५॥ 195
तद्राजचिह्नमास्थानोपयुक्तं तस्य मन्दिरात् । आनीयमानं मासार्ध[1]वासरे मासि मास्यभूत् ॥१९६॥
स्वकोशसंचयं दत्त्वा देवी सूर्यमती ततः । पद्मराजोद्भवां देशस्याव्यवस्थां न्यवारयत् ॥१९७॥
शमिते चाश्वशालीयडल्लकादिभये तदा । प्रावर्तन्त पुनर्देशे व्यवस्था निरुपद्रवाः ॥१९८॥
ततः प्रभृति राज्ञ्येव राजकार्योद्यताभवत् । तस्थौ शौर्यकथां त्यक्त्वा राजा कार्यकरः पुनः ॥१९९॥
भर्तुर्नारीविधेयत्वं तस्या भर्तृजयस्तथा । निष्कलङ्केन शीलेन[1] नान्योन्यं गर्ह्यतां[2]मगात् ॥२००॥ 200
भवभक्तिव्रतस्नानं[1]त्यागशीलादिभिर्गुणैः । कृतिनानन्तदेवेन मुनयोपि विनिर्जिताः ॥२०१॥
राज्ये तस्य महीभर्तुर्दीर्घे तांस्तानलङ्घयत् । पतिंवरेव राजश्रीर्भृत्यान्नवनवोन्मुखी ॥२०२॥
क्षेमाभिधो राजगञ्जपूरणं बालभञ्जकः[1] । व्यधाद्वादशभागादिप्रकारैर्ढौकयन्धनम् ॥२०३॥
मन्त्री ततोभवत्साधुस्त्रैगर्तः केशवो[1] द्विजः । सौधश्चन्द्रातपेनेव भूपालो येन भूषितः ॥२०४॥
भ्राम्यन्गतश्रीरेकाकी स एव ददृशे जनैः । भाग्याम्बुवाहतडितो निविडाः कस्य संपदः ॥२०५॥ युग्मम् ॥ 205
भाग्याधीनं धनं ध्यात्वा मुधा मुग्धधियामसौ । कुलविक्रमयोर्दर्पो मिथ्यैव पृथुतां प्रति ॥२०६॥
प्रासादपालवैश्यस्य गौरीशत्रिदशालये । भूतेर्[1]हलधरो वज्रो वराहश्चाभवन्सुताः ॥२०७॥
तेभ्यो हलधरः सूर्यमत्या विहितसेवनः । वृद्धिं दिने दिने गच्छंल्लेभे सर्वाधिकारिताम् ॥२०८॥
विधेयान्बुद्धियुक्तेन[1] कुर्वतः क्षित्यनन्तरान्[2] । सपत्नीकोभवत्तस्य मुखप्रेक्षी क्षमापतिः ॥२०९॥
क्षेमेण सूत्रितं पूर्वं सपादाग्रमुदग्रधीः । कर्मस्थानं स्फुटीचक्रे सर्वस्थान[1]धुरंधरम् ॥२१०॥ 210
अभूद्वर्णकमूल्यादिलेखनं कनकस्य यत् । राजायत्तं जनस्यार्थसंचयानां प्रकाशकम् ॥२११॥
स तन्निवारयामास भाविनां भूभुजां विदन् । ज्ञानी[1] संचितवित्तस्य दण्डाद्यायासकारिताम् ॥२१२॥

---

१८७. [1]) Thus corr. by $A_3$ from $A_1$ रूढा. १८८. [1]) Thus corr. by $A_3$ from $A_1$ °लुण्ठा. १९०. [1]) Thus corr. by later hand from $A_1$ °र्भोजैः. १९२. [1]) $A_3$ gloss प्रतिज्ञां.—[2]) Thus corr. by later hand from $A_1$ प्रहितै काशक°.—[3]) $A_3$ gloss शेष इति भाषया. १९३. [1]) $A_3$ gloss ग्रामविशेषः. १९५. [1]) Thus corr. by later hand from $A_1$ °सनं. १९६. [1]) र्ध supplied by $A_3$ in space left by $A_1$. २००. [1]) Thus corr. by later hand from $A_1$ शीलेना.—[2]) Thus corr. by $A_3$ from $A_1$ गृह्यता°. २०१. [1]) Thus corr. by $A_3$ from $A_1$ °स्थान°. २०३. [1]) $A_3$ gloss नापितः. २०४. [1]) Thus corr. by later hand from $A_1$ कैशवो. २०७. [1]) Thus $A_1$; $A_3$ भूतिर्ह°. २०९. [1]) Thus $A_1$; $A_3$ °शुद्धेन.—[2]) Thus corr. by $A_3$ from $A_1$ °न्तरम्. २१०. [1]) Thus $A_1$; $A_3$ सर्वकार्यधु°. २१२. [1]) Thus $A_3$; $A_1$ ज्ञाने.

भर्त्सितानश्वशालीयान्धनदारापहारिणः । कांश्चिद्व्यापाद्य स शमं निन्ये लोकस्य विप्लवम् ॥२१३॥

तेनायासहृता नीतः कचत्[1]स्वर्णैः सुरास्पदैः । शोभां मठाग्रहारैश्च वितस्तासिन्धुसंगमः ॥२१४॥

215 भ्रातरश्च सुताश्चास्य लक्ष्मीपरिचयोन्मदाः । द्विरदा इव न क्वापि दानप्रणयितां जहुः ॥२१५॥

तद्भ्रातृपुत्रो बिम्बाख्यः श्रीमान्वीरो वराहजः । द्वाराधिकारकार्यासीद्दानप्रलयवारिदः ॥२१६॥

स डामरकुलाकालमृत्युः स्वल्पानुगोभवन्[1] । खशाहवे जहौ[2] प्राणान्पलायनपराङ्मुखः ॥२१७॥

चम्पायां सालभूपालमुन्मूल्यानन्तभूपतिः । तत्तन्नृपजयी नव्यं धराधवमरोपयत् ॥२१८॥

मन्त्रशून्येन शौर्येण परदेशेषु भूपतिः । हठप्रवेशान्विदधत्सोभूत्कृच्छ्रगतोसकृत् ॥२१९॥

220 तुक्का[1]त्मजस्य कलशस्यारब्धौ खिन्नसैनिकम् । अमोचयद्धलधरो युक्त्या वल्लापुरादमुम् ॥२२०॥

उरशां च प्रविष्टस्य वैरिरुद्धाध्वनो व्यधात् । कम्पनाधिपतिस्तस्य मार्गान्सं[1]शोध्य निर्गमम् ॥२२१॥

कालेनन्तमहीभर्तुर्वैरिविग्रहसंकटे । साहसान्युदजृम्भन्त तानि तानि क्षणे क्षणे ॥२२२॥

राजेश्वरो द्वारपतिः श्रीमान्भद्रेश्वरात्मजः । डामरैः क्रमराज्यस्थैरन्येपि बहवो हताः ॥२२३॥

वीक्ष्य नीतिदृशा कार्यं भीत्या व्यवहरन्नपि । भृत्यतां निष्परिभवां को भुङ्क्ते नृपमन्दिरे ॥२२४॥

225 दुष्प्रवादास्पदीभूतो देव्या निविडसेवनात् । आशाचन्द्रादिभिः क्रुद्धैर्बद्धो हलधरोप्यभूत् ॥२२५॥

स राज्ञा हृतसर्वस्वो बन्धनक्लेशमन्वभूत् । भाग्यप्रभावे निःसारे सुखमेकान्ततः कुतः ॥२२६॥

नृपेण बन्धनात्त्यक्तं तं श्रीः प्रत्यागता पुनः । आलिलिङ्ग सितच्छत्रलज्जास्मितसितानना ॥२२७॥

स राज्ञ्याः प्रावृष इव प्रणयेन क्षणे क्षणे । कोपप्रसादमेघार्कपर्यायापातमन्वभूत् ॥२२८॥

ततः सरलचित्तस्य क्रमेण समपद्यत । भार्याजितत्वं भूभर्तुर्दुर्विपाकार्पणोन्मुखम् ॥२२९॥

230 अधिकारपरित्यागाद्दोषाननुशयावहान् । वदद्भिर्वार्यमाणोपि प्राज्ञैर्हलधरादिभिः ॥२३०॥

पत्न्या संप्रेरितः शश्वत्तनयस्नेहमूढया । पुत्राय कलशायाभूद्राज्यं दातुं समुद्यतः ॥२३१॥

यास्यस्यनुशयं राजन्नेवंवाद्यपि कारितः । सज्जं[1] तेन रणादित्यनामा क्षत्ताभिषेचनम्[2] ॥२३२॥

एकान्नचत्वारिंशस्य वर्षस्य तनयः[1] सिते । षष्ठेह्नि बाहुलस्याभूदभिषिक्तो[2] महीभुजा ॥२३३॥

अथास्थाने रणादित्यो राजपुत्रान्निवेशयन् । चिन्तयन्राज्यमाहात्म्यं प्रतिप[1]त्तिषु निष्ठुरः ॥२३४॥

235 अनन्तो राजपुत्रोयं देवेति कथयन्वचः । कृकाटिकान्यस्तहस्तः क्षितिपालं न्यवेदयत् ॥२३५॥

कुपितेन स भूभर्त्रा परिवृत्यावलोकितः । एवं कृतस्मितो व्यक्तं तमूचे नीतिनिष्ठुरः ॥२३६॥

इत्थं यत्र निवेद्यन्ते कान्यकुब्जादिभूभुजः । तत्रैव त्यक्तराज्यस्य कान्यास्तु प्रक्रिया तव ॥२३७॥

दिने दिने सानुशयो नियतं भविता भवान् । नाभिमानपरित्यागः कर्तुं शक्यो मुनेरपि ॥२३८॥

सुदूरदर्शिनां तत्र मन्त्रिणां हृदयंगमम् । राजा तस्य वचः श्रुत्वा प्रतिवाक्याक्षमोभवत् ॥२३९॥

240 दृष्ट्वान्येद्युर्नवं भूपं राजचक्रेण सेवितम् । नवेतरं च सहितं परिमेयैः परिच्छदैः ॥२४०॥

---

२१४. [1]) Thus corr. by $A_3$ from $A_1$ कश्चित्स्व°; $A_3$ gloss कचत् देदीप्यमानं स्वर्णं येषां तैः. २१७. [1]) Thus corr. by $A_3$ from $A_1$ °भवत्.—[2]) Thus $A_3$; $A_1$ जहत्. २२०. [1]) तुक्का supplied by $A_3$ in space left by $A_1$. २२१. [1]) Thus corr. by $A_3$ from $A_1$ मार्गात्सं°. २३२. [1]) सज्जं supplied by $A_3$ in space left by $A_1$.—[2]) $A_3$ gloss तेनानन्तदेवेन रणादित्यनामा क्षत्ता प्रतीहारः अभिषेचनं सज्जं कारित इत्यन्वयः कथं भूतः एवंवादी अपि. २३३. [1]) $A_2$ gloss कलशः.—[2]) Thus corr. by later hand from $A_1$ बहु°; $A_2$ gloss कार्तिकस्य. २३४. [1]) प supplied by $A_2$.

धीमान्हलधरो युक्त्या कृतकासूयया नृपम् । एवं निर्भर्त्सयंल्लक्ष्मीं तं प्रत्याजीहरत्पुनः ||२४१||

विधाय निःसुखं सूनुं राज्यभारार्पणाच्छिशुम् । कस्मात्स्वसुखसापेक्षो न जिह्रेष्यत्र वार्द्धके ||२४२||

तत्स्वयं राजकार्याणां कार्यमुद्वहनं त्वया । अशून्यो यौवनाभोगैरयमस्तु सुतस्तव ||२४३||

इत्युक्त्वा स पुनर्भूपमधिकारमजिग्रहत् । चक्रे कलशदेवं च कलया युक्तिवञ्चितम् ||२४४||

पित्रोरेवान्तिके कुर्वन्नाहाराद्यपि संततम् । ततो बभूव कलशो नाममात्रमहीपतिः ||२४५|| 245

सर्वास्थानास्त्रपूजादिविधाने पार्थिवोचिते । पितुः सहायकल्पः स पौरोहित्यमिवाकरोत् ||२४६||

अनिमित्तप्रहृष्टानामनिमित्तानुतापिनाम् । न क्वापि चलचित्तानां तिरश्चामिव निश्चयः ||२४७||

दापयित्वा पतिं राज्यं निर्बन्धेनापि तावता । सूनौ बभूव यद्राज्ञी विप्रेमेवा[1]नुतापिनी ||२४८||

सेर्ष्या स्नुषाणामुत्कर्षं पार्थिवप्रमदोचितम् । वेषालंकरणादौ सा रूक्षचित्ता न चक्षमे ||२४९||

दासीकृत्यं तया पुत्रमहिष्यः कारिताः सदा । गृहोपलेपने यावन्न वैमुख्यमदर्शयन् ||२५०|| 250

पुत्रो विग्रहराजस्य क्षितिराजाभिधस्ततः । राज्ञः[1] पितृव्यजो भ्राता कदाचित्पार्श्वमाययौ ||२५१||

तस्मै न्यवेदयत्खेदं स चित्तस्योपतापकम् । पुत्रे भुवनराजाख्ये राज्यलुब्धेतिविप्लुते ||२५२||

स हि तस्यात्मजो नीलपुरराज्यं[1] समाश्रितः । तद्बलैः पितुरारब्धिं[2] विधातुं सोद्यमोभवत् ||२५३||

नाम भागवतानां च पूज्यानां स्वपितुर्व्यधात् । दत्त[1]यज्ञोपवीतानां शुनामशुचिमानसः ||२५४||

क्षितिराजः स्ववध्वां च विरुद्धायां विशुद्धधीः । मनस्तापापहे चक्रे सर्वत्यागामृते स्पृहाम् ||२५५|| 255

राज्यं कलशपुत्राय ज्येष्ठानन्तरजन्मने[1] । रामलेखाभिधानायां राज्ञ्यां जाताय सत्वरम् ||२५६||

दत्त्वा स्तनंधयायापि तदोत्कर्षाभिधाय सः । राजर्षिर्विबुधैः सार्धं विदधे तीर्थसेवनम् ||२५७||

भुक्त्वा शमसुखं भूरीन्वर्षान्परमवैष्णवः । स चक्रायुधसायुज्यं ययौ चक्रधरे सुधीः ||२५८||

स[1] च भोजनरेन्द्रश्च[2] दानोत्कर्षेण विश्रुतौ । सूरी तस्मिन्क्षणे तुल्यं द्वावास्तां कविबान्धवौ ||२५९||

पितुः पितृव्यजाद्[1]भ्रातुर्जातस्या[2]नन्तभूभुजा[3] । तन्वङ्ग[4]राजस्योत्सङ्गे नप्ता[5] न्यासीकृतः शिशुः ||२६०|| 260

तन्वङ्गोपि विवृद्धिं तन्नीत्वा राष्ट्रं शिशुं च तम् । पुनः प्रविष्टः कश्मीरानस्तं चक्रधरे ययौ ||२६१||

सर्वसाधारणीभूतभोगानां राजबीजिनाम् । तावज्ज्ञातेयमभवन्नेह द्रोहकलङ्कितम् ||२६२||

इन्दुराजात्मजात्सिद्धराजो यो बुद्धराजतः । जातो मदनराजाख्यं वीरं पुत्रमजीजनत् ||२६३||

अत्यु[1]त्सिक्तः सुतस्तस्य दूरं[2] नृपतिमण्डलात् । विधुरे राज्ञि निर्यातः शौर्योद्रेकादखण्डितः ||२६४||

तदानीं जिन्दुराजाख्यो डामरोद्रेकखिन्नया । राज्ञ्या स्वयं गृहं नीत्वा[1] साचिव्यं ग्राहितोभवत् ||२६५|| 265

काणः शोभाभिधस्तेन गाढोद्वेगावहः प्रभोः । देग्रामस्थो[1] डामरोथ दत्त्वास्कन्दं निपातितः ||२६६||

---

२४८. [1]) $A_2$ gloss विप्रेमा निस्स्नेहा; $A_3$ क्षिप्रमेवानुतापिनी इत्यन्यादर्शे. २५१. [1]) ज्ञः supplied by $A_3$ in space left by $A_1$. २५३. [1]) Thus $A_1$; $A_3$ नीलपूरराजं.—[2]) Thus corr. by $A_3$ from $A_1$ °रालब्धि; $A_3$ gloss आस्कन्दं. २५४. [1]) दत्त supplied by $A_3$ in space left by $A_1$. २५६. [1]) $A_4$ gloss कलशदेवस्य द्वौ पुत्रौ ज्येष्ठो हर्षदेव एकः कनिष्ठ उत्कर्षो द्वितीयः. २५९. [1]) $A_4$ gloss अनन्तदेवः.—[2]) $A_4$ gloss भोजराजश्च. २६०. [1]) $A_4$ gives in margin a genealogical list showing the descendants of the brothers उदयराज and कान्तिराज: उदयराज, संग्रामदेव, अनन्तदेव, कलश, and कान्तिराज, जस्सराज, तन्वङ्ग.—$A_4$ gloss (to पितुः) संग्रामदेवस्य.—[2]) $A_4$ gloss कान्तिराजपुत्रजस्सराजात्.—[3]) $A_4$ gloss तन्वङ्गस्य.—[4]) Thus corr. by $A_3$ from $A_1$ तन्वत्राज°.—[5]) $A_4$ gloss पौत्र उत्कर्षः. २६४. [1]) Thus corr. by $A_3$ from $A_1$ इत्यु°.—[2]) $A_3$ दूरं नृपती-त्यन्यादर्शे. २६५. [1]) Thus $A_1$; $A_3$ गत्वा. २६६. [1]) $A_3$ gloss देगामो इति भाषया.

कम्पनाधिपतां दत्त्वा ततस्तस्य प्रतापिनः । पार्थिवो[1] राजपुर्यादीन्देशांश्चक्रे[2] करप्रदान् ॥२६७॥

अनन्तभूभुजो राज्ये तत्तत्स्खलितसंकटे । आलम्बयष्टिप्रतिमो ययौ हलधरः क्षयम् ॥२६८॥

मुमूर्षुणा चक्रधरे तेन पार्श्वस्थितो नृपः । सजानिरुपदेशार्थी स तदेत्यमकथ्यत ॥२६९॥

270 मा कार्षं परराष्ट्रेषु रभसारब्धिसाहसम् । युक्त्या वल्लापुरादौ वो व्यपोढं व्यसनं मया ॥२७०॥

विशङ्क्यो जिन्दुराजोयं पराध्यां वृद्धिमागतः । भेदं वः सह पुत्रेण[1] जयानन्दो[2] विधास्यति ॥२७१॥

कथितं तेन[1] तत्स्मृत्वा जिन्दुराजं महौजसम् । बिज्जेनाबन्धयद्राजा युक्तिमांस्त्याजितायुधम् ॥२७२॥

अथ कालेन कलशक्ष्माभृत्कलुषिताशयः । भृत्यैरसाधुसंसेव्ये प्रसक्तिं ग्राहितोध्वनि ॥२७३॥

तस्याभवन्बिज्जपित्थराजपाजादयः[1] प्रियाः । उत्सेकदा राजपुत्राश्चत्वारः शाहिवंशजाः ॥२७४॥

275 पुत्रो गङ्गपतेर्नागनाम्नो[1] निकटसेवकः । सोपि तस्य जयानन्दः कौटिल्याध्यापकोभवत् ॥२७५॥

द्विजेन्द्रेमरकण्ठे तु याते शिवसमानताम् । राजा प्रमदकण्ठस्य ययौ तज्जस्य[1] शिष्यताम् ॥२७६॥

दुःशीलस्य प्रकृत्यैव तस्याकृत्योपदेशकृत् । गम्यागम्यविचारस्य परिहर्ताभवद्गुरुः ॥२७७॥

गुरोर्गतविकल्पत्वं तस्यान्यत्किमिवोच्यताम् । त्यक्तशङ्कः प्रववृते स्वसुताप्सुरतेपि[1] यः ॥२७८॥

महासमयसंचारचतुरैर्यैरभीतितः । गण्यते स्वप्रभावोग्रैर्भैरवोपि न निर्भयैः[1] ॥२७९॥

280 ते भट्टपादास्त्रासेन पतिता भग्नजानवः । बिडाल[1]वणिजा स्वस्थाः शिरोहस्तार्पणैः कृताः ॥२८०॥

पुरा कृष्णबिडालाङ्को वणिक्कश्चिदिहाभिधाम् । बिडालवणिगित्यात्मनामविस्मारिकां[1] दधे ॥२८१॥

यो[1] व्याजमूर्खो वैद्यत्वगुरुत्वाहंकृतः क्रमात् । पदकृद्रजकादीनां शिल्पिनां गुरुतामगात् ॥२८२॥

स भट्टपादानुज्ञाघांश्चक्रे मूर्ध्न्यधिरोपयन् । श्रेष्ठी बिडालविष्ठौघहिङ्गुगन्धोत्कटं करम् ॥२८३॥

एवं प्रकृतिनिःसारैरपि गर्जद्भिरन्वहम् । आन्ध्यं स गुरुभिर्निन्ये दिवसोम्बुधरैरिव ॥२८४॥

285 ये दीर्घजागरा रात्रौ[1] भूरिभोजनसेविनः । अजीर्णपिशितोद्गारनित्यदुर्गन्धकन्धराः ॥२८५॥

अवस्करप्रणालाभाः पृष्ठे क्षिप्तमधःपथैः । शौचपाथ इव क्षिप्रमुज्झन्ति[1] मधुनिर्झरम् ॥२८६॥

नक्तमातोद्यवाद्यज्ञैस्तैः सार्धं कृतसेवनः । चारणो वेणुवाद्यज्ञो योषितां धर्षयन्हठात् ॥२८७॥

कनकाख्ये मदोद्दामे क्रुद्धे हलधरात्मजे । स्तम्भे निबद्ध्य तद्भृत्यैश्छिन्ननासो व्यधीयत ॥२८८॥

यो विटश्चमको नाम लूनाङ्गोमङ्गलावहः । शनैर्लेभे स वाल्लभ्यं कौड्[1]न्यान्नवभूपतेः ॥२८९॥

290 प्रसादवित्तो भूभर्तुरन्तरे मन्त्रिणामपि । लब्धप्रतिष्ठः स प्राप ठक्कुराख्यां नृकुक्कुरः ॥२९०॥

प्रथां प्राप्तस्त्रपाहेतुं[1] स भञ्जन्वंशमञ्जसा । प्रागेव नासावंशस्य भञ्जनं बहमन्यत ॥२९१॥

तेनोद्दीपितदौःशील्यः स यच्चक्रे[1] त्रपोज्झितः । अवाच्यमपि वृत्तान्तं मध्यपातात्तदुच्यते ॥२९२॥

कल्लनाख्या स्वसा राज्ञो नागाख्या च तदात्मजा । परदारप्रसक्तेन संभोक्तुं नावशेषिता ॥२९३॥

२६७. [1]) Thus corr. by $A_3$ from $A_1$ सपर्थो and °न्देशाञ्चक्रे.—[2]) $A_3$ gloss राजविर. २७१. [1]) $A_4$ gloss कलशेन.—[2]) $A_4$ gloss अनन्तदेवगङ्गपतेर्नागनाम्नो भृत्यस्य पुत्रः. २७२. [1]) $A_4$ gloss हलधरेण. २७४. [1]) Emended; A R G °भवाद्बिज्ज°. २७५. [1]) $A_4$ gloss तुङ्गभ्रातुः. २७६. [1]) Thus corr. by $A_3$ from $A_1$ तज्जनशि°. २७८. [1]) र supplied by $A_3$; $A_3$ gloss स्वा आत्मीया चासौ पुत्री तस्याः सुरते सम्भोगे. २७९. [1]) Thus $A_1$; $A_3$ निर्भयः. २८०. [1]) Thus corr. by $A_3$ from $A_1$ बिडाज°. २८१. [1]) Thus corr. by $A_3$ from $A_1$ बिडालनाम इत्या°. २८२. [1]) This verse has been omitted by $A_1$ and added in margin by $A_3$; found in R G. २८५. [1]) Thus $A_3$; $A_1$ °जागराद्रात्रौ. २८६. [1]) Thus corr. by $A_3$ from $A_1$ क्षिप्रम°. २८९. [1]) Thus corr. by $A_3$ from $A_1$ कौढ°. २९१. [1]) Thus $A_3$; $A_1$ कथामासो पाहेतुं. २९२. [1]) Thus R G; A यश्चक्रे.

तमुदन्तं सपत्नीको बुद्धवान्वृद्धभूपतिः । न प्रत्यभैत्सीत्त्रपया तस्थौ तु निभृतव्यथः ॥२९४॥

भिक्षको[1] धान्यमुष्टीनामोवनां[2]ग्रामजो द्विजः । योऽप्यभूद्ग्रामदैवज्ञो वैधेयो लोष्टकाभिधः ॥२९५॥ 295

स ग्रामक्षेत्रपालस्य प्रसादात्पर्यटन्निशि । वस्तूनां मुष्टिबद्धानां विज्ञानान्मुष्टिलोष्टकः ॥२९६॥

परां प्रसिद्धिं संप्राप्तो नवक्ष्मापस्य रागिणः । आसीद्गुरुत्वकौट्टन्यदैवज्ञत्वै रतिप्रियः ॥२९७॥ तिलकम् ॥

भट्टारकमठाधीशः साधुर्व्योमशिवो जटी । खुर्खुटाख्याधिकरणे गृहीतनियतव्रतः ॥२९८॥

अन्धगान्धर्विकान्मम्मनाम्नः स्वार्चनसेवकात् । अवन्तिपुरजं हस्तग्राहकद्विजचेलकम् ॥२९९॥

परिभ्रष्टमुपादत्त लालितत्वेन यं[1] पुरा । स तेनं[2] वारिताशस्तभङ्गासूत्रमयाम्बरः ॥३००॥ 300

विसृज्यमानः पुष्पाणि ग्राहयित्वा नृपान्तिकम् ।[1] .................. ॥३०१॥

मदनो नाम वाचालः प्रपेदेत्यन्तरङ्गताम् । शनैः कौट्टन्यदुर्गोष्ठीमध्यपातं समाश्रयन् ॥३०२॥ चक्कलकम् ॥

तैश्चान्यैश्च विटैश्चाटुकारैः क्षिप्रविमोहितः । दोषानपि गुणान्मेने कलशः कलुषीकृतः ॥३०३॥

नर्म ह्रेपणकारि वाक्यमुचितं कृत्यं प्रजापीडनं तेजस्वित्वमलज्जता सरसतागम्याङ्गनासंगमः ।
सारल्यं खलगालिदानसहनं येषां न तत्संनिधौ किंचित्कर्म कुकर्म दोष इति यद्विज्ञाय संत्यज्यते ॥३०४॥

राजा चौर्यरतौत्सुक्यात्प्रतिगेहं परिभ्रमन् । स्वदारालिङ्गनैः प्रीतिं क्षणदासु न लब्धवान् ॥३०५॥ 305

पारतन्त्र्यकृतापारप्रीतिः परवधूरतिः । अभिलाषानलोत्सेके रागभाजां घृताहुतिः ॥३०६॥

तान्कुट्टनान्पु[1]रस्कृत्य पञ्चषानेकदा नृपः । जिन्दुराजगृहं प्रायात्स रात्रौ चौर्यकामुकः ॥३०७॥

तत्रासीज्जिन्दुराजस्य स्नुषा परमपुंश्चली । स्वगृहे दत्तसंकेता नक्तं कलशभूभुजः ॥३०८॥

प्रविशन्तमधावंस्तं भषद्भिः सूचितं श्वभिः । धृतासयो गृहद्वारं चण्डालाश्चौरशङ्किताः ॥३०९॥

तान्हन्तुमुद्यतान्दृष्ट्वा तं क्षितौ पतितं भयात् । पृष्ठन्यस्तस्ववपुषो ररक्षुरनुयायिनः ॥३१०॥ 310

तेभ्यः स मुष्टिघातादि दत्त्वद्वयः कथमप्यभून्[1] । मैवं कलशदेवोऽयमित्युक्त्वा त्याजितो निजैः ॥३११॥

प्राणहीनं[1] पुरस्कृत्य नारीमभिससार यत् । तदेव कामिनस्तस्य नूनमासीदमङ्गलम् ॥३१२॥

स निर्यातो गृहात्कान्ताकटाक्षविवशीकृतः । पथि कालीकटाक्षा[1]च्च दैवान्न प्रलयं ययौ ॥३१३॥

निजचित्तापराधेन कुर्वन्नीतिव्यतिक्रमम् । अस्पृश्येभ्यः परिभवं भूपालोऽप्युप[1]लब्धवान् ॥३१४॥

इन्द्रियैरिन्द्रचन्द्राद्या ह्रेपिता यैः सुरा अपि । अपरिम्लानमानत्वं तैर्मर्त्यस्याथ वा कथम् ॥३१५॥ 315

प्रागुन्मीलति दुर्यशः सुविषमं गर्ह्योभिलाषस्ततो धर्मः पूर्वमुपैति संक्षयमथो श्लाघ्योभिमानक्रमः ।
संदेहं प्रथमं प्रयात्यभिजनं पश्चात्पुनर्जीवितं किं नाभ्येति विपर्ययं विगलने शीलस्य चिन्तामणेः ॥३१६॥

राजधानीमत्राप्तस्य दुःशीलस्य महीपतेः । क्षपायामेव तां वार्तां पितरावधिजग्मतुः ॥३१७॥

तौ रुदित्वा सुतस्नेहलज्जाशोकान्वितौ चिरम् । निश्चयं बन्धने तस्य सदोषस्य प्रचक्रतुः ॥३१८॥

सर्वविद्यानिधिं ज्येष्ठं नप्तृणां बप्पिकात्मजम् । हर्षं राज्ये चिकीर्षू च निन्यतुस्तां निशीथिनीम् ॥३१९॥

---

२९५. [1]) Thus A R G; C भिक्षुकः.—[2]) $A_2$ gloss उयन् नाम ग्रामः. २९८. [1]) $A_3$ gloss भ्रडीमड्. २९९. [1]) The second half of this verse has been omitted by $A_1$ and supplied by $A_3$ in margin. ३००. [1]) $A_4$ gloss मदनं वक्ष्यमाणं.—[2]) $A_4$ gloss व्योमशिवेन. ३०१. [1]) $A_1$ indicates here a *lacuna* of two *pádas*. ३०७. [1]) Thus corr. by $A_3$ from $A_1$ कुट्टनात्पु°. ३११. [1]) Thus $A_1$ originally; भून् has been subsequently erased by $A_1$ and replaced by two dots. ३१२. [1]) $A_4$ gloss चमकं विटं. ३१३. [1]) Thus emended with C and G *sec. manu*; A °कटाक्षा-. ३१४. [1]) प supplied by $A_3$.

320 आकारितस्ततस्ताभ्यां प्रातः कलशभूपतिः । ऊचे बिज्जजयानन्दौ[1] साशङ्को जनकाद्भयम् ॥३२०॥
तन्मतेन जयानन्ददत्तहस्तः कथंचन । अन्वीयमानो बिज्जेन स पित्रोः प्राविशद्गृहम् ॥३२१॥
पिता प्रविष्टमात्रं तं वक्त्रे दत्तचपेटकः । अभाग्यभागिञ्जहिहि क्षुरिकामित्यथाब्रवीत् ॥३२२॥
एवं त्रासविसूत्राङ्गसंधिमालम्ब्य पाणिना । सावष्टम्भं स्पृशञ्शस्त्रं बिज्जो राजानमब्रवीत् ॥३२३॥
राजन्मानवतां धुर्यो भवन्नपि भवान्कथम् । नात्याज्यं[1] मानिनां वेत्ति मानग्रहमहाव्रतम् ॥३२४॥
325 गृहीतवेतनेनायं राजपुत्रेण शस्त्रिणा । संकटेस्मिन्मया स्वामी जीवता त्यज्यते कथम् ॥३२५॥
पिता भवानयं पुत्रः क्षणेन्यस्मिन्महीपते । मय्यसंनिहितेमुष्य यद्योग्यं तद्विधीयताम् ॥३२६॥
मुग्धं विमोह्य नृपतिं वचोभिः स्निग्धकर्कशैः । बिज्जः स्वामिनमादाय निराक्रामत्तदन्तिकात् ॥३२७॥
बिज्जस्यापूजयन्धीरास्तद्धैर्यमतिमानुषम् । अनन्तदेवस्याप्यग्रे यदेवं स व्यजृम्भत ॥३२८॥
चण्डी नरपतेः[1] पत्नी भाव्यर्थबलवत्तया । अत्याज्यजपमौनस्था तस्मिन्नवसरेभवत्[1] ॥३२९॥
330 सा चेदासिष्यतो[1]द्युक्ता नाभविष्यत्तदेतरत् । नियमात्सर्वनाशाद्वा बन्ध[2]नात्कलशस्य वा ॥३३०॥
ततो बिज्जेन कलशः सत्वरेण प्रवेशितः । त्रस्यन्दिल्हाभिधानाया वल्लभाया निवेशनम् ॥३३१॥
शिरोर्तिरस्य संजातेत्युक्त्वा भीतं पतिं व्यधात् । सा प्राज्ञा ज्ञातवृत्तान्ता तैलेनाभ्यक्तमस्तकम् ॥३३२॥
व्याजेन तेन सर्वस्य संप्रवेशं निषिध्य सा । पतिं जुगोप विन्यस्य बिज्जं द्वारस्य रक्षणे ॥३३३॥
ततः समाधेर्विरता राज्ञी निर्भर्त्स्य भूपतिम् । कुशलान्वेषणमिषात्तनयस्यान्तिकं ययौ ॥३३४॥
335 बद्धुं[1] बद्धोद्यमो राजा तथैव प्रययौ यदा । दत्तप्रवेशो बिज्जेन तदैकाक्येव सोभवत् ॥३३५॥
निषेधादनुगन्तॄणां ततः क्रुद्धो धराधवः । रुषित्वा विजयक्षेत्रं गन्तुं प्रावर्ततोद्धतः[1] ॥३३६॥
तं प्रयान्तं सपत्नीकं प्राप्तं पद्मपुरान्तिकम् । अवोचन्नेत्य तत्रस्था विश्वा[1]वट्टादयो द्विजाः ॥३३७॥
अधिकारं स्वयं त्यक्त्वा राजन्किमनुतप्यसे । कृतस्या[1]नुशयो युक्तो न सतो नासतोपि वा ॥३३८॥
न च ते दुर्मतौ त्यक्ताः[1] प्रजा एता मयेत्यपि । ध्यात्वा सूनोः समुचिता कर्तुं दुष्टस्य वाच्यता[2] ॥३३९॥
340 न यन्त्रपुत्रकस्येव शक्तिः कापि हि भूभुजः । भवेत्साधुरसाधुर्वा स प्रजानां शुभाशुभैः ॥३४०॥
उज्झन्ति यत्पयोवाहा जलानि तडितोथ वा । वनस्पतीनां सदसत्कर्मपाकस्य तत्फलम् ॥३४१॥
यद्यापथस्थितं पुत्रं त्यक्त्वेच्छस्यासितुं सुखम् । कोशं[1] त्यक्त्वा प्रस्थितस्य घटते तत्कथं तव ॥३४२॥
धाराधिरूढसामर्थ्यः सद्वंशः शुचिमानपि । संस्पृश्यते क्षीणकोशः कृपाण इव कैः पुमान् ॥३४३॥
श्रुत्वेत्यैच्छन्नृपो यावत्प्रत्यावृत्तिं विचारवान् । तावत्स पुत्रेणाभ्येत्य सभार्येण प्रसादितः ॥३४४॥
345 अथ प्रविश्य नगरं स प्रासादा[1]पवर्जिताम् । अशान्तमन्युरादाय लक्ष्मीं भूयो विनिर्ययौ ॥३४५॥

---

३२०. 1) $A_3$ gloss जयानन्दः नागपुत्रः तुङ्गभ्रातृपुत्रः. ३२४. 1) Thus corr. by $A_3$ from $A_1$ न त्याज्यं. ३२९. 1) ण्डी नरपतेः and न्नवसरेभवत् supplied by $A_2$ in space left by $A_1$. ३३०. 1) सिष्यतो supplied by $A_2$ in space left by $A_1$.—2) र्वनाशाद्वा बन्ध supplied by $A_2$ in space left by $A_1$. ३३५. 1) Emended : $A_1$ बन्धुं ; $A_3$ बन्दुं. ३३६. 1) द्धतः supplied by $A_3$ in space left by $A_1$. ३३७. 1) Emended; A विश्वाव°. ३३८. 1) कृतस्या supplied by $A_3$. ३३९. 1) Thus corr. by $A_3$ from $A_1$ त्यक्त्वा.—2) $A_3$ gloss, partly effaced, दुर्मतौ दुष्टबुद्धिविशिष्टे पुत्रे मया एताः प्रजाः त्यक्त[ाः]पुत्र एव राज्य[स्था]पना-दित्यपि [ध्या]त्वा दुष्टस्य पुत्रस्य वाच्यता निन्दा कर्तुं न समुचिता ते--त्यन्वयः. ३४२. 1) $A_3$ gloss भाण्डागारं. ३४५. 1) Emended : A प्रसादा°; C प्रमादा°.

हयायुधतनुत्रादि स्वयं स्वीकृत्य निर्गतः । देवीं प्रतीक्षमाणोस्थात्सरित्पारे ततः क्षणम् ॥३४६॥

नानाप्रकारानारोप्य कोशान्नौषु नृपाङ्गनाः । नायःशङ्कूनपि गृहे निर्यान्त्यः पर्यशोषयन् ॥३४७॥

अज्ञातवार्तः प्राक्तूष्णीं तत्प्रस्थानेभवज्जनः । ज्ञातवार्तस्तदा त्वासीदाक्रन्दमुखराननः ॥३४८॥

प्रतिमोक्तुं पुरे ताभ्यां दत्तपुष्पाञ्जलौ जनः । बाष्पबिन्दुमिषादौज्झीद्दीर्णानर्घकणानिव ॥३४९॥

हा मातर्हा पितः क्वेत्थं गच्छतः परिदेवितात् । इत्यस्मादपरः शब्दो मार्गेषु न तदा श्रुतः ॥३५०॥

मार्गेन्तरान्तराक्रन्दविरतौ निर्झरध्वनिः । शैलानां शोकनिःश्वासथूत्कार इव शुश्रुवे ॥३५१॥

तयोराक्रन्दितैः शश्वत्पथि संजातसंस्तवौ । कर्णौ शून्येप्यशृणुतामाक्रन्दितमिवासकृत् ॥३५२॥

पुत्रागसा तादृशौ तौ दृष्ट्वा मार्गे द्रुमौकसाम् । खगानां शावभरणमपि लोको व्यगर्हत ॥३५३॥

तयोः पुत्रानयोत्तप्तचेतसोर्विजयेश्वरः । मनःप्रसादं संदृष्टः स्निग्धबन्धुरिवाकरोत् ॥३५४॥

तत्तत्र भाण्डागाराश्वभृत्याद्यावसथार्पणैः । संविधानक्रियाभिश्च व्यग्रयोरगमद्दिनम् ॥३५५॥

देशे कोशोपकरणपूर्णगोणीगणावृते । आसन्निन्धनगण्डालीच्छन्नरथ्या इवापणाः ॥३५६॥

तन्वङ्गराजतुङ्गादिद्विजातिपुत्रा नृपात्मजाः । तं सूर्यवर्मचन्द्राद्या डामराश्चानुवव्रजुः ॥३५७॥

डामरान्क्षीरभूपादीन्राजा नौनगरादिषु । स्थानेषु स्वेषु निक्षिप्य रक्षित्वे गुप्तिमानभूत् ॥३५८॥

विश्रान्तसर्वचित्तस्य श्रीमतोनन्तभूपतेः । प्रावर्तन्तोत्सवैर्गन्तुं दिनानि विजयेश्वरे ॥३५९॥

राजपुत्रहयारोहशाखिडामरमण्डलैः । कृत्स्नैरेव स्थितिर्बद्धा सविधे वृद्धभूभुजः ॥३६०॥

वत्सरे पञ्चपञ्चाशे ज्यैष्ठे मासि विनिर्गतः । आसाद्य विजयक्षेत्रं स स्वर्गसुखमन्वभूत् ॥३६१॥

कलशस्तु गते राज्ञि प्राप वीतवसुं महीम् । रक्षाहौ चलिते यातरत्नां निधिमहीमिव ॥३६२॥

स्वराज्यमुज्ज्वलीकर्तुं रिक्तोपि विहितोद्यमः । चक्रे संमन्त्र्य बिज्जाद्यैः संमतानधिकारिणः ॥३६३॥

तेन सर्वाधिकारेषु जयानन्दो नियोजितः । द्वारे वराहदेवश्च वितस्तात्रपुरोद्भवः ॥३६४॥

यो ह्यम्बराधिकार्यासीज्जिन्दुराजस्य कम्पने । राज्ञा विजयमित्रः स कम्पनाधिपतिः कृतः ॥३६५॥

यथाधिकारमन्यांश्च विनिधायाधिकारिणः । राजार्थचिन्तामारेभे संरब्धः पितृविग्रहे ॥३६६॥

जयानन्दः पदातीनां चिकीर्षुरथ संग्रहम् । यत्नादनुचितेभ्योपि धनिकेभ्योग्रहीदृणम् ॥३६७॥

स्वीकृत्य पत्तीन्बिज्जादिराजपुत्रगणान्वितः । अथावन्तिपुरं प्राप योद्धुं वृद्धनराधिपम् ॥३६८॥

अभ्यर्थ्य कारितो वेलां राज्ञा काराविनिर्गतः । शिबिकावर्त्मना योद्धुं जिन्दुराजो विनिर्ययौ ॥३६९॥

तेषामुद्योगमाकर्ण्य क्रुद्धा वृद्धमहीभुजम् । स्वे डामराश्ववाराद्याः संरम्भादुपतस्थिरे ॥३७०॥

अजायत न्यस्तगुडक्रीडत्तुरगमण्डला । शस्त्रैः सत्राटवी कृत्वा संकटा विजयेश्वरे ॥३७१॥

ततः सूर्यमती यत्नात्पतिं परमकोपनम् । ययाचे पुत्रवात्सल्यादयुद्धं दिवसद्वयम् ॥३७२॥

---

३४६. 1) Thus corr. by $A_3$ from $A_1$ °स्था सरि°. ३४८. 1) Thus corr. by $A_3$ from $A_1$ °स्तदाप्यासी°. ३५०. 1) Thus corr. by $A_3$ from $A_1$ क्व. ३५३. 1) $A_2$ gloss शावाः पोताः तेषां भरणं पोषणं. ३५६. 1) $A_2$ गण्डाल्यः गण्य इति भाषया. ३५७. 1) Thus corr. by $A_3$ from $A_1$ °गुङ्गा°. ३६१. 1) $A_2$ gloss अनन्तदेवः.—2) $A_2$ gloss स्वर्गसुखं परमानन्दं न तु मृ [तिम्]. ३६२. 1) $A_3$ gloss धनरहिताम्. ३६४. 1) त्र supplied by $A_3$ in space left by $A_1$.—2) $A_3$ gloss वितस्तात्रं नाम यत्पुरं। तस्मादुद्भवो यस्य स वितस्तात्रपुरोद्भवः. ३६५. 1) Thus corr. by $A_3$ from $A_1$ यो हाम्बाधि°.—2) $A_3$ gloss कलशेन. ३६९. 1) वे supplied by $A_3$ in space left by $A_1$. ३७०. 1) संरम्भा supplied by $A_2$ in space left by $A_1$.

अत्याप्तानथ मय्यादीन्द्विजान्निशि विसृज्य सा । तन्मुखेनातिवात्सल्यादिदमूचे रहः सुतम् ॥३७३॥

विनाशशंस्ययं पुत्र कस्ते मतिविपर्ययः । तीव्रशौर्येण पित्राद्य यदेवं योद्धुमिच्छसि ॥३७४॥

375 यस्य भ्रूभङ्गमात्रेण दरद्राजादयो हताः । तत्प्रकोपानले कस्मादीहसे[1] शलभायितुम् ॥३७५॥

अस्मिंस्तु वीतिमा[1]रूढे वीतिहोत्रसमे नृपे । कस्त्राता स्यात्त्वदीयानां तृणानामिव शस्त्रिणाम् ॥३७६॥

सेनाङ्गैः कतमैः केन शौर्येण कतमैर्धनैः । भवाञ्शक्तिमतां धुर्यं योद्धुमेनं प्रधावति ॥३७७॥

दैवात्संत्यक्तमेतेन भुङ्क्ष्व[1] राज्यमखण्डितम् । पित्रा तीर्थोपविष्टेन किमिवापकृतं तव ॥३७८॥

द्वैधेच्छुभिः पात्यमानो व्यसनेस्मिन्सुदारुणे । प्रयास्यसि दिनैरेव रिक्तोप्यत्यन्तरिक्तताम् ॥३७९॥

380 नय सेनाः पितुर्भीतिर्जीवन्त्यां मयि नास्ति ते । ऋजुमेनं नयस्वार्द्रं प्रत्युतानुनयोक्तिभिः ॥३८०॥

इति दूतमुखैर्गूढं पुत्रो मात्रा कृतार्थनः । सर्वाशाभ्योनयत्सैन्यं रात्रावेव निजान्तिकम् ॥३८१॥

श्रुतापसारं सैन्यानां दूतैश्चैत्य प्रसादितम् । उपलेभे पतिं प्रातर्धृष्टा प्रत्युत वल्लभा ॥३८२॥

राज्ञ्या मिथस्तयोरेवं[1] शमिताक्षेपयोरपि । पिशुनप्रेरणात्प्राप कालुष्यं धीः क्षणे क्षणे ॥३८३॥

वैरस्य रूप[1]मेतद्धि भेदं याति मुहुर्मुहुः । संधीयमानमपि यच्छिन्नाम्बरमिवाशयम् ॥३८४॥

385 बाह्याल्यादौ[1] सुतोदन्तं श्रुत्वा तप्ताशयो नृपः । गृहं प्रविष्टो धृष्टस्त्रीभाषितैर्जडतां ययौ ॥३८५॥

एवं प्रतिदिनं तप्तस्त्यक्ततापः प्रतिक्षपम् । स्वच्छाशयः शरत्तुच्छ[1]तडाकौपम्यमाययौ ॥३८६॥

चकार पितृपक्ष्याणां पुत्रो वेश्मादिनाशनम् । पिता तु पुत्रपक्ष्याणां न किंचित्स्त्रीवशीकृतः ॥३८७॥

पुत्रस्नेहान्धया पत्न्या बाधितैश्चानुयायिभिः । रूक्षोक्तिभिस्ताप्यमानस्तस्थौ दुःस्थः सदा[1] नृपः ॥३८८॥

राज्यं जिहीर्षुः पुत्रस्य निःशूरं तद्बलं विदन् । ईषत्स जिन्दुराजस्य गणनां पौरुषेकरोत् ॥३८९॥

390 पुत्राज्जिहीर्षुणा राज्यं तेन तन्वङ्गनन्दनाः । प्रार्थ्यन्ते स्म तदा राज्यकृतये तत्पराङ्मुखाः ॥३९०॥

संप्रेर्य तं तदा रात्रौ स्वान्वया[1]शर्मशङ्किनी । हर्षं देवी नृपं कर्तुं दूतैराहूतवत्यभूत् ॥३९१॥

स पितामहयो[1]र्दूतैराहूतः साहसोन्मुखः । बाह्याल्यां निर्गतः सज्जै रक्ष्यमाणोपि रक्षिभिः ॥३९२॥

दत्तपार्ष्णिकषाघातः क्षणार्धेनोदलङ्घयत् । मनोजवेनाभग्नौजा वाजिना पञ्चयोजनीम् ॥३९३॥

वाजिनं विजिताभ्यासमनुगन्तुं समुद्यताः । अगच्छन्बहवो मार्गे दीनाः सेनाहयाः श्रमम् ॥३९४॥

395 प्राप्तस्य पादयोस्तस्य पतितस्य पितामहौ । आनन्दास्रुजलस्यन्दैरभिषेकं प्रचक्रतुः ॥३९५॥

पुत्रे तन्निकटं प्राप्ते कलशः कम्पिताशयः । अप्रियाचरणात्पित्रोः संधित्सुः स न्यवर्तत ॥३९६॥

स तस्य नगरात्पत्रीः पार्श्वं प्राज्ञो व्यसर्जयत् । अकरोद्विप्लुते राष्ट्रे स्वभेदस्याप्रकाशनम् ॥३९७॥

एवं प्रवर्धमानेपि वैरे कलशभूपतिः । कंचित्कालं मते मातुरवर्तिष्ट मनागिव ॥३९८॥

खशालाः कलशादेशाद्वियासोः कम्पनापतेः । तया प्रावर्तितनतेर्मार्गे संत्याजितः पतिः ॥३९९॥

400 अत्रान्तरे शमयितुं वैरं देशोपघातकृत् । तावुद्दिश्य पितापुत्रौ द्विजाः प्रायं प्रचक्रिरे ॥४००॥

---

३७५. [1]) Thus corr. by $A_3$ from $A_1$ °वींशिषे. ३७६. [1]) $A_3$ gloss अश्वं. ३७८. [1]) Thus corr. by $A_3$ from $A_1$ भुङ्क्ष. ३८३. [1]) $A_3$ gloss अनन्तकलशयोः. ३८४. [1]) रूप supplied by $A_3$ in space left by $A_1$. ३८५ [1]) Thus corr. by $A_3$ from $A_1$ बाह्याला°. ३८६. [1]) °त्तुच्छ supplied by $A_3$ in space left by $A_1$. ३८८. [1]) Thus $A_3$; $A_1$ तदा. ३९१. [1]) Thus corr. by $A_3$ from $A_1$ स्वन्व°. ३९२. [1]) $A_2$ gloss पितामहयोः पितामहपितामह्योः.

संधिबन्धे समुत्पन्ने ततस्तदनुरोधतः । दंपती संप्रविष्टौ तौ सार्धं मासद्वयं पुरम् ॥४०१॥

जयानन्दादिबुद्ध्याथ बुद्ध्वा बन्धोद्यतं सुतम् । भूयोपि ययतुः खेदान्निर्गत्य विजयेश्वरम् ॥४०२॥

तस्याश्वत्रासकूटानि पुत्रो रात्रावदाहयत् । व्यापादयत्पदातींश्च विषशस्त्राभियुक्तिभिः ॥४०३॥

तथा प्रवर्धमानेपि विरोधे सत्यरोधयत् । वात्सल्यविवशा राज्ञी भर्तुः प्रतिचिकीर्षितम् ॥४०४॥

लुड्डाभिधाभूत्कैवर्तबन्धकी तद्विधेयधीः । थक्कडामरनामा च तज्जारः खलतिस्तदा ॥४०५॥ 405

स तन्नाम्नैव दुष्टात्मा कथ्यमानौ समीपगैः । शुश्राव पितरौ[1] नित्यं लीलास्मितसिताननः ॥४०६॥ युग्मम् ॥

तौ दंपती पुनर्हैमतुलापुरुषयुग्मदौ । चित्राभिर्धर्मचर्याभिर्मनस्तापममुञ्चताम् ॥४०७॥

यदा पुनस्तयोर्दार्ढ्यमाद्यत्वान्न व्यहीयत । तदा सेर्ष्यः स दुष्पुत्रो रात्रौ वह्निमदापयत् ॥४०८॥

तेनाग्निनोर्वरीशस्य सर्वोपकरणैः समम् । भस्मावशेषमभवद्विजयेश्वरपत्तनम् ॥४०९॥

सर्वनाशशुचा दीना राज्ञी मर्तुं समुद्यता । तन्वङ्गपुत्रैश्चकृषे कथंचिज्ज्वलतो गृहात् ॥४१०॥ 410

त्यक्तांशुकानि शय्याभ्यो निशायां सुप्तमुत्थितम् । निःशेषं राजसैन्यं तदजायत दिगम्बरम् ॥४११॥

तद्राजधानीसौधाग्रात्पश्यन्कलशभूपतिः । तोषादनृत्यज्ज्वालौघैर्गगनालिङ्गिभिः समम् ॥४१२॥

अतरन्नष्टसर्वस्वः स पारं सरितो नृपः । निममज्ज सजानिस्तु दुस्तरे शोकसागरे ॥४१३॥

संप्राप्य प्रातरप्लुष्टं रत्नलिङ्गं नृपाङ्गना[1] । व्यक्रीणा[2]ल्लक्षसप्तत्या टाकानां पार्श्वमी[3]युषाम् ॥४१४॥

क्रीत्वा च[1] प्रददौ पूर्वं भृत्यानां भोजनांशुके । धनेन तेन निर्दग्धान्यपि धामान्यशोधयत् ॥४१५॥ 415

भस्मकूलतलात्तावल्लब्धं स्वर्णादि भूभुजा । कथापि यावतो हन्त ग्रथयत्यद्य कौतुकम् ॥४१६॥

राजा शून्याटवीभूते पत्तने तत्र सानुगः । नडत्वग्ग्र[1]थितच्छत्रपटलाच्छादितेवसत् ॥४१७॥

तावत्यप्यर्थसामर्थ्ये चिकीर्षोस्तत्पुरं नवम् । विना राजोचितामाज्ञां न सिद्धं वृद्धभूपतेः ॥४१८॥

अदृष्टाभिभवो मातुरानुकूल्यान्नवो नृपः । परितापं पितुस्तैस्तैर्दुःसंदेशैः सदाकरोत् ॥४१९॥

निर्बन्धादथ पुत्रेण पर्णोत्सगमनं पिता । निर्वासनोत्सुकेनोक्तः शश्वद्दूतमुखैर्यदा ॥४२०॥ 420

प्रभवन्त्या यदा चासीत्पत्न्या तस्यैव वस्तुनः । निष्पत्तये प्रेर्यमाणः साधिक्षेपं क्षणे क्षणे ॥४२१॥

तदा जातु रहः कुप्यंस्तन्वङ्गे थक्कने स्थिते । उवाचानुक्तपूर्वं तामेवं स परुषं वचः ॥४२२॥ तिलकम् ॥

अभिमानो यशः शौर्यं राज्यमोजो मतिर्धनम् । मया जायाविधेयेन हन्त किं किं न हारितम् ॥४२३॥

मिथ्योपकरणं नारीर्गणयन्ति नृणां जनाः । परिणामे तु नारीणां क्रीडोपकरणं नराः ॥ ४२४ ॥

द्वेषोन्मेषात्प्रसक्ताभिर्विरक्ताभिरसूयया । के नाम नात्र कान्ताभिः कृतान्तस्यातिथीकृताः ॥४२५॥ 425

रूपं काश्चिद्बलं काश्चित्प्रज्ञां काश्चिच्च कार्मणैः । पुंस्त्वं काश्चिदसून्काश्चि[1]द्भर्तृणां जहुरङ्गनाः ॥४२६॥

हरन्ति ग्रावभिरिव क्ष्मां पुत्रैरन्यगोत्रजैः । मत्ताः पयोधरौन्नत्यात्तरङ्गिण्य इवाङ्गनाः ॥४२७॥

पर्यन्ते वेतनमिमे किं जीर्णैरीदृशैरिति । पोषयन्ति सुतान्भर्तॄञ्शोषयन्ति तु योषितः ॥४२८॥

सर्वकालं विदित्वापि दोषान्योषित्कृतानमून् । प्रतिपत्त्यनुरोधेन मयेयं नावधीरिता ॥४२९॥

---

४०६. [1]) $A_2$ gloss पितराविति पितरौ राजा राज्ञी च राजा थक्कडामरनाम्ना समीपगैः कथ्यमानः राज्ञी च लुड्डाभिधा कैवर्ती नाम्ना कथ्यमाना उपहासार्थमित्यर्थः. ४१४. [1]) Thus corr. by $A_3$ from $A_1$ नृपात्मजा.—[2]) Thus corr. by $A_3$ from $A_1$ विक्री°. [3]) Thus $A_3$; $A_1$ पूर्वमीयु°. ४१५. [1]) Thus $A_1$; $A_3$ तत्प्र°. ४१७. [1]) नडत्वक् । पिचू इति भाषया. ४२६. [1]) वसून्काश्चि supplied by $A_2$ in space left by $A_1$.

430 प्रभविष्णुर्निहत्येयमैहिकीः सुखसंपदः । परलोकसुखस्याशामपि हन्तुं ममोद्यता ॥४३०॥

वलीपलितयुक्तस्य नेदीयोमरणावधेः । विहाय विजयक्षेत्रं कुत्र गन्तुं ममोचितम् ॥४३१॥

क्षपाकरकलामौलेः किल्बिषक्षपणक्षमा । द्वारोपकण्ठसंसेवोत्कण्ठा कुण्ठीभवेत्कथम् ॥४३२॥

पुत्रो लोकद्वयत्राता कस्यान्यस्येदृशो भवेत् । तीर्थात्प्रस्थापयन्मां यत्कुपथे मृतमिच्छति ॥४३३॥

प्रतिभात्यवगीतोयं प्रवादो मेद्य चेतसि । अनयान्यकुलोद्भूतो यदयं संप्रवेशितः ॥४३४॥

435 विसंवादिनमाकाराचारैर्बन्धुविरोधिनम् । पुत्रं पितुरसंश्लिग्धं जानीयादन्यरेतसम् ॥४३५॥

सुचिराविष्कृताकूतां त्यक्त्वा प्राणाय यन्त्रणाम् । एवं वदन्पतिस्तस्याश्चक्रे मर्मसु ताडनम् ॥४३६॥

गोत्रजस्य पुरः पुत्रोत्पत्तिगुह्ये प्रकाशिते । आमृष्टविप्रियालापा साभूदधिकलज्जिता ॥४३७॥

महत्तमस्य पुत्रो हि प्रशस्ताख्यस्य सोभवत् । विपन्नापत्ययोपात्तस्तयेत्यासीज्जनश्रुतिः ॥४३८॥

उत्सिक्तभाषितं भर्तुर्योषितो जितभर्तृकाः । जानन्त्यन्त्याङ्घ्रिसंवृत्तशिरस्ताडनसंनिभम् ॥४३९॥

440 अतः सा सुदृढं प्रौढिसंस्कारपरुषं वचः । प्राकृतप्रमदेवोच्चैरित्युवाच रुषा पतिम् ॥४४०॥

गतश्रीस्तापसो मन्दो जातभाग्यविपर्ययः । वृथा वृद्धः क्व किं वाच्यमिति मूढो न वेत्त्ययम् ॥४४१॥

स्नात्वोत्थितस्य यस्यास्य नाभूत्प्रावरणं पुरा । लोको जानात्ययं किं न तेन मां प्राप्य हारितम् ॥४४२॥

स्वकुलस्त्रीसमुचितं यत्किंचिन्मामभाषथाः । क्रियते किं न कालोयं यत्प्रायश्चित्तसेवने ॥४४३॥

अकर्मण्यो गतवया देशात्पुत्रेण वारितः । पत्न्यापि त्यक्त इत्यस्मात्परिवादाद्धि मे भयम् ॥४४४॥

445 कुलदोषादिवृत्तान्तगर्भोपालम्भनिर्भरैः । वचोभिर्व्यथितस्तस्यास्तस्थौ तूष्णीं यदा नृपः ॥४४५॥

तदा तस्यासनप्रान्तनिःसृतः प्रसरन्बहिः । निर्विकाराकृतेर्व्यक्तं ददृशे रक्तनिर्झरः ॥४४६॥

संभ्रान्तायां ततो राज्यामपश्यत्यक्कनो रुदन् । असिधेनुं गुदे तेन क्रुधा राज्ञा प्रवेशिताम् ॥४४७॥

ततोतिधीरो राजैव तं लज्जाचकितोन्वशात् । राज्ञो रक्तातिसरणं जातमित्युच्यतां बहिः ॥४४८॥

विधेया नारीणां तनयनिहिताशेषविभवाः कृतम्लानौ भृत्ये पुनरुदितविस्रम्भरभसाः ।

नयन्तो गण्यत्वं प्रसभमभियोगैर्लघुमरिं[1] नयत्यक्ताः क्षमापाः प्रलयमुपगच्छन्ति न चिरात् ॥४४९॥

450 नृपतिर्वाहितहयः शरदातपखेदितः । तृष्यन्निपीय धान्याम्बु[1] च्युतासृग्जात इत्यभूत् ॥ ४५०॥

गम्भीरै राजपुरुषैस्तथा वार्ता प्रवर्तिता । यथा नाबुद्ध वृत्तान्तमेतं कोपि बहिर्जनः ॥४५१॥ युग्मम् ॥

वत्सरे सप्तपञ्चाशे पौर्णमास्यां स कार्तिके[1] । विजयेशाग्रतो राजा जीवितेन व्ययुज्यत ॥४५२॥

पत्न्याः पुत्रस्य चोद्वेगैस्त्यक्तो राजा सुखोचितः । प्रसार्य पादौ निद्रातुं प्राप सोवसरं चिरात् ॥४५३॥

चुकोपासौ न कस्मैचिच्चुकोपास्मै न कश्चन । चक्रे सुखी विमन्युश्च मरणेन महामनाः ॥४५४॥

455 संग्रामराजदायादो न कस्यचिदिव प्रियः । अंशुकाच्छादितो भूमावनाथ इव सोस्वपत्[1] ॥४५५॥

न प्रियाक्रन्दितैः खिद्यन्न कुप्यन्नप्रियोक्तिभिः । सर्वत्यागी ययौ राजा दीर्घनिद्रारसज्ञताम् ॥४५६॥

दाक्षिण्योल्लङ्घनप्रायश्चित्तायेव त्यजन्नसून् । कृतज्ञया पतिः पत्न्या ततो निन्ये सनाथताम् ॥४५७॥

---

४४९. [1]) Thus $A_3$; $A_1$ °योगं लघु°. ४५०. [1]) $A_2$ gloss धान्यं धनिका धान्यवल् इति भाषया। तदम्बु. ४५२. [1]) Thus corr. by $A_3$ from $A_1$ क्षपान्तिके. ४५५. [1]) Thus corr. by $A_2$ from $A_1$ सोभवत्.

आराजपुत्रचण्डालं देयं प्रत्यहवेतनम् । ददौ स्वस्थेव भृत्येभ्यः सा कर्तुमनृणं पतिम् ॥४५८॥
गृहीतवेतना भृत्याः कोशं[1] सर्वे तया स्वयम् । पुरस्ताद्विजयेशस्य नप्तुः क्षेमाय पायिताः ॥४५९॥
पादन्यस्तशिराः पौत्रो रुदन्नर्पितकोशया । मूर्धन्याघ्राय कथितो मा पितुर्विश्वसीरिति ॥४६०॥ 460
उत्थितैव[1] ततो भूत्वा स्वयमात्तलता[2] सती । प्रातिहार्यं[3] व्यधाद्भर्तुः कारयन्त्यन्तमण्डनाम् ॥४६१॥
सादिनां शतमादिश्य नप्तुस्तत्रैव रक्षणे । सा पुनः शिविकारूढमथ प्रास्थापयत्पतिम् ॥४६२॥
क्षपामेकां दिनार्धं च स्थित्वैवं पतिदेवता । प्रणम्य विजयेशानं युग्यारूढा विनिर्ययौ ॥४६३॥
निर्यान्तौ वीक्ष्य तौ प्रेततूर्यकल्लोलमिश्रितैः । लोकस्याक्रन्दतुमुलैर्भग्ना इव दिशोभवन् ॥४६४॥
विमानस्योत्पताकस्य परिष्कारेषु बिम्बिताः । प्रजा राज्ञोन्तिके रेजुरनुगन्तुमिवोद्यताः ॥४६५॥ 465
राज्ञां वितीर्णस्कन्दानां[1] मरुल्लोलाः शिरोरुहाः । विमानस्थस्य नृपतेरवहंश्चामरश्रियम् ॥४६६॥
पश्यन्ती[1] पश्चिमां सेवां सैन्यानां नृपतिप्रिया । अस्ताभिलाषिणि दिने प्रपेदे पितृकाननम् ॥४६७॥
दुस्त्यजात्सुतवात्सल्याद्यद्वा केनापि हेतुना । सा बभूव क्षणे तस्मिंस्तनयालोकनोत्सुका ॥४६८॥
जानन्ती पवनोद्धूतं रजः सेनासमुत्थितम् । चकितोत्कण्ठिता साभूत्कलशागमनाशया[1] ॥४६९॥
तस्मिन्क्षणे जनाः केचिदायाता नगराध्वना । अङ्ग किं कलशः प्राप्त इति पृष्टास्तया स्वयम् ॥४७०॥ 470
स तु पुत्रः क्षणे तस्मिन्यियासुर्मातुरन्तिकम् । दत्त्वा विभीषिकास्तास्ता निरुद्धो द्वैधकारिभिः ॥४७१॥
ततो गृहीतनैराश्या राज्ञी पुत्रावलोकने । सा प्रार्थयित्वा वैतस्तं वारि शोकमथापठत् ॥४७२॥
वैतस्तेन तु तोयेन जठरस्थेन ये मृताः । मोक्षं गच्छन्त्यसंदेहं ते यथा ब्रह्मवादिनः ॥४७३॥
उपनीतं वितस्ताम्बु पीत्वोपस्पृश्य चाथ सा । एवं शशाप पिशुनान्स्नेहसंक्षयकारिणः ॥४७४॥
जनितं प्राणहृद्वैरं यैः पुत्रेण सहावयोः । सान्वयानां क्षयस्तेषां भूयात्परिमितैर्दिनैः ॥४७५॥ 475
तस्यास्तेनोपतप्तायाः शापेनाव्यभिचारिणा । क्षिप्रमेव जयानन्दजिन्दुराजादयो मृताः ॥४७६॥
चक्रे हलधरापत्यजातकौलीनशान्तये । परलोकं पणीकृत्य युक्त्या च शपथं सती ॥४७७॥
एवं विशुद्धशीलत्वं संप्रकाश्य शुचिस्मिता । कर्णीरथाददाज्झम्पां ज्वलिते जातवेदसि ॥४७८॥
अजायत नभो वह्निज्वालावलयमालितम् । तदागमोत्सवे दत्तसिन्दूरमिव निर्जरैः ॥४७९॥
साक्रन्दैर्न चटत्कारी दुःखोत्तप्तैर्न चोष्मलः । परमालेख्यलिखित इव जज्ञे शिखी जनैः ॥४८०॥ 480
गङ्गाधरष्टक्किबुद्धो युग्यवाहश्च दण्डकः । तावुद्वा नोनिका वल्गा चेति दास्यस्तदान्वयुः ॥४८१॥
बप्पटोद्भटयोः कुल्यौ सेनटक्षेमटावुभौ । भूपालवल्लभावास्तां वैराग्याद्विजयेश्वरे ॥४८२॥
भावा यन्त्वनिसर्गभङ्गुरतरास्तिष्ठन्ति नैते चिरं चेतःकाचघटस्य[1] तस्य घटते दीर्घोयमेको गुणः ।
यत्तस्मिन्निहितप्ररूढि न गलत्यायाति न म्लानतां धत्ते नापचयं चमत्कृतिवचो गीर्वाणगङ्गापयः ॥४८३॥
एकषष्टिमतिक्रम्य वर्षान्भूपतिरायुषः । सपत्नीकः पुरारातिगौरीसायुज्यमासदत् ॥४८४॥

---

४५९. [1]) $A_3$ gloss दिव्यं. ४६१. [1]) उत्थि supplied by $A_2$ in space left by $A_1$.—[2]) $A_3$ gloss आत्ता गृहीता लता यया.—[3]) $A_3$ gloss द्वास्स्थत्वं. ४६६. [1]) $A_3$ gloss वितीर्णाः दत्ताः स्कन्दाः भुजशिरांसि शिविकावाहनार्थं यैः तेषां. ४६७. [1]) Thus corr. by $A_3$ from $A_1$ पश्यन्त्यपश्चि°. ४६९. [1]) Thus corr. by $A_3$ from $A_1$ °गमाशया. ४८३. [1]) $A_3$ gloss चेतोरूपे काचघटे शीश इति प्रसिद्धे.

485 अथास्थीनि समादाय चतुर्थे दिवसे तयोः | पुत्रास्तन्वङ्गराजस्य सर्वे गङ्गां प्रतस्थिरे ||४८५||
पैतामहेन कोशेन परिवारेण चान्वितः | पित्रा विरोधं जग्राह हर्षस्तु विजयेश्वरे ||४८६||
आद्ये पिता पुरवरे[1] पिता श्रीविजयेश्वरे | तस्मिन्पुत्रस्तु तत्रासीत्पिता तु नगरान्तिके ||४८७||
ततोतिव्ययिनं पुत्रं दरिद्रो नीतिमान्पिता | अभ्यर्थ्यानर्थभीतश्च संधिं दूतैरयाचत ||४८८||
स तैरसकृदायातैरुत्सिक्तो युक्तवादिभिः | राजपुत्रः समं पित्रा संधिं निन्ये कथंचन ||४८९||
490 रक्षां पैतामहे कोशे शरीरे चात्मजन्मने | प्रतिशुश्राव जनकः कृतप्रत्ययहवेतनः ||४९०||
नृपतेः पुत्रमानेतुं विशतो विजयेश्वरम् | दृष्टिः क्षुष्टैर्गृहैर्दग्धा श्रुतिश्च जनगर्हया ||४९१||
स पीतकोशः संगृह्य तनयं प्राविशत्पुरम् | कोशं चास्थापयन्मुद्रां दत्त्वा तदभिधाङ्किताम् ||४९२||
अत्रान्तरे तस्य राज्ञो धार्मिकी धीरजायत | दारिद्र्यच्छेदिनी धर्म्या धनबुद्धिश्च सर्वतः ||४९३||
तनयो नयनाख्यस्य कल्यः सेल्यपुरौकसः | कुटुम्बिनो जय्यकाख्यः क्रमाड्डामरतामगात् ||४९४||
495 स्थलोत्पत्तिः स दिग्देशविक्रीतान्नो वणिज्यया | संभृतार्थः शनैर्लुब्धो धने[1]शस्पर्धितां दधे[2] ||४९५||
सार्धं क्रोशं खनित्वा स नित्यं दीनारराशिभिः | पूरितायाः क्षितेः पृष्ठे बहून्व्रीहीनवापयत् ||४९६||
दीनारन्यसनं भृत्यैः कारयित्वा प्रतिक्षपम् | बहवो भेदभीतेन तेन गूढं निपातिताः ||४९७||
स भाङ्गिलं लब्धुमिच्छन्बलेकस्मात्पलायिते | द्राक्षालतानिरुद्धाश्वो हतः केनापि पत्तिना ||४९८||
तदीयेनोपलब्धेन धनेन वसुधातलात् | पर्याप्तेनात्यजद्राजा यावदायुर्दरिद्रताम् ||४९९||
500 समृत्स्नु क्षाल्यमानेषु तद्दीना[1]रेष्वहर्निशम् | कलुषाम्भा बहून्मासान्वितस्ता समपद्यत ||५००||
दानोपभोगरहिताः काले क्लेशेन भूयसा | अन्यार्थमर्थान्रक्षन्ति चित्रं लुब्धा महाशयाः ||५०१||
प्राणान्धारयते निपीय मरुतः शेते तमोन्धे बिले संभोगे परदत्तमिच्छति पटं नग्नस्त्रपाशान्तये |
विस्तार्यैति कदर्यतामहिरवत्यन्यस्य हेतोर्निधीन्नान्यः कोपि परं परोपकृतिषु प्रौढोऽस्ति लुब्धं विना ||५०२||
अन्यैश्च बहुभिर्मार्गैर्नद्यः सिन्धुमिवाविशन् | नानार्थसंपदस्तास्ता[1] भाग्यभाजं महीभुजम् ||५०३||
अर्था भाग्योदये जन्तुं विशन्ति शतशः स्वयम् | दिग्भ्योभ्युपेत्य सर्वाभ्यः सायं तरुमिवाण्डजाः ||५०४||
स्रोतांसि प्रबलत्वमेत्य वसुधां मूलेषु पुष्णन्त्यधो व्योम्नोम्भः पतति त्यजन्ति हरितो वारि प्रणालीमुखैः |
505 इत्थं शुष्कसरः पयोदसमये संपूर्यते सर्वतो भाग्यानामुदये विशन्ति शतशो द्वारैर्न कैः संपदः ||५०५||
जनरक्षणदाक्षिण्ये ततः[1] पितुरिवान्वहम्[2] | कुशला कलशस्यासीत्प्रजापुण्योदयैर्मतिः ||५०६||
स्वयं वणिगिवार्थानां गणनाकुशलोपि सः | विवेक्ता सत्पथत्यागे मुक्तहस्तः सदाभवत् ||५०७||
उपस्थितौ भाविनौ च पश्यन्नायव्ययौ स्वयम् | अन्तिकान्नात्यजद्भूर्जखटिकादि नियोगिवत् ||५०८||
तस्य स्वरूपमूल्येन रत्नादि क्रीणतः स्वयम् | नाशकन्वञ्चनां कर्तुं केपि विक्रयकारिणः ||५०९||
510 त्रिवर्गं सेवमानः स विभज्य समयं सुखी | मध्याह्नादूर्ध्वमभवदद्दृश्यः सर्वकार्यिणाम् ||५१०||
तस्य स्वेषां परेषां च कृत्यमन्विष्यतश्चरैः | अज्ञातः स्वप्रवृत्तान्तः प्रजानामभवद्यदि ||५११||

---

४८७. [1]) Thus emended with G; A पुत्रवरे. ४९५. [1]) शस्प supplied by $A_3$ in space left by $A_1$.—[2]) Thus corr. by $A_2$ from $A_1$ धेतामगात्. ५००. [1]) Emended; A तद्दीनां°. ५०३. [1]) Thus corr. by $A_3$ from $A_1$ °स्ताता. ५०६. [1]) ततः supplied by $A_3$ in space left by $A_1$.—[2]) Thus corr. by $A_3$ from $A_1$ °वान्तिकम्.

स्ववेश्मेव गृहस्थस्य ध्यायतश्चास्य मण्डलम् । जनो जनपदे जातु न कश्चिद्दैन्यमस्पृशत् ॥५१२॥
कौलीनचकितो राजा कुर्वन्कण्टकशोधनम् । प्रकटं नात्यजद्दण्डं चौरेभ्योपि स जातु चित् ॥५१३॥
न तस्यार्थः कोपि नष्टो मन्त्रिणो यमयोजयन् । मन्त्रिणां स पुनश्चक्रे नष्टस्यार्थस्य योजनम् ॥५१४॥
विवाहयज्ञयात्रादिमहोत्सवशताकुलः । नित्यप्रहृष्टो निर्दैन्यस्तद्राज्ये ददृशे जनः[1] ॥५१५॥ 515
तेन नीतिविदाक्रान्ताः क्ष्माभुजः क्षित्यनन्तराः । आहाराचरणेप्यासंस्तदध्यक्षान्विनाक्षमाः ॥५१६॥
तन्वङ्गस्थस्थ[1]कनादींस्त्रीनायातान्दिगन्तरात् । व्ययितैकानुजान्मल्लप्रमुखान्गुङ्गजानपि ॥५१७॥
अप्रीणयद्बन्धुभृत्यान्स भव्याभिर्विभूतिभिः । कलाभिरमृतार्द्राभिः सोमः[1] सुरपितॄनिव ॥५१८॥ युग्मम् ॥
अवाप्तपरिपाकोपि दौःशील्येन न भूपतिः । कुदैशिकोपदिष्टेन दुष्टाचारेण चोज्झितः ॥५१९॥
टक्केन वुल्लियाख्येन कन्यकाः समुपाहृताः । क्रीतास्तस्य तुरुष्केभ्यो[1] नानादिग्देशसंभवाः ॥५२०॥ 520
स ताभिः परदारैश्च रूपलोभादुपाहृतैः । अवरोधपुरंध्रीणां ह्रासप्रतिमढौकयत् ॥५२१॥
बह्वीः कामयमानस्य योषितः प्रतिवासरम् । मत्स्ययूषादिभिर्वृष्यैर्[1]नास्य पुष्टिरहीयत ॥५२२॥
महासमयपूजासु व्यग्रः स गुरुभिः समम् । महाचरूणामाहारं नीतिमुत्सृज्य चाकरोत् ॥५२३॥
एवं शवलकृत्येन पुरं तेन नवीकृतम् । निर्दग्धे विजयक्षेत्रे शिलावेश्म न[1] शूलिनः ॥५२४॥
विजयेशशिलावेश्ममौलावातपवारणम् । नृपोम्बरशिरश्चुम्बि जाम्बूनदमयं व्यधात् ॥५२५॥ 525
व्ययस्थितिं चानपायां व्यधत्त त्रिपुरेश्वरे । पिनाकिनश्च प्रासादं स स्वर्णामलसारकम् ॥५२६॥
ततः सत्कर्मकुशलश्चकार कलशेश्वरम् । निःसंख्यहाटकघटीपटलाङ्कशिलागृहम् ॥५२७॥
कलशेशोपरि छत्त्रं चिकीर्षोः काञ्चनाञ्चितम् । तुरुष्कदेशजः शिल्पी राज्ञोभ्यर्णमुपाययौ ॥५२८॥
सहस्रैर्भूरिभिर्हेम्नश्छत्त्रसिद्धिं वदन्कलाम् । स छादयन्निजां ताम्रे काञ्चनारोपणं विदन् ॥५२९॥
कानिचिद्दिवसान्यासीत्प्राप्नुवन्नृपसत्क्रियाम् । ततोतितीक्ष्णप्रज्ञेन नोनकाख्येन मन्त्रिणा ॥५३०॥ 530
अभ्यूह्य शिक्षितकलो विलक्षोगाद्यथागतम् । तच्च छत्त्रं ययौ सिद्धिमत्यल्पैरेव काञ्चनैः ॥५३१॥
अनन्तेशाभिधं बाणलिङ्गमन्याश्च भूपतिः । प्रतिष्ठा विविधाश्चक्रे स शक्राधिकवैभवः ॥५३२॥
नृपे सहजपालाख्ये शान्तिं यातेभ्यषिच्यत । ततः संग्रामपालाख्यो राजपुर्यां[1] तदात्मजः ॥५३३॥
राज्यं जिहीर्षुर्बालस्य पितृव्यस्तस्य भूपतेः । भेजे मदनपालाख्यो बलीयानुद्यमं मदात् ॥५३४॥
तद्भयाच्छरणं प्रायान्नृपं साहायकार्थिनी । स्वसा संग्रामपालस्य[1] जस्सराजश्च ठक्कुरः ॥५३५॥ 535
कृतप्रसादो नृपतिः साहायककृते ददौ । तयोः पश्चाज्जयानन्दं भूरैर्बिज्जादिभिः समम् ॥५३६॥
तत्र विद्रावितामित्रः स[1] स्फूर्जन्क्रान्तमण्डलः । संग्रामपालामात्यानां कार्यान्ते शङ्कुतां[2] ययौ ॥५३७॥
काङ्क्षन्तो गमनं तस्य दत्त्वा तास्ता विभीषिकाः । ते त्रासमैच्छन्नाधातुं स वीरो न त्वकम्पत ॥५३८॥
मतिं राजपुरीयाणामसावेतामदादिति । शङ्कमानेन तेनाथ बिज्जे मन्युरुपाहृतः ॥५३९॥

---

५१५. [1]) Thus corr. by $A_1$ from जनैः. ५१७. [1]) Doubtful; thus A. ५१८. [1]) मः supplied by $A_3$ in space left by $A_1$. ५२०. [1]) Thus $A_3$; $A_1$ तुरुष्केन. ५२२. [1]) $A_5$ gloss वृष्यैः वाजीकरणैः. $A_2$ quotes: वृष्यकल्पतरौ पारिभद्ररसेनैव हिङ्गुलं याममात्रकम् । मर्दयित्वा पारदवत्पातयेत्पूर्वयुक्तितः । योजयेत्सर्वयोगेषु सप्तकञ्चुकवर्जितम् ॥. ५२४. [1]) न supplied by $A_3$ in space left by $A_1$. ५३३. [1]) $A_3$ gloss राजविर् इति भाषया. ५३५. [1]) Thus corr. by $A_3$ from $A_1$ संग्रामराजस्य. ३७. [1]) $A_4$ gloss जयानन्दः.—[2] Thus emended with G *sec. manu*; A शक्वतां.

540 तैस्तत्र दत्तद्रविणैः प्रार्थितोथ महामतिः । रक्षापदेशात्स्वं सैन्यं स्थापयित्वा न्यवर्तत ॥५४०॥
एवं राजपुरीं तस्मिन्स्वीकृत्यान्तिकमागते । तुतोष कार्यमर्मज्ञः प्राज्ञः कलशभूपतिः ॥५४१॥
क्रमाद्राजायमानेषु बिज्जादिष्वथ पस्पृशे । आमयेन जयानन्दो दैवात्प्रमयहेतुना ॥५४२॥
स्वास्थ्यवार्तोपलम्भाय भूपतिं गृहमागतम् । वाच्यमस्ति रहः किंचिदित्यूचे स कथान्तरे ॥५४३॥
निर्यातेष्वथ सर्वेषु किंचिन्नैवाब्रवीद्यदा । तदा ताम्बूलतिल्यक्षाव्याजाद्बिज्जो विनिर्ययौ ॥५४४॥
545 आप्तेनोक्तोपि निर्गच्छन्किं प्रयासीति भूभुजा । मन्त्रिणा चैत्य स प्राज्ञो बहिरेव व्यलम्बत ॥५४५॥
जयानन्दोभ्यधाद्भूपमुक्त्वा राजपुरीकथाम् । व्यक्तं नास्त्येव ते राज्यं बिज्जे वृद्धिमुपागते ॥५४६॥
आदीयमानाद्बिज्जेन कार्येभ्यो वेतनादपि । दर्शयामास गणनां बहुमूल्यां महीभुजे ॥५४७॥
प्राप्तः कलुषतां राजा प्रयातः स्वगृहांस्ततः । याचितो गमनानुज्ञां बिज्जेनेङ्गितवेदिना ॥५४८॥
निषेधन्निव दाक्षिण्यलेशान्निर्बन्धकारिणः । तस्यानुज्ञां ददौ गन्तुं सान्तस्तोषो महीपतिः ॥५४९॥
550 लब्धादेशो गृहान्गत्वा सर्वोपकरणैः समम् । प्रस्थाप्य सोग्रतो भ्रातॄनाप्रष्टुं नृपतिं ययौ ॥५५०॥
राजे[1]धर्मगभीरत्वक्रूरयोः स्वामिभृत्ययोः । काचिदेव क्षणे तस्मिंश्चेष्टाभूदद्भुतावहा ॥५५१॥
न यत्प्रभुः प्रियं भृत्यं गमनात्स न्यवर्तयत् । उपालेभे समन्युश्च न यद्भृत्यः प्रियं प्रभुम् ॥५५२॥
सहोत्थितेन कतिचित्पदानि सह भूभुजा । चिरं कृत्वा कथां नीचैर्हसन्बिज्जो विनिर्ययौ ॥५५३॥
जिन्दुराजं हलधरो मुमूर्षुर्दूषयन्यथा । तथा बिज्जं जयानन्दः स व्यवारोपयत्पदात् ॥५५४॥
555 तल्लक्ष्मीमात्रशेषां क्ष्मां कृत्वा गच्छन्विधीयताम् । हतार्थो बिज्ज इत्युक्तिं नाग्रहीन्मन्त्रिणां नृपः ॥५५५॥
निवर्तयिष्यति क्ष्माभृन्नियतं गमनादमुम् । इत्याशयान्वगाद्बिज्जं राजवर्जं जनोखिलः ॥५५६॥
आस्कन्दं शङ्कमानोस्थाद्बिज्जाद्राजा बलोर्जितात् । तृणस्पन्देपि चकितो निर्निद्रः पञ्च यामिनीः ॥५५७॥
तस्मिञ्शूरपुराद्[1]याते निवृत्तेष्वनुगन्तृषु । निवृत्तशङ्कस्तां शङ्कां प्रादुश्चक्रे स मन्त्रिणाम् ॥५५८॥
ते तदाकर्ण्य यं मन्त्रं बिज्जार्थहरणेब्रुवन् । तस्याविधाने भूभर्तुरमन्यन्त नयज्ञताम् ॥५५९॥
560 बिज्जादयस्तु निर्द्रोहा यं यं देशमशिश्रयन् । तत्र तत्रैव पूज्यत्वं रत्नानीव प्रपेदिरे ॥५६०॥
बिज्जोधिकं प्रवृद्धोपि दैवतस्येव भक्तिमान् । पश्चात्कलशदेवस्य सत्यंकारः सदाभवत् ॥५६१॥
एवं निर्वास्य बिज्जादीनचिरावाप्तवैभवः । क्षिप्रं सूर्यमतीशापाज्जयानन्दः क्षयं ययौ ॥५६२॥
राज्ञो विरोधकृद्व्यक्तुं शापस्याव्यभिचारिताम् । प्रमयं जिन्दुराजोपि तस्मिन्नेव क्षणे ययौ ॥५६३॥
तेपि बिज्जादयः क्षिप्रमचिरावाप्तसंपदः । प्रापुः शापोचितं सर्वे प्रमयं गौडमण्डले ॥५६४॥
565 आकस्मिकेथ प्रमये[1] बिज्जः प्रमयमाययौ । सुदीर्घबन्धनक्लेशं प्रापुस्तदनुजा अपि ॥५६५॥
पलायितेषु कारायास्तेषु व्याघ्रेण पाजकः[1] । हतस्[2]तदनुजाः शेषा भुक्तक्लेशाः क्षयं ययुः ॥५६६॥
द्वित्रास्तद्वै[1]धकाराणां नानश्यन्मदनादयः । अदीर्घेणैव कालेन दुरन्तैर्[2]र्भविष्यते ॥५६७॥
जयानन्दसहायोथ तत्पुत्रान्परिपालयन् । सर्वाधिकारी भूपेन वामनाख्यो व्यधीयत ॥५६८॥

---

५५१. [1]) Thus corr. by later hand from $A_1$ राज्य°. ५५८. [1]) $A_3$ gloss हूरपुर. ५६५. [1]) $A_2$ gloss आकस्मिके प्रमये मारीदोष इत्यर्थः. ५६६. [1]) Thus $A_1$; $A_3$ R G पाजकाः.—[2]) Thus $A_1$; $A_3$ ततस्त°. ५६७. [1]) Thus $A_1$; $A_3$ द्वित्रास्तु द्वैध°.—[2]) Thus corr. by $A_3$ from $A_1$ --तैस्तैर्भवि°.

यस्य तास्ता व्यवहृतीर्नीतिज्ञस्याद्भुतावहाः । वर्णयन्ति वयोवृद्धा गोष्ठीष्वद्यापि[1] धीमताम् ॥५६९॥
ग्रामानवन्तिस्वाम्यादिभोग्यानाहृत्य लुब्धधीः । राजा कलशगञ्जाख्यं कर्मस्थानं विनिर्ममे ॥५७०॥ 570
मन्त्रिणे नोनकायासौ धनोत्पादविदेऽप्यदात् । क्रौर्यत्रस्तो न पादाग्रं जनरक्षणदक्षिणः ॥५७१॥
मन्त्रिणो राजकलशापत्यान्यत्यन्तरङ्गताम् । लेभिरे क्ष्माभुजः पार्श्वे प्रशस्तकलशादयः ॥५७२॥
सुताः स्वाच्छन्द्यविवशाश्चौराः संध्यादिसंश्रयाः । युक्त्या निदधिरे राज्ञा निबद्धस्वाधिकारिणः ॥५७३॥
पुनर्मदनपालेन क्रान्ते राजपुरीपतौ । साहायकाय व्यसृजत्सेनान्यं बप्पटं नृपः ॥५७४॥
प्रतापैर्भूपतेस्तेन भृत्यांशेनापि[1] निर्जितः । बद्ध्वा मदनपालोऽपि कश्मीरान्संप्रवेशितः ॥५७५॥ 575
भ्राता वराहदेवस्य कन्दर्पाख्यो महीभुजा । कृतो द्वाराधिपो वीरो विदधे डामरक्षयम् ॥५७६॥
बभूव जिन्दुराजात्स शिक्षितो नयविक्रमौ । भूम्यनन्तरसामन्तमुकुटस्पृष्टशासनः ॥५७७॥
स राजपुर्यादिजयी द्वारं परमकोपनः । क्षणे क्षणेऽत्यजद्राज्ञा प्रसाद्य ग्राहितः स्वयम् ॥५७८॥
मदनः[1] क्षितिपालेन प्रापितः कम्पनेशताम् । लब्धप्रकर्षान्बोपादीन्डामरान्बहुशोऽवधीत् ॥५७९॥
सेवावशीकृतः श्येनपालं स[1] नगराधिपम् । चक्रे विजयसिंहाख्यं हताशेषमलिम्लुचम् ॥५८०॥ 580
कन्दर्पोदय[1]सिंहाद्यैः प्रहिते लोहरे सकृत् । राजा भुवनराजस्य दूरं निःसारणं व्यधात् ॥५८१॥
कीर्तिराजस्य तनयां स च नीलपुरप्रभोः । लब्ध्वा भुवनमत्याख्यां रिपोश्छिन्नाम[1]योऽभवत् ॥५८२॥
कार्यप्रतिग्रहे कर्तुं प्रवृत्तिं ग्राहितोऽभवत् । हत्वा विजयसिंहाद्यो नृपेण नगरेशताम् ॥५८३॥
गुङ्गात्मजः स मल्लोऽथ तेन द्वारपतिः कृतः । राज्ञां मौलिमणिस्थाने स्वप्रतापमरोपयत् ॥५८४॥ युग्मम् ॥
शौर्यं निष्परिवारस्य पार्थस्यो[1]त्तर[2]गोग्रहे । उरशासंप्रवेशे वा श्रुतं[3] मल्लस्य मानिनः ॥५८५॥ 585
पञ्चाशैस्तुरगैर्यत्स कृष्णां तीर्त्वा व्यपाहरत् । राज्यं वाजिव्रजैः सार्धमभयाख्यस्य भूभुजः ॥५८६॥
एवं वशीकृतभुवो भूपतेर्नयवेदिनः । सममेवाष्टभूपालास्त्रिषष्टेऽब्देविशन्पुरम् ॥५८७॥
कीर्तिन्यब्रपुराधीशश्चाम्पेयो भूभृदासटः । तुक्कात्मजस्तु कलशो वल्लापुरनरेश्वरः ॥५८८॥
राजा संग्रामपालाख्यः स च राजपुरीपतिः । उत्कर्षो लोहरोर्वीभृदौर्वशो मुङ्गजो नृपः ॥५८९॥
गाम्भीरसीहः कान्देशः काष्ठवाटधराधिपः । श्रीमानुत्तमराजोऽपि राजानमुपतस्थिरे ॥५९०॥ तिलकम् ॥ 590
राजलोकः प्रवृद्धोऽपि घने जनपदेऽभवत् । दुर्लक्ष्यो वार्षिकसरित्पूरो वारिनिधाविव ॥५९१॥
तस्मिन्क्षणे शिलीभूतवितस्तासलिले नृपैः । शीतक्षणेऽप्यसंक्षीणं सुखं तैरन्वभूयत ॥५९२॥
मनसापि हि भूपाला यत्ते किंचिदचिन्तयन् । प्राप्तमेव पुरेऽपश्यन्वामनेन तदाहृतम् ॥५९३॥
कौशलं मन्त्रिणस्तस्य रराजेतरदुर्लभम् । निमित्तं तदसंभ्रान्तो नित्यवद्योऽत्यवाहयत् ॥५९४॥
पार्थिवेष्वथ यातेषु मल्ले कार्यपराङ्मुखे । क्षितिपालेन कन्दर्पो द्वारं स्वीकारितः पुनः ॥५९५॥ 595
अभिमानधनो मन्त्री कृतारब्धिर्निजैर्धनैः । दुर्गं स स्वापिकं नाम युक्त्या दुर्ग्रहमग्रहीत् ॥५९६॥
स प्रविष्टोऽपि नगरं खिन्नः केनापि हेतुना । पार्थिवाभ्यर्थ्यमानोऽपि कार्यं नैवाग्रहीद्यदा ॥५९७॥

---

५६९. ¹) पि supplied by $A_3$. ५७५. ¹) Thus corr. by $A_3$ from $A_1$ °शेनाति. ५७९. ¹) $A_3$ gloss मदनपालः. ५८०. ¹) स supplied by $A_3$. ५८१. ¹) Thus corr. by $A_3$ from $A_1$ कन्दर्पोभ°. ५८२. ¹) Thus corr. by $A_3$ from $A_1$ °च्छिन्नाश्रयो°. ५८५. ¹) $A_3$ gloss अर्जुनस्य.—²) $A_3$ gloss उत्तरो विराटपुत्रः.—³) Thus $A_1$; $A_3$ द्रुतं.

तदा प्रशस्तकलशो[1] नित्यं दूत्यं समाचरन् । तदुत्सिक्तोक्तिसंतप्तः संस्पृशन्नभिमानिताम् ॥५९८॥
निजश्रियातिभूयस्या भूरीन्संगृह्य शस्त्रिणः । तत्पदे रत्नकलशं स्वभ्रातरमकारयत् ॥५९९॥
600 सोर्थैः क्रीत[1]प्रथोप्यासीन्न कन्दर्पसमः[2] क्वचित् । किं चित्रोल्लिखितः सिंहः सत्यसिंहक्रियां स्पृशेत् ॥६००॥
ततः क्रमेण भूभर्त्रा भृत्यरत्नं कथंचन । राजस्थानाधिकारं स नगरे ग्राहितः पुनः ॥६०१॥
अतिताडनतश्चौरे विपन्नेथ कृपाकुलः । त्यक्त्वा तमप्यधीकारं विषण्णो जाह्न[1]वीमगात् ॥६०२॥
पटान्तकृतसंरोधस्ताडयित्वा करं प्रभोः । कोपाद्देशान्तरं यातस्तं प्रत्यास्ते[1] स्म मन्युमान् ॥६०३॥
अत्यन्तखेदितोप्या[1]सीदानीतस्यान्तिकं पुनः । दर्पं हर्तुं नृपस्तस्य संनद्धो न तु जीवितम् ॥६०४॥
605 इत्थं पुरुषसिंहानां प्रौढदार्ढ्यो विसोढवान् । आरोहमवरोहं च सोन्तरज्ञः क्षमापतिः ॥६०५॥
उपाङ्गगीतव्यसनं नर्तकीसंग्रहादरः । देशान्तरोचितं राज्ञा तेनैवेह प्रवर्तितम् ॥६०६॥
ततो जयवनोपान्ते निरन्तरमहागृहम् । स्वनामाङ्कं पुरं कर्तुं प्रावर्तत विशांपतिः ॥६०७॥
मठाग्रहारप्रासादमहागृहपरंपराः । सत्तोयोपवनास्तत्र ययुः सिद्धिं सहस्रधा ॥६०८॥
अत्रान्तरे राजसूनुर्हर्षः सोत्कर्षपौरुषः । गुणैर्लेभे प्रकाशत्वमन्यभूपालदुर्लभैः ॥६०९॥
610 सोशेषदेशभाषाज्ञः सर्वभाषासु सत्कविः । कृत्स्नविद्यानिधिः प्राप ख्यातिं देशान्तरेष्वपि ॥६१०॥
लुब्धेन पित्रा संत्यक्ता जना नानादिगागताः । गुणशौर्योज्ज्वलास्तेन गृहीताः कृतवेतनाः ॥६११॥
अपर्याप्ते पितृकृते वेतने व्ययशालिनः । एकाहान्तरितं तस्य भोजनं त्यागिनोभवत् ॥६१२॥
पितरं गायन इव व्यक्तं गीतैः स रञ्जयन् । भर्तव्यभरणं चक्रे तद्दत्तैः पारितोषिकैः[1] ॥६१३॥
उद्गायति पुरस्तस्मिन्कदाचिदथ पार्थिवः । सभ्येषु प्रीयमाणेषु शौचायोत्थाय निर्ययौ ॥६१४॥
615 तेन प्रसङ्गभङ्गेन जाततेजोवधः सुधीः । क्षुभ्यन्वै[1]लक्ष्यकोपाभ्यां कुमारः[2] क्षितिमैक्षत ॥६१५॥
प्रभुर्वीतक्षान्तिः सुहृदतिशठः स्त्री परुषवाक्सुतो गर्वोन्नद्धः परिजन उदात्तप्रतिवचाः ।
इयान्सोढुं शक्यो ननु हृदयदाही परिकरो न तु श्रोतावज्ञालुलितनयनान्तं परिभवन् ॥६१६॥
पितुरेव तदा भृत्यो विश्शावट्टाभिधो विटः । शाधि राज्यं निहत्येमं नर्मणेवेत्युवाच तम् ॥६१७॥
अधिक्षिपन्स तं रोषान्नानेनोक्तमसांप्रतम् । इत्यासन्नेन हसता धम्मटेना[1]प्यकथ्यत ॥६१८॥
अग्रे भोगेच्छवश्छन्नाः कुमाराननुगान्पितुः । स्नेहं प्रदर्श्य स्वीकुर्युर्वेश्याः कामि[1]सखीरिव ॥६१९॥
620 पुनः सभां संप्रविष्टस्तं पिता पर्यतोषयत् । प्रीतिदायैस्ततस्तैस्तैः साधुवादैश्च मानिनाम् ॥६२०॥
अन्येद्युस्तु पितुः पार्श्वात्स भुक्त्वा स्वगृहान्गतः । अभ्येत्य विश्शावट्टेन तदेव जगदे रहः ॥६२१॥
उपपन्नं तत्तदुक्त्वा तेनाभीक्ष्णं निषेधता । निर्बध्नन्नपि हस्तेन सोथ कोपादताड्यत ॥६२२॥
लग्नाभिघातं रुधिरं वमन्तं घ्राणवर्त्मना । तं वीक्ष्य सोभिजातोभूत्सदाक्षिण्यो नृपात्मजः ॥६२३॥
भृत्यैः प्रक्षालयन्नस्रं तस्येदृक्पाप्मनो भवेत् । उक्तेनापीति कथयन्स्मित्वा वासांस्यदापयत् ॥६२४॥

---

५९८. [1]) Emended; A R G °कलशं. ६००. [1]) Thus $A_1$; $A_3$ नीत°.—[2]) Thus corr. by later hand from $A_1$ कन्दर्पः समः. ६०२. [1]) जाह्न supplied by $A_3$ in space left by $A_1$. ६०३. [1]) Thus corr. by $A_3$ from $A_1$ प्रत्यास्ने. ६०४. [1]) Thus $A_1$; $A_3$ °खेदितस्यासीदा°. ६१३. [1]) Emended; A °तोषकैः. ६१५. [1]) Thus $A_1$; $A_3$ क्षुभ्यद्वै°.—[2]) Thus corr. by $A_3$ from $A_1$ कुमाराः. ६१८. [1]) Emended; A धर्मटेना°. ६१९. [1]) Thus $A_1$; $A_3$ कामी स°.

अनिच्छोरपि तस्येच्छा दानात्तेनान्वमीयत । दुःशीलेना[1]न्यकामिन्याः स्मितमात्रादिव स्पृहा ॥६२५॥ 625

असकृत्कृतयत्नः स ततः कालेन भूयसा । तं प्रैरयत्तत्र कृत्ये मध्ये स्वीकृत्य धम्मटम् ॥६२६॥

स रोहद्रोहसंकल्पजन्मना पाप्मना श्रितः । संमन्त्र्य पितरं[1] हन्तुं तीक्ष्णान्प्रायुङ्क्त सर्वतः ॥६२७॥

शश्वत्स गोचरीभूतस्तेषां स्नेहलवस्पृशाम् । न घातितः सूनुना च वर्जिता न च तत्कथा ॥६२८॥

आप्तत्वं तीक्ष्णवर्गेऽथ प्रतिभेदभयाद्गते । तां विज्ञशाबद्ध एवाशु वार्तां राज्ञे न्यवेदयत् ॥६२९॥

बुद्ध्वान्राजपुत्रस्तत्त[1]स्मिन्नहनि जातभीः । भोक्तुं नागात्पितुः पार्श्वमपि दूतैः कृतार्थनः ॥६३०॥ 630

सोपि तस्मिन्ननायाते तत्रार्थे शा[1]न्तसंशयः । दिने तत्र मनस्तापान्नाभुङ्क्त सपरिच्छदः ॥६३१॥

सभ्रातृकस्य प्राप्तस्य प्रातर्दुःखं न्यवेदयत् । सुचिरं थक्कनस्याङ्के शिरो विन्यस्य सोरुदत् ॥६३२॥

उक्त्वा च धम्मटो[1]दन्तं बद्धा[2] तस्य समर्पणम् । विधेहीत्यभ्यधान्नापि तं भङ्गीभणितिक्रमैः ॥६३३॥

न कृताधिगमावावां कृत्यस्यास्येत्युदीर्य तम् । अभाषितां भ्रातुर[1]र्थे पुनस्तन्वङ्गनन्दनौ ॥६३४॥

त्वत्प्रसादबलाद्राजन्नापन्नत्राणदीक्षितौ । यावावां तत्प्रवेशा[1]र्थं व्यक्तद्वारं निशास्वपि ॥६३५॥ 635

कथं नु पृथिवीपाल प्राप्ते प्राणात्ययक्षणे । निर्दोषो वा सदोषो वा ताभ्यां संत्यज्यतेनुजः ॥६३६॥ युगलकम् ॥

स्वामिद्रोहापवादश्च भवेत्तद्रक्षणाद्ध्रुवम् । देशत्यागं तदुत्सृज्य शरणं नान्यदावयोः ॥६३७॥

इत्यादि संभाव्य तयोः पादन्यस्तोत्तमाङ्गयोः । रुदित्वा गमनानुज्ञां कथंचित्पार्थिवो ददौ ॥६३८॥

पथि कश्चिदमुं हन्यान्मध्यीकृत्येति धम्मटम्[1] । तौ विनिर्जग्मतुर्देशात्ततः सबलवाहनौ ॥६३९॥

तन्वङ्गजेषु यातेषु विविक्तीकृतमन्दिरः । सुतमानीय नृपतिः सान्त्वयन्निदमब्रवीत् ॥६४०॥ 640

आसंसारं जगत्यस्मिन्सर्वतः ख्यातकीर्तिना । जनकेनैव जन्यस्य[1] ज्ञप्तिरुत्पाद्यते जनैः ॥६४१॥

पुत्र शीतांशुनेवात्रिं दिग्द्वीपख्यातकीर्तिना । भवता तु सुपुत्रेण मां जानात्यखिलो जनः ॥६४२॥

स त्वं गुणवतामग्र्यो निरर्गलयशा भवन् । असाधुसेव्यमध्वानं वद कस्मान्निषेवसे ॥६४३॥

पैतामहं[1] निजं चार्थं यन्न तुभ्यं समार्प्यर्यम्[2] । तत्र हेतुमनाकर्ण्य नासूयां कर्तुमर्हसि ॥६४४॥

रिक्तः स्वेभ्यः परेभ्यश्च प्राप्नोत्यभिभवं नृपः । इति निर्ध्याय हि मया क्रियते कोशरक्षणम् ॥६४५॥ 645

पुरप्रतिष्ठां निष्पाद्य क्षिप्त्वा राज्यधुरं त्वयि । वाराणस्यां गमिष्यामि नन्दिक्षेत्रेथ वा पुनः[1] ॥६४६॥

तद्राज्यकोशयोः स्वामी बुभूषुर्न चिराद्भवान् । अतितात्पर्यतः कस्मादनार्योचितमीहसे ॥६४७॥

संभाव्यते त्वयि न तद्यन्ममावेदितं खलैः । यथार्थकथनात्तस्मात्कौलीनं विनिवार्यताम् ॥६४८॥

विशुद्धये करोत्वेष स्वकृतस्याप्रतिश्रवम् । स्नेहादितीच्छंस्तद्राजा साभिप्रायं वचोभ्यधात् ॥६४९॥

अपलापवचोमात्रं निनीषुस्तस्य हेतुताम् । जनप्रत्यायने सोभूद्यस्मात्क्षान्तिसमुत्सुकः ॥६५०॥ 650

हर्षस्तु साधुवादैस्तत्पितुः संपूज्य भाषितम् । वक्ष्याम्याप्तमुखे तत्त्वमित्युक्त्वा निर्ययौ बहिः ॥६५१॥

सामान्यप्रेरणादेषा चिकीर्षाभूदिति ब्रुवन् । स पितृप्रहितं दूतं ह्रीतः स्वा[1]वसथं ययौ ॥६५२॥

---

६२५. [1]) Thus corr. by $A_3$ from $A_1$ दुःशीलान्य°. ६२७. [1]) रं supplied by $A_3$. ६३०. [1]) Thus corr. by $A_3$ from $A_1$ °पुत्रस्तस्त°. ६३१. [1]) $A_1$ तत्रार्थेऽशान्त°. ६३३. [1]) Emended; A दम्मटो°.—[2]) Emended; A बुद्धा. ६३४. [1]) $A_4$ gloss धम्मटस्य. ६३५. [1]) यावावां तत्प्रवेशा supplied by $A_3$ in space left by $A_1$. ६३९. [1]) Emended; दम्मटम् supplied by $A_3$ in space left by $A_1$. ६४१. [1]) $A_4$ gloss पुत्रस्य. ६४४. [1]) $A_4$ gloss अनन्तदेवसम्बन्धिनं.—[2]) Emended with C; A समर्पयम्. ६४६. [1]) Thus R G C; A पुत्रः. ६५२. [1]) Emended; A सावसथं.

दूतं म्लानाननं वीक्ष्य पाणिभ्यां ताडयञ्शिरः । हा पुत्रेति वदन्राजा तस्यास्कन्दमदापयत् ॥६५३॥
हतेस्मिन्स्वशिरश्छिन्द्यामिति प्रोक्तवतः प्रभोः । निदेशाद्वेष्टयित्वैव तस्थुस्तद्वेश्म शस्त्रिणः ॥६५४॥
655 तीक्ष्णास्तु पिहितद्वाराः परिवार्य नृपात्मजम् । ऊचुः सुपरुषां वाचमेवं निश्चितमृत्यवः[1] ॥६५५॥
अस्मान्घृणी प्रमादी च विरुद्धं छद्म कारयन् । घातयित्वा दुराचार क्व जीवन्स्थातुमिच्छसि ॥६५६॥
रक्षिष्यति सुतं स त्वां स पिता रक्षितस्त्वया । ज्ञातेयं युवयोरस्ति वयमेव हताः पुनः ॥६५७॥
युध्यस्व मध्यगोस्माकं त्वां निहन्मोन्यथा वयम् । एवं सर्वप्रकारं ते व्यक्तं नास्त्येव जीवितम् ॥६५८॥
तां वार्तां भूपतेः श्रुत्वा व्याकुलस्याग्रतः स्थितः । हर्षान्तिकं दण्डकाख्यः प्रायान्निजमहत्तरः ॥६५९॥
660 तीक्ष्णैर्निजतया दत्तप्रवेशः स नृपात्मजम् । प्रसृत्योवाच मतिमानेवं सर्वान्विमोहयन् ॥६६०॥
क्षत्रियापुत्र जीवित्वा कल्पानल्पेतरानपि । कारणैर्[1]अपि गन्तव्यं नियमान्नियतेर्वशम् ॥६६१॥
तदेतस्मिन्समासन्ने मरणेव्यभिचारिणि । यदर्थं गृह्यते शस्त्रं स मानः पाल्यतां त्वया ॥६६२॥
कृतश्रुतः ख्यातयशा युवा सुक्षत्रियो भवान् । तदाहवविलम्बेन कार्यं किमिव पश्यसि ॥६६३॥
एतेषु सुसहायेषु मयि चाग्रेसरेधुना । विपत्तिर्विजयो वापि प्रतापिंस्तव शोभते ॥६६४॥
665 उत्तिष्ठ नखकेशादियोजनं कारय द्रुतम् । वीरपट्टं बधानापि स्वःस्त्रीपरिणयस्रजम् ॥६६५॥
इत्युक्त्वा क्षुरकर्मार्थं राजपुत्रं सनापितम् । प्रावेशयत्पूज्यमानस्तीक्ष्णैराभ्यन्तरं गृहम् ॥६६६॥
न्यस्तासिधेनुर्हर्षेण दत्तझम्पः क्षणात्स्वयम् । पश्चात्प्र[1]विश्य तद्वेश्म चक्रे सुनिहितार्गलम् ॥६६७॥
ततः स राजस्थानीयं तमारादब्रवीद्वचः । रक्षितो राजपुत्रोयं क्रियतां स्वोचितं त्वया ॥६६८॥
भूतग्रहादिभवमोषधिभिर्विरोधिजातं बलैः प्रहरणप्रभवं तनुत्रैः ।
निर्वाप्यते प्रतिभयं पृथिवीपतीनां सार्वत्रिकं तु रभसाद्भुवि बुद्धिवृद्धैः ॥६६९॥
670 नदन्तस्तुमुलं योधास्ततो राजसुतास्पदे । आरोढुमाययुर्वेश्महर्म्यादि प्रविविक्षवः ॥६७०॥
तीक्ष्णा दृढद्वारगृहस्थितं त्यक्त्वा नृपात्मजम् । यावन्निर्गन्तुमिच्छन्ति हन्यमाना युयुत्सवः ॥६७१॥
द्वित्राः प्रसङ्गसांनिध्यान्मध्यपातं समाश्रिताः । तावद्विनिर्ययुर्वीरा निर्द्रोहा अभिमानिनः ॥६७२॥
ते निर्याताः सूर्यमतीगौरीशाश्रयिणो गृहात् । सदाशिवान्तिकं प्रापुर्घ्नन्तो युधि विरोधिनः ॥६७३॥
रक्ष्यमाणोपि भूभर्तुर्गिरा ज्ञातेयशालिनः । राजज्ञातिर्हतस्तेषु प्रथमं सहजाभिधः ॥६७४॥
675 द्विजस्तिव्याभिधो वीरः पण्डितः शौर्यमण्डितः । रामदेवश्च केशी[1] च कर्णाटोरिभटैर्हतः ॥६७५॥
केचित्त्यजन्तः शस्त्राणि स्वं घ्नन्तः केपि च स्वयम् । लेभिरे वधबन्धादि पापाः कापुरुषोचितम् ॥६७६॥
सितषष्ट्यां सहस्यस्य चतुःषष्ठे स वत्सरे । वैरं नीत्वा पितापुत्रौ विप्लवः कारितो विटैः ॥६७७॥
हठत्यागासक्तिः प्रिययुवतिसंप्रेरणवचः खलासङ्गः पूर्वप्रणयपरिहारो जनयितुः ।
अमात्येन भ्रात्रा सममपरमात्राथ कलहः कुमाराणां बुद्धिं पितरि विपरीतां प्रतनुते ॥६७८॥
एवं स खलसंगत्या कुमारो लब्धलाघवः । बन्धं कारागृहे प्रापदसुखानि सुखोचितः ॥६७९॥

---

६५५. [1]) $A_4$ gloss स्वकीया एव पूर्वं राजवधं प्रति प्रोत्साहिताः. ६६१. [1]) $A_2$ gloss कारणानि ब्रह्मादीनि पञ्च. ६६७. [1]) Fol. 166 of A ends with पश्चात्प्र ; fol. 167 which ended with verse 688, is now lost. ६७५. [1]) Thus R; G केशश्च.

राज्ञी भुवनमत्यस्मिन्बद्धे माध्यस्थ्य[1]संविदि । स्थापिता मानिनी कण्ठच्छेदं कृत्वा जहावसून् ॥६८०॥ 680

रक्षिणो मन्त्रिणामाप्तांस्तस्य विन्यस्य भूपतिः । प्राहिणोदुचितान्भोगान्सुतस्नेहार्द्दिने दिने ॥६८१॥

चक्रिकायामशक्तोयमिति संचिन्त्य भूभुजा । भृत्यः प्रयागनामास्य निजः पार्श्वान्न वारितः ॥६८२॥

नोनको हर्षमुद्दिश्य स्वेनान्यैश्च महीभुजम् । जीवितं लोचने वास्य कृष्येतामित्यभाषत ॥६८३॥

नृपः स शीलवैकल्ये पशुतुल्ये ह्रियं त्यजन् । रिपोरिव तनूजस्य चकमे कतिचित्प्रियाः ॥६८४॥

तासु श्वशुरवाल्लभ्यमवाप्य सुगलाभिधा । बभूव तुक्कभू[1]र्भर्तृनप्त्री भर्तृवधार्थिनी ॥६८५॥ 685

संमन्त्र्य नोनकः सा च द्वौ सूदावशनान्तरे । रसं[1] प्रदातुं हर्षस्य पापं प्रैरयतां ततः ॥६८६॥

अन्यसूदमुखाद्वार्तां प्रयागस्तामवाप्तवान् । प्रभुं तद्दाप्यमानान्नपरिहारमकारयत् ॥६८७॥

तेनान्नेन[1] परीक्षार्थं दापितेनापजीवितौ । हर्षः श्वानौ निशम्याभून्निराशो निजजीविते ॥६८८॥

प्रयुक्तिं गूढदण्डस्य पितुरेव स तां विदन् । ततः सर्वाणि भोज्यानि स्पृष्ट्वैवौज्झीद्दिने दिने ॥६८९॥

प्रयागोपहृतेनासीत्परं बाह्येन सर्वदा । भोज्येन येन केनापि कुर्वञ्जीवितधारणम् ॥६९०॥ 690

अन्नस्याभोजनं श्रुत्वा राजा सूदैर्निवेदितम् । ततः प्रयागमानीय तत्र पप्रच्छ कारणम् ॥६९१॥

प्रयोजकौ च सूदौ च सोपलभ्य न्यवेदयत् । रसार्पणकथां कृत्स्नां तज्ज्ञानं च स्वयं प्रभोः ॥६९२॥

अथान्येष्वपि सूदेषु पित्रा दत्तेषु शङ्कितः । राजसूनुर्न बुभुजे प्रयागोपहृतं विना ॥६९३॥

स सर्वेषु विरुद्धेषु यद्यत्तत्रात्यवाहयत् । मेने तत्तद्दिनं लब्धं शेषेष्वास्थापराङ्मुखः ॥६९४॥

अत्रान्तरे समुदभूदकस्मान्नाशसूचकः । अदृष्टपूर्वो भूभर्तुः सदाचारविपर्ययः ॥६९५॥ 695

उत्पाद्य ताम्रस्वाम्याख्यं पूर्वं ताम्रमयं रविम् । स रीतिप्रतिमाः स्वैरं विहारेभ्योप्यपाहरत् ॥६९६॥

धनानि निरपत्यानामाहर्तुं व्यवसायिना । न्यवार्यतार्यमर्यादा क्रौर्याक्रान्तेन भूभुजा ॥६९७॥

ततोतिशापसंतापव्यञ्जकेष्वाञ्जसाभवत् । अतिसंभोगजातेन धातुक्षैण्येन सोर्दितः ॥६९८॥

कुम्भप्रतिष्ठासंभारं चिकीर्षोर्हरमन्दिरे । तस्यापतन्महाकालकुम्भे नासापुटादसृक् ॥६९९॥

आकस्मिकं दुर्निमित्तं तत्प्रतीकारसंविदा । न मनागप्यगाच्छान्तिं प्रवृद्धिं प्रत्युताययौ ॥७००॥ 700

अस्र[1]स्रुत्यनुबन्धेन तेन ग्लपितसौष्ठवः । शनैः शय्याप्रणयितामन्तः स प्रत्यपद्यत ॥७०१॥

बलमांसकृतक्षैण्यमग्निमान्द्याद्युपद्रवैः । कलाशेषेण शशिना तद्वपुः साम्यमाययौ ॥७०२॥

राज्यं स दित्सुर्हर्षाय दृष्ट्वामात्यान्पराङ्मुखान् । ततोभिषेकमौत्कर्षमानिन्ये लोहराचलात् ॥७०३॥

उच्चावचास्तेन सर्वे संविभक्ता मुमूर्षुणा । परमीर्ष्याविधेयेन न शुद्धान्तवधूजनः ॥७०४॥

कृत्वा धनार्पणं कुर्यां देशादस्य प्रवासनम् । इत्युक्त्वा हर्षमानेतुं तेनाप्रार्थ्यन्त मन्त्रिणः ॥७०५॥ 705

ते तु गोपृ[1]न्निवार्याद्यांष्ठकुराल्लोहराश्रितान् । विन्यस्य रक्षिभावे तमुत्कर्षाय न्यवेदयन् ॥७०६॥

स नाद्यमण्डपात्तेन निष्कृष्टः क्षामविग्रहः । निवेशितश्चतुःस्तम्भे [illegible]द्ध्वा बान्धववर्जितः ॥७०७॥

अथो[1]ज्जिगमिषून्प्राणान्निःसामर्थ्यो विदन्नृपः । मुमूर्षुरभवत्तीर्थप्रस्थानाय कृतत्वरः ॥७०८॥

---

६८०. [1]) Thus R G *sec. manu*; C G *prima manu* माध्यस्थ°. ६८५. [1]) Emended; G R °भूभर्तृनप्तृभर्तृपधार्थिनी; C °भूभर्तृनप्तृभर्तृपधा°. ६८६. [1]) Thus G C; R रसे. ६८८. [1]) Thus emended with C; A R G तेनात्तेन. ७०१. [1]) Emended; A अबु°. ७०६. [1]) Emended with C; A गोप्तान्नि°. ७०८. [1]) Emended with C; A अथोजग°.

स जानन्दैवतक्रोधं ताम्रस्वामिविपाटनात् । इयेष शरणं कर्तुं मार्ताण्डं प्राणलब्धये ॥७०९॥

710 संत्यज्य विजयक्षेत्रमत एवापवर्गदम् । महीश्वरोपि प्रययौ तत्र त्रासवशंवदः ॥७१०॥

अधीकारप्राप्त्या तृणमिव विदन्विश्वमखिलं नियोगी जातार्तिर्नमति गृहदासीरपि रुदन् ।

नदन्मूर्खो ज्ञानी बहुदुरुपदेशा[1]धिगमतः करोति प्राणान्ते शिशुरिव च किं किं न विगुणम् ॥७११॥

तादृश्या कृपणप्रायसेव्यया क्लैब्यसंविदा । गुरूपदेशाहंकारस्तस्य हास्यत्वमाययौ ॥७१२॥

शुक्लायां मार्गशीर्षस्य तृतीयस्यां निशामुखे । तलादेवाश्रितो युग्यं भूभृन्मर्तुं विनिर्ययौ ॥७१३॥

स भेरीतूर्यनिर्घोषैर्जनाक्रन्दं तिरोदधत् । सामात्यान्तःपुरो नौभिः प्रतस्थे जलवर्त्मना ॥७१४॥

715 यामशेषे दिनेन्यस्मिन्प्राप्तस्य चरणान्तिके । मार्ताण्डस्य स्वजीवार्ध्यै सौवर्णीं प्रतिमां व्यधात् ॥७१५॥

भृत्यैरगणिताज्ञस्य दिदृक्षोर्ज्येष्ठमात्मजम् । औत्सुक्येनारतिस्तस्य व्यथितस्याधिकाभवत् ॥७१६॥

बहिर्हर्षकृतं गीतं गायनानां स गायताम् । विवृतद्वारविवरः शृणोति स्म विनिःश्वसन् ॥७१७॥

प्राणावसानसमये परिसंकुचन्ती स्वप्नप्रसङ्ग इव धावनशक्तिराज्ञा ।

प्राचुर्यदा खलु रुजो मरणोद्भवाया मर्मव्यथां प्रथयते पृथिवीपतीनाम् ॥७१८॥

प्रजाज्येष्ठं तनूजं च संविभक्तुं कृतार्थनः । उत्कर्षं ग्राहयञ्शिक्षां बद्धजिह्वोभवत्ततः ॥७१९॥

720 अव्यक्तं वदतो हर्ष इति वाचं पुनः पुनः । निह्नोतुं नोनको भावं तस्यादर्श[1]मढौकयत् ॥७२०॥

स तन्निवार्य विहसन्दष्टौष्ठः कम्पयञ्शिरः । जपन्किमपि सार्धे द्वे बद्धवागभवद्दिने ॥७२१॥

आसन्नप्राणनिर्याणः संज्ञयाहूय मन्त्रिणः । ततः स्वं तैरसंमूढैर्मार्ताण्डाग्रमनाययत् ॥७२२॥

वर्षानेकान्नपञ्चाशद्भुक्तवान्स सितेहनि । मार्गस्य पञ्चषष्टेब्दे षष्ठ्यां निष्ठामथासदत् ॥७२३॥

सप्त मम्मनिकामुख्या देव्यः परिणयाहृताः । अवरुद्धा[1]पि जयमत्यभिधाना तमन्वगुः ॥७२४॥

725 प्रसादवित्तया तस्य पुनः कय्याभिधानया । अवरुद्धिकया कृत्स्ना स्त्रीजातिरपवित्रिता ॥७२५॥

सर्वावरोधप्राधान्यप्रदानं नास्मरद्यदि । मा स्मार्षीन्नाम भर्तुस्तदनुच्चाभिजनोद्भवा ॥७२६॥

संश्रित्य विजयक्षेत्रं क्रमाद्ग्रामनियोगिनः । भेजे यत्त्ववरुद्धात्वमतो दुःखाकरोति नः ॥७२७॥

भूपालभोग्यं स्ववपुः सा भोगाभ्यासभासुरम् । निनाय ग्राम्यभोग्यत्वं धिङ्नारीर्नीचचेतसः ॥७२८॥

उत्कर्षस्याभिषेकाय व्यग्रेष्वखिलमन्त्रिषु । अन्त्ये[1]ष्टिमकरोद्राज्ञः कृतज्ञो वामनः परम् ॥७२९॥

730 घोषोभिषेकतूर्याणामेकतो गीतमङ्गलः । साक्रन्दः प्रेततूर्याणां नादोन्यत्र समुद्ययौ ॥७३०॥

जातः पद्मश्रियो देव्याः पुत्रः कलशभूभुजा । ततो वि[1]जयमल्लाख्यो भ्रातुर्वैमत्यमादधे ॥७३१॥

यददाद्धर्षदेवस्य पिता प्रत्यहवेतनम् । प्रतिशुश्राव तस्मै स त[1]देवोत्कर्षभूपतिः ॥७३२॥

आश्वासाय च मध्यस्थान्ददौ सामन्तमन्त्रिणः । कय्यात्मजस्य चक्रे च जयराजस्य वेतनम् ॥७३३॥

अन्विष्यन्ति रुदत्य एव तरला गत्यन्तरं योषितो योगक्षेमकथां चितान्तिकगता एवात्मजाः कुर्वते ।

अन्येषां शतशोवसानसमये चर्चां विचार्येदृशीं स्त्रीपुत्रादिकृते कुकर्मभिरहो संचिन्वतेर्थं जडाः ॥७३४॥

---

७११. [1]) Emended with C; A °देशोधि°. ७२०. [1]) $A_2$ gloss हर्ष आनीयतामिति राज्ञो भावमभिप्रायं निह्नोतुं आदर्शो नोनकेनानीत इत्यर्थः हर्षः आदर्श इति पाठमात्रसाम्यादित्यर्थः. ७२४. [1]) $A_2$ gloss उरुद्धा इति देशभाषया. ७२९. [1]) Emended with C; A अन्तेष्टि°. ७३१. [1]) ज supplied by $A_3$. ७३२. [1]) Emended; A तदैवो°.

प्रविवेश ततः श्रीमान्नगरं नृपतिर्नवः । न तु हर्षोदयाकाङ्क्षि हृदयं नगरौकसाम् ॥७३५॥ 735
तद्राज्यलाभदिवसो जनस्याभोगदूषितः । सन्नपि प्रत्यभान्नैव स रोगार्तैरिवोत्सवः ॥७३६॥
हर्षदेवस्तु पितरि प्रयाते मर्तुमातुरे । नवबद्धश्चतुःस्तम्भे न तस्मिन्न[1]ह्नि भुक्तवान् ॥७३७॥
सार्थभ्रष्टमिवाध्वन्यमन्यस्मिन्नह्नि ठक्कुराः । ते शोकमूकं संप्रार्थ्य कथंचित्तमभोजयन् ॥७३८॥
राज्यं दातुं निजे देशे चक्रुश्चास्य प्रतिश्रवम् । राज्यद्वयं नायमर्हत्येक एवेति वादिनः ॥७३९॥
एवं मिलितचित्तस्तैर्विपत्तिं श्रुतवान्पितुः । कृतोपवासः सोन्येद्युः शुश्रावोत्कर्षमागतम् ॥७४०॥ 740
बाष्पैः पित्रे प्रयच्छन्तं निर्वापसलिलाञ्जलीन् । तं दूतैरनुजो राजा स्नातुं प्रार्थयताथ सः ॥७४१॥
तस्य स्नानक्षणे राज्ञि सज्जे राज्याभिषेचने । घोषोभिषेकतूर्याणामुदभूत्सजयध्वनिः ॥७४२॥
स तेन सुनिमित्तेन प्राप्तां मेने निमित्तवित् । विद्युद्योतेन जीमूतगर्जामिव नृपश्रियम् ॥७४३॥
ततः प्रभृत्युन्मुखता सुनिमित्तैरगृह्यत । तस्यात्यासन्नराज्यस्य भृत्यैरिव दिने दिने ॥७४४॥
स भोजनं कारयितुं दूतान्भ्रात्रा विसर्जितान् । देशान्निर्वासयतु मां राजा संत्यज्य बन्धनात् ॥७४५॥ 745
स्थातुमप्रत्यवस्थित्या[1] विदध्यां कोशसंविदम् । म्रियेन्यथा निरशनैः संदिश्येति व्यसर्जयत् ॥७४६॥
स तन्मिथ्या प्रतिश्रुत्य तं दूतैः प्रहितैस्ततः । कृतकोशं सान्त्वयित्वा राजा भोज्यमभोजयत् ॥७४७॥
नित्यं च श्वो विधास्ये तदर्थ्य[1]मान इति ब्रुवन् । कालापहारं कुर्वाणः शङ्कां तस्योदपादयत् ॥७४८॥
विश्वासाय स्वताड[1]ङ्कपाणिं कृत्वा प्रयागकम् । पार्श्वं विजयमल्लस्य सोथ गूढं व्यसर्जयत् ॥७४९॥
तदेवोक्त्वा तमूचे स त्वां ब्रूते दुःस्थितोग्रजः । कुमारे त्वयि राज्येस्मिञ्शुच्यामो बन्धने वयम् ॥७५०॥ 750
संक्रान्तदुःखः संचिन्त्य चिरेणापि तमब्रवीत् । कार्यं कुर्यात्कथमिदं मद्गिरा नीतिमान्नृपः ॥७५१॥
तथाप्यस्मिन्यथाशक्ति यतिष्ये त्वद्विमोक्षणे । त्वया तु सावधानेन रक्षणीयं स्वजीवितम् ॥७५२॥
तं पार्श्वं हर्षदेवस्य संदिश्येति व्यसर्जयत् । उपायांश्चिन्तयन्नासीत्तस्य कार्यस्य सिद्धये ॥७५३॥
उत्कर्षः प्राप्तराज्यस्तु दैवतैरिव मोहितः । नादधे किंचिदारम्भं व्यवस्थाप्रथनक्षमम् ॥७५४॥
समर्पिताधिकारोपि कन्दर्पादीन्स मन्त्रिणः । राज्यकृत्यं न पप्रच्छ विदधे स च न स्वयम् ॥७५५॥ 755
परिमातुं परीमाणं कोशसंचयवीक्षणे । परं क्ष्मापतेस्तस्य दिनकृत्यमजायत ॥७५६॥
कर्मणा निर्व्ययेनास्य चिन्त्यमानस्य येन वा[1] । सुदीर्घदर्शी लोकोभूत्तेन लुब्धत्वनिश्चयी ॥७५७॥
सा तस्य लुब्धताख्यातिः समुद्रान्नप्रदायिनः । भूभर्तुः पितृपत्नीभिः स्वैरिणीभिः प्रवर्धिता ॥७५८॥
स श्रोत्रिय इवोत्कम्पी[1] व्यवहारमिताशयः । महाहृदयभोग्यानां प्रजानां नाभवत्प्रियः ॥७५९॥
ततो नियमितां वृत्तिं तस्माल्लुब्धाद्दनाप्नुवन् । कुप्यन्विजयमल्लोभूद्देशान्गन्तुं कृतोद्यमः ॥७६०॥ 760
स्वं रक्षितुं स मध्यस्थाननुव्रज्याकृतेखिलान् । प्रार्थयामास तेना[1]पि सज्ज्ञास्तमनुवव्रजुः ॥७६१॥
लवणोत्से निशामेकां पुरान्निर्गत्य तस्थुषः । मध्यस्थ[1]सैन्यास्तस्यैव[2] योधाः पक्षमशिश्रयन् ॥७६२॥

---

७३७. [1]) Thus corr. by $A_3$ from $A_1$ °न्नस्मि. ७४२. [1]) Thus corr. by $A_3$ from $A_1$ राज्यात्सन्त्य°. ७४६. [1]) त्या supplied by $A_3$ in space left by $A_1$. ७४८. [1]) Emended; A °दर्थमान. ७४९. [1]) ताड supplied by $A_3$ in space left by $A_1$. ७५७. [1]) येन वा supplied by $A_3$ in space left by $A_1$. ७५९. [1]) $A_3$ gloss उत्कम्पी दानसमये सकम्प इत्यर्थः. ७६१. [1]) $A_3$ gloss हेतुना. ७६२. [1]) मध्यस्थ supplied by $A_3$ in space left by $A_1$. —[2]) Thus corr. by $A_3$ from $A_1$ °स्तस्या –.

हर्षे बद्धे त्वयि गते कृतकृत्यो भवेन्नृपः । तत्तं निष्क्रम्य काराया गमनं तव सांप्रतम् ॥७६३॥

इति तैः प्रेर्यमाणः स राजसूनुरुदायुधैः । विनिवृत्याकरोद्यात्रां प्रत्यूषे नगरोन्मुखः ॥७६४॥

765 श्रुत्वा चिकीर्षितं तस्य व्यावृत्तस्य तथाविधम् । सहायाः समपद्यन्त कतिचिड्डामरा अपि ॥७६५॥

अकरोन्मधुरावट्टो हयसेनापतिः सुतम् । राजसूनुर्यियासुर्यं मध्यस्थाननुयात्रिकम् ॥७६६॥

नागाह्वयो द्रोहहीनो राजपक्षमसंत्यजन् । कैश्चित्सह हयारोहैः स पद्मपुरवर्त्मना ॥७६७॥

आगच्छन्नन्तिकं राज्ञो दुर्निमित्तहतत्वरः । न यावन्नगरं प्राप क्षिप्रकारी नृपात्मजः ॥७६८॥

शकुनैराहितोत्साहः शालायोद्दीपिताग्निभिः । सैन्यैर्गृहान्दहंस्तावद्राजधानीमवेष्टयत् ॥७६९॥ चक्कलकम् ॥

770 समयाय विनिर्यातं त्यक्त्वोत्कर्षं[1] महीभुजम् । तत्पक्षं जयराजोपि राजसूनुरशिश्रयत् ॥७७०॥

हस्तस्थितौ राजपुत्रौ तस्याचिन्तयतां गतिम् । नवौ कवी व्यवहतिं सिद्धवाचः कवेरिव ॥७७१॥

हर्षदेवे परित्यक्ते यास्याम इति वादिनः । स हस्तिमहिषादीनां शालाः सैन्यैरदाहयत् ॥७७२॥

त्यागप्रलयजीमूतो हर्षदेवोभिषिच्यताम् । लुब्धः खशो वणिक्प्रायो राज्यादेष निवार्यताम् ॥७७३॥

एवं वदन्तः सन्तोपि हर्षमेत्य पुरौकसः । पुष्पैः प्राच्छादयन्बद्धं तमोरिविवरार्पितैः ॥७७४॥

775 उत्पिञ्जे तत्र संजाते भग्नसैन्यस्य भूपतेः । संप्रेष्य ठक्कुरान्हर्षस्तटस्थं तद्बलं व्यधात् ॥७७५॥

इत्थं बद्धोपि तत्कृत्वा वैरिकार्याविरोधिनः[1] । संदेहवेपमानाङ्गस्ततस्तानेवमब्रवीत् ॥७७६॥

वर्तेद्य संकटे दुष्टे तन्मां मुञ्चत बन्धनात् । न चेदाशु महीपालादनिष्टं नियमाद्भवेत् ॥ ७७७॥

इत्युच्यमानास्ते यावद्विमृशन्ति स्म तन्मुहुः । पादप्रहारा न्यपतंस्तावद्द्वारगृहाद्बहिः ॥७७८॥

उच्चचार स किं द्रोहः प्रक्रान्तोयं दुराशयैः । रे ठक्कुरा विवृणुत द्वारमित्युच्चकैर्वचः ॥७७९॥

780 ठक्कुरेष्वथ भीतेषु धैर्यादगणयन्भयम् । अकारयद्धर्षदेव एव द्वारमपावृतम् ॥७८०॥

नेत्रमात्रस्थितप्राणो ददर्श विशतस्ततः । लौहराञ्शस्त्रिणो हन्तुं प्राप्तान्षोडश वारिकान्[1] ॥७८१॥

ते हि छिन्नोज्झिते हर्षशीर्षे सर्वमिदं क्षणात् । शाम्येदिह भयं मन्त्रं नोनकस्येति जल्पतः ॥७८२॥

उत्कर्षेणासकृच्छ्रुत्वा तं निहन्तुं विसर्जिताः । विमृश्य चोक्ता गच्छन्तः कार्यशेषं विमुञ्चता ॥७८३॥

कदाचित्तेन कृत्यं स्यादहतेनेति तत्क्षणम् । निवार्य ठक्कुरान्नक्ष्यो हन्तव्यश्च यदोर्मिकाम् ॥७८४॥

785 इमां दद्यामभिज्ञानं यदा चेयं विसृज्यते । तदा तु बन्धनात्त्याज्य इत्युदीर्याङ्गुलीयकम् ॥७८५॥

पाणौ दर्शयता चोक्ता विलम्बालम्बनं यतः । निवार्य ठक्कुरांस्तस्मिन्क्षिप्रं न प्राहरंस्ततः ॥७८६॥ कुलकम् ॥

स तु प्रत्येकमाहूय नामग्रहणपूर्वकम् । अजिग्रहत्तांस्ताम्बूलमप्युपावेशयत्पुरः ॥७८७॥

जहुस्ते कृतसत्कारास्ताम्बूलग्रहणक्षणे । ह्रीताः कराग्राच्छस्त्राणि प्रजिहीर्षा च मानसात् ॥७८८॥

धत्ते श्रियं सृजति कीर्तिमघं लुनीते मित्रत्वमानयति हन्त विरोधिनोपि ।
यात्यध्वभिः प्रतिपदं सुमनोनुकूलैर्गीः कामधुक्कमिव नापहरत्यनर्थम् ॥७८९॥

790 राजपुत्रः स तानूचे किं ह्रीता इव तिष्ठथ । निर्दोषाः सर्वथा प्रेष्याः स्वाम्यादेशानुपालने ॥७९०॥

---

७७०. [1]) Thus corr. by $A_3$ from $A_1$ त्यक्त्वोत्क°. ७७६. [1]) Emended; A वैरि--वि°; C वैरिकानवि°. ७८१. [1]) Thus A; R °वार्पिकान्.

विलम्ब्यतां तथाप्यत्र द्रष्टव्यं महदद्भुतम्[1] । यथोदेष्यत्य[2]वस्थानामन्यथात्वं क्षणे क्षणे ॥७९१॥
द्विपद्वीपिक्रव्यादुरगतुरगादिभ्रमकृतो यथास्यां भिद्यन्ते दिवि किल त एवाम्बुदलवाः ।
तथा सौम्यक्रूरक्रमविकृतिभाजस्तनुभृतां क्षणानां नानात्वान्ननु हृदि विकारोर्मय इमाः ॥७९२॥
क्षणानुवृत्तिं कुर्वाणास्तद्यथात्र स्थिता वयम् । तथा सन्तु भवन्तोपि कार्यान्तरदिदृक्षवः ॥७९३॥
अपि चैवंविधा एव वितन्वन्तो रसान्तरम् । आसन्नराज्यप्राप्तीनां राज्ञां स्युः प्राणसंशयाः ॥७९४॥
ग्रीष्मस्योष्मा व्रजति घनतां नूनमासन्नवृष्टेर्नैशं गाढीभवति तिमिरं संनिकृष्टप्रभातम्[1] ।
जन्तोरेवं प्रसभविभवस्फारसंपत्प्रचारान्निष्क्रामन्ती विपदुपचितोपद्रवोद्रेकमेति ॥७९५॥ 795
प्राणचारेण शकुनं निश्चित्येति वदन्सताम् । आचचक्षे शुभोदर्का[1]ः स्वोदन्तसदृशीः कथाः ॥७९६॥
कालं क्षेप्तुमुपन्यस्तशुद्धिव्यक्तीभवद्रसाम् । तेभ्यश्च कथयामास हरिश्चन्द्राश्रयां कथाम् ॥७९७॥
तद्रञ्जने स्वरक्षायां बाह्यवार्तागवेषणे । व्यापृतत्वं गभीरस्य न तस्य समलक्ष्यत ॥७९८॥
अत्रान्तरे तमुद्दिश्य मते जाते नवे नवे । राजश्रियश्च काल्यार्श्च[1] शतशोभूद्गतागतम् ॥७९९॥
उत्कर्षो भूमिपस्तस्य परित्यागं ह्यमन्यत । आदिदेशानुगांस्तांस्तान्भूरिशश्च प्रमापणे ॥८००॥ 800
अभिज्ञानोर्मिकादानं वधादेशे तु नास्मरत् । ते नोक्तिं तस्य दूतानामन्वतिष्ठन्त रक्षिणः ॥८०१॥
स तान्वन्ध्यश्रमान्वीक्ष्य स्मृत्वाभिज्ञानसंविदम् । सत्वा[1]त्मजं राजपुत्रं शूराख्यं व्यसृजत्ततः ॥८०२॥
अभिज्ञानं वितरतस्तत्करे तस्य मुह्यतः । दैवयोगात्क्षणे तस्मिन्नूर्मिकाव्यत्ययोभवत् ॥८०३॥
य[1]ः पातार्थमुपार्जितोन्यशिरसस्तेनैव सिन्धुप्रभुर्वृद्धक्षेत्रधराधवः स्वशिरसः पातं वरेणान्वभूत् ।
दिव्या स्वैव गदा श्रुतायुधनृपं हन्तावधीदाहवे यत्त्राणाय विगण्यते विधिवशात्तेनैव नाशो भवेत् ॥८०४॥
तथा चैकस्य विस्मृत्या व्यत्ययेनापरस्य च । अभिज्ञानस्य स नृपो नाशं प्रत्युत लब्धवान् ॥८०५॥ 805
आ[1]भिजन्येन हर्षस्य ते क्षणादेव रक्षिणः । प्रपेदिरे हितैषित्वमुत्कर्षाज्ञाविरोधिनः ॥८०६॥
द्वारमाक्रान्तमुत्क्रोधो वधायायमुपागतः । इति निर्ध्याय ते शूरं हन्तुमैच्छन्नुदायुधाः ॥८०७॥
उद्घाटितारिपुटा दृष्ट्वा तस्योर्मिकां करे । तेनैव साकं नृत्यन्तो[1] हर्षं समुपतस्थिरे ॥८०८॥
पादन्यस्तोत्तमाङ्गैस्तैर्निर्गच्छेत्यर्थितस्ततः । अविश्वसन्राजसूनुः क्षणमासीत्स चिन्तयन् ॥८०९॥
तस्मिन्क्षणे हर्षदेवं हतं ज्ञात्वा रणे स्थितः । क्रुध्यन्विजयमल्लोभूदधिकोद्रिक्तपौरुषः ॥८१०॥ 810
तं दग्धुमुद्यतं राजधानीं जीवति तेग्रज[1]ः । अभिधायेति रुरुधुः कथंचित्पार्थिवानुगाः ॥८११॥
प्रत्ययार्थं ततस्तस्य राज्ञा हर्षवधूर्द्रुतम् । गृहीतभर्तृताडङ्का सुगला प्रैष्यतान्तिकम् ॥८१२॥
तां विलोक्यैव विरते वह्निदाहान्नृपात्मजे । राजा भयप्रतीकारं हर्षत्यागादमन्यत ॥८१३॥
गत्वामात्याः स्वयं नोनप्रशस्तकलशादयः । हर्षं निर्निगडं कृत्वा कारागारात्ततोत्यजन् ॥८१४॥

---

७९१. [1]) Thus corr. by later hand from $A_1$ °द्भुताम्.—[2]) देष्यत्य supplied by $A_3$ in space left by $A_1$. ७९५. [1]) Thus corr. by $A_1$ from °प्रतापम्; $A_3$ °प्रभाते. ७९६. [1]) Thus corr. by $A_3$ from $A_1$ शुचोद°. ७९९. [1]) $A_3$ gloss काली यमस्त्री. ८०२. [1]) Doubtful; thus A R G. ८०४. [1]) $A_2$ gloss यः पातार्थमिति एतद्वृत्तद्वयोपाख्यानं महाभारते द्रोणपर्वणि ज्ञेयम्. ८०६. [1]) $A_3$ gloss आभीजन् इति देशभाषया. ८०८. [1]) कं नृत्यन्तो supplied by $A_3$ in space left by $A_1$. ८११. [1]) Emended; A R G तेनुजः.

815 मन्त्रः स तेषां शोकेन वक्रात्कृतगतागतः । अन्त्यक्षणे श्वास इव प्रससार बहिश्चरन् ॥८१५॥
हर्षः प्रच्छाद्यमानस्तु पौराणां पुष्पवृष्टिभिः । हयमारुह्य सामात्यो रणस्थं नृपमासदत् ॥८१६॥
अभिनन्द्यानुजो राजा तमूचे भ्रातरं रणात् । निवार्यागम्यतां कुर्मः प्राप्तकालं ततो वयम् ॥८१७॥
तथेति प्रस्थिते तस्मिंस्त्यक्त्वा तत्स रणाजिरम् । प्राविशन्मन्त्रिभिः सार्धं कोशं हेमादिसंश्रयम् ॥८१८॥
उत्तीर्णे महतः कृच्छ्राद्धर्षदेवमुपस्थितम् । दृष्ट्वा विजयमल्लोभूत्प्रहर्षान्निष्क्रियः क्षणम् ॥८१९॥
820 ततो ववन्दे तत्पादौ स चोत्क्राम्या[1]लिलिङ्ग तम् । तास्ताः कथास्तयोरासन्नुपकर्त्रु[2]पकार्ययोः ॥८२०॥
व्यापादयैनमेवादौ हर्षोत्कर्षे ततो नृपः । निष्कण्टकोसि भवितेत्याप्तस्योपांशु जल्पतः ॥८२१॥
ततो विजयमल्लेन नाद्रोहेणादृतं वचः । ज्ञात्वेङ्गितज्ञो हर्षस्तत्ततस्तु चकितः क्षणम् ॥८२२॥ युग्मम् ॥
स्वदेहमामिषीभूतं स भ्रात्रोः श्येनयोरिव । निष्पत्त्रपक्ष[1]प्रतिमो ररक्षार्वगतश्चरन् ॥८२३॥
आसन्नाभ्रजलस्य दावविगमे विद्युद्भयं शाखिनो नक्रास्याद्गलतश्च मज्जनमयी शङ्का भवेद्वारिधौ[1] ।
भोक्तव्यस्य विधिः शुभस्य रभसात्स्वादुत्वनिष्पत्तये जन्तोः संतनुते निराकृतभियो भीत्यन्तरोत्पादनम् ॥८२४॥
825 तं हयभ्रमणव्याजाद्रक्षितुं निजजीवितम् । ज्ञातवार्ता निजाः केचित्पत्तयः पर्यवारयन् ॥८२५॥
साकं विजयमल्लेन ततः संमन्त्र्य स क्षणात् । चचाल विप्लवापायमाख्यातुं तं महीभुजे ॥८२६॥
अग्रं तद्वेश्मनः प्राप्तं विनिर्यान्तं नृपात्मजात् । ततो विजयसिंहस्तं संप्रवेशान्न्यवारयत् ॥८२७॥
ऊचे च मरणात्तीर्णो मर्तुं विशसि किं पुनः । निष्प्रज्ञ गत्वोपविश त्यक्तशङ्कं नृपासने ॥८२८॥
एवमुक्तवतस्तस्य भृत्यैः कोशादुपाहृते । सिंहासने हर्षदेवस्ततस्तूर्णमुपाविशत् ॥८२९॥
830 वैयात्यच्छादितानन्तप्रातिकूल्या तदन्तिके । उपाविशच्च सुगला महादेवीत्वसिद्धये ॥८३०॥
तस्याभिषेकशब्देन समघद्यन्त सर्वतः । रसितेनाम्बुवाहस्य चातका इव मन्त्रिणः ॥८३१॥
तद्वार्ताश्रवणेनार्तमुत्कर्षं मन्दिरात्ततः । धूर्तो विजयसिंहोपि कृष्ट्वान्यमनयद्गृहम् ॥८३२॥
आस्थानस्थस्य भूभर्तुरग्रेण स मितानुगः । नष्टश्रीर्ददृशे गच्छन्स्थिराः कस्य विभूतयः ॥८३३॥
तस्य वेश्मप्रविष्टस्य बहिर्विन्यस्य रक्षिणः । राज्ञो विजयसिंहस्तत्कृतं कार्यं न्यवेदयत् ॥८३४॥
835 कारायां संस्तुतान्राजपार्श्वमानीय ठक्कुरान् तत्सैन्येप्रस्थितेत्याक्षीद्भयं विजयमल्लतः ॥८३५॥
सोप्यग्रजं प्राप्तराज्यं श्रुत्वा तत्सविधं व्रजन् । निन्ये संमान्य तद्दूतैः स्वामेव वसतिं क्षणात् ॥८३६॥
तत्सैन्यं स्वान्तिकं प्राप्तमथ वीक्ष्य क्षमापतिः । आनिनाय तमभ्यर्णं क्षणमात्रेण नीतिवित् ॥८३७॥
मह्यं प्राणाश्च राज्यं च त्वया दत्तमिति ब्रुवन् । स प्राञ्जलिस्तमकरोत्क्लेशसाफल्यदायिनम् ॥८३८॥
तस्य दैवानुकूल्येन नीत्येव सुप्रयुक्तया । तत्कालमेव तद्राज्यशय्यायां समुपाविशत् ॥८३९॥
840 कारागृहान्तःसंवीतान्येव वासांसि धारयन् । सिंहासनेन शुशुभे श्रीसांनिध्यान्नवो नृपः ॥८४०॥
तादृक्साहससंरम्भपरिश्रान्तो दिनात्यये । कृतारोहोथ शय्यायां त्यक्तभार इवापतत् ॥८४१॥

---

८२०. [1]) त्क्राम्या supplied by $A_3$ in space left by $A_1$.—[2]) Emended with C; A °न्नुपकर्त्रूप°. ८२३. Thus A; perhaps, °पक्षि°?. ८२४. [1]) The same hand which has supplemented the marginal note of $A_3$ in i. 110, writes here: नक्रास्याच्चलतश्च मज्जनमयी शङ्का प्लवस्याम्बुधौ इत्यन्यादर्शे, with the gloss नक्रः जलप्राणिविशेषः यो जलहस्तिनोपीरयति तन्मुखात्सकाशाद्दैववशाच्चलितस्यापि ब्रुडनमयी शङ्का उडुपस्य स्यादित्यर्थः.

पश्यन्निवसतामेव सर्वतो विशरारुताम् । न स निद्रासुखं तत्र मीलिताक्षोपि लब्धवान् ॥८४२॥
उत्कर्षो युधि बद्धस्तु मन्त्रं पृच्छन्स्वमन्त्रिणः । आक्षिप्यान्यद्वचो रूक्षं नोनकेनेत्यकथ्यत ॥८४३॥
प्रातः प्रोक्तोसि यन्मन्त्रं तन्नाकार्षीर्महीपते । पतितामनयादस्माद्भाविनीं शृणु संविदम् ॥८४४॥
अध्याक्षिपो बन्धनस्थं त्वं तमुच्छिष्टभोजिनाम् । श्वः श्वमांसार्पिणां हस्ते स तु त्वामर्पयिष्यति ॥८४५॥ 845
शरणं मरणादन्यत्तस्मादस्मिन्क्षणेस्ति किम् । त्यक्ताहवानामस्माकं तदप्यप्राप्यतां गतम् ॥८४६॥
अवसा[1]दफलास्वादकालेत्यन्तमरुंतुदम् । यद्वोपालम्भपाण्डित्यं न विपक्षेषु शोभते ॥८४७॥
त्वयापायमनालोच्य य उपायः प्रवर्तितः । सर्वमेकपदे तेन मुहूर्तेनैव हारितम् ॥८४८॥
संस्थाप्यमानो दुर्नीत्या सूच्येव जरटः पटः । प्रत्युतोपद्रवोल्पोपि शतद्वारः प्रजायते ॥८४९॥
एवं श्रुत्वा स तन्मध्यान्निर्गत्याभ्यन्तरं गृहम् । अवरुद्धिकया सार्धं विवेश सहजाख्यया ॥८५०॥ 850
तत्र संध्यासमाधिस्थस्तिष्ठामीत्यभिधाय ताम् । क्षणं तिरस्करिण्यन्तरेकाक्येवाकरोत्स्थितिम् ॥८५१॥
निःशस्त्रेण गले क्षिप्त्वा पटच्छेदनकर्तरीम् । नाड्यः प्राणहरास्तेन छिन्नाः खिन्नात्मना ततः ॥८५२॥
फणत्कारेण कर्तर्याश्च्युताया भुवि शङ्किता । अपश्यत्सहजा रक्तं श्च्योतज्जवनिकान्तरात् ॥८५३॥
सोथ लम्बशिरोनिर्यत्सान्द्रासृग्ददृशे तया । वज्रावभग्नशृङ्गान्तश्च्योतद्धातुरिवाचलः ॥८५४॥
तस्यास्तदानीमौचित्यं निर्व्यूढं येन योषिताम् । भर्तृप्रसादपात्राणामद्याप्युच्चैस्तरां शिरः ॥८५५॥ 855
व्रजति रजनी त्यक्त्वा क्वापि क्षये क्षणदाकरं पदमुपगतस्यास्तं संध्या रवेरनुगच्छति ।
इति परिणतौ प्रेमण्युच्चावचे परिचिन्तिते क्वचन नियमान्निन्द्या वन्द्या न वा सुधियां स्त्रियः ॥८५६॥
कुलाचारपतिप्रेमसादृश्येप्यभवत्तदा । कय्यासहजयोर्यस्मान्निन्द्या वन्द्या च पद्धतिः ॥८५७॥ युग्मम्॥
सापि हि द्युसदो वेश्मनर्तकी नाट्यमण्डपे । दृष्ट्वा तेनावरुद्धात्वं निन्ये राजवधूः पुरा ॥८५८॥
कान्तासृग्गैरिकास्यन्दकृतसान्द्राङ्गरागया । प्रेम्णो हेम्न इवौज्ज्वल्यं प्रविश्याग्निं तयार्पितम् ॥८५९॥
हर्षदेवस्यापि पूर्वं वेश्यात्वे साभवत्प्रिया । अतस्तेनार्थ्यमानापि मरणान्न न्यवर्तत ॥८६०॥ 860
चतुर्विंशाब्ददेशीयो दिनद्वाविंशतौ नृपः । मृतस्तिष्ठन्निशामेकां प्रातः सोक्रियताग्निसात् ॥८६१॥
तस्यावरोधलोलाक्ष्यो लोहराद्रिस्थिता अपि । कृशानुवर्त्मना काश्चित्पदवीं द्रुतमन्वयुः ॥८६२॥
शस्त्रं संत्याज्यमानेषु तन्मन्त्रिषु नृपानुगैः । मुमूर्षुर्नोनकः शस्त्रं न तत्याज क्षणं यदा ॥८६३॥
विनास्मान्मन्त्रदो राज्ञः कोन्यः स्याद्यद्दिनैरसौ । मोक्ष्यत्यस्मांस्ततः प्राणान्नोपेक्षिष्ठा विचारयन् ॥८६४॥
स्वयूथ्य एवेति वचः प्रशस्तकलशो वदन् । तदा संत्याजयामास स्वयं तच्च समर्पितम् ॥८६५॥तिलकम् ॥ 865
नोनसिल्हारभट्टारप्रशस्तकलशादयः । बद्ध्वाथ हर्षदेवेन कारागारं प्रवेशिताः ॥८६६॥
इत्येवमेकेनैवाह्ना तादृग्राजविपर्ययः । कृतश्च हर्षदेवेन दैवेनेव महाद्भुतः ॥८६७॥
यथाकथंचिद्व्युत्क्रान्ता बहवः पृथिवीभृतः । प्रतीतिविषमो मार्गः कष्टमापतितोधुना ॥८६८॥
सर्वोत्साहोदकक्षेत्रं सर्वानुल्लासदूतिका । सर्वव्यवस्थाजननी सर्वनीतिव्यपोहकृत् ॥८६९॥
उद्रिक्तशासनस्फूर्तिरुद्रिक्ताज्ञाक्षयक्षितिः । उद्रिक्तत्यागसंपत्तिरुद्रिक्तहरणग्रहा ॥८७०॥ 870

---

८४७. [1]) अवसा supplied by $A_3$ in space left by $A_1$.

कारुण्योत्सेकसुभगा हिंसोत्सेकभयंकरी । सत्कर्मोत्सेकललिता पापोत्सेककलङ्किता ॥८७१॥
स्पृहणीया च वर्ज्या च वन्द्या निन्द्या च सर्वतः । निश्चोद्या चोपहास्या च काम्या शोच्या च धीमताम् ॥८७२॥
आशास्या चापकीर्त्या च स्मार्या त्याज्या च मानसात् । हर्षराजाश्रया चर्चाकथा व्यावर्णयिष्यते ॥८७३॥ कुलकम् ॥
नूनं स तैजसैरेव ससृजे परमाणुभिः । कुतोन्यथाभूत्प्रसवे दुष्प्रेक्ष्यो महतामपि ॥८७४॥
875 न मर्त्येषु न देवेषु तद्वेषो दृश्यते क्वचित् । दानवेन्द्रेषु स प्राज्ञैः परमुत्प्रेक्ष्यते यदि ॥८७५॥
प्रतिमार्कपरीमाणज्वलत्कुण्डलमण्डितः । उत्तुङ्गमुकुटानद्धविकटोष्णीषमण्डलः ॥८७६॥
प्रसन्नसिंहविप्रेक्षी नीचश्मश्रुच्छटाञ्चितः । वृषस्कन्धो महाबाहुः श्यामलोहितविग्रहः ॥८७७॥
व्यूढवक्षाः क्षाममध्यो मेघघोषगभीरवाक् । सोमानुषाणामपि यत्प्रतिभाभङ्गकार्यभूत् ॥८७८॥ तिलकम् ॥
सिंहद्वारे महाघण्टाश्चतुर्दिक्कमबन्धयत् । ज्ञातुं विज्ञप्तिकामान्स प्राप्तांस्तद्वाद्यसंज्ञया ॥८७९॥
880 आर्तां च वाचमाकर्ण्य[1] तेषां तृष्णानिवारणम् । प्रावृषेण्यः पयोवाहश्चातकानामिवाकरोत् ॥८८०॥
अचित्रवस्त्रो निर्हेमभूषणोल्पपरिच्छदः । ददृशे विगतो-- [1] न कश्चिद्राजमन्दिरे ॥८८१॥
सिंहद्वारे नरपतेर्नानाजनसमाश्रिते । सर्वदेशश्रियोभ्रान्तमासंत्राशीकृता[1] इव ॥८८२॥
अपेतसंख्याः सौवर्णशृङ्खलाकटकान्विताः । भ्रेमुर्मन्त्रिप्रतीहारमुख्याः क्ष्मापतिमन्दिरे ॥८८३॥
एवं स्फूर्जन्स नृपतिर्नवसाम्राज्यसुन्दरः । अभूद्विजयमल्लस्य गुरोरिव मते स्थितः ॥८८४॥
885 आदीयमानवचसः कृतज्ञेन महीभुजा । तस्याभूत्पार्थिवस्येव सेवकैः संकटा सभा ॥८८५॥
स्वसेवकाननादृत्य रक्षन्संस्थाव्यतिक्रमम् । पित्र्येभ्य एव मन्त्रिभ्यः सोधिकारान्समर्पयत् ॥८८६॥
द्वारे चकार कन्दर्पं मदनं चापि कम्पने । अन्यान्विजयसिंहादीन्कर्तव्ये च निजे निजे ॥८८७॥
तेन प्रशस्तकलशप्रमुखाः शान्तमन्युना । बन्धात्संत्यज्य कार्येषु निजेष्वेव[1] नियोजिताः ॥८८८॥
स्मृत्वा[1]पकारान्सुबहूनमात्यो नोनकः परम् । धात्रेयेण समं भ्रात्रा कोपाच्छूले विपादितः ॥८८९॥
890 काले काले तु कार्येषु संकटेषु महामतिम् । संस्मरन्स्वामिभक्तं तं पश्चात्तापेन पस्पृशे ॥८९०॥
योग्यः कृतापकारोपि कदाचिदुपयुज्यते । विहितागारदाहोग्निः शरणं भोज्यसिद्धये ॥८९१॥
संदर्श्याग्रे स्वभार्यायाः कर्णनासावकर्तनम् । विश्शाभट्टो[1] राजभृत्यैः शूलेनैव विपादितः ॥८९२॥
उदये संविभेजे स भृत्यान्कारावनिर्गतान् । मधौ प्रफुल्लः शाखीव भृङ्गान्भूविवरोत्थितान्[1] ॥८९३॥
राक्केः क्षेमस्य यः पौत्रो वज्रजः स महीभुजा । सर्वामात्यप्रधानत्वं निन्ये सुन्नः सहानुजः ॥८९४॥
895 राज्ञो यात्रादिसमये प्रेक्षकाणां पदे पदे । एक एकोभवन्मन्त्री महीपालभ्रमप्रदः ॥८९५॥
सर्वप्रतीहारघटामूर्धानमधिरोपितः । जयराजोनुजस्तस्य जीवितादधिकोभवत् ॥८९६॥
जाह्नवीयात्रया भ्रात्रोरानृशंस्या ----[1] । धम्मटः सोपि तान्वङ्गैर्भ्रातृपुत्रैः सहाययौ ॥८९७॥

---

८७९. [1]) Thus corr. by $A_3$ from $A_1$ मघा°. ८८०. [1]) कर्ण्य and तृष्णा supplied by $A_3$ in space left by $A_1$. ८८१. [1]) $A_1$ indicates here a *lacuna* of two *aksharas*; C विगतोत्तापे; perhaps, विगतोद्वेगे (?). ८८२. [1]) Emended; A °मासीत्राशी°. ८८८. [1]) Thus corr. by $A_3$; $A_1$ ------सन्त्यज्य कार्येषु नियोजिताः. ८८९. [1]) Thus corr. by later hand from $A_1$ स्मृत्वोप°. ८९२. [1]) Thus A; perhaps, to be read विद्दशावट्टो; cf. vii. 617, 621, 630. ८९३. [1]) $A_2$ gloss मधौ वसन्ते भूविवरोत्थिता भृङ्गा नीज्यबम्बर इति भाषया प्रसिद्धाः ये अस्तावलम्बिनि सूर्ये सूक्ष्मेभ्यः भूविवरेभ्यः वसन्तसमये उत्तिष्ठन्ति शाद्वलोपरि सञ्चारार्थं ॥. ८९७. [1]) Here $A_1$ indicates a *lacuna*; C °नृशंस्याद्विचक्षणः.

संमान्य तं नरपतिः स्वकृते हारिताग्रजम् । सभ्रातृपुत्रमद्राक्षीत्स्वाविशेषेण सर्वदा ॥८९८॥
विभज्य भुञ्जतो राज्यं तस्यैवं प्रेरितः खलैः । क्रमाद्विजयमल्लोथ दुद्रुक्षुर्विकृतिं दधे ॥८९९॥
राज्यं प्रादाः किमन्यस्मै जित्वेत्युक्तः स दुर्जनैः । तल्लिप्सुर्मन्त्रयामास वधं प्रथमजन्मनः ॥९००॥ 900
विजने मन्दिरे हन्यामिति संमन्त्र्य भूपतिः । यागं विधाय व्याजेन तेनागन्तुं निमन्त्रितः ॥९०१॥
मन्त्रे श्रुतिं गते राज्ञः सोथास्कन्द[1]विशङ्कितः । आदिदेश स्वसैन्यानां द्रुतं संनहनोद्यमम्[2] ॥९०२॥
संनद्धे राजसैन्येथ द्रुतं निर्गत्य भूपतेः । हता विजयमल्लेन मन्दुराभ्यस्तुरंगमाः ॥९०३॥
संहरं[1]स्तुरगान्वीक्ष्य प्रहरन्नृपतेर्बलम् । कुर्वन्महाहवं वीरो निर्गन्तुं तत्वरे पुरात् ॥९०४॥
आश्लिष्य पृष्ठं तिष्ठन्त्या जायया सहितो व्रजन् । स चकार तुरंगस्थः संग्राममतिमानुषम् ॥९०५॥ 905
धारासारैः क्षणे तस्मिन्नकालजलदोज्झितैः । विपर्यस्तेव पृथिवी सर्वतः समलक्ष्यत ॥९०६॥
झांकारमारुतारब्धभूरिभेरीरवे रणे । आसारेण शरैश्चासीच्छाद्यमानो नृपात्मजः ॥९०७॥
तं क्षीयमाणपृतनं यान्तं हन्तुं समुद्यताः । कर्माणि प्राकृ[1]तानीव न चण्डकक्षुता जहुः ॥९०८॥
भग्नसेतुं पयोवेगैर्वितस्तासिन्धुसंगमम् । सजानिर[1]तरद्दो[2]र्भ्यामवतीर्य[3] स वाजिनः ॥९०९॥
सत्त्ववान[1]करोत्पत्न्यां[2] मज्जनं[2] रिपुसंकटे । सिन्धुं प्रवृद्धामुत्तीर्य तुरंगोपि तमन्वगात् ॥९१०॥ 910
द्विषां दृग्गोचरायातः स तमारुह्य वाजिनम् । दरद्देशोन्मुखो वीरः प्रायाल्लहरवर्त्मना ॥९११॥
कन्दर्पद्वारपतिना सर्वतो रुद्धपद्धतिः । गिरीनुल्लङ्घ्य चाविक्षद्गिरिगुप्तां दरत्पुरीम् ॥९१२॥
दरदा[1]भ्यर्चितं तत्र श्रीविद्याधर-[2]हिना । केचिन्निजाः परिजनाः शनकैस्तं प्रपेदिरे ॥९१३॥
श्रुत्वा स्वीकार्यमाणं च संरम्भं डामरादिभिः । प्रायुङ्क्त हर्षपृथ्वीभृदुपायांश्चकितोन्वहम् ॥९१४॥
तेषु वन्ध्येषु शीतर्तुं सोतिवाह्य दरत्पुरे । डामरैः प्रहितालापश्चैत्रे यात्रामदान्मदात्[1] ॥९१५॥ 915
उत्तीर्य संकटांस्तिष्ठन्मार्गन्तः पट[1]मण्डपे । अकस्मादभवन्मानी हिमानीहतजीवितः ॥९१६॥
यदुल्लासाय संरम्भो धीरैर्विस्तार्यते महान् । कृत्यं हिनस्ति तद्दैवमत्यल्पेनैव वस्तुना ॥९१७॥
उन्मीलनं तिग्मरुचिः प्रयत्नाद्येषां सहस्रेण करैः करोति ।
उन्मूलयत्येककरेण तानि पद्मानि धाता कुपितो द्विपेन ॥९१८॥
द्वैराज्यशङ्कया कंचित्कालं संकुचितं ततः । भूयः प्रभयतो लग्नं राज्यं[1] हर्षमहीभुजः ॥९१९॥
राजशब्दस्तदा सेहे न कुत्राप्यधिरोपणम् । अत्युदग्रतया तस्मिंल्लघुत्वेनान्यराजसु ॥९२०॥ 920
सुशोभादायिनीर्भङ्गीः प्रावर्तयत मण्डले । निर्मत्सरो नरपतिः पुष्पर्तुरिव कानने ॥९२१॥
मुक्तकेशा निरुष्णीषा निष्कलाभरणाः पुरा । संत्यज्यैकं महीपालमभवन्निह देहिनः ॥९२२॥
धम्मिल्लग्रथनाद्यत्र मदनः कम्पनापतिः । जयानन्दोप्यमात्याभ्यश्चित्राधोरुकधारणात् ॥९२३॥

---

९०२. [1]) थास्कन्द supplied by $A_3$ in space left by $A_1$.—[2]) Emended; A °नोद्यतम्. ९०४. [1]) संहरं supplied by $A_3$ in space left by $A_1$. ९०८. [1]) Thus A; perhaps, to be read प्राकृतानीव. ९०९. [1]) सजानिर supplied by $A_3$ in space left by $A_1$.—[2]) Thus corr. by $A_3$ from $A_1$ °तरन्दो°.—[3]) Thus corr. by $A_3$ from $A_1$ °तार्य. ९१०. [1]) Thus corr. by $A_3$ from $A_1$ °वामक°.—[2]) त्पत्न्या and नं supplied by $A_3$ in space left by $A_1$. ९१३. [1]) Thus corr. by $A_3$ from $A_1$ दरदा°.—[2]) $A_1$ indicates a *lacuna*; C °धरदेहिना. ९१५. [1]) न्मदात् supplied by $A_3$ in space left by $A_1$. ९१६. [1]) Thus corr. by $A_3$ from $A_1$ पुरम°. ९१९. [1]) प्रभयतो लग्नं राज्यं supplied by $A_3$ in space left by $A_1$.

अन्वभूत्पार्थिवक्रोधमविशेषेण मण्डले । तेन राज्योचितो वेषस्तत्र राज्ञा प्रवर्तितः ॥९२४॥युग्मम्॥

925 स केषांचिदमात्यानामाकल्पोल्लासशोभिनाम् । निर्मत्सरः स्वदासीभिराराात्रिक्रमकारयत् ॥९२५॥

दाक्षिणात्याभवद्भङ्गिः प्रिया तस्य विलासिनः । कर्णाटानुगुणष्टङ्कस्ततस्तेन प्रवर्तितः ॥९२६॥

लडत्तालीदलाः स्थूलचन्दनस्थाससुन्दराः । रेजुर्जनास्तदास्थाने श्लाघ्यदीर्घासिधेनवः ॥९२७॥

स्वर्णकेतकपत्राङ्कजूटलम्बोर्जितस्रजः । चटुलातिलका[1]श्लिष्टविलोलतिलकाङ्कुराः ॥९२८॥

अपाङ्गश्रोत्रयोर्बद्धसंधयोञ्जनरेखया । निर्नीरङ्गिककेशान्तबद्धहेमोपवीतकाः ॥९२९॥

930 अधराम्बरपुच्छान्तैर्लम्बैश्चुम्बितभूतलाः । प्रच्छादितार्धदोर्लेखकञ्चुकाङ्कपयोधराः ॥९३०॥

कर्पूरोद्धूलनस्मेरा भ्रमन्त्यस्तरलभ्रुवः । बभ्रुराश्रितपुंवेषा[1] झषाङ्कच्छलदङ्कताम् ॥९३१॥ चक्कलकम् ॥

अन्योपजीव्यतां प्रापुस्तस्यार्थित्वेन मार्गणाः । विश्वाप्यायकतां मेघाः प्रणयेनेव वारिधेः ॥९३२॥

प्रसादैस्त्यागिनस्तस्य राज्ञः कनकवर्षिणः । समस्ता गाथकगणाः पार्थिवस्पर्धितां ययुः ॥९३३॥

विद्वच्चूडामणिर्भूभृत्पण्डितात्रत्नमण्डितान् । चकार युग्यतुरगच्छत्रादिप्रक्रियाभृतः ॥९३४॥

935 कश्मीरेभ्यो विनिर्यान्तं राज्ये कलशभूपतेः । विद्यापतिं यं कर्णाटश्चक्रे[1] पर्माडिभूपतिः ॥९३५॥

प्रसर्पतः करटिभिः कर्णाटकटकान्तरे । राज्ञोग्रे ददृशे तुङ्गं यस्यैवातपवारणम् ॥९३६॥

त्यागिनं हर्षदेवं स श्रुत्वा सुकविबान्धवम् । बिल्हणो वञ्चनां मेने विभूतिं तावतीमपि ॥९३७॥

सौवर्णामल[1]साराद्या[2] राजधान्यो धरापतेः । सुबह्व्योभ्रंलिहगृहा भेजिरे भुवनाद्भुताः ॥९३८॥

तदीये नन्दनवने द्रुमेभ्यो नो व्यधुः स्थितिम् । त्यागिना निर्जितास्तेन केवलं कल्पपादपाः ॥९३९॥

940 विविधाभिरशून्याम्बु विहंगमृगजातिभिः । तेन व्याप्तदिगाभोगं चक्रे पम्पाभिधं सरः ॥९४०॥

सोज्ञासीद्यावतीर्विद्यास्तासां नामापि निश्चितम् । वक्तुं नास्त्येव सामर्थ्यं व्यक्तं वाचस्पतेरपि ॥९४१॥

गीतमाकर्ण्यतेद्यापि तस्य वाग्गेयकारिणः । विपक्षैरपि पक्ष्माग्रलुठद्बाष्पोदबिन्दुभिः ॥९४२॥

स्वपतो दिनयामौ द्वौ सर्वकालं विलासिनः । दत्तस्थानस्य तस्यासीद्यामिनीषु प्रजागरः ॥९४३॥

तस्य दीपसहस्राङ्के स्थितस्यास्थानमण्डपे । विद्वद्गोष्ठीगीतनृत्तप्रस्तावेन क्षपा ययुः ॥९४४॥

945 कथान्ते शुश्रुवे तत्र पर्णचर्वणजः परम् । कान्ताधम्मिल्लशेफालीत्रुटिजन्मा च मर्मरः ॥९४५॥

वितानैः सपयोदेव साग्निवप्रेव दीपकैः । रुक्मदण्डैः सशम्पेव सधूमेवासिमण्डलैः ॥९४६॥

साप्सरा इव कान्ताभिः सनक्षत्रेव मन्त्रिभिः । सर्षिसंघेव विबुधैः सगन्धर्वेव गायनैः ॥९४७॥

नित्यसंकेतवसतिर्धनदस्य यमस्य च । एकं विहरणारण्यं दानस्य च भयस्य च ॥९४८॥

क्षेपास्थानस्थितिस्तस्य राज्ञः शक्राधिकश्रियः । कस्य वाचस्पतेर्वाचा वक्तुं कार्त्स्न्येन शक्यते ॥९४९॥ चक्कलकम् ॥

950 रौक्मैश्च राजतैश्चासीद्व्यवहारस्तदा घनः । मण्डले विरलामुष्मिन्दीनारैस्ताम्रजैः पुनः ॥९५०॥

दण्डनायकतां प्राप्य सुन्नः सर्वोन्नतिं भजन् । तस्मिन्काले त्वभूल्लोभान्नीचो मुष्टिंपचः परम् ॥९५१॥

निजा जयवने सूर्यामूलके विजयेश्वरे । आख्यान्ति यस्य लुब्धत्वं निर्व्ययस्थितयो मठाः ॥९५२॥

---

९२८. [1]) $A_3$ gloss ललाटलम्ब्यलङ्कारश्चटुलातिलको मतः. ९३१. [1]) Emended ; A° पुंवेशा. ९३५. [1]) Thus corr. by $A_3$ from $A_1$ °टश्चे. ९३८. [1]) Thus corr. by later hand from $A_1$ सौवर्णामाल°.—[2]) राद्या supplied by $A_3$ in space left by $A_1$.

क्षुधितव्याधितानाथदीनाद्यार्तिनिवारणम् । सुस्पष्टं प्राप पट्टस्य राज्यलक्ष्मीः कृतार्थताम् ॥९५३॥
नन्दिक्षेत्रे व्ययीकृत्य प्रत्यब्दं सप्त वासरान् । चण्पकः सफलां चक्रे सर्वकालार्जितां श्रियम् ॥९५४॥
कृष्णाजिनोभयमुखीमुख्यैर्दानैः क्षमाभुजा । अदरिद्रीकृता विप्रा निःशेषार्तिच्छिदार्थिनाम् ॥९५५॥ 955
राज्ञो वसन्तलेखाख्या शाहिवंशप्रियाकरोत् । मठाग्रहारान्नगरे पूज्ये च त्रिपुरेश्वरे ॥९५६॥
माहेश्वर्यमयी काचिदित्थं ज्वालेव सोद्ययौ । उदारव्यवहारं तु न तद्राज्यं प्रचक्षते ॥९५७॥
अथ प्रवृद्धिं संप्राप्ताः शनकैर्नवमन्त्रिणः । पूर्वामात्यद्विषो राज्ञो मतिमोहं प्रचक्रिरे ॥९५८॥
कुष्ठार्ताङ्घ्रियुगः शिखी बहुपदं गृह्णाति धावन्नहिं भानुः पादसहस्रभाक्प्रतिपदं संचार्यतेनूरुणा ।
वञ्च्यन्ते बलिनोपि यल्लघुबलैः सामर्थ्यहीनैश्च यद्भ्राम्यन्ते परिपूर्णवृत्तय इदं दैवस्य लीलायितम् ॥९५९॥
स सर्वशास्त्राधिगमप्रौढः परिवृढो विशाम् । यन्मोहितमतिश्चक्रे वैधेयैरपि मन्त्रिभिः ॥९६०॥ 960
विपन्नस्य पितुर्वैरप्रतिकारविधित्सया । स राजधानीनामाङ्कमठादि निरलोठयत् ॥९६१॥
त्यागी तत्कोशसंभारं व्ययीकुर्वन्नितस्ततः । लुब्धस्य चाभिधां तस्य पापसेन इति व्यधात् ॥९६२॥
शुद्धान्ते शुद्धशीलानां ढौकितं मूढचेतसा । स्पष्टं षट्यधिकं राज्ञा स्त्रीणां तेन शतत्रयम् ॥९६३॥
यादृशीस्तादृशीस्तत्र नारीर्विन्यस्यतानिशम् । नागृह्यन्त परं डोम्बजनंगमकुलाङ्गनाः[1] ॥९६४॥
अत्रान्तरे पूर्यमाणो गूढं कोटपदातिभिः । पुनर्भुवनराजोभूल्लहरालब्धिलुब्धधीः ॥९६५॥ 965
स दर्पितपुरं प्राप्तः कन्दर्पद्वारनायकम् । श्रुत्वा योद्धुं विनिर्यातं ययौ भूयोप्यदृश्यताम् ॥९६६॥
तस्मिन्प्रसङ्गेपि नृपो दृप्यन्राजपुरीपतिः । संग्रामपालः केनापि हेतुना विक्रियां ययौ ॥९६७॥
कन्दर्पे कोटभृत्यानां भिन्नानां संग्रहोद्यते । क्रुध्यन्राजपुरीं राजा व्यसृजद्दण्डनायकम् ॥९६८॥
स महद्भिः समं सैन्यैर्गच्छंल्लोहरवर्त्मना । अधीरः कोटकच्छेषु सार्धं मासं व्यलम्बत ॥९६९॥
प्रत्यासन्नाच्छुचेर्मासात्प्रतापाच्च विरोधिनाम् । त्रस्यतस्तस्य यात्रायां न संकल्पोप्यराजत ॥९७०॥ 970
अविशेषज्ञभावेन भर्तुस्तिष्ठन्निरुद्यमः । ततो जगाम कन्दर्प एवोपालम्भमात्रताम् ॥९७१॥
कृतप्रतिज्ञोनाहारतया राजपुरीजये । उपालम्भार्दितः सोथ निःसामग्र्योप्यवाचलत् ॥९७२॥
निराहारस्य वसतः कन्दर्पस्याद्रिगह्वरे । षष्ठेह्न्यभूद्राजपुरी योजनेभ्यधिके स्थिता ॥९७३॥
अव्याहतः सोरिबलाद्विषच्छस्त्राणि पातयन् । कदलीपल्लवान्मृद्नन्वनं सिंह इवाविशत् ॥९७४॥
दण्डनायकसैन्येभ्यः परमेकस्तमन्वगात् । सेनानीः कुलराजाख्यो बुद्धराजकुलोद्भवः ॥९७५॥ 975
तं बाह्याल्यां राजपुर्या हतासंख्याहितं द्विषः । निहत्य शुक्लच्छत्राङ्कं कन्दर्पं मेनिरे हतम् ॥९७६॥
मध्याह्ने स तु कन्दर्पः स्वयं संप्राविशद्बली । राजधानीं राजपुर्या विंशत्रिंशैः समं भटैः ॥९७७॥
द्विषां त्रिंशत्सहस्राणि योधानामनिवर्तिनाम् । रुरोध राजपुर्यग्रे तत्पदातिशतत्रयम् ॥९७८॥
काश्मीरिकाणां[1] निहतं रणे तत्र शतद्वयम् । चत्वारि तु शतान्युर्व्यां खशानामप्यशेरत ॥९७९॥
भग्ने रिपुबले दूरमसंख्यैर्यैश्चिताग्निभिः । संस्कुर्वद्भिर्हतान्राशीन्रणो मृत्योर्महानसः ॥९८०॥ 980
तेनैवं स्वाम्युपालम्भवेतालो रभसार्पितः । रणश्मशाने वीरेण शमितो मांसशोणितैः ॥९८१॥

---

९६४. [1]) Emended; A डोम्भ°. ९७९. [1]) Emended; A काश्मीरका°.

यामभात्रावशेषेह्नि पुनरेवाथ संहताः । द्विषः परिभवोत्तप्ताः[1] कन्दर्पं योद्धुमाययुः ॥९८२॥
ततस्तानथ नाराचान्निचिक्षेप स संयुगे । लिप्तानौषधितैलेन विद्धा यैः प्राज्वलन्दिशः ॥९८३॥
आग्नेयं वेत्त्यसावस्त्रमिति मूढा विशङ्किताः । ते दूरं प्रययुर्भीता निन्दन्तः पुनरागमम् ॥९८४॥
985 प्रगल्भभावः प्रतिभानमोजः प्रयोगचातुर्यमसंभ्रमश्च । महाशयानामतिसंकटेषु धैर्योपनद्धां न धियं जहाति ॥९८५॥
राजधानीं प्रविष्टः स भानावस्ताभिलाषिणि । भूयोप्यपश्यत्स छन्नां बाह्यालीं बहलैर्बलैः ॥९८६॥
योद्धुं यियासुः शुश्राव प्राप्तं तं दण्डनायकम् । घोरां रणाटवीं दृष्ट्वा भयात्स्थगितसैनिकम् ॥९८७॥
स्वीयैर्दृष्टैः क्षतैः कैश्चिद्दृप्यन्त्यधिकमाहवे । पारकीयैस्त्वसन्त्यन्ये कोन्तरं वेत्ति देहिनाम् ॥९८८॥
आनीतोथ विनिर्गत्य तेनैव स भये त्रुडन् । स्पर्धमानो यथाम्भोधौ मज्जन्हंसेन वायसः ॥९८९॥
990 रक्तप्रजं वीतसैन्यमभिन्नं बहुकोशवत् । परराष्ट्रं विशेदेवं स्ववीर्येणैव कोपरः ॥९९०॥
प्रणतात्करमादाय ततो राजपुरीपतेः । मासमात्रेण कन्दर्पः पुनः स्वं[1] भुवमाययौ ॥९९१॥
प्रत्युद्गमादिसत्कारैः कृतपूजो महीभुजा । स दण्डनायकादीनां शिरःशूलावहोभवत् ॥९९२॥
परिहासपुरे पारिपाल्यं कुर्वन्कठोरधीः । वातगण्डाख्यया ख्यातिं निन्ये यस्तत्र पर्षदा ॥९९३॥
प्रभूतोत्कोचसंप्रीतसचिवप्रेरणस्पृशा । अपास्य वामनं[1] राज्ञा पादाग्रादौ नियोजितः ॥९९४॥
995 आनन्दः स क्षणे तस्मिन्निच्छन्द्वाराधिकारिताम् । कन्दर्पद्वेषिणामासीन्मन्त्रिणामतिसंमतः ॥९९५॥
तत्प्रेरितस्ततः पातुं लोहरं विप्लुताहितम् । मण्डलेश्वरतां दत्त्वा कन्दर्पं प्राहिणोन्नृपः ॥९९६॥
मन्त्रविक्रमसंपन्नः कुभृत्यैः स्वोदयेप्सुभिः । युक्त्या तया राजपशोः समीपात्सोपवाहितः ॥९९७॥
दूत्यार्होयमिति प्रहाय निकटाद्देशान्तरं वाग्मिनं सूरिं बन्धुवियोगकृन्ननु वचोमुष्येति संत्यज्य च ।
शूरो राज्यमसौ हरेदिति तया हित्वा विचारोज्झितो धूर्तप्रेरणयाबुधो नृपपशुर्नायाति नाशं चिरात् ॥९९८॥
अदर्शनात्स्वबद्धापि कन्दर्पप्रीतिराशयात् । राज्ञो जगाल कालेन सा मुष्टेरिव[1] वल्गुका ॥९९९॥
1000 उत्कर्षपुत्रावादाय चिकीर्षुर्लोहरेशताम् । कन्दर्पो वर्तत इति क्षितिपं मन्त्रिणोवदन् ॥१०००॥
तथेति नृपतिर्गृह्णन्वन्धुं हन्तुमथाशु तम् । ससैन्यं व्यसृजत्पट्टं[1] टक्कं[2] चासिधराभिधम् ॥१००१॥
तयोः संप्राप्तयोर्वार्तां[1] तां लेखव्यत्ययाद्विदन् । विमुखश्चकितात्मा च कन्दर्पोभूद्यथा मुहुः ॥१००२॥
केलिद्यूतक्षणे हस्तं मृद्गन्सेवककर्वत्पुरः[1] । आसीदसिधरस्तस्य बन्द्धुमभ्युद्यतस्तदा[2] ॥१००३॥
ततः पाणिं विनिष्कृत्य सोङ्गुष्टाग्रेण तत्करम् । अमृद्गाद्येन निस्त्वक्त्वं[1] छिन्नः पक्षीव सोगमत् ॥१००४॥
1005 अनन्तरज्ञो भूभृच्च तेनात्मा च नृपाश्रितः । विगर्ह्यते स्म खिन्नेन पट्टश्चैवमकथ्यत ॥१००५॥
नैयाशयो नरपतिः कुटुम्बं प्रहिणोतु मे । अर्पयित्वा ततः कोटं प्रयास्यामि दिगन्तरम् ॥१००६॥
आनीय दत्तांस्तैर्ज्ञातीनादाय द्रोहवर्जितः । स विमुक्ताधिकारोथ मन्त्री वाराणसीं ययौ ॥१००७॥
हत्वा गयायां सामन्तमेकमन्यं निवेश्य च । काश्मीरिकाणां[1] चक्रे स श्राद्धशुल्कनिवारणम् ॥१००८॥

---

९८२. [1]) Emended; A °भवो तप्ताः. ९९१. [1]) Thus A; perhaps, to be read स्वभुवं. ९९४. [1]) Thus $A_1$; $A_3$ वासनं. ९९९. [1]) Thus corr. by $A_3$ from $A_1$ मुष्टिरिव. १००१. [1]) $A_4$ gloss मन्त्रिणं.—[2]) Thus $A_2$; $A_1$ रक्किं. १००२. [1]) तां supplied by $A_3$ in space left by $A_1$. १००३. [1]) Emended with C; A °न्सेवकत्पुरः.—[2]) Emended; A बद्धुम°. १००४. [1]) Doubtful emendation; A apparently निस्त्वन्त्त्यं; R G निस्त्वश्यं. १००८. [1]) Emended; A काश्मीरकाणां.

स हत्वा चौरसेनान्यं ससैन्ये दुर्गमेध्वनि । पूर्वाशामध्वनीनां च व्यधान्निर्धूतकण्टकाम् ॥१००९॥

व्याघ्रं निहत्योग्रसत्त्वं वाराणस्यां निरस्यता । पूर्वा दिग्भूषिता तेन मठैः सुकृतकर्मठैः ॥१०१०॥ 1010

ते तन्निर्वासनादेव लब्धलक्षाः कुमन्त्रिणः । अन्योन्यासूयया जघ्नुरथ कार्याणि भूभुजः ॥१०११॥

स्वैराहारोदितगुरुमदाः शृङ्गकण्डूतिशान्त्यै दुर्वारेर्ष्याकलुषमतयो यत्र दुर्मन्त्रिमेषाः ।

घ्नन्त्यन्योन्यं भवति गणितैर्वासरैरेव कैश्चिन्मध्यस्थाणोरिव नरपतेस्तत्र सर्वाङ्गभङ्गः ॥१०१२॥

अतिक्रामति कालेथ पार्थिवं हन्तुमुद्यमम् । दुद्रुक्षुर्जातराज्येच्छस्तान्वङ्गिर्धम्मटोभजत् ॥१०१३॥

द्रोहापवादभागेष भवेद्राज्यमिदं पुनः । मामेव वैश्यापुत्रत्वादनर्हेस्मिन्नुपेष्यति ॥१०१४॥

इति संमन्त्र्य सुचिरं निहन्तुं पृथिवीभुजम् । प्रेरितो जयराजोभूत्तेनासरलचेतसा ॥१०१५॥युग्मम्॥ 1015

बिलावग्रामजान्क्षिप्त्वा तीक्ष्णान्द्रोहाय भूपतेः । सोवरोधवधूर्द्वित्रा विदधे मध्यपातिनीः ॥१०१६॥

क्रमात्सिद्ध्युन्मुखे तस्मिन्कार्ये राजपुरीं नृपः । दूत्याय व्यसृजज्जातु बहुमानेन धम्मटम् ॥१०१७॥

सहलमङ्गलगृहे सुदिनापेक्षया स्थितम् । तं सिद्धिभङ्गचकितो जयराजः समाययौ ॥१०१८॥

तमर्थं मण्डपे गूढं तयोर्मन्त्रायमाणयोः । प्रयागानुचरः कश्चिद्भित्तिव्यवहितोशृणोत् ॥१०१९॥

तदावेदिततद्वार्तात्प्रयागात्तत्कथां ततः । बुद्ध्वा निवर्तयामास धम्मटं गमनान्नृपः ॥१०२०॥ 1020

कुलक्षयभयात्तिष्ठंस्तत्प्रतीकारमन्थरः । स्वमेव केवलं रक्षन्नासीत्स चकितोन्वहम् ॥१०२१॥

असिद्धिं जयराजस्तु दृष्ट्वा दूतैः स्वसंमुखौ । शमालडामरौ वीरौ वागपाजाभिधौ व्यधात् ॥१०२२॥

स्वभृत्यैर्भेदनिर्यातैर्यियासुं तं निवेदितम् । श्रुत्वा क्षपायां क्षितिभृद्दिक्षु चिक्षेप रक्षिणः ॥१०२३॥

व्याजाद्यात्रां वदन्सज्जः प्रातस्तान्वङ्गिरेव तम् । चतुष्कं पूजने धूर्तो जयराजमुपानयत् ॥१०२४॥

राज्ञो दत्तार्गले धाम्नि स्थितस्य स्थानमण्डपम् । सत्रा स भ्रातृपुत्रेण धम्मटेन ततोविशत् ॥१०२५॥ 1025

रक्षिणोथ बहिर्न्यस्य प्रमार्गः पार्थिवाज्ञया । जयराजं बधानेति नीचैर्धम्मटमभ्यधात् ॥१०२६॥

धम्मटे विश्वसञ्शस्त्रं जयराजस्त्यजेद्ध्रुवम् । निदेशेनामुना वेत्ति स्वमज्ञातं च धम्मटः ॥१०२७॥

द्वयोरेकस्य वा युद्धे तयोर्मृत्यौ हितं च नः । व्यक्तीकृतैक्ययोर्वापि वधो लोकेप्यगर्हितः ॥१०२८॥

इति निर्ध्यायतः शश्वदविरोधेन वेधसः । प्रज्ञास्य प्रत्यभाद्राज्ञो मन्त्रो युक्ततमस्तथा ॥१०२९॥तिलकम्॥

नाबुद्ध मां ध्रुवं राजा तान्वङ्गिरिति विश्वसन् । जयराजमुपागत्य ततो धार्ष्ट्याद्वचोब्रवीत् ॥१०३०॥ 1030

अप्रसन्नस्त्वयि नृपो यद्यद्रोहोसि निश्चयात् । नत्त्वयाशु विशुद्ध्यर्थमसिधेनुः समर्प्यताम् ॥१०३१॥

दैवेन वा मोहितः स तद्विश्वासेन वात्यजत् । आक्षिप्यमाणः शस्त्रास्त्रकोविदः शस्त्रमन्यवत् ॥१०३२॥

वैक्लव्यदर्शनात्सेर्ष्यस्ततः स परुषां गिरम् । तन्वङ्गपौत्रष्टुल्लाख्यस्तं जगादाज्जकात्मजः ॥१०३३॥

न त्वं निःसत्त्व कय्याया जातः कलशभूभुजा । आसीज्जनयिता नूनं क्लीबो यः कश्चिदेव ते ॥१०३४॥

निष्ठायां धैर्यचर्याणां परिणाममजानता । तेनेत्युक्तः स शीताम्बुसिक्तसुप्तोपमोभवत् ॥१०३५॥युगलकम्॥ 1035

द्रोहोदन्तं पृच्छयमानो धीरस्तन्मध्यपातिनम् । यातनाक्लेशितोप्यूचे स्वमेव न तु धम्मटम् ॥१०३६॥

---

१००९. ¹) च has been erased by $A_1$. १०१२. ¹) Thus $A_1$; corr. by later hand दुर्मन्त्रिशेषाः. १०१४. ¹) Thus corr. by later hand from $A_1$ वेश्या°. १०१८. ¹) Thus corr. by later hand from $A_1$ स्थितिम्. १०२४. ¹) Thus corr. by $A_2$ from $A_1$ पूर्तये; $A_2$ in margin भोजने. १०२६. ¹) Thus corr. by $A_2$ from $A_1$ प्रायमः.

विषघ्नमन्त्रवीर्येण मोघीकृतविषाशनः । रज्ज्वा निपीड्य ग्रीवाग्रं ततो निशि विपादितः ॥१०३७॥
जय्यकेन प्रतीहर्त्रा शिरश्छित्त्वोज्झितं ययौ । भट्टारनड्वलातोये तद्वपुर्मत्स्यभोज्यताम् ॥१०३८॥
तमेकसप्तते वर्षे हत्वा भाद्रपदे नृपः । वधं गभीरहृदयो धम्मटस्याप्यचिन्तयत् ॥१०३९॥
1040 आदिदेशाथ तत्सिद्ध्यै रहः शस्त्रभृतां वरम् । शूरं कलशराजाख्यं ठक्कुरं लोहराश्रयम् ॥१०४०॥
प्रहिणोति यदा दूतं प्रयागस्ते तदा त्वया । संपाद्यमेतदित्यूचे तं चोपचितसत्क्रियम् ॥१०४१॥
असिद्धिभीत्या स्वं दूतं स प्रहिण्वन्प्रयागकः । संमन्त्र्य क्रियतामेतदित्यूचे कुपितो नृपम् ॥१०४२॥
राज्ञि मन्त्र[1]यमाणेथ पञ्चानीयाग्र्यमन्त्रिणः । वामनः सार्गले द्वारे त्यक्तदेहोब्रवीद्वचः ॥१०४३॥
मन्त्रश्च मन्त्रिणश्चैते न यावन्निःसृता बहिः । तावत्क्रियेत चेदेतन्न भद्राणि दरिद्रति ॥१०४४॥
1045 राजाज्ञया प्रयागेन[1] ततो दूते विसर्जिते । तीक्ष्णः कलशराजाख्यस्तनयाभ्यां सहाययौ ॥१०४५॥
तस्मिन्प्रसङ्गे तान्वाङ्गिः श्येनस्य ददतातपम् । राजधान्यन्तरेवासीद्द्वित्रैरनुचरैः समम् ॥१०४६॥
पुरः कलशराजं तं दृष्ट्वा पश्चाच्च तत्सुतौ । यावत्साशङ्[1]कमाचख्यौ तावद्भृत्यैर्निजैर्जहे ॥१०४७॥
शक्तोपि धम्मटः क्रष्टुं कृपाणीमिति वादिनम्[1] । हन्तुं कलशराजं तु यावच्छस्त्रे व्यधात्करम् ॥१०४८॥
तावत्तेनाग्रतः पश्चात्तत्पुत्राभ्यां कृताहतिः । आसनादुच्चलन्नेव क्षिप्रं प्राणैरमुच्यत ॥१०४९॥
1050 मुमूर्षुणा क्षतस्तेन ज्यायान्कलशराजजः । चित्रमायुधवैगुण्यान्नाभीक्ष्णव्रणितोभवत् ॥१०५०॥
तस्य ह्यभाग्ययोगेन तेष्वेवाहःसु शास्त्रिणः । निजा कृपाणी तुत्रोट तेनाभद्रायु[1]धोभवत् ॥१०५१॥
निहत्य पातितः पृष्ठात्स तैर्व्याधैरिवाण्डजः । शुनां ग्रासाय संत्यक्तः श्वपाकैः पार्थिवाज्ञया ॥१०५२॥
राज्ञा तन्वङ्गनप्तारौ स्वयं रल्हणमल्हणौ । आगत्य प्राङ्गने त्यक्तकृपाणी परिरक्षितौ ॥१०५३॥
दत्तास्कन्दास्तु[1] टुल्लाद्याः संरम्भेण युयुत्सवः । माययोदयसिंहेन दाम्भिकेनैत्य वञ्चिताः ॥१०५४॥
1055 यूयं पुत्रा ममेत्युक्तवतस्ते धार्मिकस्य यत् । प्रत्ययात्तस्य शस्त्राणि तत्यजुर्जीवितेच्छवः ॥१०५५॥
राज्ञो विशुद्धिः क्रियतां पार्श्वमेत्येति तद्वचः । तैः समागत्य जगृहे मार्गो राजगृहान्प्रति ॥१०५६॥
तन्वङ्गजगृहोच्छिष्टैर्बाल एव विवर्धितः । टुल्लं ततो विहस्यैवं स्वच्छत्त्वग्राहकोवदत् ॥१०५७॥
तन्वङ्गनप्तर्य[1]त्पूर्वं जयराजमभाषथाः । न त्वं निःसत्त्व कय्याया इति तद्विस्मृतं तव ॥१०५८॥
स ते तादृश एवायं वर्तते संकटः क्षणः । किं धैर्यावसरे मूढ वैक्लव्यमवलम्बसे ॥१०५९॥
1060 तस्माज्जातोसि नियतं मत्पित्रोच्छिष्टमुष्टिना । अहं तु तेन वीरेण त्वत्पित्रा कीर्तिभागिना ॥१०६०॥
इत्युक्त्वा स रणे गृह्णन्खड्गधाराजलज्जलम् । पपात जन्ममालिन्यं मानी प्रक्षालयन्निव ॥ १०६१ ॥
नृपान्तिकं प्रयास्याम इति निश्चयतस्ततः । टुल्लादीन्राजपुरुषाः कारागारे निचिक्षिपुः ॥ १०६२ ॥
ते यौवनभरोन्मत्ता द्रुमा वासन्तिका इव । प्रत्यभासन्त कारुण्याद्रक्षणीयाः क्षमाभुजः ॥ १०६३ ॥
टक्कस्तु बिम्बियो नाम पापः संप्रेक्ष्य भूभुजम् । न्यजिग्रहत्तान्ग्रीवासु निशि पाशान्निवेशयन् ॥१०६४॥
1065 टुल्लो विजयराजश्च बुल्लो गुल्लश्च तेलुठन् । तन्वङ्गपौत्राश्चत्वारो हता वध्यमहीतले ॥ १०६५ ॥

---

१०४३. [1]) Emended; A मन्त्रिय°. १०४५. [1]) A here and elsewhere प्रयागेण. १०४७. [1]) Emended; A ° त्सशङ्कमा°. १०४८. [1]) Thus A; perhaps, to be emended कृपाणीमतिवादिनीम्. १०५१. [1]) युधो supplied by $A_3$ in space left by $A_1$. १०५४. [1]) Emended; A °स्कन्दाद्यास्तु. १०५८. [1]) Emended; A °नप्तो यत्पूर्वं.

हतानामपि सौन्दर्यं तेषामद्यापि वर्ण्यते । कथान्तरे वयोवृद्धैर्बद्धास्रुस्यन्ददुर्दिनैः ॥१०६६॥

सतताभ्यस्तताम्बूलैः स्रस्तैस्तद्दशनाङ्कुरैः । कीर्णशोणा[1]श्ममालेव सुचिरं वध्यभूरभूत् ॥१०६७॥

वृद्धिमानीतयो राज्ञाप्युत्कर्षापत्ययोस्ततः । ज्यायान्प्रमिम्ये[1] डोम्बाख्यो गूढदण्डैः कुलच्छिदा ॥१०६८॥

स्फुलिङ्गमिव संभाव्य तेजोविस्फूर्जितं शिशुम् । जघान जयमल्लं च तद्वद्विजयमल्लजम् ॥१०६९॥

गोप्तॄ[1]न्स्वगोत्रजान्हत्वा भोक्तुमेकस्य कस्यचित् । कुर्वन्ति दैवोपहता राज्यं निष्कण्टकं नृपाः ॥१०७०॥ 1070

संरूढं मधुगोलमुच्चविटपव्यूहावलीगह्वरे मूढः कर्तुमकृच्छ्रहार्यमभितः कस्यापि भव्यात्मनः ।
दैवप्रेरणया प्रकम्पवियशः पत्त्रप्रहारैर्दृढं तद्गोप्तॄ[1]न्मधुपान्निहत्य शमयत्यश्वत्थपृथ्वीरुहः ॥१०७१॥

ज्ञातिद्रोहमहापाप्मनष्टधीरथ पार्थिवः । डिम्बानामप्यसंभाव्यामभजद्विटभोज्यताम् ॥१०७२॥

वामनस्यात्मजः क्षेमस्तं जानञ्ज[1]नकद्विषम् । प्रैरय[2]त्कलशेशस्थच्छत्त्रहेमनिबर्हणे ॥१०७३॥

तामिच्छामच्छिनत्तस्य भक्तो युक्त्या प्रयागकः । धावतः श्वभ्रपातेच्छां धीरो यन्तेव दन्तिनः ॥१०७४॥

अनिशं नष्टचेष्टानां शवानामिव भूभुजाम् । अन्तःप्रवेशकुशलो यो वेताल इवाभवत् ॥१०७५॥ 1075

नप्ता हलधरस्याथ विटो लोष्टधराभिधः । जगाद निर्जने जातु राजानं रञ्जनेच्छया ॥१०७६॥ युग्मम्॥

ह्रियतां ग्रामहेमादि कलशेश्वरसंश्रयम् । तत्प्रासादाश्मभिः सेतुं वितस्तायां करोमि ते ॥१०७७॥

आलेख्यं गगने लिखामि बिसिनीसूत्रैर्वयाम्यम्बरं स्वप्नालोकितमानयामि कनकं ग्रथ्नामि वप्रं हिमैः ।
इत्याद्युक्तमपि स्फुटं जडमतिर्जानाति सत्यं नृपो यस्तादृक्त्रपया न वक्ति स गतप्रौढिः परं वञ्च्यते ॥१०७८॥

निषिषेध चिकीर्षां तु प्रयागस्तामपि प्रभोः । सदुपस्थायिकोपथ्याभ्यर्थनामिव रोगिणः ॥१०७९॥

अथ लोष्टधरो हास्यावसरे जातु भूपतिम् । बद्धस्य मोक्षो देवस्य क्रियतामित्यभाषत ॥१०८०॥ 1080

स्मित्वा किमेतदित्युक्तवन्तं तं स व्यजिज्ञपत् । उदभाण्डपुरे – –[1] भीमशा[2]हिरभूत्पुरा ॥१०८१॥

विरोधात्पारिषद्यानां[1] तत्कृतो भीमकेशवः । राज्ये कलशदेवस्य बद्धद्वारोभवच्चिरम् ॥१०८२॥

तैः शान्तवैरैर्विदधे यदाथ विवृताररिः । चौरापहृतदुर्वर्णकवचो ददृशे तदा ॥१०८३॥

भूयोपि चक्रे तद्भीत्या कोशसामग्र्यभागिति । ततः प्रभृत्यद्य यावद्बद्धद्वाराररिः स्फुटम् ॥१०८४॥

आदीयतां तदीयस्तत्कोशः[1] चौरभयावहः । सोपि बन्धाद्विमुक्तोस्तु पुष्पदीपादिभोगभाक् ॥१०८५॥ 1085

इति संप्रेरितस्तेन तथा चक्रे स भूपतिः । कोशं ततः प्रपेदे च मणिस्वर्णादिनिर्भरम् ॥१०८६॥

अचिन्तयच्च यत्रेदृग्व[1]स्तु शून्यसुरास्पदे । कीदृक्तत्रा[2]परेषु स्यादाढ्येषु सुरवेश्मसु ॥१०८७॥

कृतप्रायः स तत्रत्यैः पारिषद्यैस्ततो नृपः । निष्क्रयं रूढभारोढिवारणेन प्रदापितः ॥१०८८॥

क्रमेण सेनानानाङ्गव्ययव्यसनशालिनः । सुरार्थ[1]हरणे रूढा धीः संभावनया तया ॥१०८९॥

पूर्वराजार्पितान्कोशांस्ततः स भुवनाद्भुतान् । सर्वगीर्वाणवेश्मभ्यो लुब्धबुद्धिरपाहरत् ॥१०९०॥ 1090

---

१०६७. [1]) Thus $A_1$; altered by later hand into °गोणाश्म°. १०६८. [1]) Emended; A प्रसिस्ये. १०७०. [1]) Emended; A गोप्तृ°. १०७१. [1]) Emended; A तद्गोप्तृ°. १०७३. [1]) Emended; A जान जनक°.—[2]) य supplied by $A_2$. १०८१. [1]) Two *aksharas* are wanting; A does not indicate the *lacuna*.—[2]) Emended; A भीमश्शाहिर°. Cf. vi. 178. १०८२. [1]) Doubtful emendation; A °त्पारिपत्यानां. Cf. vii. 1088. १०८५. [1]) Emended; A °त्कोशचौर°. १०८७. [1]) Emended; A यत्रेदृद्वस्तु.—[2]) Emended with C; A कीदृकुत्रा°. १०८९. [1]) Thus A; G C सुराकुहरणे.

हृतेषु कोशेष्वानेतुं देवानां प्रतिमा अपि । चकारोदयराजाख्यं देवोत्पाटननायकम् ॥१०९१॥
वदनेषु स नग्नाटैः शीर्णघ्राणाङ्घ्रिपाणिभिः । मूर्तिनाशाय देवानां शकृन्मूत्राद्यपातयत् ॥१०९२॥
स्वर्णरूप्यादिघटिता गीर्वाणाकृतयोलुठन् । अध्वस्विन्धनगण्डाल्य इव सावस्करेष्वपि ॥१०९३॥
विबुधप्रतिमाश्चक्रुराकृष्टा गुल्फदामभिः । थूत्कारकुसुमच्छन्ना भग्ननग्नाटकादयः ॥१०९४॥
1095 ग्रामे पुरेथ नगरे प्रासादो न स कश्चन । हर्षराजतुरुष्केण न यो निष्प्रतिमीकृतः ॥१०९५॥
तस्य देवावधृष्यौ द्वौ परमास्तां प्रभाविनौ । नगरे श्रीरणस्वामी मार्ताण्डः पत्तनेष्विव ॥१०९६॥
द्वौ महाप्रतिमामध्याद्बुद्धबिम्बावरक्षताम् । दानप्रसङ्गे तं जातु याचित्वा त्यागिनं नृपम् ॥१०९७॥
परिहासपुरे जन्ममेदिन्यां कनकाभिधः । गायनः कुशलश्रीश्च श्रमणो नगरान्तरे ॥१०९८॥
अधिगतवतां लोके विश्वाद्भुतामपि संपदं न खलु विरतिर्दुष्कर्मभ्यो धनार्जनकाङ्क्षिणाम् ।
किमपि कमलावाप्त्यै पद्माकरोद्धृतिपातकं भजति कमलालीलावासो भवन्नपि हि द्विपः ॥१०९९॥
1100 पैतामहेन पित्र्येण तथा राज्यचिकीर्षया । लोहरादाहृतार्थस्य कोशेनोत्कर्षभूपतेः ॥११००॥
युक्तोपि पूर्वराजार्थं देवैकोभ्यो जहार यः । ऐच्छद्धनार्जनं हा धिक्सोपि वास्तव्यपीडया ॥११०१॥युग्मम्॥
तदाज्ञामात्रमादाय सचिवैरथ पापिभिः । ते ते नवन्वायासनामाङ्का नायकाः कृताः ॥११०२॥
कालानुवृत्तिपरतां धिग्धिग्राजोपजीविनाम् । यत्र मन्त्री वयःस्थः सन्सदाचारोपि गौरकः ॥११०३॥
सर्वदेवगृहग्रामसर्वस्वापहृतिव्रतम् । स्वीचकाराज्ञया भर्तुरर्थनायकतामपि ॥११०४॥ युग्मम् ॥
1105 पार्षदः समरस्वामिदेवागारे सहेलकः । आप्तो विजयमल्लस्य यो राज्ञो द्वेष्यतां ययौ ॥११०५॥
द्विगुणोत्पत्तिदानेन सोर्थनायकतां गतः । लब्धावकाशो राजाग्रे क्रमेणासीन्महत्तमः ॥११०६॥
किमन्यद्धरता तेन सर्वार्थान्सर्वनायकैः । व्यधीयत धनावाप्त्यै पुरीशस्यापि नायकः ॥११०७॥
श्रीगर्भपदपर्यायच्छन्नजाड्यप्रभावतः । तथार्जितस्य कोशस्य सोनुरूपव्ययोभवत् ॥११०८॥
मृगीदृशां दुर्लभतां हयानां श्वासान्विटानां कुवचःसहत्वम् ।
वैतालिकानां च विकत्थनत्वं क्रेतुं क्षितीशाः क्षपयन्ति लक्ष्मीम् ॥११०९॥
कोपप्रसादैर्दयिताजनस्य हयादिवृत्तान्तगवेषणेन ।
1110 भृत्यानुवृत्त्या मृगयाकथाभी राज्ञां शिशूनामिव याति कालः ॥१११०॥
विलासहासासनयानदानपानाशनाद्या असतीः सतीर्वा ।
छायेव चेष्टाः क्षितिपालवर्गः परानुकारेण करोति सर्वाः ॥११११॥
अमानुषत्वं पुरुषाधिराजा विटस्तवैः स्वस्य विचिन्त्य सत्यम् ।
तृतीयमक्ष्यभ्यधिकं भुजौ वा ममेति मत्वा न विदन्ति मृत्युम् ॥१११२॥
निशासु येषां प्रभवन्ति दारा दिनेष्वमात्या नियताधिकाराः ।
अहो भ्रमः स्वस्य यदत्र तेपि विदन्ति भूपा प्रभविष्णुभावम् ॥१११३॥

---

१०९१. [1]) Emended with R C; A °त्पाटनायकम्. १०९३. [1]) Emended; A °रुप्या°. १०९४. [1]) Thus corr. by later hand from $A_1$ रुग्नन°. ११००. [1]) Emended; A °भूपतिः. ११०५. [1]) Emended; A च हेलकः. Cf. vii. 1170, 1319, 1358, 1359.

स्वादूचितं स्वादुतयैव भुङ्क्ते थूत्कृत्य मुञ्चत्यपि थूत्कृतानि ।
विन्नासितस्त्रासमुपैत्यकस्माद्भूभृच्च बालश्च समानभावः ॥११११४॥
जाड्यमित्यादि यत्किंचित्क्षितिपानां कटाक्षितम् । तत्सर्वं हर्षदेवस्य जाड्येन लघुतां ययौ ॥१११५॥ 1115
तुष्टः पटहवाद्येन ह्यातोद्यविदे ददौ । भीमनायकनाम्ने स करिणं करिणीसखम् ॥१११६॥
स्वशिष्यस्तेन तस्यासीद्गायनः कनकोथ सः । चम्पकावरजः खेदाद्गीताभ्यासकृतोद्यमः ॥१११७॥
प्रसादीकृतमस्मै च खेदच्छेदनमिच्छता । तेन काञ्चनदीनारलक्षमक्षतचेतसा ॥१११८॥
कर्णाटभर्तुः पर्माण्डेः सुन्दरीं चन्दलाभिधाम् । आलेख्यलिखितां वीक्ष्य सोभूत्पुष्पायुधक्षतः ॥१११९॥
उत्तेजयन्ति संघर्षे हास्ये जडमतीन्विटाः । सारमेयानिवाजस्रं प्रोत्साह्य प्राकृताशयाः ॥११२०॥ 1120
स विटोद्रेचितो वीतत्रपश्चक्रे सभान्तरे । प्रतिज्ञां चन्दलावाप्त्यै पर्माण्डेश्च विलोडने ॥११२१॥
कृतापक्त्रिमकर्पूरपरित्यागं प्रतिज्ञया । तं च स्तुतिमिषादेवं जहसुः कविचारणाः ॥११२२॥
भाषावेषविशेषतः परिगतस्त्वं दाक्षिणात्योध्वगो गन्धादप्यवधारितं यदुत ते कर्पूरकोलं करे ।
पक्वं चेदिदमङ्ग हर्षनृपतेस्तत्कल्पयोपायनं नो चेत्तिष्ठतु नालिकेरकुहरे संप्रत्यमुष्मिन्यतः ॥११२३॥
आ कर्णाटवसुंधराधववधादा चन्दलालिङ्गनादा कल्याणपुरप्रवेशनविधेरा पिम्मलादर्शनात् ।
आ राजाश्रयकाननान्तवसुधापारर्द्धिकौतूहलाद्दैवेन प्रतिषिद्धमिद्धमहसा पोतासस्संचर्वणम् ॥११२४॥
विटः प्रसाद्य नृपतिं मदनः कम्पनापतिः । महत्तरत्वं जग्राह तस्याश्चित्रार्पिताकृतेः ॥११२५॥ 1125
वस्त्रालंकारनिर्वाहकृतेमुष्याश्च वेतनम् । नित्यमादत्त भूपालाद्दायमीर्ष्याशमाय च ॥११२६॥
विटत्वे निस्त्रपत्वे च मदनस्य कथाक्रमः । मौग्ध्ये पारिप्लवत्वे च नृपस्य निकषोभवत् ॥११२७॥
मातेयं बप्पिका[1] नाकात्तवानीतेति वादिभिः । संदर्श्य जरतीं नारीं मुषितः सोपरैर्विटैः ॥११२८॥
दासीश्च देवता एता इत्युक्त्वान्यैः प्रवेशिताः । उन्नतिं च श्रियं चौज्झत्प्रणमञ्जहसे जनैः ॥११२९॥
दास्यो मदनसंलापमन्त्राद्युल्लेखकारिभिः । अध्यापिता विटैस्तस्य मतिमोहं प्रचक्रिरे ॥११३०॥ 1130
ताभ्यः काभिरपि क्ष्माभृत्सुरतं समयोचितम् । वाञ्छन्तीभिः कृतः स्वाङ्गस्पर्शाद्भाग्योदयोज्झितः ॥११३१॥
आयुष्कामाय भूयांसं कालं जीवितकाङ्क्षिणे । आयुर्वर्षशतान्यस्मै ता मूढमतये ददुः ॥११३२॥
डोम्बेन पिण्डसिद्ध्यर्थी केनाप्येतद्रसायनम् । पिण्डसिद्धिकृदित्युक्त्वा पेयं किमपि पायितः ॥११३३॥
किं तस्य कथितैरन्यैर्मौग्ध्यैर्यो याचितो विटैः । विद्यमानादिव धनादायुषोपि व्ययं व्यधात् ॥११३४॥
बलरूपेच्छुरपरानुपायान्यानसेवत । कथयेत्कः सदाचारस्तानतोपि त्रपावहान् ॥११३५॥ 1135
स एवमन्धतामिस्रे[1] निक्षिप्तः शाश्वतीः समाः । मुग्धबुद्धिः स्वजाड्येन[2] दुर्जातैश्च कुमन्त्रिभिः ॥११३६॥
मेघवाहनमुख्यानां कृत्ये लोकोत्तरे यथा । सन्त्यद्याल्पधियः केचित्संदेहान्दोलिताशयाः ॥११३७॥
तथास्मिन्नपि दुष्कृत्ये वर्ण्यमानेद्भुतावहे । भविष्यतीव कालेन नूनमप्रत्ययो जनः ॥ ११३८ ॥
राज्ये बहुच्छले तादृग्दुर्नीत्योपहतोप्यभूत् । आयुःशेषेण न वशे स रन्ध्रान्वेषिणां द्विषाम् ॥११३९॥

---

११२८. [1]) Emended; A बद्धिका. Cf. vii. 319. ११३६. [1]) Emended; A °तामस्ते.—[2]) Emended; A स्वजात्येन; C स्वजन्येन.

1140 नर्तकीः शिक्षयन्रात्रावुत्थायाभिनयं स्वयम् । तिष्ठन्दीपोज्ज्वले धाम्नि दूरात्केनापि शत्रुणा ॥११४०॥
क्षिप्तैषुरपि नाभूद्यन्निहतो व्रणितोथ वा । फलं तस्यायुःशेषस्य प्रजानां कुकृतस्य वा ॥११४१॥
कश्चिदेवाथ शुद्धान्ते पातदूतो महीपतेः । सर्वाशुद्धिनिधेः प्राभून्नारीचारित्रविप्लवः ॥११४२॥
ते युवानो मदोन्मत्तास्ताः स्त्रियो यौवनोन्मदाः । नाशाय हर्षदेवस्य तस्मिन्नेवाभवन्क्षणे ॥११४३॥
निगृहीतास्तेन रोषात्सजाराः काश्चन स्त्रियः । काश्चित्त्वाकृष्य शुद्धान्ताज्जारैर्नीता दिगन्तरम् ॥११४४॥
1145 स्वेन दौःशील्यदोषेण सर्व एव विशङ्किताः । भृत्यास्तस्याशुभान्यैच्छन्नयतन्त च शान्तये ॥११४५॥
तस्यापि शीलवैकल्यं तावत्सर्वत्र पप्रथे । यावत्कलशभूपालात्संजातस्योपपद्यते ॥११४६॥
शैशवे वर्धितो याभिरङ्कमारुह्य मातृभिः । सोङ्कमारोप्य ता एव चुम्बन्संबुभुजे निशम् ॥११४७॥
संभोगं भगिनीवर्गे कुर्वता दुर्वचोरुषा । निगृहीता च भुक्ता च नागा पुत्री पितृस्वसुः ॥११४८॥
स तुरुष्कशताधीशाननिशं पोषयन्धनैः । निधनावधि दुर्बुद्धिर्बुभुजे ग्राम्यसूकरान् ॥११४९॥
1150 अथ सेवाभिसारेण कदापि कुपितो नृपः । स मन्दबुद्धिरास्कन्दमदाद्राजपुरीं प्रति ॥११५०॥
विलोक्य सैन्यसामग्रीमनन्यसदृशीं पथि । त्रैलोक्याक्रान्तिसामर्थ्यं पार्थिवैस्तस्य शङ्कितम् ॥११५१॥
स तु पृथ्वीगिरिं दुर्गं दृष्ट्वा तद्ग्रहणोद्यतः । अप्रविष्टो राजपुरीं तन्मूले समुपाविशत् ॥११५२॥
मासमभ्यधिकं तेन तस्थुषा परिपीडिताः । प्रक्षीणान्नादिसंभारा बभूवुर्दुर्गरक्षिणः ॥११५३॥
त्रातुं संग्रामपालस्तानूरीचक्रे धरापतिः । क्रियन्तं न करं भीतः कियतीर्न च संविधाः ॥११५४॥
1155 उपोढदार्ढ्ये नृपतौ स तदप्रतिगृह्णति । लुब्धमुत्कोचदानेन स्वीचक्रे दण्डनायकम् ॥११५५॥
अमन्यमाने[1] नृपतौ व्यावृत्तिं प्रेरिता रहः । प्रवासवेतनं भूरि मार्गितुं तेन शस्त्रिणः ॥११५६॥
तैः प्राये प्राकृतप्रायैः कृते सोल्लुण्ठभाषितैः । राज्ञो दूरस्थकोशस्य कटकः क्षोभमाययौ ॥११५७॥
स तत्समर्थनां यावच्चक्रे तावद्विभीषिकाम् । तुरुष्कास्कन्दजामन्यां प्रददौ दण्डनायकः ॥११५८॥
अथाल्पधैर्यो नृपतिरुत्थाप्य कटकं ययौ । कृत्स्नां च कोशसामग्रीं तत्याजाध्वसु साध्वसात् ॥११५९॥
1160 अपरीक्ष्यादृतो भृत्यः स्वामिनामतिसंकटे । करोति व्यसनापातमजात्योसिरिवाहवे ॥११६०॥
तेन स्वयमयोग्येन योग्यानन्याननिच्छता । कलङ्किता नरेन्द्रश्रीः क्षुद्राश्वेनेव मन्दुरा ॥११६१॥
ततः प्रभृति निर्वाणप्रतापस्य महीपतेः । प्रतापचक्रवर्त्याख्या सर्वतो म्लानिमाययौ ॥११६२॥
म्लानाननो न यत्सिद्धं स्वेन भृत्यैस्तथाखिलैः । तत्कर्म कृतवन्तं स कन्दर्पं बहुमन्यत ॥११६३॥
आनिनीषोश्च तं तस्य जडस्याकृत भूपतेः । दण्डनायक एवेच्छाच्छेदं पैशुनकर्मणा ॥११६४॥
1165 ज्ञातद्रोहोथ नृपतिरबध्नाद्दण्डनायकम् । प्रातिपक्ष्यानुरोधेन न क्रुधा न्यग्रहीत्[1]पुनः ॥११६५॥
दुर्गे[1] संदिग्धजीवोपि निवसन्संचिकाय सः । लुब्धस्ताम्बूलवस्त्रादि प्रहितं भृत्यबान्धवैः ॥११६६॥
आत्मनः सर्वनाशाय संजातं दैवमोहितः । वधार्हं प्रत्युत पुनर्निन्ये तं स्वपदं नृपः ॥११६७॥
तं विटाश्चाटुभिर्भूयो राजानमुदतेजयन् । घोषयात्राजितं स्तोत्रैः कर्णाद्या इव कौरवम् ॥११६८॥

---

११४२. [1]) Emended; A सर्वशुद्धनिधेः. ११५६. [1]) Emended; A प्रमन्यमाने. ११६५. [1]) Emended; A न्यगृह्णी°.
११६६. [1]) Conjectural reading; A दुर्ग्धे.

वादी वादपराजितः प्रतिभटं गालीभिरत्याक्षिपन्योषिन्नष्टसतीव्रता कुकलहैरुद्वेजयन्ती पतिम् ।
कायस्थश्च हताखिलार्थमहिमा कृच्छ्रे नृपं पातयन्स्त्रस्यासन्नपराभवस्य कुरुते भूयः समुत्तम्भनम् ॥११६९॥
भुक्तदेयधनो बिभ्यत्तं सहेलमहत्तमः । उर्वीपतिं दुर्व्यसने प्रेरयन्स्वार्थपण्डितः ॥११७०॥ 1170
बन्धुमन्विष्य दरदां लवन्यैः सह लाहरैः । दुर्गघाताभिधं दुर्गं ग्रहीतुं तमचूचुदत् ॥११७१॥
तद्धि लक्कनचन्द्राख्ये पुरा गोप्तरि डामरे । जनकद्वारपतिना हतेनन्तनृपाज्ञया ॥११७२॥
प्रायोपविष्टया द्वारे तत्पत्न्यापि समर्पितम् । कलशक्ष्माभुजा कृत्नोपेक्षं प्राप दरन्नृपः ॥११७३॥
तद्बलाड्डारदैः क्रान्तानन्तग्रामेव मण्डले । राजा च मन्त्रिणा चाथ बभूव स्वीकृतोद्यमः ॥११७४॥
निर्ह्रदे[1] तत्र गोप्तॄणां वृत्तये संभृतं हिमम् । अवग्रहेण तत्तस्मिन्क्षणे निःशेषतां ययौ ॥११७५॥ 1175
चारैस्तद्रन्ध्रमालक्ष्य तद्ग्रहाय महत्तमः । अभीक्ष्णं प्रेरयन्क्ष्मापं स च तत्रोद्यमं व्यधात् ॥११७६॥
वातगण्डं[1] तदुद्योगे प्रतिष्ठासुं नृपाज्ञया । चण्पको द्वारकार्यस्थमभिसंधातुमैहत ॥११७७॥
द्वारं निवार्य भूरेन प्रापितो मण्डलेशताम् । सर्वैः सहाभजद्वारं स हि द्वाराधिकारिभिः ॥११७८॥
विसूत्रितेऽपि[1] कटके तेन द्वारपतिस्ततः । तीर्त्वा मधुमतीं सिन्धुं सैन्यैर्दुर्गमवेष्टयत् ॥११७९॥
समस्तानपि सामन्तान्प्रहिण्वन्सर्वतः स्वयम् । एकप्रयाणान्तरितः कोटेऽपि न्यवसन्नृपः ॥११८०॥ 1180
त्यजद्भिर्गिण्डशैलादि दुर्गसंश्रयदुर्जयैः । काश्मीरिका[1]ः सह दरत्सैनिकैः समरं व्यधुः ॥११८१॥
विदधे प्राजिमठिकानाम्न्याघातपदे वसन् । सपुत्रो गुङ्गजो मल्लः संभ्रमानतिदुःसहान् ॥११८२॥
तत्पुत्रौ[1] देवविप्लोक्तराज्यप्राप्ती तदिच्छया । मानं व्यवर्धिषातां यौ वीरावुच्चलसुस्सलौ ॥११८३॥
अत्युद्दामस्तयोर्ज्यायान्द्विषन्नपि नृपासनम् । आसीद्भाव्यर्थमाहात्म्याद्यात्रायां तत्र निर्गतः ॥११८४॥
अवग्रहेण भूपालप्रतापेन च शोषिताः । यथाकथंचित्तद्दुर्गं ररक्षुर्दारदा भटाः ॥११८५॥ 1185
अथाशेव विधेर्हर्षप्रतापपरिपन्थिनी । पपात महती वृष्टिरेकीकृतजलस्थला ॥११८६॥
दुर्गशृङ्गं हिमैः कृत्स्नं दुर्भेद्यैः पर्यवार्यत । अनुकूलेन विधिना संनाहैर्निहितैरिव ॥११८७॥
उत्थाने पातयन्कांश्चित्पतने कांश्चिदुत्क्षिपन् । वेधाः कन्दलयत्येव कन्दुकक्रीडितभ्रमम् ॥११८८॥
ततः स्मृत्वा गृहान्वृष्टिदुःस्थास्ते दुष्टमन्त्रिणः । चक्रिरे पूर्ववद्राज्ञः स्कन्दावारे विसूत्रणम् ॥११८९॥
ऊर्ध्वस्रोतोनुसारीव तिमिः शैलहताननः । ततोऽपि चक्रे व्यावृत्तिं राजा जयपराङ्मुखः ॥११९०॥ 1190
मुक्तापणः शीर्णकोशः त्यक्तश्रीकश्च्युतायुधः । कटकः सर्व एवाभूत्पलायनपरायणः ॥११९१॥
धावतः पथिभिस्तैस्तैः साक्रन्दान्राजसैनिकान् । पृष्ठलग्नरिपून्दीर्घा मार्गेग्रसिष्यतापगा ॥११९२॥
क्षौमैः सहंसमालेव साब्जषण्डेव खेटकैः । सशैवलेव खड्गौघैः सशिलेव तुरंगमैः ॥११९३॥
सौवर्णैः सरथाङ्गेव राजतैर्भाजनैरपि । सफेनेव जनत्यक्तैरासीन्मधुमती सरित् ॥११९४॥
नीतानां च हतानां च दरदैः प्रसृतोदयैः । अभून्नदीहतानां च संख्या काचिन्न देहिनाम् ॥११९५॥ 1195
अनाथवत्तथा भूतं सैन्यं त्रातुं कृतोद्यमः । एकस्तु सानुजो मानी नाचलन्माल्लिरुच्चलः ॥११९६॥

---

११७५. [1]) Emended; A निह्रादे. ११७७. [1]) Emended; A वातगण्डस्तदु°. ११७९. [1]) Thus or, perhaps, विसूत्रितेपि to be read for A विसूत्रितापि. ११८१. [1]) Emended; A काश्मीरकाः. ११८३. [1]) Emended; A तत्पुत्रो.

दरद्वलाम्बुधिर्धावन्स विश्वाक्रमणोद्यतः । ताभ्यां वेलागिरीन्द्राभ्यामिव संस्तम्भितोखिलः ॥११९७॥
तौ रक्षित्वा बलं प्राप्तौ प्रसिद्धिमतुलां गतौ । पतिंवरेव राजश्रीर्भेजे लक्ष्येण तेजसा ॥११९८॥
ततः प्रभृति लोकस्य सर्वस्यासीदसौ मतिः । राज्यार्हौ मानिनावेतौ क्लीबोयं न तु भूपतिः ॥११९९॥
1200 तथा कृत्वापि यद्राज्ञे दर्शनं परिजह्रतुः । तौ प्रीतिदायविमुखौ बबन्धास्थां ततो जनः ॥१२००॥
अथ शान्तरिपुत्रासो नगरं प्राविशन्नृपः । प्रतापस्तु दिशः प्रायान्मल्लराजतनूजयोः ॥१२०१॥
तौ रामलक्ष्मणावेताविति सर्वस्तदाब्रवीत् । रावणप्रतिमे राज्ञि भाव्यर्थानुगुणं वचः ॥१२०२॥
राजा तु गतलज्जः स नित्यकृत्योपमं जडः । कर्तुं प्रारभताखिन्नः पुनर्मण्डलपीडनम् ॥१२०३॥
अल्पापकारमपि पार्श्वगतं निहन्ति नीचो न दूरमसमागसमप्यरातिम् ।
श्वा निर्दशत्युपलमन्तिकमापतन्तं तत्त्यागिनं न तु विदूरगमुग्ररोषः ॥१२०४॥
1205 ततः प्रविष्टः संप्रीतः सेवया दत्तकम्पनम् । मदनं सोशृणोत्स्वैरं शंसन्तं तत्पराभवम् ॥१२०५॥
तद्रोषेण जिघांसुस्तमागो जग्राह सोपरम् । तस्य देवीविसृष्टाज्ञालेखोल्लङ्घनलक्षणम् ॥१२०६॥
प्राप्तो मडवराज्यात्स क्ष्माभुजादत्तदर्शनः । भीतो लक्ष्मीधरस्यागान्मन्दिरं टक्क[1]मन्त्रिणः ॥१२०७॥
राजा प्रसाद्यमानोपि तत्कृतेन्येन मन्त्रिणा । सस्मितं वीक्षितं सैन्यैस्तं सपुत्रमघातयत् ॥१२०८॥
कोपस्मितं नरपतेरकालकुसुमं तरोः । वेतालस्याट्टहसितं नैवमेव प्रशाम्यति ॥१२०९॥
ये संप्ररूढविपुलप्रणयाभिमाना निःशङ्कमीश्वरनिषेवणमाचरन्ति ।
1210 मन्त्रानुषङ्गरभसाद्भुजगेन्द्रसख्यं प्रख्यापयन्त इव ते प्रलयं प्रयान्ति ॥१२१०॥
कर्णेजपकुले तावन्मदनप्रलयावधिः । शापः सूर्यमतीदेव्याः प्रसारितभुजोभवत् ॥१२११॥
विक्रमालोकनोत्कम्पी निचिक्षेप क्षमापतिः । बद्ध्वा कलशराजं तं लक्ष्मीधरनिवेशने ॥१२१२॥
विरुद्धं तस्य बद्धस्य शिक्षापेक्षामिषान्नृपः । तेजोवधाय सविधमुदयाख्यं व्यसर्जयत् ॥१२१३॥
लक्ष्म्या जाज्वल्यमानं तं वीक्ष्य प्रज्वलितः क्रुधा । लब्धासिधेनुः कस्माच्चिन्मनस्वी सहसावधीत् ॥१२१४॥
1215 तद्भृत्यैरथ संक्रुद्धैर्निपत्य स विपादितः । दुर्बुद्धेस्तस्य भूभर्तुरेवं भृत्या विपेदिरे ॥१२१५॥
मण्डले राजदण्डेन क्षतेनेव परिक्षते । क्षारपातोपमान्यापि प्राभूद्दुःखपरंपरा ॥१२१६॥
अहारि काञ्चनस्थाली यैः पार्थिवगृहादपि । सत्यप्यहस्करे जघ्नुस्तस्करास्तादृशा विशः ॥१२१७॥
प्रवर्धमाने मरके क्रन्दितध्वनिनिर्भरः । निर्घोषः प्रेतवाद्यानां न व्यरंसीद्दिवानिशम् ॥१२१८॥
उदीपत्रुडितग्रामे वत्सरे पञ्चसप्तते । अखण्डं सर्वभाण्डानां दुर्भिक्षमुदजृम्भत ॥१२१९॥
1220 दीन्नाराणां धान्यखारिः प्राप्याभूत्पञ्चभिः शतैः । दीन्नारेणाभवल्लभ्यं मार्द्वीकस्य पलद्वयम् ॥१२२०॥
ऊर्णापलस्य दीन्नारैः क्रयः षड्भिरजायत । लवणोषणहिङ्ग्वादेरभिधाप्यास्त दुर्लभा ॥१२२१॥
शवैर्नद्योभवन्नम्भःसंसेकोच्छूनविग्रहैः । छन्नतोया गिरिस्रस्तैश्छिन्नदारुवनैरिव ॥१२२२॥
एतद्व्यवहिता[1] राजधानी दूरान्न दृश्यते । ध्यात्वेति सर्वतो राजा द्रुमाणां छेदमादिशत् ॥१२२३॥

---

१२०७. [1]) Emended; A ठक्क°. १२२३. [1]) Emended; A व्यवहृता.

सप्रसूनफला वृक्षा गृहस्था इव पातिताः । कुटुम्बैरिव रोलम्बै[1]रशोच्यन्त पदे पदे ॥१२२४॥
प्राणापहं महादण्डं स्थार्तेपि जने नृपः । हलावरुग्णे वृद्धोक्षे गण्डशैलमिवाक्षिपत् ॥ १२२५॥ 1225
निपीड्य लोकं कायस्थैर्महादण्डव्यवस्थया । पुरग्रामादिषु क्वापि न मृदप्यवशेषिता ॥१२२६॥
अथोल्बणत्वं संप्राप्तान्निहन्तुं सर्वडामरान् । स दण्डभृदिव क्रुध्यन्नादिक्षन्मण्डलेश्वरम् ॥१२२७॥
पूर्वं मडवराज्योर्व्यां होलडान्तः स डामरान् । दत्तास्कन्दोवधीत्तांस्तान्कुलाये विहगानिव ॥१२२८॥
घ्नता लवन्यानुन्नद्धकुन्तलोविकटाकृतिः । जीवन्मडवराज्यान्तस्तेन विप्रोपि नोज्झितः ॥१२२९॥
लावन्यबुद्ध्या शूलानि पान्थैरप्यथ रोपितैः । भीमरूपाभवद्भूमिर्भैरवस्य महानसः ॥१२३०॥ 1230
शूले लवन्यस्यैकस्य क्रूरां विन्यस्यतो वधूम् । ययुः सर्वे दिशो भीता लवन्या मण्डलेश्वरात् ॥१२३१॥
केचिद्बुभुजिरे तेषां गोमांसं म्लेच्छभूमिषु । अरघट्टघरट्टादिकृष्टाः केचिदवालगन्[1] ॥१२३२॥
प्राहिणोत्प्राभृतं भूरि भैरवाय महीभुजे । लवन्यमुण्डमालालीरखण्डा मण्डलेश्वरः ॥१२३३॥
तोरणावलयो राजद्वारेदृश्यन्त सर्वतः । डामराणां करोटीभिर्घटीभिरिव निर्भराः ॥१२३४॥
द्वारे कङ्कणवस्त्रादि लम्बमानं नृपौकसः । नेता डामरमुण्डस्य यः कोपि स किलासदत् ॥१२३५॥ 1235
भोक्तुं डामरमुण्डानि व्याप्तविस्तीर्णतोरणाः[1] । विदधुर्गृध्रकङ्काद्या राजद्वारोपसेवनम् ॥१२३६॥
यत्र यत्रास्त भूपालस्तत्र तत्र व्यधुर्जनाः । लवन्यमुण्डैरुच्चण्डैर्विस्तीर्णास्तोरणस्रजः ॥१२३७॥
गन्धेनाशुचिना घ्राणं कर्णौ भीमैः शिवारुतैः । अखिद्यत शवाकीर्णे श्मशान इव मण्डले ॥१२३८॥
बलेरकप्रपाप्रान्ताल्लोकपुण्यां[1]वधि व्यधात् । एकश्रेणीं मण्डलेशो डामरैः शूलकीलितैः ॥१२३९॥
एवं मडवराज्यं स कृत्वा निर्नष्टडामरम् । अधावत्क्रमराज्योर्व्यां कर्तुं तामेव पद्धतिम् ॥१२४०॥ 1210
अवश्यं न भविष्याम इति निश्चित्य डामराः । चक्रिरे क्रमराज्यस्था लौलाहे सैन्यसंग्रहम् ॥१२४१॥
तैः सर्वैर्दत्तसंग्रामैः कुर्वद्भिः कदनं महत् । आस्ते स्म तत्र सुचिरं निरुद्धो मण्डलेश्वरः ॥१२४२॥
किमन्यद्राक्षसः कश्चित्सुरतीर्थर्षिपूजितम् । निहन्तुं मण्डलमिदं हर्षव्याजादवातरत् ॥१२४३॥
उल्लासो रात्रिषु दिने स्वापः क्रौर्यमुदग्रता । अवाङ्मुखत्वं कर्तव्ये दक्षिणेशोचिते रतिः ॥१२४४॥
इत्यादयस्तस्य केचिद्धर्मा नक्तंचरोचिताः । तथा हि तत्कालभवैः प्रियाः प्राज्ञैः प्रकीर्तिताः ॥१२४५॥ 1245
अत्रान्तरे मल्लसूनुः कनीयान्यौवनोन्मदः । लक्ष्मीधरस्य गेहिन्या हृदयाह्लादकोभवत् ॥१२४६॥
सा हि राजसुते तस्मिन्संसक्ता प्रातिवेश्मिके । नारज्यत निजे पत्यौ वानरप्रतिमाकृतौ ॥१२४७॥
ज्ञातीनगण्यान्हत्वान्यान्कस्माद्राज्यार्हलक्षणौ । नावधीरुद्धतावेतौ राजन्नुच्चलसुस्सलौ ॥१२४८॥
इति लक्ष्मीधरेणेर्ष्यारोषादुक्तोपि भूपतिः । न चुक्रो[1]धानुतापार्तिः पूर्वज्ञातिवधाद्गतः ॥१२४९॥
स्वयमन्यमुखेनापि स तेनोक्तस्ततोसकृत् । – –[1] घाते तदौद्धत्यं ध्यात्वा साध्वसमादधे ॥१२५०॥ 1250
ज्ञातिप्रीत्यनुवृत्त्यादि तेन विस्मरता ततः । संमन्त्र्य मन्त्रिभिः सार्धं दध्रे तद्वधनिश्चयः ॥१२५१॥
आसन्नवारवनिता थक्कनाख्याथ तं व्यधात् । भूभर्तुर्दुरभिप्रायं तयोः कर्णपथातिथिम् ॥१२५२॥

---

१२२४. [1]) Emended; A रोलम्भैर°. १२३२. [1]) Thus $A_2$; $A_1$ °वाद्यन्; G °वागलन्. १२३६. [1]) Emended; A व्याप्ता विस्तीर्णतोरणा. १२३९. [1]) $A_2$ gloss नूतन – – –यावल्लोकभवनं (three *aksharas* illegible). १२४९. [1]) Emended; A चक्रोधा°. १२५०. [1]) $A_1$ indicates a *lacuna* of two *aksharas*.

सख्या दर्शनपालेन तत्रार्थे छिन्नसंशयौ । निरगातां निशीथिन्यां द्वित्रैस्तावनुगैः समम् ||१२५३||
षट्सप्ततेऽब्दे नगरान्मार्गशीर्षेथ निर्गतौ । उत्रास[1]संवसतेः प्राप्तौ डामरस्योपवेशनम् ||१२५४||
1255 प्रशस्तराजो दुधुक्षुः सिल्लराजं निजानुजम् । सोभिसंधाय तौ निन्ये लवन्यो मण्डलान्तरम् ||१२५५||
ततो राजपुरीं ज्यायान्प्रायात्कल्हस्य भूपतेः । कनीयान्प्रययौ पार्श्वं कालिञ्जरधरे[1]शितुः ||१२५६||
तयोर्निर्गतयो राज्यं न कैश्चि[1]च्छ्रदधीयत । निमित्तज्ञेन राज्ञेव दुर्निमित्तैस्त्वशङ्क्यत ||१२५७||
लक्ष्मीधरमुखेनैव प्रार्थनां हन्तुमुच्चलम् । चक्रे संग्रामपालस्य सोङ्गीकृत्य धनं ततः ||१२५८||
स त्वन्तिकागतस्येषन्मल्लसूनोः कृतादरः । तया विशङ्कया शत्रोरासीदधिकगौरवः ||१२५९||
1260 आसन्नाभ्युदयं शत्रुं द्वेष्टैव विधिचोदितः । शङ्काविष्करणाल्लोके नयेत्संभावनाभुवम् ||१२६०||
राजपुर्याः प्रकृत्यैव काश्मीरानर्थकाङ्क्षिताः । प्रभविष्णौ रिपौ प्राप्ते चक्रिकायां किमुच्यताम् ||१२६१||
कांश्चिन्निकृतिकप्रायान्पार्श्वयातानथोच्चलः । गमागमान्कृतोद्योगो डामराणामकारयत् ||१२६२||
डामरास्तु महोत्साहा[1]स्तमानेतुं व्यसर्जयन् । राज्ञा विप्रकृता[1] दूतान्वितीर्णोपायनान्बहून् ||१२६३||
तं सूर्यवर्मचन्द्रस्य तनयो जनकाभिधः । चकारोपचितोत्साहं मायादूतैर्विसर्जितैः ||१२६४||
1265 वीक्ष्य डामरदूतांस्ताञ्जहता राजतो भयम् । व्यक्तं संग्रामपालेन निन्ये माहात्म्यमुच्चलः ||१२६५||
स कार्यगौरवात्प्रह्वो मूर्ध्नि कर्पूरचूर्णनम् । कृत्वा तमविनाशाय यावद्विस्रष्टुमैहत ||१२६६||
तावत्कलशराजाख्यस्तद्देशे मुख्यठक्कुरः । हर्षदेवार्पितोत्कोचस्तमेत्य विजनेब्रवीत् ||१२६७||
राज्ञः प्रसादनं त्यक्त्वा तवोच्चलहितैषिणः । कामधेनुं विनिर्धूय छागकण्ठग्रहे ग्रहः ||१२६८||
कोयं काश्मीरभूपानां कास्य शक्तिस्तपस्विनः । आराधनेन तद्राज्ञो विधेहि स्वमसाध्वसम् ||१२६९||
1270 अयं राजगिरौ दुर्गे स्थाप्यतां पार्थिवस्ततः । स्यान्मनीषितवर्षी वस्त्रासान्मित्रं च सर्वदा ||१२७०||
तेनेति प्रभुराख्यातः खशानां स मिताशयः । तद्भीतः स्वार्थलुब्धश्च तथेति प्रत्यपद्यत ||१२७१||
तमभ्यधाच्च नो बन्द्धुं शक्तोहममुमुद्यतम् । त्वयैव बध्यतामेष मिषतः प्रेषितोन्तिकम् ||१२७२||
इत्युक्त्वा तं स्ववसतिं विसृज्यावददुच्चलम् । प्रातः कलशराजस्य त्वया गन्तव्यमन्तिकम् ||१२७३||
इह प्रधानामात्योसौ तेन ते स्यादनत्ययः । ततो विपक्षोच्छित्त्यै त्वां प्रतिमोक्ष्यामि सानुगम् ||१२७४||
1275 अथ तद्वसतिं गन्तुं चलितोन्येद्युरुच्चलः । प्राग्दुर्निमित्तैस्तत्कृत्यमात्रैरथ विबोधितः ||१२७५||
मन्त्रे भिन्ने निवृत्तं तं श्रुत्वा खशनृपान्तिकम् । कुप्यन्कलशराजोथ सज्जसैन्यः समाययौ ||१२७६||
तमास्कन्दाय संप्राप्तं जानञ्शस्त्रभृतां वरः । ऐच्छद्रणाय निर्गन्तुं निजभृत्यैः सहोच्चलः ||१२७७||
क्षोभे संप्रस्तुते तं स सान्त्वयित्वा खशाधिपः । तिष्ठन्कलशराजेन सहानिन्ये निजां सभाम् ||१२७८||
निषेधाधायिनो भृत्यान्स विधूयौजसां निधिः । सज्जः खशसमाजं तं कोपकम्प्राधरोविशत् ||१२७९||
1280 द्रष्टुं तं[1] नाशकत्कश्चित्कल्पान्तार्कमिवोल्बणम् । क्रुद्धं कलशराजो वा राजा वा तेजसां निधिम् ||१२८०||
स विविक्तीकृते[1] धाम्नि खशाधी[2]शं समन्त्रिणम् । सान्त्वयन्तं महातेजाः कोपरूक्षाक्षरोब्रवीत् ||१२८१||

---

१२५४. [1]) Thus $A_1$; $A_2$ gloss उत्रसो, corr. by later hand into उत्रास; $A_3$ reads उत्त्रास. १२५६. [1]) Thus corr. by $A_1$ from कालि°. १२५७. [1]) Emended; A कश्चि°. १२६३. [1]) Thus $A_1$; a later hand corrects डामरांस्तु महोत्साहांस्त° and विप्रकृतान्दू°. १२८०. [1]) Emended; A तन्नाश°. १२८१. [1]) Emended; A कृतो.—[2]) Emended; A खशाधीशं.

पूर्वं दार्वाभिसारेभूद्वारद्वाजो नरो नृपः । नरवाहननामास्य सूनुः फुल्लमजीजनत् ॥१२८२॥
स सातवाहनं[1] तस्माच्चन्दोभूत्तत्सुतः सुतौ । गोपालसिंहराजाख्यौ चन्दुराजोप्यवाप्तवान् ॥१२८३॥
बह्वात्मजः सिंहराजो दिद्दाख्यां तनयां ददौ । क्ष्माभुजे क्षेमगुप्ताय सावीरा भ्रातृनन्दनम् ॥१२८४॥
राज्ये संग्रामराजाख्यं व्यधादुदयराजजम् । भ्रातापि कान्तिराजोस्या जस्स[1]राजमजीजनत् ॥१२८५॥ 1285
पितानन्तस्य संग्रामो जस्सस्तन्वङ्गगुङ्गयोः । अनन्तात्कलशक्ष्माभृद्गुङ्गान्मल्लोप्यजायत ॥१२८६॥
कलशाद्धर्षदेवाद्या जाता मल्लात्तथा वयम् । कोयमित्यादि तन्मन्दैः क्रमेस्मिन्कथ्यते कथम् ॥१२८७॥
पृथिव्यां वीरभोज्यायां क्रमो वा कोपयुज्यते । वीरस्य च सहायोस्तु कः स्वबाहुद्वयात्परः ॥१२८८॥
दिष्ट्या तदनुकम्प्यानां मूर्ध्नि हस्तमिवास्पृशन् । काश्मीरिकाणां[1] भूपानां नाभूवं कुलपांसनः ॥१२८९॥
तस्माद्रक्ष्यथ मे शक्तिमित्युक्त्वा निर्गतस्ततः । विजयाय स पत्तीनां शतेनानुगतोचलत् ॥१२९०॥ 1290
निहतं शशमादाय तस्याग्रे कश्चिदाययौ । स तेन सुनिमित्तेन प्राप्तां मेने रिपुश्रियम् ॥१२९१॥
अरघट्टघरट्टादिकुट्टिमुत्सृज्य निर्गताः । डामरा वाट्टदेवाद्यास्तं यान्तमुपतस्थिरे ॥१२९२॥
कटकस्थस्य संग्रामपालस्यायातमन्तिकात् । तद्देव्यो राजपुर्यन्तः खिन्नं निन्युः प्रसन्नताम् ॥१२९३॥
भुक्त्वा तद्वसतेर्गच्छन्स्वावासं स दिनात्यये । सैन्यैः कलशराजस्य दत्तास्कन्दोभवद्बहिः ॥१२९४॥
राज्ञीभिर्निर्गमात्तस्मिन्द्वारं संरोध्य वारिते । तदीयाः सैनिका युद्धे लो[1]ष्टावट्टादयो हताः ॥१२९५॥ 1295
मध्यं प्रविश्य शमिते प्रधानैस्तत्र संयुगे । सोल्पसैन्योपि संवृत्तः सुतरामल्पसैनिकः ॥१२९६॥
चैत्रस्य पौर्णमास्यन्तः कृच्छ्रमप्यनुभूतवान् । वैशाखासितपञ्चम्यां यात्रामत्रस्तधीर्व्यधात् ॥१२९७॥
विसृज्य वा[1]ट्टदेवादीन्विप्लवाय स्ववर्त्म[2]भिः । आललम्बे[3] प्रवेशेच्छां क्रमराज्याध्वना स्वयम् ॥१२९८॥
यं राजोदयसीहान्ते कपिलं क्षेमजा[1]त्मजम् । अस्थापयल्लोहरोर्व्यां स विशन्तं मुमोच तम् ॥१२९९॥
स्वयमग्रे समग्राणां खड्गचर्मधरो व्रजन् । पलायने पूर्वशिष्यान्पर्णोत्से तद्भटान्व्यधात् ॥१३००॥ 1300
बद्ध्वा निःशङ्कमासीनं द्वारेशं सुज्जकाभिधम् । कश्मीरानामिषाकाङ्क्षी क्षिप्रं श्येन इवापतत् ॥१३०१॥
तं डामराश्च कतिचित्खाशिकाश्चाद्रिसंश्रयाः । राजद्विषः प्राप्तमात्रं सर्वतः पर्यवारयन् ॥१३०२॥
तमाकाशादिव स्रस्तं भुवो गर्भादिवोत्थितम् । निशम्यातर्कितं प्राप्तं चकम्पे हर्षभूपतिः ॥१३०३॥
मा भूदसौ बद्धमूलः क्रमराज्यान्तरस्थितम्[1] । मा वधीन्मण्डलेशं च ध्यायन्नित्याकुलोथ सः ॥१३०४॥
विलम्बमाने संनद्धसैनिके दण्डनायके । त्वरितं प्राहिणोत्पट्टं वितीर्णासंख्यनायकम् ॥१३०५॥ 1305
दैवोपहतवीर्यो वा क्रान्तो वा द्रोहचिन्तया । अभ्यमित्रीणतां त्यक्त्वा स तु मार्गे व्यलम्बत ॥१३०६॥
अन्यांश्च यान्यांस्तिलकराजादीन्व्यसृजन्नृपः । ते ते पट्टं समासाद्य नाकुर्वन्नग्रनिर्गमम् ॥१३०७॥
दण्डनायकमु[1]ख्येपि लोके राज्ञा विसर्जिते । याते विमूढतां प्राप बद्धमूलत्वमुच्चलः ॥१३०८॥
वराहमूलं प्रविशन्नागतां द्विषतां बलात् । अश्वां सुलक्षणोपेतां राजलक्ष्मीमिवासदत् ॥१३०९॥
महावराहमौलिस्रक्तस्य मूर्ध्नि पपात च । तदंसस्थितया पृथ्व्या वरणार्थमिवार्पिता ॥१३१०॥ 1310

---

१२८३. [1]) Emended; A सार्थवाहनं. Cf. vi. 367. १२८५. [1]) Thus corr. by $A_3$ from $A_1$ °स्यास्सज्जरा°. १२८९. [1]) Emended; A काश्मीरकाणां. १२९५. [1]) Thus $A_1$ corr. by later hand into लोष्टवद्दा°. १२९८. [1]) Emended; $A_1$ वद्द°.—[2]) न्विप्लवा and र्म supplied by $A_3$ in space left by $A_1$.—[3]) Emended; A आललम्ब. १२९९. [1]) Thus A; perhaps, to be emended क्षेमदा°. Cf. vii. 482. १३०४. [1]) Emended; A °स्थितिम्. १३०८. [1]) Thus $A_1$; $A_3$ °नायकसख्ये.

काकाद्यवैद्य[1]कुलजैर्योधैः संरुद्धपद्धतिः । स हुष्कपुरमुत्सृज्य क्रमराज्योन्मुखो ययौ ॥१३११॥
अत्रान्तरे तमायान्तमाकर्ण्योत्सेकमागतैः । विद्रवोन्मुखतां निन्ये डामरैर्मण्डलेश्वरः ॥१३१२॥
तैर्हि प्रागेव भङ्गं स नीतो हत्वा महाभटान् । यशोराजमुखान्भूरीन्ययौ मन्दप्रतापताम् ॥१३१३॥
शनैरपसरन्सोथ तारमूलकमासदत् । उच्चलाधिष्ठितास्तेपि विद्विषन्तस्तमन्वयुः ॥१३१४॥
1315 समेतानन्तसैन्येन तेन तत्र चिरं धृतः । उच्चलप्रलयाभ्रस्य पौरस्त्यानिलविभ्रमः ॥१३१५॥
सैन्ययोरुभयोस्तत्र जयश्रीकरिणीकृते । बभूव तुल्यसंघर्षः सेर्ष्ययोरिव दन्तिनोः ॥१३१६॥
आनन्दनामाप्युत्पिञ्जोत्थानमुच्चलमातुलः । चक्रे मडवराज्येथ निविडीकृतडामरः ॥१३१७॥
तद्विप्लवे डामरौघा दिग्देशेभ्यः सहस्रशः । उन्ममज्जुर्हिमापाये रन्ध्रेभ्य इव षट्पदाः ॥१३१८॥
तत्क्षणं क्षीणभाग्यस्य यथा द्वारपतिस्तथा । कायस्थः कम्पने राज्ञः सहेल्लो[1]भू[2]न्महत्तमः ॥१३१९॥
1320 आनन्देन कृतास्कन्दो बहुशो विहिताहवः । औज्झीन्मडवराज्यं स न यत्तद्वद्बभूत्तदा ॥१३२०॥
अथाद्भुतप्रतापेन वेष्टयित्वा महाचमूम् । उच्चलेनाहवे बद्धः ससैन्यो मण्डलेश्वरः ॥१३२१॥
न विद्मः किं तदा वृत्तं योधानां यत्किलाविदन् । ते सखड्गाश्वसंनाहा बद्धा वयमिति स्फुटम् ॥१३२२॥
तथा बद्धोपि निर्दध्यौ स भव्यः प्रभवे हितम् । स्वामिभक्तिर्विपर्यैति पर्यन्तेपि न मानिनाम् ॥१३२३॥
तूर्णं पुरप्रवेशाय सोथ प्रैरयदुच्चलम् । विश्वास्य नेदृगन्योस्ति क्षण इत्यसकृद्ब्रुवन् ॥१३२४॥
1325 विशतस्तस्य चानेकैः पुरग्रामाद्यलुण्ठयत् । कर्मणानेन कौलीनमस्यास्त्विति विचिन्तयन् ॥१३२५॥
परिहासपुरे तेन स ततः संप्रवेशितः । श्वभ्राम्बुविषमाद्यस्मान्निर्गमोत्यन्तदुर्गमः ॥१३२६॥
तत्रोच्चलं चतुःशाले स्वं च दग्धुमचूचुदत् । निजान्स निशि ते तत्तु न चक्रुस्तद्धितैषिणः ॥१३२७॥
यथा चित्तं तथास्य स्यात्कायश्चेत्साहसक्षमः । तदात्मनिरपेक्षस्य किं न सिध्येन्मनीषितम् ॥१३२८॥
क्लीबच्छन्नवपुस्त्वचा सह वसत्यच्छेद्यया कच्छपो निर्वर्मा रणकर्मसाहसमहोत्साहश्च सिंहः सदा ।
धिक्प्रादुष्कृतपक्षपातरभसो नीचेषु मुग्धो विधिर्वीराणां कुरुते शरीरमभितो वैकल्यशल्याहतम् ॥१३२९॥
1330 संदिदेशाथ स क्ष्मापमाकृष्यायं मयाग्रतः । सृगाल इव ते क्षिप्तः क्षिप्रं निर्गत्य बध्यताम् ॥१३३०॥
ततः समस्तसामन्तसैन्यसंततिसंयुतः । अद्य मृत्युर्जयो वेति निश्चित्य निरगान्नृपः ॥१३३१॥
स प्राणसंशये सर्वायासप्रशममादिशत् । पटहोद्घोषणेनासीत्प[1]रैरनुगतोखिलैः ॥१३३२॥
प्राप्तं भरतसेत्वग्रं घ्नन्तः सैन्यं विरोधिनम् । आजानेयै राजभृत्याः क्षणान्मार्गमलङ्घयन् ॥१३३३॥
क्षुभितेभ्धाविवायाते राजसैन्ये द्विषद्बलम् । मण्डलेश्वर एवान्तःप्रविष्टो निरनाशयत् ॥१३३४॥
1335 अथोच्चलबले भग्ने विदुद्रुः केपि जाङ्घिकाः । श्रान्ता राजविहारं च प्राविशन्केपि डामराः ॥१३३५॥
त्रिल्लसेनाभिधं दृष्ट्वा प्रविष्टं[1] डामरं परे । उच्चलोसाविति भ्रान्त्या विहारं तमदाहयन् ॥१३३६॥
सोमपालाभिधेनारिहयारोहान्तरे चिरम् । कुर्वन्दर्शनपालस्य पितृव्येण सहाहवम् ॥१३३७॥
यत्नाज्जनकचन्द्राद्यैर्मानी व्यावर्तितो रणात् । परिहासपुरात्प्रायान्मृत्युवक्त्रादिवोच्चलः ॥१३३८॥

---

१३११. [1]) Thus $A_1$; corr. by later hand into कांकाद्यवैश्य°. १३१९. [1]) Emended; A सहलो.—[2]) Emended; A °भूमहत्तमः. १३३२. [1]) Doubtful; thus emended with C; A °सीत्पारैर°. १३३६. [1]) Thus $A_1$; corr. by later hand into प्रविष्टा.

वितस्तां गौरिकाबाल[1]ग्रामात्तीर्त्वा हयान्वितः । स डामरैः सह पुनः प्रययौ तारमूलकम् ॥१३३९॥

जयेन तावन्मात्रेण कितवोल्प इवोन्मदः । राजा प्रशंसन्नानन्दं राजधानीं न्यवर्तत ॥१३४०॥ 1340

जीवन्तमप्यरिं श्रुत्वा न पश्चादलगत्स यत् । आसन्नुच्छ्वसितास्तेन भङ्गभाजोपि डामराः ॥१३४१॥

यातान्पलाय्य ताञ्ज्येष्ठामूलीये मासि सर्वतः । भूयोपि संघटयितुं स्थिरधीरैच्छदुच्चलः ॥१३४२॥

स्वदोर्मात्रसहायस्य परायत्तस्य मानिनः । दुर्भिक्षान्तर्महोद्योगः स तस्य विषमोभवत् ॥१३४३॥

तन्मध्येतिदरिद्रोपि संप्राप्तं स ररक्ष यत् । तमुत्पाद्यानयद्राजा श्रीपरीहासकेशवम् ॥१३४४॥

तस्मिन्विघटिते पांसुः कपोतच्छदधूसरः । रोदसीच्छादनं हर्षशीर्षच्छेदावधि व्यधात् ॥१३४५॥ 1345

प्रागन्धकारो[1] देशेस्मिन्दिवसेपि व्यजृम्भत । रूपिकादिवसालोक इति यत्पप्रथे जने ॥१३४६॥

निवेशिते परीहासकेशवे प्रशशाम तत् । तस्मिन्नुन्मूलिते भूयः सार्धं मासमजृम्भत ॥१३४७॥

किंचिदुच्छ्वसिते राज्ञि मन्दोद्रेकतया रिपोः । दिशा शूरपुरस्याथ सुस्सलः प्रत्यदृश्यत ॥१३४८॥

अवनाहे[1] स हि वसन्नुपालम्भपरैः पितुः । संदेशैः शंसतो ज्येष्ठमौदासीन्यादपाहृतः ॥१३४९॥

दत्तान्कल्हक्षितीशेन कांश्चिदादाय वाजिनः । चिरेण राजदाक्षिण्यमौज्झीत्तेन व्यलम्बत ॥१३५०॥ 1350

आरम्भादुदयान्तं च तिष्ठन्वैरेपि निष्ठुरे । साम प्रयुयुजे मोहा[1]वहं मायानिधी रिपोः ॥१३५१॥

जित्वा माणिक्यनामानं तेन सेनापतिं रणे । प्रापि शूरपुरद्रङ्गाज्जयश्रीः श्रीश्च भूयसी ॥१३५२॥

तस्याभ्युदयपात्रस्य तया संप्राप्तया श्रिया । आरब्धिसमयः कृत्स्नः स विभूत्यद्भुतोभवत् ॥१३५३॥

मण्डलेश्वरपट्टादीनविचिन्त्योच्चलं ततः । प्राहिणोन्नृपतिर्योद्धुं सुस्सलं क्षिप्रकारिणम् ॥१३५४॥

तेन शूरपुरे भग्नास्तद्योधाः शौर्यशालिना । भूयांसः प्रलयं प्रापुर्मग्ना वैतरणीजले ॥१३५५॥ 1355

तत्र दर्शनपालस्य स्वामिद्रोहकृतो वपुः । विक्रामतो न संस्पृष्टं खिन्नयेव जयश्रिया ॥१३५६॥

राजसैन्यं तदन्येद्युर्हतशेषं पलायितम् । लोकपुण्ये निवसतः सहेलस्यान्तिकं ययौ ॥१३५७॥

सुस्सलापातकल्पान्तं विशङ्क्यापि सहेलकः । तैस्तैर्भग्नैर्बलैः साकं नगरं प्राविशत्ततः ॥१३५८॥

एवमभ्येत्य नृपतौ सुस्सलेन विसूत्रिते । अवाप तारमूलस्थः प्रतिष्ठां पुनरुच्चलः ॥१३५९॥

बिभ्यद्भिस्तुरगानीकात्[1]पत्तिप्रायैः स डामरैः । आनिन्ये शैलदुर्गेण भूयो लहरवर्त्मना ॥१३६०॥ 1360

राजाप्युदयराजाख्यं कृत्वा द्वारपतिं पुनः । प्राहिणोदुच्चलं जेतुं लहरं मण्डलेश्वरम् ॥१३६१॥

ततः पद्मपुरं प्राप्ते मातुले मल्लजन्मनोः । न कोपि कम्पनं भूपान्मन्त्री त्रासातुरोग्रहीत् ॥१३६२॥

को मेस्तीति विनिश्चस्य वदतोथ महीपतेः । अधिकारस्रजं हस्ताच्चन्द्रराजः समाददे ॥१३६३॥

अनाशीः शयने मृत्युर्येषां तेषां स वंशजः । श्रीजिन्दुराजमुख्यानामौचित्यं प्रत्यपाद्यत ॥१३६४॥

स द्रौणिरिव निर्नष्टे काले सेनापतिः कृतः । निर्गत्य तत्पद्मपुरादरिसैन्यं न्यवारयत् ॥१३६५॥ 1365

विपक्षः कम्पनेशः स तेन क्ष्मां क्रामता[1] शनैः । नवम्यां शुक्लनभसो हतोवन्तिपुरान्तरे ॥१३६६॥

स हि गोवर्धनधरोपान्ते कुर्वद्भिराहवम् । स्वसैन्यैर्वर्जितो गीतं शृण्वन्परिमितानुगः ॥१३६७॥

---

१३३९. [1]) $A_2$ gloss परिहासपुरसमीपे गुरिकाबलमस्ति. १३४६. [1]) Emended; A °कारदेशे°. १३४९. [1]) Thus $A_1$; $A_2$ (?) अशनाहे; $A_3$ gloss पौदुपावग्रामे. १३५१. [1]) Emended; A मोहौवहं. १३६०. [1]) Emended; A °नीकान्पत्ति°. १३६६. [1]) Emended; A क्रमता.

काकाचवैद्यकुलजैर्योधैः संरुद्धपद्धतिः । स हुष्कपुरमुत्सृज्य क्रमराज्योन्मुखो ययौ ॥१३११॥
अत्रान्तरे तमायान्तमाकर्ण्योत्सेकमागतैः । विद्रवोन्मुखतां निन्ये डामरैर्मण्डलेश्वरः ॥१३१२॥
तैर्हि प्रागेव भङ्गं स नीतो हत्वा महाभटान् । यशोराजमुखान्भूरीन्ययौ मन्दप्रतापताम् ॥१३१३॥
शनैरपसरन्सोथ तारमूलकमासदत् । उच्चलाधिष्ठितास्तेपि विद्विषन्तस्तमन्वयुः ॥१३१४॥
1315 समेतानन्तसैन्येन तेन तत्र चिरं धृतः । उच्चलप्रलयाभ्रस्य पौरस्त्यानिलविभ्रमः ॥१३१५॥
सैन्ययोरुभयोस्तत्र जयश्रीकरिणीकृते । बभूव तुल्यसंघर्षः सेर्ष्ययोरिव दन्तिनोः ॥१३१६॥
आनन्दनामाप्युत्पिञ्जोत्थानमुच्चलमातुलः । चक्रे मडवराज्येथ निविडीकृतडामरः ॥१३१७॥
तद्विप्लवे डामरौघा दिग्देशेभ्यः सहस्रशः । उन्ममज्जुर्हिमापाये रन्ध्रेभ्य इव षट्पदाः ॥१३१८॥
तत्क्षणं क्षीणभाग्यस्य यथा द्वारपतिस्तथा । कायस्थः कम्पने राज्ञः सहेलो[1]भूत्[2]महत्तमः ॥१३१९॥
1320 आनन्देन कृतास्कन्दो बहुशो विहिताहवः । औज्झीन्मडवराज्यं स न यत्तद्व्यभूत्तदा ॥१३२०॥
अथाद्भुतप्रतापेन वेष्टयित्वा महाचमूम् । उच्चलेनाहवे बद्धः ससैन्यो मण्डलेश्वरः ॥१३२१॥
न विद्मः किं तदा वृत्तं योधानां यत्किलाविदन् । ते सखड्गाश्वसंनाहा बद्धा वयमिति स्फुटम् ॥१३२२॥
तथा बद्धोपि निर्दध्यौ स भव्यः प्रभवे हितम् । स्वामिभक्तिर्विपर्येति पर्यन्तेपि न मानिनाम् ॥१३२३॥
तूर्णं पुरप्रवेशाय सोथ प्रैरयदुच्चलम् । विश्वास्य नेदृगन्योस्ति क्षण इत्यसकृद्ब्रुवन् ॥१३२४॥
1325 विशतस्तस्य चानेकैः पुरग्रामाद्यलुण्ठयत् । कर्मणानेन कौलीनमस्यास्त्विति विचिन्तयन् ॥१३२५॥
परिहासपुरे तेन स ततः संप्रवेशितः । श्वभ्राम्बुविषमाद्यस्मान्निर्गमोत्यन्तदुर्गमः ॥१३२६॥
तत्रोच्चलं चतुःशाले स्वं च दग्धुमनूनुदत् । निजान्स निशि ते तत्तु न चक्रुस्तद्वितैषिणः ॥१३२७॥
यथा चित्तं तथास्य स्यात्कायश्चेत्साहसक्षमः । तदात्मनिरपेक्षस्य किं न सिध्येन्मनीषितम् ॥१३२८॥
क्लीबच्छन्नवपुस्त्वचा सह वसत्यच्छेद्यया कच्छपो निर्वर्मा रणकर्मसाहसमहोत्साहश्च सिंहः सदा ।
धिक्प्राग्दुष्कृतपक्षपातरभसो नीचेषु मुग्धो विधिर्वीराणां कुरुते शरीरमभितो वैकल्यशल्याहतम् ॥१३२९॥
1330 संदिदेशाथ स क्ष्मापमाकृष्यायं मयाग्रतः । शृगाल इव ते क्षिप्तः क्षिप्रं निर्गत्य बध्यताम् ॥१३३०॥
ततः समस्तसामन्तसैन्यसंततिसंयुतः । अद्य मृत्युर्जयो वेति निश्चित्य निरगान्नृपः ॥१३३१॥
स प्राणसंशये सर्वायासप्रशममादिशत् । पटहोद्घोषणेनासीत्स्वैरै[1]रनुगतोखिलैः ॥१३३२॥
प्राप्तं भरतसेत्वग्रं घ्नन्तः सैन्यं विरोधिनम् । आजानेयै राजभृत्याः क्षणान्मार्गमलङ्घयन् ॥१३३३॥
क्षुभितेष्वाविवायाते राजसैन्ये द्विषद्बलम् । मण्डलेश्वर एवान्तःप्रविष्टो निरनाशयत् ॥१३३४॥
1335 अथोच्चलबले भग्ने विदुद्रुः केपि जाङ्घिकाः । भ्रान्ता राजविहारं च प्राविशन्केपि डामराः ॥१३३५॥
त्रिल्लसेनाभिधं दृष्ट्वा प्रविष्टं[1] डामरं परे । उच्चलोसाविति भ्रान्त्या विहारं तमदाहयन् ॥१३३६॥
सोमपालाभिधेनारिहयारोहान्तरे चिरम् । कुर्वन्दर्शनपालस्य पितृव्येण सहाहवम् ॥१३३७॥
यत्नाज्जनकचन्द्राद्यैर्मानी व्यावर्तितो रणात् । परिहासपुरायायान्मृत्युवक्त्रादिवोच्चलः ॥१३३८॥

१३११. [1]) Thus $A_1$; corr. by later hand into कांकाचवैद्य°. १३१९. [1]) Emended; A सहलो.—[2]) Emended; A °भूमहत्तमः. १३३२. [1]) Doubtful; thus emended with C; A °सीत्पारैर°. १३३६. [1]) Thus $A_1$; corr. by later hand into प्रविष्टा.

वितस्तां गौरिकाबाल[1]ग्रामात्तीर्त्वा हयान्वितः । स डामरैः सह पुनः प्रययौ तारमूलकम् ॥१३३९॥
जयेन तावन्मात्रेण कितवोल्प इवोन्मदः । राजा प्रशंसन्नानन्दं राजधानीं न्यवर्तत ॥१३४०॥ 1340
जीवन्तमप्यरिं श्रुत्वा न पश्चादलगत्स यत् । आसन्नुच्छ्वसितास्तेन भङ्गभाजोपि डामराः ॥१३४१॥
यातान्पलाय्य ताञ्ज्येष्ठामूलीये मासि सर्वतः । भूयोपि संघटयितुं स्थिरधीरैच्छदुच्चलः ॥१३४२॥
स्वदोर्मात्रसहायस्य परायत्तस्य मानिनः । दुर्भिक्षान्तर्महोद्योगः स तस्य विषमोभवत् ॥१३४३॥
तन्मध्येतिदरिद्रोपि संप्राप्तं स ररक्ष यत् । तमुत्पाद्यानयद्राजा श्रीपरीहासकेशवम् ॥१३४४॥
तस्मिन्विघटिते पांसुः कपोतच्छदधूसरः । रोदसीच्छादनं हर्षशीर्षच्छेदावधि व्यधात् ॥१३४५॥ 1345
प्रागन्धकारो[1] देशेस्मिन्दिवसेपि व्यजृम्भत । रूपिकादिवसालोक इति यत्पप्रथे जने ॥१३४६॥
निवेशिते परीहासकेशवे प्रशशाम तत् । तस्मिन्नुन्मूलिते भूयः सार्धं मासमजृम्भत ॥१३४७॥
किंचिदुच्छ्वसिते राज्ञि मन्दोद्रेकतया रिपोः । दिशा शूरपुरस्याथ सुस्सलः प्रत्यदृश्यत ॥१३४८॥
अवनाहे[1] स हि वसन्नुपालम्भपरैः पितुः । संदेशैः शंसतो ज्येष्ठमौदासीन्यादपाहृतः ॥१३४९॥
दत्तान्कल्हक्षितीशेन कांश्चिदादाय वाजिनः । चिरेण राजदाक्षिण्यमौज्झीत्तेन व्यलम्बत ॥१३५०॥ 1350
आरम्भादुदयान्तं च तिष्ठन्वैरेपि निष्ठुरे । साम प्रयुयुजे मोहा[1]वहं मायानिधी रिपोः ॥१३५१॥
जित्वा माणिक्यनामानं तेन सेनापतिं रणे । प्रापि शूरपुरद्रङ्गाज्जयश्रीः श्रीश्च भूयसी ॥१३५२॥
तस्याभ्युदयपात्रस्य तया संप्राप्तया श्रिया । आरब्धिसमयः कृत्स्नः स विभूत्यद्भुतोभवत् ॥१३५३॥
मण्डलेश्वरपट्टादीनविचिन्त्योच्चलं ततः । प्राहिणोन्नृपतिर्योद्धुं सुस्सलं क्षिप्रकारिणम् ॥१३५४॥
तेन शूरपुरे भग्नास्तद्योधाः शौर्यशालिना । भूयांसः प्रलयं प्रापुर्मग्ना वैतरणीजले ॥१३५५॥ 1355
तत्र दर्शनपालस्य स्वामिद्रोहकृतो वपुः । विक्रामतो न संस्पृष्टं खिन्नयेव जयश्रिया ॥१३५६॥
राजसैन्यं तदन्यैर्युद्धहतशेषं पलायितम् । लोकपुण्ये निवसतः सहेलस्यान्तिकं ययौ ॥१३५७॥
सुस्सलापातकल्पान्तं विशङ्क्यापि सहेलकः । तैस्तैर्भग्नैर्बलैः साकं नगरं प्राविशत्ततः ॥१३५८॥
एवमभ्येत्य नृपतौ सुस्सलेन विसूत्रिते । अवाप तारमूलस्थः प्रतिष्ठां पुनरुच्चलः ॥१३५९॥
बिभ्यद्भिस्तुरगानीका[1]त्पत्तिप्रायैः स डामरैः । आनिन्ये शैलदुर्गेण भूयो लहरवर्त्मना ॥१३६०॥ 1360
राजाप्युदयराजाख्यं कृत्वा द्वारपतिं पुनः । प्राहिणोदुच्चलं जेतुं लहरं मण्डलेश्वरम् ॥१३६१॥
ततः पद्मपुरं प्राप्ते मातुले मल्लजन्मनोः । न कोपि कम्पनं भूपान्मन्त्री त्रासातुरोग्रहीत् ॥१३६२॥
को मेस्तीति विनिश्वस्य वदतोथ महीपतेः । अधिकारस्रजं हस्ताच्चन्द्रराजः समाददे ॥१३६३॥
अनाशीः शयने मृत्युर्येषां तेषां स वंशजः । श्रीजिन्दुराजमुख्यानामौचित्यं प्रत्यपादयत ॥१३६४॥
स द्रौणिरिव निर्नष्टे काले सेनापतिः कृतः । निर्गत्य तत्पद्मपुरादरिसैन्यं न्यवारयत् ॥१३६५॥ 1365
विपक्षः कम्पनेशः स तेन क्ष्मां क्रामता[1] शनैः । नवम्यां शुक्लनभसो हतोवन्तिपुरान्तरे ॥१३६६॥
स हि गोवर्धनधरोपान्ते कुर्वद्भिराहवम् । स्वसैन्यैर्वर्जितो गीतं शृण्वन्परिमितानुगः ॥१३६७॥

---

१३३९. [1]) $A_2$ gloss परिहासपुरसमीपे गुरिकाबलमस्ति. १३४६. [1]) Emended; A °कारदेशे°. १३४९. [1]) Thus $A_1$; $A_2$ (?) अशनाहे; $A_3$ gloss पौदुपावग्रामे. १३५१. [1]) Emended; A मोहौवहं. १३६०. [1]) Emended; A °नीकान्पत्ति°. १३६६. [1]) Emended; A क्रमता.

प्रविश्यारिहयारोहैर्वितस्तातीरवर्त्मना । प्राप्तोकस्माद्वधं लेभे प्रमत्तानां शुभं कुतः|| १३६८||
प्रहितं चन्द्रराजेन क्ष्मापतिर्वीक्ष्य तच्छिरः । भूयो जयाशामकरोदानुकूल्यं विदन्विधेः ||१३६९||
1370 वैमुख्येन व्रजन्कुर्यात्सांमुख्यैरन्तरा विधिः । प्रत्यागमभ्रमं सिंह इव व्यावृत्य वीक्षितैः ||१३७०||
अथ लब्धबलश्चन्द्रराजोमन्दोद्यमोविशत् । विजयक्षेत्रमाकर्षन्कटकं दशधाष्टधा ||१३७१||
तुलाधर इव स्रष्टा साम्यभङ्गं न चक्षमे । तदा द्वयोः कटकयोस्तुलायाः पुटयोरिव ||१३७२||
प्राप्ते यतस्तृतीयस्मिन्दिवसे मण्डलेशितुः । अकालवृष्टिविवशं लहरे व्यद्रवद्बलम् ||१३७३||
शीतवातहता योधा मग्नाः केदारकर्दमे । तुरगासितनुत्रादि द्राक्कियञ्च इवामुचन् ||१३७४||
1375 उच्चलेन ततो रक्ष्यमाणमप्यार्द्रचेतसा । प्राप्तं जनकचन्द्राद्या निजघ्नुर्मण्डलेश्वरम् ||१३७५||
हर्षभूभृद्भृत्यवर्गे द्रोहशङ्काङ्किते परम् । कलेवरव्ययात्कीर्तिः क्रीता तेनैव मन्त्रिणा ||१३७६||
ध्रुवं संस्पर्धतो वन्द्या देवशर्मादयोस्य ते । न चेत्कोपि विपर्यासे दोषमुद्घोषयेज्जनः ||१३७७||
लवन्योन्मूलनारातिव्यूहव्यामोहनादयः । विध्यधीने फले ध्याते स्तुत्याः कस्य न तत्क्रियाः ||१३७८||
किं पातालतमो न हन्ति हिमगुः किं नो विषं भीतये पानीयं गिलतः किमान्तरशिखिध्वस्त्यै न धन्वन्तरिः[1]|
सर्वत्रैकपदे प्रयात्यफलतां वाच्यो जडो नाम्बुधिः सिद्धेर्दैवविधेयतां विमृषतां स्तुत्यैव वस्तुज्ञता ||१३७९||
1380 स्वामिकृत्योद्यमस्तुल्यस्तूतिषु स्त्रीषु पूज्यताम् । गङ्गा तज्जननी स्वस्य नमस्यन्त्यविशङ्किताम् ||१३८०||
साहसे सा हि तनये यत्र तत्र महीभुजा । प्रहीयमाणे तं स्नेहमोहिताह स्म भूभुजम् ||१३८१||
अनन्यसंततेरेकं सुतमेतं प्रभो मम । मा नियुङ्क्था[1] यत्र तत्र कार्ये संदेहितासुनि ||१३८२||
स तामकथयन्मातर्यथा तेनन्यसंततेः । तथा मेनन्यभृत्यस्य सोयमेकोवलम्बनम् ||१३८३||
स्वसंभवस्य तां[1] भर्तुर्भक्तिसंभावनामसौ । प्राप्तप्रतिष्ठानिष्ठायां मेने मानवती सती ||१३८४||
1385 उच्चलस्य क्षणे तस्मिन्हिरण्यपुरमीयुषः । राज्याभिषेकं संभूय तत्रत्या ब्राह्मणा ददुः ||१३८५||
नृपमत्यन्तविवशं प्रसङ्गे तत्र मन्त्रिणः । भूयांसः सन्ति तैः सार्धं व्रज तद्धोहराचलम् ||१३८६||
प्रजा एव ततः शान्तोत्कण्ठा नवनृपं प्रति । त्वामानेष्यन्ति न चिराद्दिनैर्वा स्वयमेष्यसि ||१३८७||
सोभ्यधादवरोधस्त्रीकोशसिंहासनाद्यहम् । असामान्यं परित्यज्य गन्तुं सपदि नोत्सहे ||१३८८||
पुनस्तेकथयन्नाप्ता यान्तोध्यारुह्य वाजिनः । पृष्ठे विन्यस्य नेष्यन्ति कोशान्तःपुरयोषितः ||१३८९||
1390 श्वपाकीकामुकोप्यासीद्यस्मिंस्तदपरोपि चेत् । सिंहासनं समारोहेत्काभिमानक्षतिस्ततः ||१३९०||
आस्तामेतत्परं ब्रूथ मन्त्रमित्यथ चोदिताः । ते पार्थिवेन भूयोपि ससंरम्भं बभाषिरे ||१३९१||
क्षत्रधर्मं पुरस्कृत्य शासतां क्ष्मां क्षमाभुजाम् । को दैन्य[1]स्यावकाशः स्यादाशौर्यैषां मृधे वधः ||१३९२||
अनुद्योगश्च लज्जा च भयं द्वैधं च मन्त्रिणा । भूभुजां व्यसनोल्लासे शत्रवो न तु गोत्रिणः ||१३९३||
कार्यं न पश्येदलसः स्वयं यो भृत्येषु विन्यस्तसमस्तकृत्यः ।
यष्ट्याश्रयस्येव विनष्टदृष्टेः पदे पदे तस्य किलोपघातः ||१३९४||

---

१३७९. [1]) Emended; A धान्व°. १३८२. [1]) Emended; A नियुक्त्या. १३८४. [1]) Emended; A ता भर्तु°. १३९२. [1]) Thus $A_1$; corr. by later hand into सैन्य°.

लज्जेहमस्य स्वयमात्तशस्त्रः स्वल्पस्य शत्रोः कलयन्नवज्ञाम् ।
एवं किलादीर्घमतिर्ददाति स्वयं प्रवृद्धिं त्रपया विमुग्धः ॥१३९५॥ 1395
कालेन याति क्रिमितां महेन्द्रो महेन्द्रभावं क्रिमिरप्युपैति ।
अयं प्रथीयानयमप्रतिष्ठ इत्येष निष्ठानुचितोभिमानः ॥१३९६॥
पराभवाधायि भयं जिगीषोः सर्वाङ्गवैकल्यवताहितेन ।
येनाभियुक्तः स समस्तसंपत्पूर्णोपि वैकल्यहतत्वमेति ॥१३९७॥
लब्धस्थितिः स्फीतविभूतिपात्रं दीनोभियोक्ता परपिण्डवृत्तिः ।
आद्ये कथं नाम पराभवः स्याद्भयं भवेच्चेह न तत्र[1] भावः ॥१३९८॥
अमात्यवैमत्यवशेन निष्ठा दृष्टा न कार्यस्य तनीयसोपि ।
वैशाखरज्जोरिव कर्षकाभ्यां पर्याययोगेन कृते विकर्षे ॥१३९९॥
समग्रशक्तेरेकेनाप्याशाक्रान्तस्य भूपतेः । वैरी सर्वाङ्गहीनोपि राज्यमायुश्च कर्षति ॥१४००॥ 1400
यत्र द्विषस्तत्र याहि क्रान्तां क्रान्तां च मेदिनीम् । पातार्थी न चिरादेवं पुनर्जयमवाप्स्यसि ॥१४०१॥
विधुरेपि विधौ शूरसहस्रपरिवारितैः । पतद्भिराहवे भूपैः ख्यात्याभिख्योपलभ्यते ॥१४०२॥
नृत्यच्छिन्नशिरोधरोद्धुरनटे[1] ज्यालाबु[2]वीणागुणप्रक्वाणिन्युदयच्छिवा[3]मुखशिखिज्वालाप्रदीपाङ्कुरे ।
धन्याः केप्युप[4]लभ्य वीरशयने शान्ताभिमानज्वरोल्लाघश्लाघ्यशरीरतासफलितस्निग्धाशिषः शेरते ॥१४०३॥
उदात्तमित्यन्तकृत्यं संचित्यं[1] कितवा इव । राज्ये भजन्ते दीव्यन्तः क्षत्रियास्त्रासहीनताम् ॥१४०४॥
मन्त्रान्तरानुयोक्तारं तदप्युत्सृज्य मन्त्रितम् । परुषं[1] प्राप्तकालं च ते निःश्वस्य तमब्रुवन् ॥१४०५॥ 1405
उत्कर्षवदसूंस्त्यक्तुमपि शक्नोषि संकटे । अन्यथानुचितं किंचित्प्राप्स्यस्यहितचिन्तितम् ॥१४०६॥
स तानुवाच स्वं हन्तुं न शक्तोहं ततो मयि । भवद्भिरेव विषमे प्रहर्तव्यमुपस्थिते ॥१४०७॥
गिरं कापुरुषस्येव क्लैब्यग्रस्तस्य तां प्रभोः । सबाष्पास्तेनुशोचन्तः पुनरेवं बभाषिरे ॥१४०८॥
प्रतीकाराय नः शक्तिर्न चेद्दैवहतौजसाम् । प्रत्युतैवंविधे कृत्ये प्रसरेयुः कराः कथम् ॥१४०९॥
पशून्पुरुषरूपान्स नूनं भूभृत्पुपोष तान् । दुःखेनोदखनंस्तस्य ये तादृग्दैन्यमीयुषः ॥१४१०॥ 1410
युगान्तानपि जीवित्वा कायः सापाय एव यः[1] । तत्त्यागमात्रसाध्येर्थे धिग्दैन्यमनुजीविनाम् ॥१४११॥
योषितोपि विशन्त्यग्निं यं ध्यात्वा विस्मृतिं व्रजेत् । भर्तृस्नेहः स पुंसोपि यस्य कोन्यस्ततोधमः ॥१४१२॥
शैलूषस्येव ये शोकभयदैन्याद्यविक्रियाः । भर्तुः पश्यन्ति तैरेषा भूः सतीर्थाप्यपावनी ॥१४१३॥
क्षुत्क्षामस्तनयो वधूः परगृहप्रेष्यावसन्नः सुहृद्दुग्धा गौरशनाद्यभावविवशा हम्बारवोद्गारिणी ।
निष्पथ्यौ पितरावदूरमरणौ स्वामी द्विषन्निर्जितो दृष्टो येन परं न तस्य निरये भोक्तव्यमस्त्यप्रियम् ॥१४१४॥
भूयोपि मानुषपशून्स तान्नृपतिरब्रवीत् । उदात्तकृत्योप्याविश्य भूतैरिव विमोहितः ॥१४१५॥ 1415
एतस्मिन्पश्चिमे काले भुक्तं राज्यं यथा मया । जानेविशालेच्छतया तथान्यो नोपभोक्ष्यते ॥१४१६॥

१३९५. [1]) ह supplied by $A_3$ in space left by $A_1$. १३९८. [1]) Thus corr. by later hand from $A_1$ तत्प्रभावः. १४०३. [1]) Emended; $A_1$ has written first °द्धुरनख and corrected this into °द्धुरनटो.—[2]) Thus corr. by $A_1$ from ज्वालाग्र°.—[3]) Thus corr. by $A_1$ from °च्छिवो.—[4]) प omitted in A. १४०४. [1]) Thus A; perhaps, to b emended संचिन्त्य. १४०५. [1]) Emended; A पुरुषं. १४११. [1]) Emended; A वः.

यमः कुबेरश्चौष्ठाग्रे राज्ञां तिष्ठत इत्यसौ । मदेकशरणैवाभूत्ख्यातिरस्मिन्कलौ युगे ॥१४१७॥
रुद्रोपेन्द्रमहेन्द्राद्याः प्रयातारो यदध्वना । उपस्थितायां नियतौ तत्र मर्त्यस्य काः शुचः ॥१४१८॥
किं तु दूये यदेषा भूर्भूत्वा कुलवधूरिव । महोषाद्धट्टचेटीव प्राप्ता प्रसभभोग्यताम् ॥१४१९॥
1420 इतः प्रभृति यः कश्चिद्राज्यस्यास्य गतौजसः । चक्रिकामात्रसाध्यत्वं जानन्नाशां करिष्यति ॥१४२०॥
अलौकिके कृते यद्यत्तद्वीक्ष्य फलवन्ध्यताम् । प्राप्तोदयैरल्पसत्त्वैर्दर्पान्नूनं हसिष्यते ॥१४२१॥
कार्यारम्भः फलोल्लासमालोक्य प्रायशो जनैः । अनानुगुण्यगणनां कुर्वाणैर्न विगर्ह्यते ॥१४२२॥
पक्षान्तकोरिरवलम्बनभूः स नेत्रं दुग्धेन यस्य मरणं धियि कैरिवेत्थम् ।
पारं गते मथनकर्मणि मन्दराद्रेर्दोषोर्थ्यते विगुणहेतुपरीक्षणेन ॥१४२३॥
शास्त्रसंदर्भवित्त्वेपि श्रीगर्भत्वमदर्शयम् । जनोपजीवनार्थं यत्तज्ज्ञातं जाड्यसिद्धये ॥१४२४॥
1425 उच्चलेनापि सत्कृत्ये हस्ताग्रोच्चेयचेतसा । दर्शितश्यामदशनं करिष्यन्ते विडम्बनाः ॥१४२५॥
ततोवमानान्न त्रासात्संप्राप्तोद्य विहस्तताम् । समर्थनेच्छुर्वाञ्छामि मृत्युमीदृशमप्यहम् ॥१४२६॥
स्वैरेव स हतो नो चेत्कस्तस्माद्वसुधां हरेत् । लब्धां रक्षितुमिच्छामि ख्यातिमेतेन हेतुना ॥१४२७॥
मुक्तापीडः पुरा राजा ज्वलित्वा मूर्ध्नि भूभुजाम् । कार्पण्यप्रणयं प्राप लब्धरन्ध्रो विरोधिभिः ॥१४२८॥
स ह्युत्तरापथे नानापथस्थगितसैनिकः । मितानुगोहितैः रुद्धमार्गोभूद्दुर्गमेध्वनि ॥१४२९॥
1430 तं शल्यो नाम सामग्र्यवैरल्य[1]विवशं नृपः । बन्द्धुं प्रतिज्ञामकरोद्वाजिलक्षैर्युतोष्टभिः ॥१४३०॥
स सामप्रमुखोपायापायध्यानावसन्नधीः । भवस्वाम्यभिधं कृत्यमपृच्छन्मुख्यमन्त्रिणम् ॥१४३१॥
असाध्यां सोपि निर्ध्याय विनिपातप्रतिक्रियाम् । न्याये निश्चित्य नैयत्यं कर्तव्ये प्रत्युवाच तम् ॥१४३२॥
उपाययुक्तिप्रत्युक्ते कृत्ये कीर्त्यभिमानिनाम् । निःसंभ्रमेव प्रतिभा लोभेनाक्षोभिते हृदि ॥१४३३॥
कृत्यं कृत्यविदो लब्धप्रसिद्धिपरिरक्षणम् । साम्राज्योपार्जनमुखो व्यापारस्त्वानुषङ्गिकः ॥१४३४॥
1435 गच्छञ्शरीरविच्छेदादपि भस्मावशेषताम् । कर्पूरः सौरभेणेव जन्तुः ख्यात्यानुमीयते ॥१४३५॥
शान्तयोर्जीवितस्थानं द्वयमत्यद्भुतं द्वयोः । अनङ्गस्याङ्गनापाङ्गः स्तोतृजिह्वा यशस्विनः ॥१४३६॥
ख्यातिसंरक्षणं नाम जन्तोः कल्पान्तरस्थितिः । वर्तन्ते कीर्तिकायस्य संपूर्णाः परमाणवः ॥१४३७॥
धीरैर्विधिश्च निर्ध्येयो विरोधिष्ववधानवान् । यस्तेषामुन्नतिधनध्वंसाय यततेन्वहम् ॥१४३८॥
तुङ्गावपातनहठव्यसनी विधाता स्वोत्पत्तिपद्मकुलजेपि सरोजषण्डे ।
संकोचिनि द्विजपतावपि शुद्धिवन्ध्ये मातङ्गहस्तपतनैः कुरुतेवमानम् ॥१४३९॥
1440 ये हठापातिनो धातुर्धियं[1] ख्यातिनिपातने । रक्षितुं समुपेक्षन्ते तैः किं नाम —[2] रक्षितम् ॥१४४०॥
जातिः क्ष्माभृति वंशजाश्रयतया ख्यातिप्रतिष्ठामिमामुद्दीप्यानलमुज्झितस्ववपुषः केप्यत्र वेत्राङ्कुराः ।
त्रातुं हन्त विदन्ति ये न विधिना क्रुद्धेन पृथ्वीभृता द्वारि द्वाःस्थकरैर्गतागतखलीकाराणि संप्रापिताः ॥१४४१॥
भोगान्निर्वाणभूयिष्ठानिष्टान्प्राप्तानवेत्य तत् । प्रतिष्ठासौष्ठवत्राणे संरब्धुं देव सांप्रतम् ॥१४४२॥

---

१४३०. [1]) Thus $A_1$; $A_2$ °वैचल्य°. १४४०. [1]) Thus corr. by $A_1$ or a later hand from °धातुरियं.—[2]) The *lacuna* not indicated in A; न supplied in R C.

दण्डकालसकाख्यस्य तद्रोगस्याशुकारिणः । पार्थिवाकस्मिकोत्थानं मिषादद्य प्रकाश्यताम् ॥१४४३॥
श्वो वक्तास्म्यथ कर्तव्यं व्यापत्प्रक्षपणक्षमम् । उक्त्वेति स महामात्यो निर्गत्य स्वगृहानगात् ॥१४४४॥
दण्डकालसकं दण्डधरो व्यञ्जन्मिषात्ततः । अधीर इव चक्रन्द लुठन्निस्पन्दलोचनः ॥१४४५॥ 1445
स्वेदसंवाहनस्नेहवमनाद्यैरुपक्रमैः । निःशैथिल्यव्यथं तेन मुमूर्षुं तं जनोवदत् ॥१४४६॥
ततो निश्चितमृत्युत्वं पत्युः कथयता कृतः । वह्निप्रवेशोमात्येन कृतज्ञत्वनिवेदकः ॥१४४७॥
कर्तव्यशेषं दाक्षिण्यादनाचक्षाणमग्रतः । युक्तयोक्तनिष्ठुराचारमन्तस्तुष्टाव तं नृपः ॥१४४८॥
अप्रौढः सोढुमुद्दामां व्यथामस्मीति वादिना । राज्ञाप्यनलसाद्देहं ततश्चक्रेभिमानिना ॥१४४९॥
तेन प्राणानुपेक्ष्यैवमन्यख्यातेर्मनस्विना । ऊर्ध्वाधिरोहे सोपानं कृतं न निजकीर्तनात् ॥१४५०॥ 1450
एवं दैवोपनीतानामख्यातीनां चिकित्सितम् । स्वधियामात्यबुद्ध्या वा पारमेति मनस्विनाम् ॥१४५१॥
इत्युक्त्वा विरतो वंशबीजरक्षार्थमात्मजः । भोजो विसृज्यतां कोटमेवमूचेथ मन्त्रिभिः ॥१४५२॥
तं राजपुत्रं प्रस्थानमङ्गलान्ते विनिर्गतम् । पुनर्व्यावर्तयामास दण्डनायकमोहितः ॥१४५३॥
सा धीः स साहसारम्भस्तदवैह्वल्यमापदि । नष्टमेकपदे तस्य नाशकाले ह्युपस्थिते ॥१४५४॥
लक्ष्मीस्त[1]डिल्लता कीर्तिबलाका शौर्यगर्जितम् । प्रतापशक्रचापं च भागधेयाम्बुदानुगम् ॥१४५५॥ 1455
धीशौर्यादिगुणेन भाग्यसमये प्रागेष एको नृपः शक्रस्याक्रमणं क्रियेत न कुतोनेनेति संभाव्यते ।
मौग्ध्यं पङ्गुजडान्धवच्च स ततो गच्छन्नभाग्योदये दत्तोनेन पदक्रमो भुवि कथं नामेति संचिन्त्यते ॥१४५६॥
विरोधिप्रतिरोधाय तन्निसैन्यं विसर्जितम् । नगरस्थमपि क्ष्मापात्प्रवासधनमाददे ॥१४५७॥
दायादाश्रयणं राजभृत्याः सर्वेपि चक्रिरे । ये केचित्त्ववसन्गेहे ते देहैरेव केवलम् ॥१४५८॥
पराश्रयपरं द्वित्रा न संकल्पमपि व्यधुः । किं वा स्तुतैस्तैर्ये स्त्रीवदमुञ्च[1]न्नचिरादसून् ॥१४५९॥
यां काणश्रावतीनर्तक्यन्वये कापि नर्तकी । पुत्रीचक्रे क्वापि जातां जयमत्यभिधाथ सा ॥१४६०॥ 1460
भूत्वा गृहीतकौमारा तरुण्युच्चलरागिणी । धनलुब्धावरुद्धात्वमभजन्मण्डलेशितुः ॥१४६१॥
तस्मिन्हते तदैवास्तापत्रपोच्चलमाययौ । तयैव दैवयोगेन पट्टदेव्या भविष्यते ॥१४६२॥ तिलकम्[1] ॥
आबद्धपङ्क्यश्चर्चामुच्चलाश्रयिणीं व्यधुः । भूपालदर्शनेप्यस्तभीतयो राजसेवकाः ॥१४६३॥
वेतनस्वीकृतैः सर्वैः शिक्षाधायी पुरस्कृतः । लोभावमानात्युद्बोध्य योधश्रद्धां हरन्युधि ॥१४६४॥
मन्दप्रतापतावाप्तो नर्मोक्त्या मर्मभेदकृत् । आहारादिक्षणे कर्ता प्रक्रियार्थनया कलेः ॥१४६५॥ 1465
अतीव प्रभुदानादिमाहात्म्याख्यानकोविदः । एक एकोकरोद्योधः पृतनानां विसूत्रणम् ॥१४६६॥ युग्मम्[1]॥
श्रीलेखाभ्रातृसूनोर्यस्तनयो व्यङ्गमङ्गलः । मल्लज्ञातीयकोपेन स राज्ञास्कन्द्य घातितः ॥१४६७॥
मातुलस्यात्मजा मल्लापत्ययोस्तस्य गेहिनी । श्वश्र्वा समं स्ववसतीरादीप्य दहने मृता ॥१४६८॥
मौनव्रतादिनियमच्छन्नक्रौर्योन्तकोपमः । करोत्यभ्यन्तरान्भिन्नान्मल्लः परमदाम्भिकः ॥१४६९॥
तदेष पुत्रराज्येच्छुर्व[1]र्ध्यतां निर्भयं रिपुः । शाहिपुत्रीभिरित्यूचे तस्मिन्नवसरे नृपः ॥१४७०॥ 1470

---

१४५५. [1]) Emended; A लक्ष्मीस्तनि°. १४५९. [1]) Emended; A °मुञ्चश्चि°. १४६२. [1]) $A_1$ writes here ३ instead of तिलकम्. १४६६. [1]) $A_1$ writes here २ instead of युग्मम् (युगलकम्). १४७०. [1]) Emended; A °र्बध्यतां.

स्वयं प्रादात्समास्कन्दं द्वारि स्थितवतः पुरः । तस्य प्राणार्थिनो वाञ्छापूर्त्यै मल्लश्च निर्ययौ ॥१४७१॥
स हि द्वैराज्यसञ्ज्ञाभ्यां पुत्राभ्यां प्रार्थितोपि सन् । मुनिव्रतः सदाचारानुरोधान्नात्यजन्नृपम् ॥१४७२॥
विश्वासाय परं राज्ञो भ्रातृत्राज्ञोर्भविष्यतोः । द्वैमातुरान्सल्हणादीन्नीविं दत्त्वावसद्गृहे ॥१४७३॥
आसेदुषे मुनिदशामाजन्मप्रीणिताग्नये । तदा स तस्मै चुक्रोध प्रत्यासन्नवधो नृपः ॥१४७४॥
1475 स सुराभ्यर्चनं कुर्वन्नाहूतः परिपन्थिभिः । रेजे तेनैव वेषेण समराय विनिर्गतः ॥१४७५॥
उपवीत्यक्षसूत्राङ्कपाणिर्दर्भोज्ज्वलाङ्गुलिः । भस्मस्मेरललाटाङ्को जामदग्न्य इवापरः ॥१४७६॥
स्नानार्द्रधवलश्यामलोलधम्मिल्ल[1]लीलया । देहत्यागे प्रयागाम्बु धारयन्निव मूर्धनि ॥१४७७॥
उष्णीषी वीरपट्टेन खेटकेनोष्णवारणी । सोसिधारातीर्थपान्थो दण्डी खड्गेन दिद्युते ॥१४७८॥
भोगे पुरस्कृताः केचित्तद्भृत्याः पूर्वनिर्गताः । अमर्त्यनारीभोगेपि तस्यासन्नग्रभागिनः ॥१४७९॥
1480 द्वौ रथ्यावट्टविजयौ द्विजौ पौरोगवस्तथा । कोष्टकः सज्जकाख्यश्च योद्धा[1] युद्धे हता बभुः ॥१४८०॥
क्षतोप्युदयराजाख्यः क्षत्तायुः[1]शेषसत्तया । प्राणैर्नियोगभागाजौ नाज्जकोपि व्ययुज्यत ॥१४८१॥
विरोधियोधैर्नीरन्ध्रं द्वारमालोक्य सर्वतः । त्यक्तकम्पो ददौ झम्पां स तेषामेव मूर्धनि ॥१४८२॥
शेवलेष्विव खड्गेषु खेटकेष्वम्बुजेष्विव । जरसा धवलो भ्राम्यन्राजहंस इवाबभौ ॥१४८३॥
क्षणाच्च ददृशे शातशरशङ्कुशताचितः । प्रवीरो वीरशयने सुप्तो भीष्म इवापरः ॥१४८४॥
1485 शोच्यं गतायुषो राज्ञः किं नाभूत्तस्य तादृशः । चिच्छेद यः शिरः पृष्ठे हयं च भ्रमयन्स्मयात् ॥१४८५॥
राज्ञी कुमुदलेखाख्या मल्लस्याला च वल्लभा । गृहेष्वजुहुतां वीतिहोत्रे गात्राणि संभृते ॥१४८६॥
राजावकल्ययोः पत्न्यौ वाले सल्हणरल्हयोः । स्नुषे मल्लस्यासमती सहजा चाग्निसाद्गते ॥१४८७॥
सर्वोपभोगभागिन्यस्तदन्तःपुरयोषिताम् । परिवाराङ्गना वह्नौ षट्चात्रैव विपेदिरे ॥१४८८॥
महागृहाग्नितापेन शोकोष्णैश्च जलासुभिः । तप्ताम्भसो वितस्तायास्तीरे वामे बभूव तत् ॥१४८९॥
1490 प्रवर्धितायाः स्तन्येन द्रष्टुमक्षमया पयः । दास्यमानं निवापेषु पुत्र्याश्चान्द्याख्यया समम् ॥१४९०॥
धात्र्या परस्मिन्वै तस्मिंस्तीरे स्वान्तःपुरे स्थिता । माता भविष्यतो राज्ञोर्नन्दा[1]निन्द्यकुलोद्भवा ॥१४९१॥
महानसाग्निधूमेन संलक्ष्यावीक्ष्य पुत्रयोः । सोत्कण्ठं कटकौ सौधादुदग्दक्षिणदिक्स्थयोः ॥१४९२॥
क्रियतां दिवसैरेव पुत्रौ शत्रोः पितृद्विषः । जामदग्न्यायितं वंशे शस्त्रेति नृपतिं सती ॥१४९३॥
अनिषण्णेव दीप्ताग्नौ गृहे स्वं निरदाहयत् । प्रनृत्यन्तीभिरालीभिरिव ज्वालाभिरावृता ॥१४९४॥
1495 वधे दर्शनपालस्तु नृपे प्राप्ते प्रतिक्षणम् । अत्यद्भुतैरन्तरायैरायुःशेषेण रक्षितः ॥१४९५॥
वर्षमात्रावशेषायुर्यद्वा द्रोहेण रक्षितः । सोवमानस्य पूयस्य रोगजस्य च भुक्तये ॥१४९६॥
कृष्णभाद्रनवम्यां तं वधं श्रुतवतोः पितुः । मल्लात्मजन्मनोः शोकः कोपेन निरपीयत ॥१४९७॥
आवह्निपुरकग्रामान्प्रज्वलन्क्रोधवह्निना । अधावद्विजयक्षेत्रं सोन्येद्युरथ सुस्सलः ॥१४९८॥
योद्धुमभ्यापतन्तं[1] तं चन्द्रराजोथ निर्गतः । पट्टदर्शनपालाद्यैः ससैन्यैः पर्यवर्ज्यत ॥१४९९॥
1500 निजैरुपेक्षितश्चक्रे स चिरं तत्र दुष्करम् । स्वल्पसैन्योपि संग्रामं भूरिसैन्येन शत्रुणा ॥१५००॥

१४७७. [1]) Emended; A °धम्मिल°. १४८०. [1]) Emended; A योधा. १४८१. [1]) Emended; A क्षतायुः°. १४९१. [1]) Emended; A राज्ञो नन्दा°. १४९९. [1]) Emended; A योद्धुमस्याप°.

अक्षोटमल्लः समरे तत्र मल्लश्च चाचरिः । अगातां राजगृह्यौ द्वौ स्वर्गस्त्रीभोगभागिताम् ॥१५०१॥
रजोन्धकारे छन्नेन्दुद्योतिन्यालिङ्गितो हतः । चन्द्रराजः सुरस्त्रीभिरिन्दुराजो[1]स्य चानुग[2]ः ॥१५०२॥
तस्मिन्नपि हते वीरे चक्रे हर्षमहीभुजः । आशारविन्दिनीमूलकन्दनिर्दलनं विधिः ॥१५०३॥
पट्टादयः प्रविश्याथ विजयेशाङ्गनं भयात् । प्रविष्टे सुस्सले देशं द्वारं दत्तार्गलं व्यधुः ॥१५०४॥
आस्थानीयः परं पद्मनामा युद्ध्वा हतो बहिः । लक्ष्मीधरो मर्तुमिच्छुर्बद्ध्वा नीतः स डामरैः ॥१५०५॥ 1505
विजयेश्वरगञ्जाग्रसौधारूढोथ सुस्सलः । अधो ददर्श तान्सर्वान्पशूनिव भयाकुलान् ॥१५०६॥
धूर्तः स दत्तमध्यस्थो हसन्नानीतवान्पुनः । पट्टदर्शनपालौ द्वौ तेषां पूर्वं निजान्तिकम् ॥१५०७॥
निःश्रेण्यभावादारोढुमक्षमौ सुस्सलानुगैः । तौ मृताविव निर्बद्धपाणी रज्ज्वाधिरोपितौ ॥१५०८॥
तयोर्विदेशगमनं व्रीडादर्थायमानयोः । प्रतिश्रुत्याकरोद्धीमान्सुस्सलो म्लानिमार्जनम् ॥१५०९॥
स्निग्धोक्त्या भृष्टमांसादिभोगैस्तस्याग्रतस्तयोः । तस्मिन्नेवाह्नि मन्दत्वं विदेशौत्सुक्यमाययौ ॥१५१०॥ 1510
केनाप्यधिष्ठितश्चक्रे परेद्युर्यत्स सुस्सलः । जाने विश्वसृजोप्यङ्गरोमाञ्चयति तत्स्मृतिः ॥१५११॥
जासटो नृपतिर्हर्षभूभर्तुर्मातुलात्मजः । उमाधरमुखाश्चान्ये राजानो यत्र च त्रयः ॥१५१२॥
राजपुत्रहयारोहतन्त्रिसामन्तसंततेः । न यत्र गणना काचित्सैन्येष्वष्टादशस्वभूत् ॥१५१३॥
विजयेशाङ्गनस्थानां द्वारमुत्पाट्य सोविशत् । एकाक्येवान्तरं तेषां सासिराक्षेपरूक्षवाक् ॥१५१४॥
स तत्र साक्षिणं कृत्वा क्षमावान्विजयेश्वरम् । प्रतिश्रुत्याभयं तेभ्यः प्रणतेभ्यो विनिर्ययौ ॥१५१५॥ 1515
पुनः सौधाग्रमारूढस्तान्सर्वानर्पितायुधान् । रज्जुबद्धकरान्भृत्यैरानिनाय ततोन्तिकम् ॥१५१६॥
स्वर्णरू[1]प्यत्सरुश्रेणिपूर्णायुधपरिष्कृता । कीर्णपुष्पोपकारेव सुस्सलास्थानभूरभूत् ॥१५१७॥
विन्यस्य पशुपालानां पशूनिव स तान्करे । संरक्षितुं डामराणां त्र्यहं तत्राकरोत्स्थितिम् ॥१५१८॥
ततः सुवर्णसानूरग्रामं स प्राप्य बन्धनात् । पट्टदर्शनपालौ द्वावौज्झीद्देशान्तरोन्मुखौ ॥१५१९॥
पट्टः शूरपुरं प्राप्तो भार्ययागतया गृहात् । संसृष्टमानोप्यस्मार्षीदल्पसत्त्वो दिगन्तरम् ॥१५२०॥ 1520
यावन्मात्राप्यौचिती सा विदेशौन्मुख्यलक्षणा । द्रोग्धुर्दर्शनपालस्य पट्टमैत्र्या विसूत्रिता ॥१५२१॥
अहंपूर्विकया राज्यं जिघृक्षुरथ सुस्सलः । नगरासादनादैच्छदभिसंधातुमग्रजम् ॥१५२२॥
समानप्रायवयसो[1]ः सर्वदोद्दामयोरभूत् । यस्माज्ज्येष्ठकनिष्ठत्वं प्रक्रियारहितं तयोः ॥१५२३॥
द्वित्रेष्वहःसु यातेषु क्रामंस्तां तां भुवं बली । उदतिष्ठद्राजधान्याः सविधादेव सुस्सलः ॥१५२४॥
निर्दग्धुं कलशा[1]— तत्प्रस्तुतं भूपतेः सुतः । बुप्पापराभिधो भोजदेवो योद्धुं विनिर्ययौ ॥१५२५॥ 1525
आत्मवच्छङ्कमानेन कुमाराणां प्रदुष्टताम् । यो भाव्यर्थबलात्पित्रा हतौजा विदधे सदा ॥१५२६॥
कृतो गत्यन्तराभावात्तदानीं तु निरङ्कुशः । केषु केषु न युद्धेषु योधानामग्रणीरभूत् ॥१५२७॥
प्रपितामहतुल्यः स स्याच्चेत्प्रागेव वर्धितः । कुर्यादुत्साहसंपन्नो निर्दायादा न किं दिशः ॥१५२८॥
नानीतिविन्नाम कश्चित्प्रयोगस्तु विहीयते । अस्त्रविल्लभ्यते सर्वो विषयज्ञस्तु दुर्लभः ॥१५२९॥

---

१५०२. 1) Thus corr. by $A_1$ from °भिर्नन्द्रराजो°.—2) Thus corr. by $A_1$ from चात्मजः. १५१७. 1) Emended; A °रूप्य°. १५२३. 1) Emended with C; A वयसो. १५२५. 1) Thus $A_1$; C कलशाख्यं; doubtful.

1530 स राजसूनुरुद्दामविक्रमस्य रिपोरभूत् । अत्युद्दामोधिकं जातस्तिमेरिव[1] तिमिंगिलः ॥१५३०॥

कृतघ्नभावं पितरि प्रपन्ने विगर्हणां नार्हति तत्प्रसूतिः ।
कल्की[1]भवेच्चेत्तिलमुज्झ्यते किं तैलेन दत्तः कुसुमाधिवासः ॥१५३१॥

देवेश्वरात्मजः पित्थः पार्थिवेनाधिगौरवम् । वर्धितोप्यभजत्पापः प्रतिपक्षसमाश्रयम् ॥१५३२॥

ततस्तदात्मजो मिल्लः प्रस्थिते सुस्सलाहवे । नृपेणार्थायमानोश्वं खेदात्सावज्ञमीक्षितः ॥१५३३॥

1535 ज्ञास्यस्यद्यान्तरं राजन्ममेत्युक्त्वा विनिर्गतः । खड्गधाराजलैर्मानी म्लानिमक्षालयद्व्रणे ॥१५३४॥

सर्वनाशादभूद्दुःखं तथा न हृदि भूपतेः । तदन्तरापरिज्ञानात्कृतज्ञस्य यथाधिकम् ॥१५३५॥

विभवैर्नित्यसंमूढा जानते त्वन्तरं नृपाः । तदा शक्या यदा तेषां प्रलापैरेव सत्क्रिया ॥१५३६॥

भोजेन निर्जितानीको विद्रुतः सुस्सलो रणात् । लवणोत्सं पलाय्यागाद्द्विर्दर्शितगतागतः ॥१५३७॥

प्रत्यावृत्तस्ततो भोजस्तीव्रातपकदर्थितः । उद्यानान्तस्तनुं तल्पे पित्रा सह मुहुर्जहौ ॥१५३८॥

अथोत्तरेणोदतिष्ठन्नादः पारान्नृपौकसः । ज्यायान्मल्लात्मजः प्राप्तः सेतुराच्छिद्यतामिति ॥१५३९॥

1540 सुस्सलेन हतं राज्यं नाद्यायासि द्रुतं यदि । स दण्डनायकेनाभूत्संदिष्ट इति पापिना ॥१५४०॥

अतो जवेन चाविक्षत्प्रथमं चावधीन्मृधे । नरेन्द्रेश्वरदेवाग्रवर्तिनं देवनायकम् ॥१५४१॥

अथोज्जगाम स्थामस्थः सह व्यूहेन सादिनाम् । नगराधिकृतो नागस्तस्याग्राङ्कूरिसैनिकः ॥१५४२॥

यत्रास्थां पार्थिवोबध्नात्प्रधानपृतनान्विते । बभार नोच्चलाशङ्कां सुस्सलाहवनिर्गतः ॥१५४३॥

अल्पसैन्यो मल्लसूनुर्यात्रत्तस्मादशङ्कत । अपनीतशिरस्त्राणस्तावत्स तमवन्दत ॥१५४४॥

1545 मण्डलेश्वरवत्तं स प्रियं शत्रोरविश्वसन् । ऊचे स्ववेश्म याहीति स च पापस्तथाकरोत् ॥१५४५॥

तस्य द्रोहफलं दृष्टमेतस्मिन्नेव जन्मनि । मण्डले यदनन्यस्मिन्भिक्षित्वा जीवितं जहौ ॥१५४६॥

ततो राजा सरित्तीरं प्राप्तः प्रैक्षत डामरान् । सेत्वग्रे श्यामविकृतान्दावदग्धान्द्रुमानिव ॥१५४७॥

बलक्षवारवाणस्य तेषां मध्ये वपुर्बभौ । परं जनकचन्द्रस्य शुक्रस्येव तमोन्तरे ॥१५४८॥

महासेतुः स घटितो राज्ञा नौभिः स्वसिद्धये । पर्यवस्यन्विधिवशाच्छत्रूणां सिद्धये पुनः ॥१५४९॥

1550 अथारुरुहुरादाय वह्निं हर्म्यचतुष्किकाम् । शतद्वारे मर्तुकामा देव्यः शाहिसुतादिकाः ॥१५५०॥

लोको विरक्तः सेत्वग्रे दायादैः सह संगरम् । ददर्शाश्वयुजीलागिमिव निर्विक्रियः प्रभोः ॥१५५१॥

विजये सावशेषेसौ[1] वह्निदानोद्यताः प्रियाः । अनिशं वारयन्राजा सेत्वग्रे रणमग्रहीत् ॥१५५२॥

अथ विन्यस्तवर्माणं राजसेनागजं शरैः । सेतोर्जनकचन्द्राद्याः प्रमुखस्थमताडयन् ॥१५५३॥

स विद्धो मर्मसु शरैः पूत्कारोद्गारकृद्गजः । स्वचमूमेव चरणैरमृद्नाद्विमुखीकृतः ॥१५५४॥

1555 विधिनेव विरुद्धेन सिन्धुरेण कदर्थिता । भ्रश्यत्पत्तिहयारोहा समपद्यत वाहिनी ॥१५५५॥

सेतुं तीर्णस्ततो वैरिसैनिकैर्विमुखीकृतः । शतद्वाराङ्गनं त्रस्तः साश्वारोहोविशन्नृपः ॥१५५६॥

उदात्तवेषर[1]हितो रहोपि ददृशे न यः । भुञ्जानस्यापि यस्यास्यमुद्रा नैव व्यभाव्यत ॥१५५७॥

---

१५३०. [1]) Emended with C; A जाता तिमेरिव. १५३१. [1]) Emended; A शङ्की°, corr. by later hand into शल्की°. Cf. Böhtlingk, *Sanskrit Wörterbuch in kürzerer Fassung*, vi. 214 *b*. १५५२. [1]) Emended; A सावशेषोसौ. १५५७. [1]) Emended; A °वेशर°.

स भयद्विगुणार्कांशुस्वेदप्रस्विन्नविग्रहः । पुनः पुनः क्षिप्यमाणस्रस्तवर्मांसयोर्निजैः ॥१५५८॥
अनवस्थितपार्ष्ण्यन्ताघातप्रचलितं हयम् । निरोद्धुं बहुशः कर्षन्नष्टवल्गाग्रहं करम् ॥१५५९॥
खल्वाटशीर्षपर्यन्तलम्बिनीः कुन्तलच्छटाः । प्रापयञ्श्रवणोपान्तं करेण गलितासिना ॥१५६०॥ 1560
लडत्प्रलम्बनिर्भूषश्रोत्रपालिलताच्छलात् । कालाहिनेव मूर्तेन वेष्टितोच्छुष्ककन्दरः ॥१५६१॥
निस्ताम्बूलतयोच्छुष्कौ जतुपीताविवासकृत् । ओष्ठावुत्क्षिप्य कृच्छ्रेण विह्वलो जिह्वया लिहन् ॥१५६२॥
कनीनिकासक्तरेणु क्षामधूसरमाननम् । उत्तानीकृत्य पृष्ठस्थाः पश्यन्दीनमनाः प्रियाः ॥१५६३॥
परिभ्रमन्नङ्गनान्तस्त्रस्तः स ददृशे जनैः । वह्निदानोद्यतास्ताश्च वारयन्करसंज्ञया ॥१५६४॥
मल्लराजस्य वेश्माभूद्राजधान्यन्तिकेपि यत् । तीर्त्वा जनकचन्द्रेण तत्र वह्निरदीयत ॥१५६५॥ 1565
राजधान्युन्मुखं दृष्ट्वा ज्वलन्तं वह्निमागतम् । भेजे पलायनं भोजो राज्यं निश्चित्य हारितम् ॥१५६६॥
स शूलैर्विद्विषां भीमैर्नडैरिव तिरोहितम् । द्वारं भित्त्वा तुरंगस्थः प्राङ्गनान्निर्ययौ बहिः ॥१५६७॥
पञ्चषैः सादिभिः सार्धं लोहरौन्मुख्यमाश्रितः । प्रतस्थे सेतुमुत्तीर्य सिंहराजमठाग्रगम् ॥१५६८॥
यातस्य दृक्पथात्सूनोः सास्रुरालोकयन्दिशम् । राजाश्ववारैः सहितो वेश्मनां बहिरभ्रमीत् ॥१५६९॥
अत्रान्तरे मर्तुकामास्त्रातुं काश्चिन्नृपाङ्गनाः । अश्मभिस्तत्परिजनैरभज्यत चतुष्किका ॥१५७०॥ 1570
शाहिपुत्र्यस्तदज्ञात्वा शत्रवः पतिता इति । मत्वा चतुष्किकाशृङ्गे ततोग्निमुददीपयन् ॥१५७१॥
वास्तव्या डामराश्चाथ घ्नन्तोन्योन्यमुदायुधाः । ज्वलतः क्ष्मापतिगृहाद्भाण्डागाराद्यलुण्ठयन् ॥१५७२॥
केचित्तत्र वधं प्रापुर्विपदं केचनात्यजन् । अदृष्टवस्तुसंप्राप्तिः केषांचिद्धास्यदाभवत् ॥१५७३॥
सितेयं शर्करेत्येकः कर्पूरं वदनेक्षिपत् । ततः सरिति तद्भाण्डं निर्दग्धवदनो व्यधात् ॥१५७४॥
पामरैः स्वर्णचित्राणि कैश्चित्स्वर्णग्रहेच्छया । विनिर्दग्धानि वासांसि विचितं भस्म चादरात् ॥१५७५॥ 1575
अविद्धमौक्तिकस्तोमः सिततण्डुलविभ्रमात् । क्वचित्पामरनारीभिर्घरट्टेषु विचूर्णितः ॥१५७६॥
वसन्त्यदृश्ये देशेस्मिन्खलीकारेण तादृशा । एवं विडम्बिता लक्ष्मीर्न पुनः क्वाप्यदृश्यत ॥१५७७॥
विद्याधरीरिवोदात्तवेषाः क्ष्मापतिसुन्दरीः । हरन्तो डामराः क्रूरा दृश्यन्ते स्म पदे पदे ॥१५७८॥
वसन्तलेखाप्रमुखाः सस्नुषास्तत्र चक्रिरे । निर्यातशेषाः स्वान्देहान्राज्ञ्यः सप्तदशाग्निसात् ॥१५७९॥
गृहाणां दह्यमानानामश्रूयत चटत्कृतिः । गाढोष्मक्वथमानाभ्रसिन्धुघोषप्रतीतिकृत् ॥१५८०॥ 1580
श्रीपद्मश्रीप्रपापार्श्वस्थितस्तद्वीक्ष्य पार्थिवः । आर्षं श्लोकमिमं शोकात्स्मृत्वापाठीत्पुनः पुनः ॥१५८१॥
प्रजापीडनसंतापात्समुद्भूतो हुताशनः । राज्ञः कुलं श्रियं प्राणान्नादग्ध्वा विनिवर्तते ॥१५८२॥
दग्ध्वाथ राजधानीं तामुच्चलो डामरान्वितः । अत्यक्तसैन्यं वीक्ष्यारिं पारमेवातरत्पुनः ॥१५८३॥
ततो युद्ध्वा मर्तुमिच्छन्निन्ये राजाकुलात्मताम् । उच्चावचैर्मतिद्वैधैः पदातीनां क्षणे क्षणे ॥१५८४॥
गच्छन्ननन्तपालादिराजपुत्रधिया मृषम् । दण्डनायकवाक्येन न्यषिध्यत पदे पदे ॥१५८५॥ 1585
युध्यस्व लोहरं वापि याहीत्यूचे च चण्पकः । प्रयागस्योत्तरः पक्षः प्रत्यभान्नाग्रिमः पुनः ॥१५८६॥

---

१५७१. 1) Emended; A °स्तश ज्ञात्वा. १५७६. 1) Emended; A °स्तोमसित°. १५७७. 1) Emended; A वसस्यदृश्ये.
१५७८. 1) Emended; A °वेशाः. १५८०. 1) Emended; A °श्रूयन्त. १५८६. 1) च wanting in A; supplied with R C.

वार्तामबुद्ध्वा पुत्रस्य नृपतिर्व्याकुलीभवन् । पदवीं भोजदेवस्य याहीत्याह स्म चण्पकम् ॥१५८७॥
प्रयागमात्रानुचरो राजन्संपत्स्यसे क्षणात् । तस्मान्मामपि मा त्याक्षीरित्यूचे तं स निःश्वसन् ॥१५८८॥
सोन्तर्बाष्पस्तं बभाषे निर्द्रोहोसीति कथ्यते । त्वयाप्यस्मिन्क्षणे कस्मात्तस्मादुल्लङ्घ्यते वचः ॥१५८९॥
1590 विना पुत्रं न पश्यामि सार्कोपि दिवसे दिशः । त्वं तस्मिन्नङ्कसंवृद्धे न मन्युं कर्तुमर्हसि ॥१५९०॥
अश्वानिमित्तं कलहस्तेष्वेव दिवसेष्वभूत् । मन्त्रिणो राजपुत्रेण तेन तस्याभिमानिना ॥१५९१॥
गिरा प्रभोरुपालब्धस्तदागूरणगर्भया । स लज्जानम्रवदनो राजपुत्रानुसार्यगात् ॥१५९२॥
पञ्चाशताश्ववारैः स भ्रातृभृत्यादिभिः समम् । उत्तीर्णः सरितः पारमात्मना पञ्चमोभवत् ॥१५९३॥
भ्रातृद्वये[1]श्ववारे च शेषा[2]राजात्मजे पथि । हताश्वे पतिते सोभूद्धनकेनान्वितो भ्रमन् ॥१५९४॥
1595 अनाप्नुवन्राजसूनोर्वार्तां वा वर्त्मनाप्यटन् । गलितेहनि संप्राप वितस्तासिन्धुसंगमम् ॥१५९५॥
एवमाप्तान्परान्पुत्रमन्वेष्टुं प्राहिणोन्नृपः । अन्येपि तन्मिषं लब्ध्वा तस्य पार्श्वादवाचलन् ॥१५९६॥
उत्कोचादायिना क्रुद्धं राजपुर्यादिविग्रहे । योग्यानसहता भृत्यान्नि[1]ःसारः कटकः कृतः ॥१५९७॥
लोहरप्रस्थितौ विघ्नं राज्ञा[1] पुत्रस्य कारितः । प्रवेशितः पुरं वैरी राजन्यन्याहवाकुले ॥१५९८॥
सर्वस्वध्वंसिना येन स एव नृपतेरभूत् । तदाप्युचितकर्तव्यनिषेद्धा दण्डनायकः ॥१५९९॥ तिलकम्[1]॥
1600 राज्ञः कृत्स्नावसन्नस्य शृण्वतो बहुमन्त्रितम् । नैकत्र रूढिः कर्तव्ये क्वाप्यधीरधियोभवत् ॥१६००॥
सर्वैर्यथा निखिलरन्ध्रमुखेन वंशः संपूरितो न खलु शब्दमपाकरोति ।
तैस्तैस्तथा बहुपथप्रचयेन मन्त्रः संकल्पितः किल न निश्चयमभ्युपैति ॥१६०१॥
भाग्यक्षयस्यैतदेव लक्षणं प्राकृतोपि यत् । अपृष्टः कथयेद्धाष्टर्यान्मन्त्रं स्वहृदयोचितम् ॥१६०२॥
त्रैलोक्यनाम्ना सूतेन शंसता दण्डनायकम् । निरोध्य वल्गामित्यूचे भूयः क्ष्माभृद्रणोन्मुखः ॥१६०३॥
एकाङ्गैः साश्ववारैः प्राग्जिगाय त्व[1]त्पितामहः । तद्वच्छामोक्षपटलोपान्तं तत्संग्रहेच्छया ॥१६०४॥
1605 पदातिप्रायसैन्यांस्तान्निहन्मः संहतान्रिपून् । पश्चान्निपत्य तैः साकं श्येना इव विहंगमान् ॥१६०५॥
ततश्चिचलिषावेव राज्ञि तत्कटको दिशः । सवृष्ट्यम्बुहतो रङ्गप्रेक्षिलोक इवागमत् ॥१६०६॥
परिवितस्तां प्राप्तेभ्यः पाथेयायात्मजन्मनः । स शो[1]याराजजन्मभ्यो रत्नग्रैवेयकाद्यदात् ॥१६०७॥
आरामिकैस्तैः संप्राप्ते राजचिह्ने क्षणादिव । तेजःस्फारोर्जितो राजा गतश्रीर्ददृशे जनैः ॥१६०८॥
पदे पदे भ्रश्यमानसैन्योक्षपटलादिषु । स्थानेषु चाभ्रमीत्कश्चिन्न च तस्यापदन्तिकम् ॥१६०९॥
1610 संश्रयार्थ्यथ बभ्राम सायं वेश्मानि मन्त्रिणाम् । प्रवेशं प्रददौ चास्य न कोपि द्वारि तस्थुषः ॥१६१०॥
प्रायोपवेशकुशलाः शक्तास्त्वन्ते न कुत्रचित् । मिथ्यासंभावनाभूमिर्भूपानां ब्रह्मबन्धवः ॥१६११॥
ये केपि देशे सन्त्यस्मिंस्तद्गेहेष्वास्थया भ्रमन् । प्रविविक्षुर्गृहान्प्राप कपिलाख्यस्य मन्त्रिणः ॥१६१२॥
तस्मिंल्लोहरकोट्टस्थे तत्पत्न्या स्थातुमर्थितः । नैभिश्च कोट्टं गन्तुं न प्राविक्षद्दैवमोहितः ॥१६१३॥

---

१५९४. [1]) Emended; A भ्रातृद्वारे.—[2]) Thus A; cf. vii. 1607. १५९७. [1]) Emended; A °न्निसारः. १५९८. [1]) Emended; A राजपुत्रस्य. Cf. vii. 1453. १५९९. [1]) $A_1$ writes here ३ instead of तिलकम्. १६०४. [1]) Emended; A प्राग्जिगायन्तत्स्सिता°; C °गाय तत्पिता°. १६०७. [1]) $A_1$ शोया – – राजन्मभ्यो; ज subsequently supplied by $A_1$ or later hand; but comp. शोषाराजात्मजे. vii. 1594.

आर्तस्य तस्य तत्पुत्रैः पितृवद्द्रोहकारिभिः । ऋणिकैरुत्तमर्णस्य स्वं निःस्वैरिव गोपितः ॥१६१४॥

सदोषोस्मीति सोज्ञासीत्स्वयं शृण्वन्विगर्हणाम् । तदैव गोपिताशेषकृत्यो दुर्मन्त्रिभिः पुरा ॥१६१५॥ 1615

गृहीतसर्वनैराश्यः पार्श्वस्थेष्वप्यविश्वसन् । अभूत्प्रद्युम्नमुत्तीर्णो नितरां विरलानुगः ॥१६१६॥

प्रख्यापयन्तः संभूतिं षट्त्रिंशति कुलेषु ये । तेजस्विनो भास्वतोपि सहन्ते नोच्चकैः स्थितिम् ॥१६१७॥

तेप्यन्तेनन्तपालाद्या राजपुत्रास्तमत्यजन् । सान्द्रतां दधति ध्वान्ते स्थगिताश्वाः पदे पदे ॥१६१८॥[1]

वाहनाज्जोहिलमठोपान्तं प्राप्यावतीर्णवान् । स दण्डनायकेनापि तत्यजे सानु[1]जन्मना ॥१६१९॥

इहास्मच्छ्वशुरावासस्तत्र वस्तुमिमां निशम्[1] । वीक्ष्य ते स्थानमेष्यामीत्युक्त्वा व्याजेन सोचलत् ॥१६२०॥ 1620

यियासोरनुजं तस्य पाथेयार्थं प्रयागकः । ययाचेङ्गदमस्मै स प्रादात्सक्तून्न तत्[1]पुनः ॥१६२१॥

एकांशुकावशेषश्रीस्ततो वा शेषजीवितः । प्रयागशेषानुचरो नृपतिः समपद्यत ॥१६२२॥

सूदश्चणपकभृत्यस्य जेलकाख्यस्य तत्क्षणम् । मुक्तो नामान्तिकं प्राप्तो नृपतेराप्ततामगात् ॥१६२३॥

उदीपविहितैः खातैरग्रे दुःसंचरा क्षितिः । भ्राम्यतस्तानुवाचेति नारी काचिद्गृहान्तरात् ॥१६२४॥

ततस्तीरे वितस्ताया निषण्णेस्मिन्प्रयागकः । गन्तुं जयपुरं कोट्टमाजुहाव स नाविकान् ॥१६२५॥ 1625

स हि प्राक्संविदं चक्रे तत्रत्यैः सह शस्त्रिभिः । नृपं प्रेयाश्रयं नेतुं भीमादेवस्य[1] मन्दिरम् ॥१६२६॥

उच्चलाश्रयिणाप्यूचे भीमादेवेन येन सः । राज्ञोनुगो गमिष्यामि प्रविष्टस्योपवेशनम् ॥१६२७॥

नौचरैराहृतां नावमारुरोह न भूपतिः । नाशोन्मुखः समासन्नदृष्टिपातभयाकुलः ॥१६२८॥

पर्यापतत्कालकरस्थभोगिसंदर्शनेनेव मतिप्रदीपः ।
क्षिप्रं प्रशान्त्युन्मुखतामुपैति विनाशकालेषु शरीरभाजाम् ॥१६२९॥

तस्मिन्द्रोहसुभिक्षेपि यस्य मानवतः परम् । अनन्यालोकिनी दृष्टिर्भेजे कुलवधूव्रतम् ॥१६३०॥ 1630

नीलाश्वीयः स बिम्बाख्यो डामरै[1]र्मिलितोहितैः ।
तदापि प्रययौ राज्ञो विस्मृतिं संश्रयार्थिनः ॥१६३१॥ युगलकम् ॥

ततः प्रावर्तत त्यक्तुं वारि वारिमुचां गणः । क्षमामिव क्षालयितुं द्रोहस्पर्शेन दूषिताम् ॥१६३२॥

भूर्निर्जना वृष्टिपातस्तमिस्रा दुःसहायिता[1] । वैरिभीतिरिति प्राभूत्किं किं तस्य न दुःखदम् ॥१६३३॥

इति वृत्तानुरोधेन धिग्दुष्कर्मविधायिनाम् । अस्मर्तव्यमपि व्यक्तं नाम याहिष्यतेधुना ॥१६३४॥

सोमानन्दाभिधानस्य पूज्याः सिद्धस्य देवताः । सोमेश्वराभिधाः सन्ति काश्चित्पितृवनान्तरे[1] ॥१६३५॥ 1635

तल्लाञ्छिताङ्गना तुङ्गतरुप्रच्छन्नवाटिका । अभूद्गुणाभि[1]धानस्य कुटी क्षुद्रतपस्विनः ॥१६३६॥

वारस्त्रियां[1] स विरहभुजंगीतिप्रसिद्धया । भिक्ष्वाख्यया समं भेजे चेष्टितं कुट्टिनोचितम् ॥१६३७॥

तस्य प्रतापगौरीशदेवागारान्तिकस्थितेः । कुटीं मुक्तेन तां निन्ये क्ष्माभृद्रस्तुं स तां क्षपाम्[1] ॥१६३८॥

मुक्तमालम्ब्य नृपतिस्तमालम्ब्य प्रयागकः । यान्ति स्म विद्युद्द्योतेन क्ष्मां पश्यन्तोन्तरान्तरा ॥१६३९॥

निरुष्णीषोङ्गसंस्यूतक्लूतवासाः स्खलन्नृपः । स तां प्रयागमुक्ताभ्यां कथंचित्प्रापितः कुटीम् ॥१६४०॥ 1640

---

१६१८. [1]) $A_1$ writes here ३ (instead of युग्मम्?). १६१९. [1]) Emended; A सोनुजन्मना. Cf. vii. 894. १६२०. [1]) Emended; A निजम्. १६२१. [1]) Emended with C; A तं पुनः. १६२६. [1]) Emended; A भूमादेवस्य. १६३१. [1]) Emended; A डामरामि°. १६३३. [1]) Thus A. १६३५. [1]) Thus $A_3$; $A_1$ °वनान्तिके. १६३६. [1]) Thus $A_3$; $A_1$ अभूच्छिन्नाभि°. १६३७. [1]) वारस्त्रिया supplied by $A_3$ in space left by $A_1$. १६३८. [1]) Emended; A क्षमम्.

तदा कुमन्त्रिनिष्कृष्टं स व्यापद्वारणक्षमम् । शोचन्सस्मार कन्दर्पं रुद्रं दैत्यमिवोत्पलः ॥१६४१॥
प्राकारमूर्ध्ना मुक्तेन प्रविष्टेन हतार्गलाम् । नृपः कुटीप्राङ्गणोर्व्यां विवेशास्थिततापसाम् ॥१६४२॥
विशतोऽस्मक्षतः पादस्तस्यासृग्दक्षिणोऽत्यजत् । मेने तेनानिमित्तेन स मृत्युं समुपस्थितम् ॥१६४३॥
कुद्यामर्गलरुद्धायां निषण्णस्याङ्गने ययौ । रात्रिर्भीतिमतो[1] भीमा तस्य घोराभ्रमालिनी ॥१६४४॥
1645 पङ्कोपलिप्तः पङ्काङ्कस्थण्डिलस्थो निनाय ताम् । दासकम्बलिकाच्छन्नगात्रो वृष्टयुत्तरां निशाम् ॥१६४५॥
विसस्मारान्तरा दुःखमासीनप्रचलायितैः । निर्निद्रस्त्वभवच्छ्वभ्राद्भ्रयन्निव संमाकुलः ॥१६४६॥
कोऽहं केनाभिभूतोऽद्य क्व वर्ते कोनु गोऽधुना । किं कृत्यमिति निध्याय मुहुर्मुहुरकम्पत ॥१६४७॥
हतं राज्यं प्रिया दग्धा भ्रष्टः सूनुरबान्धवः । जातोऽस्म्येकाक्यपाथेयो लुठन्भिक्षाभुजोऽङ्गने ॥१६४८॥
इत्येकैकं च निध्याय दुःखं नैक्षिष्ट सोपरम् । प्राप्तावसादं शोचन्तमात्मतुल्यं कथास्वपि ॥१६४९॥ युग्मम् ॥
1650 भोजस्तु वाजिभिर्द्वित्रैरवशिष्टैः समं व्रजन् । हस्तिकर्णान्तरं प्राप निर्गत्य नगरान्तरात् ॥१६५०॥
व्रजतस्तस्य धीरासीन्नियतं पञ्चषैर्दिनैः । पुनः संप्राप्नुयां राज्यं यदीन्द्रोऽपि भवेद्रिपुः ॥१६५१॥
गर्भवास इव पौरुषे स्फुरन्किं न कर्म पुरुषश्चिकीर्षति ।
कर्मवायुरिव संस्पृशन्हठान्मूढमेव कुरुते तु तं विधिः ॥१६५२॥
मातृभिर्दत्तपाथेयं भृत्यं नागेश्वराभिधम् । प्रतीक्षमाणश्चक्रे स रङ्गवाटान्तरे स्थितिम् ॥१६५३॥
शून्ये देवगृहे तत्र तिष्ठञ्श्रुत्वा तमागतम् । स निर्ययौ तेन तस्मिन्निःशङ्कं प्रहतं पुनः ॥१६५४॥
1655 तत्र प्रादुष्कृतद्रोहे क्षत्रधर्मादविच्युतः । राजपुत्रः स यच्चक्रे न तत्कस्याद्भुतावहम् ॥१६५५॥
स सिंह इव संहारं कृत्वा युधि विरोधिनाम् । अस्राङ्गरागलिप्ताङ्गो वीरशय्यामभूषयत् ॥१६५६॥
भ्रातास्य मातुलापत्यं विपेदे पद्मकाभिधः । खेलो लालितवच्चैव संख्येसंख्यपराक्रमः ॥१६५७॥
मठं सूर्यमतीदेव्याः शर्वर्यामु लोविशत् । भ्राताप्यस्य रणश्रान्तो लवणोत्सा[illegible]समाययौ ॥१६५८॥
हतं भोजं श्रुतवतोर्हर्षमात्रे स्थिते तयोः । मनस्युत्खातशूलेऽभिरेवैका पर्यशिष्यत ॥१६५९॥
1660 प्राप्तमप्राप्तवद्राज्यं तथापि प्रत्यभात्तयोः । प्रवासे विस्मृते राज्यसुखे लब्धे च कुत्रचित् ॥१६६०॥
प्राह्णे कुतश्चिदानीतो मुक्तेनान्विष्य तापसः[1] । प्रणम्य नृपतिं चक्रे स्वकुटीं तां[1] निरर्गलाम् ॥१६६१॥
तां दंश[1]मशका[2]कीर्णामास्तीर्णतृणविष्टराम् । कृताम्बुसेकां मुक्तेन नृपतिः प्राविशत्कुटीम् ॥१६६२॥
यद्गिरा बहुमानोऽभूच्छ्रुतया भूभुजामपि । स भूभृच्चाटुकारित्वं भीतो भिक्षाभुजोऽप्यगात् ॥१६६३॥
भिक्षाकस्योचितं ग्राम्यमनुदात्तं त्रपावहम् । आलापाभ्यवहाराभ्यां तस्य शृण्वन्स विव्यथे ॥१६६४॥
1665 स भिक्षाकः प्रयागेन विक्रयायाधरांशुकम् । निजं दत्त्वा विससृजे विपणिं भोज्यसिद्धये ॥१६६५॥
कदुक्तिः कटुवागग्रे परोक्षं भेदभीतिकृत् । कुतापसो दौस्थ्यहेतुर्नृपस्यारिर्यथाप्यभूत् ॥१६६६॥
मध्याह्ने स्कन्धविन्यस्तभोज्यभाण्डकरण्डिका । तपस्विन्याप्यथानिन्ये तेन क्षुद्रतपस्विना ॥१६६७॥
भृत्यभिक्षाकयोः पूर्वं स्त्रिया अप्यथ पार्थिवः । स्वं वीक्ष्य गोचरीभूतं निराशो जीवितेऽभवत् ॥१६६८॥

---

१६४४. [1]) Emended with C; A °र्भीतिवतो. १६६१. [1]) प्राह्णे कुतश्चि, पसः, चक्रे स्वकुटीं तां, supplied by $A_3$ in space left by $A_1$. १६६२. [1]) Thus corr. by $A_2$ from $A_1$ चाषम°.—[2]) Emended; A °मषका°.

तेन प्रयागोपहृतं भोज्यं तदनुरोधतः । स्पृष्टमेव न भुक्तं तु तीव्रदुःखोल्बणात्मना ॥१६६९॥

का वार्तेति प्रयागेन प्राङ्गनस्थेन पृष्टया । तापस्या याम्यया व्यक्तमुक्तो भोजवधस्ततः ॥१६७०॥ 1670

मिथ्यैतदिति तेनार्थं कथ्यमानोपि पार्थिवः । श्रुतिं तामङ्गशकुनं परीक्ष्याबुद्ध नान्यथा ॥१६७१॥

नारोहति गिरं शत्रोरप्रियाख्यायिनोपि यत् । तस्य संववृते दुःखं निमग्नस्य तदापदि ॥१६७२॥

स शोचन्नात्मजं बाल्ये नीत्यै यां यन्त्रणां व्यधात् । आजन्म दुःखदायित्वं मेने तस्यात्मनस्तया ॥१६७३॥

हतः स समरे वृत्त्या प्रवीरस्पृहणीयया । जज्ञे तेनातिवात्सल्यादङ्कशायीव घातितः ॥१६७४॥

गात्रेषु हारान्पुत्रस्य यौवनव्यूढवक्षसि । पश्यन्नात्मनि संकल्पैर्विह्वलः सोकृताशिषः ॥१६७५॥ 1675

रक्षणीयो हतो[1] बालो वृद्धस्त्वेवं स्वजीवितम् । रक्षाम्यनुचिताचारैर्जिह्रायेति स चिन्तयन् ॥१६७६॥

एवं स पुत्रशोकेन धृतावाच्यव्यथो व्यथन् । निनाय तापसावासे द्वितीयामपि यामिनीम् ॥१६७७॥

कृतार्थनः प्रयागेन प्रयातुं भगवन्मठम् । शोकहारितधी रात्रौ न संकल्पमपि व्यधात् ॥१६७८॥

लम्बेन्दुवदनासान्द्रावश्यायाम्भोश्रुवर्षिणी । रथाङ्गाक्रन्दिनी रात्रिः सशोकेवाथ सागमत् ॥१६७९॥

क्षुत्पिपासापरिक्षामं प्रभुं वीक्ष्य स तापसः । प्रार्थ्यते स्म प्रयागेन प्रातर्भोक्तव्यसिद्धये ॥१६८०॥ 1680

उपनिन्ये विनिर्गत्य प्रविष्टस्तापसस्तयोः । सव्यञ्जनान्नपूर्णे द्वे पात्रे – – क्षणात्पुरः ॥१६८१॥

कस्यापि गृहिणो यागोत्सवादेते मयाहृते । तस्मिन्नित्युक्तवत्यूचे विनिश्वस्य प्रयागकः ॥१६८२॥

राजन्स्वामिवियोगेस्मिन्पश्य लोकस्य सुस्थताम् । स तं जगाद विहसन्किं मूढ इव भाषसे ॥१६८३॥

यो गतो गत एवासौ तत्क्षत्या नापरः क्षतः । सर्वो निजसुखापेक्षी न किंचित्कोपि शोचति ॥१६८४॥

लोकैकचक्षुषि गते परलोकमर्के लोकः स्वपित्यखिल एव सुखं गृहेषु ।
कोन्यो विचिन्तयितुमर्हति विश्वमेतत्तिष्ठेन्मया विरहमेत्य कथं किलेति ॥१६८५॥ 1685

पुत्रस्य स्नेहविश्वासः पूर्वमास्तं क्षये श्रुते । यथैकः प्रभवेन्नान्यस्तथा स्नेहोपि देहिनः ॥१६८६॥

अहमेव हतं पुत्रं श्रुत्वा जीवितजीवितम् । तिष्ठामि स्वस्थवद्यत्र तत्रान्यो निन्द्यतां कथम् ॥१६८७॥

इत्युक्त्वा विरते राज्ञि पुनर्गूढं प्रयागकः । प्रैरयत्तापसं भोज्यं कर्तुं ते भाजने त्यजन् ॥१६८८॥

ह्यस्तनव्ययशिष्टं मे पर्याप्तं नास्ति वेतनम् । यते तथापीत्युक्त्वा स सखेद इव निर्ययौ ॥१६८९॥

गोप्यं रहस्यभणितमत्यल्पहृदयातिथि । अमृतं क्षीरतमिव नाल्पसत्त्वैः सुदुर्जरम् ॥१६९०॥ 1690

कुल्यो मनोरथो नाम विप्रस्य वनवासिनः । सुहृत्तपस्विनस्तस्य तां कथामुपलब्धवान् ॥१६९१॥

राज्ञः संदर्श्य दायादं भवावो भूतिभाजनम् । इत्युक्त्वा तेन निन्ये स द्रोग्धृतां क्षुद्रतापसः ॥१६९२॥

जज्ञे भृत्येन गर्ह्येण जातः सोन्त्येन केनचित् । सदृशं यत्सदसतोर्ज्ञापकं जन्मकर्मणोः ॥१६९३॥

इल्लाराजस्तां प्रवृत्तिं बुद्ध्वा ताभ्यां न्यवेदयत् । उच्चलाय समादिक्षत्कार्ये तत्र तमेव सः ॥१६९४॥

---

१६७१. [1]) Emended; A तेनार्ध. १६७३. [1]) स्तया supplied by $A_3$ in space left by $A_1$. १६७६. [1]) Thus corr. by $A_3$ from $A_1$ हुतो.—[2]) रक्ष्याम्यनु and ताचारै supplied by $A_3$ in space left by $A_1$. १६७९. [1]) Thus corr. by later hand from $A_1$ °वदना.—[2]) Emended with C; A श्यायोम्भो°. १६८१. [1]) Two *aksharas* wanting in fourth *páda*; the *lacuna* not marked in A; C तद्वीक्षणात्पुरः. १६८६. [1]) Thus $A_1$; $A_3$ पूर्वमास्तक्षये. १६८८. [1]) प्रैरयत्तापसं supplied by $A_3$ in space lef by $A_1$. १६९२. [1]) Emended; A द्रोग्धृतां.

1695 केचित्तु भूति[1]भिश्चाख्यमिड्डाराजोपसर्पणे । कायस्थं कारणं प्राहुस्तयोस्तापसविप्रयोः ॥१६९५॥
वार्ता चेदवगीतेयं सुबहुश्रोत्रसंकुले । काले तद्भृत्यपाशस्य तस्यैव द्रोहमुख्यता ॥१६९६॥
श्वपाकस्कन्धमारूढो लब्ध्वा तास्ता विमाननाः । विपेदे यत्स कारायां युक्तं तत्तस्य कर्मणः ॥१६९७॥
क्षुत्तप्तो हर्षदेवस्तु प्रयागेनार्थितोसकृत् । प्रत्यग्रे पुत्रशोकेपि भोजनायाकरोन्मनः ॥१६९८॥
गृहीतभोजनं जानन्प्राप्तं प्राप्तं स तापसम् । तमोरैर्बहिरैक्षिष्ट नीडाच्छिशुरिवाण्डजः ॥१६९९॥
1700 अपश्यच्च कुटीं कृत्स्नां वेष्टितामेत्य शस्त्रिभिः । शुश्राव चाङ्गनद्वाराद्द्वार्यमाणार्गलाध्वनिम् ॥१७००॥
जानञ्ज्ञातं ततो द्रोहमङ्गनात्तापसाधमम् । सशस्त्रिणं मुक्तमेहीत्याह्वयन्तं व्यलोकयत् ॥१७०१॥
मुक्तं विसृज्य कृत्वा च द्वारमुद्घाटितारारि । त्यक्तभीरादधे लघ्वीं क्षुरिकामन्तिकस्थिताम् ॥१७०२॥
एकस्तत्सविधं क्रूरः साहसाहंक्रियोन्मदः । आरुरोहाथ कृष्टासिधेनुः कवचितो भटः ॥१७०३॥
तं राजा संकट[1]कुटीरुद्धायामोप्यपातयत् । क्षितौ व्यायामकुशलो नावधीत्कृपया पुनः ॥१७०४॥
1705 पतितेन हतेनार्थो वराकेणामुना न मे । इत्यूचे दुरहंकारग्रस्तस्तस्मिन्नपि क्षणे ॥१७०५॥
नीध्रमुत्पाद्य निपतन्नेकोन्योप्युत्पतन्भटः । भयाद्भूमौ न्यपततां तं विलोक्योद्यतायुधम् ॥१७०६॥
पृष्ठे पूर्वं प्रविष्टस्य[1] तिष्ठन्स्थानकनिष्ठुरः । स रुरोरिव चामुण्डा रेजे दण्डाकृतिः क्षणम् ॥१७०७॥
न सिंहनादैर्नो भेरीतूर्यघोषैर्न वोन्मदैः । शस्त्रशब्दैः स शुशुभे भूपस्यान्तक्षणे रणः ॥१७०८॥
आखोर्भाण्डप्रवेशस्य बिडाला इव डामराः । परं प्रवेशितास्तस्य निःशब्दं शस्त्रिणः कुटीम् ॥१७०९॥
1710 अथान्यो नीध्रमार्गेण संप्रविष्टः प्रयागकम् । हत्वा दोष्णि च शीर्षे च राजानं समुपाद्रवत् ॥१७१०॥
राज्ञः प्रहरतः शस्त्रं वञ्चयित्वा स शस्त्रभृत् । वक्षसि क्षुरिकाघातद्वयं प्रादात्कृतत्वरः ॥१७११॥
वर्णान्महेश्वरेत्येनान्द्विरुक्त्वा गतजीवितः । पपात निहतो भूमौ छिन्नमूल इव द्रुमः ॥१७१२॥
पलाय्य संप्रविशतो योग्यश्चौरस्य यादृशः । चक्रवर्त्यपि स प्राप वधं वेश्मनि तादृशम् ॥१७१३॥
नान्यः स इव कालेस्मिन्ददृशे भूतिमान्नृपः । गर्ह्यनिर्हरणत्वं च तस्येवान्यस्य नेक्षितम् ॥१७१४॥
1715 यद्वैकेनैव संग्रामवैमुख्येनोन्नतात्मनः । सर्वप्रकारसुभगं माहात्म्यं तस्य खण्डितम् ॥१७१५॥
नेयबुद्धित्वमेवासीदथ वा तस्य दूषणम् । सर्वक्लेशावहा दोषाः कृत्स्नास्तन्मन्त्रिणां पुनः ॥१७१६॥
द्वाचत्वारिंशति[1]: साष्टमासाः यस्य वयःसमाः । स शुक्लभाद्रपञ्चम्यां हतोब्दे सप्तसप्तते ॥१७१७॥
राजा दुर्योधन इव स्ववंशच्छेदमिच्छता । सोभूज्ज्ञातकयोगेन कारितः स्वकुलक्षयम् ॥१७१८॥
तस्यासन्क्ष्मा[1]र्कजौ जीवबुधौ शुक्रोष्णगू[2] शशी । तनयामित्रजामित्रखेषु कर्कटजन्मनः[3] ॥१७१९॥

---

१६९५. [1]) Emended; A भूनिश्चा°. Cf. viii. 94. १७०४. [1]) Emended; A संकटी कु°. १७०७. [1]) Emended with C; A प्रविष्ट. १७१७. [1]) Emended; A द्वाचत्वारिंशतः. १७१९. [1]) Emended; A तस्यासी क्ष्मा°.—[2]) Emended with C; A °ष्णगी.—[3]) $A_2$ explains this verse by the following *janmachakra*:

सिं | क | मि
कं | | वृ
तुं | | मे चं
वृं भौ श | म | मी
धं बु जी | सू शु | कुं

चन्द्रदैत्येज्यपापेषु खमदात्मजगेषु यत् । आहुः सुसंहिताकाराः कौरवादीन्कुलान्तकान् ॥१७२०॥ 1720
निर्ब्रह्मण्यो जनः कृत्स्नो देशेस्मिन्वैरिणोन्तिकम् । दस्योरिव शिरश्छित्वा स्वामिनोपि निनाय तत् ॥१७२१॥
तस्योत्तमाङ्गे भूभर्तुश्छिद्यमाने ससागरा । चकम्पे भूर्निरभ्रापि द्यौर्वृष्टिं महतीं जहौ ॥१७२२॥
तन्मुण्डे लगुडारूढे यदयुक्तं जनो व्यधात् । अभूत्तेनाभिशापेन सोग्रे दीर्घोपसर्गभाक् ॥१७२३॥
मण्डले देवबिम्बानां यथामुष्मिन्निपाटनम् । तथा नवं प्रववृते भूपतेर्मुण्डखण्डनम् ॥१७२४॥
नैक्षिष्ट तच्छिरः प्राप्तमौचित्यादुच्चलो नृपः । भूत्वा चिरमुदस्तुस्तु कारयामास वह्निसात् ॥१७२५॥ 1725
धिक्कष्टं तस्करस्येव तादृशश्चक्रवर्तिनः । नोच्चलाज्ञां विना प्राप्ता शरीरेणान्तसत्क्रिया ॥१७२६॥
भृत्यत्यक्तो नष्टवंशो गौरकाख्येन केनचित् । स काष्ठागारिणा चक्रे नभोनाथ इवाग्निसात् ॥१७२७॥
दीर्घो हर्षनृपोदन्तः सोयं कोप्यद्भुतावहः । रामायणस्य नियतं प्रकारो भारतस्य वा ॥१७२८॥
भाग्याम्बुवाहतडितस्तरलाः श्रियस्तास्तच्चावसानविरसं प्रसभोन्नतत्वम् ।
तत्रापि नैष बत मोहहताशयानां शान्तिं प्रयाति विभवानुभवाभिमानः ॥१७२९॥
तावत्यप्यवरोधिकापरिकरे नैकापि चक्रन्द तं तावत्स्वप्यनुगेषु नानुसृतवान्कोप्यास्त तीर्थे न वा ।
लोकस्य स्वसुखोपलिप्तमनसो वीक्ष्येति निःस्नेहतां निर्वेदं समुपेत्य नाश्रयति धिक्स्वान्तं वनान्ते रतिम् ॥१७३०॥ 1730
नादौ किंचिद्भवति नियतं यच्च पश्चान्न किंचिन्मध्येकस्मात्सपदि घटयन्सौस्थ्यदौस्थ्यानुरोधम् ।
निःशीर्षाङ्घ्रिर्नट इव मुहुः कोपि जन्तुर्नटित्वा नो जानीमो भवजवनिकान्तर्हितः क्व प्रयाति ॥१७३१॥
श्रीः सातवाहनकुले[1]कृत कान्ति[2]राजवंशे त्यजन्त्युदयराजकुले प्रतिष्ठाम् ।
भृङ्गं सुरैर्विरहितं जहती हिमाद्रेर्दिव्ये तटे सुरगिरेरिव वासरश्रीः ॥१७३२॥

इति काश्मीरिकमहामात्यचण्पकप्रभुसूनोः कल्हणस्य कवेः कृतौ राजतरङ्गिण्यां सप्तमस्तरङ्गः ॥
समाष्टानवतावस्यां त्र्यहोनायां महीभुजः । षडत्रोदयराजस्य वंशे जाताः प्रकीर्तिताः ॥
राजानः ६ श्लोकाः १७२३[1] ॥

---

१७२०. [1]) $A_2$ gloss शु. १७३२. [1]) Emended; A श्रीसात°.—[2]) Emended; A कान्तराज°. Cf. vii. 1285.
*Colophon.* Thus $A_1$, perhaps for १७३२. $A_1$ adds here लिखितश्चैष मया राजानकरत्नकण्ठेन.

## ॥ अष्टमस्तरङ्गः ॥

ॐ नमो विघ्नहर्त्रे ।

प्रौढाः कञ्चुकिनो जरद्वरवृषः कुब्जस्तुषारद्युतिर्नित्याप्तोपि बहिष्कृतः परिकरः सोयं समस्तोप्यहो ।
अर्धाद्यद्वसतीकृताद्भगवता चारित्रचर्याविदा सा भिद्याद्दुरितं[1] चराचरगुरोरन्तःपुरं पार्वती ॥१॥
छन्नकोपप्रसादोभूत्कंचित्[1]कालं नवो नृपः । प्राङ्मन्थादिव पाथोधिरव्यञ्जितविषामृतः ॥२॥
सोदरो डामरौघश्च तस्याभूतां भृशोन्मदौ । मेघस्येव पुरो वातावग्रहौ स्फूर्तिहारिणौ ॥३॥
यत्किंचनविधाय्यासीद्भ्राता यद्यौवनोन्मदः । राज्ञो दुष्प्रक्रिया दौःस्थ्यकरी वात्सल्यशालिनः ॥४॥
5 सोनिशं हि गजारूढो विकोशासिः[1] परिभ्रमन् । आत्तसारां महीं पीतरसां रविरिवाकरोत् ॥५॥
एकीभूतानमून्सर्वाण्डामरान्निर्दहाग्निना । इत्युक्तं तेन नोर्वीभृत्सत्त्वैकाग्रो वचोग्रहीत् ॥६॥
दस्यवो मन्त्रिसामन्ता द्वैराज्येच्छुः सहोदरः । भूर्निष्कोशेत्यभूत्किं न भूपतेस्तस्य संकटम् ॥७॥
अधिराज्याभिषेकेण सत्कृत्य भ्रातरं ततः । पातुं लोहरसंबन्धं प्राहिणोन्मण्डलान्तरम् ॥८॥
द्विरदायुधपत्त्यश्वकोशामात्यादि स व्रजन् । निनाय सर्वं वात्सल्यादनिषिद्धोग्रजन्मना ॥९॥
10 आशङ्क्य कोट्टभृत्येभ्यः प्रवेशे प्रत्यवस्थितिम् । उत्कर्षजं प्रतापाख्यं सह निन्येग्रवीच्च तान् ॥१०॥
कुर्याममुं नृपमहं प्रातिहार्यं समाचरन् । नम्राः स्वभृत्यवत्तस्थुर्भूभुजो भूम्यनन्तराः ॥११॥
दिनानि सप्त संरुद्धे मार्गे तदनुयायिनाम् । गायनः कनको लब्धान्तरो देशान्तरं ययौ ॥१२॥
वाराणस्यां विजहता निर्वेदात्तेन जीवितम् । हर्षभूभर्तृभृत्येषु व्यक्तं निन्ये कृतज्ञता ॥१३॥
ऊर्ध्वाधिरोहं दाक्षिण्याद्दस्यूनामुच्चलः पुनः । सेवास्मृत्या सुधीः सेहे चन्दनो भोगिनामिव ॥१४॥
15 तथा जनकचन्द्रेण दर्पाद्व्यवहृतं तदा । राजान्ये डामराश्चासन्यथा नष्टप्रभा इव ॥१५॥
अभयस्योरशाभर्तुस्तनयायामजीजनत् । राज्ञ्यां विभवमत्यां यं भोजो हर्षनृपात्मजः ॥१६॥
जातं मृता[1]द्वित्रिपुत्रानन्तरं गुरुभिः शिशुम् । आयुष्कामैस्तमाबद्धाभव्यभिक्षाचराभिधम् ॥१७॥
त्र्यब्दमप्यरिसंतानतन्तुत्वेनाप्रियोचितम् । ररक्ष तद्गिरा राजा राज्ञ्याश्चाङ्के समार्पयत्[1] ॥१८॥ तिलकम् ॥
तमादाय स्वयं वासौ यावद्राज्येकरोन्मनः । तावद्भ्रारेङ्गितज्ञो नीतिकौटिल्यमुच्चलः ॥१९॥
20 तुल्योत्साहासहिष्णुत्वादस्मै कुप्यन्तु डामराः । एष एवातिसत्काराद्यद्वास्तु विशदाशयः ॥२०॥
इति संचिन्त्य स द्वारदित्सां तस्योदघोषयत् । यथा विकारं प्रययुर्भीमादेव्वादयोखिलाः ॥२१॥

---

१. [1]) Thus $A_1$; $A_2$ भिन्द्याद्दु°. २. [1]) Emended; A °भूर्त्किंचित्कालं. ५. [1]) कोशासिः supplied by $A_3$ in space left by $A_1$. १७. [1]) Emended with C; A मृतं. १८. [1]) Emended with C; A समर्पयत्.

तेषां तस्य च मात्सर्यं यदा पर्याप्तिमाययौ । तदान्योन्याश्रिता भृत्याः परं चक्रुर्युयुत्सवः ॥२२॥
दिदृक्षुः क्ष्मापतिस्तेषां सेतुपृष्ठे रणं मिथः । वार्यमाणोपि सचिवैरारुरोह चतुष्किकाम् ॥२३॥
द्वन्द्वयुद्धे प्रवृत्ते तु डामरैरुभयाश्रितैः । अथ प्रारभ्यताकस्मात्संरब्धैर्दारुणो रणः ॥२४॥
सेतुद्वयाध्वना युद्धे लग्ने राज्ञि सरित्तटात् । योधा जनकचन्द्रस्य शरवर्षमवाकिरन् ॥२५॥ 25
वान्तः शराः ससीत्कारास्ते स्पृष्ट्वा[1] नृपविग्रहाः । मग्नाः स्तम्भेष्वदृश्यन्त कोपेनेव प्रकम्पिनः ॥२६॥
आकृष्य दोर्भ्यां भूपालं बलादिव ततोनुगाः । प्रविष्टा मण्डपद्वारं चक्रिरे निहितार्गलम्[1] ॥२७॥
शस्त्रं जनकचन्द्राद्या भीमादेवादयोपि ते । चतुष्किकायां चकृषुस्ततोन्योन्यं जिघांसवः ॥२८॥
तुमुले तत्र शल्याङ्गं भीमादेवानुगोभिनत् । तीक्ष्णो जनकचन्द्रस्य कालपाशात्मजोर्जुनः ॥२९॥
स वीक्ष्य स्वं क्षतं द्रोहं प्रयुक्तं भूभुजा विदन् । पादप्रहारान्विदधे क्रोधाद्वारि नृपौकसः ॥३०॥ 30
अभग्ने तत्र संत्रासात्स्नानद्रोण्यन्तरं गतम् । अधावत्कृष्टशस्त्रीको भीमादेवो जिघांसया ॥३१॥
स्तम्भच्छन्नस्तद्विलोक्य तद्गेहगणनापतिः । मध्यं जनकचन्द्रस्य कृपाणेन द्विधा व्यधात् ॥३२॥
तस्मिन्हते तदनुजौ गग्गसड्डौ प्रधावितौ । स एव करवालेनालक्षितोकृत विक्षतौ ॥३३॥
अवभज्य तरुं वज्रः सुचिरं नावतिष्ठते । उदग्रकर्मा च पुमान्निहत्याप्युन्नतं रिपुम् ॥३४॥
स हि द्विभाद्रे तत्राब्दे हर्षान्ताहादनन्तरम् । अन्यूनानतिरिक्तैर्यत्त्रिभिः पक्षैरहन्यत ॥३५॥ 35
यद्वोपकर्तुरप्येष द्रोहं यत्स्वामिनो व्यधात् । औत्कट्यात्पाप्मनस्तस्य क्षिप्रमेव क्षयं ययौ ॥३६॥
सान्तस्तोषे कोपशोकावाविष्कुर्वति कृत्रिमौ । भीमादेवः पलायिष्ट गग्गस्तु व्यश्वसीन्नृपे ॥३७॥
प्रहिते लोहरं गग्गे स्वमुल्लाघयितुं क्षतम् । त्रस्तास्तेन व्यसृज्यन्त स्वोर्वीरन्येपि डामराः ॥३८॥
उपायापकृतैः प्राप्यं[1] राज्यं दस्युभिरुज्झितम् । एवं शनैरवष्टम्भं भेजे भूपतिरुच्चलः ॥३९॥
तेनाथ लब्धस्थैर्येण दिनैरेव जिगीषुणा । त्याजिताः क्रमराज्यान्तर्हयसैन्यादि डामराः ॥४०॥ 40
ततो मडवराज्यं स प्रस्थितो विप्रियप्रियान् । डामरान्कालियमुखान्बद्ध्वा शूले व्यपादयत् ॥४१॥
इल्लाराजोपि बलवांस्तेन क्रान्तक्षितिः क्रमात् । बलैर्नगर एवोग्रैरवस्कन्देन घातितः ॥४२॥
प्राग्जन्मप्रेमसंस्कारादन्तरज्ञतयाथ वा । तस्य पुत्र इव प्रीतिर्गग्ग एव व्यवर्धत ॥४३॥
न सेहे नाममात्रं यः कण्टकानां प्रियप्रजः । नृपो गग्गाय चुक्रोध सापराधाय[1] न क्वचित् ॥४४॥
राज्यारम्भेनुयुक्तेन भीमादेवेन धीमता । उक्ते शुभावहे शिक्षे द्वे स मन्त्रवदस्मरत् ॥४५॥ 45
एकया लोकवार्तार्थं प्राह्णात्प्रभृति निर्गतः । बहिरुद्दिश्य बाह्यालीरचारीदादिनक्षयम् ॥४६॥
अन्ययो[1]त्थानशीलेन श्रुत्वा नामापि वैरिणः । अर्धरात्रेपि यात्राभिस्तेनाच्छिद्यत विप्लवः ॥४७॥
तस्यैवालुप्तधैर्यस्य राज्ञां मध्ये[1] मनस्विनः । कार्पण्यो[2]पहतं वृत्तं नाप्य[3]भूदमलीमसम् ॥४८॥
अद्योच्चलसदाचारजाह्नवीजलमज्जनात् । कुनृपोदीरणोद्भूता गिरः पाप्मापनेष्यते ॥४९॥
तेनानुपचिताङ्गेन प्रायशो विनिवारिताः । अनूरुणेव सद्दृष्टिध्वंसिनो ध्वान्तसंचयाः ॥५०॥ 50

---

२६. [1]) स्पृ supplied by $A_3$ in space left by $A_1$. २७. [1]) Emended; A निहता°. ३९. [1]) Emended; A प्राप्तराज्यं. ४४. [1]) Emended; A सापराध न क्वचित्. ४७. [1]) Thus $A_1$; corr. by later hand into अन्यायो°. ४८. [1]) तस्यैवालुप्तधैर्यस्य राज्ञां मध्ये supplied by $A_3$ in space left by $A_1$.—[2]) Thus $A_3$; $A_1$ कार्मणापहतं.—[3]) Thus $A_3$; $A_1$ नाप्राभूद°.

प्रायोपविष्टप्रमये देहत्यागप्रतिज्ञया । निबद्धया प्रत्यवेक्षां धर्माध्यक्षानकारयत् ॥५१॥
निशम्य कृपणस्यार्तं क्रन्दितं तदनिष्टकृत् । बभूव तस्य स्वात्मापि नानिग्राह्यो महात्मनः ॥५२॥
कार्यिणो यस्य वा दोषादार्ताक्रन्दितमुद्ययौ । तस्य स्वबान्धवाक्रन्दैस्तस्मिन्क्रुद्धे शशाम तत् ॥५३॥
अबलानुग्रहव्यग्रे तस्मिन्राजनि सर्वतः । वास्तव्या बलिनस्तस्थुरबलास्त्वधिकारिणः ॥५४॥
55 सोश्वैनैकश्वरन्राजेत्यज्ञात्वा कथितं जनैः । यं यं स्वदोषमश्रौषीत्तं तं त्वरितमत्यजत् ॥५५॥
येन केनापि संप्राप्तः प्राप्युपायेन पार्थिवः । अमोघदर्शनः सोभूत्कल्पवृक्ष इवार्थिनाम् ॥५६॥
सुधावर्षी प्रियालापप्रीतिदायैर्जनप्रियः । नाशकत्सेवकांस्त्यक्तुं विश्रम्भभवनेष्वपि ॥५७॥
श्लाघ्यश्रमैः प्रतिकलं तस्य सेवाविधायिभिः । प्राप्तं त्रिचतुरान्वारान्क्षणदास्वपि दर्शनम् ॥५८॥
सेव्यमानः सदाक्षिण्यः क्षणेनैव फलप्रदः । कस्यैन्द्रजालिकैरुप्तः शाखीव न बभूव सः ॥५९॥
60 वास्तव्यानां निशम्यार्तिं तेन दैन्यनिवारणम् । चक्रे पित्रेव पुत्राणां संत्यक्तेतरकर्मणा ॥६०॥
स्वसंचितानि सोन्नानि विक्रीणानोल्पवेतनैः । दुर्भिक्षमुद्गतावेव जघान जनवत्सलः ॥६१॥
निवार्य चौर्याचरणात्कृपार्द्रस्तस्करानपि । कोशाध्यक्षान्स विदधच्चकारागर्ह्यजीविकान् ॥६२॥
कः संविभाग्यश्छेत्तव्या विपदः कस्य मण्डले । इत्यन्विष्यन्सदैकैकं चारैश्चिन्तापरोभवत् ॥६३॥
तस्यैकोप्यर्थनैस्पृह्यं नाम कोपि महान्गुणः । अनुपक्तो गुणैस्तैस्तै राज्ञः पल्लवितोभवत् ॥६४॥
65 स स्थित्यै दण्डयन्दण्ड्यानघाश्लेषभयाद्धनम् । तेषां नादत्त सत्कर्म शुद्धये तांस्त्वकारयत् ॥६५॥
प्रस्तुतस्यार्थिने दातुं वस्तु तस्यैकसंख्यया । सहस्रसंख्यया दानश्रद्धागात्पूर्णतां यदि ॥६६॥
श्रूयतेर्थी यथा मह्यं देहि देहीति गां वदन् । तथास्मै देहि देहीति वदन्दाता स शुश्रुवे ॥६७॥
अनुदात्तं क्षिप्रकालं क्षीणसंख्यमसत्कृतम् । नेतृदूतादिनीतार्धं न तद्दत्तमदृश्यत ॥६८॥
उत्सवे दैन्यविज्ञप्तौ रञ्जने कार्यसाधने । आलेख्यलीनशाखीव न सोलभ्यफलोभवत् ॥६९॥
70 उत्सवे शिवरात्र्यादौ जनतां सोसिचद्धनैः । ग्रहयोगे पयःपूरैर्महेन्द्र इव मेदिनीम् ॥७०॥
ताम्बूलदानव्यसनं परार्ध्योत्सवता तथा । नाभूद्धर्षनृपस्यापि तादृक्तस्यास्त याद‍ृशी ॥७१॥
लोष्टमात्रावशेषेपि लब्धे नृपपदे व्यधात् । स दानविभ्रमांस्तान्ये धनदेनापि दुष्कराः ॥७२॥
निर्माणलोठनैर्धाम्नामजस्रं वाजिनां क्रयैः । काश्मीरिकोपि चक्रे स न मृत्तस्करसाद्धनम् ॥७३॥
अध्वन्यध्वनि योगेन प्राणविन्यासनैस्तथा । बभूव सर्वकृत्यज्ञः सोन्तरात्मेव देहिनाम् ॥७४॥
75 भोगान्राजोचितान्विप्रा भैषज्यं व्याधिपीडिताः । वेतनं वृत्तिहीनाश्च तस्मात्समुपलेभिरे ॥७५॥
पित्र्योपरागकेत्वादिदुर्निमित्तोपशान्तिषु । गोसहस्राश्वहेमादिसंभवैः सोभजद्द्विजान् ॥७६॥
नन्दिक्षेत्रे पुरं कृत्स्नं दग्धमुत्पातवह्निना । पूर्वाधिकगुणं तेन नवं राज्ये व्यधीयत ॥७७॥
श्रीचक्रधरयोगेशस्वयंभूस्थानयोजनम् । जीर्णोद्धृतिव्यसनिना कृतं तेन सुकर्मणा ॥७८॥
हर्षदेवेन यो निन्ये श्रीपरीहासकेशवः । परिहासपुरे तं स नवं नरपतिर्व्यधात् ॥७९॥

---

५३. 1) Emended ; A दोषादर्ता° ; C दोषाद्दत्ता°. ५७. 1) A विस्रम्भ°. ७१. 1) Thus $A_1$ ; $A_3$ °स्यास्तु. ७२. 1) Emended ; A °विभ्रमास्तान्ये. ७३. 1) Emended ; A काश्मीरकोपि. ७६. 1) Emended ; A °पमार्तिषु.

प्राग्वर्गितशुकावल्या भूषितो हर्षनीतया । तेन त्रिभुवनस्वामी निर्लोभेन महीभुजा ॥८०॥ 80
जयापीडाहृतं हर्षोत्पाटने प्लुष्टमग्निना । सिंहासनं नवं चक्रे स राज्यककुदं नृपः ॥८१॥
लब्ध्वा तदर्धाध्यारोहं भर्तुः प्रेम्णातिदुर्लभम् । सामान्ययापि देवीत्वं जयमत्या न दूषितम् ॥८२॥
सा ह्यानृशंस्यमाधुर्यत्यागसत्प्रियतानयैः । अस्तम्भार्तपरित्राणमुख्यैर्भव्याभवद्गुणैः ॥८३॥
लब्धभूपालवाल्लभ्या नार्यः क्रोधात्प्रजासु यत् । राक्षस्य इव भङ्गाय लावण्यललिता अपि ॥८४॥
प्रियप्रजस्यायमन्यो गुणः सर्वगुणाग्रणीः । उच्चलक्ष्मापतेरासीदर्थनैस्पृह्यशालिनः ॥८५॥ 85
जिघांसवः पापकामाः परस्वादायिनश्च ताः । रक्षांस्यधिकृता नाम तेभ्यो रक्षेदिमाः प्रजाः ॥८६॥
तेनेतिहासिनीं नीतिं श्रद्दधानेन सर्वदा । येन संपठता श्लोकं कायस्थोन्मूलनं कृतम् ॥८७॥
यत्ते विषूचिकाशूलसंन्यासेभ्यः किलेतरे । घ्नन्त्याशुकारिणो विश्वं प्रजारोगा नियोगिनः ॥८८॥
पितरं कर्कटो हन्ति मातरं हन्ति पुत्तिका । हन्ति सर्वं तु कायस्थः कृतघ्नः प्राप्तसंभवः ॥८९॥
गुणान्समर्प्य स्फुरता येनैवोत्थाप्यते शठः । वेताल इव कायस्थस्तमेवाहन्ति हेलया ॥९०॥ 90
विषवृक्षो नियोगी च यदेवाश्रित्य वर्धते । चित्रं करोति तस्यैव स्थानस्यानभिगम्यताम् ॥९१॥
तेन ते क्ष्माभुजा मानक्षतिकार्यनिवारणैः । काराप्रवेशैश्च खलाः शमं नीताः पदे पदे ॥९२॥
कार्यान्निवार्य बहुशः संहेलाद्यान्महत्तमान् । भङ्गासूत्रमयं वासः कारायां पर्यधापयत् ॥९३॥
स कार्यवेषं हास्याय सभार्यं चारणोचितम् । अकारयद्भूतभिश्[1] धावनं डोम्ब[2]योधवत् ॥९४॥
स प्रांशुर्वेष्टितश्मश्रुरुष्णीषेणोत्फलन्पुनः । शूलहस्तः सजानूरुः केषामासीन्न हास्यकृत् ॥९५॥ 95
स शीर्षदर्शनं साम्यवादवेश्याविटान्वितम् । प्रियवेश्यं कंचिदग्रे नृत्तवाद्यमकारयत् ॥९६॥
बद्ध्वान्यं शकटे नग्नं क्षुरलूनार्धमस्तकम् । अकारयत्सटान्यस्तचीनपिष्टच्छटाङ्कितम् ॥९७॥
ते कुम्भवादनैर्मुण्डमण्डनैश्चाङ्किताभिधाः । नियोगिनो भग्नमानाः सर्वतः ख्यातिमाययुः ॥९८॥
कार्यभ्रष्टा मलक्लिन्नक्षीणवस्त्रावगुण्ठनाः । सर्वार्थिनो व्यभाव्यन्त केप्यटन्तः प्रतिक्षपम् ॥९९॥
वृथावृद्धाः सुखप्राप्यं पाण्डित्यं भूर्जवल्परे । मत्वा बाला इवाचार्यगृहे प्रारेभिरे श्रुतम् ॥१००॥ 100
केप्युच्चैरट्टभिक्षाकाः सादरं स्तोत्रपाठिनः । कृतानुपाठाः स्वापत्यैः प्राह्णे लोकमहासयन् ॥१०१॥
माता स्वसा सुता भार्या स्वापि कैरप्यकार्यत । सामन्तसेवनं कार्यप्राप्त्यै सुरतसेवया ॥१०२॥
जातकस्वप्नशकुनसुलक्षणनिरीक्षणम् । कारयद्भिः शठैरन्यैर्गणकाः परिखेदिताः ॥१०३॥
पिशाचा इव शुष्कास्या रूक्षश्मश्रुकचाः कृशाः । बद्धाः परैर्व्यभाव्यन्त शृङ्खलामुखराङ्घ्रयः ॥१०४॥
नृपेण कार्यिणां दर्पलिङ्गनाशे विपाटिते । अक्ष्णोर्ज्ञातिपरिज्ञानक्षमत्वं समजायत ॥१०५॥ 105
भारतस्तवराजादिस्तोत्रपाठमशिश्रियन् । ते दुर्गोत्तारिणीविद्याजपं चोदस्रुलोचनाः ॥१०६॥
इत्थं दौःस्थ्योदये दीर्घे मज्जन्तो नित्यदुर्जनाः । तस्मिन्राजनि कायस्था व्यलोक्यन्त पदे पदे ॥१०७॥
भिन्नसंधानभूर्यर्थदानभोज्यादिढौकनैः । न हि मोहयितुं शक्ताः प्राज्ञं तं तेन्यराजवत् ॥१०८॥
तान्प्रजाकण्टकान्दुष्टान्कृतधीरकृन्तानिशम् । तैस्तैः शुचिभिरध्यक्षैः स विशामीश्वरो वशान् ॥१०९॥

---

९४. [1]) Emended ; A °द्भूतभिश्वधा°.—[2]) Emended; A डोम्भ°.

भूतेशस्य यथा पुरी हुतवहप्लुष्टा त्वदाज्ञाबलाद्भूयः स्वां श्रियमाससाद सहसा तद्वत्समस्तामिमाम् ।

110 त्वं कायस्थकुटुम्बिकॢप्तसचिवप्राया–[1] पञ्चानलीलीढामुच्चलदेव निर्वृतिसुखस्थित्या पुरीं स्वां क्रियाः ॥११०॥

शिवरात्र्युत्सवे श्लोकममुं[1] शिवरथाभिधः । विद्वान्पठंस्तेन हठात्सर्वाध्यक्षो व्यधीयत ॥१११॥

व्यवहारानभिज्ञोपि कंचित्कालमदीदृशत् । शुचित्वादार्यभाजः स क्रामन्कृतयुगस्थितिम् ॥११२॥

शीघ्रदण्डत्वमुच्चण्डतेजसस्तस्य भूपतेः । क्रूरानुद्दिश्य कायस्थान्धीमद्भिर्बह्वमन्यत ॥११३॥

न हि क्षुद्राश्वकायस्थपिशाचाविष्टवैरिणाम् । शंसन्त्यन्तरितं दण्डं दण्डनीतिविशारदाः ॥११४॥

115 चिरेण दण्डिता ह्येते कुर्युर्दण्डभयाद्ध्रुवम् । लब्धान्तराः प्राणहरं कृच्छ्रं किंचित्प्रशासितुः ॥११५॥

दण्ड्यानां दण्ड्यमानानां पुत्रस्त्रीमित्रबान्धवाः । राज्ञा विचारशीलेन न तेनोपद्रुताः क्वचित् ॥११६॥

कर्णेजपांह्लोष्टधरप्रमुखांस्तेन दुःखदैः । कर्मभिः क्लिश्नताध्वापि पैशुन्यस्य खिलीकृतः ॥११७॥

विस्मृतिं लब्धराज्यानां पूर्वसंकल्पवासनाः । प्रयान्ति प्राप्तजनुषां गर्भवासस्पृहा इव ॥११८॥

प्राग्राज्याधिगमात्किंचित्सदसद्यद्व्यचिन्तयत् । राज्ये तन्न विसस्मार जातिस्मर इवोच्चलः ॥११९॥

120 ददर्श शत्रोरद्रोहान्यान्द्रोग्धृन्वा पुरानुगान् । कर्तव्यानुगुणं तेषां प्रतिपत्तिमदर्शयत् ॥१२०॥

स्मरेन्नोपपतिः पूर्वपतिद्रोहं कुयोषितः । पूर्वस्वाम्यरितां चाद्य कुभृत्यस्येश्वरो जडः ॥१२१॥

शेषाहिदेहान्मेदिन्या समं प्रज्ञापि राज्यभूत् । तस्मिन्परिणता नूनं कृत्याकृत्यविवेक्तरि ॥१२२॥

तथा ह्येकस्य वणिजो व्यवहर्तुश्च सोभवत् । विवादे संशयं छिन्दन्नेत्रं स्थेयाद्यगोचरे ॥१२३॥

सौहृदागूढसद्भावे व्यापदौपयिकं धनी । न्यासीचकार दीनारलक्षं कोपि वणिग्गृहे ॥१२४॥

125 तेनोपयुज्यमाना च व्ययेषु वणिजः करात् । कियत्यपि गृहीताभूद्दात्तं[1]मात्रान्तरान्तरा ॥१२५॥

त्रिंशद्विंशासु[1] यातासु समासु न्यासधारिणम् । गृहीतशेषं दातुं स धनं प्रार्थयताथ तम् ॥१२६॥

वणिक्तु कुकृती तस्य न्यासग्रासाय सोद्यमः । कालापहारमकरोत्तैस्तैः कलुषधीर्मिषैः ॥१२७॥

स्रोतोभिर्न्यस्तमम्भोधौ लभ्यं मेघमुखैः पयः । प्राप्तिर्भूयस्तु नास्त्येव वणिग्न्यस्तस्य वस्तुनः ॥१२८॥

तैलस्निग्धमुखः स्वल्पालापो मृद्वाकृतिर्भवन् । न्यासग्रासविवादोद्यो वणिग्व्याघ्राद्विशिष्यते ॥१२९॥

130 विवादे श्रेष्ठिना शाठ्यं स्मितैः प्राक्सख्यदर्शनैः । मुक्तं मुक्तं ज्ञायमानं प्राणान्तेपि न मुच्यते ॥१३०॥

निसर्गवञ्चका वेश्याः कायस्थो दिविरो वणिक् । गुरूपदेशोपस्कारैर्विशिष्टाः सविषादिषोः ॥१३१॥

चन्दनाङ्कालिके श्वेतांशुके धूपाधिवासिनि । विश्वस्तः स्यात्किराते[1] यो विप्रकृष्टेस्य नापदः ॥१३२॥

ललाटदृक्पुटश्रोत्रद्वन्द्वहृन्न्यस्तचन्दनः । षड्बिन्दुर्वृश्चिक इव क्षणात्प्राणान्तकृद्वणिक् ॥१३३॥

पाण्डुश्यामोग्निधूम्रार्द्रैः सूच्यास्यो गहनोदरः । तुम्बीफलोपमः श्रेष्ठी रक्तं मांसं च कर्षति ॥१३४॥

135 सोथ निःशेषितमिषः क्रुद्धो निर्बन्धकारिणः । गणनापत्रिकां तस्य सभ्रूभङ्गमदर्शयत् ॥१३५॥

यदादौ श्रेयस इति न्यस्तमश्रेयसे पदम् । आतरेष्वत्यये सेतोर्गृहीता षट्शती त्वया ॥१३६॥

छिन्नोपानत्कपावन्धे शतं चर्मकृतेर्पितम् । विपादिकाकृते दास्या नीतं पञ्चाशतो घृतम् ॥१३७॥

---

११०. [1]) A₁ indicates here a *lacuna* of one *akshara*. १११. [1]) Emended with C; A लोक°. १२५. [1]) Emended; A °भूद्दत्तमा°. Cf. viii. 154. १२६. [1]) Emended; A त्रिंशद्विंशद्यातासु. Cf. v. 210. १३२. [1]) Emended; A किराटे.

स्फोटने भाण्डभारस्य क्रन्दन्त्याः कृपयार्पितम् । कुलाल्या बहुशः पश्य भूर्जे लग्नं शतत्रयम् ॥१३८॥
शिशुभ्योस्य बिडालस्य क्रीताः पोषाय मूषिकाः । त्वया शतेन वात्सल्याद्धट्टान्मत्स्यरसस्तथा ॥१३९॥
चरणोद्वर्तनं सर्पिः शालिचूर्णं च सप्तभिः । क्रीतं शतैः श्राद्धपक्षस्नाने च घृतमाक्षिकम् ॥१४०॥ 140
नीतं क्षौद्रार्द्रकं कासायासायादर्भकेण ते । सोव्यक्तजिह्वः किं वेत्ति वक्तुं लग्नं शतं ततः ॥१४१॥
वृषणोत्पाटको भिक्षाचरस्ते हठयाचकः । यो वारितो युद्धपटुस्तस्मै दत्तं शतत्रयम् ॥१४२॥
आनीते भट्टपादानां मध्यं सर्वव्ययोपरि । शतं शतद्वयं धूपशन्दामूलपलाण्डुषु ॥१४३॥
इत्याद्यचिन्त्यतायुक्तान्परिहार्यव्ययानसौ । तस्यैकीकृत्य गणनां लाभेपि शनकैर्व्यधात् ॥१४४॥
वर्षमासग्रहतिथिप्रत्यावृत्तिः पुनः पुनः । संसारस्येव तस्यान्तं न ययौ नर्तिताङ्गुलेः ॥१४५॥ 145
स मूलग्रहणं पिण्डीकृत्याथ सकलान्तरम् । प्रसारितोष्ठस्तन्नेत्रे मीलयन्नभ्यधान्मृदु ॥१४६॥
शल्यमुद्धर निक्षेपं नयोज्ज्वासधनं त्विदम् । विश्रम्भंदत्तं[1] निर्दम्भं दीयतां सकलान्तरम् ॥१४७॥
तत्स धर्म्यं वचो जानन्क्षणमुच्छ्वसितोभवत् । क्षुरं क्षौद्रोपलिप्तं तु ध्यात्वा पश्चादतप्यत ॥१४८॥
युक्तापह्नुतसर्वस्वं कौर्यानार्यमथार्थकः[1] । विवादे नाशकज्जेतुं नापि स्थेया विचारकाः ॥१४९॥
स्थेयैरनिश्चितन्यायं पुरो न्यस्तं ततो नृपः । तदित्थमिति निश्चित्य वणिजं तमभाषत ॥१५०॥ 150
अद्यापि न्यासदीन्नाराः सन्ति चेत्तत्प्रदर्श्यताम् । अंशः कियानपि ततस्ततो वच्मि यथोचितम् ॥१५१॥
तथा कृते तेन वीक्ष्य दीन्नारान्मन्त्रिणोब्रवीत् । राजभिर्भाविनां राज्ञां नाम्ना टङ्कः क्रियेत किम् ॥१५२॥
न चेत्कलशभूपालकाले न्यासीकृतेष्वमी । दीन्नारेषु कुतष्टङ्का मन्नामाङ्का अपि स्थिताः ॥१५३॥
निक्षिप्तेनैष लक्षेण वणिक्तस्माद्व्यवाहरत् । वणिजो द्रविणेनायमप्यात्तेनान्तरान्तरा ॥१५४॥
तस्माद्यदा यदेतेन गृहीतं दीयतां ततः । तदा प्रभृत्यद्ययावल्लाभोस्मै वणिजोर्थिनः ॥१५५॥ 155
न्यसनानेहसश्चैष प्रभृत्यस्मै प्रयच्छतु । लक्षादखण्डिताल्लाभं किं वाच्यं मौलिके धने ॥१५६॥
अत्रधारयितुं शक्यं मादृशैः सघृणैरियत् । श्रीयशस्करवद्रौक्ष्यमीदृक्षेषु तु युज्यते ॥१५७॥
विवादे संदिहानस्य युक्तं क्षान्त्यानुशासनम् । भाव्यं दण्डधराचारैः प्रयुक्तकुसृतेः पुनः ॥१५८॥
अनिर्हार्येषु शल्येषु महामर्मगतेष्विव । सविवादेषु चोपेक्षां कालापेक्षी व्यधान्नृपः ॥१५९॥
पप्रथे पार्थिवस्येत्थं निश्चोद्यं तस्य पालनम् । प्रजासु जागरूकस्य मनोरिव मनस्विनः ॥१६०॥ 160
सख्यं कारणनिर्व्यपेक्षमिनताहंकारहीना सतीभावो वीतजनापवाद उचितोक्तित्वं समस्तप्रियम् ।
विद्वत्ता विभवान्विता तरुणिमा पारिप्लवत्वोज्झितो राजत्वं विकलङ्कमत्र चरमे काले किलेत्यन्यथा ॥१६१॥
स तादृशोपि राजेन्द्रचन्द्रमाः सन्किलाभवत्[1] । मात्सर्याविष्टवैवश्याद्दोषोल्कावर्षभीषणः ॥१६२॥
औदार्यशौर्यधीधैर्यगुणतारुण्यमत्सरः । बभूव संख्यातीतानां मानप्राणहरो नृणाम् ॥१६३॥
मानोन्नतैश्च भूयोपि वाक्पारुष्यरुषाहतैः । लाघवं प्रत्युपालम्भैः पार्थिवोप्यनुभावितः ॥१६४॥
प्रसुप्तानां फणीन्द्राणामिव कोपोद्भवं विना । तेजो विस्फूर्जितं ज्ञेयं न हि नाम शरीरिणाम् ॥१६५॥ 165

---

१४७. [1]) A विस्रम्भ°. १४९. [1]) Emended with C; A कौर्यानर्य°. १६२. [1]) Emended; A स किला°.

विविधे भूतसर्गेस्मिन्न च कश्चित्स विद्यते । वपुर्वंशचरित्रादि यस्य दोषैर्न दूषितम् ॥१६६॥

जातिः पङ्करुहाद्वपुः कपिलताक्रान्तं शिरः खण्डनप्रभ्रश्यच्छुचिशीलतादिविगुणाचारप्रदुष्टं यशः ।
विश्वस्रष्टुरिति प्रभूतविषयव्याप्तिस्पृशो दुःसहा दोषा यत्र पुरोस्तु तत्र कतमो निर्दोषतोत्सेकभूः ॥१६७॥

अविचार्येति भूपालः स चकारानुजीविनाम् । वंशचारित्रदेहादिदोषोद्घोषणमन्वहम् ॥१६८॥

अन्योन्यद्वेषमुत्पाद्य संख्यातीता महाभटाः । युद्धश्रद्धालुना तेन द्वन्द्वयुद्धेषु घातिताः ॥१६९॥

170 मासार्धदिनमाहेन्द्रमहाद्यवसरेषु सः । निनाय योधान्संनद्धानन्योन्यप्रधनैर्धनम् ॥१७०॥

स नाभूदुत्सवः कश्चित्तदा यत्र नृपाङ्गने । भूमिर्न सिक्ता रक्तेन हाहाकारो न चोद्ययौ ॥१७१॥

नृत्यन्त इव निर्याता गृहेभ्यो वंशशोभिनः । बान्धवैर्निन्यिरे योधा लूनाङ्गाः पार्थिवाङ्गनात् ॥१७२॥

स्निग्धश्यामकचांश्चारुश्मश्रूनाकल्पशोभिनः । हतान्वीक्ष्य भटान्राजा मुमुदे न तु विव्यथे ॥१७३॥

नार्यो राजगृहं गत्वा प्रत्यायातेषु भर्तृषु । मेनिरे दिवसं लब्धमनास्था नित्यमन्यथा ॥१७४॥

175 भवेत्तद्यदहं कुर्यामित्यहंक्रियया वदन् । साचिव्यमव्याहतवाग्यैस्तैर्भृत्यैरजिग्रहत् ॥१७५॥

प्रवर्धमानांस्तानेव विद्वेषकलुषाशयः । हताधिकारान्विदधे बहुशश्च विमानितान् ॥१७६॥

दञ्छकः कम्पनाधीशः प्रवृद्धौ तत्र सक्रुधि । विद्रुतो विषलाटायां निपत्य निहतः खशैः ॥१७७॥

तेन स्ववर्धितो द्वाराधीश्वरो रक्ककाभिधः । हताधिकारो विदधे विभूतिं वीक्ष्य भूयसीम् ॥१७८॥

माणिक्यसैन्यपतिना द्वारेकस्मान्निवारिते । खिन्नेन विजयक्षेत्रे चक्रे व्रतपरिग्रहः ॥१७९॥

180 कम्पनाद्यधिकारस्थाः प्रवीरास्तिलकादयः । काकवंश्या मार्दवेन तत्कोपं नानुभाविताः ॥१८०॥

भोगसेनो निरनुगः क्षीणवासा भवन्कृतः । तेनातिसेवाप्रीतेन राजस्थानाधिकारभाक् ॥१८१॥

यस्येन्द्रद्वादशीयुद्धे सान्द्रसैन्योपि विद्रुतः । क्षुद्रवद्गग्गचन्द्रोपि रौद्रमालोक्य विक्रमम् ॥१८२॥

येपि सङ्गाभिधानस्य पुत्राः सामान्यशास्त्रिणः । तान्नङ्गुच्छुड्डुव्यङ्गान्स मन्त्रिणः समपादयत् ॥१८३॥

पुत्रौ विजयसिंहस्य तत्सेवात्यक्तदुर्दशौ । तिलको जनकश्चास्तामम[1]मात्यश्रेणिमध्यगौ ॥१८४॥

185 यमेलाभयत्राणादिमुख्या द्वारादिनायकाः । कस्तान्समर्थः संख्यातुं तडित्तरलसंपदः ॥१८५॥

द्वित्राः प्रशस्तकलशादयः पूर्वे तदन्तरे । प्रापुर्बालद्रुमान्तःस्थजीर्णानो[1]कहविभ्रमम् ॥१८६॥

कन्दर्पः क्ष्माभुजा दूतैः समानीतोपि नाददे । तस्यासहनतां वीक्ष्य प्रार्थितोप्यधिकारिताम् ॥१८७॥

आस्थानाचारसंलापव्यवहारादि मण्डले । नवमेवाभवत्सर्वं तस्मिन्नभिनवे नृपे ॥१८८॥

लक्ष्मीः कार्मणचूर्णाङ्का वेश्येव वशवर्तिनः । धीरानपि विधायेयं करोत्युन्मार्गवर्तिनः ॥१८९॥

190 सपिण्डानामपि व्यक्तभ्रूलवीक्षणतत्परा । प्रेतेव नरेन्द्रश्रीर्जातिस्नेहापकारिणी ॥१९०॥

समस्तसंपत्पूर्णोपि यस्मात्सुस्सलभूपतिः । दध्यौ भ्रातुरवस्कन्दं राज्यापहरणोद्यतः ॥१९१॥

अकस्मादशृणोच्छ्येनमिव तं शीघ्रपातिनम् । स्थानं वराहवार्ताख्यमुल्लङ्घ्यायातमग्रजः ॥१९२॥

क्षिप्रकारी विनिर्गत्य तमप्राप्तपदं ततः । निपत्य सैन्यैर्बहुलैः सोपकारमकारयत् ॥१९३॥

विद्रुतस्यास्पदे तस्य नानोपकरणैश्युतैः । ताम्बूलवल्लीकू[1]टैश्च सामग्री समभाव्यत ॥१९४॥

---

१८४. [1]) Emended with C; A °श्चास्तम°. १८६. [1]) Emended; A °जीर्णानौकह°. १९४. [1]) Emended; A ताम्बूलवेलाकू°.

कृतकार्यपरावृत्त्यासावरूढोपि पार्थिवः । प्रत्यावृत्तं तमशृणोदन्येद्युः क्रूरविक्रमम् ॥१९५॥ 195
गग्गचन्द्रस्तदादेशाद्गत्वा बहलसैनिकः । चक्रे सुस्सलभूपालबलनिर्दलनं ततः ॥१९६॥
असंख्यैः सौस्सलैर्योधैराहवायासनिःसहैः । क्रान्तिर्विमानोद्यानेषु द्युनारीणाममुच्यत ॥१९७॥
भर्तृप्रसादस्यानृण्यं प्राणैर्युधि समर्पितैः । राजपुत्रौ गतौ तत्र सहदेवयुधिष्ठिरौ ॥१९८॥
वराश्वान्सुस्सलानीकाद्गग्गस्तान्प्राक् विद्रुतान्[1] । चक्रे भूरितुरंगस्य यैर्भूपस्यापि कौतुकम् ॥१९९॥
निविष्टकटकं तं स श्रुत्वा सैल्यपुराध्वना । क्रमराज्योन्मुखं यान्तं द्रुतमन्वसरन्नृपः ॥२००॥ 200
अन्विष्यमाणसरणिः प्रयत्नादग्रजन्मना । प्रविवेश दरद्देशं परिमेयपरिच्छदः ॥२०१॥
दत्तमार्गं तस्य राजा डामरं लोष्टकाभिधम् । स सैल्यपुरजं हत्वा नगरं प्राविशत्ततः ॥२०२॥
तस्मिन्दूरं गते वैरकलुषोपि स नाददे । भ्रातृस्नेहेन संरम्भं ग्रहीतुं लोहरं गिरिम् ॥२०३॥
कल्हः कालिञ्जराधीशो[1] दौहित्रीं पुत्रवद्गृहे । यामवर्धयत स्नेहादपुत्रः पितृवर्जिताम् ॥२०४॥
राज्ञो विजयपालस्य सुतां सुस्सलभूपतिः । उपयेमे स तां श्रीमाननघां मेघमञ्जरीम् ॥२०५॥ 205
तस्य प्रभावाधिष्ठानाच्छिशोरपि न लोहरे । शक्तिरासीद्विरुद्धानामपि बाधाय वैरिणाम् ॥२०६॥
धीरः सुस्सलदेवोपि मार्गैर्निर्गत्य दुर्गमैः । आसदद्भूरिभिर्मासैः स्वोर्वीं दुर्गिरिवर्त्मना ॥२०७॥
प्रशान्ते व्यसने तस्मिन्धीरस्योच्चलभूपतेः । अन्येपि व्यसनाभासा उत्पन्नध्वंसिनोभवन् ॥२०८॥
भीमादेवः समादाय भोजं कलशदेवजम् । साहायकार्थमानिन्ये दरद्राजं जगद्दलम् ॥२०९॥
सल्हो हर्षमहीभर्तुरवरुद्धात्मजोभवत् । भ्राता दर्शनपालस्य सञ्जपालस्तु तद्बलम् ॥२१०॥ 210
नीतिज्ञेन ततो राज्ञा साम्नैव दरदीश्वरः । आक्षेपाद्वारितः प्रायात्प्रत्यावृत्य निजां भुवम् ॥२११॥
सल्हस्तमन्वगाच्छन्नं भोजोविक्षतस्वमण्डलम् । भेजे सुस्सलदेवस्य सञ्जपालोनुजीविताम् ॥२१२॥
गृहीतार्थेन भृत्येन निजेनैव प्रदर्शितः । भोजः क्षिप्रं नृपात्प्राप निग्रहं तस्करोचितम् ॥२१३॥
देवेश्वरात्मजः पित्थकोपि द्वैराज्यलालसः । डामराश्रिते राज्ञि निर्याते व्यद्रवद्दिशः[1] ॥२१४॥
विचारपरिहारेण धावन्तः सर्वतो जडाः । तिर्यञ्च इव हास्याय प्रसिद्धिशरणा जनाः ॥२१५॥ 215
मल्लस्य रामलाख्योहं[1] सूनुरासं दिगन्तरे । अट्टसूदः कश्चिदेवं चक्रिकाचतुरो वदन् ॥२१६॥
निन्ये प्रवृद्धिं व्यामूढैर्बहुभिर्विप्लवप्रियैः । धनमानादिदानेन भूमिपैर्भूम्यनन्तरैः ॥२१७॥युग्मम्[1]॥
ग्रीष्मे प्रविष्टः कश्मीरानेकाकी घर्मपीडितः । व्यधीयत छिन्ननासः परिज्ञाय नृपानुगैः ॥२१८॥
कटके पर्यटन्राज्ञः स एव ददृशे पुनः । स्वजात्युचितभक्ष्यादिविक्रयी सस्मितं जनैः ॥ २१९॥
मिथ्यैव नीतिकौटिल्यैः क्रियतेभ्युदयश्रमः । शक्यतेपरथा कर्तुं न दैवस्य मनीषितम् ॥२२०॥ 220
शान्तापि ज्वलति क्वापि क्वचिद्दीप्तापि शाम्यति । दैववातवशाच्छक्तिः पुंसः कक्षाग्निसंनिभा ॥२२१॥
पलायनैर्नापयाति निश्चला भवितव्यता । देहिनः पुच्छसंलीना वह्निज्वालेव पक्षिणः ॥२२२॥

---

१९९. [1]) Emended; A °नीकान्गग्ग°. २०४. [1]) Emended; A कालिन्दर°. Cf. vii. 1256. viii. 618. २१४. [1]) Emended with C; A वद्रव°. २१६. [1]) Thus corr. by $A_3$ from $A_1$ मल्लरामाला°. २१७. [1]) $A_1$ writes here २ instead of युग्मम्.

नाच्छिन्नवह्निविषशस्त्रशरप्रयोगैर्न श्वभ्रपातरभसेन न चाभिचारैः ।
शक्या निहन्तुमसवो विधुरैरकाण्डे भोक्तव्यभोगनियतोच्छ्वसितस्य जन्तोः ॥२२३॥
भिक्षाचरः समादिष्टवधो जयमतीगृहात् । नक्तं वध्यभुवं निन्ये वधकैः पार्थिवाज्ञया ॥२२४॥
225 प्राण्गि प्रस्फोटच निक्षिप्तो वितस्तायां समीरणैः । क्षिप्तस्तटं क्षणं स्पन्दमानवक्षाः कृपालुना ॥२२५॥
द्विजेनैकेन संप्राप्तश्चिरादुद्गतचेतनः । आसमत्यभिधानाया ज्ञातिर्दिद्देति गौरवात् ॥२२६॥
शाहिपुत्रीभिरुक्ता या दत्तश्वशुरया तया । नीतो देशान्तरं गूढं ववृधे दक्षिणापथे ॥२२७॥ तिलकम्[1] ॥
स वृत्तप्रत्यभिज्ञोथ पुत्रवन्नरवर्मणा । मालवेन्द्रेण शस्त्रास्त्रविद्याभ्यासमकार्यत ॥२२८॥
अन्यदीयं घातयित्वा तत्तुल्यवयसं शिशुम् । रक्षितो जयमत्यैव स किलेत्यपरेब्रुवन् ॥२२९॥
230 देशान्तरागताद्वृतात्तां वार्ता[1]मुपलब्धवान् । अत एवाभवत्तस्या भूभृद्धिरलितादरः ॥२३०॥
बहिरप्रतिभिन्दंस्तत्स धीरो मार्गवर्तिभिः । चक्रे तदप्रवेशाय संबन्धं पार्थिवैः समम् ॥२३१॥
ईर्ष्यामगोपयन्नार्याः शङ्कामच्छादयन्रिपोः । स्वयमन्याभिगम्यत्वं करोति हि जडो जनः ॥२३२॥
भिक्षाचरे हते बालं कंचिदादाय तत्समम् । तन्नाम्ना ख्यातिमनयद्दिद्दैवेत्यपरेब्रुवन् ॥२३३॥
तथ्येन सोस्तु मिथ्या वा प्रतिष्ठां तां तथाप्तवान् । यया लघुत्वमानेतुं न दैवेनाप्यशक्यत[1] ॥२३४॥
235 स्वप्नेन्द्रजालमायानामपि निर्विषया इमाः । कर्मवैचित्र्यजनिताः काश्चिदाश्चर्यविप्रुषः ॥२३५॥
स राजबीजी नाशाय विशां गूढं व्यवर्धत । पुरग्रामादिदाहाय कक्षान्तरिव पावकः ॥२३६॥
रोहत्यन्तिकसीमनि प्रतिविषावीरु[1]द्विषक्ष्मारुहः काले प्रावृडुपद्रुताच्छसलिले मूर्छत्यगस्त्योदयः ।
सर्गच्छेदविधिक्षमानुदयतो दृष्ट्वा किलोपद्रवान्संधत्ते प्रतिकारकल्पनमहो दीर्घावलोकी विधिः ॥२३७॥
अजायत विपन्मज्जज्जगदुद्धरणक्षमः । तस्मिन्नेव क्षणे यस्मात्सुस्सलक्ष्मापतेः सुतः ॥२३८॥
तज्जन्मकालादारभ्य सर्वतो जयमर्जयन् । नामान्वर्थं नृपस्तस्य जयसिंह इति व्यधात् ॥२३९॥
240 शास्तुः सर्वार्थसिद्धाख्या यथा सर्वार्थसिद्धिभिः । तथा तस्याभिधान्वर्था नात्यजद्रूढिशब्दताम् ॥२४०॥
मुद्रां स कुङ्कुमस्याङ्घ्रेस्तदीयस्याभ्युपागताम् । विलोक्योच्चलदेवोभूद्विमन्युर्भ्रातरं प्रति ॥२४१॥
बालस्यैवाङ्घ्रिमुद्रास्य वैरं पितृपितृव्ययोः । निवारयन्ती विदधे सुस्थितं मण्डलद्वयम् ॥२४२॥
स स्वर्गिणः पितुर्नाम्ना ततः सुकृतसिद्धये । चकारोच्चलभूपालः पैतृके स्थण्डिले मठम् ॥२४३॥
गोभूमिहेमवस्त्रान्नदाता तस्मिन्महोत्सवे । आश्चर्यकल्पवृक्षत्वं त्यागी सर्वार्थिनामगात् ॥२४४॥
245 प्रसादैः प्रहितैस्तेन महार्घैः श्लाघ्यसंपदा । महान्तोपि दिगन्तेषु पार्थिवा विस्मयं ययुः ॥२४५॥
भर्तृप्रसादाधिगतां श्रियं नेतुं परार्ध्यताम् । विहारं समठं देवी जयमत्यपि निर्ममे ॥२४६॥
केषांचित्पूर्वपुण्यानां विरहेण महीभुजः । हताभीष्टाभिधानोभून्मठो[1] नवमठाख्यया ॥२४७॥
सुल्ह्णं स्वसारमुद्दिश्य परस्मिन्स्थण्डिले पितुः । विहारोपि कृतस्तेन नोचितां ख्यातिमाययौ ॥२४८॥
मृत्योर्मस्तकपातित्वं तस्याकलयतः किल । न निष्ठां स्वप्रतिष्ठासु संप्रपेदे व्ययस्थितिः ॥२४९॥

---

२२७. [1]) $A_1$ writes here ३ instead of तिलकम्. २३०. [1]) Emended; A °तात्तावत्तमुप°. २३४. [1]) Emended with C; A °शङ्कृत. २३७. [1]) $A_3$ gloss प्रतिविषा वीरुत् यस्या उपविषेत्यादिनामान्तरं कोशे यथा विश्वाविषा प्रतिविषातिविषोपविषारुणा शृङ्गीमहौषधं चेति (*Amarakośa* ii. 4. 99-100). २४७. [1]) Emended; A °न्मठे.

कदाचिक्कमराज्यस्थो द्रष्टुमग्निं स्वयंभुवम् । ययौ वर्हठचक्राख्यं गिरिग्रामं स भूपतिः ॥२५०॥ 250
तं कम्बलेश्वरग्रामाध्वना यान्तमवेष्टयन् । अकस्मादेत्य तत्रत्याश्चौराश्चण्डालशङ्खिणः॥२५१॥
प्रजिहीर्षुभिरप्याशु तस्मिन्नत्यल्पसैनिके । न तैः प्रहृतमुत्तेजोवष्टम्भस्तम्भितायुधैः ॥२५२॥
अथ हारितमार्गः स गहने गिरिगह्वरे । भ्रमन्नल्पानुयाय्येकां क्षणदामत्यवाहयत् ॥२५३॥
उच्चचार क्षणे तस्मिन्स्कन्दावारेषु दुःसहा । नास्ति राजेति दुर्वार्ता सर्वतः क्षोभकारिणी ॥२५४॥
कष्टकान्तिःसृतात्यल्पा वात्येव गिरिगह्वरात् । सा दुष्प्रवृत्तिर्दीर्घत्वं पुरेरण्य इवासदत् ॥२५५॥ 255
नगराधिकृतस्तस्मिन्क्षणे छुड्डाभिधोभवत् । शङ्खिणः कामदेवस्य कुल्यो रड्डादिसोदरः ॥२५६॥
कृत्वा पुरक्षोभशान्तिं शङ्खौकः स नृपास्पदे । प्रविश्य भ्रातृभिः सार्धं कार्यशेषमचिन्तयत् ॥२५७॥
नृपं कं कुर्म इत्येवं तान्विचिन्तयतोब्रवीत् । सड्डाभिधोपि कायस्थः कुटुम्बिकुटिलाशयः ॥२५८॥
यूयमेव सुहृद्बन्धुभृत्यबाहुल्यदुर्जयाः । राज्यं कुरुत संप्राप्य राष्ट्रमेवमकण्टकम् ॥२५९॥
तेनैवमुक्तास्ते पापा जातराज्यस्पृहास्ततः । सिंहासनाधिरोहाय क्षिप्रमासन्समुद्यताः ॥२६०॥ 260
श्रीयशस्करदेवस्य वंश्या एत इति श्रुतिः । तदन्वयेभूत्सर्वेषां राज्यौत्सुक्यप्रदायिनी ॥२६१॥
अत एवाभजत्क्रोधं तेषां कुसुहृदुक्तिभिः । सा वासनान्तःसंलीना सदाचारानपेक्षिणाम् ॥२६२॥
कथं न प्रतिभात्येषा सड्डस्यापि कुपद्धतिः । भारिकस्य कुले जातो लवटस्य हि सोधमः ॥२६३॥
क्षेमदेवाभिधानस्य पुत्रोप्यल्पनियोगिनः । क्रूराशयत्वमभजन्महासाहसिकोचितम् ॥२६४॥
चौर्येण स्वर्णभृङ्गारं हृतवान्भूपतेर्गृहात् । संभावितोपि गाम्भीर्यान्नाज्ञायि स किलेङ्गितैः ॥२६५॥ 265
सासिधेनुर्निरुष्णीषो विहसन्नखिलान्स्मयात् । राजपुत्र इवात्यल्पं स त्रैलोक्यममन्यत ॥२६६॥
तस्य चिन्ता काचिदासीत्सदा दोलायतोङ्गुलीः । या राज्यहेतुः क्रूरेण फलेन समभाव्यत ॥२६७॥
तद्गिरा निजसंकल्पादपि ते राज्यलालसाः । नृपं जीवन्तमाकर्ण्य ततोभूवन्हतस्पृहाः ॥२६८॥
न स्फुरन्न च संमीलन्न वा सुप्त इवानिशम् । तेषां चेतसि संकल्पस्तदा प्रभृति सोभवत् ॥२६९॥
असुस्थिरादरेणाथ शनकैः पृथिवीभुजा । निन्यिरे मध्यमां वृत्तिं राजस्थानान्निवार्य ते ॥२७०॥ 270
प्रकृत्या रूक्षवाग्राजा सर्वेषामेव सर्वदा । तेषामप्यकरोदत्रान्तरे मर्मस्पृशः कथाः ॥२७१॥
ते राज्ये हर्षभूभर्तुः पितरि प्रमयं गते । मातुस्तारुण्यमत्ताया विधवाया गृहेवसन् ॥२७२॥
तैर्मध्यामत्तको नाम शङ्खभूभ्रातिवेश्मिकः । सुहृद्गतोथ विश्वस्तो जननीजारशङ्कया ॥२७३॥
असतीमपि किं नैते न्यगृह्णन्निति भूपतिः । विचार्य कोपात्तन्मातुर्नासाच्छेदमकारयत् ॥२७४॥
तां कथां स नृपस्तेषां परोक्षमुदघोषयत् । क्व पुत्रा<sup></sup>श्छिन्ननासाया वदन्नित्यन्वियेष च ॥२७५॥ 275
बृहद्रञ्जादिगञ्जेशं कृत्वा कार्यान्न्यवारयत् । स कायस्थकृतान्तत्वं भजन्सड्डमपि प्रभुः ॥२७६॥
पीडितस्तेन रौद्रेण निजोथ गणनापतिः । कोशोत्पत्त्यपहर्तारं तं नृपाय न्यवेदयत् ॥२७७॥
प्रवेशभागिकपदे हृते राज्ञा रुषा ततः । स क्रूरो रड्डच्छुड्डादीन्प्रैरयत्पूर्वचिन्तिते ॥२७८॥
जिघांसवस्ते नृपतिं प्रसङ्गापेक्षिणः परैः । समगंसत दुष्प्रज्ञैरथ हंसरथादिभिः ॥२७९॥

२५२. [1]) Doubtful emendation; A °मुद्रोजोवष्टम्भ°. २७५. [1]) Emended; A पुत्रायाच्छिन्न°.

280 प्रजिहीर्षुभिरुर्वीशं पीतकोशैः समेत्य तैः । चतुष्पञ्चानि वर्षाणि नावाप्यवसरः क्वचित् ॥२८०॥
बहुभिर्बहुधा भिन्नैर्बहुकालं विचिन्तितः । न भेदमगमन्मन्त्रः स चित्रं लोकदुष्कृतैः ॥२८१॥
तवैतां कुरुते शश्वन्नृपो मर्मस्पृशं कथाम् । इति प्रत्येकमुक्त्वा ते विरागं पार्थिवेभजन् ॥२८२॥
तैरुरःपार्श्वपृष्ठादि गूढैर्वर्मभिरायसैः । प्रच्छाद्य पार्थिवो[1]जस्रमनुसस्रे जिघांसुभिः ॥२८३॥
असहो विरहं सोढुं यां प्रसादयितुं न काम् । राजापि संदधे चेष्टां प्राक्प्राकृतभुजंगवत् ॥२८४॥
285 स्वभाववैपरीत्येन नाशचिह्नेन स स्थिराम् । जयमत्या स[1]हाप्रीतिं तदादाद्वत्सरद्वयम् ॥२८५॥
रक्षां भिक्षाचरस्याहुर्निमित्तं तत्र केचन । केचित्तु विद्यु[1]त्सदृशीं प्रेम्णां तरलवृत्तिताम् ॥२८६॥
अथ वर्तुलभूभर्तुरात्मजा बिज्जलाभिधा । कृतपाणिग्रहस्यागाद्वाल्लभ्यं वसुधाभुजः ॥२८७॥
संग्रामपाले नृपतौ तस्मिन्नवसरे मृते । तत्सूनुः सोमपालाख्यः पित्र्यं राज्यं समादधे ॥२८८॥
राज्यार्हमग्रजं बद्ध्वा सोभ्यषिच्यत चाक्रिकैः । इति कोपान्नरेन्द्रोभूत्क्रुध्यन्राजपुरीं प्रति ॥२८९॥
290 लक्ष्मीस्थैर्यप्रतिभुवः पुत्र्याः पाणिमजिग्रहत् । ..............................[1] ॥२९०॥
अर्थिचिन्तामणेस्तस्य प्रीणतो निखिलाः प्रजाः । नानाव्ययोर्जितो रेजे पश्चिमः स महोत्सवः ॥२९१॥
याते जामातरि क्ष्माभृच्चक्रे निखिलतन्त्रिणः । निर्वृत्तीं[1]न्किमपि क्रुध्यन्दु[2]ध्रुक्षूंस्तु व्यसर्जयत् ॥२९२॥
भोगसेनोपि भूपेन काले तस्मिन्समन्युना । निवारितो द्वारकार्यात्सवैरः समपद्यत ॥२९३॥
विक्रान्तः स हि कार्यस्थो निर्जिताखिलडामरः । सुस्सलक्ष्मापतिं जेतुं प्रतस्थे लोहरं पुरा ॥२९४॥
295 वात्सल्यमिश्र[1]वैरेण वारितोथ महीभुजा । तत्परीवादमकरोच्चुक्रोधावेत्य तच्च सः ॥२९५॥
प्रवेशयन्नड्डुच्छुड्डुमुखान्स समयान्तरम् । तमादिसुहृदं वीरं तदा राज्ञा विमानितम् ॥२९६॥
विमानिता विशालेच्छाः संहता हतवृत्तयः । न ते बहिष्कृतास्तेन यमराट्टं जिगीषता ॥२९७॥
तान्भोगसेनविन्यस्तसद्भावान्कुटिलाशयः । सड्डो निनिन्द वीरत्वात्तं जानन्सरलान्तरम् ॥२९८॥
ऊचे चाद्यैव हित्वापि प्राणान्व्यापाद्यतां नृपः । भोगसेनोन्यथा भेदं कुर्यादगहनाशयः ॥२९९॥
300 अन्यथाभून्न सड्डोक्तं भोगसेनो यदब्रवीत् । किंचिद्द्रहोस्मि वक्तेति नृपतिं भेदलालसः ॥३००॥
स तु किं वक्षि न द्वारं तव दद्यामिति ब्रुवन् । दुध्रु[1]क्षुपक्षप्रणयं निन्ये तमवमानयन् ॥३०१॥
प्रबोधाधायिनो द्वेष्टि नियतिप्रणयीभवन् । तपात्ययाहनिद्रान्त इव जन्तुर्गतस्मृतिः ॥३०२॥
तन्त्रिणो यामिका भूत्वा स्वस्मिन्वारे ततोविशन् । ते राजधानीं संनद्धैः स्वसैन्यैः सह संहताः ॥३०३॥
यामिन्यां यं वयं हन्मस्तं हतेत्यभिधाय च । प्रावेशयन्न्यस्तचिह्नांश्चण्डालान्मण्डपान्तरम् ॥३०४॥
305 भुक्तोत्तरं स्थिते राज्ञि ते बाह्ये मण्डपे स्थिताः । सरोषो नृप इत्युक्त्वा सेवकोत्सारणं व्यधुः ॥३०५॥
राजा च बिज्जलावेश्म यियासुर्मण्डपान्तरात् । दीपिकाभिः कृतालोको निर्ययौ मदनालसः ॥३०६॥
मध्यमं मण्डपं तस्मिन्प्राप्ते स्वल्पैः सहानुगैः । तत्त्यक्तं मण्डपं सड्डो रुद्धान्यानरुणज्जनान् ॥३०७॥
अन्यैरप्यग्रिमे द्वारे निरुद्धे सर्व एव ते । जिघांसवः समुत्थाय नृपतिं पर्यवारयन् ॥३०८॥

---

२८३. [1]) Emended with C; A पार्थिवे. २८५. [1]) Emended; A महा°. २८६. [1]) Emended with C; A विद्युत्स°. २९०. [1]) A omits here two *pádas* without indicating a *lacuna*. C adds here : तं प्रेष्टं सर्व्वलोकानां श्रेष्ठं सर्व्वक्षमाभुजां. २९२. [1]) Emended with C; A निर्वृत्तीः किमपि.—[2]) Emended; A °दुद्रुक्षूंस्तु. २९५. [1]) Emended with C; A °मिश्रं वै°. ३०१. [1]) A दुद्रुक्षु°.

विज्ञप्तिदम्भादेकेन रुद्धमग्रे निवेदुषा । तं द्विजो दिन्नजस्तेजः[1] शस्त्र्या कृष्टकचोऽभिनत् ॥३०९॥

ततः काञ्चनगौराणि तस्याङ्गान्यसिधेनवः । बह्व्यः सुमेरुशृङ्गाणि महोरग्य इवाविशन् ॥३१०॥ 310

स द्रोहो द्रोह इत्युक्त्वा केशान्कृष्टान्विमोचयन् । क्रीडाशस्त्र्याः कषां रुद्धमुष्टिं दन्तैर्व्यपाटयत् ॥३११॥

सुजनाकरनामा हि भृत्यः कट्टारकं वहन् । तस्यान्तिकात्पलायिष्ट प्रहरत्सु विरोधिषु ॥३१२॥

अतो बालोचितां लघ्वीं क्षुरिकां स चकर्ष ताम् । मुष्टावर्गलिता कोशात्सा कृच्छ्रेण विनिर्ययौ ॥३१३॥

निर्यातान्त्रः शत्रुभिस्तैस्त्यक्तकेशो बबन्ध तम् । धम्मिल्लमथ तां शस्त्रीं जानुद्वन्द्वान्तरर्पयन् ॥३१४॥

नदित्वा प्रहरंस्तेजं तादृग्वीर्योऽपि सोऽभवत् । येन क्षितौ निपतितः सर्वमर्मस्विवाहतः ॥३१५॥ 315

अभिनच्च ततो रड्डं प्रहरन्तं च पृष्ठतः । नदन्सिंह इव व्यड्डुं परिवृत्य व्यदारयत् ॥३१६॥

अन्यं च शस्त्रिणं कंचित्सवर्माणमपातयत् । विवेष्टमानो यः प्राणैरचिरेण व्ययुज्यत ॥३१७॥

लब्धान्तरे प्रवासाय तस्मिन्धावति मण्डपः । रक्षिभिर्भूमिपालोऽयमित्यबुद्ध्वा कवाटितः ॥३१८॥

द्वारमन्यत्प्रसर्पन्स क्व प्रयासीति जल्पता । छुड्डेन रुद्धमार्गेण खड्गपातैरहन्यत ॥३१९॥

भोगसेनं ततोऽपश्यद्द्वारस्यान्ते समुत्थितम् । दारुतूलिकया भित्तिमालिखन्तं पराङ्मुखम् ॥३२०॥ 320

भोगसेनेक्षसे कस्मादमुं त्वमिति वादिनम् । सोऽव्यक्तं किमपि ह्रीतः प्रधावन्तं जगाद तम् ॥३२१॥

रय्यावट्टाभिधो दीपधरस्तिष्ठन्निरायुधः । अयोदीपिकयारब्धयुद्धस्तैर्विक्षतोऽपतत् ॥३२२॥

चाम्पेयः सोमपालाख्यराजपुत्रः क्षताहितः । प्रहारैः प्राप्तवैक्लव्यो न गर्ह्याचारतामगात् ॥३२३॥

पौत्रः श्रीशूरपालस्य राजकापत्यमज्जकः । विदद्रौ श्वेव संछाद्य शस्त्रीं पुच्छच्छटोपमाम् ॥३२४॥

ततः प्रधावन्प्रग्रीवमारुरुक्षुः क्षितीश्वरः । निकृत्तजानुश्चण्डालैरालिलिङ्ग वसुंधराम् ॥३२५॥ 325

तत्पृष्ठे स्वं क्षिपन्देहं प्रहारैर्जर्जरीकृतः । शृङ्गारनामा कायस्थो निर्द्रोहो वारितोऽरिभिः ॥३२६॥

पुनरुत्थातुकामस्य सर्वे शस्त्रावलीर्द्विषः । न्यपातयंस्तस्य काल्या नीलाब्जवरणस्रजम् ॥३२७॥

तिष्ठेत्कदाचिद्भूतोऽयमविपन्नो विपन्नवत् । कन्धरामधमः सड्डस्तस्येति स्वयमच्छिनत् ॥३२८॥

कृतं पदापहरणं यस्य सोऽहमिति ब्रुवन् । छित्त्वाङ्गुलीश्चकर्षापि रत्नाङ्कामूर्मिकावलीम् ॥३२९॥

एकपादस्थितोपानत्स्रस्तमाल्यैः शिरोरुहैः । छन्नवक्त्रः स ददृशे सुप्तो दीर्घभुजः क्षितौ ॥३३०॥ 330

पर्याप्तयास्य पर्यन्ते वीरवृत्त्या महौजसः । निर्दोषतामीषदगान्निस्त्रिंशत्वं जनान्प्रति ॥३३१॥

सेवकः शूरटो नाम पूत्कुर्वन्द्रोहमुच्चकैः । निर्गत्य भोगसेनेन बहिः क्रोधान्निपातितः ॥३३२॥

प्रस्थितो दयितावासं स दिङ्मोहवशादिव । पन्थानं पृथिवीनाथः काल्या जग्राह वेश्मनि ॥३३३॥

राज्योद्याने नृपतिमधुपा भोगकिञ्जल्कलोलाश्चेतो नानावसनकुसुमश्रेणिभिः प्रीणयन्तः ।

हा धिग्दैवानिलतरलया पात्यमाना नियत्या वल्ल्येवैते किमपि सहसा दृष्टनष्टा भवन्ति ॥३३४॥

तिर्यग्भ्यस्त्रिजगज्जयी परिभवं लङ्केश्वरो लब्धवान्प्रापाशेषनृपोत्तमः कुरुपतिः पादाहतिं मूर्धनि ।

इत्यन्ते बहुमानहृत्परिभवः सर्वस्य सामान्यवत्तत्को नाम भवेन्महानहमिति ध्यायन्धृताहंक्रियः ॥३३५॥ 335

परासुमहितैस्त्यक्तं तमनाथमिव प्रभुम् । नग्नं हुताशसात्कर्तुं स्वच्छन्दग्राहिणोऽनयन् ॥३३६॥

---

३०९. [1]) Thus corr. by $A_1$ from °स्तेज्जः.

भुजौ कण्ठे गृहीत्वैकः कराभ्यां चरणौ परः । तं भुग्नग्रीवमालोलकुन्तलं रुधिरोक्षितम् ॥३३७॥
सथूत्कारव्रणं नग्नमनाथमिव पार्थिवम् । राजधान्या विनिष्कृष्टं न्यधत्तां पितृकानने ॥३३८॥
महासरिद्वितस्ताम्भःसंभेदद्वीपभूतले । अह्नाय वह्निसंस्कारं ते भीतास्तस्य चक्रिरे ॥३३९॥
340 न हतो नापि निर्दग्धः स केनापि व्यलोक्यत । उड्डीयेव गतस्त्वाशु नेत्रनिर्विषयोऽभवत् ॥३४०॥
व्यतीतेन स वर्षैकचत्वारिंशतमायुषा । सप्ताशीत्यब्दपौषस्य शुक्लषष्ठ्यां व्ययुज्यत ॥३४१॥
चक्रेऽथ सासिकवचो रड्डः शोणितमण्डितः । श्मशानाश्मनि वेताल इव सिंहासने पदम् ॥३४२॥
.......................... । ---[1]बद्धमूलानामाद्यानां तन्न[2] दिद्युते ॥३४३॥
तस्यावरोहतः सिंहासनाद्योद्धुं पुरो युधि । विक्रामन्तो बन्धुभृत्या युद्धभूमिमभूषयन् ॥३४४॥
345 तन्त्रिणौ वट्टपट्टाख्यौ युद्ध्वा तद्बान्धवौ चिरम् । योधाश्च कट्टसूर्याद्याः सिंहद्वारेऽपतन्हताः ॥३४५॥
रणरङ्गनटो नृत्यन्निव राजगृहाङ्गने । सखड्गखेटको रड्डः खण्डयन्नहितान्बभौ ॥३४६॥
दिशन्विजयसंदेहमहितानां क्षणे क्षणे । प्रहारैः सुबहून्भित्त्वा स चिरेणापतद्रणे ॥३४७॥
राजद्रोहोचितं तस्य निहतस्यापि निग्रहम् । वैशसत्यक्तमर्यादो गर्गः[1] कोपादकारयत् ॥३४८॥
दिद्दामठान्तिके व्यड्डुः पौरैर्भस्माश्मवर्षिभिः । अवस्करप्रणालान्तर्मग्नवक्त्रो न्यपात्यत ॥३४९॥
350 ते गुल्फदामभिः कृष्टाः स्थाने स्थाने प्रभुद्रुहः । तत्क्षणं लोकथूत्कारपूजां कृत्योचितां दधुः ॥३५०॥
पलाय्य प्रययुः क्वापि सड्डुं हंसरथादयः । मरणाभ्यधिकां कंचित्कालं सोढुं विपद्यथाम् ॥३५१॥
दृप्यन्पराजितं गर्गं[1] नष्टे तदनुजे विदन् । भोगसेनोऽथ तां वार्तामशृणोत्प्रलयोपमाम् ॥३५२॥
व्यावृत्य प्रत्यवस्थातुकामः पश्यन्पलायिनः । योधान्स्वैः सहितः कैश्चित्ततः क्वापि भयादगात् ॥३५३॥
इत्थं निहतविध्वस्तनायका द्रोग्धृसंहतिः । स्वदोर्मात्रसहायेन गर्गचन्द्रेण सा कृता ॥३५४॥
355 सत्त्वं साहससिद्धिं च नेतिहासेष्वपि क्वचित् । अश्रौषं तादृशं यादृक्तस्यास्ते स्म प्रतापिनः ॥३५५॥
निशां प्रहरमह्नश्च राज्यं कृत्वा स लब्धवान् । द्रोहकृच्छड्डराजाख्यां गतिं कुकृतिनामगात् ॥३५६॥
यशस्करकुले जन्म द्रोग्धृभिस्तैः प्रमाणितम् । क्षणभङ्गचभजद्राज्यं यस्माद्दुर्णटदेववत् ॥३५७॥
दावोद्दीपनकूटयन्त्रघटनैः सिंहादिसंहारिणो यान्त्याकस्मिकगण्डशैलपतनैरन्तं किराता वने ।
एकेनैव ननु प्रधावति जनः सर्वोऽपि मृत्योः पथा हन्ताहं[1] निहतोऽयमेष तु मितं कालं विभेदग्रहः ॥३५८॥
स्वोद्वाहे ललनौघमङ्गलरवो यैर्हर्षुलैः श्रूयते दीनैस्तैर्दयिताविलाप उदयन्नाकर्ण्यतेऽन्तक्षणे ।
ह्योऽपि घ्नन्नहितं प्रहृष्यति परः स्वं घ्नन्तमन्ते मुदोद्वृत्तं सोऽप्यवलोकयत्यहह धिङ्मोहोऽयमान्ध्यावहः ॥३५९॥
360 सायं विचिन्तितो रात्रौ फलितोऽन्यत्र वासरे । दुर्विपाकप्रदाताभूद्द्रोग्धृणां साहसद्रुमः ॥३६०॥
अथ सिंहासनस्यान्तः कार्यान्ते त्यक्तविग्रहः । गर्गः प्रक्षालितामर्षश्चक्रन्द स्वामिनं चिरम् ॥३६१॥
तस्मिन्रुदति सर्वोऽपि पौरलोको भयोज्झितः । संप्राप्तावसरो भूपं व्यलापीच्छोकवत्सलम् ॥३६२॥
कारुण्योत्पत्तये दत्त्वा कोशं जीवितकामया । जयमत्या तदावादि गर्गः कपटशीलया ॥३६३॥

---

३४३. [1]) These words written by $A_1$ after verse 342, belong apparently to a verse of which the beginning is lost; the *lacuna* in the text is not indicated in A. Perhaps, more verses have been lost here.—[2]) A तन्निरि°.
३४८. [1]) Thus corr. by $A_1$ from गग्गः. ३५२. [1]) Thus corr. by $A_1$ from गग्गं. ३५८. [1]) $A_1$ gloss अहं हन्ता.

कुरु मे संविदं भ्रातरिति सत्त्वमयस्तु सः । तत्प्रक्रियावचो ज्ञात्वा चितिं तस्या अकल्पयत् ॥३६४॥
चिकुरनिचये यत्कौटिल्यं विलोचनयोश्च या तरलतरता यत्काठिन्यं तथा कुचकुम्भयोः ।
वसति हृदि तद्यासां पिण्डीभवन्ननु ता इमा गहनहृदया विज्ञायन्ते न कैश्चन योषितः ॥३६५॥ 365
दौःशील्यमप्याचरन्त्यो घातयन्त्योपि वल्लभान् । हेलया प्रविशन्त्यग्निं न स्त्रीषु प्रत्ययः क्वचित् ॥३६६॥
युग्याधिरूढा सा यान्ती यावन्मार्गे व्यलम्बत । अग्रतो बिज्जला तावन्निर्गत्य प्राविशच्चिताम् ॥३६७॥
अथ तस्याश्चितारोहं कुर्वन्त्या भूषणार्थिभिः । लुण्ठकैर्लुण्ठ्यमानाया व्यथा गात्रेषु पप्रथे ॥३६८॥
सच्छत्त्रचामरे राज्ञ्यौ[1] दह्यमाने विलोकयन् । लोकः सर्वोपि साक्रन्दो दग्धदृष्टिरिवाभवत् ॥३६९॥
औचित्यं तेन च तदा निन्येत्यन्तपवित्रताम् । सर्वैर्यदर्थ्यमानोपि नोपाविक्षन्नृपासने ॥३७०॥ 370
सुतमुच्चलदेवस्य बालमङ्के निधित्सता । राज्येभिषेक्तुं ते केचित्तेनान्वै[1]ष्यन्त यत्नतः ॥३७१॥
लोको येष्वद्य केषांचित्तत्त्वमालोक्य सस्मितः । भिक्षामप्यटितुं जाने नैव जानाति योग्यताम् ॥३७२॥
राज्ञ्यां श्वेताभिधानायां मल्लराजस्य ये[1] सुताः । सल्हणाद्यास्त्रयोभूवन्मध्यमे प्राक्क्षयं गते ॥३७३॥
हन्तुं ज्येष्ठकनिष्ठौ द्वौ शेषौ सल्हणलोठनौ । अन्विष्टौ शङ्खराजेन भयान्नवमठं गतौ ॥३७४॥
निर्लज्जैर्निहतान्द्रोग्धॄन्विहाय मिलितैः पुनः । तन्व्यश्वारोहसचिवैरानीतः कृतचाक्रिकैः ॥३७५॥ 375
दृष्ट्वा राज्यार्हमप्राप्य कंचिज्ज्यायांस्तयोस्तदा । गर्गेण राज्ये संरम्भादभ्यषिच्यत सल्हणः ॥३७६॥
हा धिक्चतुर्णां यामानामन्तरे नृपतित्रयी । अहस्त्रियामे तत्रासीद्दृश्या या पुरुषायुषैः ॥३७७॥
ये सायमुच्चलनृपं प्राह्णे रड्डं सिषेविरे । मध्याह्ने सल्हणं प्रापुर्दृष्टास्ते राजसेवकाः ॥३७८॥
अथ लोहरकोट्टस्थः सार्धेह्नि गलिते नृपः । सुस्सलो भ्रातृमरणं श्रुत्वा तूद्भ्रान्तमानसः ॥३७९॥
गर्गेण प्रहितो दूतः स क्रन्दन्स्वं क्षिपन्क्षितौ । ततस्तं वीतसंदेहं चकारार्तप्रलापिनम् ॥३८०॥ 380
आद्यात्सल्हणवृत्तान्तपर्यन्तां नाशृणोत्कथाम् । गर्गदूताद्भ्रातृवधं स्वस्याह्वानं च केवलम् ॥३८१॥
अश्रद्दधानस्तं शीघ्रमरिच्छेदं सुदुष्करम् । तदाह्वानाय गर्गो यं प्राहिणोत्तं चलन्गृहात् ॥३८२॥
आक्रन्दमुखरो भूत्वा तां रात्रिमरुणोदये । कश्मीराभिमुखो यात्रामसंभृतबलोप्यदात् ॥३८३॥
अन्योथ गर्गदूतस्तं पथि संघटितोभ्यधात् । कृत्स्नमावेद्य वृत्तान्तं नागन्तव्यमिति ध्रुवम् ॥३८४॥
क्षिप्रं हतेषु द्रोहेषु त्वय्यसंनिहितेनुजः । कृतस्तु सल्हणो राजा कृत्यमागमनेन किम् ॥३८५॥ 385
श्रुत्वेति गर्गसंदेशं कोपादसहनो नृपः । अप्रयाणैषिणो भृत्यान्विहस्यैवं वचोब्रवीत् ॥३८६॥
नास्माकं पैतृकं राज्यं यदि रिक्थहरोनुजः । मज्ज्यायसा मया चैतद्भुजाभ्यामर्जितं पुनः ॥३८७॥
राज्यं स्वीकुर्वतोरन्यो न दाताभूत्तदावयोः । येनाहृतमिदं पूर्वं स क्रमः क्व गतोधुना ॥३८८॥
इत्युक्त्वाविरतैरेव वहन्नासीत्प्रयाणकैः । दूतांश्च पार्श्वं गर्गस्य स्वीकृत्यै प्राहिणोद्बहून् ॥३८९॥
स काष्ठवाटं संप्राप सल्हणस्य हितैषिणा । निर्गत्य गर्गचन्द्रेण चक्रे हुष्कपुरे पदम् ॥३९०॥ 390
प्रवृत्तायां विभावर्यां दूतैः कृतगतागतैः । तस्याङ्गीकृतसामापि गर्गो द्रोग्धाभ्यधीयत ॥३९१॥

---

३६९. [1]) Emended; A राज्ञो. ३७१. [1]) Emended with C; A °न्वेष्यन्त. ३७३. [1]) Thus $A_4$ C R; $A_1$ यं.

कार्यमध्यगतो राजा तथापि प्राहिणोत्तदा । धात्रेयं भ्रातरं गर्गाभ्यर्णे हितहिताभिधम् ॥३९२॥
भोगसेनः क्षणे तस्मिन्नाययौ दैवमोहितः । खाशकान्बिल्ववनजान्मध्येकृत्य नृपान्तिकम् ॥३९३॥
सोभ्यर्णे कर्णभूत्याख्यमश्वारोहं महीपतेः । विसृज्य गर्गं जेष्यामीत्युक्त्वाभूल्लोभनोद्यतः ॥३९४॥
395 कालपेक्षामपि त्यक्त्वा हन्तुं भ्रातृद्रुहं स तम् । योग्यं प्रसङ्गमन्विष्यन्न्न्न्ज्ञे लोकैरसज्जनः ॥३९५॥
यस्य भ्रातृद्रुहः पार्श्वे स त्वमाश्रीयसे कथम् । गर्गोपि तमुपालेभे दूतैरित्यादि संदिशन् ॥३९६॥
स तु मार्गात्पलाय्यायं तमसीति विलम्बकृत् । दत्तास्कन्दः क्षपापाये तं सानुगमघातयत् ॥३९७॥
पतन्रणं कर्णभूतिर्वीरवृत्त्या व्यरोचत । तस्य द्वैमातुरो भ्राता तेजःसेनोप्यनूनया ॥३९८॥
तेजःसेनस्तु शूलाग्रे नृपादेशाव्यवेद्यत । मरिचौ लवराजस्य तनूजोश्वपतेरपि ॥३९९॥
400 अवष्टम्भेन भूपोभून्निग्रहावग्रहक्षमः । न येनासितुमप्यास्था तावदासीत्तु तद्बलम् ॥४००॥
पुरोगोपि कृतः पश्चाद्योतीतेह्नि महीभुजा । स सञ्जपालस्तत्पार्श्वमथादायाययौ हयान् ॥४०१॥
तेष्वायातेष्ववष्टम्भं यातं किंचिच्च तद्बलम् । प्राप्तश्च गर्गसेनानीः सूर्याख्योनल्पसैनिकः ॥४०२॥
दुधुक्षुर्वीक्ष्य तानार्तैर्नृपोश्वमधिरोपितः । उत्सेकशठधीर्वर्म कृच्छ्राच्च परिधापितः ॥४०३॥
गगनं शलभच्छन्नमिव कुर्वन्नथापतत् । शरासारो रिपुबलात्सर्वतोच्छिन्नसंततिः ॥४०४॥
405 ओंकारं शरशूत्कारैः कृत्वा द्रोहस्य दुःसहाः । प्राहरन्राजकटके सर्वान्सर्वायुधैर्द्विषः ॥४०५॥
हतविक्षतविध्वस्तसैन्यः साहसिको नृपः । वेगादपससारैको मध्यान्निर्गत्य वैरिणाम् ॥४०६॥
गर्जत्सिन्धुरयाश्रान्तनत्युन्नतिरलङ्घ्यत । सवाजिना तेन सेतुर्दुर्लङ्घ्यः पत्रिणामपि ॥४०७॥
सञ्जपालादयो द्वित्राः शेकुस्तमनुवर्तितुम् । पृष्ठलग्ना निरुन्धन्तः स्थाने स्थाने विरोधिनः ॥४०८॥
वीरानकाभिधं वीरः स खशानां निवेशनम् । त्रिंशद्भिः शैः समं भृत्यैः प्रविष्टस्तत्यजेरिभिः ॥४०९॥
410 निरम्बरैर्निराहारैस्तिष्ठन्कतिपयैः समम् । स तत्र चित्रमाक्रम्य निर्भयो दण्डयन्खशान् ॥४१०॥
क्रमेण च हिमापातदुर्लङ्घ्याध्वनि संकटे । अविपन्नो भाग्ययोगात्प्रययौ लोहरं पुनः ॥४११॥
पदे पदे प्राप्तमृत्युरायुःशेषेण रक्षितः । तथाप्यासीत्स कश्मीरप्राप्तिमेव विचिन्तयन् ॥४१२॥
वराकं द्वारसेत्वग्राद्गर्गो हितहितं क्रुधा । विरुद्धधीर्वितस्तायां बद्धपाण्यङ्घ्रिमक्षिपत् ॥४१३॥
तस्मिन्प्रक्षिप्यमाणेप्सु क्षेमाख्यः स्वं क्षिपन्पुरः । दासोस्योच्चैःपदारोहमधःपातेपि लब्धवान् ॥४१४॥
415 राज्यप्रदः क्षतारिश्च गर्गः प्राप्तोन्तिकं ततः । प्राप सल्हणराजस्य सविशेषमधीशताम् ॥४१५॥
स भूभृन्मन्त्रिविक्रान्तिहीनो राज्यमवाप्तवान् । चक्रभ्रममिवापश्यत्सर्वतो भ्रान्तमानसः ॥४१६॥
न मन्त्रो न च विक्रान्तिर्न कौटिल्यं न चार्जवम् । न दातृता न लुब्धत्वं तस्योद्रिक्तं किमप्यभूत् ॥४१७॥
तद्राज्ये राजधान्यन्तर्मध्याह्नेपि मलिम्लुचः[1] । लोकं मुमुषुरन्याध्वसंचारस्य कथैव का ॥४१८॥
पङ्गुरप्यङ्गना कालं क्रान्त्या यत्रात्यवाहयत् । पुमानप्यभवत्तत्र साध्वसाध्वस्तधीरसौ ॥४१९॥
420 यामद्य सल्हणोन्येद्युर्भेजे तां लोठनः[1] स्त्रियम् । साधारण्यं गतो राज्यभोग इत्यभवत्तयोः ॥४२०॥
पुरुषान्तरविज्ञानविहीनस्य प्रमाद्यतः । सर्वोपि तस्य तन्त्रज्ञैर्व्यवहारो व्यग्रस्यत ॥४२१॥

३९६. [1]) Emended with C; A सन्दिशत्. ४१८. [1]) Thus A. ४२०. [1]) Emended with C; A लोष्टनः.

श्वशुरो लोठनस्योजसुहृ[1]स्तेन व्यधीयत । द्वारे तापसगोष्ठीषु योग्यो विक्रमनिष्ठुरे ॥४२२॥
यः सुस्सलभयोच्छेदमङ्गीकुर्वंस्तदागमे । स्वमन्त्रलक्षजापेन सिद्धिं मन्त्रक्षणेभ्यधात् ॥४२३॥
जिह्मो गर्गाज्ञया राजा तदप्रियमपातयत् । बद्धाश्मानं वितस्तायां त्रिम्बं नीलाश्वडामरम् ॥४२४॥
राजानुग्राहको गर्गस्तांस्तान्व्यापादयन्रिपून् । हालाहाण्डामरान्भूरीन्दत्तभोज्यानघातयत् ॥४२५॥ 425
राज्यकिंचित्करे गर्गायत्तजीवितमृत्यवः । बाह्याश्चाभ्यन्तरे चासन्नल्पे वा पृथवोपि वा ॥४२६॥
कदाचिल्लहराद्गर्गे प्रविष्टेथ नृपान्तिकम् । चुक्षोभ नगरे लोकः सर्व एव भयाकुलः ॥४२७॥
तदा ह्युदचरद्वार्ता शूलान्यारोप्य नौषु यत् । क्रुध्यन्गर्गोयमायातो हन्तुं सर्वान्नृपाश्रितान् ॥४२८॥
गर्भिणीगर्भपातिन्या तादृश्या भयवार्तया । द्वित्राण्यहान्यन्वभावि जनैर्ज्वर इवाखिलैः ॥४२९॥
ततस्तिलकसिंहाद्यैरुद्रेकाद्रागदीयत । अनवेक्ष्य नृपादेशमास्कन्दो गर्गमन्दिरे ॥४३०॥ 430
देशश्चात्युल्बणः कृत्स्नो धावति स्म धृतायुधः । प्रत्यग्रहीत्तानखिलान्गर्गचन्द्रस्त्वविह्वलः ॥४३१॥
निर्लज्जा दिल्हभट्टारलक्ककाद्यास्तुरंगमैः । भ्राम्यन्तस्तत्रादृश्यन्त गर्गावसथवीथिषु ॥४३२॥
निषिषेध न तान्राजा प्रत्युतास्कन्ददायिनाम् । लोठनं कुण्ठशक्तीनां तेषां स्फूर्त्यै व्यसर्जयत् ॥४३३॥
तेनापि योधैर्गर्गस्य रुद्धमार्गेण मन्दिरम् । न रुद्धं नापि निर्दग्धुं पारितं दत्तवह्निना ॥४३४॥
धानुष्कः केशवो नाम मठेशो लोठिकामठे । अबाधतैव नाराचैस्तद्योधान्घातयन्परम् ॥४३५॥ 435
प्रकाशेन समं राजलोके विरलतां गते । सायं सानुचरो गर्गो हयारूढो विनिर्ययौ ॥४३६॥
समरैरप्रतिहतो निनाय लहरं व्रजन् । बद्धोजसुहृमस्वस्थमासीनं त्रिपुरेश्वरे ॥४३७॥
तापसेन किमेतेनेत्युक्त्वान्येद्युर्मुमोच तम् । तं सुस्सलेपि विधुरे नृपतिं नोदपाटयत् ॥४३८॥
क्षणे क्षणेभवद्देशस्ततः प्रभृति सर्वतः । गर्गागमनसंत्रस्तपौरार्गलितमन्दिरः ॥४३९॥
अथार्तस्य महीभर्तुर्गर्गसंधानमिच्छतः । महत्तमः सहेलोभूल्लहरे दूत्यमाचरन् ॥४४०॥ 440
तेनाङ्गीकारितो गर्गः कथंचित्कन्यकार्पणम् । भृत्यास्तु तेन संबन्धं नैच्छन्भूतस्य भूपतेः ॥४४१॥
ततः सुस्सलदेवेन सह संधिं निबद्धवान् । पश्चात्संप्रार्थ्यमानोपि संबन्धं न व्यधत्त सः ॥४४२॥
मण्डले विशरारुत्वमेवं याते नृपोवधीत्[1] । सड्डं हंसरथं नोनरथं चासादितांश्चरैः ॥४४३॥
तानग्निकणसूच्यादिप्रवेशै – – – जनैः[1] । अत्यक्तानसुभिर्घोरामवस्थामन्वबीभवत्[2] ॥४४४॥
भोगसेनाङ्गनां मल्लामनुमेने स यन्नृपः । अनुसर्तुं पतिं छन्नं वसन्तीं[1] साधु तद्व्यधात् ॥४४५॥ 445
तादृग्दृष्ट्वापि वैक्लव्यं शङ्कितेन तदन्तरे । प्रमिस्ये दिल्हभट्टारो रसदानेन भूभुजा ॥४४६॥
न राजबीजी नोच्चण्डविक्रमो वा बभूव सः । शमितो गूढदण्डेन यत्तथा तेन पापिना ॥४४७॥
तं या निनिन्दानिष्पन्नपौरुषं तत्स्वसुस्तदा । तस्या वह्निप्रवेशेन सिद्धं मानवतीव्रतम् ॥४४८॥
सोल्पोपि राज्य[1]कालेभूदेवमातङ्कदुःसहः । दीर्घक्षपादृश्यमानदीर्घदुःस्वप्नसंनिभः ॥४४९॥
कालवित्सुस्सलो गर्गाद्बद्धसंधिरपि त्रसन् । न्ययुङ्क्ताग्रे सज्जपालं काश्मीरैर्न्मुख्यभाक्ततः ॥४५०॥ 450

४२२. [1]) Emended; A °स्योजस्सूह°. Cf. viii. 437. ४४३. [1]) Emended; A नृपोऽब्रवीत्. ४४४. [1]) $A_1$ °प्रवेशैर्जनः, without indicating the *lacuna*; C °वेशैरिह दुर्जनः.—[2]) Emended; A °भीभवत्. ४४५. [1]) Thus corr. by later hand from A वसन्तीं. ४४९. [1]) Emended with R C; A राजका°.

द्वारेण सह दत्तार्थो लक्ककः सल्हभूभुजा । वराहमूलं संप्राप कथंचित्प्रस्थितिं भजन् ॥४५१॥
गर्गः स्मरन्नवस्कन्दं पश्चादभ्येत्य नाशयन् । वाराहमूलेन[1] समं तस्य सैन्यमलुण्ठयत् ॥४५२॥
विदद्रौ स तु तद्योधैर्हतैश्च परिषस्वजे । अदिव्यैर्मेदिनी दिव्यैर्देहैस्त्वप्सरसां गणः ॥४५३॥
नायके गलिते शुद्धवृत्तैः सद्वंशजैर्मही । पतितैरुप्पचच्छुड्डाद्यैर्भूषिता मौक्तिकैरिव ॥४५४॥
455 आगच्छता छिन्नभीतिः सज्जपालेन लक्ककः । निराश्रयः संप्रपेदे पार्श्वं सुस्सलभूपतेः ॥४५५॥
सोथ भूभृत्सज्जपाले दूरं क्रान्तरिपौ गते । आजगामान्तिकं प्राप्तैः प्रेरितः पौरडामरैः ॥४५६॥
संधिं तव विधास्यामि सार्धं सुस्सलभूभुजा । इत्युक्त्वा सल्हणं प्रायात्तदभ्यर्णं सहेलकः ॥४५७॥
काङ्क्षिताभ्युदयं पौरैश्चातकैरिव वारिदम् । अशिश्रियन्राजवर्जं सर्व एवोच्चलानुजम् ॥४५८॥
गर्गस्य गृहिणी छुड्डाभिधानाथ तदन्तिकम् । कन्यकाद्वयमादाय परिणेतुमुपाययौ ॥४५९॥
460 उपयेमे स्वयं राजा राजलक्ष्म्यभिधां तयोः । गुणलेखां स्नुषात्वेन स्वीचक्रे तद्यवीयसीम् ॥४६०॥
सल्हणे सानुजेभ्येत्य सज्जपालेन वेष्टिते । राजापि राजसदसः सिंहद्वारं समासदत् ॥४६१॥
साक्षाद्विरोधिभृत्येन[1] द्वारमेकेन पातितम् । अभून्मोघं तमप्राप्य सार्धं वैरिमनोरथैः ॥४६२॥
ससैन्यैर्गलितद्वारराजवेश्मस्थिते रिपौ । गर्गास्कन्दविशङ्क्यासीच्चकितं सौस्सलं बलम् ॥४६३॥
गर्गे वितीर्णकन्येपि राजसैन्यमविश्वसत् । तस्थौ स्थातव्यमित्येव तृणस्पन्देपि शङ्कितम् ॥४६४॥
465 अस्ताभिलाषिणि दिने तादृक्कासहते बले । स्नेहाददहति क्ष्मापे दुर्भेदौकःस्थितान्रिपून् ॥४६५॥
प्रविश्य ग्रावनिर्भुग्नकवाटेन[1] तमोरिणा । द्वारं विवृत्याङ्गनस्थैः सज्जपालोग्रहीद्रणम् ॥४६६॥
तस्य निश्चित्य पातंगीं वृत्तिं भूयस्यरित्रजे । अनुप्रवेशं विदधे पदातिर्लक्ककाभिधः ॥४६७॥
दरदानयने काष्ठवाटसंकटविक्रमे । यस्तस्य सदृशो योधः प्रतिबिम्ब इवाभवत् ॥४६८॥
स केशवश्च स मठाधीशस्तमनुसस्रतुः । शैनेयमारुती पार्थमिव प्रार्थितसैन्धवम् ॥४६९॥
470 निर्गत्य मण्डपाल्लग्नप्रहारैस्तैः कथंचन । विवृते प्राङ्गनद्वारे धीरो राजाविशत्स्वयम् ॥४७०॥
निर्विभागे वर्तमाने संगरे सैन्ययोर्द्वयोः । प्राङ्गने प्रमयं प्रापुर्भूयांसस्तत्र शस्त्रिणः ॥४७१॥
सचिवः सल्हराजस्य पतंगग्रामजो द्विजः । आजौ प्रापाज्जको नाम स्वःस्त्रीसंभोगभागिताम् ॥४७२॥
कायस्थेनापि रुद्रेण लब्ध्वा गञ्जाधिकारिताम् । स्वामिप्रसादः साफल्यं निन्ये त्यक्त्वा तनुं रणे ॥४७३॥
सायं वनस्पतिर्लीनैः खगैर्वाचालितो यथा । प्राङ्गि प्रविष्टे प्रोड्डीननिःशब्दविहगोभवत् ॥४७४॥
475 आयोधनोर्वी वाचाला चक्रे चित्रार्पितेव सा । तथा सुस्सलभूपेन तुरंगस्थेन तर्जिता ॥४७५॥
अनारूढेङ्गनान्तःस्थे तस्मिन्सिंहासनं ध्वनिः । सुस्सलो जयतीत्येवं ढक्कावाद्यं च शुश्रुवे ॥४७६॥
मल्लराजगृहे तादृङ्नान्यस्याप्युदपद्यत । अगातां तत्र वैक्लव्यं यादृक्सल्हणलोठनौ ॥४७७॥
आबद्धकवचावश्वारूढावालिङ्ग्य सुस्सलः । बालौ युवामिति वदन्धूर्तौत्याजयदायुधम् ॥४७८॥
आदिश्य मण्डपेन्यस्मिन्बद्धयोश्च स्थितिं तयोः । प्राप्तराज्यस्ततो राजा विवेशास्थानमण्डपम् ॥४७९॥
480 त्र्यहोनांश्चतुरो मासान्भुक्तराज्यं बबन्ध तम् । सितस्य सोष्टाशीतेब्दे राधस्य त्रितयेहनि ॥४८०॥

---

४५२. [1]) Thus A. ४६२. [1]) Emended with C; A साधाद्वि°. ४६६. [1]) Emended; A ग्रामनि°.

तेन सिंहासने क्रान्ते भास्वतेव नभस्तले । क्षणादेवाखिलो लोकः क्षोभमब्धिरिवात्यजत् ॥४८१॥
विकोशशस्त्रः सन्द्रोहावेक्षणक्षोभतः सदा । व्याधलोके व्यात्तवक्त्रो मृगराज इवाभवत् ॥४८२॥
भ्रातृद्रुहां कुलच्छेदमन्विष्यान्विष्य कुर्वता । न तेन नीतिनिष्ठेन शिशवोऽप्यवशेषिताः ॥४८३॥
जनस्य वीक्ष्य दौर्जन्यमधृष्टाकारतां वहन् । स कार्यापेक्षयाप्यासीन्न क्वाप्याहितमार्दवः ॥४८४॥
वस्तुतस्त्वार्द्रहृदयः क्रूरं दमयितुं जनम् । अवास्तवं तद्वीमत्वाद्विक्तिव्याल इवादधे ॥४८५॥ 485
कालवित्समयत्यागी प्रगल्भः प्रतिभानवान् । इङ्गितज्ञो दीर्घदृष्टिः स एवान्यो न कोऽप्यभूत् ॥४८६॥
अधिकः कोऽपि कोऽप्यूनः कोऽपि तस्य समो गुणः । दोषोऽथ वा पूर्वजस्य स्वभावैक्येऽप्यदृश्यत ॥४८७॥
अन्वकारि समानेऽपि कोपे तत्पूर्वजन्मनः । कोपेन विषमालर्कं तदीयेन तु सारघम् ॥४८८॥
न बभूव स वेशादौ सासूयोऽनुनितं पुनः । स्थितिभेदभयात्सेहे नोत्सेकमनुजीविनाम् ॥४८९॥
नैच्छत्स द्वन्द्वयुद्धादिसंधानैर्मानिनां वधम् । तस्मिन्प्रमादान्निर्व्यूढे त्वदीयत कृपाकुलः ॥४९०॥ 490
वाक्पारुष्यं नृपस्यासीदाद्यस्यातङ्कदुःसहम् । तस्य तु प्रणयप्रायं हिंसाद्याबाधवर्जितम् ॥४९१॥
तस्यार्थगृध्नोरुत्पादो भूयानास्ते स्म संपदाम् । त्यागो विषयकालादिनैयत्यात्तु[1] मितोऽभवत् ॥४९२॥
नवकर्माश्वबाहुल्यप्रिये तस्मिन्दरिद्रताम् । तत्यजुः कारवो वाजिविक्रेतारश्च दैशिकाः ॥४९३॥
दुःसहव्यसनोत्पत्तौ जिगीषोः प्रशमैषिणः । तस्यासीदपरित्याज्यं न किंचिद्वसुवर्षिणः ॥४९४॥
तस्येन्द्रद्वादशी भूरिपराध्यांशुकदायिनः । यथा नृपस्य शुशुभे तथा नान्यस्य कस्यचित् ॥४९५॥ 495
यथा प्रागुच्चलो राजा सुप्रापः प्रियसेवकः । स तथा सेवकैरासीद्भूम्ना दुर्लभदर्शनः ॥४९६॥
नोच्चलादपरस्यासीद्व्यसनं हयवाहने । नान्यस्य सुस्सलनृपाद्दाक्ष्यं तत्र च पप्रथे ॥४९७॥
शममुत्पन्नमुत्पन्नं निन्ये दुर्भिक्षमुच्चलः । राज्ये सुस्सलदेवस्य न तत्स्वप्नेऽप्यदृश्यत[1] ॥४९८॥
किमन्यदखिलैः सोऽभूदग्रजादधिको गुणैः । त्यक्त्वा त्यागार्थनैस्पृह्यसुप्रापत्वानि केवलम् ॥४९९॥
औच्चलैः पालको गर्गो यं राज्ये कर्तुमैहत । सहस्रमङ्गलस्तेन निरवास्यत स क्रुधा ॥५००॥ 500
तस्मिन्भद्रावकाशस्थे प्रासनामा तदात्मजः । काञ्चनोत्कोचदश्चक्रे डामरैः सह चाक्रिकाम् ॥५०१॥
असंत्यजन्नुच्चलजं पितृव्येगार्थितं शिशुम् । प्रसङ्गे तत्र गर्गोऽपि प्रातिकूल्यमदर्शयत् ॥५०२॥
प्रहितानां नरेन्द्रेण तृणानामिव शस्त्रिणाम् । गर्गदावाग्निदग्धानां निःसंख्यानामभूत्क्षयः ॥५०३॥
गर्गस्यालोऽपि विजयः स देवसरसोद्भवः । प्रातिलोम्येन नृपतिसैन्यानां कदनं व्यधात् ॥५०४॥
राज्यप्राप्तेर्मासमात्रे दिनैरभ्यधिके गते । तेनोत्पिञ्जेन राज्ञोऽभून्न धीरस्याकुलं मनः ॥५०५॥ 505
सुरेश्वर्यमरेशोर्वीवितस्तासिन्धुसंगमाः । गर्गेण राजसैन्यानां[1] कृताः कदनकाङ्क्षिणः ॥५०६॥
संग्रामे तुमुलेमात्यौ शृङ्गारकपिलौ हतौ । कर्णभूद्रकनामानौ तन्त्रिणौ च सहोदरौ ॥५०७॥
निहतानन्तसुभटसमूहान्तरलक्षितान् । तादृशानपि निष्क्रष्टुं नासीत्कस्यापि पाटवम् ॥५०८॥
हर्षमित्रः कम्पनेशो भूभर्तुर्मातुलात्मजः । विजयेन हतानीको विदधे विजयेश्वरे ॥५०९॥

---

४९२. [1]) Emended; A °नैयत्या तु. ४९८. [1]) Emended with C; A स्वप्नेऽदृश्यत. ५०६. [1]) Emended with C; A राज्यसै°.

510 पुत्रो मङ्गलराजस्य तिल्हो राजान्यवंशजः । तत्र त्रिब्बाकरमुखास्तन्त्रिणश्च प्रमिम्यिरे ॥५१०॥
राजानीके सञ्जपालः प्रवीरप्रवरोभवत् । भूरिसैन्येन गर्गेण नाल्पसैन्योपि यो जितः ॥५११॥
संस्तम्भ्य विजयक्षेत्रे लक्ककाद्यैर्विसर्जितैः । धीरो राजा बलं भग्नं स्वयं गर्गोन्मुखं ययौ ॥५१२॥
सोन्विष्य गर्गेण हतान्योधान्नाशीकृतान्बहून् । निरदाहयदन्येद्युरसंख्येयैश्चिताग्निभिः ॥५१३॥
बलिना भूभुजा गर्गः पीड्यमानः शनैः शनैः । ततः स्ववसतीर्दग्ध्वा हलाहाभिमुखोभवत् ॥५१४॥
515 स तत्र रत्नवर्षाख्यं गिरिदुर्गं समाश्रितः । हताश्वोनुचरैस्त्यक्तो नृपेणाशादवेष्टयत ॥५१५॥
अन्वारूढेन तत्रापि सञ्जपालेन वेष्टितः । चरणौ शरणीचक्रे राज्ञो दत्त्वोच्चलात्मजम् ॥५१६॥
अन्तिकस्थं नृपे कर्णकोष्ठजं मल्लकोष्ठकम्[1] । विरुद्धं रुद्धवत्याशु गर्गो विश्वासमाययौ ॥५१७॥
गृहीतप्रणतिस्तस्य नष्टेषु विजयादिषु । शमितोपप्लवो राजा विवेश नगरं शनैः ॥५१८॥
गत्वाथ लोहरे न्यस्य बद्धा सल्हणलोठनौ । स कल्हसोमपालाद्यै रेमे संसेवितो नृपैः ॥५१९॥
520 भूयः प्रविष्टः कश्मीरान्सेव्यः सर्वातिशायिभिः । गर्गं प्रसादैरनयत्प्रवृद्धिमधिकाधिकैः ॥५२०॥
ग्रीष्मार्कप्रतिमे तस्मिन्ह्लादिनावनुचक्रतुः । महादेवी कुमारश्च द्रुमच्छायावनानिलौ ॥५२१॥
डामरौ देवसरसोद्भवौ विजयगोत्रिणौ । बृहट्टिकस्तथा सूक्ष्मटिक्को वेलां प्रचक्रतुः ॥५२२॥
सानाथ्यकाङ्क्षिणौ पार्थिवस्य प्रविशतः पुरः । लोकपुण्ये तस्थतुस्तौ क्रन्दद्भिः स्वानुगैः समम् ॥५२३॥
विजये गर्गसंबन्धात्सदाक्षिण्यो महीपतिः । सदाचारं परित्यज्य वेत्रिभिस्तावताडयत् ॥५२४॥
525 तौ मानिनश्च तद्भृत्याः कृष्टशस्त्रास्ततो व्यधुः । साहसं सुमहत्सैन्ये प्रहरन्तो महीपतेः ॥५२५॥
श्वपाकोभोगदेवाख्यः कृपाण्या प्राहरन्नृपम् । धीरो गज्जकनामा च करवालेन पृष्ठतः ॥५२६॥
सावशेषतया भूपस्यायुषो मोघतां ययुः । द्विषत्प्रहृतयो वाहतुरगी तु व्यपद्यत ॥५२७॥
नृपस्यान्तरयन्वैरिप्रहृतिं बाणवंशजः । निहतस्तत्र शृङ्गारसीहः सादीशसस्यकः ॥५२८॥
सैनिकैस्तैर्बृहट्टिकाभोगदेवादयो हताः । सूक्ष्मटिक्कस्तु निस्तीर्णो हेतुर्भाविनि विप्लवे ॥५२९॥
530 शूले व्यापादिता गज्जकादयो द्रोहसंश्रिताः । संदेहितासुरित्यासीद्राजा गर्गानुकूल्यभाक् ॥५३०॥
न भवेत्पविपातेपि प्रमयः समयं विना । प्रसूनमप्यसून्हन्ति जन्तोः प्राप्तावधेः पुनः ॥५३१॥
ज्वालाभिरौर्वदहनस्य पयोधिमध्ये न म्लानतामपि हि यानि मुहुः स्पृशन्ति ।
तान्येव यान्ति विलयं किल मौक्तिकानि कान्ताकुचेषु युवभावभुवोष्मणापि ॥५३२॥
प्राक्सेवामपि विस्मृत्य परोत्सेकासहिष्णुना । मण्डलात्सञ्जपालाद्या निरवास्यन्त भूभुजा ॥५३३॥
संबन्धी काकवंश्यानां यशोराजाभिधस्ततः । सहस्रमङ्गलाभ्यर्णं राज्ञा[1] निर्वासितो ययौ ॥५३४॥
535 तमन्यांश्च विनिर्यातान्देशाद्गृह्णन्समृद्धिमान् । ऐच्छल्लब्धप्रतिष्ठः स राज्ञः प्रत्यभियोगिताम् ॥५३५॥
तत्पुत्रः कान्दमार्गेण विविक्षुः क्ष्मापसैनिकैः । यशोराजे क्षते प्रासः प्रत्यावृत्य ययौ भयात् ॥५३६॥
अथान्येष्वपि भृत्येषु राज्ञा निर्वासितेषु सः । मिलितेषु प्रथां यावद्यथावदुपलब्धवान् ॥५३७॥

---

५१४. [1]) Emended; A फलाहा°. Cf. हालाहाण्डामरान् viii. 425. ५१७. [1]) Emended; A with diplography मल्लकोष्टकोष्टकम्. ५३४. [1]) Emended with C; A राजा.

उपरागे नवे सज्जे पार्वतीयास्त्रयो नृपाः । चाम्पेयो जासटो वज्रधरो बब्बापुराधिपः ॥५३८॥
राजा सहजपालश्च वर्तुलानामधीश्वरः । युवराजौ त्रिगर्तोर्वीवल्लापुरनरेन्द्रयोः ॥५३९॥
बल्ह आनन्दराजश्च पञ्च संघटिताः क्वचित् । प्रस्थानार्थं कृतपणाः कुरुक्षेत्रमुपागताः ॥५४०॥ 540
आसमत्याहतं तावदभ्येत्य नरवर्मणः । प्रापुर्भिक्षाचरं तेन दत्तपाथेयकाञ्चनम् ॥५४१॥कुलकम् ॥
स जासटेन संबन्धिस्नेहाद्विहितसत्कृतिः । नीतोन्यैश्च प्रथां भूपैर्वल्लापुरमथाययौ ॥५४२॥
देशाद्विनिर्गतैर्बिम्बप्रमुखैर्वर्धितप्रथे । तस्मिन्प्राप्ते सहस्लस्य प्रतिष्ठा लघुतामगात् ॥५४३॥
पौत्रोयं हर्षदेवस्य क एते राज्य इत्यथ । उक्त्वा त्यक्त्वा सहस्लादींस्तमेवाशिश्रियञ्जनाः ॥५४४॥
कृतज्ञभावमुत्सृज्य संबन्धिस्नेहमोहितः । दर्यको राज[1]पुत्रस्तं राज्ञा निर्वासितोप्यगात् ॥५४५॥ 545
पुत्रः कुमारपालस्य तत्पितुर्मातुलस्य सः । वृद्धिं सुस्सलदेवेन पुरा निन्ये हि पुत्रवत् ॥५४६॥
प्रेरितो युवराजेन जासटेन च कन्यकाम् । वल्लापुरेशः प्रददौ भिक्षवेथ स पद्मकः ॥५४७॥
तद्देशठक्कुरो भूपान्संघटय्याखिलांस्ततः । तमैच्छद्गयपालाख्यः कर्तुं पैतामहे पदे ॥५४८॥
तां वार्तां श्रुतवान्राजा यावदासीत्समाकुलः । गयपालो हतस्तावद्गोत्रजैश्छद्मना बली ॥५४९॥
पद्मके तान्प्रतिगते[1] योद्धुं प्रधनमध्यगः । भिक्षाचरचमूधुर्यो दर्यकोपि व्यपद्यत ॥५५०॥ 550
तेन प्रधाननाशेन ततो भिक्षाचरो ययौ । अकिंचित्करतां मेघ इवावग्रहवारितः ॥५५१॥
आसमत्यां प्रयातायां क्षीणे[1] पाथेयकाञ्चने । श्वशुरोपि ययौ तस्य शनैर्मन्दोपचारताम् ॥५५२॥
चतुष्पञ्चानि वर्षाणि तिष्ठञ्जासटमन्दिरे । ग्रासाच्छादनमात्रं स ततः क्लेशात्समासदत् ॥५५३॥
ठक्कुरो देङ्गपालोथ चन्द्रभागातटाश्रयः । दत्त्वा सुतां बप्पिकाख्यां तं निनाय निजान्तिकम् ॥५५४॥
प्राप्तसौख्यो वसंस्तत्र कंचित्कालं भयोज्झितः । स राजबीजी दैन्येन शैशवेन च तत्यजे ॥५५५॥ 555
तदन्तरे साहसिकः प्रासः सोहस्लिरुन्मदः । गतागतानि कुर्वाणः संरम्भमनयन्नृपम् ॥५५६॥
स सिद्धपथमार्गेण विविक्षुर्विप्लवोन्मुखः । स्वैरेव भृत्यैर्भूभर्तुर्बद्ध्वा पापैः समर्पितः ॥५५७॥
तत्रोत्पिञ्जे परं सत्त्वं सज्जपालस्य पप्रथे । खिन्नोपि द्रोहविमुखो यत्स देशान्तरं ययौ ॥५५८॥
तस्मिञ्शूरे कुलीने च किं वाच्यं स दिगन्तरे । शौर्येणैव यशोराजः पप्रथे यत्तदद्भुतम् ॥५५९॥
अथ राजा निवार्याद्यान्सहेलादीन्महत्तमान् । सर्वाधिकारे विदधे कायस्थं गौरकाभिधम् ॥५६०॥ 560
स तापसस्य संबन्धी कस्यचिद्द्विजयेश्वरे । सेवया लोहरस्थस्य तस्य वाल्लभ्यमाययौ ॥५६१॥
शमिते पूर्वकायस्थवर्गे तेन ततः क्रमात् । नीतः सर्वाधिकारित्वं सोन्यामेव स्थितिं व्यधात् ॥५६२॥
अशेषकर्मस्थानेभ्यो वृत्तिं राजोपजीविनाम् । निर्वार्य[1] कोशे भरणं तेनाकार्यनिशं प्रभोः ॥५६३॥
म्रदिम्ना पाप्मिनस्तस्य नाज्ञायि क्रूरता जनैः । मधुरिम्णा विषस्येव शक्तिः प्राणापहारिणी ॥५६४॥
न्यधात्कृपणवित्तं स पूर्वसंचितनाशकृत् । विशुद्धे नृपतेः कोशे हिमे हिममिवाम्बुदः ॥५६५॥ 565
कोशः कृपणवित्तेन प्रविष्टेन हि दूषितः । भुज्यते भूमिपालानां तस्करैरथ वारिभिः ॥५६६॥

---

५३८. [1]) Comp. vii. 588. ५४५. [1]) $A_1$ with diplography दर्यको राजको राजपुत्रस्तं. ५५०. [1]) Emended; A प्रतिगतो. ५५२. [1]) Emended; A क्षणे. ५६३. [1]) Emended; A निर्वार्य.

लोभाभ्यासेन भूयोपि संचिन्वन्कोशमन्वहम् । आस्ते स्म लोहरगिरौ प्रहिण्वन्सर्वसंपदः ॥५६७॥
गौरकाश्रयिभिर्वद्धपञ्जकाद्यैर्नियोगिभिः । विधीयते स्म निःसारा महोत्पातैरिव क्षितिः ॥५६८॥
उच्चलक्ष्मापतौ शान्ते मूर्धारूढशिलोपमे । अबाधन्त पुनर्लोकं व्याधा इव नियोगिनः ॥५६९॥
570 प्रशस्तकलशस्यान्ते तद्भ्रातृतनयः परम् । कायस्थः कनको नाम श्लाघ्यामकृत संपदम् ॥५७०॥
नानादिगन्तरायातो दुर्भिक्षपतितो जनः । येनाविच्छिन्नसत्त्रेण शान्तव्यापद्व्यधीयत ॥५७१॥
संजातमुच्चलस्यान्ते येषां तत्त्वपरीक्षणम् । त एव चक्रिरे राज्ञा प्रमत्तेनाधिकारिणः ॥५७२॥
द्वारे तिलकसिंहः स तादृक्तेन व्यधीयत । राजस्थाने च जनकः काणस्तस्य सहोदरः ॥५७३॥
प्रतापैर्नृपतेस्तीक्ष्णैः करमाक्रान्तमण्डलः । जिताद्वाराधिपः सोपि स्वीचकारोरशाधिपात् ॥५७४॥
575 काकवंश्यस्तु तिलकः क्ष्माभुजा दत्तकम्पनः । निन्ये प्रकम्पमहितान्[1]प्रकम्पन इव द्रुमान् ॥५७५॥
ग्राम्यशस्त्रभृता शोडराजस्थानाधिकारिणा । नृपप्रतापैरहिताः सज्जकेनापि निर्जिताः ॥५७६॥
काकवंशाश्रयाल्लब्धप्रराजद्वारेण[1] धीमता । अट्टमेलकभृत्येनाप्यवापीष्टेन मन्त्रिता ॥५७७॥
एवं स्वाहंक्रियात्यक्तगुणापेक्षेण मन्त्रिणः । कुर्वतोच्चावचांस्तेन कश्चित्कालोत्यवाह्यत ॥५७८॥
वितस्तापुलिने सोथ कर्तुं प्रारभतोन्नतम् । स्वस्य श्वश्र्वाश्च पत्न्याश्च नाम्ना सुरगृहत्रयम् ॥५७९॥
580 उत्पातवह्निना दग्धो निःसंख्यधनदायिना । तेन दिद्दाविहारोपि नूतनत्वमनीयत ॥५८०॥
पुरीमट्टिलिकां[1] जातु स प्रयातोन्तिकस्थितैः । आप्तैः प्रैर्यत कल्हाद्यैर्गर्गोच्छेदाय भूपतिः ॥५८१॥
गार्गिः कल्याणचन्द्राख्यस्ताननतिक्रम्य हि स्फुरन् । मृगयादिक्षणे तेषामसूयामुदपादयत् ॥५८२॥
सर्वाभ्यधिकसामर्थ्यं तं निग्राह्यं निवेद्य ते । नित्योपजपनैर्गर्गे विक्रियामनयन्नृपम् ॥५८३॥
बद्ध्वा त्वां लोहरे भूभृदिच्छति क्षेप्तुमित्यथ । गर्गः शशङ्के भृत्येन राज्ञा चैकेन बोधितः ॥५८४॥
585 ततः स सप्लुतस्तत्र पलाय्य स्वभुवं ययौ । दिनैर्भूपोपि संप्राप्तः प्रविवेश स्वमण्डलम् ॥५८५॥
अन्योन्यशङ्कया भेदं यातयो राजगर्गयोः । चाक्रिकैः कृतसंचारैर्वैरं प्रौढिमनीयत ॥५८६॥
स्यालं गर्गस्य विजयं स्नेहशेषवशंवदः । समीपात्स त्यजन्राजा पश्चात्तापेन पस्पृशे ॥५८७॥
कारायां गर्गशत्रुर्यस्तेन पूर्वं व्यधीयत । स मल्लकोष्ठकस्तस्मिन्कालेमुच्यत बन्धनात् ॥५८८॥
निबद्धयौनसंबन्धं डामरैरपरैः समम् । तं कारयित्वा सामर्षो निनाय बलितां नृपः ॥५८९॥
590 शनैर्युद्धाय निर्याते राजसैन्येथ पूर्ववत् । गर्गेण कदनं चक्रे योधानाममरेश्वरे ॥५९०॥
तत्र सर्वातिशायिन्या वीरवृत्त्या नृपाश्रितः । शमालाडामरः प्राप प्रथां पृथ्वीहरः परम्॥५९१॥
रणे द्वारपतेर्गर्गनिर्जितस्य पलायने । शौर्यं तिलकसिंहस्य प्राप सर्वोपहास्यताम् ॥५९२॥
हतशेषाः क्षताः शस्त्रवस्त्रादि त्याजिता भटाः । तदीया गर्गचन्द्रेण कारुण्यात्केपि रक्षिताः ॥५९३॥
वह्निसात्क्रियमाणेषु वीरदेहेषु सर्वतः । राजसैन्ये चिताग्नीनां गणना कापि नाभवत् ॥५९४॥
595 कृष्टसैन्येन राज्ञाथ गर्गो निर्दग्धमन्दिरः । संत्यज्य लहरं प्रायाद्गिरिं धुडावनाभिधम् ॥५९५॥
गिरिमूलोपविष्टस्य भूपतेः सैनिकैः समम् । तेषु तेष्वकरोन्नित्यं गिरिमार्गेषु संगरम् ॥५९६॥

५७५. [1]) Emended with C; A प्रकम्पं सहिता°. ५७७. [1]) Emended; A °श्रयान्प्राप्त°. ५८१. [1]) Thus A; cf. viii. 764. 831. 1947 (C).

कूटयुद्धैर्नृपानीकं प्रतिरात्र्युपतापयन् । रणे त्रैलोक्यराजादिप्रमुखांस्तन्निर्णोवधीत् ॥५९७॥

फाल्गुने[1] हिमसंभारभीमे परिमितानुगः । स धीरो राज्यपि रिपौ न धैर्येण व्ययुज्यत ॥५९८॥

धैर्यवान्काकवंश्यस्तु तिलकः कम्पनापतिः । परं शिखरिशृङ्गस्थं शक्तोभूत्तं प्रध.वितुम् ॥५९९॥

पीडितस्तेन संप्रेष्य स्वभार्यातनयेन्तिकम् । निन्येनुकूलतां भूपं प्रसादच्छादितक्रुधम् ॥६००॥ 600

गूढमन्युर्नृपः संधिं बद्ध्वा प्रचलितस्ततः । तं मल्लकोष्टकं वृद्धिं निनाय न पुनः शमम् ॥६०१॥

सेहेथ लहरे द्वित्रान्मासानविशदे नृपे । स मल्लकोष्ठकासह्यस्पर्धी नीचविमाननाम् ॥६०२॥

तन्मध्ये नृपतिर्गूढं विभेदं तद्बलं नयन् । तदीयानकरोद्भृत्यान्कर्णादीन्स्वहितावहान् ॥६०३॥

स खिन्नो नीचदायादसमशीर्षिकयाथ तैः । प्रेरितः पार्थिवा[1]भ्यर्णं सदारतनयोविशत् ॥६०४॥

स्नातुं प्रवृत्तः पार्श्वस्थं स्नानद्रोण्युपरिस्थितः । अथैकदा तमाक्षिप्तं शस्त्रमत्याजयन्नृपः ॥६०५॥ 605

कुर्यादास्थामवष्टम्भे कोन्यः पौरुषगर्वितः । आक्षेपसमये सोपि यत्क्लैब्यं भीरुवद्ययौ ॥६०६॥

उत्खातरोपितनृपः क्व नु सोभिमानः कार्पण्यभागितरलोकसमा क्व वृत्तिः ।

यद्वावशं नटयति प्रकटं विधातुरिच्छैव यन्त्रगुणपङ्क्तिरिवात्र जन्तुम् ॥६०७॥

अशक्नुन्युधि ये द्रष्टुमपि तं नास्य ते शठाः । केपि राजप्रिया बाहू ग्रन्थिबद्धौ तथा व्यधुः ॥६०८॥

श्रीसंग्राममठाभ्यर्णमन्दिरस्था नृपे स्वयम् । संक्रान्ते[1] प्राङ्गनं युद्धात्कल्याणाद्या व्यरंसिषुः ॥६०९॥

जीवन्तं पितरं श्रुत्वा विदेहो गर्गनन्दनः । सान्त्वमानः स्वयं राज्ञा कृच्छ्राच्छस्त्रं समार्पयत्[1] ॥६१०॥ 610

गर्गः सदारतनयो राजौकस्येव भूभुजा । उपाचर्यत दाक्षिण्याद्बद्धो भोगैर्निजोचितैः ॥६११॥

गार्गिः पलाय्य यातोपि चतुष्को निजमन्दिरात् । अवर्णभाजा कर्णेन दृष्ट्वा राज्ञः समर्पितः ॥६१२॥

रूढच्छन्नप्रकोपस्य प्रसादस्य महीभुजः । अन्तःशुद्धिविहीनस्य व्रणस्येव न निश्चयः ॥६१३॥

दरद्राजे मणिधरे दिदृक्षावागते नृपः । तत्संगमाय निर्यातो गर्गं भृत्यैरघातयत् ॥६१४॥

द्वित्रान्मासान्सोनुभूतकारागारस्थितिर्निशि । सत्रा त्रिभिः सुतैः कण्ठबद्धरज्जुर्न्यपात्यत ॥६१५॥ 615

निशां त्रिम्बमुखान्निन्ये यथैव स नृपानुगैः । तथैव कण्ठबद्धाश्मा सपुत्रोक्षिप्यताम्भसि ॥६१६॥

तं चतुर्नवते वर्षे हत्वा भाद्रपदे नृपः । सुखेच्छुः प्रत्युत प्राप दुःखमुद्भूतविप्लवः ॥६१७॥

कल्हे कालिञ्जराधीशे महादेव्याश्च मातरि । मल्लाभिधायां शान्तायां स ततोभूत्सुदुःखितः ॥६१८॥

तन्मध्ये नागपालाख्यः सोमपालस्य सोदरः । तेन प्रतापपालाख्ये हते द्वैमातुरेग्रजे ॥६१९॥

शाङ्कितस्तन्निहन्तारं हत्वामात्यं पलायितः । त्यक्तस्वदेशः शरणं ययौ सुस्सलभूभुजम् ॥६२०॥ 620

क्रुद्धः स कारणात्तस्मात्प्रणयं वशवर्तिनः । अगृह्णन्सोमपालस्य निश्चिकायाभिषेणनम् ॥६२१॥

निश्चित्य सर्वोपायानामसाध्यं विधुरं नृपम् । स भिक्षाचरमानिन्ये तस्य वल्लापुराद्रिपुम् ॥६२२॥

निशम्यानीतदायादं तं प्रकोपाकुलो नृपः । दत्तास्कन्दोविशत्तीव्रतेजा राजपुरीं ततः ॥६२३॥

दत्त्वा राज्ये नागपालं सोमपाले पलायिते । सप्त मासान्स तत्रासीत्तांस्तान्संत्रासयन्रिपून् ॥६२४॥

---

५९८. [1]) A फाल्गुणे. ६०४. [1]) Emended with C; A पार्णिवा°. ६०५. [1]) Emended; A °क्षिप्तशस्त्रं. ६०९. [1]) Emended; A सङ्क्रामे प्रा°. ६१०. [1]) Emended with C; A समर्पयत्.

625 राज्ञां वज्रधरादीनां राजा वज्रधरोपमः । सेवावसरदानेन प्रसादत्रिवशोभवत् ॥६२५॥
भ्रमतां चन्द्रभागादिसरित्तीरेषु सर्वतः । तत्सैन्यानां[1] मुखमपि द्रष्टुं शेकुर्न वैरिणः ॥६२६॥
अग्रगाम्यभवत्तस्य तिलकः कम्पनापतिः । पृथ्वीहरो डामरश्च मार्गरक्षणदीक्षितः ॥६२७॥
धार्मिको नृपतिर्ब्रह्मपुरीं देवगृहांश्च सः । मण्डलं द्विषतो रक्षन्प्रपेदे मौलिकं फलम् ॥६२८॥
तस्येन्द्रविभवस्यान्यत्सामर्थ्यं वर्ण्यते कियत् । आययावश्वघासोपि सैन्ये यस्य स्वमण्डलात् ॥६२९॥
630 तत्र प्रसङ्गे तत्राशीभवन्सुजनवर्धनः । दूरस्थस्यानयद्रूढिं गौरकस्योपरि क्रुधम् ॥६३०॥
राष्ट्रगुप्त्यै स्वयं राज्ञा स्थापितः[1] स स्वमण्डले । अज्ञायि पैशुनाशुद्धबुद्धिना निखिलार्थहृत् ॥६३१॥
तत्संबन्धेन जनकं स निन्दन्नगराधिपम् । मनस्तिलकसिंहस्य तद्भ्रातुरुदवेजयत् ॥६३२॥
हत्वाधिकारं त्वस्याथ क्रुद्धः पर्णोत्ससंभवम् । अनन्तात्मजमा[1]नन्दाभिधं द्वाराधिपं व्यधात् ॥६३३॥
सोमपालादयः श्लाघ्यास्तदा प्रकृतयोभवन् । राज्ञस्तथा स्थितस्यापि न याः सविधमाययुः ॥६३४॥
635 स पञ्चनवते वर्षे वैशाखेथ स्वमण्डलम् । प्राविशन्नागपालोपि राज्यभ्रष्टस्तमन्वगात् ॥६३५॥
दुःसहातङ्कदूतेन लोभेन क्षोभितः[1]स्ततः । अदण्डयच्च वास्तव्याननयच्चाल्पतां व्ययम् ॥६३६॥
निवार्य गौरकं कार्यात्कार्यिणस्तत्समाश्रितान् । तस्य दण्डयतः सर्वे विरागं मन्त्रिणो ययुः ॥६३७॥
अकाण्डे व्यवहारेषु स विपर्यासितेष्वभूत् । अवसन्नधनो गाढमप्रौढान्नवमन्त्रिणाम् ॥६३८॥
सौवर्णीरिष्टिकाः कृत्वा प्राहिणोल्लोहरान्तरे । काञ्चनाद्रिप्रतीकाशान्स्वर्णराशीनढौकयत् ॥६३९॥
640 अथ दण्डयितुं गर्गभृत्यान्दण्डाधिकारिणम्[1] । लहरेकृत गर्गस्य मन्त्रिणं गज्जकाभिधम् ॥६४०॥
तं दण्डभीतैर्गर्गस्य सेवकैराश्रितस्ततः । विश्वस्तमवधीत्क्रुध्यंश्छद्मना मल्लकोष्ठकः ॥६४१॥
लहरे विप्लुते राजा द्वैमातुरमथाग्रजम् । मल्लकोष्ठस्यार्जुनाख्यं बबन्ध सविधस्थितम् ॥६४२॥
हस्तं च सङ्गचन्द्रस्य पुत्रं गोत्रिणमप्यसौ । बद्ध्वा व्यधाद्भिङ्काख्यं तस्य तद्भीतरं हितम् ॥६४३॥
पूर्ववैरं स्मरन्सूर्यं सपुत्रं तं परां[1]स्तथा । बबन्धानन्दचन्द्रादीन्नीत्युल्लङ्घनमाचरन् ॥६४४॥
645 निर्गते लहरं मल्लकोष्ठके विद्रुते ततः । आरोप्यार्जुनकोष्ठं तं शूले कोपाद्व्यपादयत् ॥६४५॥
निवेश्य सैन्यं तत्राथ प्रविष्टस्य पुरं ययुः । डामरा निखिलास्तस्य वैरं विश्वस्तघातिनः ॥६४६॥
क्रुध्यन्पृथ्वीहरायापि कृतसेवाय मन्त्रिभिः । आदिष्टैः कम्पनेशाद्यैरवस्कन्दमदापयत् ॥६४७॥
कथं चित्स तु निस्तीर्णो जयन्तीविषयौकसः । बन्धोः क्षीराभिधानस्य प्रविवेशोपवेशनम् ॥६४८॥
दिनेवन्तिपुरादीनां पुराणामन्तरेण तम् । व्रजन्तं विधुरं केचिन्नाशकन्बाधितुं द्विषः ॥६४९॥
650 तद्वैधुर्यविधानं तत्प्रजासंहारकार्यभूत् । प्रमादा[1]द्भूपतेः क्रुद्धवेतालोत्थापनोपमम् ॥६५०॥
क्षीरोथ तीक्ष्णधीर्वृद्धः सह पृथ्वीहरेण सः । अढौकयच्छमाङ्गासान्तरेष्टादश डामरान् ॥६५१॥
अभेद्यसंघांस्ताञ्जेतुं निर्यातो विजयेश्वरम् । न्ययुङ्क्त भूभृत्संभ्रान्तस्तिलकं कम्पनापतिम् ॥६५२॥
संग्रामैः खण्डशः कुर्वन्स तानतुलविक्रमः । विद्रावयामास रयैः पुरोवायुरिवाम्बुदान् ॥६५३॥

---

६२६. [1]) Emended; A तान्सैन्य°. ६३१. [1]) Emended with C; A स्थापितां. ६३३. [1]) Emended; A अनन्ताधिपमा°. Cf. viii. 713. 1005. 1042. ६३६. [1]) Emended; A क्षोभतस्ततः. ६४०. [1]) Emended with C; A °कारिणाम्. ६४४. [1]) Emended with C; A परंस्त°. ६५०. [1]) Emended with C; A प्रमाद्भूपतेः

संमानावसरे तस्य जित्वायातस्य डामरान् । प्रवेशं प्रत्युत नृपो न प्रादादवमानकृत् ॥६५४॥

स भग्नमानो नगरं प्रविष्टे नृपतौ ततः । खिन्नः स्ववेश्मन्यवसत्स्वामिकार्ये निरुद्यमः ॥६५५॥ 655

संप्राप्ताः समशीर्षिकां विसदृशैस्तुल्यैर्निरुद्धोदया वैरे विद्विषतां कृता धुरि परं संधौ बहिः स्थापिताः ।
कार्यान्तेऽद्भुतकर्मकौशलकृतावज्ञा विरागस्पृशः सर्पाकीर्णमिवाशु वेश्म गृहिणो भृत्यास्त्यजन्ति प्रभुम् ॥६५६॥

त्यक्तकार्यानुसंधाने तस्मिन्सर्वत्र डामराः । संभूतिं विक्रियां निन्युः कृषिं क्षयधना इव ॥६५७॥

आतङ्कोद्वेजितैर्विप्रैः कृतप्रायैः पुरे पुरे । वह्नौ हुताग्निभिर्घोरा कुकीर्तिरुदपद्यत ॥६५८॥

उपसर्गेण तुरगाः करभाश्च क्षयं गताः । न्यवेदयन्मण्डलस्य प्रत्यासन्नमहाभयम् ॥६५९॥

प्रत्यासन्नाशुभा कम्पं भयेन जनता दधे । आसन्नवज्रपतना वातेनेव द्रुमावलिः ॥६६०॥ 660

अथ षण्णवताब्दस्य प्रारम्भे डामरावलिः । ऊष्मस्पृष्टा हिमानीव बभूवापतनोन्मुखी ॥६६१॥

प्रथमं देवसरसाद्विप्लवप्रसरस्ततः । मुखं व्यथावहो गण्ड इव पाकं व्यदर्शयत् ॥६६२॥

एककार्यत्वमानीय टिक्कादीन्गोत्रजान्बली । स्थामस्थं विजयोऽभ्येत्य राजानीकमवेष्टयत् ॥६६३॥

तत्र कायस्थपुत्रोऽपि स्थामस्थानीकनायकः । संरम्भं नागवट्टाख्यः सेहे तस्य चिरं युधि ॥६६४॥

कथंचिदथ भूपेन प्रार्थितः कम्पनापतिः । निर्ययौ स्वामिदौरात्म्यसंस्मृतिश्लथसौष्ठवः ॥६६५॥ 665

विजयेन समं तस्य बद्धमूलेन संयुगे । संदेहं प्राणवृत्तिश्च जयश्रीश्चासकृद्ययौ ॥६६६॥

प्रवृद्धे मल्लकोष्ठेऽपि प्रयाते लहरान्तरे । वैशाखे निर्ययौ राजा ग्रामं थल्योरकाभिधम् ॥६६७॥

सैनिकाः शत्रुभिस्तस्य भ्रामितास्तत्र रात्रिषु । अरतिं निन्यिरे घोरैः स्वप्नैरिव मुमूर्षवः ॥६६८॥

बाहुमात्रसहायेन सर्वशक्तिमतां वरः । येन हर्षनरेन्द्रोऽपि विधुरेणोदपाद्यत ॥६६९॥

भूरीन्वाराञ्जितवतो विक्रमेण महीमिमाम् । साहसानां न संख्यास्ति जामदग्न्यस्य यस्य वा ॥६७०॥ 670

स संकुचितविक्रान्तिः कालस्य बलवत्तया । तत्र भग्नबलोऽकस्माद्व्ययुज्यत जयश्रिया ॥६७१॥

ततः पलायिते तस्मिन्नकस्मादेत्य सज्जकम् । हाडिग्रामस्थितो वीरं भङ्क्तुं पृथ्वीहरोऽनयत् ॥६७२॥

पलायितस्यानुसरंस्तस्य पृष्ठं स निष्ठुरः । प्रतापी नगराभ्यर्णे दग्ध्वा नागमठं ययौ ॥६७३॥

स चान्ये च ततः क्रूरा डामराः सर्वतोऽनयन् । राज्ञो राजाश्रितानां च चारकेभ्यस्तुरंगमान् ॥६७४॥

निस्त्रिंशतां तीव्रकोपस्ततो भूपः समाश्रयन् । अभाग्यभागिनां योग्यामालम्बे कुपद्धतिम् ॥६७५॥ 675

नीविं पृथ्वीहरस्याथ हत्वा डामरमन्तिकम् । पृष्ठन्यस्तविसं भोज्यमिव रात्रौ व्यसर्जयत् ॥६७६॥

विसृज्य भ्रातरं हम्ब विद्दकस्य तथैव सः । अन्येषां प्राहिणोत्पार्श्वे भ्रातृन्पुत्रांश्च विप्लुतः ॥६७७॥

मातरं जय्यकाख्यस्य सिफिन्नामामवासिनः । विच्छिन्नकर्णघ्राणां च कृत्वाभ्यर्णे व्यसर्जयत् ॥६७८॥

सपुत्रं सूर्यकं शूलेऽधिरोप्य नगरे परान् । भूरीन्वध्यानवध्यांश्च क्रोधाक्रान्तो न्यपातयत् ॥६७९॥

कालस्येवोल्बणस्याथ तस्य सर्वेऽपि शङ्किताः । आभ्यन्तराश्च बाह्याश्च विरागं प्रतिपेदिरे ॥६८०॥ 680

येनैवानीतिमार्गेण हारितं हर्षभूभुजा । निन्दन्नप्यादधे तं स राज्ये व्यवहरन्स्वयम् ॥६८१॥

---

६५६. 1) Thus corr. by $A_1$ from पइं. ६६५. 1) Emended; A °दौरात्म्यासं°. ६६९. 1) मात्र supplied by $A_3$. ६७४. 1) Emended; A चरके°. ६७७. 1) Emended; A तयैव.

प्रविष्टानां युद्धे गहनकविकर्मप्रणयिनां प्रसक्तानां द्यूते नरपतिधुरायां विहरताम् ।
तटस्थत्वे वक्तुं स्खलितमसकृत्सोऽर्हति परं प्रयोगे वैकल्यं स्वयमविकलो यो न भजते ॥६८२॥
तीव्रप्रयत्नो नृपतिस्तत्रापि विहितोद्यमः । निनाय मल्लकोष्ठादीन्किंचिन्मन्दप्रतापताम् ॥६८३॥
अथानिनाय विजयो विषलाटाध्वना शनैः । नप्तारं हर्षदेवस्य तं भिक्षाचरमन्तिकम् ॥६८४॥
685 विविक्षन्देवसरसं कम्पनापतिना ततः । विद्राव्यमाणः श्वभ्रायात्प्रधावन्सोपतत्क्षितौ ॥६८५॥
परिज्ञाय हतस्याथ स तस्य विजयी शिरः । विससर्जान्तिकं राज्ञः फलं जयतरोरिव ॥६८६॥
तदप्यत्यद्भुतं कर्म भजन्भूभृत्कृतघ्नताम् । न तस्य तुष्टस्तुष्टाव न चकार च सत्क्रियाम् ॥६८७॥
अवजानञ्जघानामुं श्वभ्राख्यः कम्पनापतिः । तत्र कस्मात्तवोत्सेक इति तं संदिदेश च ॥६८८॥
सर्वप्रकारं तिलकः कृतघ्नं नृपतिं विदन् । अथ जातविरागः स द्रोहोन्मुख्यं समादधे ॥६८९॥
690 सतां स्यादनुपालभ्यो भजेद्द्वैमुख्यमेव चेत् । द्रोहेच्छया स तु तया ययाववाह्यनामताम् ॥६९०॥
नेयाशयित्वमथ वोचितकृत्यकृत्त्वं नीतिप्रियाः प्रतिपदं समुदाहरन्तु ।
मानोन्नतास्तु विहितस्तुतयः कृतज्ञैस्त्यक्ताप्यसून्परहितं घटयन्ति सन्तः ॥६९१॥
पटं वह्निस्पर्शज्वलितमहिदष्टां त्वचमरेः श्रुतिं यातं मन्त्रं पतननिरतां जीर्णवसतिम् ।
असेवाज्ञं भूपं व्यसनविमुखं स्निग्धमजहन्न धीरोऽप्युत्थानोपहतमहिमा शर्म लभते ॥६९२॥
इत्युपायं परित्यज्य न्याय्यं ये प्रभवे क्रुधि । द्रोग्धारः कथितास्तेभ्यः केऽन्ये पापीयसां धुरि ॥६९३॥
जन्मन्येकोपकारित्वं पित्रोः सर्वत्र च प्रभोः । अधिकाः पितृघातिभ्यः पापिनस्तत्प्रभुद्रुहः ॥६९४॥
695 निहते विजये शाम्यप्रभावेष्वपरेष्वपि । नाज्ञायि कस्यचित्स्वास्थ्यं तत्त्वज्ञेनान्तरात्मनः ॥६९५॥
कंचित्क्षणं सोपसृतः प्रत्युतोग्रोपतापकृत् । विप्लवप्रसरो ज्ञातः सर्वैर्हुड इवोन्मदः ॥६९६॥
आनिनीषुस्ततो मल्लकोष्ठो[1] भिक्षाचरं पुनः । विषलाटां[2] तस्य पार्श्वं निजं सैन्यं व्यसर्जयत् ॥६९७॥
कम्पनेशस्तमायान्तं द्रोग्धाप्यावेदयंस्ततः । राज्ञा न्यषेधि तद्रोषादेवं च समदिश्यत ॥६९८॥
एनं वर्त्मन्यनुद्घाते त्यज हन्यामहं ततः । पुरोगतं मृगव्यान्तः सृगालमिव वाजिभिः ॥६९९॥
700 द्वैराज्यकार्यमर्मज्ञभावेऽपि विधिचोदितः । कर्तव्ये तत्र शाठ्यं स नृपतिः प्रत्यपद्यत ॥७००॥
मर्मराजमुखादेवं लब्ध्वा द्रोग्धाथ डामरान् । तिलकोऽकारयच्छैलमार्गैर्भिक्षाचरागमम्[1] ॥७०१॥
स्थाने स्थाने ततः प्राप ततः कर्णोपकर्णिका । जनानां या ख्यातिहेतुर्भिक्षो राज्ञस्तु भीतिदा ॥७०२॥
नासंस्कृतं वक्ति शिला भिनत्त्येकेषुणा दश । अश्रान्तो योजनशतं यात्यायाति च संचरन् ॥७०३॥
इत्यादितादृङ्माहात्म्यभिक्षुस्तुत्यानयज्जनः । निखिलान्पलितश्वेतलम्बकूर्चोऽपि कौतुकम् ॥७०४॥ युग्मम्[1] ॥
705 भविष्यन्निव साम्राज्यस्यैक एकोऽर्धभागभाक् । वार्तामव्यवहर्तापि भिक्षोरूचेन्वियेष च ॥७०५॥
सरित्स्नानगृहे स्नान्तो वृद्धाः क्षीणनियोगिनः । राजवेश्मन्यगणिता नाममात्रनृपात्मजाः ॥७०६ ॥
स्वभावदुर्जनाः केचिद्योधाश्चोच्चाश्वकाङ्क्षिणः । कारयन्तोऽप्युपाध्यायाः शिष्यान्स्फिक्कर्[1]पणं नखैः ॥७०७॥

---

६९७. [1]) Emended; A °कोष्टं.—[2]) Emended; A विषलाटं. Cf. viii. 177. 1074. 1664(*C*). ७०१. [1]) Emended; A °चरागमः. ७०४. [1]) $A_1$ writes २ instead of युग्मम्. ७०७. [1]) Thus corr. by $A_3$ from $A_1$ शिष्याक्स्फिक्क°.

वृद्धाः सुरीकोनर्तक्यो देवप्रासादपालकाः । वणिजो भुक्तनिक्षेपाः पुस्तकश्रुतितत्पराः ॥७०८॥
प्रायोपवेशकुशलाः पारिषद्यद्विजातयः । शस्त्रिणः कार्षकप्राया नगरोपान्तडामराः ॥७०९॥
सुखयन्तः स्वमन्यांश्च किमप्युत्पिञ्जवार्तया । एते प्रायेण देशेस्मिन्पार्थिवोपप्लवप्रियाः ॥७१०॥कुलकम्॥ 710
प्रवर्धमानया भिक्षाचरागमनवार्तया । वेपमानोभवल्लोको ययौ चिन्तां च भूपतिः ॥७११॥
पृथ्वीहरस्तरुच्छन्ने गिरिकच्छे वसन्नथ । राजानीकं बभञ्जाजौ निर्गत्यातुलविक्रमः ॥७१२॥
अनन्तकाकयोर्वैश्यावानन्दद्वारनायकौ । चक्रे तिलकसिंहं च मन्त्रिणस्त्रीन्पलायिनः ॥७१३॥
निहते विजये ज्यैष्ठे शुक्लषष्ठ्यां पराभवम् । तमाषाढस्य नृपतिः प्राप्याभूद्विवशः पुनः ॥७१४॥
उड्डीकितैर्गवां वृक्षमूर्धारोहेण भोगिनाम् । पिपीलककुलस्याण्डोपसंक्रान्त्यैव वर्षणम् ॥७१५॥ 715
प्रत्यासन्नं स राजाथ दुर्निमित्तैरुपद्रवम् । विचिन्त्यायातमुचितं कर्तव्यं प्रत्यपद्यत ॥७१६॥ युग्मम्[1] ॥
तृतीयेह्नि शुचेः शुक्ले ततः प्रास्थापयत्सुतम् । देवीमन्यत्कुटुम्बं च स कोटं लोहरं पटुः ॥७१७॥
ताननुव्रजतस्तस्य सेतुभङ्गात्परिच्युताः । लोष्टद्विजातयो विप्रा वितस्तायां विपेदिरे ॥७१८॥
स तेन दुर्निमित्तेन खिन्नो हुष्कपुरान्तिकम् । अनुगम्याथ तान्द्वित्रैर्दिनैर्भूयोविशत्पुरम् ॥७१९॥
विना पुत्रेण देव्या च स ततः प्रत्यपद्यत । प्रतापेन च लक्ष्म्या च परित्यक्त इवान्यताम् ॥७२०॥ 720
स मन्त्रो व्यापदि शुभः प्रत्यभात्तस्य तद्वशात् । अभ्यन्तरप्रकोपेपि सर्वाभ्युदयभागभूत् ॥७२१॥
स्वयमुत्थापितानर्थः सोपि हर्षनरेन्द्रवत् । अद्यापि सान्वयो नीत्या तया साम्राज्यभोगभाक् ॥७२२॥
श्रावणे लाहरैर्योधैरानीय बलशालिनाम् । भिक्षुर्मडवराज्यानां डामराणामथार्प्यत ॥७२३॥
तेपि जन्या इव वरं श्वशुरालयसंनिभम् । प्रावेशयंस्तं लहरमनुयान्तः ससैनिकाः ॥७२४॥
सभाजयित्वा तान्मल्लकोष्टमुख्या निजां भुवम् । व्यसर्जय[1]न्कम्पनेशप्रमाथाय पृथुश्रियः ॥७२५॥ 725
सर्वतः परचक्रेथ पर्यापतति पार्थिवः । संप्र[1]हीतुं प्रववृते पदातीनतुलव्ययः ॥७२६॥
तस्मिन्दुर्व्यसने राज्ञि वसुवर्षिणि सर्वतः । अकारि शस्त्रग्रहणं शिल्पिशाकटिकैरपि ॥७२७॥
नगरे सैन्यपतयः प्रतिमार्गमकारयन् । तुरगान्न्यस्तसंनाहान्व्यायामसमरोन्मुखाः ॥७२८॥
मयग्रामस्थिते भिक्षावमरेश्वरवासिभिः । राजसैन्यैः समं युद्धमगृह्णन्नेत्य लाहराः ॥७२९॥
तैर्हिरण्यपुरोपान्ते प्रबन्धारब्धसंगरैः । श्रीविनायकदेवाद्या राजसेनाधिपा हताः ॥७३०॥ 730
आद्य एव रणे यातां राजानीकाद्विरोधिनः । लब्ध्वा वराश्वामायातामन्यन्त नृपश्रियम् ॥७३१॥
राजधान्यन्तिके क्षिप्तिकाख्यायाः सरितस्तटे । पृथ्वीहरश्चकाराजावशेषसुभटक्षयम् ॥७३२॥
तिलके विजयेशस्थेप्यगृह्णन्नेत्य डामराः । महासरित्तटे युद्धं खड्डूवीहोलडौ[1]कसः ॥७३३॥
ते रुद्धनगरा दाहं क्वापि क्वापि च लुण्ठनम् । वास्तव्यानां विदधिरे विनदन्तो दिवानिशम् ॥७३४॥
निर्यत्स्वतूर्यपृतनाः प्रविशच्छस्त्रविक्षताः । क्रन्दद्धतात्पनिवहाः प्रधावद्भग्नसैनिकाः ॥७३५॥ 735
प्रसरत्प्रेक्षिनिवहा व[1]हदाशुगभारिकाः । संचार्यमाणसंनाहाः कृष्यमाणतुरंगमाः ॥७३६॥

---

७१६. [1]) $A_1$ writes here २ instead of युग्मम्. ७२५. [1]) य and माथाय supplied by $A_3$ in space left by $A_1$. ७२६. [1]) Emended; A संगृहीतुं. ७३३. [1]) A °होलळौ°. ७३६. [1]) Emended with C; A व्यहद°.

आसन्नशान्तसंमर्दप्रसरत्पांसवोनिशम् । दिने दिने राजपथा उपप्लवविशृङ्खलाः ॥७३७॥ तिलकम्[1] ॥
प्रतिप्रत्यूषमायात्सु सर्वारम्भेण वैरिषु । अद्य ध्रुवं जितो राजेत्यज्ञायि प्रतिवासरम् ॥७३८॥
धीरः कः सुस्सलादन्यो न यः प्रत्यभियोगिनाम् । कृच्छ्रेणापि स्वराष्ट्रेण क्रष्टुं धैर्यादपार्यत ॥७३९॥
740 व्रणपट्टाञ्चनं शल्योद्धारं पथ्यधनार्पणम् । शस्त्रक्षतानां सततं कारयन्स व्यलोकयत ॥७४०॥
प्रवासवेतनप्रीतिदायभैषज्यदत्तिभिः । शश्विलोके नरपतेर्निःसंख्योभूद्धनव्ययः ॥७४१॥
युद्ध एव विपन्नानां क्षतानां च स्ववेश्मसु । नित्यं नरतुरंगानां सहस्राणि क्षयं ययुः ॥७४२॥
तुरंगवहलैर्हन्यमाना नृपबलैस्ततः । लाहरा मल्लकोष्ठाद्या मन्दोद्रेकत्वमाययुः ॥७४३॥
भिन्नैराभ्यन्तरैरेव दत्तमन्त्राः सुरेश्वरीम् । ते निन्युर्भिक्षुमल्पेन तन्मार्गेण युयुत्सवः ॥७४४॥
745 सेतुना स्वल्पपार्श्वेन धन्विप्रायैः सरोन्तरे । अत्रापि तैर्जयो मोचिवाजिभ्यश्च भयं रणे ॥७४५॥
द्रोग्धाथ कम्पनेशः स[1] निवसन्विजयेश्वरे । बलितां डामरान्निन्ये मन्दोद्रेकं स्फुरन्रणे ॥७४६॥
लवन्यलोको मा ज्ञासीदशक्तिं मेथ गच्छतः । पृष्ठे निपत्य मा कार्षीद्व्यथां चेति विचिन्तयन् ॥७४७॥
स प्रभावं दर्शयितुं प्राप्तस्य विजयेश्वरम् । अज्जराजस्य सेनायां व्यावृत्य प्रस्थितोभवत् ॥७४८॥
सार्धां शतद्वयीं तस्य योधानां हतवानपि । संत्यज्य विजयक्षेत्रं द्रोहकृन्नगरं ययौ ॥७४९॥
750 पथि नान्वसरन्भीत्या भयात्तं डामराः क्वचित् । नदन्तोद्रिशिरोरूढा मार्गान्सर्वांश्च तत्यजुः ॥७५०॥
त्यक्त्वा मडवराज्यं स प्रविष्टो व्यसनातुरम् पूर्वचेष्टां स्मरन्भूपं जहास कृतसत्क्रियम् ॥७५१॥
इतरामात्यवत्स्थामस्थितोथ न निजोचितम् । रणे प्रादर्शयत्किंचित्साक्षिभूत इव स्थितः ॥७५२॥
ततो मडवराज्यात्ते समस्ता एव डामराः । अभ्येत्य प्रत्यपद्यन्त[1] तां महासरितस्तटीम् ॥७५३॥
उपायाः सामभेदाद्या रिपुचक्रे प्रयोजिताः । राज्ञो विफलतां जग्मुर्बहिराप्तैः प्रकाशिताः ॥७५४॥
755 क्रान्ततत्तन्महीपालमण्डलस्यापि भूपतेः । फलं दोर्विक्रमस्याग्र्यमासीन्नगररक्षणम् ॥७५५॥
अमरेशो द्वारपतिः सार्धं तस्थौ नृपात्मजैः । राजानवाटिकोपान्ते राजस्थानीयमन्त्रिणः ॥७५६[1]॥
दूरद्वीपान्तरगता इव स्वीचक्रिरे नपात् । ते प्रवासधनं भूरि न चायुध्यन्त कुत्रचित् ॥७५७॥
कटका विद्विषां सर्वे पर्यायेण जयाजयौ । लेभिरे विजयादन्यत्र तु पृथ्वीहरः क्वचित् ॥७५८॥
मधुमत्तेन तेनाजौ वेतालेनेव वल्गता । प्रायो वरा वराः सर्वे ग्रस्ता नृपचमूभटाः ॥७५९॥
760 उदयस्येच्छटिकुलोद्भूतस्यैकस्य पप्रथे । युवदेश्यस्यापि शौर्यमेकस्मिंस्तु तदाहवे ॥७६०॥
पृथ्वीहरस्यापजह्रे द्वन्द्वयुद्धाभिमानिना । प्रहृत्य कूटकूर्चेन कराद्येनासिवल्लरी ॥७६१॥
युद्धे पुरोपकण्ठेषु वर्तमाने शराहताः । स्त्रीबालाद्या अपि वधं प्रमादात्प्रतिपेदिरे ॥७६२॥
एवं जनक्षये घोरे वर्धमाने किमप्यभूत् । अनुत्साहान्नृपो गेहादपि निर्गन्तुमक्षमः ॥७६३॥
तस्मिन्निरुद्धसंचारे सोमपालस्तदन्तरे । अलुण्डयच्चाट्टलिकां[1] लब्धरन्ध्रो ददाह च ॥७६४॥
765 सिंहे गजाहवव्यग्रे तद्गुहाग्रपरिग्रहे । समयो ग्रामगोमायोः पौरुषस्यापरोस्तु कः ॥७६५॥

---

७३७. [1]) $A_1$ writes ३ instead of तिलकम्. ७४६. [1]) Thus corr. by $A_3$ from $A_1$ कम्पनेशस्य. ७५३. [1]) Thus corr. by $A_3$ from $A_1$ °पद्यत. ७५६. [1]) $A_1$ writes here २ for युग्मम् which would be in its place after the following verse. ७६४. [1]) Emended ; A °चाटलिकां. Cf. viii. 581. 831, 1947 (*C*).

राष्ट्रद्वयोपमर्देन राजा निःसद्दशेन सः । तेन त्रपाविधेयोभूत्स्वमपि द्रष्टुमक्षमः ॥७६६॥
सर्वानौचित्यवहलः सर्वव्यसनदुःसहः । सर्वदुःखमयः कालस्तस्यावर्तत कोपि सः ॥७६७॥
तथाप्यस्खलिते तस्मिन्हितव्याजाद्धितापहः । राजानवाटिकाविप्रैः प्रायश्चक्रे विरागिभिः ॥७६८॥
प्रार्थयन्ते स्म ते युद्धे तटस्थास्तव मन्त्रिणः । गृहीत्वा नीविरेतेभ्यो लोहराद्रौ विसृज्यताम् ॥७६९॥
न चेद्याप्य इवैतस्मिन्व्यसने स्थायितां गते । को दध्यान्न परैर्नीतं प्रत्यासन्नं शरत्फलम् ॥७७०॥ 770
न प्रत्यभैत्सीत्ताटस्थ्यं यत्कालापेक्षधी नृपः । तस्मिंस्तैर्दर्शिते शङ्कां निखिला मन्त्रिणो दधुः ॥७७१॥
शक्तिस्तृणं कुब्जयितुं न यस्य स तदार्थिभिः । विसूत्रव्यवहारत्वं निन्ये राजा शठद्विजैः ॥७७२॥
कर्मस्थानोपजीव्युग्रपारिषद्यादिसंकुला । तत्पार्श्वात्प्रययौ वृद्धिमन्या सेनेव वैरिणाम् ॥७७३॥
तत्सान्त्वनक्षणे तैस्तैः प्रमादैरुत्थितैरगात् । देशो व्याकुलतां कृच्छ्रं लुण्ठिश्चाघटतोल्कटा[1] ॥७७४॥
अदृष्टपार्थिवास्थानैः शठैरव्यवहारिभिः । ऊचे तैः सान्त्वयन्राजा दुःस्थितस्तत्तदप्रियम् ॥७७५॥ 775
लवन्यविप्लवाद्राज्ञः सोधिको विप्लवोभवत् । गलरोगः पादरोगादिव तीव्रव्यथावहः ॥७७६॥
काञ्चनोत्कोचदानेन तन्मध्येधिकचक्रिकाम् । कांश्चित्स्वीकृत्य स प्रायं कथंचिद्भिन्यवीवरत्[1] ॥७७७॥
विजयो वर्णसोमादिशस्त्रिवंश्यो हठात्पुरम् । प्रविशन्भिक्षुसेनानीरश्वारोहैरहन्यत ॥७७८॥
तेनातिरभसात्स्थानं भित्त्वा प्रविशता पुरम् । प्रायशः कृत एवाभूत्तदा राज्यविपर्ययः ॥७७९॥
ईषन्मन्दप्रतापेन लवन्येष्वपि[1] भूपतेः । पृथ्वीहरेण संधित्सा भेदेच्छोः संप्रकाशिता ॥७८०॥ 780
तस्मिन्धुर्ये जिगीषूणां संधित्सौ भूभुजा समम् । द्वयेपि सैनिकाः शान्तं तममन्यन्त विप्लवम् ॥७८१॥
राज्ञा नागमठोपान्तमानेतुं प्रहितांस्ततः । त्रीनमात्यान्सुविश्वस्तानागच्छंश्छद्मनावधीत् ॥७८२॥
धात्रेयो मम्मको गुङ्गो द्विजो रामश्च वारिकः । तेषां तिलकसिंहस्य पार्श्वे भृत्यास्त्रयो हताः ॥७८३॥
नीविर्दत्तो गौरकस्तु हतो भूतपतिं स्मरन् । इष्टे त्वाक्रन्दिनि परैः प्रहृतं करुणोज्झितैः ॥७८४॥
तद्वैशसं श्रुतवतो देशः सर्वो विरागकृत् । राजधान्यन्तरे राज्ञो दुरुक्तिमुखरोभवत् ॥७८५॥ 785
इषे शुक्लचतुर्दश्यां तद्विपर्यस्तमण्डलम् । अतिवाहयितुं कष्टं दिनमासीन्महीपतेः ॥७८६॥
अथ संजातवैक्लव्यो नेदमस्तीति चिन्तयन् । किं कृत्यमित्यसदृशानपि पप्रच्छ भूपतिः ॥७८७॥
विषमे वर्तमानस्य तस्य कश्चित्स नाभवत् । अन्तर्जहास[1] यो नान्त --[2] न तुतोष वा ॥७८८॥
तमपि व्यसनापातं तस्य सोढवतस्ततः । अभजन्त क्रमाद्भृत्याः प्रतिपक्षसमाश्रयम् ॥७८९॥
कम्पनेशस्य बिम्बाख्यो भ्राता द्वैमातुरोहितान् । समाश्रयद्वारकार्ये तद्दत्तं प्रत्यपद्यत ॥७९०॥ 790
गूढं जनकसिंहेन दूतान्प्रेषयतानिशम् । भिक्षवे भ्रातृतनया वाग्दत्ता निरवर्त्यत ॥७९१॥
असिवाजितनुत्रादि हृत्वा भिक्षाचरान्तिकम् । अश्ववारा व्यभाव्यन्त प्रयान्तः प्रतिवासरम् ॥७९२॥
किमन्यद्व्यक्तमेवाह्नि येवसन्पार्थिवान्तिके । अलक्ष्यन्तायतो भिक्षोस्ते निशायां गतत्रपाः ॥७९३॥
इतो याति ततश्चैति लोको व्यक्तमतन्त्रितः[1] । इति राजनि कुण्ठाज्ञे कोप्यजृम्भत विप्लवः ॥७९४॥

---

७७४. [1]) Emended with C; A °घट्टितोत्कटा. ७७७. [1]) $A_1$ has first written °व्रिन्यवीवृतत् and then indicated the above reading between the lines. ७८०. [1]) Conjectural reading; A न वन्येष्वपि. ७८८. [1]) Emended with C; A °हासो.— [2]) Thus A; C नान्तर्बहिर्यो न. ७९४. [1]) $A_1$ has first written °तन्द्रितः and then indicated the above reading in margin.

795 डामरैः शरदुत्पत्तौ नीतायां सर्वतस्ततः । कान्दिशीकोभवल्लोकः कृत्स्नो धनजनोज्झितः ॥७९५॥

प्रयाते सुस्सलनृपे स्वर्णपूर्णामिमां महीम् । भिक्षुः कुर्यादिति मृषा लोकस्यासीद्विनिश्चयः ॥७९६॥

क दृष्टा त्यागिता भिक्षोः कुतो वा तस्य संपदः । परामर्शी[1] नैवेति गतानुगतिको जनः ॥७९७॥

संदृश्यते परिवृता चिरमम्बरेण रेखा स्वयं न खलु या शशिनो नवस्य ।
तस्यां जनः प्रकुरुते नतिमम्बरार्थी धिग्लुब्धतामपसरत्सदसद्विचाराम् ॥७९८॥

विजये राजवर्ग्याणां भुग्नग्रीव इवाभवत् । भिक्षुपक्षजये लोको हृष्यन्नासीद्विशृङ्खलः ॥७९९॥

800 द्विजकौलेयकन्यायो राजडामरसंघयोः । ततोन्योन्यभयभ्रश्यद्वैरयोरुदजृम्भत ॥८००॥

राजाभ्यन्तरभेदेन राज्ञः स्थैर्येण चारयः । ऐच्छन्पलायितुं भीता अज्ञातान्योन्यनिश्चयाः ॥८०१॥

बान्धवानपि दुध्रुक्षून्[1]विश्वस्तो विदन्नृपः । स्थितौ पलायने वापि श्रद्दधे न स्वजीवितम् ॥८०२॥

तं महाव्यसने वासःस्वर्गरत्नादिवर्षणम् । नाभ्यनन्दन्गृहीतार्था निनिन्दुः शस्त्रिणः परम् ॥८०३॥

नष्टोयं नैष भवितेत्यभीतेर्जल्पतो जनात् । वचो रोगी भिषक्त्यक्त इव शृण्वन्स विव्यथे ॥८०४॥

805 अप्यग्रोपस्थितं किंचित्तदादेशेन ढौकयन् । सविलासं सगर्वं च तमैक्षिष्टानुगव्रजः ॥८०५॥

सोन्य एवाभवत्तस्मिन्क्षणे साहसिकोप्यहो । स्वगृहादपि निर्गन्तुं नाशकद्यद्भयाकुलः ॥८०६॥

यावदैच्छन्संघभेदाच्चलितुं डामरव्रजाः । स्वैरेव शस्त्रिभिस्तावन्निन्ये भूभृद्विसूत्रताम् ॥८०७॥

ते कृष्टशस्त्रा द्वाराणि रुन्धन्तो नृपमन्दिरे । प्रवासवित्ते लब्धव्ये प्रायं चक्रुः पदे पदे ॥८०८॥

ददद्धनं धनेशश्रीर्देयादप्यधिकं नृपः । तेषामभिमतो नाभूदवमानाभिलाषिणाम् ॥८०९॥

810 मर्तुं चिचलिषुस्[1]तीर्थमृणिकैरिव सामयः । स रुद्धा निखिलैर्देयं दापितोथ गतत्रपैः ॥८१०॥

स्थानपालैरपि प्रायकृद्भिराक्रम्य दापितः । धनं सुवर्णभाण्डादि चूर्णीकृत्य विशृङ्खलैः ॥८११॥

सवृद्धबालं नगरं ततः क्षुभ्यत्क्षणे क्षणे । सोभूदब्धिमिवोद्वृत्तं न संस्थापयितुं क्षमः ॥८१२॥

एकदा प्रातरेवान्यै रुद्धद्वारः स्वशस्त्रिभिः[1] । सर्वतः क्षोभमागच्छन्नगरं स व्यलोकयत् ॥८१३॥

ततः क्षोभं शमयितुं जनकं नगराधिपम् । पुरभ्रमार्थमादिश्य चलितुं क्षणमैक्षत ॥८१४॥

815 कथंचिद्दानमानाभ्यां तानावर्ज्यापि शस्त्रिणः । सावरोधः स संनद्धो राजधान्या विनिर्ययौ ॥८१५॥

अङ्गनात्तुरगारूढो बहिर्यावन्न निर्ययौ । राजधान्यन्तरे लुण्ठिस्तावत्प्रारम्भि तस्करैः ॥८१६॥

अरुदन्केपि केप्युच्चैरनदन्केप्यलुण्ठयन् । तद्भृत्यास्त्राज्यमुत्सृज्य तस्मिन्व्रजति शस्त्रिणः ॥८१७॥

विशृङ्खलस्वपाकोपशङ्काभिः शस्त्रिगां नृपः । सहस्रैः पञ्चषैरासीद्व्रजन्ननुगतोध्वनि ॥८१८॥

वर्षे षण्णवते[1] कृष्णषष्ठ्यां मार्गे विनिर्गतः । याममात्रावशेषेह्नि सभृत्यो द्रोहविह्वलः ॥८१९॥

820 निर्जैर्हरद्भिरश्वादि त्यज्यमानः पदे पदे । स प्रतापपुरं प्राप क्षपायामल्पसैनिकः ॥८२०॥

तिलकस्य पुरो गत्वा प्राप्तस्याग्रं च विश्वसन् । तत्र बन्धोरिवास्रूणि चिरं दुःखोल्बणोमुचत् ॥८२१॥

द्रोहं न कुर्यादेवं मे चिन्तयित्वेति सत्वरम् । वेश्म हुष्कपुरेन्येद्युस्तस्य च प्राविशत्स्वयम् ॥८२२॥

---

७९७. [1]) Emended; A °मर्ष. ८०२. [1]) Emended; A दुद्रुक्षून°. ८१०. [1]) Emended with C; A विचलि°. ८१३. [1]) Emended; A स शस्त्रिभिः. ८१६. [1]) Emended; A आङ्गना°. ८१९. [1]) Emended with C; A षण्णनवते.

तद्वैरवेण स्नानादि कृत्वैच्छत्सैन्यसंग्रहम् । प्रविश्य क्रमराज्यं स कर्तुं भूयो जयो[1]त्सुकः ॥८२३॥

गूढं युयुत्सून्कल्याणवा[1]डादीनथ डामरान् । आनीय स पुरस्तस्य धैर्यभ्रंशमकारयत् ॥८२४॥

गृहात्तेन तया युक्त्या निष्कृष्टः स ततो ययौ । स्वीकुर्वन्स्वर्णदानेन दस्यून्मार्गविरोधिनः ॥८२५॥ 825

प्रयान्तं तत एवौज्झीत्तिलकस्तत्सहोदरः । प्रयाणमेकमानन्दो दाक्षिण्यादन्वगात्तु तम् ॥८२६॥

भृत्यत्यक्तः स दानेन विक्रमेण च तस्करान् । अगान्मार्गेण शमयन्नायुःशेषेण रक्षितः ॥८२७॥

त्राणं सिंहनखा द्रुमाद्रिगहनस्याराऽरण्यस्य ये तेषां बालगलाभयादपि भवेत्कालातिवाहः क्रमात् ।
ये दन्ताः करिणां रणप्रहरणं तेप्यामुयुर्दीव्यतां क्रीडायां करताडनानि न दृढा शौर्यस्य रूढिः क्वचित्॥८२८॥

जन्तूनां विक्रमत्यागयशःप्रज्ञादयो गुणाः । भवे चित्रस्वभावेस्मिन्न भवेयुरभङ्गुराः ॥८२९॥

भास्वानप्यौग्र्यमृदुतां भिन्ना[1]वस्थां दिने दिने । तां तामायाति जन्तूनां कः प्रभावेषु निश्चयः ॥८३०॥ 830

अशक्नुवन्नट्टलिकामरिप्लुष्टां निरीक्षितुम् । मन्युनिःशब्दसैन्योद्रिमारुरोह स लोहरम् ॥८३१॥

स्वं कलत्रमपि द्रष्टुं तत्रातित्रपयाक्षमः । शयनीयविमुक्ताङ्गस्तप्यते स्म दिवानिशम्॥८३२॥

दत्तदीपादनिर्गच्छन्नन्तर्गेहाद्दिनेष्वपि । दाक्षिण्याद्दर्शनं प्रादाद्भृत्यानां भोजनक्षणे ॥८३३॥

विलेपनानि नास्प्राक्षीन्नारुरोह तुरंगमान् । गीतनृत्तादि नैक्षिष्ट सुखगोष्ठीर्न चादधे ॥८३४॥

ताम्यंस्ताटस्थ्यमौखर्यतैक्ष्ण्यद्रोहादि दर्शितम् । एकैकेन च स्मृत्वा स्मृत्वा देव्यै न्यवेदयत् ॥८३५॥ 835

अन्वगात्स्वां भुवं त्यक्त्वा मामेतेन्वगुरित्यपि । निन्ये वृद्धिं परार्ध्यश्रीः स दाक्षिण्याद्धनार्पणैः ॥८३६॥

कश्मीरेषु गते तस्मिंस्तदैवाखिलमन्त्रिणः । पुराण[1]राजधान्यग्रे ससैन्याः समगंसत ॥८३७॥

मन्त्र्यश्वारोहसामन्ततन्त्रिपौरादिसंमतः । तेषां जनकसिंहोभूदग्रणीर्नगराधिपः ॥८३८॥

स भिक्षोर्मल्लकोष्ठाद्यैराप्तैः कृतगतागतैः । विश्वासाय सुतभ्रातृसुतौ नीविं प्रदापितः ॥८३९॥

प्रावर्तत भयभ्रश्यत्स्त्रीबालाद्यावृते पुरे । अराजकाथ रजनी सर्वभूतभयावहा ॥८४०॥ 840

निहताः केपि मुषिताः केपि केप्यरिभिः पुरे । दग्धागारा व्यधीयन्त दुर्बला राजवर्जिते ॥८४१॥

सैन्यैरन्येद्युरुन्नादैर्निरुद्धाखिलदिक्पथः । सिन्दूरारुणपुण्ड्राश्वसादिमण्डलमध्यगः ॥८४२॥

विकोशशस्त्रकदलीषण्डदुर्लक्ष्यविग्रहः । मृगेन्द्र इव लोकस्य भयकौतूहलावहः ॥८४३॥

वीरपट्टाञ्चलश्लिष्टैर्यौवनोद्रेचितैः कचैः । अबद्धैः शोभितः पृष्ठे जयश्रीबन्धशृङ्खलैः ॥८४४॥

कुण्डलद्योतिना स्निग्धधवलायतदृष्टिना । प्रत्यग्रश्मश्रुणा चारुचन्दनोल्लेखशोभिना ॥८४५॥ 845

ताम्राधरेण वक्त्रेण श्रीसांनिध्याधिकत्विषा । पक्षपाति विपक्षाणामपि संपादयन्मनः ॥८४६॥

असेर्विकोशस्यान्तःस्थां श्रियमश्वेन वल्गता । केसरच्छटया चा[1]पि चामरेणेव वीजयन् ॥८४७॥

पदे पदे निवृत्ताश्वैः सामन्तैरुपपादिताम् । स्वीकुर्वन्नर्हणां भिक्षुः प्राविशन्नगरं ततः ॥८४८॥ कुलकम् ॥

तस्यार्भकस्य धात्रीव पृष्ठस्थो मल्लकोष्ठकः । प्रययावप्रगल्भस्य सर्वकार्योपदेष्टृताम् ॥८४९॥

अयं पितुः प्रियस्तेभूत्त्वमस्याङ्के विवर्धितः । राज्यस्यायं मूलमिति प्रत्येकं समदर्शयत् ॥८५०॥ 850

---

८२३. [1]) Emended; A जनोत्सुकः. ८२४. [1]) A °न्कल्याणवाळादी°. ८३०. [1]) Emended with C; A भिन्नोवस्थां. ८३७. [1]) Doubtful emendation; A पुराणि राज°. ८४७. [1]) A omits here two *aksharas* without indicating a *lacuna*; चापि supplied with C.

गृहं जनकसिंहस्य प्राक्कन्यावाप्तयेविशत् । राजलक्ष्मीं[1] स संप्राप्तुं राजधानीं ततः परम् ॥८५१॥
दूरनष्टे कुले तेन पुनरुद्रेचिते ययौ । बद्धास्थो गर्भगेपत्ये स्त्रीजनोनवहास्यताम् ॥८५२॥
दृष्टेन तादृशा भिक्षोरिति वृत्तेन शत्रुषु । चित्रस्थेष्वपि साशङ्का नोपहास्या जिगीषवः ॥८५३॥
प्रावर्तन्त धनाधीशश्रियः सुस्सलभूपतेः । कोशेन[1] नीतशेषेण विलासा नवभूपतेः ॥८५४॥
855 वाजिवर्मासिभूयिष्ठां राजलक्ष्मीं विभेजिरे । राजडामरलुण्ठाकमन्त्रिणो यन्त्रणोज्झिताः ॥८५५॥
पुरे स्वर्ग इवास्वादं भोगानामुपलेभिरे । दस्यवो ग्रामभोगार्हाः पिशाचा इव गह्वराः ॥८५६॥
आस्थाने न बभौ भूभृद्ग्रामीणैः सर्वतो वसन् । प्रलम्बकम्बलप्रायविलासावरणैः समम् ॥८५७॥
भिक्षाचरस्यासंभाव्यप्रादुर्भावतया प्रथाम् । डामरा अवतारोयमित्यन्यां निन्यिरे प्रथाम् ॥८५८॥
राज्यस्यानन्यदृष्टस्य कर्तव्येषु मुमोह सः । अदृष्टकर्मेव भिषग्भैषज्यस्य पदे पदे ॥८५९॥
860 शनैर्जनकसिंहेन कृतभ्रातृसुतार्पणम् । कम्पनाधिपतिर्दत्तकन्योपि तमशिश्रियत् ॥८६०॥
जुङ्गो राजपुरीयस्य राज्ञः कटकवारिकः । पादाग्राधिकृतोद्राक्षीत्स्वार्थमर्थं न तु प्रभोः ॥८६१॥
सर्वाधिकारिणं राजलक्ष्मीर्बिम्बमशिश्रियत्[1] । राजशब्दस्यैव पात्रमभूद्भिक्षाचरः परम् ॥८६२॥
वेश्यायत्तीकृतैश्वर्यः प्राकृताचारभागपि । अन्तरङ्गः सदसतां किंचिद्बिम्बस्तदाभवत् ॥८६३॥
द्वैमातुरो दर्यकस्य भ्राता साश्चर्यशौर्यभूः । नृपान्तरङ्गज्येष्ठत्वं ज्येष्ठपालोप्यशिश्रियत् ॥८६४॥
865 मन्त्रिणो भूतभिश्वाद्या[1]स्तस्य पैतामहा अपि । लक्ष्मीसरोजिनीभृङ्गा बहवोन्ये जजृम्भिरे ॥८६५॥
मुग्धे राज्ञि प्रमत्तेषु मन्त्रिषूग्रेषु दस्युषु । उत्थानोपहतं राज्यं नवत्वेपि बभूव तत् ॥८६६॥
स्त्रीभिर्नवनवाभिश्च भोज्यैः प्राज्यैश्च रञ्जितः । भिक्षुर्नैक्षिष्ट कर्तव्यं सुखानुभवमोहितः ॥८६७॥
स सुखानुभवप्रावृड्निद्रान्धो विजयोद्यमे । स्वैः प्रेरितः सभामध्ये स्वप्तुमैच्छन्मदालसः ॥८६८॥
दर्पेण सचिवे वाचं कथयत्यनुकम्पिकाम् । न स चुक्रोध मुग्धस्तु पितरीवान्वरज्यत ॥८६९॥
870 निष्प्रतिष्ठैः सेव्यमानो वेश्योच्छिष्टै[1]रशिष्टवत् । अट्टचेटोचिताश्चेष्टा विटैः प्रैर्यत सेवितुम् ॥८७०॥
पानीयरेखाप्रतिमस्थैर्यस्याखिलवस्तुषु । तस्याप्रमाणवचसः सेवां प्रणयिनो जहुः ॥८७१॥
यदूचुः सचिवास्तत्तानन्ववोचन्न भूभृतः। वचः सुषिरगर्भस्य तस्य किंचित्समुद्ययौ ॥८७२॥
सचिवैः स्वगृहान्नीत्वा दत्तभोज्यः स मुग्धधीः । धनी विपन्नपितृक इव प्रमुषितो विटैः ॥८७३॥
आहारमुष्टीर्[1]बिम्बस्य गृहे बिम्बनितम्बिनी । तस्याश्वस्येव[2] वडवा रागिणोग्रगताहरत् ॥८७४॥
875 वञ्चयित्वा दृशौ पत्युर्दर्शितैः स्मेरया तया । कुचकक्षकटाक्षैः स लुप्तधैर्यो व्यधीयत ॥८७५॥
पृथ्वीहरो मल्लकोष्ठश्चान्योन्योद्भूतमत्सरौ । क्षोभं व्यधत्तां संरब्धौ राजधान्याः क्षणे क्षणे ॥८७६॥
स्वयं राज्ञा सुतोद्वाहं गृहान्गत्वापि कारितौ । तावन्योन्यमुपैक्षेतां[1] न मन्युं विक्रमोन्मदौ ॥८७७॥
अथ पृथ्वीहरगृहात्कृतोद्वाहः स्वयं नृपः । जातामर्षेण सुस्पष्टं मल्लकोष्ठेन तत्यजे ॥८७८॥
द्रुह्यञ्जनककाणोपि संबन्धापेक्षयोज्झितः । विरागमोजानन्दादीन्निन्ये ब्राह्मणमन्त्रिणः ॥८७९॥

---

८५१. [1]) Thus A. ८५४. [1]) A कोषेण. ८६२. [1]) Emended with C; A राजा लक्ष्मीबिम्बमाशिश्रयत्. ८६५. [1]) Emended; A भूतबिश्वा°. Cf. vii. 1695. viii. 94. ८७०. [1]) Emended with C; A वेश्यैच्छि°. ८७४. [1]) Emended; A °मुष्टिर्बि°.— [2]) Emended with C; A तस्याश्वेव. ८७७. [1]) Emended; A °मुपेक्षेतां.

तटस्थो द्रोग्धृदुर्बुद्धिप्रायभृत्यविधेयधीः । विसूत्रव्यवहारत्वं निन्द्यत्वं च ययौ नृपः ॥८८०॥ 880
डामरस्वामिके लोके प्राभवत्को न विप्लवः[1] । ब्राह्मण्यो धर्षणं यत्र श्वपाकेभ्योपि लेभिरे ॥८८१॥
अराजकेथ वा भूरिराजके मण्डले तदा । समस्तव्यवहाराणां स्फुटं तुत्रोट पद्धतिः ॥८८२॥
दीन्नारा भैक्षवे राज्ये निष्प्रचाराः पुरातनाः । तच्छतेन तु नव्यानामशीतेरभवत्क्रयः ॥८८३॥
राजपुर्यध्वना बिम्बं ससैन्यमथ पार्थिवः । लोहरं प्राहिणोत्कर्तुं सुस्सलास्कन्दमुन्मदः ॥८८४॥
तुरुष्कसैन्यमानिन्ये सोमपालेन सोन्वितः । साहायकाय सल्हारे विस्मये मित्रतां गते ॥८८५॥ 885
संदर्श्य पाशमेतेन बद्ध्वा क्रक्ष्यामि सुस्सलम् । इत्येक एकोश्वारोहस्तुरुष्काणामकत्थत[1] ॥८८६॥
काश्मीरिकं[1]खशम्लेच्छयोधव्यतिकरोभवत् । न केषां नाम संभाव्यो विश्वोत्पाटनपाटवः ॥८८७॥
भिक्षाचरः प्रयाते तु बिम्बे विगलिताङ्कुशः । न कासामव्यवस्थानां मूढः स्थानमजायत ॥८८८॥
स निमन्त्र्य निजं नीतो गृहं बिम्बावरुद्धया । भोगसंभोगदानेन धर्षण्या पर्यतोष्यत ॥८८९॥
कार्यापेक्षापि तस्यासीन्न मन्त्रिस्त्रीसमागमे । कौलीनभीतेरासन्ननिपातस्य कथैव का ॥८९०॥ 890
आद्यूनानुगुणं[1] भोज्यं कुम्भकांस्यादिवादनम् । तत्र प्राकृतकामीव न स जिह्राय शीलयन् ॥८९१॥
शनैः शनैस्ततो नष्टावष्टम्भस्य महीपतेः । काले भोज्यमपि प्राप्यं नासीद्दलितसंपदः ॥८९२॥
तादृक्प्रलोभक्रौर्यादिक्रान्तो यः प्रागगर्ह्यत । स सुस्सलोथ लोकानामभिनन्द्यत्वमाययौ ॥८९३॥
धनमानादिनाशं या विरक्तास्तस्य चक्रिरे । काङ्क्षन्ति स्म घनोत्कण्ठास्ता एवागमनं प्रजाः ॥८९४॥
प्रत्यक्षदर्शिनोद्यापि साश्चर्या वयमस्य यत् । ताः प्रजाः कोपिताः केन केन भूयः प्रसादिताः ॥८९५॥ 895
क्षणाद्वैमुख्यमायान्ति सांमुख्यं यान्ति च क्षणात् । न हेतुं कंचिदीक्षन्ते पशुप्रायाः पृथग्जनाः ॥८९६॥
ते मल्लकोष्ठजनकादयो दूतैर्विसर्जितैः । त्यक्तराज्यं पुनर्भूपं जयोद्यममजिग्रहन् ॥८९७॥
अक्षोसुवाग्रहारेथ लोकैष्टिकस्य लुण्ठिते । तत्रत्या ब्राह्मणाः प्रायं नृपमुद्दिश्य चक्रिरे ॥८९८॥
तैश्चान्यैश्चाग्रहारैश्च संश्रितैर्विजयेश्वरे । राजानवाटिकाप्रायो नगरेपि न्यविक्षत ॥८९९॥
ओजानन्दादिभिर्मुख्यद्विजैरुत्तेजितास्ततः । गोकुलेपि व्यधुः प्रायं त्रिदशालयपर्षदः ॥९००॥ 900
युग्यार्पितैः सितच्छत्त्रवस्त्रचामरशोभिभिः । विबुधप्रतिमावृन्दैः सर्वतश्छादिताङ्गनः ॥९०१॥
काहलाकांस्यतालादीवाद्यक्षोभितदिङ्मुखः । अदृष्टपूर्वो ददृशे पारिषद्यसमागमः ॥९०२॥
ते सान्त्वमाना भूभर्तुर्दूतैरुत्सेकवादिनः । न विना लम्बकूर्चं नो गतिरित्यब्रुवन्वचः ॥९०३॥
ते हेलया लम्बकूर्चाख्यया सुस्सलभूपतिम् । तं निर्दिशन्तोमन्यन्त क्रीडापुत्रकसंनिभम् ॥९०४॥
प्रायं प्रेक्षितुमायातैः पौरैः सह दिने दिने । अमन्त्रयत कां कां न व्यवस्थां पर्षदां गणः ॥९०५॥ 905
नृपापातभयात्क्षोभं मुहुर्मुहुरुपागतैः । पारिषद्यैश्च पौरैश्च योद्धुमास्थीयतोद्धतम् ॥९०६॥
वश्यं जनकसिंहस्य नगरं तन्मतेन तत् । सज्जं सुस्सलदेवस्य कृत्स्नमानयनेभवत् ॥९०७॥
प्रायाद्दारयितुं पूर्वमग्रहारद्विजान्नृपः । प्रययौ विजयक्षेत्रं तत्रासीच्च हतोद्यमः ॥९०८॥

---

८८१. [1]) $A_1$ had first repeated here the second half of verse 873, but has subsequently erased it and written as above. ८८६. [1]) Conjectural reading; A °स्तुरुष्कामकथ्यत; C °तुरुष्कैः समकथ्यत. ८८७. [1]) Emended; A काश्मीरक°. ८९१. [1]) Emended with C; A °गुणो.

तन्मध्ये निखिलांस्तत्र डामरांस्तिलकोब्रवीत् । व्यापादयेति तं तच्च सत्त्वैकाग्र्यो न सोग्रहीत् ॥९०९॥

910 राज्ञ एव मुखाद्बुद्ध्वा[1] लवन्यास्तद्विशश्वसुः । तस्मिन्पृथ्वीहरमुखास्तत्रसुस्तिलकात्पुनः ॥९१०॥

भागिनेयं प्रयागस्य क्षत्तारं लक्ष्मकाभिधम् । बन्धुं[1]मैच्छन्नृपोक्षिग्धं प्रययौ स तु सुस्सलम् ॥९११॥

ततः प्रविश्य नगरं संनिपत्याखिलं जनम् । अकारणविरक्तानां पौराणां प्रददौ सभाम् ॥९१२॥

युक्तमप्युक्तवांस्तत्र हतोक्तिः शठबुद्धिभिः । पौरैः स चक्रे नास्त्येव भेषजं विप्लवस्पृशाम् ॥९१३॥

अत्रान्तरे सोमपालविम्बाद्या लोहरे[1] स्थितम् । योद्धुं सुस्सलभूपं ते सर्वे पर्णोत्समाययुः ॥९१४॥

915 तं च पद्मरथो नाम राजा कालिञ्जरेश्वरः । मैत्रीं संस्मृत्य कल्हाद्यैराययौ तत्कुलोद्भवः ॥९१५॥

सोथ शुक्लत्रयोदश्यां वैशाखे बलिभिः समम् । तैर्मानी सुस्सलो राजा संग्रामं प्रत्यपद्यत ॥९१६॥

प्रेक्षकैर्वर्ण्यतेद्यापि स पर्णोत्सान्तिके रणः । तस्याद्भुतोवमानाग्निक्षालनप्रथमक्षणः ॥९१७॥

कुतोप्येत्य निजस्फारस्ततः प्रभृति भूपतिम् । तमशून्यं पुनश्चक्रे मृगेन्द्र इव काननम् ॥९१८॥

भयस्खलितपाशानां कालपाशैः समागमम् । स चकार तुरुष्काणां क्षणात्पुष्कलविक्रमः ॥९१९॥

920 मातुलं सोमपालस्य निन्ये कवलतां बली । रणे तत्कोपवेतालो वितोलासरितस्तटे ॥९२०॥

किमन्यदल्पसैन्यः स बहूनपि स तान्व्यधात् । हतविद्रुतविध्वस्तान्[1]यथात्मपरिपन्थिनः ॥९२१॥

काश्मीरिकाणा[1]मौचित्यं किं नाभूत्स्वामिनो ददुः । एकस्य ये रणं नष्टाः कुकीर्तिमपरस्य च ॥९२२॥

तुरुष्कैः सह यातेथ सोमपाले गतत्रपाः । विम्बं काश्मीरिका[1]स्त्यक्त्वा राजान्तिकमशिश्रियन् ॥९२३॥

द्यो धनूंषि शिरांस्यद्य नमयन्तोद्भुताशयाः । कुलप्रभोः पुरः स्पष्टं न ते धृष्टा ललज्जिरे ॥९२४॥

925 आगच्छद्भिस्ततः पौरैर्डामरैश्च समं नृपः । प्रतस्थे दिवसैर्द्वित्रैः कश्मीराभिमुखः पुनः ॥९२५॥

राजपुत्रः साहदेविः कल्हणो विशतः प्रभोः । डामरान्क्रमराज्यस्थान्संगृह्याग्रेसरोभवत् ॥९२६॥

य एव प्रथमं राजसैन्याद्भिक्षुमशिश्रियत् । स एव विम्बो राजानं तमुत्सृज्य समाययौ ॥९२७॥

अन्ये जनकसिंहस्य संमता मन्त्रितन्त्रिणः । प्रत्युद्यन्तो व्यलोकयन्त नृपतिं निरपत्रपाः ॥९२८॥

काण्डिलेत्राभिधग्रामजन्मा शस्त्री सुलक्षणः । भाङ्गिले कश्चिदभवच्छून्ये क्रान्तोपवेशन[1]ः ॥९२९॥

930 भिक्षुर्वितीर्णमार्गं तं सुस्सलान्तिकगामिनः । लोकस्यात्रान्तरे जेतुं सहपृथ्वीहरो ययौ ॥९३०॥

जितवांस्तं बबन्धेच्छां निहन्तुं सुस्सलोन्मुखम् । क्रोधाज्जनकसिंहं च वार्तां तां च[1] विवेद सः ॥९३१॥

नगरस्थेन तेनाथ पौराश्वारोहतन्त्रिणः । संघटय्याखिलान्भिक्षोः प्रातिपक्ष्यमगृह्यत ॥९३२॥

जानंस्तेनावृतं राज्यं ततो भिक्षाचरो नृपः । पृथ्वीहरेणानुयातो नगरं सहसाविशत् ॥९३३॥

सेतौ सदाशिवाग्रस्थे तत्सैन्यैः सह संगरम् । दृप्यञ्जनकसिंहोथ सान्त्वमानोपि सोग्रहीत् ॥९३४॥

935 दृष्टं जनकसिंहस्य योधानां वल्गतां मदात् । अविशङ्क्य पराभूतिं मूहूर्तं सुभटायितम् ॥९३५॥

अलकेन समं पृथ्वीहरस्तद्भ्रातृसूनुना । अन्येन सेतुना तीर्त्वा तस्य सैन्यमनाशयत् ॥९३६॥

तन्व्यश्वा[1]रोहपौरेषु विद्रुतेषु सबान्धवः । नक्तं जनकसिंहोथ पलाय्य लहरं ययौ ॥९३७॥

---

९१०. [1]) Emended; A मुखाद्बुद्धा. ९११. [1]) Emended; A बन्धुमै°. ९१४. [1]) Emended; A लहरे. ९२१. [1]) Emended; A °ध्वस्तयथा°. ९२२. [1]) Emended; A काश्मीरका°. ९२३. [1]) Emended; A काश्मीरका°. ९२९. [1]) Emended with C; A °वेवनः. ९३१. [1]) Emended with C; A स. ९३७. [1]) Emended with C; A तन्व्यारोह°.

भिक्षुपृथ्वीहरौ प्रातस्तत्पृष्ठग्रहणोद्यतौ । तत्पश्चात्तैश्चवाराद्या धृष्टा भूयोप्यशिश्रियन् ॥९३८॥
क्षिप्त्वा क्षिप्रं स्वकक्ष्यान्तर्विबुधप्रतिमा भयात् । ते पारिषद्यविप्राद्याः प्रायमुत्सृज्य विद्रुताः ॥९३९॥
शून्यानि सुरयुग्यानि रक्षन्तः केपि भिक्षुणा । प्रायान्निवृत्ता वयमित्युक्तवन्तो न बाधिताः ॥९४०॥ 940
द्यो जानके भैक्षवेद्य व॰गत्तुङ्गतुरंगमान् । दृष्टवन्तो वयं सैन्ये सादिनोद्यापि साद्भुताः ॥९४१॥
भिक्षुराजप्रदीपेन द्योतितः क्षणभङ्गिना । पैतृव्येणाधिकारेण[1] स्यालस्तिलकसिंहजः ॥९४२॥
गते जनकसिंहेथ प्रतिपक्षानुसारिणाम् । विधातुं वेश्मभङ्गादि लब्धं भिक्षुमहीभुजा ॥९४३॥
अत्रान्तरे हुष्कपुरे नीतेषु तिलकादिषु । भङ्गं सुल्हणसिम्बाद्यैः समेतानन्तसैनिकैः ॥९४४॥
अग्रायातैर्मल्लकोष्टजनकाद्यैः ससैनिकैः । अपरैरपि सामन्तैर्बलबाहुल्यशालिभिः ॥९४५॥ 945
अन्वीयमानो दिवसैर्द्वित्रैराक्रान्तमण्डलः । विशंल्लहरमार्गेण विपक्षालक्षितोपतत् ॥९४६॥
नगरापणवीथ्यन्तर्हयारोहमुखान्पुरः[1] । द्रोहयोधानुपायातांस्तद्दैवोज्झितसाध्वसः ॥९४७॥
वेष्टितालम्बकूर्चेन वक्रेण[1] भ्रुकुटीभृता । कोपकम्पिततारेण फुल्लनासापुटस्पृशा ॥९४८॥
कांश्चित्संतर्जयन्निन्दन्नन्यान्भग्नांस्तथापरान् । तीव्रातपश्यामवपुस्ताम्यन्काल इवोल्बणः ॥९४९॥
आशीर्घोषकृतां पुष्पवर्षिणां पुरवासिनाम् । पूर्वापकारिणां श्रेणीष्ववज्ञान्यस्तलोचनः ॥९५०॥ 950
स्कन्धमात्रोपरि न्यस्तं कवचं हेलया दधत् । केशानन्तशिरस्त्रान्तनिःसृतान्धूलिधूसरान् ॥९५१॥
पक्ष्ममालां च बिभ्राणः सकोशासिस्तुरंगिणाम् । आकृष्टखड्गमालानामन्तर्वल्गत्तुरंगमः ॥९५२॥
ससिंहनादैरुद्दामैर्भेरीभांकारनिर्भरैः । बलैर्भरितदिक्कोशः सुस्सलः प्राविशत्पुरम् ॥९५३॥ कुलकम् ॥
षड्भिः सद्वादशदिनैर्मासैर्ज्यैष्ठे सितेहनि । स सप्तनवताब्दस्य तृतीये पुनरराययौ ॥९५४॥
राजधानीमप्रविष्टो भिक्षुं पूर्वपलायितम् । अन्विष्यन्क्षिप्तिकातीरे सलवन्यं[1] व्यलोकयत् ॥९५५॥ 955
सरित्पारं रिपौ प्राप्ते स सपृथ्वीहरो गतः । मार्गे लवन्यैर्मिलितैरन्यैः साकं न्यवर्तत ॥९५६॥
तं विद्राव्य रणे राजा बद्ध्वा प्रहतिविक्षतम् । सिंहं पृथ्वीहरज्ञातिं राजधानीमथाविशत् ॥९५७॥
उपभोगैः सपत्नस्य तत्कालनिःसृतस्य सा । अङ्किता मानिनस्तस्य वेश्येवोद्वेगदाभवत् ॥९५८॥
भिक्षुः संत्यज्य कश्मीरान्सह पृथ्वीहरादिभिः । ग्रामं पुष्याणनाडाख्यं सोमपालाश्रयं ययौ ॥९५९॥
प्रस्थिते[1] डामरान्सर्वान्राजा स्वीकृत्य तु व्यधात् । खेर्यां वद्दात्मजं मल्लं हर्षमित्रं च कम्पने ॥९६०॥ 960
पूर्वापकारं स्मरतो देशकालानपेक्षिणः । ..............................[1] ॥९६१॥
भिक्षुसंपर्कजं गन्धमपि सोढुमशक्नुवन् । भृत्येभ्यः खण्डशः कृत्वा द्वेषात्सिंहासनं ददौ ॥९६२॥
अनयोपार्जितां त्यक्तुमनीशा डामराः श्रियम् । समन्योश्च नृपाद्भीता नात्यजन्विप्लवोद्यमम् ॥९६३॥
भिक्षुस्तु राज्यविभ्रष्टः सुहृदो विषये वसन् । उत्साहं सोमपालस्य दानमानैः पुनर्ययौ ॥९६४॥
बिम्बः साहायकप्रार्थी विस्मयस्यान्तिकं गतः । तस्मिन्विरोधिभिर्बद्धे[1] रणे धीरस्तनुं जहौ ॥९६५॥ 965
भिक्षाचरो[1] बिम्बशून्यो भजन्दुर्नयपात्रताम् । अनैषीदवरुद्धात्वं तत्प्रियां तां गतत्रपः ॥९६६॥

---

९४२. [1]) Emended; A पितृव्येणा°. ९४७. [1]) Emended; A °मुखात्पुरः. ९४८. [1]) Emended with C; A वक्लेण. ९५५. [1]) Emended; A सलवन्यो. ९६०. [1]) Thus A; perhaps to be emended प्रस्थितो. ९६१. [1]) Here two *pâdas* are missing. A does not indicate the *lacuna*; C supplements पूर्वविद्वेषिणस्तस्य न कृपां प्रतिपेदिरे. ९६५. [1]) Emended; A °र्बद्धे; C °र्बद्धो. ९६६. [1]) Emended with C; A भिक्षाचरे.

निपत्य स्वल्पसैन्योपि ततः शूरपुरे बली । जित्वा पृथ्वीहरो वड्डात्मजं व्यद्रावयद्रणात्[1] ॥९६७॥
तस्मिन्पलायिते भिक्षुं पुनरानीय सोविशत् । भुवं मडवराज्यानां दस्यूनां स्वचिकीर्षया ॥९६८॥
तत्रत्यैर्मङ्खजय्याद्यैर्डामरैः स्वीकृतैः समम् । जगाम विजयक्षेत्रं विजेतुं कम्पनापतिम् ॥९६९॥
970 जितस्तेनाहवे हर्षमित्रो निहतसैनिकः । विजयेश्वरमुत्सृज्य भीतोवन्तिपुरे ययौ ॥९७०॥
विजयक्षेत्रजास्तत्तत्पुरग्रामोद्भवा अपि । जना भयेन प्राविक्षन्नथ चक्रधरान्तिकम् ॥९७१॥
योषिच्छिशुपशुव्रीहिधनोपेतैरपूर्यत । स्थानं तत्तैश्च राज्ञश्च योधैः सायुधवाजिभिः ॥९७२॥
अन्वारूढैरथ स्पष्टं लोकोल्लुण्ठनलालसैः । ते[1] भैक्षवैरवेष्ट्यन्त कटकैर्व्याप्तदिक्तटैः ॥९७३॥
तान्दारुमयवप्रौघद्वारगुप्ते सुरौकसः । अङ्गने[1] तिष्ठतो हन्तुं बन्द्धुं वा नाशकन्द्विषः ॥९७४॥
975 तदन्तरस्थितं दग्धुं कर्पूराख्यं स्ववैरिणम् । कश्चित्कतिस्थलीग्रामजन्मा निर्गुण[1]डामरः ॥९७५॥
पापो जनकराजाख्यस्तत्राग्निमुददीदिपत् । मूढस्तादृगपर्यन्तजन्तुसंहारनिर्घृणः ॥९७६॥
तमापतन्तं ज्वलितं ज्वलनं वीक्ष्य सर्वतः । भूतग्रामस्य सुमहान्हाहाकारः समुद्ययौ ॥९७७॥
विशल्कृतान्तवाहारिभियेव छिन्नबन्धनैः । अश्वैरसूचीसंचारा भ्रमद्भिर्जघ्निरे जनाः ॥९७८॥
प्राच्छाद्यत वलज्ज्वालाकरालैर्धूमराशिभिः । व्योम पिङ्गकचश्मश्रुजालैर्नक्तंचरैरिव ॥९७९॥
980 निर्धूमस्य विसारिण्यो ज्वाला हव्यभुजो दधुः । संतापद्रुतहेमाभ्रसुवर्णलहरीभ्रमम् ॥९८०॥
संतापविद्रुतव्योमचारिमौलिपरिच्युताः । रक्तोष्णीषा इव भ्रेमुर्ज्वालाभङ्गा नभोङ्गने ॥९८१॥
दीर्घदारुग्रन्थिभङ्गजन्मा चटचटारवः । तापप्रक्काथ्यमानाभ्रगङ्गाघोष इवोद्ययौ ॥९८२॥
स्फुलिङ्गैः प्लोषवित्रस्तजन्तुजीवितसंनिभैः । अग्राहि गहनव्योममार्गभ्रमणसंभ्रमः ॥९८३॥
शकुनैः शावसंचारशोकादाक्रन्दिभिर्नभः । मानुषैर्दह्यमानैश्च भूमिर्मुखरिताभवत् ॥९८४॥
985 भ्रातॄन्भर्तॄन्पितॄन्पुत्रानालिङ्ग्याक्रन्दनिर्भराः । भीमीलितदृशो नार्यो निरदह्यन्त वह्निना ॥९८५॥
तदन्तरात्साहसिका ये केचिन्निरयासिषुः । बहिस्ते निहताः क्रूरैर्डामरैर्मृत्युचोदितैः ॥९८६॥
तावन्तो जन्तवस्तत्र व्यपद्यन्त तदा क्षणात् । स्विन्ना एव न ये दग्धास्तावतापि कृशानुना ।९८७॥
अन्तः शान्तेषु सर्वेषु बहिः शान्तेषु हन्तृषु । क्षणादेव प्रदेशः स निःशब्दः समजायत ॥९८८॥
वह्नेः कहकहाशब्दो ह्रस्वीभूतार्चिषः परम् । स्विद्यतश्च शवौघस्य श्रुतः सिमसिमाध्वनिः ॥९८९॥
990 विलीनासृग्वसामेदोनिःष्यन्दाः सरणीशतैः । प्रसस्रुर्विस्रगन्धश्च योजनानि बहून्यगात् ॥९९०॥
एकः सुश्रवसः कोपाद्द्वितीयो दस्युविप्लवात् । ईदृग्घु[1]तवहाबाधो घोरश्चक्रधरेभवत् ॥९९१॥
भूतग्रामस्य[1] संहारः संवर्त इव वह्निना । तादृक्त्रिपुरदाहे वा खाण्डवे तत्र वाभवत् ॥९९२॥
पुण्येह्नि शुक्लद्वादश्यां नभसः कुकृतं महत् । तद्भिक्षुः कृतवान्राज्यलक्ष्म्या भाग्यैश्च तत्यजे ॥९९३॥
सकुटुम्बेषु दग्धेषु तदानीं गृहमेधिषु । पुरग्रामसहस्रेषु गृहाः शून्यत्वमाययुः ॥९९४॥
995 मङ्खाख्यो डामरश्चिन्वञ्शवान्नौ[1]नगरोद्भवः । प्रीतिं प्राप्तैस्तदीयार्थैः कापालिक इवाययौ ॥९९५॥

९६७. [1]) Emended with C; A विद्राव°. ९७३. [1]) Emended; A तैर्भैक्षवै°. ९७४. [1]) Emended with C; A आङ्गने. ९७५. [1]) Emended; A निर्गुंदडा°. ९९१. [1]) Emended with C; A ईदृग्धुत°. ९९२. [1]) Emended; A भूतग्रामसंहार°; C भूतग्रामाविसं°. ९९५. [1]) Emended; A °न्नौगरोद्भवः.

अवरूढोथ विजयक्षेत्रं भिक्षाचरस्ततः । लब्ध्वा नागेश्वरं पापं यातनाभिरमीमरत् ॥९९६॥
गर्ह्यं पैतामहे देशे किं नासीत्तस्य चेष्टितम् । पितृद्रुहः स तु वधः सर्वप्रीतिकरोभवत् ॥९९७॥
गृहिणी हर्षमित्रस्य पत्यौ त्यक्त्वा पलायिते । पृथ्वीहरेण संप्राप्ता विजयेशाङ्गनान्तरात् ॥९९८॥
निमित्तभूतमेतादृक्प्रजासंहारवैशसम् । स्वं निन्दन्सुस्सलो राजा ततो योद्धुं विनिर्ययौ ॥९९९॥
संवेगात्पाप्मनः शीघ्रं निरयक्लेशभुक्तये । प्राप्तो जनकराजेन वधोवन्तिपुरान्तिके ॥१०००॥ 1000
यत्कृते क्रियते कर्म लोकान्तरसुखान्तकम् । स मूढैः सुलभापायः कायश्चित्रं न गण्यते ॥१००१॥
कम्पनाधिपतिं सिम्बं कृत्वा डामरमण्डलम् । चकर्ष विजयक्षेत्रादन्यतोपि ततो नृपः ॥१००२॥
शमालां प्रययौ पृथ्वीहरो मडवराज्यतः । विजित्य मल्लकोष्ठेन[1] त्याजितो निजमण्डलम् ॥१००३॥
क्षिप्ताः केचिद्वितस्तायां केचिच्चक्रधराङ्गने । अक्रियन्ताग्निसात्कर्तुमशक्या बहवः शवाः ॥१००४॥
क्रमराज्येथ कल्याणवाडा[1]दीत्रिल्हणो[2]जयत् । आनन्दोनन्तजस्तत्र ततो द्वाराधिपोभवत् ॥१००५॥ 1005
शूले प्रमापितं सिंहं नयन्पृथ्वीहरो बली । सार्धं जनकसिंहाद्यैरयुध्यत्क्षिप्तिकातटे ॥१००६॥
तीर्थं प्रस्थाप्यमानेषु विपन्नास्थिष्विहास्त्यहः । भाद्रे मास्येकमबलाक्रन्दिताक्रान्तदिक्पथम् ॥१००७॥
हतवीराबलाक्रान्द[1]मुखरे नगरान्तरे । पृथ्वीहराहवे सर्वैर्दिवसैरन्वकारि तत् ॥१००८॥ युग्मम् ॥
अथा[1]यातो यशोराजस्यालः शूरो दिगन्तरात् । श्रीवको विदधे राज्ञा खेरीकार्याधिकारभाक् ॥१००९॥
अप्रियं स लवन्यानां तेपि वा तस्य नाचरन् । कालं तु गूढसौहार्दैरन्योन्यस्यात्यवीवहन् ॥१०१०॥ 1010
पुनराश्वयुजे राजा शमालां निर्गतस्ततः । परैर्मनीमुषग्रामे युधि भङ्गमनीयत ॥१०११॥
नित्याभ्यासेन युद्धानां लब्धोत्कर्षो न्यदर्शयत् । सर्ववीराग्रणीर्भिक्षुस्तत्पूर्वं तत्र विक्रमम् ॥१०१२॥
तुक्कद्विजादयो मुख्या भिक्षुपृथ्वीहरादिभिः । आसारापातविवशा निहताः सौस्सले बले ॥१०१३॥
प्रधानवीरभूयिष्ठे सैन्यद्वन्द्वे न कोप्यभूत् । स वीरश्चरतः संख्ये भिक्षोरैक्षिष्ट यो मुखम् ॥१०१४॥
पृथ्वीहरस्य भिक्षोश्च संग्रामे भूरिवार्षिके । कादम्बरीपताकाख्ये द्वे अश्वे पीतपाण्डुरे ॥१०१५॥ 1015
आस्तामत्यद्भुते याभ्यामनेकतुरगक्षये । न विपन्नं प्रहृतिभिर्नान्वभाव्यथ वा क्लमः ॥१०१६॥
सैन्यानां संकटे त्राणमश्रान्तिरविकत्थनः । अभूत्क्लेशसहो वीरो नान्यो भिक्षाचरात्क्वचित् ॥१०१७॥
योधानां सौस्सले सैन्ये विद्रवेषु न कश्चन । त्राणं बभूव तेनैते बहवो बहुधा हताः ॥१०१८॥
नवेषु डामरानीकाः केचिद्भङ्गेषु सैनिकाः । भिक्षाचरगजेन्द्रेण कलभा इव पालिताः ॥१०१९॥
नान्यस्योत्थानशीलत्वं दृष्टं पृथ्वीहरात्तदा । स्वयं यो भैक्षवे द्वारे जजागार प्रतिक्षपम् ॥१०२०॥ 1020
ततः प्रभृत्यभूद्गोप्ता पुरः पश्चाच्च सर्वदा । विश्वेदेव इव श्राद्धे युद्धे भिक्षुर्महाभटः ॥१०२१॥
आहवे साहसं कुर्वन्सर्वतः सोभ्यधान्निजान् । एवमस्खलितस्थैर्यमुपपत्तिमसंत्यजन् ॥१०२२॥
न मे राज्याय यत्नोयं पर्याप्तं दुर्यशः पुनः । कृत्ये प्रसक्तुं पूर्वेषां व्यवसायं व्यपोहितुम् ॥१०२३॥
अनाथा इव ते नाथा विशां व्यापादनक्षणे । ज्ञात्वा नष्टं कुलं नाथवन्तो नूनं स्पृहां दधुः ॥१०२४॥

---

१००३. [1]) Emended with C; A मल्लन. १००५. [1]) A °वाळादी°.—[2]) Emended with C; A°दीत्रल्हणो°. १००८. [1]) Emended; A °बलाक्रान्तमु°. १००९. [1]) Emended; A अथ यातो.

1025 इति मत्वा सोढकष्टश्चेष्टे[1] सुदृढनिश्चयः । दूयमानोस्मि दायाददुःखदायी दिने दिने ॥१०२५॥

नास्त्येवाप्राप्तकालस्य[1] विपत्तिरिति जानतः । कस्य साहसवैमुख्यमुत्पद्येत यशोर्थिनः ॥१०२६॥

किं कार्यगतिकौटिल्यैरुक्तैस्तान्यथ वा कथम् । न वदामः प्रतिज्ञाय स्वयमार्षेध्वनि स्थितिम् ॥१०२७॥

सोत्कर्षपौरुषाद्भिक्षोरशङ्किषत डामराः । ततो दायादविच्छेदं नास्याकृषत जातु चित् ॥१०२८॥

प्राग्राज्याधिगमाद्राज्ञामन्येषां राजबीजिनः । चिन्तयन्तो व्यवहृतिं व्युत्पद्यन्ते शनैः शनैः ॥१०२९॥

1030 पितुः पितामहस्याथ न दृष्टं तेन किंचन । अत एवाभजन्मोहं राज्यं संप्राप्तवान्पुरा ॥१०३०॥

तत्स भूयोपि चेदाप्स्यत्[1]कैव वार्ता विपाटने । सापेक्षं वीक्षितुं जाने न दैवेनाप्यशक्यत ॥१०३१॥चक्कलकम्[2]॥

जानंश्छवन्यकौटिल्यं प्रमादात्स हतेहिते । प्राप्नुयां राज्यमित्याशां बद्ध्वाहान्यत्यवाहयत् ॥१०३२॥

दस्यूनां सुस्सलो राजा मेने तत्स्वहितं मतम् । जिगीषु[1]र्नीतिविक्रान्त्योः प्रयुक्तौ लिप्सु[1]रन्तरम् ॥१०३३॥

युद्धे स्वान्स स्मरन्वैरं नापासीत्तेन तेभजन् । नास्मिन्विश्वासमेतस्माद्धेतोर्नास्याभवज्जयः ॥१०३४॥

1035 इत्थं नानामतैः पक्षप्रतिपक्षैरुपेक्षितम् । राष्ट्रं निखिलमेवागात्सर्वतः शोचनीयताम् ॥१०३५ ॥

यत्संबन्धाद्विटपिनिवहैर्निग्रहव्ययग्रवन्यव्याधप्रत्तानलपरिभवः कोपि नन्वन्वभावि ।
हा धिग्दन्ती विघटनपरः सोपि माद्यन्नमीषां लभ्यं श्रेयो विधिविधुरितैर्नान्यतो न स्वतोपि ॥१०३६॥

द्वैराज्ये प्रभवत्येवमकाण्डपतितैर्हिमैः । विवशं सुस्सलक्ष्माभृदजयद्वैक्षवं बलम् ॥१०३७॥

पुष्याण[1]नाडं भूयोपि भिक्षुपृथ्वीहरौ गतौ । अन्यैर्लवन्यैर्भूभर्तुर्नतिर्दत्तकरैः कृता ॥१०३८॥

सिम्भोपि कम्पनाधीशो व्यधाद्विजितडामरः । सर्वां मडवराज्योर्वीं वीरः शमितविप्लवाम् ॥१०३९॥

1040 तावत्यापि विपक्षाणां शान्त्या शीतलतां गतः । पूर्ववैरं स्वपक्ष्याणां प्रादुश्चक्रेथ भूपतिः ॥१०४०॥

जिघांसौ कथिते राजन्युल्हणेन पलायितः । मल्लकोष्ठः सोपि कोपाद्राज्ञा राष्ट्रात्प्रवासितः ॥१०४१॥

अनन्तात्मजमानन्दं बद्ध्वा द्वाराधिकारिणम् । व्यधत्त सैन्धवं प्रज्जिनामानं राजबीजिनम् ॥१०४२॥

गतोथ विजयक्षेत्रं सिम्भेन सहितोविशत् । नगरं तं च विश्वस्तं बद्ध्वा कारागृहेक्षिपत् ॥१०४३॥

अनुस्मृतिमहावात्याप्रेरितोमर्षपावकः । आचचाम क्षमावारि तस्य भृत्यान्दिधक्षतः ॥१०४४॥

1045 सिंहथक्कनसिंहाभ्यामनुजाभ्यां सहावधीत् । शूलेधिरोप्य सिम्भं स रोषावेशविलुप्तधीः ॥१०४५॥

कम्पने श्रीवक्कं चक्रे सुज्जि प्रज्जेः सहोदरम् । बद्ध्वा जनकसिंहं च राजस्थाने न्ययोजयत् ॥१०४६॥

आप्ताश्च मन्त्रिणश्चासंस्तस्य वैदेशिकास्ततः । स्वदेशजस्तु सोभूद्यो लोहरस्थं तमन्वगात् ॥१०४७॥

अथ सर्वेपि साशङ्कास्तं त्यक्त्वाध्यश्र[1]यन्रिपून् । शतैकीयः कश्चिदासीद्राजधान्यां नृपाश्रितः ॥१०४८॥

तेनाप्रतिसमाधेयो भूयः शान्तेप्युपद्रवे । इत्थमुत्थापितोनर्थो न पुनर्यः शमं ययौ ॥१०४९॥

1050 एकाक्षेपे परेपि स्युर्यत्र भृत्या विशङ्किताः । तत्रापराधे प्राज्ञस्य राज्ञोवज्ञैव शस्यते ॥१०५०॥

माघेथ मल्लकोष्ठाद्यै[1]राहूताः पुनरायुयुः । ते शूरपुरमार्गेण भिक्षुपृथ्वीहरादयः ॥१०५१॥

वितस्तापरिखाक्षिप्ता भूरगम्या द्विषामियम् । इति प्रायान्नवमठं त्यक्त्वा राजगृहं नृपः ॥१०५२॥

---

१०२५. [1]) $A_1$ gloss स्वयं. १०२६. [1]) Emended with C; A नास्त्येवप्राप्त°. १०३१. [1]) Emended; A चेदाप्स्येत्कैव.—[2]) $A_1$ writes here ४ instead of चक्कलकम्. १०३३. [1]) Doubtful emendation; A जिगीषोर्नी° and प्रयुक्तो लिप्सरन्तरम्; C जिगीषोर्नी° and प्रयत्नो लिप्यनन्तरः. १०३८. [1]) A पुन्यान°. १०४८. [1]) Emended; A त्यक्ताधिश्र°. १०५१. [1]) Emended; A °कोष्ठाद्ये आहूताः.

वर्षेष्टानवते चैत्रे डामरेषु युयुत्सुषु । अभ्येत्य मल्लकोष्ठेन प्रागेवाग्राहि संगरः ॥१०५३॥
सोश्ववारैः सह रणं चकार नगरान्तरे । नृपावरोधैः सौधाग्रादालोकितमथाकुलैः ॥१०५४॥
भिक्षुणा क्षिप्तिकातीरे स्कन्दावारं न्यवध्यत । ....................[1] ॥१०५५॥ 1055
नृपोद्यानाद्द्रुमाञ्चिन्युरिन्धनाय महानसे । दूर्वाङ्कुरान्मन्दुराभ्यो वाहभोज्याय डामराः ॥१०५६॥
पृथ्वीहरस्तु संगृह्णन्दस्यून्मडवराज्यजान् । चकार विजयक्षेत्रे यावत्कटकसंग्रहम् ॥१०५७॥
तावत्प्राज्जिमुखान्मल्लकोष्ठयुद्धाय भूपतिः । आदिश्यादादवस्कन्दं वैशाखे साहसोन्मुखः ॥१०५८॥
अकस्मात्पतिते तस्मिन्हतावष्टम्भविक्षता[1]: । प्रययुः सेतुमुल्लङ्घ्य जीवाश्वस्ताः कथंचन ॥१०५९॥
नगरं मल्लकोष्ठाजिव्यग्रे प्रज्जावथाविशत् । पृथ्वीहरानुजः सुज्जिं निर्जित्य मनुजेश्वरः ॥१०६०॥ 1060
परं पारं वितस्तायां सेतुच्छेदादनाप्नुवन् । अर्वाचि तीरे स गृहान्दग्ध्वागात्[1]क्षिप्तिकां ततः ॥१०६१॥
लवन्यैर्नगरं प्राप्तं मत्वा सुस्सलभूपतिः । आययौ विजयक्षेत्रात्सैन्यमुत्थाप्य विह्वलः ॥१०६२॥
अहंपूर्विकयारातिशङ्कार्तैश्च निजैर्बलैः । पीडितस्तस्य गम्भीरासिन्धुसेतुरभज्यत ॥१०६३॥
स कृष्णषष्ठ्यां ज्यैष्ठस्य तस्यासंख्यश्चमूचयः । यथाग्निना चक्रधरे तथा तत्राम्भसा मृतः ॥१०६४॥
भुजमुद्यम्य शमयन्सैन्यानां संभ्रमं नृपः । त्रस्तैर्भ्रष्टैस्तथा पृष्ठे पतितः सरिदन्तरे ॥१०६५॥ 1065
अनभ्यस्ताम्बुतरणैराश्लिष्य त्रुडितोसकृत् । तरदायुधविद्धाङ्गः स निस्तीर्णः कथंचन ॥१०६६॥
अनुत्तीर्णं बलं त्यक्त्वा पारे सामन्तसंकुलम् । सहस्रांशेन सैन्यस्य तीर्णेनानुगतो ययौ ॥१०६७॥
संत्यक्तानन्तसैन्योपि सोवष्टम्भमयो नृपः । प्रविश्य नगरं मल्लकोष्ठमुख्यान्रणेग्रहीत् ॥१०६८॥
विजयस्याथ जननी सिल्लाख्या स्वामिनोज्झितम् । निनाय देवसरसं सैन्यं तद्विजयेश्वरात् ॥१०६९॥
साथ पृथ्वीहरेणैत्य हता तत्रोपवेशने । टिक्कश्च दत्तो भूपालसैन्यं विद्रावितं च तत् ॥१०७०॥ 1070
परं व्यायामविद्याविद्विद्रुते निखिले बले । द्विजः कल्याणराजाख्यः समरेभिमुखो हतः ॥१०७१॥
मन्त्रिडामरसामन्तसंकुलात्सौस्सलाद्बलात् । पृथ्वीहरेणागृह्यन्त बद्ध्वा वृन्दानि शस्त्रिणाम् ॥१०७२॥
अन्वगात्स वितस्तान्तं यावत्तान्विद्रुतान्बलात् । ओजानन्दद्विजादींश्च बद्ध्वा शूले व्यपादयत् ॥१०७३॥
मन्त्रिणो जनकश्रीवकाद्या राजात्मजास्तथा । तीर्त्वाद्रिं विषलाटायां शरणं प्रययुः खशान् ॥१०७४॥
इत्थं पृथ्वीहरो लब्धजयः संगृह्य डामरान् । जिगीषुर्भिक्षुणा साकं नगरोपान्तमाययौ ॥१०७५॥ 1075
भूयोपि मानुषाश्वौघसंहर्ता सर्वतस्ततः । रणः प्रववृते प्राग्वत्पुरे रुद्धस्य भूपतेः ॥१०७६॥
निर्निरोधः पथानेन नृपावसथ इत्यभूत् । सैन्ये मडवराज्यानां स्वयं पृथ्वीहरोग्रणीः ॥१०७७॥
तत्तत्सामन्तकुलजैर्वीरैः काश्मीरकैर्भटैः । समेतं डामरकुलं दुर्जयं सर्वतोभवत् ॥१०७८॥
काश्मीरकाः शोभकाद्याः काकवंश्याः सहस्रशः । प्रख्याता भैक्षवे पक्षे रल्लाद्याश्चापरेस्फुरन् ॥१०७९॥
नदतः स्वबलाद्वाद्यं तुमुलं शृण्वतोन्मिषत् । पृथ्वीहरेणागण्यन्त वाद्यभाण्डानि कौतुकात् ॥१०८०॥ 1080
हित्वा भूर्यथ तूर्यादि परिच्छेत्तुं स कौतुकी । श्वपाकदुन्दुभीभाण्डशतानि द्वादशाशकत् ॥१०८१॥

---

१०५५. [1]) Here two *pādas* seem to be lost; A does not indicate the *lacuna*. C adds रामेण वानरी सेना यथा पाथोनिधेस्तटे. १०५८. [1]) Emended; A °श्यादादवस्कन्दं. १०५९. [1]) Emended with C; A °विक्षतः. १०६१. [1]) Emended with C; A °न्दग्ध्वाग्रात्क्षि°.

तथा विनष्टसैन्योपि त्रिंशद्विंशैर्नृपात्मजैः । मितैः स्वदेशजैश्चारीन्प्रतिजग्राह सुस्सलः ||१०८२||
राजन्याविच्छटिकुलोद्भूतावुदयधन्यकौ । चम्पावल्लापुराधीशावुदयब्रह्मजज्जलौ ||१०८३||
ओजो[1] मल्हणहंसानां धुर्यौ हरिहडौकसः । क्षत्रिकाभिञ्जिकास्थानसव्यराजादयस्तथा ||१०८४||
1085 बिडालपुत्रा नीलाद्या भावुकान्वयसंभवाः । रामपालः सहजिको युवा तस्य च नन्दनः ||१०८५||
नानावंश्याः परेप्युग्रसंग्रामव्यग्रताजुषः । पुरोपरोधसंनद्धानरुन्धन्सर्वतो रिपून् ||१०८६||
तनूजनिर्विशेषेण रिल्हणेन महीभुजः । रणाग्रेसरताग्राहि विजयाद्यैश्च सादिभिः ||१०८७||
स्वयमुद्यमिना राज्ञा वर्मणेव निजौ भुजौ । सुज्जिप्रज्जी पाल्यमानावभूतां रणकर्मठौ ||१०८८||
ताभ्यां साधारणीकुर्वन्राज्योत्पत्तिं महीपतिः । स महाव्यसने तस्मिन्सम्यग्गूढधुरोभवत् ||१०८९||
1090 तत्पक्षा भागिकशरद्भासिमुम्मुनिमुङ्कटाः[1] । कलशाद्याश्च कुशला विपक्षक्षोभणेभवन् ||१०९०||
भूभर्तुष्टक्कविषये लवराजस्य नन्दनः । आसीत्क्मलियश्चास्य संग्रामाग्रेसरः प्रभोः ||१०९१||
प्रहारं बलिनस्तस्य चामरध्वजशोभिनः । प्रभिन्नस्येव नागस्य हयारोहा न सेहिरे ||१०९२||
अनुजः साङ्गिकः पृथ्वीपालो भ्रातुः सुतोस्य च । पाञ्चालाः[1] फल्गुनस्येव[2] पार्श्वरक्षित्वमाययुः ||१०९३||
एतावद्भिर्भृत्यरत्नै राष्ट्रेपि कुपितेजयत् । भूरिस्वर्णार्पणोपात्तैर्वाजिभिश्च महीपतिः ||१०९४||
1095 तत्र तत्राहवे सोपि बभ्रामासंभ्रमो नृपः । उत्सवे गृहमेधीव मण्डपे मण्डपे स्वयम् ||१०९५||
तस्य हि व्यसनं त्रासहेतुः प्राभूदुपक्रमे । प्रवृद्धिं प्राप्तमभवद्धैर्यादाय्यथ धीमतः ||१०९६||
क्लैब्यकृद्भयमापाते मध्यपाते न तादृशम् । करक्षिप्तं यथा शीतं मज्जने न तथा पयः ||१०९७||
वैरिसैन्यतमो यत्र यत्र ज्योत्स्नेव निर्ययौ । सितासिता च भूभर्तुस्तत्र तत्रास्य वाहिनी ||१०९८||
एकदा कृतसंकेतास्तुल्यमाहवमेलके । महासरितमुत्तीर्य डामरा नगरेपतन् ||१०९९||
1100 असीमनगरस्थानविभक्तकटको नृपः । परिमेयाश्ववारस्तान्विशतः स्वयमाद्रवत् ||११००||
नाभजड्डामरानीकस्तेन विद्रावितो धृतिम् । हेमन्तमरुता कीर्णपर्णराशिरिवेरितः ||११०१||
श्यानन्दः काककुलजो लोष्टशाद्यनलादयः । अन्ये च डामरानीके ख्याता भूभृद्भटैर्हताः ||११०२||
लग्नाभिघातानानीतान्त्राज्ञः क्रूरस्य दृक्पथम् । बहून्निजघ्नुश्चण्डाला इव राजोपजीविनः ||११०३||
भयाद्गोपाद्रिमारूढा अपरे भैक्षवास्ततः । आसन्नमृत्यवोभूवन्कटकैर्वेष्टिता द्विषाम्[1] ||११०४||
1105 यो मार्गो दुर्गमः पत्त्रिणोपि त्रातुं ततः स तान् । तत्र व्यापारयामास भिक्षुर्मानी तुरंगमान् ||११०५||
कथंचित्पत्त्रिणा विद्धग्रीवस्तस्याग्रहीन्मुहुः । पार्श्वे पृथ्वीहरो रूढिं द्वित्राश्चान्ये महाभटाः ||११०६||
वेलाद्रिभिरिवोद्वृत्तैः सिन्धौ तैर्द्विषतां बले । रुद्धे गोपाचलं त्यक्त्वा तेन्यानारुरुहुर्गिरीन् ||११०७||
अथोदतिष्ठद्ध्[1]ामेन राजानीकस्य वाहिनी । मल्लकोष्ठस्य पत्त्यश्वक्षोभिताशेषदिक्तटा ||११०८||
अरिपृष्ठग्रहव्यग्रैस्तिष्ठन्स्वैर्वर्जितो बलैः । तदाज्ञाय्यखिलैरेष हतो राजेत्यसंशयम् ||११०९||
1110 आपातं सुस्सलो राजा यावत्तस्याविसोढवान् । तावत्सावरजः प्रज्जि[1]राजगाम रणाङ्गनम् ||१११०||

१०८४. [1]) Thus $A_1$ in margin; $A_1$ तेजो in text. १०९०. [1]) Thus A; perhaps to be emended मुङ्कजाः; cf. vii. 589. १०९३. [1]) Emended (*i.e.* पाञ्चालाः); A पाञ्चालौ.—[2]) Thus A; perhaps read with C फाल्गुन°. ११०४. [1]) Thus $A_3$; $A_1$ द्विशाम्. ११०८. [1]) Emended; A °तिष्ठ-मेन; C °तिष्ठत् सुस्सेन. १११०. [1]) Emended with C; A प्राज्जि°.

आषाढबहुलाष्टम्यां स हयारोहमेलकः । निजशस्त्रध्वनिप्रत्तसाधुवादो महानभूत् ॥१११९॥
ताभ्यां स शमिते युद्धे ससूनुः ससमीरणः । दावो नभोनभस्याभ्यामिव प्रापाम्बुवृष्टिभिः[1] ॥१११२॥
संग्रामबहले काले तादृगन्यो न कोप्यभूत् । यादृक्स दिवसो वीर्यशौटीर्यनिकषोपलः ॥१११३॥
अनीकिनी लाहरी सा विलम्बेनायया[1]विति । तेषामुत्पाटनेच्छूनां नाभवद्धस्तमेलकः ॥१११४॥
अन्योन्यस्य परिज्ञाता दिवसे तत्र संकटे । भिक्षोर्भूमिभृता शक्तिर्भूमिभर्तुश्च भिक्षुणा ॥१११५॥ 1115
ततो मडवराज्यांस्तान्योद्धुं तत्रैव निर्दिशन् । क्षिप्तिकारोधसा युद्धमेत्य पृथ्वीहरोग्रहीत् ॥१११६॥
दिगन्तरादथायातो यशोराजो महीभुजा । मण्डलेश्वरतां निन्ये रिपून्प्रतिजिहीर्षुणा ॥१११७॥
खेरीकार्ये पुरा तस्य लवन्या दृष्टविक्रमाः । रणेषु मुखमालोक्य शतशः प्रचकम्पिरे ॥१११८॥
कुङ्कुमालेपनच्छत्त्रहयादिप्रतिपत्तिदः । सर्वेषामभिनन्द्यस्त्वं तं राजा स्वमिवानयत् ॥१११९॥
दीर्घोपप्लवयाप्येन दुःस्थितः स्वास्थ्यलिप्सया । जनो बबन्ध तत्रास्थां नववैद्य इवातुरः ॥११२०॥ 1120
ज्यायांसं पञ्चचन्द्राख्यं शेषाणां गर्गजन्मनाम् । नृपतिर्मल्लकोष्ठस्य प्रातिपक्ष्ये[1] न्ययोजयत् ॥११२१॥
शिशुश्छुडाख्यया मात्रा पालितः स शनैः शनैः । आश्रीयमाणोनुचरैः पित्र्यैः किंचित्प्रथां ययौ ॥११२२॥
यशोराजानुयातेन राज्ञा जन्येषु निर्जिताः । केचित्तत्पक्ष[1]मभजन्भग्नाः केचिच्च डामराः ॥११२३॥
सभिक्षुः प्रययौ पृथ्वीहरः स्वमुपवेशनम् । मल्लकोष्ठोन्मुखो राजा निर्जगामामरेश्वरम् ॥११२४॥
अत्रान्तरे मल्लकोष्ठो विसृज्य निशि तस्करान् । सदाशिवान्तिके शून्यां राजधानीमदाहयत् ॥११२५॥ 1125
पृथ्वीहरेण भूयोपि योद्धुमागच्छतासकृत् । प्रज्जिसुज्जिमुखा युद्धमकुर्वन्क्षिप्तिकातटे ॥११२६॥
वारं वारं लवन्यः स नगरे निर्दहन्गृहान् । प्रायः शून्यत्वमनयद्वितस्तातीरमुत्तमम् ॥११२७॥
तत्र तत्र रणान्कुर्वन्प्राणसंदेहदायिनः । आचक्रामाथ नृपतिर्लहरं बहलैर्बलैः ॥११२८॥
निःसेतुं तरतः सिन्धुं दृतिभङ्गाद्ययुर्जले । मन्दिरं कन्दराजाद्यास्तदीयाः समवर्तिनः ॥११२९॥
दरदेशं ययौ मल्लकोष्ठो राज्ञा निराकृतः । सपुत्राप्यभजच्छुड्डा प्रारोहं लहरान्तरे ॥११३०॥ 1130
आनिन्यिरे जय्यकेन लवन्येन नृपान्तिकम् । विषलाटान्तरात्तेथ जनकश्रीवकादयः ॥११३१॥
लहरारब्धयतिक्रान्तनिदाघः शरदागमे । शमालां निर्ययौ राजा यशोराजान्वितस्ततः ॥११३२॥
भग्नं पृथ्वीहरत्रासात्सैन्यं रक्षन्मनीमुषे । आजौ सज्जात्मजो डोम्बनामा राजसुतो हतः ॥११३३॥
युद्धं सुवर्णसानूरग्रामशूरपुरादिषु । कुर्वञ्शश्वन्नृपः प्राप पर्यायेण जयाजयौ ॥११३४॥
श्रीकल्याणपुराद्भङ्गं नीते पृथ्वीहरादिभिः । श्रीवके नागवद्दाद्या युधि प्रापुः प्रमापणम् ॥११३५॥ 1135
पौषे सुवर्णसानूरान्निहन्तुं मातुरन्तकम्[1] । टिक्कं स देवसरसं व्यसृजद्गर्गवल्लभाम् ॥११३६॥
स्वेन राज्ञश्च सैन्येन सहिता सा जिताहिता । अकस्मात्तत्र टिक्केन निपत्य निहता युधि ॥११३७॥
स स्त्रीवधं व्यधात्पापी द्वितीयमपि[1] निर्घृणः । विशेषः कोथ वा तिर्यङ्म्लेच्छतस्कररक्षसाम् ॥११३८॥
अबलां स्वामिनीं हन्यमानां त्यक्त्वा पलायिताः[1] । चित्रं पशूपमाः शस्त्रं स्त्रीचक्रुर्लाहराः पुनः ॥११३९॥

---

१११२. [1]) The text of this verse appears to be defective. १११४. [1]) A विलम्भेन. ११२१. [1]) Emended with C; A प्रातिपक्षे. ११२३. [1]) Emended with C; A °त्तान्पक्ष°. ११३६. [1]) Conjectural reading; A मातुरन्तिकम्. Cf. viii. 1069 ff. and 1138. ११३८. [1]) Emended with C; A द्वितीयामपि. ११३९. [1]) Emended with C; A °यितः.

1140 ईषत्प्रागागतं शय्यां भूय एवोल्बणं नृपः । ज्ञात्वा मडवराज्यं स प्रययौ विजयेश्वरम् ॥११४०॥
मल्लराजतनूजानां निजा जिह्वेव दुर्जना । बभूव प्रभविष्णुत्वे व्यापदापातदूतिका ॥११४१॥
प्रायश्चाद्यतने काले भृत्यास्तितउवृत्तयः । दर्शयन्ति समुत्सार्य सारं दोषतुषग्रहम् ॥११४२॥
आ बाल्यात्संस्तुताश्लीलवचःपरुषभाषितैः । निर्गौरवैर्यशोराजो राज्ञि तस्मिन्व्यरज्यत ॥११४३॥
स दुर्जातिर्महासैन्ययुतोवन्तिपुरस्थितः । अभजत्तत उत्थाय प्रतिपक्षसमाश्रयम् ॥११४४॥
1145 वैरिपक्षगते तस्मिन्बलैः सर्वोत्तमैः समम् । विह्वलो विजयक्षेत्रात्पलायिष्ट महीपतिः ॥११४५॥
धिग्राज्यं यत्कृते सोपि सेहे प्राणान्निरक्षिषुः । मुष्णद्भिश्चौरचण्डालप्रायैः परिभवं पथि ॥११४६॥
माघे पलाय्य नगरं प्रविष्टः स व्यथाभिधे । भृत्ये द्रोग्धर्यशङ्किष्ट स्वेषामपि तनूरुहाम् ॥११४७॥
काश्मीरके[1] जनेशेषे निराशो[2] नितरां ततः । अङ्कन्यस्तोत्तमाङ्गोभूत्प्रज्ञिपक्षे क्षमापतिः ॥११४८॥
मुद्रिता रुद्रपालादिपूर्वराजात्मजप्रथा । प्रज्जिना विक्रमत्यागनयाद्रोहादिभिर्गुणैः ॥११४९॥
1150 तेनैव वर्धितामुत्र देशे विशदकीर्तिना । कालदौरात्म्यलुठिता प्रतिष्ठा शस्त्रशास्त्रयोः ॥११५०॥
अमन्त्रयत संगम्य यशोराजस्तु भिक्षुणा । नेच्छन्ति डामरा राज्यं तव विक्रमशङ्किताः ॥११५१॥
उत्पाद्य पुनरुत्पिञ्जं साधिष्ठानबला वयम् । राज्यं स्वयं ग्रहीष्यामो यास्यामो वा दिगन्तरम् ॥११५२॥
इति तैर्मन्त्रिते छुड्डुं[1] हतं श्रुत्वा दरत्पुरात् । आगत्य मल्लकोष्ठोपि प्राविशत्स्वोपवेशनम् ॥११५३॥
वर्षोथ दुस्तरः ख्यात एकान्नशतसंख्यया । सर्वभूतान्तकृल्लोके प्रावर्तत सुदारुणः ॥११५४॥
1155 वसन्ते डामराः सर्वे प्राग्वन्मार्गैर्निजैर्निजैः । आगत्य भूयो भूपालं नगरस्थमवेष्टयन् ॥११५५॥
धीरः सुस्सलदेवोपि पुनरासीद्दिवानिशम् । निःसीमसमरस्तोमारम्भसंरम्भभाजनम् ॥११५६॥
दाहलुण्ठनसंग्रामकर्मशौण्डैः स डामरैः । प्राग्विप्लवेभ्योप्यधिको विप्लवः पर्यवर्धत[1] ॥११५७॥
महासरित्पथे निर्निरोधे तस्थुर्विविक्षवः । नगरं ते यशोराजभिक्षुपृथ्वीहरादयः ॥११५८॥
ततः कतिषुचिद्युद्धाहेषु यातेषु संगरे । निजेनैव यशोराजः परकीयभ्रमाद्धतः ॥११५९॥
1160 कय्यात्मजेन हि समं विजयाख्येन सादिना । सौस्सलेन तु संग्रामे परावृत्तीः प्रदर्शयन् ॥११६०॥
विप्रलब्धैः सवर्णाश्वकवचावेक्षणान्निजैः । शूलायुधिभिरुद्दामैः शूलाघातैरहन्यत ॥११६१॥
भिक्षो राज्यं समर्थोयं दातुं हन्तुं ततश्च नः । भीत्या तैर्डामरैरेव स घातित इति श्रुतिः ॥११६२॥
यथैव तेन विश्वस्तः स्वामी द्रोहेण वञ्चितः । तथैव प्राप विश्वस्तः क्षिप्रमेव वधं मृधे ॥११६३॥
पृथ्वीहरस्तत्र तत्र योधयित्वाथ डामरान् । क्षिप्तिकारोधसा भूयोभ्येत्य संग्राममग्रहीत् ॥११६४॥
1165 तत्राधिष्ठानयोधानां भिक्षुपक्षोपजीविनाम् । पौरुषं स्वपरोत्कर्षपरिभावि व्यभाव्यत ॥११६५॥
वह्निदानमहायोधसंहाराद्यैरुपद्रवैः । एकमेकमहस्तत्रानेहस्यासीद्भयावहम् ॥११६६॥
अतपत्तरणिस्तीक्ष्णमभीक्ष्णं भूरकम्पत । ववुर्द्रुमाद्रीन्भञ्जन्तो महोत्पातप्रभञ्जनाः ॥११६७॥
पवनोत्थापितैः पांसुकूटैर्दध्रे मदोद्धतैः[1] । व्योम्नि प्रोत्तम्भनस्तम्भभङ्गिर्निर्घातदारिते ॥११६८॥

---

११४८. [1]) A काश्मीरिके.—[2]) Emended; A निराशे. ११५३. [1]) Emended with C; A °न्त्रितैच्छुड्डुं. ११५७. [1]) Thus corr. by $A_3$ from $A_1$ – – – – भूत्. ११६८ [1]) Thus A; G महोद्धतैः.

ज्यैष्ठस्य शुक्लैकादश्यां प्रवृत्तेथ महारणे । काष्ठीले डामरा वह्निमेकस्मिन्प्रददुर्गृहे ॥११६९॥
सोग्निर्वा मारुतोद्धूतः प्रसरन्वैद्युतोथ वा । जज्वालैकपदे कृत्स्नं नगरं निरवग्रहः ॥११७०॥ 1170
दृष्टस्तदानीमेतावद्गजव्यूह इवापतन्[1] । माक्षिकस्वामिनो धूमो बृहत्सेतौ यदुत्थितः ॥११७१॥
अथेन्द्रदेवीभवनविहारं सहसागमत् । ततो नगरमुज्ज्वालं क्षणात्सर्वमदृश्यत ॥११७२॥
न भूमिर्न दिशो न द्यौर्धूमध्वान्ते व्यभाव्यत । हुडुक्कामुखचर्माभो दृश्यादृश्योभवद्रविः ॥११७३॥
धूमान्धकारसंच्छन्नास्ततः प्रज्वलताग्निना । अपुनर्दर्शनायेव मुहुराविष्कृता गृहाः ॥११७४॥
वितस्तादृश्यतोज्ज्वालवेश्माश्लिष्टतटद्वया । रक्ताक्तोभयधारेव कृतान्तस्यासिवल्लरी ॥११७५॥ 1175
ब्रह्माण्डोर्ध्वकवाटान्तसंस्पर्शात्पतितोन्नतैः । ज्वालाकलापैः संवृद्धैर्हैमच्छत्रवनायितम् ॥११७६॥
उच्चावचैर्युतो ज्वालाशृङ्गैर्हैमाद्रिसंनिभः । वह्निर्धूमच्छलान्मूर्ध्नि बभाराम्बुधरावलिम् ॥११७७॥
आविर्भवन्तो[1] ज्वालाभ्यो गृहाश्चक्रुर्मुहुर्मुहुः । अदग्धा एत[2] इत्याशां विमुग्धगृहमेधिनाम् ॥११७८॥
ज्वलितैस्[1]तापितजला वितस्ता पतितैर्गृहैः । और्वोष्मवेदनाक्लेशं विवेद सरितां प्रभोः ॥११७९॥
दीप्तपक्षैः खगैः साकं ज्वलिता बालपल्लवाः । उद्यानद्रुमषण्डानां व्योमोड्डयनमादधुः ॥११८०॥ 1180
सुधासिताः सुरगृहा ज्वालासंवलिता व्यधुः । क्षयसंध्याम्बुदाश्लिष्टहिमाद्रिशिखरभ्रमम् ॥११८१॥
मज्जनावासनैसेतुकदम्बैः प्लोषशङ्कया । अपास्तैर्नगरस्यान्तर्ययुर्नद्योपि शून्यताम् ॥११८२॥
किमन्यन्मठदेवौकोगृहाट्टादिविवर्जितम् । नगरं क्षणमात्रेण दग्धारण्यमजायत ॥११८३॥
लोष्टावशेषे नगरे धूमश्यामो निरास्पदः । उच्चैरेको बृहद्बुद्धो दृष्टो दग्धद्रुमोपमः ॥११८४॥
सैन्येषु ज्वलितावासत्राणाय चलितेष्वथ । शतमात्रेण योधानां युतो भूभृदजायत ॥११८५॥ 1185
पारं गन्तुं वितस्तायाश्छिन्नसेतुं तमक्षमम् । लब्धरन्ध्रा द्विषोनन्ता निहन्तुं पर्यवारयन् ॥११८६॥
पुरं दग्धं स्वमुत्सन्नं[1] प्रजा नष्टाश्च चिन्तयन् । आसन्नं मरणं राजा निर्विण्णो बह्वमन्यत ॥११८७॥
प्रस्थातुमथ तं प्रत्यङ्मुखमाशङ्क्य विद्रुतम् । संज्ञितोन्यैः कमलियः क देवेत्यब्रवीद्वचः ॥११८८॥
संरम्भस्मितविद्योति चन्दनोल्लेखमाननम् । परिवर्त्य निरुद्धाश्वो धीरः स तमभाषत ॥११८९॥
तदद्य करवै भूमेः कृते हम्मीरसंगरे । चकार राजा भिज्जो यत्सोभिमानी पितामहः ॥११९०॥ 1190
कुतस्त्योप्[1]येष दायादो यज्ज्ञातास्माकमस्मि वा । स हर्षदेवोपश्यन्नः कार्यशेषं पलायितः ॥११९१॥
को नाम मानिनां पङ्क्तौ प्रविष्टोन्ते निजां भुवम् । असिक्तां स्वाङ्गरक्ताक्तां[1] व्याघ्रः कृत्तिमिवोज्झति ॥११९२॥
इत्युक्त्वोदञ्चयन्वल्गामुत्क्षिप्ताग्रमुखं हयम् । संस्प्रष्टु[1]मिच्छुः पाणिभ्यां कृपाणमुदनामयत् ॥११९३॥
ततो निगृह्य[1] वल्गायां वाजिनं लवराजजः । ऊचे भृत्येषु सत्स्वग्रे प्रवेशार्हो न भूभुजः ॥११९४॥
प्रहारविक्लवस्तिष्ठन्गृहादेकोभ्युपाययौ । संकटे तत्र भूभर्तुः पृथ्वीपालोन्तिकं परम् ॥११९५॥ 1195
कौलपुत्र्यं स्तुवंस्तस्य वात्सल्यादेष भूपतिः । स्वस्यात्तनिष्क्रयां[1] मेने सेवाविष्कृत्युपक्रियाम् ॥११९६॥

---

११७१. [1]) Thus corr. by $A_1$ from °पतत्. ११७८. [1]) Emended with C; A °भवन्त्यो.—[2]) Emended; A यत. ११७९. [1]) Emended with C; A ज्वल्वितै°. ११८७. [1]) Emended; A स्वमुत्पन्नं. ११९१. [1]) Emended with C; A कुतस्त्येप्येष; doubtful. ११९२. [1]) Emended with C; A स्वाङ्गरक्तां. ११९३. [1]) Emended; A सम्प्रष्टुमिच्छुः; cf. viii. 1528. ११९४. [1]) Emended with C; A निर्गृह्य. ११९६. [1]) Emended with C; A स्वस्यात्तन्निष्क्रियां.

अथ स्थितास्त्रिभिर्व्यूहैरहितास्तेकिरञ्शरान् । हन्तुं वामेन ते योधाः सर्वे वाहनदुर्मदाः ॥११९७॥
स प्रेरयंश्च तुरगं दैवात्तस्य च तादृशः । सहस्राण्यपि भूरीणि व्यधीयन्त विरोधिनाम्[1] ॥११९८॥
अल्पसैन्यो द्विषत्खड्गमण्डलप्रतिबिम्बितः । नृपः साहायकायातविश्वरूप इवाबभौ ॥११९९॥
1200 कलविङ्कानिव श्येनः कुरङ्गानिव केसरी । एको व्यद्रावयद्भूरीनरीन्सुस्सलभूपतिः ॥१२००॥
निपत्य पत्तीन्रुन्धानान्खुराग्राण्यपि वाजिनाम् । प्राहरंस्ते हयारोहा व्यूहव्याहतरंहसः ॥१२०१॥
बिम्बितज्वलनज्वालाः सर्वे एव महाभटाः । हन्तव्याश्च हताश्चासन्नस्रस्रोतोरुणा इव ॥१२०२॥
स द्विषां कदनं कृत्वा दिनस्यान्ते न्यवर्तत । बाष्पायमाणोस्तकाशं[1] हव्याशेनोज्झितं पुरम् ॥१२०३॥
तादृशेप्यजिते तस्मिञ्जयाशागौरवं द्विषः । स चौज्झीद्रमणीयस्य विनाशाज्जीवितादरम् ॥१२०४॥
1205 जाग्रन्स्वपंश्चलंस्तिष्ठन्स्नन्नश्नन्नथ सोरिभिः । निर्गच्छन्नित्यमाहूतो न कैरुद्बाष्पमीक्षितः ॥१२०५॥
वह्निनिर्दग्धसर्वान्नसंभारे मण्डलेखिले । दुःसहः सहसैवाथ घोरो दुर्भिक्ष आययौ ॥१२०६॥
दीर्घविप्लवसंक्षीणसंचया डामरैर्बहिः । उत्तब्धोत्पत्तयो रुद्धसंचारा दग्धमन्दिराः ॥१२०७॥
अनाप्नुवन्तो विधुरे राज्ञि राजकुलाद्धनम् । दुर्भिक्षे तत्र सामन्ता अपि क्षिप्रं विपेदिरे[1] ॥१२०८॥
वह्निनिष्ठ्यूतशेषाणि वेश्मान्यन्नाभिलाषिभिः । बुभुक्षार्तैर्जनैर्दत्तो ददाहाग्निर्दिने दिने ॥१२०९॥
1210 सरितां सेतवो वारिसंसेकोच्छूनविग्रहैः । दुर्गन्धाः कुणपै रुद्धप्राणैस्तीर्णास्तदा जनैः ॥१२१०॥
निर्मांसनरकङ्कालकपालशकलाकुला[1] । उवाह सर्वतः श्वेता क्षितिः कापालिकव्रतम् ॥१२११॥
कृच्छ्रसंचारिणोर्कांशुश्यामक्षामोच्चविग्रहाः । व्यभाव्यन्त बुभुक्षार्ता दग्धस्थाणुनिभा जनाः ॥१२१२॥
अथ प्रबन्धयुद्धेन दिनैः कापीषुणा क्षतः । पृथ्वीहरो मृत इति श्रुतिर्मिथ्यैव पप्रथे ॥१२१३॥
गाढप्रहारविवशे तस्मिन्प्रच्छादिते जनैः । तां वार्तां श्रुतवान्राजा ननन्दायुद्ध चोद्धतम् ॥१२१४॥
1215 धीरेव पुंश्चली व्याजौत्सुक्यसंदर्शनेन तम् । जयश्रीर्लोभयन्त्यासीन्न तु भेजे समुत्सुकम् ॥१२१५॥
एकान्तवामहृदयो विधिरानुकूल्यं मिथ्या प्रदर्श्य विशिनष्ट्यनुबन्धि दुःखम् ।
अन्धीकरोति भृशमभ्रमगं ज्वलन्तं भास्वन्महौषधिभिदे प्रकटय्य वज्रम् ॥१२१६॥
दीर्घदुःखानुभूत्यन्ते यदीयागमनोत्सवम् । तपःफलमिव क्ष्माभृत्काङ्क्षन्नासीन्मनोरथैः ॥१२१७॥
वात्सल्येनान्वितं प्रेम गौरवेण प्रियं वचः । औचित्येन च दाक्षिण्यं सापत्यमिव या दधे ॥१२१८॥
तस्योपकरणीभूतविभूतिर्गृहिणी प्रिया । तस्मिन्काले महादेवी विपेदे मेघमञ्जरी ॥१२१९॥तिलकम्[1]॥
1220 विनोदशून्यनिर्विण्ण[1]लोकयात्रं जगद्विदन् । प्राणै राज्येन वा कृत्यं न स किंचिन्निरैक्षत ॥१२२०॥
सा भर्तुर्व्यसनोदन्तैः कृशा काश्मीरसंमुखी । औत्सुक्याद्दत्तयात्रासीच्छ्रान्ता फुल्लपुरान्तिके ॥१२२१॥
पूर्वं तद्दर्शनाशाया दुर्वार्तायास्ततोतिथिः । भवन्नतोधिकं राजा दुःखावेगेन पस्पृशे ॥१२२२॥
राज्ञीमज्ञातपारुष्यतयादूषितभक्तयः । अनुसस्रुश्चतस्रस्ताः परिवारवरस्त्रियः ॥१२२३॥
अप्रत्यक्षे क्षयेप्यस्या भक्त्युद्रिक्तत्वमत्यजन् । तेजो नामाभवत्सूदो वन्द्यो भृत्यान्तरेधिकम् ॥१२२४॥
1225 स ह्यसंनिहितोन्यस्मिन्नह्न्यायातो निजं शिरः । तच्चितोपान्तरूढेन भङ्क्त्वा ग्राव्णाविशन्नदीम् ॥१२२५॥

११९७—११९८. [1]) The text in these two verses appears to be corrupt or incomplete. १२०३. [1]) Thus A. १२०८. [1]) Emended; A प्रपे°. १२११. [1]) Emended with C; A °कुलाः. १२१९. [1]) $A_1$ writes here ३ instead of तिलकम्. १२२०. [1]) ण्ण supplied by $A_3$ in space left by $A_1$.

आहवाह्वानसंरम्भैः शोकविस्मृतिकारिणः । राज्ञो द्विषः कार्यवशादुपकारित्वमाययुः ॥१२२६॥
स राज्यमथ निक्षेप्तुकामो निर्विण्णमानसः । व्युत्क्रान्तशैशवं पुत्रमानिन्ये लोहराचलात् ॥१२२७॥
मण्डलेश्वरतां प्रज्जेर्भ्रातृव्यं भागिकाभिधम् । नीत्वा च गुप्तिमकरोद्द्वारे कोशदेशयोः ॥१२२८॥
वराहमूलं संप्राप्तमथायातः प्रियं सुतम् । आश्लिष्य विषयो राजा बभूवानन्दशोकयोः ॥१२२९॥
राजसूनुस्त्रिभिर्वर्षैः प्रत्यायातः स्वमण्डलम् । स पश्यन्पितरं चान्तरसुस्थितमतप्यत ॥१२३०॥ 1230
खेदनम्राननो लोष्टावशेषं सोविशत्पुरम् । अम्बुलम्बोम्बुदो दावनिर्दग्धमिव काननम् ॥१२३१॥
राज्येभ्यषिञ्चदाषाढस्याथेह्नि जनकोथ तम् । अवादीद्राज्यतन्त्रं च कृत्स्नमुत्कासुगद्गदः ॥१२३२॥
श्रान्ताः पितृपितृव्यास्ते न यां वोढुमशक्नुवन् । धुरमुद्वह तां वीर त्वयि भारोयमर्पितः ॥१२३३॥
साम्राज्यप्रक्रियामात्रपात्रं पुत्रं नृपो व्यधात् । न त्वाधिपदधीकारं तस्मिन्दैवविमोहितः ॥१२३४॥
अभिषेकविधावेव राजसूनोः शमं ययुः । पुरोपरोधावग्राहव्याधिचौराद्युपद्रवाः ॥१२३५॥ 1235
संपन्नसस्या च तथा देवी संववृते मही । दुर्भिक्षं श्रावणे मासि यथावत्प्रशमं ययौ ॥१२३६॥
अत्रान्तरे सिंहदेवो रणे कुर्वन्नरिक्षयम् । कर्णेजपैर्जनयितुर्द्रोग्धायमिति सूचितः ॥१२३७॥
कोपादविमृशं[1]स्तत्त्वं स बन्द्धुं[2] तं व्यसर्जयत् । कष्यात्मजं राजसूनुस्तत्तु प्रागेव बुद्धवान् ॥१२३८॥
कोपस्मितोत्कटस्याग्रे स तस्याप्रतिभोभवत् । निनाय रक्षामात्रेण पार्थिवाज्ञाममोघताम् ॥१२३९॥
अभुक्तवान्मनस्तापात्प्रत्ययोत्पत्तये पितुः । साकं तेन सुतोन्येद्युर्गन्तुं प्रावर्ततान्तिकम् ॥१२४०॥ 1240
आक्षेप्तुं शङ्कितोशक्य इति मत्वा स मन्त्रिभिः । मार्गान्न्यवर्तयत तं पिता मिथ्या प्रसादयन् ॥१२४१॥
अन्तस्तु निश्चिकायेति प्रविश्यातर्कितागमः । बद्धैनं स्थापयिष्यामि कारायामिति सोनिशम् ॥१२४२॥
धिग्राज्यं यत्कृते पुत्राः पितरश्चेतरेतरम् । शङ्कमाना न कुत्रापि सुखं रात्रिषु शेरते ॥१२४३॥
पुत्रपत्नीसुहृद्भृत्या येषां शङ्कानिकेतनम् । विस्रम्भ[1]भूर्भूपतीनां कस्तेषामिति वेत्ति कः ॥१२४४॥
साह्याभिधानप्रख्यातकुग्रामोपान्तवासिनः । खलपालस्य तनयः स्थानकाख्यस्य कस्यचित् ॥१२४५॥ 1245
शैशवे पांसुपाल्येन वर्धितो डामरोद्भवैः । गृहीतशस्त्रस्तन्नित्यं क्रमाट्टिक्कस्य लब्धवान् ॥१२४६॥
प्रथमाब्दात्प्रभृत्यात्तदूत्यो भूभर्तुराप्तताम् । प्रययावुत्पलो नाम वैरिविच्छेदमिच्छतः ॥१२४७॥
स हि भिक्षाचरं टिक्कमथ व्यापादयेत्यमुम् । जगादाङ्गीकृतैश्वर्यदानष्टिक्कोपवेशने ॥१२४८॥
कृतप्रतिश्रवं तस्मिन्नर्थे तं च महर्द्धिभिः । दानैरुपाचरद्रञ्जपतिनाम्नाप्ययोजयत् ॥१२४९॥
भोगलोभप्रभुद्रोहचिन्तादोलायमानधीः । स कार्यं परिहार्यं वा न कृत्यं निश्चिकाय तत् ॥१२५०॥ 1250
प्रासोष्टापत्यमत्रान्तस्तद्वधूः कार्यतो नृपः । तत्तच्च प्राहिणो[1]त्तस्यै पितेव प्रसवोचितम् ॥१२५१॥
सा तस्यात्युपचारस्य कारणं परिशङ्किता । पतिं पप्रच्छ निर्बन्धात्सोपि तस्यै व्यवर्णयत् ॥१२५२॥
न कार्यः स्वामिनो द्रोहः कृते वास्मिन्स सुस्सलः । त्वामेव शनकैर्हन्याद्द्रोग्धायमिति चिन्तयन् ॥१२५३॥
वरं स एव विश्वास्य व्यापाद्यस्तत्र चेद्वधः । भवेत्ते स्वामिपुत्रादिकुटुम्बं स्याद्विभूतिभाक् ॥१२५४॥

---

१२३८. [1]) A °विमृषं°.—[2]) Emended; A बन्धुं. १२४४. [1]) Thus A. १२५१. [1]) Emended with C; A प्रहिणो°.

1255 भार्ययेति प्रेर्यमाणः स निश्चयविपर्यये । टिक्कं विदितवृत्तान्तं कृत्वा बद्धोद्यमः कृतः ॥१२५५॥
गतागतानि कुर्वाणे दुधुक्षावथ पार्थिवः । स पुत्र इव विश्वासं ययौ दैवविमोहितः ॥१२५६॥
विपर्यस्ता मतिः पुत्रे विश्वासो वैरिसंश्रिते । जायते क्षीणभाग्यानां को नाम न विपर्ययः ॥१२५७॥
वैधेयैः स्वार्थलोभान्धैर्यद्वानर्थसमागमः । सरघो[1]पद्रवः क्षौद्रलुब्धैरिव न चिन्त्यते ॥१२५८॥
तं पीडितं प्रज्जिना च राज्ञा चावनतिं ततः । उत्पलोकारयट्टिक्कं नीविं चादापयत्सुतम् ॥१२५९॥
1260 राजाथ देवसरसं जितं संत्यज्य कार्तिके । बाट्टकाख्यमगाद्ग्रामं खेरीविषयवर्तिनम् ॥१२६०॥
स कल्याणपुराभ्यर्णे रणैस्तैस्तैर्विलक्षताम् । भिक्षुकोष्ठेश्वरमुखानपि निन्ये महाभटान् ॥१२६१॥
मध्याद्भिक्षाचरादीनां सुज्जिः[1] काककुलोद्भवम् । जीवग्राहं महावीरं युधि जग्राह शोभकम् ॥१२६२॥
भवकीयस्य कृत्वादौ विजयस्य पराभवम् । भूभुजा तद्गृहा दग्धाः कल्याणपुरवर्तिनः ॥१२६३॥
दग्धे वडोसके[1] भिक्षाचरो नष्टाश्रयो व्यधात् । त्यक्त्वा तां क्ष्मां शमालायां ग्रामे काकरुहे स्थितिम्[2] ॥१२६४॥
1265 अनुजो भवकीयस्य विजयस्य भयान्नृपम् । संश्रितस्तेन तूर्णेण बद्ध्वा कारागृहेऽर्पितः ॥१२६५॥
भूरिसैन्यानुगं शूरपुरे विन्यस्य रिल्हणम् । आस्कन्दाशङ्किनीं राजा चक्रे राजपुरीमपि ॥१२६६॥
इत्थमुद्दण्डया वृत्त्या खण्डितोच्चण्डडामरः । स्तोकावशेषं सोपश्यत्कर्तव्यमरिनिर्जयम् ॥१२६७॥
भिक्षाचरो लवन्याश्च शक्तिक्षयमुपागताः । विदेशगमनं भीता रिपौ बलिनि मेनिरे ॥१२६८॥
किमप्यभाग्यावतरैर्भिक्षुपक्षजुषां यतः । जीवतामप्यनुल्लासान्निर्जीवत्वमिवाययौ ॥१२६९॥
1270 स सोमपालकौटिल्यं स्मरन्कुर्यां हिमात्यये । श्मशानोर्वीं राजपुरीमिति ध्यायन्न्यवर्तत ॥१२७०॥
शान्तप्रायस्वदेशोर्वीविप्लवस्य महीपतेः । तस्यार्णवान्तक्रमणप्रतीतिः समभाव्यत[1] ॥१२७१॥
शतैकीयो योऽवशिष्टो विप्लवक्षपिते जने । वर्षं वर्षं स तद्राज्ये युगदीर्घं त्वमन्यत ॥१२७२॥
असुखत्रासदारिद्र्यप्रियनाशादिवैशसैः । स राज्यकालः सर्वस्य परितापात्रहो ह्यभूत् ॥१२७३॥
नरः पौरुषनैष्ठुर्यशठत्वेन करोति किम् । विधातृवृत्तिवैचित्र्य[1]पराधीनासु सिद्धिषु ॥१२७४॥
पुरोभूतं कंचित्परिहरति राशिं तम इव व्यतीते कस्मिंश्चिद्धरिरिव विवृत्यास्यति दृशम् ।
1275 स्वमुल्लङ्घ्यासन्नं क्वचन नृपतिं दर्दुर इव क्रमेत्स्रष्टुर्दृष्टः स्फुटमिति गतीनामनियमः ॥१२७५॥
विश्वासनिहतान्निन्दन्नुच्चलादीन्पुरावसत् । नित्यं विकोशशस्त्रो यः पुराविज्ञो निशम्य च ॥१२७६॥
विदूरथा[1]दिवृत्तान्तं नादात्केलिक्षणे व्रुवन् । स्त्रीषु संभुज्यमानासु[2] विश्वासविशदां दृशम् ॥१२७७॥
स बन्धाविव निर्बन्धाद्विशश्वास यदुत्पले । तत्र संभाव्यते केन दैवादन्यो विमोहकृत् ॥१२७८॥
टिक्कादयो भूमिपतेः सुज्जेर्वान्यतरे[1] हते । त्वां तुल्यकार्यकर्तारं विद्म इत्यूचुरुत्पलम् ॥१२७९॥
1280 सुज्जिर्न व्यश्वसीत्तस्मिन्स जिघांसुस्तु भूभुजम् । तत्र तत्राभवत्सज्जः प्रसङ्गं नासदत्पुनः ॥१२८०॥
प्रतिश्रुतविलम्बेन समन्योरथ भूपतेः । प्रत्ययोत्पत्तये देवसरसान्नीविमात्मजम् ॥१२८१॥

---

१२५८. [1]) $A_2$ gloss सरघा मधुमक्षिका ( *Amara.* ii. 5. 26 ). १२६२. [1]) Emended; A सुर्ज्जि. १२६४. [1]) A वळोसके; perhaps read वडोत्सके. Cf. वाडोत्सः viii. 1306.—[2]) Emended with C; A स्थितं. १२७१. [1]) The last two *pādas* have become in A partly illegible by an ink blot and have been repeated in the margin by the same hand which supplemented the gloss to i. 110. १२७४. [1]) Emended with C; A °वैचित्य°. १२७७. [1]) Emended with C; A विड्डूरथा°. —[2]) Emended; A °मानास्वविश्वास°. १२७९. [1]) Emended; A °न्यतमे.

व्याघ्रप्रशस्तराजादींस्तीक्ष्णांश्चात्मसमान्[1]परान् । आदाय कार्यमेतैर्मे सिध्येदित्युक्तवान्नृपम् ॥१२८२॥
उचित्योचित्य सेनाभ्यो गृहीतैः साहसक्षमैः । शतैः समं त्रिचतुरैः पत्तीनामेकदा ययौ ॥१२८३॥तिलकम्[1]॥
समयान्वेषिणो हन्तुस्तस्यासन्नस्य सर्वदा । प्रियाहारादिदानेन हन्तान्तःप्रीतिकार्यभूत् ॥१२८४॥
तुरंगं मन्दुराचक्रवर्त्याख्यं नगरस्थितम् । अस्वस्थमुल्लाघयितुं तुरगव्यसनी नृपः ॥१२८५॥ 1285
स लक्ष्मक[1]प्रतीहारकव्यात्मजमुखान्निजान् । पार्श्वाद्विसृष्टवा[2]नासीत्क्षणे तस्मिन्मितानुगः ॥१२८६॥
शृङ्गारो लक्ष्मकापत्यं निशम्याप्तैर्निवेदितम् । व्यधाच्छ्रुतिपथे राज्ञस्तदुत्पलचिकीर्षितम् ॥१२८७॥
विरुद्धे बन्धुधीर्दृष्टहिंसारम्भेऽपि संभवेत् । आसन्नजीवितान्तस्य जन्तोः सूनापशोरिव ॥१२८८॥
स शापो गान्धार्यास्तदपि सरुषो भाषितमृषेस्त उत्पाताश्चक्षुः स्वमपि तदभौमं प्रकटयत्[1] ।
कुलान्तं तत्त्राणाक्षममकृत वैकुण्ठमपि तद्विदन्नप्यन्यत्वं क इव भवितव्यस्य कुरुताम् ॥१२८९॥
मिथ्यैतदित्यधिक्षिप्य क्षितिपालः प्रदर्शयन् । तमङ्गुल्योत्पलादींस्तानप्रस्थानेवमब्रवीत् ॥१२९०॥ 1290
द्रोग्धुः सुतोऽभवद्योगादनिच्छन्स्वास्थ्यमेष मे । त्वां दुष्टमुत्पलाचष्टे स्वेनान्यैर्वाथ चोदितः ॥१२९१॥
ते छादयन्तः स्मेरास्या धार्ष्ट्येन भयवैकृतम् । वक्ति देवो यदस्माभिर्वाच्यमित्येवमूचिरे ॥१२९२॥
निर्यातेष्वथ तेष्वीषत्साशङ्क इव निश्चलान् । द्वाःस्थेनाकारयद्द्वित्रानन्तिके मुख्यशस्त्रिणः ॥१२९३॥
उन्मनाश्च किमप्यासीद्विनिःश्वस्य स चिन्तयन् । सास्रुश्च न रतिं लेभे नृत्तगीतादिदर्शने ॥१२९४॥
मेने वैदेशिकप्रायानाप्तानपि धृतभ्रमः । पुण्यक्षये पिपतिषुर्वैमानिक इवाम्बरात् ॥१२९५॥ 1295
राजान्तरङ्गाः साशङ्काः प्रभौ शाठ्येन मोहिते । पूत्कारमैच्छन्दातारमन्यं केचिदचेतनाः ॥१२९६॥
अयमेव स कालस्य बलात्कवलनग्रहः । विदन्तोऽपि यदायान्ति जन्तवः कृत्यमूढताम् ॥१२९७॥
सर्वान्तरक्षणेष्वस्तचक्षुषो दिवसद्वयम् । उत्पलाद्याश्च साशङ्काः कथमप्यत्यवाहयन् ॥१२९८॥
रहः क्षणप्रार्थिनस्तांस्तृतीयेऽह्न्यब्रवीन्नृपः । स्नात्वा प्रत्यूषे तद्यूयं भोक्तुं यात मुहुर्गृहम् ॥१२९९॥
देवतार्चनपर्यन्तमवसायाह्निकं विधिम् । आजुहावोत्पलं दूतैर्मध्याह्नेऽथ रहःस्थितः ॥१३००॥ 1300
कार्यसिद्धिं श्रद्दधानो वैजन्याद्राजसद्मनः । राज्ञोऽभ्यर्णं स साशङ्कं द्वाःस्थ[1]रुद्धानुगोऽविशत् ॥१३०१॥
प्रावेशयद्द्वारि रुद्धं व्याघ्रं तदनुजं नृपः । शेषाणामपि भृत्यानामादिदेश बहिःस्थितिम् ॥१३०२॥
विलम्बमानेष्वाप्तेषु केषुचित्सरुषो वचः । सत्यं तस्योद्ययावास्तां सोऽत्र द्रोग्धा य इत्यपि ॥१३०३॥
ताम्बूलदायकः प्रौढवयास्तेनावशेषितः । सांधिविग्रहिको विद्वान्नाहिलश्चान्तिके परम् ॥१३०४॥
दूतौ टिक्कस्यार्घदेवतिष्य[1]वैश्याभिधावुभौ । तत्र प्रसङ्गादासातामज्ञातोत्पलसंविदौ ॥१३०५॥ 1305
वाडौरसः[1] सुख[2]राजाख्यो डामरो भिक्षुसंमतः । प्रयास्यति प्रभोर्दृष्ट्वा पादौ तत्कार्यसिद्धये ॥१३०६॥
इत्युक्तवांस्तेष्वहःसु तं नृपं नातिदूरगम् । ससैन्यं डामरं[1] चक्रे स्वस्य त्राणार्थमुत्पलः ॥१३०७॥
तथा चैनं तस्थिवांसं कृत्यमस्त्यमुनेति च । उक्त्वा प्रशस्तराजं तं पार्श्वं प्रावेशयद्द्रुतम् ॥१३०८॥
प्रविष्टो निर्जनं बाह्यमाकलय्य स मण्डपम् । अलक्ष्यमाणव्यापारो द्वारमर्गलितं व्यधात् ॥१३०९॥

---

१२८२. [1]) Emended; A °त्मसरान्परान्. १२८३. [1]) $A_1$ writes here ३ instead of तिलकम्. १२८६. [1]) Thus $A_1$; $A_3$ पक्ष[illegible]°—[2]) वा supplied by $A_3$ in space left by $A_1$. १२८९. [1]) Emended; A प्रकटयन्. १३०१. [1]) Emended; A द्वास्थ. १३०५. [1]) Emended; A °स्याघदेवतिष्ठवैश्य°; Cf. viii. 1543. १३०६. [1]) A वाळौरसः perhaps read वाडोरसः. Cf. वडासके viii. 1264.—[2]) A सु×ख°. १३०७. [1]) A डमरं.

1310 स्नानार्द्रकेशं शीतालुतया प्रावारवेष्टितम् । कृत्वा कृत्स्नं वपुः कृष्टशस्त्रीकं विष्टरोपरि ||१३१०||

आसीनं वीक्ष्य नृपतिं प्रसङ्गो नेदृशो भवेत् । विज्ञप्तिं कुरु भूभर्तुरित्यूचे व्याघ्र उत्पलम् ||१३११||

स तया संज्ञया व्यग्रः पादप्रणतिकैतवात् । राज्ञोऽग्रमेत्य तच्छस्त्रीं विष्टरस्थामपाहरत् ||१३१२||

विकोशां[1] चाकरोत्पश्यंस्तां तयोद्भ्रान्तलोचनः । प्राह स्म हा धिक्किं द्रोह इति यावद्वचो नृपः ||१३१३||

प्राहरत्प्रथमं तावत्सव्ये पार्श्वे तयैव सः । तस्य प्रशस्तराजेन मूर्धनि प्रहृतं ततः ||१३१४|| युग्मम्[1] ||

1315 व्याघ्रेणाथ क्षतं वक्षस्ताभ्यामेवासकृत्तदा । प्रहृतं तत्र स पुनः प्राहरन्मे द्विरुत्पलः ||१३१५||

पूर्वयैव प्रहृत्या हि छिन्नपार्श्वास्थिमालया । मेने कृष्टान्त्रतन्त्रीकं स तं प्रोषितजीवितम् ||१३१६||

गत्वा तमोरिं पूत्कर्तुमिच्छन्व्याघ्रेण राहिलः । पृष्ठे कृताहतिर्द्विना नालिका नोज्झितोऽसुभिः ||१३१७||

ताम्बूलदायकस्त्यक्त्वा कङ्कोलाद्यज्जको[1] व्रजन् । दीनो निजेभ्यः कारुण्यादुत्पलेनैव रक्षितः ||१३१८||

अन्तः समुत्थिते क्षोभे बाह्यमण्डपवर्तिभिः । टिक्ककाद्यैः कृता लुण्ठिर्द्रोहगृह्यैरुदायुधैः ||१३१९||

1320 उत्पलो निहतो राज्ञेत्यवेत्य कटकस्थितैः । बहिःस्थान्हन्यमानान्स्वान्समाश्वासयितुं ततः ||१३२०||

रक्तार्द्रशस्त्रं संदर्श्य तमोरेर्वपुरुत्पलः । ऊचे मया हतो राजा न त्याज्या तच्चमूरिति ||१३२१||

तच्छ्रुत्वा दुःश्रवं राजभृत्याः क्वापि भयाद्ययुः । द्रोहानुगास्त्वङ्गनान्तर्लब्धोल्लासा व्यधुः स्थितिम् ||१३२२||

निर्यान्तो मण्डपात्तीक्ष्णा निजद्युर्नागकाभिधम् । द्वारात्प्रविष्टं निष्कृष्टकृपाणीकं नृपानुगम् ||१३२३||

भूपालशय्यापालस्य[1] त्रैलोक्याख्यस्य सेवकः । निन्दन्द्रोहं टिक्ककाद्यैर्द्वाःस्थश्चैको[2] विपादितः[3] ||१३२४||

1325 उत्क्रुष्टं नष्टसत्त्वानां मध्ये राजानुजीविनाम् । सखेटकासिं धावन्तं भावुकान्वयभूषणम् ||१३२५||

दृष्ट्वा सहजपालाख्यं पार्श्वद्वारेण निर्ययुः । तीक्ष्णाः स त्वपतद्भूमौ नद्धृत्यप्रहतिक्षतः ||१३२६||

जाते कुकीर्तिकालुष्यपात्रे राजात्मजव्रजे । वैलक्ष्यक्षालनं सिद्धं तस्य स्वक्षतजैः परम् ||१३२७||

हतो[1] दौशिकसंवादिदेहो राजात्मभ्रजमात् । विप्रान्द्विजन्मा नोनाख्यस्तीक्ष्णपक्षैः पुरो गतः ||१३२८||

अक्षतान्व्रजतो वीक्ष्य तीक्ष्णान्ग्रामान्तरोन्मुखान् । चित्रार्पिता इव क्रोधाद्वाधावन्केऽपि शस्त्रिणः ||१३२९||

1330 राजवंश्या महीपालप्रीतिपात्रमथाययुः । स्थगयन्तोऽङ्गनं स्थूलकाया जनविवर्जितम् ||१३३०||

तांस्तान्कापुरुषान्हर्षदेवोदन्तात्प्रभृत्यलम् । स्मृत्वा च कीर्तयित्वा च कृतभारग्रहा इव ||१३३१||

जाता दुष्कृतसंस्पर्शात्खेदात्कर्तुं न शक्नुमः । पापात्पापीयसां येषां नामग्रहणसाहसम् ||१३३२||

अङ्गनान्मण्डपारूढिं मन्वानाः पौरुषं महत् । पापिनः केऽपि तन्मुख्या ददृशुः स्वामिनं हतम् ||१३३३||

अधरेणास्रसंस्कारलेशावेशप्रकम्पिना । वदन्तं दन्तदष्टेन स्वान्तस्थान्तेनुतप्रताम् ||१३३४||

1335 वञ्चितः कथमेषोऽहमिति नामेति चिन्तया । निस्पन्दे जीवितान्तेऽपि तथैव दधतं दृशौ ||१३३५||

श्यामायमानं बाष्पेण[1] व्रणवक्त्रैरुदञ्चता । अन्तःप्रशान्तामर्षाग्निशेषधूमलतात्विषा ||१३३६||

आननस्यास्फुटीभूतचन्दनोल्लेखकुङ्कुमम् । सक्तया लिखितस्येव घनक्षतजलाक्षया ||१३३७||

आश्यानास्रजटीभूतकेशं नग्नं भुवि च्युतम् । पर्यस्तपाणिचरणं स्कन्धाग्रालम्बिकन्धरम्[1] ||१३३८||

---

१३१३. [1]) Emended with C; A विकोशं. १३१४. [1]) A₁ writes here २ instead of युग्मम्. १३१८. [1]) Emended; A कङ्काल्ला°. १३२४. [1]) Conjectural reading; A °शक्यापालस्य.—[2]) Emended; A °द्वास्थश्चैको.—[3]) Emended; A व्यपादितः. १३२८. [1]) Emended; A हतदैशि°. १३३६. [1]) The first *páda* of this verse has been first omitted and subsequently supplied by A₁ in margin. १३३८. [1]) A कन्दरम्.

तं वीक्ष्य नोचितं किंचिदाचेरुस्ते नराधमाः । वैजन्यस्य फलं भुङ्क्ष्वेत्यावेगादधिचिक्षिपुः ॥१३३९॥

बद्धा तुरंगे युग्ये वा न तैर्नीतश्चिताग्निसात् । कर्तुं न वा पारितः स प्राणत्राणाय धावितैः ॥१३४०॥ 1340

आस्तां विलम्बसाध्यं वा कर्मैतद्भ्राष्ट्रदारुसात् । सज्जाग्नि चाग्निसाद्देहमपि कश्चिन्न नाकरोत् ॥१३४१॥

राजवाजिनमेकैकं तेध्यारुह्य पलायिताः । निर्लुण्ठितस्तु कटको व्रजन्ग्रामेषु डामरैः ॥१३४२॥

न पुत्रः पितरं पुत्रं पिता वा प्रत्यपालयत् । मृतं हतं लुण्ठितं वा प्रचलन्सहिमेध्वनि ॥१३४३॥

न कोपि शस्त्रभृत्सोभूत्स्मृत्वा मानोन्नतिं पथि । परैराक्षिप्यमाणो यः शस्त्रं वस्त्रं च नात्यजत् ॥१३४४॥

लवराजयशोराजद्विजौ व्यायामवेदिनौ । कान्दश्च राजा निहता वीरवृत्त्या त्रयः परम् ॥१३४५॥ 1345

अदूरादुत्पलाद्यास्तु कटकं वीक्ष्य विद्रुतम् । प्रविष्टा वाट्टुवं[1] छित्त्वा शिरो निन्युर्महीपतेः ॥१३४६॥

गतेषु देवसरसं तेषु छिन्नशिरा नृपः । हतश्चौर इव प्राप ग्राम्याणां प्रेक्षणीयताम् ॥१३४७॥

एवं द्रोहैस्तृतीयाब्दामावास्यायां स फाल्गुने । पञ्चपञ्चाशतं वर्षानायुषोतीतवान्हतः ॥१३४८॥

विलासशयनस्थस्य सिंहदेवस्य सा श्रुतौ । प्रेमाख्येनैत्य दुर्वार्ता धात्रेयेण[1] व्यधीयत ॥१३४९॥

संभाव्यते योनुभावः[1] सशस्त्रस्याप्रियश्रुतौ । हतशस्त्रोपि तं प्राप स तदा पितृवत्सलः ॥१३५०॥ 1350

मोहलुप्तस्मृतिः स्मृत्वा चिरादुद्गतचेतनः । तत्तदुःखाहतधृतिर्विललाप स्फुटास्फुटम् ॥१३५१॥

मदर्थं कुर्वता राज्यं प्रयत्नादपकण्टकम् । अधमे किं महाराज त्वयात्मा परिभावितः ॥१३५२॥

अहेतेः पश्यतः शत्रूनन्ते वैरविशुद्धये । अपि ते मानिनोगच्छंस्तात संभावनाभुवम् ॥१३५३॥

त्वया निषेधिते वैरे पिता भ्राता च ते दिवि । निर्मन्युः संप्रति त्वं तु वर्तसे मन्युदुःस्थितः ॥१३५४॥

अनरण्यकृपद्रोणजामदग्न्यादिषु[1] स्पृहाम् । कुल्यक्षालितवैरेषु मा कार्षीः कांचन क्षणम् ॥१३५५॥ 1355

शोच्यस्त्वदाश्रयो मन्युरहं शोधयिता नृप । दूये न तत्र यातं यत्त्रैलोक्यमभियोज्यताम् ॥१३५६॥

वात्सल्योत्पुलकस्मेरं स्निग्धोक्तिमधुरं मुखम् । मद्दर्शने यदासीत्ते तन्मे पुर इवाधुना ॥१३५७॥

इति चान्यच्च विलपन्गाम्भीर्यालक्ष्यवैकृतः । ह्रीशोकभयमूकान्स ददर्शाप्तान्पितुः पुरः ॥१३५८॥

अशिक्षयत यन्मन्युर्दाक्षिण्यं निरुरोध तत् । तथाप्येवं स तानूचे किंचिदाक्षेपकर्कशम् ॥१३५९॥

कोशैः सद्वंशतां वीक्ष्य कुर्वतः[1] सत्क्रियां गताः । धिग्भवन्तश्च शस्त्रं च तातस्यान्ते विपर्ययम् ॥१३६०॥ 1360

यन्मत्पितृव्ये निहते[1] कृतमुच्छिष्टजीविभिः । मान्यानां भवतां सिद्धं हा धिक्तदपि नाधुना ॥१३६१॥

इत्युपालम्भमानस्तान्द्वित्रैरन्तिकमागतैः । द्वित्रैरमात्यैः कर्तव्यश्रुतयेवहितः कृतः ॥१३६२॥

प्रस्थानं लोहरे केचिदूचुः संत्यज्य मण्डलम् । त्वरां च तत्र रात्र्यन्ते वदन्तो भैक्षवं भयम् ॥१३६३॥

गर्गात्मजं पञ्चचन्द्रमालम्ब्य[1] लहरस्थितम् । द्वैराज्याचरणायान्ये धीरप्राया बभाषिरे ॥१३६४॥

न हि स्वगृहवद्भिक्षोर्विविक्षोर्नगरान्तरम् । अज्ञायि प्रत्यवस्थानं केनाप्यसति सुस्सले ॥१३६५॥ 1365

आत्मन्यसंभावनया तादृशां[1] मन्त्रिणां नृपः । सान्तःखेदं श्वो विधेयं द्रक्ष्यथेत्यब्रवीद्वचः ॥१३६६॥

कालापेक्षापरित्यक्तपितृव्यापत्तिदुःस्थितः । स कोशादिष्वथादिक्षद्रक्षिणस्त्राणदीक्षितान् ॥१३६७॥

---

१३४६. [1]) Thus A; cf. वाट्टुकं viii. 1459. १३४९. [1]) Emended; A धात्रीयेन. १३५०. [1]) नुभाव supplied by $A_3$ in space left by $A_1$. १३५५. [1]) Thus A. १३६०. [1]) Emended; A कुरुतः. १३६१. [1]) Emended with C; A न हते. १३६४. [1]) Emended; A °लम्ब्य. १३६६. [1]) तादृशां supplied by $A_3$ in space left by $A_1$.

इतश्चेतश्च बम्भ्रम्यमाणैः प्रोद्यत्प्लुतस्वरम् । अन्योन्याख्यायिभिर्लोकैः पुरं मुखरतामगात् ॥१३६८॥
मत्तवेतालमालेव कालरात्र्याकुलेव च । बभूव सा यामवती सर्वभूतभयावहा ॥१३६९॥
1370 दीपैर्निर्वातनिष्कम्पैश्चिन्तास्पन्दैश्च मन्त्रिभिः । तिष्ठन्परिवृतो राजा त्वन्तरेवमचिन्तयत् ॥१३७०॥
निर्द्वारे सतमस्युग्रमारुते शून्यवेश्मनि । तातोपि निहतः शून्ये मयि जीवत्यनाथवत् ॥१३७१॥
कष्टमेतादृशासह्यवैशसक्षालनावधि । कथं गोष्ठीषु शक्ष्यामि द्रष्टुं मभिवतां मुखम् ॥१३७२॥
विरोधिवशवर्तिभ्यो देशेभ्यः सैन्यनायकाः[1] । सहिमैरेव दुर्लङ्घैः कथमेष्यन्ति वर्त्मभिः ॥१३७३॥
इत्थं विमृशतस्तस्य[1] तत्तत्तीव्राभिषङ्गिनः । ययौ भीतिमतो भीमा कथंचित्सा निशीथिनी[2] ॥१३७४॥
1375 प्रातश्चतुष्किकां पौरसमाश्वासाय निर्गतः । नष्टं कटकमन्वेष्टुं सोश्वारूढान्व्यसर्जयत् ॥१३७५॥
मार्गानस्त्रचीसंचारैस्तुषारैर्विवरोज्झितान् । आश्लिष्टवसुधा मेघाः कर्तुं प्रारेभिरे ततः ॥१३७६॥
नामाप्यलब्ध्वा सैन्यस्य मोघसैन्येषु[1] दूरतः । निवृत्तेषु नियुक्तेषु विमृश्य[2] नृपतिः क्षणम् ॥१३७७॥
यद्यद्येनाहतं तत्तत्परित्यक्तं मयाधुना । दत्तं चारीञ्भितवतामभयं सागसामपि ॥१३७८॥
इत्याज्ञां भ्रमयामास पटहोद्घोषणैः पुरे । साशीर्घोषास्ततः पौरास्तत्रारज्यन्त सर्वतः ॥१३७९॥तिलकम्[1]॥
1380 अनन्तरनृपाचारवैधर्म्यौकारकल्पया । तया सोनघया वृत्त्या फलं सद्योनुभावितः ॥१३८०॥
शतादप्यूनसंख्यैर्यः स्थितवाननुगैः समम् । अनुरागहतैर्लोकैस्तत्कालं पर्यवार्यत ॥१३८१॥
प्रियोक्त्यावेदनं प्रीतिदायोपायः प्रभोः पुरः । भजंल्लोकस्याप्यमन्त्रिपदवीं लक्ष्मकोग्रहीत् ॥१३८२॥
राज्यं शय्यां नयत्येवं प्राज्ञे राज्ञि नयक्रमैः । याति मध्यं दिने भिक्षुर्विविक्षुः पुरमाययौ ॥१३८३॥
तस्य डामरपौराश्ववारलुण्टाकसंकुलः । अदृष्टपूर्वो ददृशे सैन्यव्यतिकरस्तदा ॥१३८४॥
1385 हतं श्रुत्वा रिपुं राज्योत्सुकः स नगरं व्रजन् । राजा काकात्मजेनेति तिलकेनाभ्यधीयत ॥१३८५॥
हतः समस्तविद्विष्यः स दैवाद्यदि सुस्सलः । कथं प्रकृतयो जह्युर्गुणवन्तं तदात्मजम् ॥१३८६॥
पुरप्रवेशो का राजंस्तस्मादेकमहस्त्वरा । एहि पद्मपुरं यामो मार्गं रोद्धुं विरोधिनाम् ॥१३८७॥
आगच्छन्तो नष्टसैन्याः सुज्जिमुख्या महाभटाः । निहता यदि वा रुद्धास्तत्र सायुधवाहनाः ॥१३८८॥
प्रविष्टोसि ततो न्यस्तशस्त्रो द्वित्रैर्दिनैर्ध्रुवम् । नगरं नगरौकोभिः स्वयमभ्यर्थितागमः ॥१३८९॥
1390 अलमेतैर्जरन्मन्त्रैर्वदन्त इति चक्रिरे । स च कोष्टेश्वराद्याश्च स्मेरास्तस्यावधीरणाम् ॥१३९०॥
राज्यं विदद्भिः संप्रासं[1] तांस्ताञ्शासनपट्टकान् । द्रुतमर्थयमानैश्च विलम्बं कारितो निजैः ॥१३९१॥
अतो बहुहिमापातविवशाशेषसैनिकः । आसदन्नगरोपान्तं समयेन स तावता ॥१३९२॥
एतस्मिन्नन्तरे लब्धे निःसैन्यस्य ससैनिकः । गर्गात्मजः पञ्चचन्द्रो नृपतेः पार्श्वमाययौ ॥१३९३॥
हतस्वामिपरित्यागमन्युक्षालनकाङ्क्षिभिः । राजपुत्रैः समं सोथ वीरो योद्धुं विनिर्ययौ ॥१३९४॥
1395 असंभावनसंग्रामान्वीक्ष्य तान्भिक्षुसैनिकाः । यावत्प्रारेभिरे योद्धुं तावत्किमपि सर्वतः ॥१३९५॥
क्षणेनैव ययुर्भङ्गं तांस्तान्वीक्ष्य हतान्निजान् । न संस्तम्भयितुं शेकुः स्वचमूश्च पलायिनीः ॥१३९६॥

---

१३७३. [1]) Emended; A °नायकः. १३७४. [1]) A विमृषत°.—[2]) A निषीथिनी. १३७७. [1]) Thus A; perhaps read मोघसैन्येषु.—[2]) A विमृष्य. १३७९. [1]) $A_1$ writes here ३ instead of तिलकम्. १३९१. [1]) Emended; A संप्राप्तांस्तांस्ता°.

सेनानाथाश्च ये मुख्या भिक्षुपृथ्वीहरादयः । अदृष्टपूर्वं संत्रासं तेप्यशस्त्रिवदाययुः ॥१३९७॥
विद्रवन्तोनुयाताः स्युस्ते चेद्दूरं नृपानुगैः । तन्नूनमवशिष्येत क्षणादेव न किंचन ॥१३९८॥
वैमुख्यं तेषु यातेषु चिरात्सांमुख्यमाययौ । नवभूभृत्प्रभावेण नगरे विधुरे विधिः ॥१३९९॥
अन्यथा कलितो लोकैरन्यथा दैवयोगतः । इत्थं राज्ञोर्द्वयोरासीद्विजयावजयक्रमः ॥१४००॥ 1400
कंचिन्निपातयति बद्धपदं क्षणेन कंचित्परं पिपतिषुं नयति प्ररूढिम् ।
संकल्पनिर्विषयचित्रतरानुभाव ओघोम्भसामिव तटं पुरुषं विधाता ॥१४०१॥
अथ तत्तद्भयस्थानशान्तः सुज्जिर्दिनात्यये । दावव्याप्ताद्रिनिष्क्रान्तो निःसहोहिरिवाययौ ॥१४०२॥
मेधाचक्रपुरग्रामस्थितः श्रुत्वा हतं नृपम् । स हि संमन्त्र्य रात्र्यन्तर्नोत्तस्थाववसत्परम् ॥१४०३॥
रिल्हणादीन्स्थिताञ्शूरपुरादौ सैन्यनायकान् । प्रतीक्षमाणस्तैः साकं निर्बाधं नगरेविशत् ॥१४०४॥
तमिस्रायां प्रत्यभिज्ञाकृते तेषामनश्वरान् । स्वावासपृष्ठे ज्वलतो दीपानस्थापयत्ततः ॥१४०५॥ 1405
वैमत्यात्ते तु पत्तीनां विद्रुतानां पृथक्पृथक् । निशि क्वापि परिभ्रष्टा न तत्कटकमाययुः ॥१४०६॥
प्रत्यूषे प्रचलंस्तैस्तैः पृष्ठलग्नैः स डामरैः । न मुहूर्तमपि त्यक्तः प्रहरद्भिरितस्ततः ॥१४०७॥
वृद्धस्त्रीबालभूयिष्ठान्सहप्रस्थायिनो जनान् । ययौ रक्षन्पुरः कृत्वा पशुपालः पशूनिव ॥१४०८॥
पञ्चाशत्या हयारोहैः सह व्यावृत्य तिष्ठता । कंचित्क्षणं तेन रक्षा तेषां कर्तुमशक्यत ॥१४०९॥
द्राक्षाषण्डद्रुमव्यूहसंबाधेध्वन्यसाध्वसैः । बाध्यमानोरिभिर्लोकं सोत्याक्षीत्तु पदे पदे ॥१४१०॥ 1410
हतस्य स्वामिनः स्वामिसूनोश्च व्यसनस्थितेः । आनृण्याकाङ्क्षिणा तेन तत्र ह्यात्मैव रक्षितः ॥१४११॥
येषां प्राणपरित्यागे निश्चयं बध्नतामपि । न योग्यकालापेक्षास्ति किं तैर्हिंस्रपशूपमैः ॥१४१२॥
हन्तुं तं नष्टमायान्तं रुद्ध्वा पद्मपुरान्तिकम् । अवसण्डामराः क्रूराः खडूवीविषयौकसः ॥१४१३॥
खेरीतलालशाग्रामादुत्थाय पृथुसैनिकः । व्रजंस्तेनाययौ तत्र प्रसङ्गे श्रीवकः पथा ॥१४१४॥
तमनष्टानुगं सुज्जिरसाविति विशङ्किताः । निपत्य ते विदधिरे हतलुण्ठितसैनिकम् ॥१४१५॥ 1415
मेरुश्च सज्जनश्चाश्ववारौ तत्राहवे हतौ । क्षतो वट्टात्मजो मल्लो दिवसैर्यो व्यपद्यत ॥१४१६॥
उदीपविहितश्वभ्रवहत्सलिलसंकटम् । उदीपपूरबालाख्यं स्थानं तत्र क्षणेभवत् ॥१४१७॥
युद्ध्वा युद्ध्वा प्रचलतस्तत्र पद्मपुराद्बहिः । रुद्धसैन्यस्य विशिखः श्रीवकस्याविशद्गलम् ॥१४१८॥
प्रहारविवशो नासौ सुज्जिर्ज्ञात्वेति डामरैः । स निर्लुण्ठ्य परित्यक्तः पूर्वमैत्र्यनुरोधतः ॥१४१९॥
लुण्ठितंश्रीवकानीककोशभारग्रहानतैः । तैः कैश्चिच्चलितैरासीत्सुज्जेर्मार्गेनुपद्रवः ॥१४२०॥ 1420
प्रस्थिते पथिकेकस्माद्यन्त्रिपूत्सादयन्वने । आयुःशेषो मृगेन्द्रस्य विदध्यादध्वशोधनम् ॥१४२१॥
निःशब्दसैन्यो निर्यातः सुज्जिः पद्मपुरान्तरे । उदीपश्वभ्रसविधं संप्राप्तोज्ञायि डामरैः ॥१४२२॥
पदातिकोशशस्त्रादि मुष्णतः सोनवेक्ष्य[2] तान् । तीर्त्वा श्वभ्रं वाजिगम्यां साश्ववारो भुवं ययौ ॥१४२३॥
ततः परं प्रशान्तारिभयं दूराद्विरोधिनः । भ्रूभङ्गतर्जनीकम्परूक्षालापैरतर्जयत् ॥१४२४॥

---

१३९८. [1]) Emended with C; A तान्नून°. १४०३. [1]) Emended; A मेधाचक्रं पुर°. १४१७. [1]) $A_2$ had written in margin a gloss of which only इति भाषया is now legible. १४२०. [1]) Emended; A लुण्ठितः श्री°. १४२३. [1]) A °कोष°.— [2]) Emended with C; A सोनवीक्ष्य.

1425 संत्रस्तैश्छत्रमात्रं तैस्त्यक्तमादाय च द्रुतम् । प्रविश्य नगरं सास्रुर्नृपतेः पार्श्वमाययौ ॥१४२५॥
ज्यायसि भ्रातरीवाग्र्यं तस्मिन्प्राप्ते जहौ नृपः । दुःखोष्णैरस्रुभिः सार्धं वैरिव्यापातसाध्वसम् ॥१४२६॥
महत्तमोनन्तसूनुरानन्दस्तत्र वासरे । लोचनोड्डारकग्रामे डामरैः प्रचलन्हतः ॥१४२७॥
तत्तन्मङ्गल्यदण्डादिदुःसहायासकारणात् । स विपत्पतितो नाभूत्कस्यापि करुणावहः ॥१४२८॥
भासाभिधः सुज्जिभृत्यो लोकपुण्यात्पलायितः । श्रान्तोवन्तिपुरेविक्षुदवन्तिस्वामिनोङ्गनम् ॥१४२९॥
1430 कम्पनोद्ग्राहकः[1] क्षेमानन्दः स च तदन्तरे । अमर्षणैरवेष्टचेतां[2] डामरैर्हौलडोद्भवैः ॥१४३०॥
इन्दुराजोपि सेनानीः कुलराजकुलोद्भवः । टिक्कं तद्वेष्टितो ध्यानोड्डारे[1] व्याजादशिश्रियत् ॥१४३१॥
पिञ्छदेवादयोन्येपि बहवः सैन्यनायकाः । अतिष्ठन्क्रमराज्यान्तर्डामरैः कृतवेष्टनाः ॥१४३२॥
पाते वनस्पतेः शावा इव तन्नीडविच्युताः । इत्थं हताः क्षताश्चा[1]संस्तत्र तत्र नृपानुगाः ॥१४३३॥
निष्पादत्रा हिमप्लुष्टचरणा नग्नविग्रहाः । क्षुत्क्षामा बहवोभूवन्मार्गेषु गलितासवः ॥१४३४॥
1435 न व्यलोक्यत मार्गेषु तदा नगरगामिषु । पलालच्छन्नदेहेभ्यो मानुषेभ्यः परः क्वचित् ॥१४३५॥
घासं विलासवासस्त्वं तेपि चित्ररथादयः । निन्युर्यैरचिरेणैव महामात्यैर्भविष्यते ॥१४३६॥
द्वितीयेपि दिने रुद्धसंचाराः पक्षिणामपि । तुषारवर्षिणो मेघा न मुहूर्तं व्यरंसिषुः ॥१४३७॥
वनपूर्वाभिधग्रामस्थितस्य कटकाङ्गटान् । भिक्षोर्निक्षिप्य धन्योथ सिंहदेवमशिश्रियत्[1] ॥१४३८॥
निशम्य कृतसत्कारं नृपं तदनुयायिनाम् । सर्वेपि भैक्षवास्तस्थुः सैनिका नगरोन्मुखाः ॥१४३९॥
1440 मन्दप्रतापे दायादे संप्राप्तावसरास्ततः । राज्यश्चतस्रो राजानमनुमर्तुं विनिर्ययुः ॥१४४०॥
परापातभयाच्छीतापाताच्च विवशैर्जनैः । न ता ने[1]तुमशक्यन्त दूरस्थं पितृकाननम् ॥१४४१॥
चक्रिरे स्कन्दभवनोपान्ते देहांश्चिताग्निसात् । ते सत्वरं ततस्तासामदूरे राजसद्मनः ॥१४४२॥
राज्ञी चम्पोद्भवा देवलेखा तरलत्लेखया । स्वस्रा सहाविशद्वह्निं रूपोल्लेखावधिर्विधेः ॥१४४३॥
गुणोज्ज्वला जज्जला —[1] मृता वल्लापुरोद्भवा । गग्गात्मजा राजलक्ष्मीरपि वह्नौ व्यलीयत ॥१४४४॥
1445 मत्वा हिमव्यपायान्तं राज्यरोधं निजप्रभोः । डामरा नवभूभर्तुर्हिमराजाभिधां व्यधुः ॥१४४५॥
ददर्श सौस्सलं मुण्डमथ भिक्षुरुपागतम् । गाढामर्षाग्निसंदीप्तैर्दृक्पातैर्निर्दहन्निव ॥१४४६॥
कोष्टेश्वरज्येष्ठपालादयस्तत्सत्क्रियोद्यताः । असहासन्नतां वैराद्भजता तेन वारिताः ॥१४४७॥
नगरं हिमवृष्ट्यन्ते स यियासुर्युयुत्सया । ताटस्थ्येनाहिताकूटान्भृत्याञ्ज्ञात्वाब्रवीद्वचः ॥१४४८॥
प्रसह्य प्राप्नुयां राज्यमिति पृथ्वीहरे सति । हते तु तस्मिन्दायादेविपन्नैः[1] स्यां पतिर्भुवः ॥१४४९॥
1450 इत्यचिन्तयमेतत्तु दैवात्संजातमन्यथा । राज्यस्याशापि विरता हते प्रत्युत यद्रिपौ ॥१४५०॥
किं राज्येनाथ वा कृत्यं भोगमात्रोपयोगिना । जिगीषोरुचितं कस्य ममेवान्यस्य सेत्स्यति ॥१४५१॥
मुण्डं न्यपातयद्भूमौ यः पूर्वेषां पुरा मम । सिंहद्वारे मदीयेद्य तन्मुण्डं वर्तते लुठत् ॥१४५२॥
दश मासान्मदाद्यानां सुखच्छेदं व्यधत्त यः । तत्तदुःखं स तु मया दशाब्दाननुभावितः ॥१४५३॥

---

१४३०. [1]) Doubtful emendation; A नोद्ग्रौहकः.—[2]) Emended with C; A °रवेष्टचेत्. १४३१. [1]) Emended; A °ड्डारं. १४३३. [1]) A क्षताश्वाश्वासंस्तत्र with diplography. १४३८. [1]) Emended; A °शिश्रयत्. १४४१. [1]) Thus $A_1$; corr. by later hand into तान्नेतु°. १४४४. [1]) One *akshara* wanting; the *lacuna* not indicated in A; C supplements सा. १४४९. [1]) Emended; A विपन्नां; C °दायादे विपन्नः.

एवं निर्व्यूढकर्तव्यतया नेष्याम्यवन्ध्यताम् । उपशान्तमनस्तापः सुस्थित्या शेषमायुषः ॥१४५४॥
इत्याद्युक्त्वा गतष्टिक्काभ्यर्णं तं प्रणतं व्यधात् । प्रीत्या स हेमघटिकश्वेतच्छत्त्रादिभाजनम् ॥१४५५॥ 1455
तद्विस्रम्भेण राज्याशापिशाच्योदितया पुनः । गृहीतोभ्येत्य शीतार्तस्तस्थावन्तर्विचिन्तयन् ॥१४५६॥
अत्यन्तानुचितं चान्यह्लवन्यैः संविविदित्सुभिः । रक्षितं रक्षिणो न्यस्य हतक्ष्माभृत्कलेवरम् ॥१४५७॥
विपक्षाश्रयणेप्यस्मिन्स्वामिनोन्ते किमीदृशी । दशा शरीरस्येत्यन्तः कृतज्ञत्वेन चिन्तयन् ॥१४५८॥
दिदृक्षाव्याजतः सज्जकाख्यो नगरशस्त्रभृत् । आयातो वाष्टुकं गोप्तृन्युद्धैर्जित्वाभिसाद्व्यधात् ॥१४५९॥ तिलकम् ॥
स चतुर्नवताद्वर्षादारभ्यासादितच्छलैः । भूतैरधिष्ठितस्तिष्ठन्प्रजासंहारकार्यभूत् ॥१४६०॥ 1460
देवताधिष्ठिताविष्टदेहिवाक्यादिति श्रुतिः । भावितद्वधसंवादजनितप्रत्ययोद्ययौ ॥१४६१॥
तदीयानन्यथात्वेन छेत्ता भ्रमयिता च यः । तन्मुण्डस्यास्य स पुमांल्लब्धः सुप्तो मृतस्तथा ॥१४६२॥ तिलकम् ॥
भिक्षुः कापुरुषाचारहतौचित्यो व्यसर्जयत् । प्राचण्ड्यख्यातये मुण्डमथ राजपुरीं रिपोः ॥१४६३॥
उच्चलात्मजया तत्र देव्या सौभाग्यलेखया । नेतॄन्पितृव्यमुण्डस्य जिघांसन्त्या निजानुगैः ॥१४६४॥
राजपुर्यामाकुलत्वं नीतायामाससाद तत् । तद्भर्तुः सोमपालस्य दूरस्थस्यान्तिकं चिरात् ॥१४६५॥ युग्मम् ॥ 1465
आदीनस्य मधुक्षैव्यग्राम्यधर्मादिकर्मसु । तिरश्च इव शोच्यस्य नेयबुद्धेः खशप्रभोः ॥१४६६॥
सभ्यैरुच्चावचं तत्र कर्तव्यं परिचिन्तितम् । स्वोचितं व्यञ्जितौचित्यानौचित्यं निरवग्रहैः ॥१४६७॥
नागपालस्तु सौभ्रात्रं लब्ध्वा भ्रातुः स्थितोन्तिके । सेहे मुण्डावशेषस्य नोपकर्तुर्विमाननाम् ॥१४६८॥
सुदीर्घदर्शिनोप्यन्ते कश्मीरेभ्यः पराभवम् । विशङ्क्योचुः सर्वथेदं सत्कार्यं वः शिरः प्रभोः ॥१४६९॥
क्रियते येन नियतेरन्यथात्वं सनाथताम् । विनिहस्य हरेर्दृष्टाः कुर्वन्तो यत्र जम्बुकाः ॥१४७०॥ 1470
तद्गोपालपुरे कालागुरुचन्दनदारुभिः । काष्ठैर्निष्ठां शिरो निन्ये वीतिहोत्रेथ शत्रुभिः ॥१४७१॥
यथा प्राप्तिभ्रंशा धरणिपतिभावस्य विविधा यथा ह्रासोल्लासा अपि समरसीमासु बहुशः ।
यथा तत्तद्दीर्घव्यसनविनिपातानुभवनं तथा दृष्टस्तस्य प्रमयसमयोप्यद्भुततरः ॥१४७२॥
कस्यापरस्य तस्येव लेभिरे वह्निसत्क्रियाम् । एकत्रेतरगात्राणि मुण्डमन्यत्र मण्डले ॥१४७३॥
टिक्कादयोथ नगरं यान्तोवन्तिपुराध्वना । तत्र हन्तुं व्यलम्बन्त भासादीन्पूर्ववेष्टितान् ॥१४७४॥
युद्धाग्न्युद्दीपनग्रावप्रहारच्छेदकारिभिः । न ते जेतुमशक्यन्त तैः प्रयत्नपरैरपि ॥१४७५॥ 1475
स्थितैर्महाश्मप्राकारगुप्ते सुरगृहाङ्गने । तैर्हन्यमानास्ते स्थातुं गन्तुं वा नाभवन्क्षमाः ॥१४७६॥
एवं प्राप्तविलम्बेषु तेषु लब्धान्तरः सुधीः । स्वीचकार प्रदानेन खडूवीडामरान्नृपः ॥१४७७॥
गृहीतनीविना तेषां सुज्जिः प्रायोजि सत्वरम् । तेन भासादिमोक्षाय पञ्चचन्द्रादिभिः समम् ॥१४७८॥
प्रापावन्तिपुरं यावन्न स तावत्तदग्रगान् । कय्यात्मजादीनालोक्य भङ्गं टिक्कादयो ययुः ॥१४७९॥
देवागाराद्विनिर्याता भासाद्यास्ते च विद्विषाम् । भग्नानामनुगान्हत्वा सुज्जेरन्तिकमाययुः ॥१४८०॥ 1480

---

१४५६. 1) Emended with C; A शीर्तार्त°. १४५९. 1) Thus A; cf. वाष्टुवं viii. 1346. — 2) $A_1$ writes here ३ instead of तिलकम्. १४६२. 1) $A_1$ writes here ३ instead of तिलकम्. १४६५. 1) $A_1$ writes here २ instead of युग्मम्. १४६६. 1) Emended; A आर्दीनास्य. १४७०. 1) Emended with C; A ये. १४७३. 1) Emended with C; A एकत्रेतगा°.

लब्धप्रतापे नगरं प्रविष्टे कम्पनापतौ । आययाविन्दुराजोपि टिक्कं संत्यज्य सानुगः ||१४८१||

चक्रे चित्ररथश्रीवभासादीनपि भूपतिः । पादाग्रद्वारखेर्यादिकर्मस्थानाधिकारिणः ||१४८२||

यथापूर्वमधीकारानजहत्सुज्जिरप्यभूत् । प्रतीहारमुखप्रेक्षी का कथेतरमन्त्रिणाम् ||१४८३||

प्रतीहारोपि निःसीमडामरग्रामसंमतः । तद्भेदचक्रिकां कुर्वन्नगाद्राज्ञः प्रतीक्ष्यताम् ||१४८४||

1485 स नासीदसुहृद्वयूहे कोपि तत्प्रेरणेन यः । नाशिश्रियन्नृपं[1] नो वा बभूवाश्रयणोन्मुखः ||१४८५||

निह्नुतेशित्वसदृशस्फूर्तिर्धूर्तो महीपतिः । आहारमप्यनासाद्य तन्मतं न न्यषेवत ||१४८६||

इत्थं नगरमात्रान्तर्लब्धपादप्रसारिकः । सोवर्तिष्ट समासन्नफलं कन्दलयन्नयम् ||१४८७||

संघटय्याखिलान्भिक्षुर्[1]डामरान्विजयेश्वरे । अथाध्यष्ठा[2]दधिष्ठानं जिघृक्षुः शिशिरात्यये ||१४८८||

अदृष्टपूर्वं स्वचमूचक्रैक्यं वीक्ष्य डामराः । भिक्षोर्हस्तगतं राज्यं मत्वाशङ्किषताथ ते ||१४८९||

1490 एकैकस्यैषं[1] धीशौर्यमित्रामित्रादि दृष्टवान् । नोत्तिष्ठेत्प्राप्तराज्यः किमास्कन्देषु गृहान्तरात् ||१४९०||

इति संमन्त्र्य ते राज्यं सोमपालाय दित्सवः । दूतान्निगूढं प्राहिण्वन्सोपि दूतं व्यसर्जयत् ||१४९१||

आकाराचारवैक्लव्यैः पशुतुल्यस्य तस्य तैः । राज्यभोगा अभङ्गा नो भविष्यन्तीत्यचिन्त्यत ||१४९२||

भोगलोभोज्झितौचित्यदस्युसंघचिकीर्षितम् । देशेत्र पापात्पापीयो[1] दैवान्न समपादि तत् ||१४९३||

दास्येप्ययोग्यो यो राज्ये स इत्यास्तां नृपान्यतः । शक्येत पातुं देशोयं किमीषदपि तादृशा ||१४९४||

शालीन्पलालपुरुषोवति यः कृशानुदग्धाननश्चटकपेटकभीतिदानैः ।

1495 त्रातुं स काननतरून्विहितो विदध्यात्किं तत्र भञ्जनकृतां वनकुञ्जराणाम् ||१४९५||

भिक्षोर्नैदिष्टतां दिष्टवृद्धिव्याजात्ततो भजन् । तद्दूतो डामरान्गूढं नीविदानोद्यतान्व्यधात् ||१४९६||

वैशाखेथ कृतारम्भस्तदा संभावितत्वरः । निर्गत्य नगरात्सुज्जिर्गम्भीरातीरमाययौ ||१४९७||

तस्याभियोगः श्लाघ्योभूद्योद्धुं यत्समवायिनः । एकाकी तावतो वीरानूरीकृत्य [illegible]स निर्ययौ ||१४९८||

अन्तःपाते साहसानां नाद्भुतं तद्विधेर्वशात् । जीयते लक्षमेकेन लक्षेणैकोथ वा युधि ||१४९९||

1500 पारं तरीतुं निःसेतोः सरितोपारयन्नसौ । पारे परस्मिन्नहितानपश्यच्छरवर्षिणः ||१५००||

द्वित्रा निशाः स ते चासंस्तस्याः सिन्धोस्तटद्वये । रुद्धाः संनाहिनोन्योन्यरन्ध्रावेक्षण[1]दीक्षिताः ||१५०१||

अथावन्तिपुरान्नौभिरानीताभिरबन्धयत् । सेतुं साश्वोतरत्सुज्जिरारुह्य तरणीं स्वयम् ||१५०२||

तरन्तमेव तं दृष्ट्वा योधैः कतिपयैः समम् । द्विषच्चमूर्मरुल्लोला द्रुमालीवाभवच्चला ||१५०३||

दृष्टं मुहूर्तादेतावदारूढः स च यत्तटम् । बद्धश्च सेतुस्तीर्णाश्च योधा भग्नाश्च विद्विषः ||१५०४||

1505 न खड्गी न हयारोहो नापि शूली न चापभृत् । व्यावृत्य प्रेक्षितुं[1] कश्चिदशकद्विद्रुताद्बलात् ||१५०५||

निबद्धवध्रशैथिल्याल्लोलपल्ययने हये । कोष्ठेश्वरस्याश्ववारा व्यलम्बन्तान्तरे क्षणम् ||१५०६||

निर्यन्त्र्य[1] तेपि पर्याणं सुज्जौ पश्चात्प्रधाविते । वात्योद्धूतं रजश्चक्रमिव क्षिप्रं तिरोदधुः ||१५०७||

हतलुण्ठितविध्वस्तध्वजिनीका विरोधिनः । ध्यानोड्डारादिषु ग्रामेष्वमिलन्खण्डशो गताः ||१५०८||

---

१४८५. [1]) Emended with C; A नाशिश्रयन्नृपं. १४८८. [1]) Emended; A भिक्षू[illegible]°.—[2]) Emended; A अथाधिष्ठद°; C अथातिष्ठद°. १४९०. [1]) Conjectural reading; A एकैकस्यौषधीशौर्य°. १४९३. [1]) Emended; पापीये. १५०१. [1]) Emended with C; A °वीक्षण°. १५०५. [1]) Emended with C; A प्रेक्षितुः. १५०७. [1]) Emended; A निर्यन्त्य; C निर्यत्य.

विजयेशाग्रगं तीर्त्वा वितस्तासेतुमग्रगः[1] । भासोपि दस्यून्विदधे पलायनपरायणान् ॥१५०९॥
उषित्वा विजयक्षेत्रे तदान्येद्युरुपागते । कम्पनेशे[1] ययुस्त्यक्त्वा ध्यानोड्डारं विरोधिनः ॥१५१०॥ 1510
तत्र स्थित्वा दिनैः कैश्चित्स देवसरसोन्मुखः । शिश्रिये भेदनिर्यातैरेत्य टिक्कस्य गोत्रिभिः ॥१५११॥
जयराजयशोराजौ तन्मुख्यौ भोजकात्मजौ । प्रविश्य देवसरसं व्यधाट्टिक्कोपवेशने ॥१५१२॥
ययुर्विनष्टसंघातास्तस्मिन्पश्चात्प्रधाविते । भिक्ष्वादयः शूरपुरं स्वोर्वीं कोष्ठेश्वरादयः ॥१५१३॥
गर्ह्यं महाभये सोमपालदूतः पलायितः । दास्याः सुतेन प्रहितः कुत्रास्मीति प्रभोर्व्यधात् ॥१५१४॥
स हि तादृङ्महारम्भक्षोभसाध्योन्नतीच्छुताम् । तस्य सिंहीस्पृहाक्रान्तगोमायुवदमन्यत ॥१५१५॥ 1515
प्रमादात्स्वामिनो राज्यं चिरं नष्टं मितैर्दिनैः । सुज्जिः प्रसाद्य प्रददावेवं स स्वामिसूनवे ॥१५१६॥
शमालादीनपि व्यूढान्दानोपायेन डामरान् । पौरांश्च भिक्ष्वाश्रयिणो राजाभ्येतुं प्रचक्रमे ॥१५१७॥
राज्ञः परीक्ष्य सामर्थ्यमथ कुर्मो यथोचितम् । इति सर्वाभिसारेण तं संमन्त्र्य रणं दधुः ॥१५१८॥
रजोजवनिकालक्ष्य[1]भटौघनटताण्डवः । दामोदरेभूत्संग्रामः स वीरग्रामघस्मरः ॥१५१९॥
कोष्ठेश्वरवशं यातं रक्षता पितरं क्षतम् । लब्धाः सहजपालेन श्लाघाः प्रकृतिभिः समम् ॥१५२०॥ 1520
श्रमस्तत्राविशेषोभूद्राज्ञो भिक्षाचरस्य च । भिक्षुस्त्वहन्यसंवेद्यं विवेदात्मपराजयम् ॥१५२१॥
ततः प्रभृति यः प्रातः स न सायमदृश्यत । योद्य वा न परेद्युः स सैनिको भैक्षवे बले ॥१५२२॥
एवं त्यक्त्वा परान्पौरडामरेषु नृपान्तिकम् । प्रयात्सु लाभसत्कारानुचितान्प्राप्नुवत्सु च ॥१५२३॥
काप्यहंपूर्विकोत्तस्थौ मनुजेश्वरकोष्ठयोः । प्रयातुं पार्थिवाभ्यर्णं लाभसौख्याभिलाषिणोः ॥१५२४॥
ज्ञात्वाथ तत्काकरुहाद्गृहीतस्वपरिच्छदः । देशान्तरोन्मुखो भिक्षुराषाढे मास्यवाचलत् ॥१५२५॥ 1525
अनुयाद्भिः स दाक्षिण्यशेषाद्विहितसान्त्वनैः । तदाद्यैर्डामरैः क्रुध्यन्न निरोद्धुमपार्यत ॥१५२६॥
अकरोत्स्वैरिणीसूनुतया शीलबहिष्कृतः । अतिरूपेषु दारेषु तस्य कोष्ठेश्वरः स्पृहाम् ॥१५२७॥
सटां हरेः फणारत्नमहेर्ज्वालां हविर्भुजः । बालां च तस्य संस्प्रष्टुं[1] कोप्रशान्तस्य शक्नुयात् ॥१५२८॥
समं सौस्सलिना बद्धसंधिराश्रयकाङ्क्षिणः । सोमपालः स्वविषये नादात्तस्य प्रतिश्रयम् ॥१५२९॥
उद्वेजितः प्राणहरैः प्रयत्नैस्तस्य सर्वतः । तद्देशा[1]दुर्गममहीसीमान्तं सुल्हरीं ययौ ॥१५३०॥ 1530
त्रिगर्तेषु दया शीलं चम्पायां मद्रमण्डले । त्यागो दार्वाभिसारेषु मैत्री नामर्त्यधर्मिणाम् ॥१५३१॥
पीडयेत्त्यक्तभीर्भूभृद्दूरस्थे त्वयि डामरान् । त्वामेवाभ्यर्थ्य राजानं ततः कुर्युः क्रमेण ते ॥१५३२॥
क्ष्मां तद्व्रजामोर्थयितुं सांप्रतं नरवर्मणः । मन्त्रिभिर्युक्तमित्युक्तमपि मन्त्रं न चाग्रहीत् ॥१५३३॥
वसाल्पपरिवारोस्मद्गृह इत्यथ गृह्णतः । श्वशुरप्रार्थनां तस्य भृत्याः पार्श्वादवाचलन् ॥१५३४॥
प्रावर्तताथ नगरे विशद्भिर्विभवोज्ज्वलैः । सुलग्नसुलभे काले वरयात्रेव डामरैः ॥१५३५॥ 1535
वीक्ष्याश्वच्छत्त्रतुरगैरेकैकं पार्थिवाधिकम् । सुस्सलक्ष्मापतेर्धैर्ये नैष्ठुर्यं तुष्टुवुर्जनाः ॥१५३६॥
औदार्याकारतारुण्यवेषसौन्दर्यमन्दिरम् । कोष्ठेश्वरोधिकं स्त्रीणां प्रययौ प्रेक्षणीयताम् ॥१५३७॥

---

१५०९. [1]) Thus corr. by $A_1$ from °मग्रतः. १५१०. [1]) Emended; A कम्पनेशं. १५१९. [1]) Emended with C; A °जवनिकां लक्ष्य°. १५२८. [1]) Emended with C; A संप्रष्टुं; cf. viii. 1193. १५३०. [1]) Emended with C; A तद्देश°.

प्रशान्तविप्लवे देशे ययावुत्सववाद्यताम् । विशङ्कुरिलवन्यौघतूर्यघोषो[1] दिवानिशम् ॥१५३८॥
क्षीराद्या लक्ष्मकेणापि सर्वे मडवराज्यतः । आनीताः पार्थिवाभ्यर्णं सैन्यार्णवभयंकराः ॥१५३९॥
1540 अपि भूपालवाल्लभ्यादभूद्राजोपजीविनाम् । प्रतीहारगृहद्वारप्रवेशो बहुमानकृत् ॥१५४०॥
लवन्यलुण्ठितग्रामतया दुर्भिक्षदुःसहः । व्ययोत्तरङ्गः कालोभूत्स राज्ञो धनदश्रियः ॥१५४१॥
डामरेभ्यो नृपः पारा[1]त्संगृह्णन्कृतवेतनः । निनायाभ्यन्तरं वृद्धिं बाह्यं चापचयं जनम् ॥१५४२॥
तिष्यवैश्यार्घदे[1]वाद्या ज्ञातयो जनकद्रुहाम् । राजद्रोहोचितां राज्ञा विपत्तिमनुभाविताः ॥१५४३॥
मासैश्चतुर्भिः स पितृप्रमयाहादनन्तरम् । अनन्यशासनं राष्ट्रं स्वमेव समपादयत् ॥१५४४॥
1545 नि[1]र्धाम नगरं पौराः सर्वसामर्थ्यवर्जिताः । अनन्तै राष्ट्रमाकीर्णं डामरैः पार्थिवोपमैः ॥१५४५॥
बद्धमूलो नातिदूरे सर्वभारसहो रिपुः । सबाह्याभ्यन्तरा मन्त्रिसामन्ता वैरिसंश्रिताः ॥१५४६॥
मन्त्रोपदेशो[1] वृद्धस्य नैकस्यापि नृपास्पदे । अधर्मबहलाः सर्वे भृत्या द्रोहैकवृत्तयः ॥१५४७॥
राज्यारम्भे बभूवेयं या सामग्र्यस्य भूपतेः । सा स्मर्तव्यान्तराज्ञातुं प्रत्युदन्तं विवेक्तृभिः ॥१५४८॥
प्राप्तप्रसङ्गात्तदिदं गुणग्रामोपवर्णनम् । वक्ष्यमाणं सुबहुशोप्यत्र लेशात्प्रदर्श्यते ॥१५४९॥
1550 पूर्वापरानुसंधानवन्ध्यैर्दृ[1]ष्टान्तवत्कथाः । नाबुद्धातिगभीराणां शक्या रसयितुं गुणाः ॥१५५०॥
प्रत्यक्षस्य गुणान्राज्ञो विचिन्वन्तो यथास्थितान् । अनीर्ष्यस्य भविष्यामो विवेकस्यानृणा वयम् ॥१५५१॥
स्थितस्य तत्त्वविज्ञाने नान्यस्य हि पटुर्जनः । अमानुषानुभावस्य राज्ञः किं पुनरीदृशः ॥१५५२॥
हितानां दाराणां सदृशसुखदुःखस्य सुहृदः कवेः सोल्लेखस्य प्रियसकललोकस्य नृपतेः ।
स्थितानां कोप्यत्र व्यवहितविवेकः स्वकुकृतैरसामान्यं ज्ञातुं सुभगमनुभावं न कुशलः ॥१५५३॥
भवेत्प्राप्तप्रसरणा परिणामेथ वा मतिः । कथं सर्वस्याद्भुतायां निष्ठायां गुणदोषयोः ॥१५५४॥
1555 सन्त्येवास्यापि विषमाः स्वभावा दोषतां जनः । येषां विपाकभव्यत्वमजानन्ग[illegible]यत्ययम् ॥१५५५॥
विकासः केषांचिन्नयनविषमैर्विद्युदुदयैः परेषामुद्भूतिः श्रवणकटुभिर्दीर्घरसितैः ।
न चेष्टा काप्यन्योपकृतिपरिहीना जलमुचो जडो वर्षादन्यं गणयति गुणं नास्य तु जनः ॥१५५६॥
गुणांल्लोकोत्तराञ्शृण्वन्नस्यानुभवगोचरान् । भविता पूर्वभूपालकृत्ये सप्रत्ययो जनः ॥१५५७॥
अनुच्चलन्नपि स्थानाद्भ्रूभ[1]ङ्गेन चकार सः । विलोलांल्लोमकम्पेन दिङ्नाग इव भूधरान् ॥१५५८॥
विरुदद्वाहिनीवृन्दा गूढं यद्भयसंभवम् । वहन्ति तापं भूपाला और्वाग्निमिव सिन्धवः ॥१५५९॥
1560 भूमिभृद्भास्वतस्तस्य तेजसाप्यायितो गतः । पूर्वराजयशश्चन्द्रो भुवनेष्वप्रकाशताम् ॥१५६०॥
यो यस्तं पश्यति स्वात्मसंमुखं स स सर्वतः । जानात्यवक्रोल्लिखितं देवबिम्बमिवेश्वरम् ॥१५६१॥
स्थिरप्रसादो दत्ते यत्तदादत्ते न स क्वचित् । भयं पुनः प्रणमतां दत्तं हरति विद्विषाम् ॥१५६२॥
कृष्टासेः प्रतिबिम्बं स्वं हित्वा नान्योस्य संमुखः । नापरः प्रतिशब्दाच्च गर्जतः प्रतिगर्जति ॥१५६३॥
तस्य नातिशितं कोपे प्रसादे निशितं पुनः । धत्ते तीक्ष्णैकधारस्य तरवारेस्तुलां वचः ॥१५६४॥

---

१५३८. [1]) Doubtful emendation; A °घोषा; G °विप्लवो देशो and °घोषाद्दिवा°. १५४२. [1]) Thus A; C पौरान्सं°. १५४३. [1]) Cf. वृत्तौ टिक्कस्यार्घदेवतिष्टवैश्या° (A) viii. 1305. १५४५. [1]) Thus $A_1$; R C निवासन°, as apparently corr. by later hand in A. १५४७. [1]) Conjectural emendation; A मन्त्रोपदेशवृद्धस्य. १५५०. [1]) दृष्टान्त supplied by $A_3$ in space left by $A_1$. १५५८. [1]) Emended with C; A °द्भृभङ्गेन.

तस्याकुजन्मनो नित्याम्लानलक्ष्मीविकासिनः । प्रभवन्त्याश्रिताः कल्पशाखिनः पल्लवा इव ॥१५६५॥ 1565

राज्ञि गाम्भीर्यदुर्लक्ष्यमाहात्म्यप्रभविष्णुताम् । विवेद मन्त्रिणां लोकः सिषेवे तांश्च सर्वतः ॥१५६६॥

प्ररूढस्तु प्रतीहारो न विषेहेन्यमन्त्रिणाम् । पार्श्वद्रुमाणामेषाख्यौषधिस्तम्भ इवोन्नतिम् ॥१५६७॥

तस्योत्पाटयतः सर्वांस्तृणानीवावहेलया । स्फूर्जञ्जनकसिंहोभूदशक्योन्मूलनः परम् ॥१५६८॥

आ बाल्यात्संस्तुतो राज्ञः स कृत्स्नव्यवहारवित् । अधृष्यस्तरुणीभूततनयो ह्यास्त सर्वतः ॥१५६९॥

अद्वैधं यौनसंबन्धादिच्छतस्तत्सुतो मदात् । छुड्डाभिधस्तस्य ततः कृतावज्ञोतनोत्त्रपाम् ॥१५७०॥ 1570

रन्ध्रान्वेषी स तद्रोषादुपजापैः क्षणे क्षणे । सत्सूनौ जनके यत्नान्नृपं[1] द्वेषमजिग्रहत् ॥१५७१॥

राज्ञस्तुल्यवयःस्थौ हि जननीगाढसंस्तवात् । राज्यकाले हि सोत्सेकावास्तां तदवकाशदौ ॥१५७२॥

तुरंगयोग्योपस्कारस्नानाहारादि राजवत् । अकालज्ञावकुरुतां राजधान्यन्तरेव तौ ॥१५७३॥

सह स्ववृद्धैः समशीर्षिका प्रभोर्न युज्यते प्राप्तसमुन्नतेः क्वचित् ।
श्रितोन्नतेर्दर्दुरवृन्दलङ्घनं सरोजषण्डस्य महाविडम्बना ॥१५७४॥

तद्भित्तिलाभसंरूढपैशुनालेख्यकल्पनाः । तद्वर्गेप्यखिले चक्रुस्तद्द्विषः कलुषं नृपम् ॥१५७५॥ 1575

अथ राजा विजयिनं सत्कर्तुं कम्पनापतिम् । कृतज्ञः श्रावणे मासि जगाम विजयेश्वरम् ॥१५७६॥

अत्रान्तरे पिञ्छदेवादागच्छन्गिरिगह्वरे । प्राप शूरपुरद्रङ्गाधीश्वरादुत्पलो वधम् ॥१५७७॥

पुष्याणनाडादुत्पिञ्छकृतये पुनरागतः । द्रङ्गाधिपेन गुटिकान्वेषिणा स ह्यवाप्यत ॥१५७८॥

क्षितौ निपतितः पार्श्वप्राप्तमेकं द्विषद्भटम् । मुमूर्षुर्विशिखाविद्धजानुमर्मापि सोवधीत् ॥१५७९॥

प्रत्यावृत्तस्य सत्कृत्य कम्पनेशं महीपतेः । द्वार्यवन्तिपुरस्थस्य[1] द्रङ्गेशोरिशिरो व्यधात् ॥१५८०॥ 1580

स दृढद्राढिकामुष्टिरसुहृन्मुण्डमुद्गरः । चक्रे तस्य दृढामर्षशोकशङ्कुविपाटनम्[1] ॥१५८१॥

आद्यायामेव यात्रायां जातारातिक्षयो जनैः । स निःशेषयिताशेषकण्टकानामगण्यत ॥१५८२॥

तस्मिन्प्रविष्टे नगरं विद्रुताः केपि सागसः । प्रापुर्जनकसिंहाद्याः केपि कारागृहस्थितिम् ॥१५८३॥

कैश्चित्[1]पलायितैः शङ्कां ग्राहिताः पृथिवीपतेः । ततः कोष्ठेश्वरमुखाः प्रातिलोम्यं प्रपेदिरे ॥१५८४॥

शमालां निर्गतः श्रीमान्कार्तिकेथ कृती नृपः । तत्र तत्रासुहृद्ग्रामं संग्रामेोग्रमबाधत ॥१५८५॥ 1585

यत्र सुस्सलभूपाद्याः प्रापुर्भग्नप्रतापताम् । तं हाडिग्राममदहत्सुज्जिरूर्जितविक्रमः ॥१५८६॥

महीभुजा पीड्यमानैराहूतः कोष्ठकादिभिः । अथ भिक्षाचरो राज्यगृध्नुर्भूयोप्युपाययौ ॥१५८७॥

एकेनाह्ना योजनानि प्रोल्लङ्घ्य दश पञ्च च । शिलिकाकोट्टनामानं गिरिग्राममवाप सः ॥१५८८॥

क्षुत्पिपासाक्रमारातिभीतिमार्गश्रमोद्भवम् । क्लेशं नाजीगणन्मानी धावितः स जिगीषया ॥१५८९॥

कार्यमायाति वैमुख्यं जिगीषोर्विधुरे विधौ । प्रस्थितस्य पुरोवाते रथस्येव ध्वजांशुकम् ॥१५९०॥ 1590

आरम्भमात्रमपि कस्यचिदेव सिद्ध्यै कश्चित्प्रयत्नपरमोप्यफलप्रयासः ।
मन्थाद्रिणामृतमवाप्युदधेर्मुहूर्तात्सक्ति चिराद्विदधता न हिमाद्रिणेन ॥१५९१॥

---

१५७१. [1]) Emended; A नृपो. १५८०. [1]) Emended with C; A °पुरस्स्थस्य. १५८१. [1]) Emended; A विपादनम्.
१५८४. [1]) Emended with C; A कैचित्प°.

भ्रष्टा सरित्स्ववसतेर्जलधिप्रवेशे वेलोर्मिवेल्लनवशेन विवर्तमाना ।
मिथ्यैव यच्छति धियं पुनरुद्गतेति नोत्थानमस्ति तु विधिव्यपरोपितानाम् ॥१५९२॥
तस्य तावन्महायत्नकठोरस्योदयक्षणे । सिद्धेर्विबन्धो विधिना विधुरेण व्यधीयत ॥१५९३॥
आयातं तमबुद्ध्वा तु[1] तस्मिन्नेव क्षणेश्रयत् । पृथ्वीहरानुजः प्राप्तभङ्गः कृत्ताङ्गुलिर्नृपम् ॥१५९४॥
1595 कोष्ठेश्वरः स चावेत्य संप्राप्तं तमतिष्ठताम् । कृत्याक्षमौ ततः सर्पाविव मन्त्रनियन्त्रितौ ॥१५९५॥
ताभ्यां स्थानेथ सोन्यस्मिंस्त्याजितोध्वपरिश्रमम् । कार्कोटद्रङ्गमार्गेण निर्गतः सुल्हरीं ययौ ॥१५९६॥
आसीच्च तत्र प्रोच्चण्डदर्पकण्डूलदोर्द्रुमः । ऊष्मायमाणः कश्मीराक्रान्तिसंततचिन्तया ॥१५९७॥
उदीपसलिलस्येव तस्य रन्ध्रगवेषिणः । पुरं प्रविष्टो राजापि प्रतीकारमचिन्तयत् ॥१५९८॥
अद्वितीयस्त्वमात्येषु प्रतीहारो मदोग्रताम् । सुज्जेरसहमानोभूच्छलान्वेषणतत्परः ॥१५९९॥
1600 आययावथ विस्रम्भावष्टम्भं वल्गतः प्रभोः । धन्याग्रजः पूतमूर्तिर्जाह्नवीजलमज्जनात् ॥१६००॥
तदाद्याः संस्तुता राज्ञश्चिरसंभावितास्ततः । अनाप्नुवन्तोधीकारान्पर्यतप्यन्त चिन्तया ॥१६०१॥
कुर्वाणे कार्यतस्तस्मिन्भरं पित्र्येषु मन्त्रिषु । कालप्रतीक्षाक्षमतामूहुस्ते[1] गहनाशयाः ॥१६०२॥
प्रतीहारस्तु दुर्लक्ष्यसुज्जिनिर्लोठनोद्यतः । अप्रियानपि तान्प्रीत्या जग्राहोग्रोपयोगिनः ॥१६०३॥
व्यतीतेष्वथ मासेषु केषुचिद्दैवयोगतः । अकस्मादभवद्भूभृत्स्फीतलूतामयातुरः ॥१६०४॥
1605 विस्फोटशोफातीसारवह्निमान्द्याद्युपद्रवैः । संदिग्धाभ्युदये तस्मिन्देशः पर्याकुलोभवत् ॥१६०५॥
इत्थं स्थितः कुलस्यैक[1]भर्तुः स्वामी बली रिपुः । तत्पक्षा डामरा राष्ट्रं दुष्टमेव व्यचिन्तयन् ॥१६०६॥
आयत्यां च तदात्वे च हितकृत्यं विचारयन् । राज्ञः श्रीगुणलेखाया जातमेकसुतं शिशुम् ॥१६०७॥
पञ्चाब्ददेश्यं पर्माण्डिं सुज्जिर्भूमिपतिं तदा । चिकीर्षुर्मन्त्रयामास मातुलेनास्य गार्गिणा[1] ॥१६०८॥
इत्थं भूतस्य दुध्रुक्षुः ससूनुः सुज्जिरस्य ते । पञ्चचन्द्रादिभिः सार्धं युक्त्या मन्त्रयतेनिशम् ॥१६०९॥
1610 लब्धरन्ध्रः प्रतीहारो धन्याद्याश्च तदीरिताः । इत्यवोचंस्ततो भूपं स तथेत्यग्रहीच्च तत् ॥१६१०॥
पूर्वप्रजासृजं[1] इवाद्भुतवस्तुतत्त्वव्या[2]वर्णनेन कुतुकं जनयन्ति तज्ज्ञाः ।
बाला इवाल्पमतिहार्यधियश्च सन्ति प्रायो नृपा नियमशून्यमनोनुभावाः ॥१६११॥
शौचस्थाने कृतवसतिभिः स्त्रीव्यवायालये वा निःशस्त्रो यश्छलनकुशलैर्मानसं संप्रविश्य ।
नीतो भूतैरिव विवशतां निर्भरं गर्भचेटैर्भद्रं भूपात्कथमिव ततः स्यादवष्टब्धचेष्टात् ॥१६१२॥
निर्हेतु प्रहसन्विटः प्रविशति क्षोणीपतेरन्तिकं प्रीत्युत्फुल्लदृगेष किं किमिति तं पृच्छत्यनच्छाशयम् ।
ब्रूते किंचिदसौ कचानथ कषन्सर्वंकषं मानिनां मानप्राणगुणेषु यत्सरभसं दम्भोलिपातायते ॥१६१३॥
सविभ्रमगतागतः किमपि भाषमाणः श्रुतौ प्रभोर्वलितलोचनं जगदवज्ञयालोकयन् ।
निजस्य मुखविक्रियाप्रणयताडनाद्यैर्विदन्ननुग्रहमिवाहितं नृपतिवल्लभो दुःसहः ॥१६१४॥
1615 अपि जातु स दृश्येत निःसंक्षोभमतिर्नृपः । यो यन्त्रपुत्रक इव व्यक्तं धूर्तैर्न नर्त्यते ॥१६१५॥

---

१५९४. [1]) Here one *akshara* is wanting in A; तु supplemented with C. १६०२. [1]) Emended; A °क्षमतां मुहुस्ते. १६०६. [1]) Thus corr. by $A_1$ from कुलेस्यै°. १६०८. [1]) Emended; A गर्गिणा. १६११. [1]) Emended; A °स्रज.— [2]) Emended with C; A °तत्त्वं व्या°.

यतो भृत्यान्तराज्ञानाज्जातः सर्वस्वसंक्षयः । तत्प्रजादुष्कृतै राज्ञां हा धिङ्नाद्यापि शाम्यति ॥१६१६॥

सुज्जिरारोग्यमन्वेष्टुमागच्छन्पूर्ववत्प्रभोः । विन्यस्तरक्षिणः पश्यन्नविश्वासमखिद्यत ॥१६१७॥

दाक्षिण्यं वामतां यातमाशये प्रतिबिम्बितम् । दर्पणस्येव राज्ञः स विभाव्याभूत्पराङ्मुखः ॥१६१८॥

तस्मिन्राजगृहे खेदान्मन्दीकृतगतागते । नृपतेस्तद्गतां प्रीतिं निःशेषां जह्रिरे खलाः[1] ॥१६१९॥

भृत्यः सुज्जेश्चित्ररथोप्यास्थानद्विजभ्रूः शठः । प्रातिलोम्यावहैर्भर्तुर्मन्त्रैरासीच्छ्रियोन्तकृत् ॥१६२०॥ 1620

नीरोगे राज्ञि दृष्टः स दिष्टवृद्ध्यै नृपास्पदे । वसुवर्षी विनिर्याय प्रार्थनार्थी गृहान्ययौ ॥१६२१॥

न तं प्रासादयद्राजा विशालबलवाहनः । आक्रम्योसौ[1] कथं नः[2] स्यादित्युपायं त्वचिन्तयत् ॥१६२२॥

त्यज्येत हतकार्योसौ निराशैरनुजीविभिः । मत्वेति तदधीकारानन्येभ्यस्तूर्णमार्पयत् ॥१६२३॥

राजस्थानात्स्वजं धन्यं[1]मुदयं कम्पनादपि । अजिग्रहन्नरपतिः खेरीकार्ये च रिल्हणम् ॥१६२४॥

[1]हृताधिकारे प्रव्यक्तवैकृते नृपतौ ततः । अल्पावशेषानुचरः सुज्जिरासीद्विशङ्कितः ॥१६२५॥ 1625

विमानितः पुराद्गङ्गायात्रामुद्दिश्य मानवान् । सोथ सुस्सलभूभर्तुरस्थीन्यादाय निर्ययौ ॥१६२६॥

औत्सुक्यात्प्रार्थनाकाङ्क्षी राजधान्यन्तिके न सः । निर्गच्छन्राजपुरुषैर्न राज्ञा वान्वरुध्यत ॥१६२७॥

तन्निर्वासनगर्वस्य स्थापनायानुयात्रिके । प्रतीहारस्तस्य गुप्त्यै कोशादेः स्वात्मजं व्यधात् ॥१६२८॥

निग्रहानुग्रहावस्मदायत्ताविति रक्षिणम् । पुत्रं प्रादाल्लक्ष्मको मे[1] इति ध्यायन्स विव्यथे ॥१६२९॥

निवृत्तो लक्ष्मको द्वारात्पर्णोत्सं शनकैर्गतः । अवारोपयदद्रोहो भागिकं लोहराचलात् ॥१६३०॥ 1630

प्रतीहारविसृष्टाय धात्रेयाय महीभुजः । प्रेमाभिधाय तत्कोट्टाधीकारं च समार्पयत्[1] ॥१६३१॥

उत्खाय लोहरत्यागाच्छङ्काशङ्कुं महीपतेः । स भीष्मविषमं कालं राजपुर्यामलङ्घयत् ॥१६३२॥

अमात्यकन्दुकव्रातपातनोत्[1]पातनक्षमः । आयत्तडामरः प्राप प्रथां कामपि लक्ष्मकः ॥१६३३॥

द्वारेथाकारयत्सुज्जिप्रतिमल्लविधित्सया । कृष्यमाणो राजवंशपौरुषं राजमङ्गलम् ॥१६३४॥

अनन्यदेशजः सुज्जेः[1] शूरो मत्कोश[2]पोषितः । कीर्तिमेष हरेदीर्ष्यां[3]वितीर्ष्याकलुषो हि सः ॥१६३५॥ 1635

खड्गग्राहिसहायः स क्षुण्णः पर्यटितुं पथि । निःसुखश्चोपहास्यश्च तेन कार्यार्पणात्कृतः ॥१६३६॥

कर्तुं पदव्यां योग्यानामयोग्यान्प्रभवेन्न कः । तेषां गुणैस्तान्संयोक्तुं न शक्यं कारणैरपि ॥१६३७॥

पदे श्रीखण्डस्यानुचितमुचिते वर्ष्मणि निजे वृषाङ्कः प्रक्षेप्तुं प्रभवति चिताभस्म रभसात् ।

न तत्स्वेच्छायत्तत्रिजगदुदयापायघटनोप्यसौ तद्गन्धेन स्फुटमिह पटुः[1] संघटयितुम् ॥१६३८॥

तस्मिन्सुज्जिप्रतिस्पर्धामप्रौढे वोढुमक्षमे । दूतानसृजदानेतुं सज्जपालं दिगन्तरात् ॥१६३९॥

निर्वीरे मण्डले द्वेष्योप्यवापत्कार्यगौरवात् । कोष्ठेश्वरो नरपतेर्नितरामन्तरङ्गताम् ॥१६४०॥ 1640

प्रीतिदायैस्तोष्यमाणस्तैस्तैस्तुष्टेन भूभुजा । विस्रब्धो नगरे तस्थौ सोपि लूतामयातुरः ॥१६४१॥

---

१६१९. [1]) Emended; A जह्रिरेखिलाः. १६२२. [1]) Emended; A आक्रम्यासौ.—[2]) Thus corr. in A from न. १६२४. [1]) Emended; A धान्य°. १६२५. [1]) Emended; A हिता°. १६२९. [1]) Conjectural reading; A °कोष; R C °कोय. १६३१. [1]) Emended; A समर्पयत्. १६३३. [1]) Thus $A_1$; $A_2$ °पातनोत्थापनक्षमः. १६३५. [1]) Thus $A_1$; $A_3$ सुज्जिः.—[2]) Thus corr. by $A_3$ from $A_1$ मत्कोश°.—[3]) Thus corr. by $A_3$ from $A_1$ स्पर्धामेष वहे ‒ ‒ विती°. १६३८. [1]) पटुः supplied by $A_3$ in space left by $A_1$.

एवं दमकदम्बैक्यं राज्ञि कुर्वति कार्यतः । चालकैः सोमपालाद्यैः सुज्जिर्निन्येथ वैकृतम् ॥१६४२॥
प्रतिज्ञाय लतामात्रसाध्यं कश्मीरनिर्जयम् । सोमपालाय तद्राज्यं सोङ्गीचक्रेवमानितः ॥१६४३॥
प्रतिशुश्राव तस्मै च भागिनेयीं स कन्यकाम् । धीमानत्रान्तरे सामदाने प्रयुयुजे नृपः ॥१६४४॥
1645 द्वौ तावल्पाशयौ राजकन्ययोः स्वीक्रियां तदा । रभसाद्यावकुर्वाणावदत्तामन्तरं द्विषाम् ॥१६४५॥
उपायैर्जयसिंहस्य शकुनैश्च निरीक्षितैः । प्रेरितः सोमपालोथ सुज्जेर्मन्दादरोभवत् ॥१६४६॥
स्वयमेत्य प्रतीहारस्तत्र राजपुरीपतिम् । सीमान्तर्भुवमानिन्ये कन्यकोद्वाहसिद्धये ॥१६४७॥
जातां कल्हनिकाख्यायां महादेव्यां महीपतेः । उपयेमे नृपसुतां सोमोम्बापुत्रिकाभिधाम् ॥१६४८॥
याते तस्मिन्कृतोद्वाहे नागलेखाभिधां सुधीः । तत्स्वस्रेयीं[1] प्रतीहारो भूभुजे प्रत्यपादयत् ॥१६४९॥
1650 इत्थं राष्ट्रद्वये बद्धसंधौ निरवकाशताम् । प्राप्तः प्रतस्थे हेमन्ते सुज्जिस्त्रिपथगोन्मुखः ॥१६५०॥
जालंधरे संघटितो ज्येष्ठपालो निनाय तम् । गाढावमाननिर्नष्टसौष्ठवं भिक्षुपक्षताम् ॥१६५१॥
त्वयि भिक्षाचरे चैकसैन्यनायकतां गते । नोपेन्द्रो वा महेन्द्रो वा समर्थौ प्रत्यवस्थितौ ॥१६५२॥
राज्यप्रदस्य ते यश्च चक्रे राजा विमाननाम् । तस्थुषो यश्च विषये प्रतिकुर्मस्तयोर्द्वयोः ॥१६५३॥
इति संप्रेरितस्तेन देङ्गपालान्तिकस्थितेः । यियासुः सोन्तिकं भिक्षोर्भागिकेन न्यषिध्यत ॥१६५४॥
1655 अनिक्षिप्तवतोस्थीनि स्वामिनो जाह्नवीजले[1] । न युक्तमेतत्ते कृत्यमित्यावेगादशासि[2] च ॥१६५५॥
स्नात्वा द्युनद्यामेष्यामि पार्श्वं व इति निश्चयम् । स पीतकोशः कृत्वास्य ययौ प्रस्तुतसिद्धये ॥१६५६॥
प्रतीहारकरन्यस्तसर्वभारस्तु भूपतिः । मन्दाक्रान्तितया राज्यमसुस्थितममन्यत ॥१६५७॥
यो यो हि व्यग्रहीत्तं तं संधाय सविधस्थितः । तमन्वहं प्रतीहारः सानुग्रहमिवैक्षत ॥१६५८॥
प्रगल्भमाने शास्त्येवं[1]मुदयः कम्पनापतिः । अवधीच्छद्मना दृप्तं प्रकटं कालियात्मजम् ॥१६५९॥
1660 अविश्वासोल्बणान्सर्वलावन्यानथ लक्ष्मकः । निर्मर्यादान्कम्पनेशमीषत्सान्त्वमजिग्रहत् ॥१६६०॥
स्नात्वाभ्येष्यति गङ्गायां यावत्सुज्जिर्विसूत्रताम् । यावत्कथं मया नेया कश्मीरा इति चिन्तयन् ॥१६६१॥
तावन्मात्रान्तरव्याप्त्या राज्ञो विज्ञाय डामरान् । भिन्नान्भिक्षाचरोविक्षद्विषल्लाटां हिमागमे ॥१६६२॥
मण्डलस्यान्तरे तस्य विविक्षो रुद्धडामरः । प्रतीहारो हिमर्तुश्च निषेद्धा समपद्यत ॥१६६३॥
स टिक्केन पितृद्रोहादेकान्तद्वेषिणा रिपोः । आनीतः संमतैर्दत्ताप्यायः सर्वैश्च डामरैः ॥१६६४॥
1665 प्रतीक्षमाणो राज्याप्तिहेतुं सुज्जिसमागमम् । निर्भयष्टिक्कजामातुर्भागिकस्य खशप्रभोः ॥१६६५॥
बाणशालाभिधे दुर्गे वसन्नल्पोच्छ्रितावपि । दूतैर्बिभेदमनयत्सर्वडामरमण्डलम् ॥१६६६॥
प्रमोदं सुहृदां त्रासं द्विषां च विसृजन्पुरः । व्यावर्ततोथ गङ्गायाः सुज्जिर्विहितमज्जनः ॥१६६७॥
पूर्वविप्रकृते भिक्षावस्मिंश्चाभेदमागते । यथामुष्य महीभर्तुस्तथास्माकं भयं भवेत् ॥१६६८॥
ध्यात्वेति सिंहदेवेन प्रार्थितो व्याजमादधे । सुज्जिस्वीकरणोद्योगे सोमपालो भयाकुलः ॥१६६९॥
1670 सुज्जिर्जालंधरं प्राप्तः प्रातर्भिक्षाचरान्तिकम् । यावद्यास्यति तं सायं तद्दूतस्तावदासदत् ॥१६७०॥

---

१६४९. [1]) Emended with C; A स्वस्रेयी. १६५५. [1]) These two *pâdas* have been twice written by $A_1$.—[2]) Emended with C; A °शाधि. १६५९. [1]) Thus A; perhaps read शास्त्यैवमु°.

प्रेरितो ज्येष्ठपालेन निषिद्धो भागिकेन च । विरराम स तस्योक्त्या विपक्षाश्रयणग्रहात् ॥१६७१॥
ऋणं देशान्तरोपात्तं तव भूपोपनेष्यति । स्वं च दास्यत्यधीकारं मन्मुखप्रहितार्थनः ॥१६७२॥
इति दूतमुखेनोक्तः सोमपालेन चान्वहम् । विपक्षौत्सुक्यमुत्सार्य तद्देशाभिमुखो ययौ ॥१६७३॥
उदयः कम्पनाधीशो वैशाखे तीर्णसंकटः । खशान्वितेन संग्रामं प्रत्यपद्यत भिक्षुणा ॥१६७४॥
प्राक्तस्थुष्यल्पपृतने जाते पृथुबले ततः । तस्मिन्कोट्टान्तरं भिक्षुः प्राविशत्प्राप्तवेष्टनः ॥१६७५॥ 1675
राजाथ विजयक्षेत्रं निर्यातः प्रत्यपूरयत् । कम्पनेशस्य कटकं तास्ताः संप्रेषयंश्चमूः[1] ॥१६७६॥
यन्त्रोपलशरासारविविधायुधवर्षिणी । दुर्गस्थितैर्नृपचमूः प्रत्ययोध्यश्मवर्षिभिः ॥१६७७॥
पतत्स्वश्मसु भिक्षोश्च नामलक्ष्मसु पत्रिषु । ग्रहीतुं दुर्गजान्राजसेना दीर्घापि नाशकत् ॥१६७८॥
दिनैरभ्यधिके मासमात्रे यातेग्रहीत्ततः । विदार्य मूलं दुर्गस्य धन्यैः[1] खाताम्बु संभृतम् ॥१६७९॥
दुर्गभाजो बलासाध्या राज्युपायपरे धियम् । जाततद्वैरिबाधेच्छा धनलुब्धामदर्शयन् ॥१६८०॥ 1680
विससर्ज प्रतीहारमथ तद्वस्तुसिद्धये । राजा[1] डामरसामन्तमन्त्रिराजात्मजैः समम् ॥१६८१॥
कोष्ठेश्वरत्रिल्लकाद्याः कृच्छ्र[1]स्थस्य विमोक्षणम् । करिष्यामो वयं भिक्षोरिति बुद्ध्या तमन्वयुः ॥१६८२॥
पश्यन्संकटशैलाग्रादधः कोट्टं मितोन्नति । जितं मेने प्रतीहारो वीक्ष्यानन्ताः स्ववाहिनीः ॥१६८३॥
पूर्वस्थितैः प्रतीहारानुगैश्चान्यत्र वासरे । अयोधि सर्वसैन्यस्य बलात्कोट्टं जिघृक्षुभिः ॥१६८४॥
ते तावन्तोप्यश्मवृष्ट्या तथा तैः प्रतिचक्रिरे । नास्तीदं विक्रमेणेति यथागृह्णन्विनिश्चयम् ॥१६८५॥ 1685
वीरदेहद्रुमाग्रेभ्यो न्यपतन्नश्मभिर्हताः । निर्यदस्रौघसरघाः शीर्षभ्रमरगोलकाः ॥१६८६॥
कोष्ठेश्वरस्य मूढत्वं निर्व्यूढं तत्र किंचन । स्वस्य भिक्षोर्लवन्यानामन्येषां च विनाशकृत् ॥१६८७॥
नास्त्यत्र मत्समो वीर इत्येतावत्प्रसिद्धये । स ह्ययुद्धोद्धतं भिक्षोर्यत्प्राणक्षयकार्यभूत् ॥१६८८॥
दुधुक्षूणां खशानां स संकटे धैर्यमादधे । कोष्ठेश्वरोस्मि चाभिन्नौ तद्वश्या डामराः परे ॥१६८९॥
यदेतद्दृश्यते भूरि सैन्यमस्मद्धिताय तत् । पर्यवस्येदिति वदन्समभाव्यन्यथा च तत् ॥१६९०॥ 1690
विस्रम्भभूरमुष्यारिर्यत्र कोष्ठेश्वरोप्यसौ । अन्येषु तत्र कैवास्थेत्यथ ते निश्चयं दधुः ॥१६९१॥
भूभृत्पितृद्रुहः कार्यवशेन स्वोपवेशने । अङ्गीकृताधिकारस्तु धीमांष्टिक्कस्य लक्ष्मकः ॥१६९२॥
खशाधीशं महाग्रामस्वर्णादित्यागसंश्रयात् । स्वीकृत्य भिक्षुदुधुक्षा[1]बद्धकक्ष्यमकारयत् ॥१६९३॥
आनन्दाख्यः खशाधीशस्यालः कृतगतागतः । नीत्वा टिक्कं प्रतीहाराभ्यर्णं भूयोप्यरोपयत् ॥१६९४॥
प्रतीहारस्य टिक्केन सहैक्यं वीक्ष्य डामरैः । निःसंशयं हतोज्ञायि भिक्षुः कोष्ठेश्वरादिभिः ॥१६९५॥ 1695
संरब्धास्तद्विमोक्षाय प्राहिण्वंस्ते खशान्तिकम् । दूतानूरीकृतस्वर्णदाना भूरिधनैः समम् ॥१६९६॥
खशस्तु दध्या[1]वुत्कोचं गृहीत्वास्माभिरुज्झितः । जानाति रक्षितान्प्राणान्भिक्षुः कोष्ठेश्वरादिभिः ॥१६९७॥
समन्युः प्राप्तराज्योथ देङ्गपालोथ दूरगः । हन्यान्मां जयसिंहस्तद्रक्ष्यः पक्ष्यः प्रयत्नतः ॥१६९८॥
मत्वेति तेन प्रत्युक्ता भिक्षुं[1] शौचस्थितं गृहात् । विपाद्यातः फलहकं निर्गच्छेत्यूचिरेपि ते ॥१६९९॥

---

१६७६. [1]) Emended; A संप्रैषयच्च॒ः. १६७९. [1]) Emended; A धान्यः; C धान्यखा°; cf. viii. 1624. १६८१. [1]) Emended; A राज्ञां. १६८२. [1]) Thus corr. by $A_2$ from $A_1$ कृच्छ्रात्तस्य. १६९३. [1]) Emended; A °वुधुक्षु°. १६९७. [1]) Emended with R; A दध्यावु°. १६९९. [1]) Emended; A भिक्षुशौ°.

1700 स त्वमेध्योपलिप्ताङ्गः श्वेवावस्करवर्त्मना । यात इत्ययशो लोके ध्यायन्मानी न निर्ययौ ॥१७००॥
कोष्ठेश्वरोव्यक्तकृत्यः सैन्यक्षोभेच्छयाक्षिपन् । रूक्षं कालविदा प्राह्णे प्रतीहारेण सान्त्वितः॥१७०१॥
नीवौ खशाद्यैर्दत्तायामा प्रत्यूषादगृह्यत । व्यवसायः प्रतीहारमुख्यैर्भिक्षुप्रमापणे ॥१७०२॥
गच्छद्भिरागच्छद्भिश्च राजा दूतैः प्रतिक्षणम् । अन्विष्यन्विजयक्षेत्रे वार्तां पर्याकुलोभवत् ॥१७०३॥
तावद्भिराहवैस्तैस्तैः साहसे दश वत्सरान् । कृतयत्नस्य[1] साध्योभून्न यो वृद्धमहीभुजः ॥१७०४॥
1705 डिम्बो राजानुगा डिम्बास्तस्य भिक्षोः प्रमापणम् । साध्यमेते हि मन्यन्ते हन्त किं केन संगतम् ॥१७०५॥
विहस्य नीयते वित्तं खशैरेत्य क्षणादमी । भग्ना नूनं प्रयास्यन्ति मुषिताश्चाखिलाः परैः ॥१७०६॥
पृथग्भूतः कोष्ठकोयं त्रिल्लकोस्यैव बान्धवः । एते भिक्षाचरोच्छिष्टपुष्टा आभ्यन्तरा अपि ॥१७०७॥
को नूतनोत्र संप्राप्तो यो राज्ञः साधयेद्धितम् । सामग्री नूनमायाता सेयमस्यैव सिद्धये ॥१७०८॥
इत्यूचुः शिबिरे यावज्जनास्तावदवेष्ट्यत । कटकैर्मन्त्रिणां दुर्गं विकोशायुधवाहिभिः ॥१७०९॥
1710 एकाकी चिरसंक्लिष्टो हन्तव्यस्तत्कृतेखिलैः । हा धिक्परिकरो बद्धो निर्लज्जैः सर्वशस्त्रिभिः ॥१७१०॥
त एवेत्यूचुरासीच्च कचच्छस्त्रोर्मिनिर्मलः । स्फुरद्योधाक्षिशफरो निःशब्दः सैन्यसागरः ॥१७११॥
व्योम्नोड्डीयेत वा सैन्यं लङ्घयेद्वा मृगप्लुतैः । दुष्टाभ्रवृष्टिरिव वा निखिलांस्ताडयेत्समम् ॥१७१२॥
साश्चर्यशौर्यः पर्यन्ते स्वीकुर्वन्भिक्षुशायुधम् । संभ्रान्तश्चकितश्चासीदित्यन्तश्चिन्तयञ्जनः ॥१७१३॥
एतावन्मन्त्रिणां सिद्धमथ प्रत्यूहसंभवः । तच्छान्तिः कार्यसिद्धिश्च प्रतापैर्नृपतेरभूत् ॥१७१४॥
1715 सैन्ये भिक्षाचरापातं पश्यत्यूर्ध्वार्पितेक्षणे । कोट्टान्निष्कृष्टशस्त्रीकः पुमानेको विनिर्ययौ ॥१७१५॥
रुदतीभिः परीतस्य नारीभिस्तस्य चिक्षिपुः । पृष्ठे केपि वपुर्लोलकौसुम्भाधरवाससः ॥१७१६॥
वद्धः पलायमानोत्र सोयं भिक्षुरिति ब्रुवन् । उन्मुखः स जनोश्रौषीद्धिक्कं तमथ निर्गतम् ॥१७१७॥
स हि[1] भिक्षोः कृतद्रोहतुमुले प्रस्तुतो[2] वधम् । तस्माद्राजानुगेभ्यो वा स्वस्याशङ्क्य विनिर्ययौ ॥१७१८॥
अद्रोहोस्मीति लोकस्य प्रत्ययाय चकर्ष च । कृपाणीमुदरं हन्तुं रक्ष्यमाणो निजानुगैः ॥१७१९॥
1720 सानुगस्त्यक्तमार्गां स विलङ्घ्य नृपवाहिनीम् । आद्रिप्रस्रवणोपान्ते नातिदूरेभ्युपाविशत् ॥१७२०॥
उच्छ्वसंश्चिरसंप्राप्तैरम्भोभिर्दुर्गनिर्गतः । मायां प्रयोक्तुं प्रारेभे प्रेरितः सोन्यडामरैः ॥१७२१॥
संजातं लम्बमानार्कमहस्तद्रक्ष्यतां क्षणम् । भिक्षुः क्षपायामास्कन्दमपनेष्यन्ति डामराः ॥१७२२॥
इति तद्वाचिकात्तीक्ष्णा नीविभिर्मन्त्रिणां समम् । खशैस्त्यजद्भिर्दृषदो न्यरुध्यन्ता[1]रुरुक्षवः ॥१७२३॥
ततः किलकिलारावमुखरैः करतालिकाः । योधैर्ददद्भिः सचिवा व्यगृह्यन्ताकुलाशयाः ॥१७२४॥
1725 मुक्ताः स्वामिद्रुहः कृच्छ्रगता राज्यं प्रसाधितुम् । द्विषतो मन्त्रिभिः स्वार्थो[1] दत्त्वार्थान्को नु साधितः ॥१७२५॥
राजकार्ये च भानौ च लम्बमानेथ लक्ष्मकः । किमेतदिति तं नीविं खशस्यालमभाषत ॥१७२६॥
सोभ्यधात्कुम्भदास्यापि रोद्धुं शक्यं चिकीर्षितम् । खशानां प्रत्यवस्थाता कथं तत्रास्त्यसंनिधिः ॥१७२७॥
स हन्तुं वैपरीत्यं तं खशानां त्वं व्रजेत्यथ । उक्त्वा व्यसृजदानन्दं जहसे चान्यमन्त्रिभिः ॥१७२८॥

---

१७०४. [1]) Emended; A °यन्त्रस्य. १७१८. [1]) Emended; A सह.—[2]) Thus A; perhaps read कृतद्रोहस्तुमुले प्रस्तुते.
१७२३. [1]) Emended with C; A न्यरुधन्ता°. १७२५. [1]) Emended; A स्वार्था.

सुदूरदर्शिना राज्ञा विषलाटाध्वपाततः । देङ्गपालगृहा – –[1]दारम्भः समभाव्यत ॥१७२९॥

अतः प्रधानकोट्टेशस्यालः समम[1]गृह्यत । प्रागेवार्थैरेतदर्थं ग्रथता दीर्घवागुराम् ॥१७३०॥ 1730

संक्षोभावसरे क्षत्ता ततो निःसंभ्रमोभवत् । शिक्षितं पक्षिणमिव त्यक्तं ग्राप्यं विवेद तम् ॥१७३१॥

स तानूचे न हास्यं मे नष्टे कार्येत्र साहसम् । सर्वनाशे हतेमुष्मिन्खशस्यालेपि किं भवेत् ॥१७३२॥

अकुण्ठया भाग्यशक्त्या राज्ञः स्यालः खशस्य सः । सर्वान्नियन्त्र्य दुर्गाग्रात्तीक्ष्णादीनाजुहाव तान् ॥१७३३॥

दस्यूनामसवः कण्ठे संदेहं मन्त्रिणां धियः । स्वःस्त्रीणां प्रीतयः काष्ठां तीक्ष्णाश्चारुरुहुर्गिरिम् ॥१७३४॥

स चर्मकौपीनपटीबन्धस्तत्स्वाभिधाङ्कितैः । इषुभिः स्वामिवत्स्वस्य ख्यापनं सर्वतो युधि ॥१७३५॥ 1735

स ताम्बूलाधरः सक्तिः सा केशश्मश्रुयोजने । याभूदनुमुमूर्षूणां भिक्षुराजो[1]पजीविनाम् ॥१७३६॥

निश्चितान्ते ततस्तस्मिन्स तेषां[1] संन्यवर्तत । कोष्ठेश्वरादिशिबिरं तूर्णं शरणमीयुषाम् ॥१७३७॥ तिलकम्[2]॥

एकैकशो लक्ष्मकेण युक्त्या स्वैः प्रेरितैर्भटैः । टिक्कः स्वं वीक्ष्य वलितं निचकर्ताङ्गुलिं भयात् ॥१७३८॥

खशैरस्मिन्नवसरे स पलायनशङ्किभिः । रक्ष्यमाणस्तेष्वहःसु मनस्तापादभुक्तवान् ॥१७३९॥

वीरस्ताम्यन्विलम्बेन तीक्ष्णानामाहवोत्सुकः । तस्थौ भिक्षाचरः स्वान्तमक्षवत्या विनोदयन् ॥१७४०॥ 1740

हर्म्यप्राङ्गनमायाते तीक्ष्णलोके युयुत्सया । उत्तिष्ठता तेन दायः स्तोकशेषः समाप्यत ॥१७४१॥

दीव्यतः[1] कान्तया साकं कामिनः सुहृदागमे । प्रत्युत्थास्नोरिव क्षोभो नान्तस्तस्य व्यजृम्भत ॥१७४२॥

किमद्यापि वधेन स्याद्बहूनामिति चिन्तयन् । स विहाय शरावापं सासिधेनुर्विनिर्ययौ ॥१७४३॥

सुदीर्घचिन्तागलितायामश्यामलिभिः कचैः । चञ्चच्चित्रपताकाङ्कमिव वीरपटाञ्चलैः ॥१७४४॥

गण्डताण्डविताच्छिद्रशङ्खताडङ्करोचिषा । चन्दनोल्लेखकान्त्या च द्योतिताहंक्रियास्मितम् ॥१७४५॥ 1745

वितीर्णं चित्रचार्यन्ते विपर्यस्ताङ्घ्रिताडनम् । द्योतयन्तमिवालातैः शस्त्रीनेत्राधरांशुकैः ॥१७४६॥

कौसुम्भाधरवासोग्रबद्धधौताधराञ्चलैः । लोलैर्वीरहरिं बद्धसटाटोपमिवांसयोः ॥१७४७॥

दृङ्मनःपाणिपादैक्यचारुप्रचुरचारिभिः । चरन्तं मण्डलैश्चित्रैर्लघुचित्रस्थिरक्रमैः ॥१७४८॥

औचित्यस्योचितां चर्या[1]मलंकारमहंकृतेः । अभिमानविभूतीनां नित्योत्सेकमनत्ययम् ॥१७४९॥

अलक्षितक्षिप्रपातं स सर्वोप्युन्मुखो जनः । विचरन्तं तमैक्षिष्ट भिक्षुमग्रे विरोधिनाम् ॥१७५०॥ 1750

राजबीजी सधोनिप्रा तं प्रवीरः कुमारियः । भ्रातापि ज्येष्ठपालस्य निर्यातो रक्किकोन्वगात् ॥१७५१॥

हर्म्यैर्निम्नोन्नतैस्तैस्तैर्विशतः परिपन्थिनः । रुरोधैकः शरासारैर्गार्गिको भिक्षुसंश्रितः ॥१७५२॥

ते धावन्तो व्य[1]भाव्यन्त शरैस्तच्चापनिर्गतैः । वर्षोपलैः पुरोवातप्रेरितैरिव दन्तिनः ॥१७५३॥

स रोद्धा प्रतियोधानां पापैः क्षिप्ताश्मभिः खशैः । क्षताङ्गो भग्नचापश्च चिरेण विमुखीकृतः ॥१७५४॥

तस्मिन्प्रचलिते मार्गैः प्रविश्योच्चावचैर्भटाः । ते च भिक्षाचरादीनां सर्वे गोचरमाययुः ॥१७५५॥ 1755

भिक्षोरेकं क्षणालक्ष्यधैर्यं पार्श्वधृतायुधम् । अधावत्तूर्णमादाय शूलमेको बृहद्भटः ॥१७५६॥

---

१७२९. [1]) $A_1$ omits here two *aksharas* without indicating the *lacuna*; C देङ्गपालगृहादस्मादारम्भः; perhaps read °गृहाभ्यर्णादारम्भः. १७३०. [1]) Thus A; C स समगृह्यत. १७३६. [1]) Emended with C; A राज्ञोपजी°. १७३७. [1]) Emended; A तेषां सन्यव°.—[2]) $A_1$ writes here ३ instead of तिलकम्. १७४२. [1]) Emended with C; A दीव्यन्तः. १७४९. [1]) चर्या supplied by $A_3$ in space left by $A_1$. १७५३. [1]) Emended; A न्यभा°.

तस्य प्रहरतः शूलं भिक्षुराश्रितवत्सलः । क्षिप्त्वापहस्तेनावेगात्केशाग्रमाह धावितः ॥१७५७॥
प्रजहार कृपाण्या च निर्यत्प्राणे पतिष्यति । तस्मिन्प्राहरतां[1] भूयस्तौ कुमारियरक्तिकौ ॥१७५८॥
निर्विभागैर्हते तस्मिन्विविधायुधवाहिभिः । विरोधियोधैः संनद्धैस्त्रयो युयुधिरेथ ते ॥१७५९॥
1760 अजायन्त विविक्ताश्च शस्त्रसंत्रासिताहिताः । कोटराजगरापास्तसरघौघा इव द्रुमाः ॥१७६०॥
अशक्नुवन्तस्तान्हन्तुं खड्गशूलादिभिर्द्विषः । अपसृत्य शरासारैस्ततो दूरादवाकिरन् ॥१७६१॥
भिक्षाचरमृगेन्द्रस्य भञ्जतः शरपञ्जरान् । ततो हर्म्यात्खशैर्मुक्ताः पुष्टाः पाषाणवृष्टयः ॥१७६२॥
धावतस्तस्य घोराश्मवृष्टिकुट्टितवर्ष्मणः । निममज्ज यकृत्पिण्डं भञ्जन्पार्श्वे शिलीमुखः ॥१७६३॥
क्रान्त्वा त्रीणि पदान्याशु स पपात दिशान्क्षितेः । ततश्चिरप्ररूढं तु कम्पं विद्विषतां हरन् ॥१७६४॥
1765 कुमारियोपि बाणेन विद्धवङ्क्षणवर्त्मना । व्रणितोप्यपतद्भर्तुः पादोपान्ते[2]ऽपजीवितः ॥१७६५॥
रक्तिकस्तु[1] शरेणैव विद्धो मर्मणि विह्वलः । सजीवितोपि निर्जीव इव भूमावुपाविशत् ॥१७६६॥
महाकुलीनैः सहितो हतो भिक्षुरशोभत । वज्रावभुग्नः शिखरी पुष्पितैरिव पादपैः ॥१७६७॥
इयतो राजचक्रस्य मध्ये हर्षनृपात्मनः । नावमानस्य मानस्य त्वभूद्भिक्षोः[1] परं पदम्[2] ॥१७६८॥
विधाता नित्यविधुरस्तेनान्तेप्यभिमानितः । अकुण्ठेन ध्रुवं चक्रे गृहीतात्मपराजयः ॥१७६९॥
1770 को वराको महर्द्धीनां सोग्रे पूर्वमहीभृताम् । उदात्तेनान्तकृत्येन[1] ते त्वस्याग्रे न किंचन ॥१७७०॥
अहोपुरुषिकाग्रस्तैरारोहद्भिर्द्विषद्भटैः । तदवस्थस्तदार्तोपि शत्र्वायुद्ध कुमारियः ॥१७७१॥
स्फुरन्योद्धव्यमित्येव स प्रहारावशस्तथा । विज्ञाततत्त्वैररिभिर्वितत्य बहुशो हतः ॥१७७२॥
विपन्नेस्मिश्चलं मूढाः प्रहारैरिति निन्दिताः । खशैः प्रजह्रुर्बहुशो हते भिक्षौ द्विषद्भटाः ॥१७७३॥
अविधेयायुधस्तीव्रव्रणवेदनयाधमैः । कैश्चिन्निर्जीवितप्रायो रक्तिकः शस्त्रिभिर्हतः ॥१७७४॥
1775 वयसस्त्रिशतिं वर्षान्नव मासांश्च भुक्तवान् । स षष्ठाब्दासितज्यैष्ठ[1]दशम्यां नृपतिर्हतः ॥१७७५॥
निदानं विप्लवे दीर्घे सर्वनाशेपि कारणम् । येषां बभूव तेप्येवं तुष्टुवुः सत्त्वविस्मिताः[1] ॥१७७६॥
नेत्रस्पन्दं भ्रुवोः कम्पं स्मेरास्यत्वं च नामुचत् । सजीवमिव तन्मुण्डं कियतीरपि नालिकाः ॥१७७७॥
एकं व्योम्न्यविशच्चित्रभानुं भूमौ पुनः परम् । तद्देहमप्सरःसङ्गं धराम्बु[1] च विदज्जडम् ॥१७७८॥
सचिवा विजयक्षेत्रस्थितस्याग्रे महीपतेः । तेषां त्रयाणां मुण्डानि ततोन्येद्युरुपाहरन् ॥१७७९॥
1780 श्रीसुधारत्नदन्त्यश्वशशाङ्कादिप्रकाशने । दृष्टचित्रस्वभावोब्धिर्यथायं पार्थिवस्तथा ॥१७८०॥
तत्र तत्राद्भुतं भावं दर्शयन्भुवनाद्भुतम् । परिच्छेद्यानुभावत्वं न केषामपि गच्छति ॥१७८१॥युग्मम्[1]॥
नादृप्यन्निहतोसाध्यः पितुर्मे योप्यभूदिति । न जहर्ष विनष्टोयं राजकण्टक इत्यपि ॥१७८२॥
नाकुप्यन्मत्पितु[1]र्मुण्डमेष भ्रमितवानिति । वीक्ष्य भिक्षोः शिरोव्याजभावौदार्य[2]स्त्वचिन्तयत् ॥१७८३॥ युग्मम्[3]॥
आकारस्यास्य संभाव्यं सत्त्वं न द्वेषवैकृतम् । वैशद्यं स्फटिकस्येव नार्कालोकोपतप्तता[1] ॥१७८४॥

---

१७५८. [1]) Emended; A प्रह°. १७६५. [2]) Emended; A पादोपान्तो. १७६६. [1]) Emended with C; A भक्तिकस्तु. १७६८. [1]) Thus A; C °त्मज:.—[2]) Perhaps read °द्भिक्षुः. १७७०. [1]) Thus A; R C °नात्तकृत्येन. १७७५. [1]) Emended with C; A ज्येष्ठ°. १७७६. [1]) Emended; A सत्त्वविस्मितः. १७७८. [1]) Emended; A धारा. १७८१. [1]) $A_1$ २. १७८३. [1]) Emended; $A_1$ had first written नाकुप्यत्स पितु° and subsequently corrected this to नाकुप्यत्स्मत्पितु°.—[2]) Emended; $A_1$ °भावौ -- स्त्वचि°, writing in margin भावाशय; R G C °भावाशयस्त्व°. Cf. अव्याजौदार्यचर्यस्य iii. 308.—[3]) $A_1$ २. १७८४. [1]) Emended; A °तप्ततम.

उत्कर्षात्प्रभृति व्यक्तममुं यावन्महीभुजम् । हा धिक्स्वमृत्युना दृष्टं नेह देहविसर्जनम् ॥१७८५॥ 1785
प्रसादवित्ता येप्यासन्पूर्वमस्योर्वराभुजः । तटस्था इव वीक्षन्ते तेद्य मुण्डावशेषताम् ॥१७८६॥
इति क्षितीशोसामान्यसौजन्योन्तर्विचारयन् । आदिदेश रिपोः शीघ्रं तादृशस्यान्तसत्क्रियाम् ॥१७८७॥
निद्राच्छेदे च निशि च[1] ध्यायंस्तस्योदयात्ययौ[2] । भवस्वभाववैचित्र्यं मुहुर्मुहुरचिन्तयत् ॥१७८८॥
अपि वर्षसहस्रेण देशे दायाददुःस्थितिः । नूनं न भविता भूय इति लोकोप्यमन्यत ॥१७८९॥
दग्ध्वा तृणं तनु घनं प्रतनोति शष्पं वृष्टिं सृजत्युपचितोष्म दिनं[1] प्रदर्श्य ।
वैचित्र्यसंस्पृशि विधेर्नियमेन कृत्ये न प्रत्ययः क्वचन चञ्चलनिश्चयस्य ॥१७९०॥ 1790
कृत्यं निर्वर्त्य विश्रान्त्यै धीरस्याबध्नतो मनः । विधिर्विधत्ते दीर्घान्यकार्यभारसमर्पणम् ॥१७९१ ॥
आरोढुं प्रथमस्य दीर्घदमनं[1]प्रत्तक्रमस्याङ्घ्रिणा नो संत्यज्यत एव पादकटको यावद्द्वितीयोखिलः ।
वाहस्यासनरक्षिणः कलयतो भारावतारात्सुखान्यारोहेण परेण तावदसहाधिष्ठीयते पृष्ठभूः ॥१७९२॥
एवमेव क्षपामात्रं राज्ये निःशत्रुतां गते । शोकमूको नृपस्याग्रं प्राविशल्लेखहारकः ॥१७९३॥
पृष्टः सभ्यैः स संभ्रान्तैर्यस्मिन्नेवाह्नि भूपतेः । यातो भिक्षाचरः शान्तिमरातिर्दत्तदुःस्थितिः ॥१७९४॥
भ्रातरौ लोहरगिरौ बद्धौ द्वैमातुरौ पुरा । न्यस्तौ सुस्सलभूपेन यौ तौ सल्हंण[1]लोठनौ ॥१७९५॥ 1795
ज्येष्ठे मृते कोट्टभृत्यैः कनिष्ठं लोठनं हठात् । तमिहाद्य त्रियामायामभिषिक्तमभाषत ॥१७९६॥
सुतभ्रातृसुतैर्दृप्तै राज्यार्हैः सह पञ्चभिः । निर्यातं बन्धनादूचे कोशेषु स तमीश्वरम् ॥१७९७॥
दूयेत मुह्येदाक्रन्देत्प्रसारितभुजः पतेत् । स्वप्याद्विसूत्रो निःस्पन्ददृक्त्वं गच्छेदथ ध्रुवम् ॥१७९८॥
दीर्घदौःस्थ्यशमक्षिप्रमृदूकृतमना नृपः । असौ तत्कालनिपतद्दुर्वार्तावज्रचूर्णितः ॥१७९९॥
इति संभाव्य दिक्पालैरपि साकूतमीक्षितः । नाकाराचारचेष्टाभिः प्रागवस्थां जहौ नृपः ॥१८००॥ 1800
न ह्यनन्याभिभूतेन सर्वतोसह्यवर्तिना । तादृशा वैशसेनान्यः सृष्टपूर्वो हि भूपतिः ॥१८०१॥
पित्रास्य यद्बलान्नष्टं राज्यं भूयः प्रसाधितम् । अनेनापि हताराति विहितं पैतृकं पदम् ॥१८०२॥
हारितौ दुर्गकोशौ[1] तौ नष्टनामापि दारकः । दायादशेषो यत्रैको निर्धनो वीतबान्धवः ॥१८०३॥
धनमानान्तकृद्भूरिवर्षान्व्यसनमादधे । उपप्लवप्रिये देशे तत्रैकस्मिन्हतेहिते ॥१८०४॥
मित्रदुर्गार्थसंपन्नाः प्रोद्भूताः षड्विरोधिनः । भिन्नप्रकृतिकं कोशशून्यमेतच्च[1] मण्डलम् ॥१८०५॥ 1805
तादृङ्निकषनिस्तीर्णमाहात्म्यस्य महीपतेः । धैर्येण स्पर्धितुं जाने राघवोपि सलाघवः ॥१८०६॥
प्राक्पोषितं हि साम्राज्यदाने निर्वासने च तम् । तुल्यानुभावमस्मार्षीत्पितैवं गणयन्गुणान् ॥१८०७॥
आहूतस्याभिषेकाय विसृष्टस्य वनाय वा । न मया लक्षितस्तस्य स्वल्पोप्याकारविप्लवः ॥१८०८॥
कान्तेषु काननान्तेषु सकान्तं सानुजं च तम् । भूयः श्रियं प्रतिश्रुत्य स्थातुं सावधि सोभ्यधात् ॥१८०९॥
एकक्षणानुभूतेस्मिन्संघट्टे सुखदुःखयोः । ईदृक्तत्तद्दशाभेदादनयोरन्तरं महत् ॥१८१०॥ 1810
नियतं निरुपादानां शक्तिं दर्शयितुं जने । नानोपकरणग्रामं संनद्धोस्याच्छिनद्विधिः ॥१८११॥

---

१७८८. [1]) च omitted in A; supplemented with C.—[2]) Emended with C; A °यान्ययौ. १७९०. [1]) Thus corr. by $A_1$ from °तोष्म चिरं. १७९२. [1]) Emended; A दीर्घमदन°. १७९५. [1]) Emended; A सुल्हण°. १८०३. [1]) A °कोषौ. १८०५. [1]) Emended; A °मेतं च.

अत्यद्भुतानि कृत्यानि वक्ष्यमाणानि भूपतेः । कोमुष्य बहु मन्येत सामग्र्ये सति संपदाम् ||१८१२||

धैर्याब्धिना कार्यशेषं ज्ञातुं राज्ञा सविस्तरम् । पृष्टोथ कोट्ट[1]वृत्तान्तमाचख्यौ लेखहारकः ||१८१३||

उत्सृज्य भागिके कोट्टं प्रयाते मण्डलेश्वरः । लुप्तोद्योगोभवद्गुप्तो प्रेमा संपत्प्रमत्तधीः ||१८१४||

1815 मण्डनाभ्यवहारस्त्रीभोगैकाग्रो मदोग्रया । स वृत्त्या भृत्यवैमुख्याधात्र्याभव्यं व्यवाहरत् ||१८१५||

कुल्यानुकम्पिना दृष्टचुत्पाट[1]नादेः स वारितः । देवेन[2] नादाद्बद्धानां कांचिद्रक्षाक्षमां क्रियाम् ||१८१६||

मायाव्युदयनो नाम कायस्थः स्थूलवाञ्छितः । माजिकश्च प्रतीहारो बद्धमूलस्य मन्त्रिणः ||१८१७||

पुत्रो भीमाकरस्येन्दाकरश्चात्रान्तरे समम् । दुधुक्षवस्तत्र तत्र वधं प्रेम्णो व्यचिन्तयन्[1] ||१८१८||

अलब्धो हन्तुमप्राप्तावसरैस्तैः कदाचन । कोट्टादट्टालिकां कार्यवशादवरुरोह सः ||१८१९||

1820 कश्मीरेभ्यो नृपेणाल्पावशेषप्राणवृत्तिना । प्रैषि शासनमेतादृगिति प्रत्ययसिद्धये ||१८२०||

कोट्टौकसामशेषाणां गूढलेखान्विधाय ते । निबद्धसंविदः पूर्वमभिषेच्यस्य भार्यया ||१८२१||

दृष्ट्वा दुर्गान्निर्निगडं कृत्वा च निशि लोठनम् । सिंहराजस्वामिविष्णुप्रासादाग्रेभ्यषेचयन्[1] ||१८२२|| तिलकम्[2] ||

शरदाख्या वधूरेका कापि सुस्सलभूपतेः । तत्र स्थिताभवत्क्षुद्रा तेषामनुमतप्रदा ||१८२३||

तदर्पितैरयोयन्त्रभञ्जनैरर्गलानि ते । कोशान्निवार्य पर्याप्तं कोशरत्नादि जह्रिरे ||१८२४||

1825 सभृत्यैः सप्तभिस्तत्तत्साहसं सुमहत्कृतम् । दानेन त्याजिता या सा[1] चण्डालैः प्रतिकूलता ||१८२५||

भेरीतूर्यादिनिर्घोषैर्निर्निद्राः कोट्टवासिनः । कृता राजोचिताकल्पमपश्यन्नथ लोठनम् ||१८२६||

अदृष्टपूर्वतादृक्षोदात्तवेषः स विस्मयम् । निन्ये जनान्नृपामात्ययोगो दीपैः प्रकाशितः ||१८२७||

प्रेम्णः पार्श्वस्थितस्ताभ्यामानयेद्वारकोन्तिकम् । ससैन्यौ स्वभुवश्चर्मपासिकाख्यौ च ठक्कुरौ ||१८२८||

तदास्थयाहितास्कन्दभङ्गस्तेषामशेषतः । रात्रिशेषश्च चन्द्रांशुस्पर्शपाण्डुरशीर्यत ||१८२९||

1830 प्रातः प्रेमाथ दुर्वार्ताश्रवणेनोष्णदारुणः । संताप्यमानश्चोष्णांशुकरै रोद्धुमुपाययौ ||१८३०||

तं प्रतोलीतलप्राप्तं निर्यातैर्वैरिसैनिकैः । पराङ्मुखीकृतं वीक्ष्य चलितोस्म्यन्तिकं प्रभोः ||१८३१||

श्रुत्वेति भूभृत्त्वरया लुल्लं लोहरमन्त्रिणम् । विससर्जोदयद्वारपतिमानन्दवर्धनम् ||१८३२||

भूमिज्ञौ तौ हि कोट्टस्य विवेदानन्यदेशजौ । सोल्पान्नत्वादिरन्ध्राणां लक्षणाद्ग्रहणक्षमौ ||१८३३||

प्रविष्टश्च पुरं दृष्ट्वा प्रीतिदायार्थिभिः शिरः । भ्राम्यमाणं भटैर्भिक्षोराक्षिप्यैतानदाहयत् ||१८३४||

1835 राजादेशादसंरुद्धैः स्त्रीभूयिष्ठैरसौ जनैः । नप्ता पैतामहे देशे दह्यमानोन्वशोच्यत ||१८३५||

काले ग्रीष्मोदयोद्रिक्तभानौ सुविषमे नृपः । सिद्धिमश्रद्दधानोपि प्रहिणोति स्म रिल्हणम् ||१८३६||

स शौर्य[1]स्वामिभक्त्यर्थनैस्पृह्यादिगुणोज्ज्वलः । तेन ह्यमोघप्रारम्भः समभावि जिगीषुणा ||१८३७||

भवितव्यतया दत्तव्यामोहः प्रेरितोथ वा । शठामात्यैरभूद्भूभृत्स व्यक्तायुक्तमन्त्रितः ||१८३८||

हीनोर्थदुर्गामात्यैर्यन्निर्विक्रमव्यस्य वैरिणः । अनुमेने कृतारब्धीन्भृत्यान्ग्रीष्मोल्बणे क्षणे ||१८३९||

1840 उदयः कम्पनाधीशो राज्ञोग्रे पर्यशिष्यत । सर्वामात्याः प्रतीहारमन्वगच्छन्पुनः परे ||१८४०||

---

१८१३. [1]) A कोट°. १८१६. [1]) Emended with C; A दृष्टचुपात्पट°.—[2]) Emended with C; A देवेनादाद्ध° with haplography. १८१८. [1]) Emended; A °चिन्तयत्. १८२२. [1]) Emended; A °षेचयत्.—[2]) $A_1$ ३. १८२५. [1]) Emendation doubtful; A °तायामा. १८३७. [1]) Emended with C; A चौर्य°.

राजात्मजहयारोहडामरामात्यमिश्रया । दैर्घ्यं तत्सेनयावापि सर्वसामग्र्युदग्रया ॥१८४१॥
संवेष्टयन्नट्टलिकानिविष्टकटको दिशः । संग्रहीतुं प्रववृते सर्वोपायैर्विरोधिनः ॥१८४२॥
लुल्लादयः फुल्लपुरे कोट्टोपान्ताश्रये स्थिताः । भयभेदाहवव्यग्रान्प्रकम्पमनयन्रिपून् ॥१८४३॥
सुस्सलक्ष्मापतिर्बद्धे लोठने तत्सुतामदात् । यस्मै प्राक्पद्मलेखाख्यां बहुस्थलधराभुजे ॥१८४४॥
साहायकाय प्राप्तस्य तस्य सैन्यैर्द्विषच्चमूः । शूराभिधस्य युद्धेषु प्रत्यग्राहि प्रतिक्षणम् ॥१८४५॥ 1845
तेषूपरुद्धराष्ट्रेषु भयदोलायमानधीः । अङ्गीचक्रे नरपतेर्नतिं दण्डं च लोठनः ॥१८४६॥
एतावत्सिद्धमफलारब्धीनामत्र दुःसहे । काले व्यावृत्तिरस्माकमुचितास्मिन्नलाघवा ॥१८४७॥
शारदारम्भसुभगे क्रमात्काले बलोर्जिताः । अथारब्धिं विधास्यामः सर्वारम्भेण शोभनाम् ॥१८४८॥
इत्यन्वहं लक्ष्मकेण प्रहितं नादधे नृपः । अन्ये च मन्त्रिणो मन्त्रं शाद्यादभ्यर्णवर्तिनः ॥१८४९॥ तिलकम् ॥
सर्वाधिकार्युदयनः प्रतिश्रुत्य धनं बहु । साहायकार्थमानिन्ये सोमपालमपि प्रभोः ॥१८५०॥ 1850
अपाङ्क्तेयः स संबन्धबद्धोपि धनलुब्धधीः । द्रुह्यति स्म महाव्यापन्निमग्नाय महीभुजे ॥१८५१॥
बह्वर्थदो लोठनश्चेत्किं मे संबन्ध्यपेक्षया । अन्यथा भवतामस्मीत्यन्यान्वक्ष्यामि कैतवात् ॥१८५२॥
दम्भमित्यभिसंधाय सोमपालोभ्युपाययौ । समर्थने हेतुरासीत्सुज्जेर्व्याजे क्रियानपि ॥१८५३॥ युग्मम् ॥
स हि भिक्षाचरान्मुख्यान्निवार्यानायितो यदा । सोमपालमुखेनोर्वीभुजा राजविसर्जितः ॥१८५४॥
दूतः प्रार्थयमानस्य तस्यार्थान्प्राक्प्रतिश्रुतान् । ऋणिकस्योत्तमर्णेभ्यः प्रदातुमनुबध्नतः ॥१८५५॥ 1855
तदा भिक्षाचरं जानन्हतकल्पमनेन नः । व्यसनप्रशमे कोर्थ इत्यवज्ञां प्रकाशयन् ॥१८५६॥
मदेन न ददौ किंचित्सोथ भिक्षाचरं हतम् । श्रुत्वा निरुपयोगं स्वं राज्ञो ज्ञात्वा सशोकताम् ॥१८५७॥
यावदेकाहमभजल्लोहरव्यसने भयम् । तावन्निशम्य संप्राप्तोत्सेको भूयोपि मन्युभाक् ॥१८५८॥
लोठनं बद्धसंधिं वः करिष्यामीति भूभुजः । उक्त्वा दूतं लोठनेन दापयिष्यामि काञ्चनम् ॥१८५९॥
युष्मभ्यं कथयित्वेति सोमपालं चिकीर्षितुम् । बलितामबलत्वं च सर्वेषां स्वार्थसिद्धये ॥१८६०॥ 1860
समं सोमेन तत्सैन्यमध्यप्रस्थित्यलक्षितैः । मितैरनुगतो भृत्यैर्घोरमूलकमासदत् ॥१८६१॥ कुलकम् ॥
यद्वानौचित्यदुष्पांसुवर्षदूषितकीर्तिना । भोगलुब्धतया तेन हता विततसत्त्वता ॥१८६२॥
तुषारशर्कराशुक्लजलपानाददुर्जरम् । त्यक्तुं भोज्यं मृदु स्निग्धं काश्मीरं न शशाक सः ॥१८६३॥
सतुषं शुष्कसक्त्वादि बहिर्भोक्तुमपारयन् । यैस्तैरुपायैः कश्मीरान्प्रविविक्षुरतोभवत् ॥१८६४॥
काश्मीरिकाः कार्यशेषमदृष्ट्वा ग्रीष्मशोषिताः । आकर्ण्य च तदापातमाकुलत्वमशिश्रियन् ॥१८६५॥ 1865
भुञ्जानैर्भृष्टमांसानि पिबद्भिः पुष्पगन्धि च । प्रतीहाराग्रतो हारि मार्द्वीकं लघु शीतलम् ॥१८६६॥
आनेष्यामो जवात्सुज्जिमाकृष्य श्मश्रु संयुगे । इत्थं विकत्थनैस्तैस्तैराहोपुरुषिकाः कृताः ॥१८६७॥
काश्मीरकैर्मितैर्युक्तं खशैः सैन्धवकैरपि । अभिषेणयितुं शेकुर्न तेत्युद्यमिनोपि तम् ॥१८६८॥
भ्रातृव्याय च मुख्याय भूभुजां च करार्पणम् । विदध्यां जयसिंहाय वरमित्यभिमानिनाम् ॥१८६९॥

---

१८४१. [1]) Emended with C; A सर्वे. १८४२. [1]) Emended; A सर्वोपायावि°. १८४४. [1]) Emended; A °बद्धो. १८४७. [1]) Emended; A °लाघव; C °लाघवः. १८४९. [1]) Emended; A प्रत्य°.—[2]) $A_1$ ३. १८५२. [1]) Emended with C; A °स्मीत्यान्व°, with haplography. १८५३. [1]) $A_1$ २. १८५५. [1]) Emended; A °मानस्यार्थान्प्रा°, omitting two *aksharas*; C °मानस्य तानर्थान्प्र°. १८६१. [1]) Emended; A °मन्यप्र°. १८६५. [1]) Emended; A °शिश्रयन्. १८६६. [1]) A पिवद्भिः. १८६८. [1]) Emended; A तेप्युद्य°.

1870 बह्वर्थमर्थ्यमानेन लोठनेन तिरस्कृतः । सोमपालः प्रियं किंचिद्राजपक्षे न्यदर्शयत् ॥१८७०॥
मयि श्वशुरसैन्यानां व्यग्राणां वैरिविग्रहे । सज्जे हिताय त्वं रन्ध्रमन्विष्यसि किमाश्रितः ॥१८७१॥
इति निर्भर्त्सितस्तेन सुज्जिः स्वाहंक्रियोचितः । सर्वानुल्लङ्घ्य संनद्धो राजसैन्याग्रेऽभवत् ॥१८७२॥
जरटा[1]षाढसंजातशीतज्वरमहाभयः । वरूथिनीमथोत्थाप्य विदद्रौ निशि लक्ष्मकः ॥१८७३॥
विसृष्टदूताः कटकं नष्टं वक्तुं प्रभोर्द्रुतम् । केचिदन्वसरन्सुज्जिं सैन्िकास्ते जिघांसवः ॥१८७४॥
1875 पारेणैकेन भूपालसैन्यमन्येन वैरिणः । वर्त्मनः श्वभ्रदुर्गस्य तुल्यमेव प्रतस्थिरे ॥१८७५॥
शारम्बरपथं वैरिवश्यं त्यक्त्वा यियासवः । स्त्रोर्वी कालिनका[1]ख्येन संकटेन तदन्तिके ॥१८७६॥
तस्मिन्नहन्यस्खलिता वनिकावासनामनि । ग्रामे सैन्या न्यविक्षन्त[1] लोकैरुच्चावचैः समम् ॥१८७७॥ युग्मम्[2]॥
अनुप्रस्थायिनोऽभ्यर्णग्रामकेष्वपि बुब्रुडुः । भुक्त्वा पीत्वाथ ते निन्युर्निशार्धमकुतोभयाः ॥१८७८॥
अथापातं विद्विषद्भिः स्वस्य श्रावयितुं द्रुतम् । क्षोभभृत्सुज्जिरभ्येत्य तूर्यघोषमकारयत् ॥१८७९॥
1880 क्षणदाशेष एवाशु पलायां चक्रिरे ततः । तैस्तैः शैलपथैः सेना निरवष्टम्भनायकाः ॥१८८०॥
चित्राम्बराणि मुष्णद्भिः प्राक्ष्वेल्यज्यन्त मन्त्रिणः । भूप्रकम्पैर्गण्डशैला नाना[1]धातुद्रवैरिव ॥१८८१॥
लुण्ठ्यमानाश्वमूस्त्रातुं नादधे कश्चिदायुधम् । तदा तु येन वा तेन स्वात्मा नान्यस्तु[1] रक्षितः ॥१८८२॥
उत्प्लुत्य लङ्घयन्तोऽद्रीन्केऽपि शोणाधरांशुकाः । रक्तस्फिजो गतौ प्रापुर्मर्कटा इव पाटवम् ॥१८८३॥
केऽप्यम्बरपरित्यागविकचद्गौरविग्रहाः । हरितालशिलाखण्डा इव वातेरिता ययुः ॥१८८४॥
1885 भूलवेणुवनाकीर्णैः शैलैरकृशविग्रहाः । केऽपि श्वासोत्थपूत्काराः करिपोता इवाव्रजन् ॥१८८५॥
किं नामोदीरणैर्मन्त्री स नासीत्तत्र कश्चन । तिरश्चैव[1] विपर्यस्तधैर्यैर्येन पलायितम् ॥१८८६॥
भृत्यस्कन्धा[1]धिरूढोऽथ गच्छन्मूढः प्रधावितुम्[2] । प्रतीहारो द्विपद्योधैर्दूरात्कैश्चिद्व्यलोक्यत ॥१८८७॥
निरंशुकः स सूर्यांशुकचलत्केयूरकुण्डलः । प्रतिज्ञायानुसस्रे तैः सर्वप्राणप्रधावितैः ॥१८८८॥
अश्माहतेन भृत्येन त्यक्तः स्कन्धाद्भूपत्क्षतः । स निस्पन्दवपुस्तिष्ठंस्तैरग्राहि महाजवैः ॥१८८९॥
1890 नवबन्धनशोकार्तशारिकाकृश[1]विग्रहः । स ‑ल[2]गलिरिव व्यञ्जद्विषः[3] संकुचितेक्षणः ॥१८९०॥
बद्धस्य मे मानधनप्रहर्तुर्वैशसान्तरम् । इतोऽधिकं ध्रुवं सुज्जिर्विदध्यादिति चिन्तयन् ॥१८९१॥
स्कन्धेऽधिरोप्य निःशेषीकृतप्रावारभूषणः । नदद्भिः सोपहासं तैः सुज्जेरग्रं व्यनीयत ॥१८९२॥ तिलकम्[1]॥
प्रच्छाद्य सत्त्ववान्वक्त्रं सोंऽशुकेनैष नोऽर्चितः । बृहद्राज इवेत्युक्त्वा तस्मै स्वान्यंशुकान्यदात् ॥१८९३॥
प्रावारिताम्बरं कृत्वा हयारूढं च तं पुनः । धैर्येणायोजयत्स्निग्धैर्वचोभिः परिसान्त्वयन् ॥१८९४॥
1895 निर्लुण्ठिततुरंगासिकोशैः परिवृतः खशैः । ततो गृहीत्वा तं श्रीमान्सोमपालान्तिकं ययौ ॥१८९५॥
इमा व्योमाङ्गनाक्रीडत्तडित्तरलविभ्रमाः । भाग्यमेघानुयायिन्यः स्थायिन्यः कस्य संपदः ॥१८९६॥
आराधनधिया स्वैरं यस्याग्रेऽभोजि भृत्यवत् । गात्राणि कुङ्कुमालेपैरुपाचर्यन्त[1] च स्वयम् ॥१८९७॥

---

१८७३. [1]) Emended; A जरटा°. १८७६. [1]) नका written by $A_3$ in space left by $A_1$. १८७७. [1]) Emended; A न्यविक्ष्यन्त.—[2]) $A_1$ २. १८८१. [1]) Emended with C; A नानातुधातु°. १८८२. [1]) Conjectural reading; A स्वत्मनान्यस्तु. १८८६. [1]) Emended; A तिरश्चैर्य. १८८७. [1]) A °स्कन्दा°.—[2]) Thus corr. by $A_1$ from प्रधायितुम्. १८९०. [1]) A °कृषवि°.—[2]) Thus A without indicating the *lacuna*; perhaps read गल्गलिरिव.—[3]) Thus $A_1$, apparently corr. from व्यञ्जन्निषः; doubtful. १८९२. [1]) $A_1$ ३. १८९७. [1]) Emended with C; A °रुपचर्यन्त.

सोमपालादिभिः प्रह्वैः स मासैरेव पञ्चषैः । तेषामग्रे तथाभूतस्तिष्ठँल्लोकैर्व्यभाव्यत ॥१८९८॥
लुञ्जोपि पलितश्वेतोपान्तश्यामाननः परैः । वनौका इव बद्धोभूच्छोकमूको वनान्तरे ॥१८९९॥
अर्पितं सुज्जिना सोमपालः स्वीकृत्य लक्ष्मकम् । जानन्गृहीतान्कश्मीरान्निजराष्ट्रं न्यवर्तत ॥१९००॥ 1900
लोठनस्यान्तिकादेत्य स भूरैर्माञ्जिकादिभिः । प्रतिश्रुत्य प्रभूतार्थैः प्रतीहारमयाच्यत ॥१९०१॥
कश्मीरा हि प्रतीहारशिक्षापक्षानुयायिभिः । तदा न कैरमन्यन्त संप्राप्या डामराण्डजैः ॥१९०२॥
लुब्धेनापि[1] प्रतीहारायत्तं राष्ट्रं जिघृक्षुणा । भूरि चादित्सुना वित्तं राज्ञोकारि न तेन तत् ॥१९०३॥
भग्नमानेष्वमात्येषु प्राप्तेषु नगरं नृपः । हारिते च प्रतीहारे न धैर्यात्पर्यहीयत ॥१९०४॥
यैः सैन्यसारैर्द्रैराज्यं पुरा भिक्षाचरोकरोत् । यैश्चाप्युत्कुपिते राष्ट्रे वृत्त्यावर्तिष्ट सुस्सलः ॥१९०५॥ 1905
भूभुता संगृहीतानां शीतज्वररुजा ततः । तेषां दश सहस्राणि योधानां निधनं ययुः ॥१९०६॥
विरराम तदा देशे न मुहूर्तमपि क्वचित् । बान्धवाक्रन्दतुमुलं प्रेतवाद्यमहर्निशम् ॥१९०७॥
घोरघर्मघृणिश्रान्ताशेषव्यवहृतिस्थितिः । सोनुत्साहहतः कालो नष्टराज्य इवाभवत् ॥१९०८॥
नानादिगन्तरायातैः प्राप्तैः काश्मीरकैरपि । लोहरेथ प्रवृद्धर्द्धि राजद्वारमजायत ॥१९०९॥
काकतालीयसंप्राप्तलोकोत्तरनृपश्रियः । अकुण्ठा लोठनस्यासीत्स्फूर्तिर्वित्तपतेरिव ॥१९१०॥ 1910
तस्याकारपरिक्लेशवैशसाभिन्नवृत्तयः । भोगेष्वबाह्या भ्रातृव्यभृत्यपुत्रादयोभवन् ॥१९११॥
नास्थानवर्षी स्थाने वा बद्धमुष्टिर्विभूतिमान् । स वयःपाकनिष्कर्मव्यवहारो व्यभाव्यत ॥१९१२॥
छाया निरङ्कुशगतिः स्वयमातपस्तु छायान्वितः शतश एव निजप्रसङ्गम् ।
दुःखं सुखेन पृथगेवमनन्तदुःखपीडानुवेधविधुरा तु सुखस्य वृत्तिः ॥१९१३॥
तादृगभ्युदयावाप्तेर्मासे न्यूनेधिके गते । एकसूनोः सुतो दिल्हो लोठनस्य व्यपद्यत ॥१९१४॥
तमेकपुत्रा शोचन्ती शोकशङ्कुहताशया । ततः प्रपेदे प्रलयं मल्ला लोठनवल्लभा ॥१९१५॥ 1915
पत्न्यामभिन्नभावायां गुणज्येष्ठे तथात्मजे । विपन्ने स तया लक्ष्म्या न कृत्यं किंचिदैक्षत ॥१९१६॥
निःस्नेहत्वस्य भूपालसुलभस्य विजृम्भितम् । मोहनी वा श्रियः शक्तिर्यदज्ञासीत्पुनः सुखम् ॥१९१७॥
अकारयन्निर्धनोपि तथा वृद्धस्य कालवित् । लक्षैः षट्त्रिंशता मोक्षं लक्ष्मकस्य क्षमापतिः ॥१९१८॥
दिष्टवृद्धिपरिक्षिप्तपुष्पवृष्टौ जनैः पथि । तस्मिन्प्राप्ते न कोज्ञासीद्राज्ञा प्रत्याहृतां श्रियम् ॥१९१९॥
स लक्ष्मीमहिमक्षिप्रविस्मृताभिभवप्रथः । प्रभवन्पुनरेवासीन्निग्रहानुग्रहक्षमः ॥१९२०॥ 1920
धनप्रलोभनिर्नष्टसर्वावष्टम्भपाटवः[1] । सुज्जिः साचिव्यमव्याजं भेजे लोठनभूपतेः ॥१९२१॥
दत्तवान्भागिकसुतामविश्वासमपाहरत् । स तस्याद्यप्रियापायदुःस्थितिव्यथया समम् ॥१९२२॥
अभ्यर्थ्य पार्थिवं पद्मरथं चानीतवान्कृती । तस्य सोमलदेव्याख्यामुद्वाहाय तदात्मजाम् ॥१९२३॥
एवं प्रधानसंबन्धैर्बद्धमूलं विधाय तम् । सोव्याहतस्य साचिव्यग्रहस्यानृण्यमाययौ ॥१९२४॥
अचिन्तयच्च कश्मीरप्रवेशं डामरादिभिः । बहुशः प्रार्थ्यमानेन प्रेरितो नवभूभुजा ॥१९२५॥ 1925
इत्थंभूतं कृतैक्यं च समं सीमान्तभूमिपैः । अथ छलयितुं शत्रुं नीतिं प्रायुङ्क्त सौस्सलिः ॥१९२६॥

१९०३. [1]) Emended, A लब्धेन. १९२१. [1]) व omitted in A; supplied with C.

तत्रोदयद्वारपतिस्तस्यारम्भे गभीरधीः । अलुप्तसत्त्वः स्तुत्यत्वं सारेतरविदामगात् ॥१९२७॥
तत्रत्यः स हि निर्नष्टसर्वस्वोऽप्यर्थितोऽहितैः । दानमानादिभिः स्वामिकृत्ये नित्योदितो[1]ऽभवत् ॥१९२८॥
वनप्रस्थाभिधे स्थाने लोहरादूरगे स्थितः । अखिन्नोच्छिन्नसंग्रामैर्भेदं निन्ये द्विषद्बलम् ॥१९२९॥
1930 कटाक्षिताभिप्रायेऽस्मिन्मिथ्या तथ्येन वा दधुः । भयं लोठनभूपालान्माञ्जिकेन्दारका[1]दयः ॥१९३०॥
हन्तव्यांश्चाक्रिकानस्मान्सुज्जौ न्यस्ताशयो नृपः । वेत्ति तत्प्रेरणेनासौ तदाशङ्कितेति ते ॥१९३१॥
संजातं सहजाख्यायां राज्ञ्यां सुस्सलभूपतेः । कुर्मो मल्लार्जुनं भूपं लोहरेऽस्मिन्हिताय वः ॥१९३२॥
तत्प्रेमाणमिवाकस्मादभिसंधत्त[1] लोठनम् । संदिदेशाथ तान्धीमाञ्जयसिंहो महीपतिः ॥१९३३॥
व्याजेन राज्ञा संदिष्टं तत्कोट्टं स्वीचिकीर्षुणा । प्रतिश्रुतमविश्वस्तैस्तस्मिंस्तैश्च तथैव तत् ॥१९३४॥
1935 मल्लार्जुनं लोठनोऽथ ज्ञात्वा प्रारब्धचाक्रिकम् । तदाद्यान्भ्रातृसूनूंस्तांश्चाक्रिकानप्यबन्धयत् ॥१९३५॥
अवरुद्धातनू[1]जेन शङ्कां सौस्सलिना भजन् । परं विग्रहराजेन प्रातिहार्यमजिग्रहत् ॥१९३६॥
राजा व्याजात्पितृव्येण बद्धसंधिरुपायवित् । तत्वरे हारितं राज्यं तैस्तैः स्वीकर्तुमुद्यमैः ॥१९३७॥
विसृज्य शूरं निष्कम्पराज्यः सुज्जेः परिश्रमात् । मासान्कांश्चिदसंक्षोभो वृत्त्यावार्तिष्ट लोठनः ॥१९३८॥
सुज्जिः पद्मरथापत्यं प्राक्कन्यामानिनाय याम् । अनूढाया विवाहाय तस्यां[1] मातरमागताम् ॥१९३९॥
1940 आकर्ण्य तेजलादीनां[1] प्रसङ्गेऽस्मिन्सगौरवाम् । सामात्यो[2] दर्पितपुरं कृतप्रत्युद्गतो ययौ ॥१९४०॥
माञ्जिकाद्यैरथ प्राप्तरन्ध्रैर्निर्गत्य बन्धनात् । मल्लार्जुनः कोट्ट[1]राज्ये संहतैरभ्यषिच्यत ॥१९४१॥
ठक्कुरैः प्राग्वदानीतैः प्रतोलीतलमागतान् । भृत्यांस्ते सिंहभूभर्तुः प्रविविक्षून्व्यवारयन्[1] ॥१९४२॥
षष्ठेऽब्दे लोठनः शुक्लत्रयोदश्यां स फाल्गुने[1] । यथायुज्यत राज्येन तथैवाशु व्ययुज्यत ॥१९४३॥
अनूढां कन्यकां मूढः संपदं चाव्ययीकृताम् । प्राप्तां परस्य भोग्यत्वं भाग्यहीनः शुशोच सः ॥१९४४॥
1945 अटित्वाट्टालिका[1]दिभ्यो देशेभ्यो नष्टशक्तिना । तेन सुज्जिबलात्कोशशेषः कश्चिदवाप्यत ॥१९४५॥
पूर्वाहृतान्सिंहभूभृद्भृत्यान्न्यक्कृत्य माञ्जिकः । निनायाप्रतिमल्लत्वं मल्लार्जुनमहीभुजम् ॥१९४६॥
तेनातिव्ययिना नव्यवयसा भूभुजा कृतम् । मौक्तिकैः पूगविच्छेदे ताम्बूलार्पणमेकदा ॥१९४७॥
वर्षतो विषयौत्सुक्याद्धाटकं कुट्टनादिषु । त्यागित्वं तस्य तत्त्वज्ञैः सदोषमुदघोष्यत ॥१९४८॥
प्रजोपतापोपचितः कोशः सुस्सलभूपतेः । तेनातिव्ययिना स्वैरमनुरूपव्ययः कृतः ॥१९४९॥
1950 गणिकाचारणद्रोग्धृविटचेटादिपेटकम् । साधून्विधूय सोपुष्णाद्दर्पो[1]ष्णः कु[2]मतिर्यतः ॥१९५०॥
सपत्नसादहितसाद्यदि वा वह्निसाद्भवेत् । द्रविणं क्षोणिपालानां जनतोपद्रवार्जितम् ॥१९५१॥
प्रजापीडनजं वित्तं जयापीडमहीभुजः । दास्याः पुत्रैरुत्पलाद्यैर्विलुप्तं नप्तुरन्तकैः[1] ॥१९५२॥
लोकसंक्लेशनोद्भूतः कोशः शंकरवर्मणः । प्रभाकरादिभिः स्वैरं जायाजारैरभुज्यत ॥१९५३॥

---

१९२८. [1]) Thus A; perhaps read नित्योद्यतो°. १९३०. [1]) Thus corr. by $A_1$ from °केन्दाकारयः. Perhaps read °केन्द्राकरा°; cf. viii. 1818. १९३३. [1]) Emended with C; A °सन्धात्त. १९३६. [1]) Emended; A अवरुद्धतनू°. १९३९. [1]) Emended with C; A तस्य. १९४०. [1]) Thus A; doubtful.—[2]) Doubtful emendation; A सामान्यों. १९४१. [1]) Emended; A कोष्टराज्ये. १९४२. [1]) Emended A °वारयत्. १९४३. [1]) A फाल्गुणे. १९४५. [1]) Thus $A_1$; $A_2$ °त्वाटि-लिका°; cf. viii. 581. १९५०. [1]) Thus $A_1$ in margin; in text °ष्णाद्धर्नोष्णः.—[2]) Thus corr. by $A_1$ from कुपति°. १९५२. [1]) Emended with C; $A_1$ नप्तुरन्तकैः; the reading नप्तृनर्तकैः, given by $A_2$ in margin, has been struck out.

अनङ्गवशगाः पङ्गोरङ्गना वृजिनार्जितम् । ददुः सुगन्धादित्याय धनं संभोगभागिने ॥१९५४॥
राज्ञो यशस्करस्यार्थान्व्ययीचक्रेतिसंचितान् । अङ्गनानङ्गवैवश्यादालिङ्गितजनंगमा ॥१९५५॥ 1955
पूर्वराजार्जितं पार्वगुप्तिः प्राप्य धनं मृतः । दाता जायौपपत्येन तुङ्गादीनामजायत ॥१९५६॥
संग्रामराजः श्रीलेखामुखाब्जमधुपैर्धनी । मुषितो व्यड्डसूहाद्यैर्निबिडोपार्जनस्पृहः ॥१९५७॥
अप्रत्यवेक्षाक्षपितप्रजस्य जगदूर्जिता । अन्तेनन्तमहीभर्तुर्विभूतिर्भस्मसादभूत् ॥१९५८॥
पुत्रेणापात्रसान्नार्या जारसात्तरसा कृतः । कुकलाकौशलोद्भूतः कोशः कलशभूपतेः ॥१९५९॥
सह गेहैः समं स्त्रीभिः सत्रा पुत्रैरभूद्धनम् । अश्रान्तार्जनतर्षस्य हर्षदेवस्य वह्निसात् ॥१९६०॥ 1960
चन्द्रापीडोच्चलावन्तिवर्माद्यैर्धर्मनिष्ठुरैः । निष्ठा न्याय्यस्य कोशस्य नावाप्यनुचिता क्वचित् ॥१९६१॥
चौरचाक्रिकसीमान्तभूभृद्वेश्याविटादयः । लुण्ठि प्रारेभिरे पुष्टां नवे मल्लार्जुनोदये ॥१९६२॥
वञ्चयित्वाप्यरीन्भूभृत्ताम्यन्विघटितेप्सितः । अथ चित्ररथं तूर्णमास्कन्दाय व्यसर्जयत् ॥१९६३॥
द्वारपादाग्रयोस्तुल्याधीकारेण प्रवर्धितः । सोनन्तसामन्तयुतः पदं फुल्लपुरे व्यधात् ॥१९६४॥
उत्सेहिरे न वितता अपि दुर्गसमाश्रयात् । मल्लार्जुनचमूर्जन्ये जेतुं तदनुजीविनः ॥१९६५॥ 1965
भेदाय कोट्टमारूढस्तद्भृत्यो राजसंमतः । मल्लार्जुनानुगै रात्रौ हतः संवर्धनाभिधः ॥१९६६॥
युद्धासाध्येपि तिष्ठन्तः कोट्टे भयविधेयताम् । कोष्ठेश्वरेन्वगायाते तत्रामित्राः प्रपेदिरे ॥१९६७॥
प्रतिश्रुतकरो बद्धसंधिः स व्यसृजत्ततः । सभाजनाय जननीं तेषां मल्लार्जुनोन्तिकम् ॥१९६८॥
सा वैधव्यविविक्तेन वेषेणैश्वर्यशोभिना । कोष्ठेश्वरादीन्सोत्कण्ठांश्चक्रे चपलचेतसः ॥१९६९॥
तस्यां गृहीतविस्रम्भं व्यावृत्तायां तदन्तिकात् । द्वारेशाय ददावूरीकृतं मल्लार्जुनः करम् ॥१९७०॥ 1970
आकृष्टो राजजननीचक्षूरागेण कोष्ठकः । दिदृक्षाकपटात्कोट्टमारुरोह मितानुगः ॥१९७१॥
अर्वरूढेन सहितस्तेन चित्ररथस्ततः । संभूतप्राभृतो भूमिभर्तुः सविधमाययौ ॥१९७२॥
राजा तु संमन्त्र्य ततः प्रायुङ्क्ताहतिशालिना । उदयद्वारपतिना नीतिं जेतुमरीन्पुनः ॥१९७३॥
वीतास्कन्दो लोठनेपि गते पद्मरथान्तिकम् । लेभेभिनवभूपालः किंचित्पादप्रसारिकाम् ॥१९७४॥
उदूढवान्सोमलाख्यां तां पद्मरथकन्यकाम् । उपयेमे धृतायामो नागपालात्मजामपि ॥१९७५॥ 1975
तस्मादहंक्रियामूढाल्लेभिरे गूढकैतवाः । भूभुजः सोमपालाद्या भृत्यभावेन वेतनम् ॥१९७६॥
कविगायनजल्पाकयोधचारणचेष्टितैः । बहवो मुमुषुर्धूर्तास्तेपि तं राजबीजिनः ॥१९७७॥
स बाल्यान्निष्परीपाकप्रज्ञो दृष्टो रटन्बहु । जज्ञे वाक्प्रौढिमात्रेण बालिशैः कुशलाशयः ॥१९७८॥
केतोरिवाभद्रहेतोः प्रदीप्तं वदनं विना । अनिष्ठुराकृतेर्दृष्टं तस्यान्यत्र न सौष्ठवम् ॥१९७९॥
अत्रान्तरे नृपः सुज्जिं संजग्राहोग्रविक्रमम् । माभून्मल्लार्जुनेनापि श्रितोसाविति चिन्तयन् ॥१९८०॥ 1980
निर्वासने प्रवेशे च प्रभुः सुज्जेस्ततोधिकम् । तात्कालिकीं प्रतीहारः शक्तिं कांचिददर्शयत् ॥१९८१॥
स कम्पनाद्यधीकारस्रजं राजविसर्जिताम् । वितरन्सुज्जये राजस्थानकार्यस्रजं विना ॥१९८२॥
निस्तोषाय गृहायातसोमपालानुरोधतः । प्रसीदन्वामहस्तेन निजजूटस्रजं मदात् ॥१९८३॥

---

१९५९ [1]) A कोषः. १९६९. [1]) Emended; A वैधव्यं वि°.—[2]) Emended; A वेषेनैश्व°. १९७२. [1]) Emended; A अर्धरूढेन.
१९७८. [1]) A वालिशैः.

आकृष्य प्रददौ तस्य तत्प्राप्तिपरितोषिणः । आप्यायसान्द्रया दृष्ट्या यत्संपद्वीरुधो व्यधात् ॥१९८४॥ चक्कलकम्[1] ॥

1985 भर्त्रे हिताय सौहार्दं विधूयोदयधन्ययोः । अभजद्रिल्हणः सुज्जेः प्रवेशे प्रतिलोमताम् ॥१९८५॥

प्रत्युद्गमेन संमान्य सुज्जिं प्रावेशयन्नृपः । देशाच्चिरास्थद्धन्यादीन्मानसान्न तु तद्गिरा ॥१९८६॥

कृतागाः क्ष्मापतौ लब्धक्षणे तीक्ष्णैर्जिघांसति । कोष्टेश्वरः पलायिष्ट ज्ञातोदन्तस्तदन्तिकात् ॥१९८७॥

आस्कन्दायागते राज्ञि गृहीतमनुजेश्वरे । स्वपक्षभेदोपहतः सोथ देशान्तरं ययौ ॥१९८८॥

लोठनस्तु निजग्राह कांश्चिदालम्ब्य ठक्कुरान् । बप्पनीलाभिधे स्थाने वसन्मल्लार्जुनं बलात् ॥१९८९॥

1990 तत्र दृष्टमसंभाव्यमेवास्य खलु पौरुषम् । परिभ्रष्टोपि यद्भद्रपदं तमजयत्सदा ॥१९९०॥

जहार तुरगांल्लुण्ठिं चकाराट्टलिकापणे । मार्गद्रङ्गादिभङ्गं च – –[1] सर्वत्र सोकरोत् ॥१९९१॥

राजराजाभिधानेन डामरेणार्थितस्ततः । कश्मीरराज्यसंप्राप्त्यै क्रमशाज्यमगाहत ॥१९९२॥

तदवेत्य समीपस्थे हते चित्ररथेन सः । तस्मिंल्लवन्ये पययौ बप्पनीलभुवं पुनः ॥१९९३॥

तस्मिन्नास्कन्दमसकृद्ददत्यट्टलिकामपि । अवरोद्धुमशक्तोभूत्कोट्टे मल्लार्जुनो वसन्[1] ॥१९९४॥

1995 भ्रातृव्येण पितृव्यस्य दापयित्वा धनं बहु । ततः कोष्टेश्वरो यात्रासज्जः संधिं न्यबन्धयत् ॥१९९५॥

लोहरे विहितस्थैर्यो[1] गृहीत्वा लोठनं ततः । कश्मीरोर्व्यां पपातासौ विजिगीषुः[2] क्ष्माभुजा ॥१९९६॥

गिरीनुल्लङ्घ्य च कार्कोटद्रङ्गे विहितवान्पदम् । निपत्य मार्गेनुद्याते यावदन्यैश्च डामरैः ॥१९९७॥

नावाप योगं निर्गत्य क्षिप्रकारी क्षमापतिः । सर्वोद्योगेन तं तावदुत्थानोपहतं व्यधात् ॥१९९८॥

अत्रान्तरे प्रतीहारः प्रापास्तमपपीडया[1] । न संपत्स्वल्पपुण्यानामनपायित्वमायुषः ॥१९९९॥

उत्सारणप्रियतया परिरुद्धसर्वद्वारं गृहे निरनुरोधतया वसन्तः ।

2000 संपल्लघूकृतधियोप्रतिघप्रवृत्तेर्धिग्जानते न रभसान्नियतेर्निपातम् ॥२०००॥

कुर्वाणोत्सारणं तस्य गृहजा सततं नृणाम् । नाज्ञासीत्सुखसुप्तस्य पृष्ठे पतितमन्तिकम् ॥२००१॥

ज्वरितः स हि निश्च्युतज्वरः स्वपिति विज्वरः । विदित्वेति न विज्ञातः स्वपन्नेव मृतस्तदा ॥२००२॥

सलोठने कोष्टकेथ प्रयाते नृपतिः पुनः । न स मल्लार्जुनो नापि कोष्टको न स लोठनः ॥२००३॥

छद्मनोदयनं पार्श्वस्थितं मल्लार्जुनोवधीत् । तस्मै चुक्रोध माध्यस्थ्ये स्थापितस्तेन कोष्टकः ॥२००४॥

2005 अनुनिन्ये न तं खिन्नं स संभृतबलस्ततः । अभिषेणयितुं क्रोधादधावत्सहलोठनम् ॥२००५॥

कोष्टको मल्लकोष्टाद्यैर्मितैर्युक्तोपि सादिभिः । तीर्त्वा परोष्णीं तत्सेनां निर्ममाथाप्रमाथिनीम् ॥२००६॥

हतेषु तेषु संग्रामे खशसैन्धवकादिषु । वधं प्राप्तः सिंहभूभृद्द्वेषान्न स नृपो हतः ॥२००७॥

आरूढः कोट्टमूर्धानं मानमूर्धः परिच्युतः । भग्नप्रतापो भूयोपि समधत्त स कोष्टकम्[1] ॥२००८॥

विसृज्य लोठनं तिष्ठन्निर्वैरमगमत्पुनः । अनिर्वाहितदैन्येन तेन द्वैधं स डामरः ॥२००९॥

2010 बद्धाधिकारिणः शुल्कं गृह्णताकारि राजवत् । तेन स्वनाम्ना भाण्डेषु द्रङ्गे सिन्दूरमुद्रणम्[1] ॥२०१०॥

जतुसंहतयोः काचकलशीदलयोरिव । क्षणे क्षणे संधिभङ्गस्तयोः समुदपद्यत ॥२०११॥

---

१९८४. [1]) A₁ ४. १९९१. [1]) A₁ indicates here a *lacuna* of two *aksharas*; C जावा. १९९४. [1]) Emended; A °वसत्. १९९६. [1]) Emended; A °स्थैर्यं.— [2]) Emended with C; A °विजिगृक्षुः. १९९९. [1]) Emended with C; A °हारप्रापास्तमयपीडया. २००८. [1]) Emended with C; A कोष्टमू°. २०१०. [1]) Emended; A °मुद्रणाम्.

निर्व्यूढिशून्यैर्वाग्मौक्ष्यैर्विरागं लोहरेश्वरः । निन्ये लवन्यं सोप्येनं स्पर्धाबन्धैरनङ्कुशैः ॥२०१२॥

डामरेण ततो दत्त्वास्कन्दं तत्कटकान्तरम् । पराध्यायुधधुर्याश्वहरणात्सु–[1]रं कृतम् ॥२०१३॥

दत्त्वा द्व––[1]रायत्यां विषमैर्हठपौरुषैः । एवं तं कोष्ठको मूढः सुखोच्छेदं व्यधाद्विषाम् ॥२०१४॥

तनयादानसंबन्धाच्छ्वशुरं मुख्यमन्त्रिणाम् । अत्रान्तरे नृपो हन्तुं माज्जिकं स व्यचिन्तयत् ॥२०१५॥ 2015

आसीत्कठोरतारुण्यतरङ्गितमनोभवः । सुव्यक्तं स हि तन्मातुरौपपत्येन संमतः ॥२०१६॥

आहारावसरे तीक्ष्णाः कृतसंज्ञाः क्षमाभुजा । दत्तप्रहरणाः प्राणैर्भुञ्जानं तं व्ययोजयन् ॥२०१७॥

धुन्वन्नसिपटं बद्धवीरपट्टो रटन्बहु । निर्लुण्ठयन्स तत्सेनां तां तामारभटीं व्यधात् ॥२०१८॥

अवाशिष्यत न द्रोहमध्यादिन्दाकरोप्य[1]हो । राज्ञा विषमितस्तेन रसदानेन स स्वयम् ॥२०१९॥

दैवतोत्सारिताराातिस्ततः सिंहमहीपतिः । संदधे कोष्ठकं सुज्जिं प्राहिणोद्विजयाय च ॥२०२०॥ 2020

मार्गस्य याममात्रेण गम्यस्यान्तिकमाप सः । यावत्तुरंगहरणात्कोष्ठकेनाकुलीकृतः ॥२०२१॥

अन्तर्भेदाकुलस्तावत्प्रत्यवस्थातुमक्षमः । गृहीतकोशः संत्यज्य कोट्टं[1] मल्लार्जुनो ययौ ॥२०२२॥

राज्यभ्रष्टः स निर्लुण्ठ्यमानो मार्गेषु तस्करैः । अवनाहोन्मुखो रक्षन्कोशशेषं कथंचन ॥२०२३॥

अष्टमष्टादशशरद्देश्[1]यश्चाष्टमवत्सरे । राज्यात्तेन द्वितीयस्यां वैशाखस्यासिते[2]हनि ॥२०२४॥

दाता शिखामृतरुचेरमृतं विलब्ध––[1]ण्यकृत्समिति लूनशिराः कृतश्च ।

ईशेन यत्र तदकार्युपकर्तुरस्तु तत्रापरः क इव संनिहितद्विजिह्वः ॥२०२५॥ 2025

मुक्ता इमा इति जलं नलिनेषु लीनं ज्ञातृत्वमेतदिति जाड्यमिनेषु लग्नम् ।

यज्जायते किमपि हन्त विमोहनी सा शक्तिः श्रियः स्फुरति कापि तदाश्रयायाः ॥२०२६॥

घ्नन्त्यद्भुतप्रहरणा विपिनेषु केपि घ्राणेन केचन दृशाथ रसज्ञयान्ये ।

ते केपि सन्ति तु नरेन्द्रगृहेषु हिंस्रा वाचैव ये विरचयन्ति किलोपघातम् ॥२०२७॥

ज्योतीरसाश्मन इवाश्रितमीश्वरस्य निर्दग्धुमिन्धनमिवाग्रगतं न शक्ताः ।

पश्चाद्भवेद्यदि स तत्प्रसृतावकाशाः कुर्युः खला रविकरा इव भस्मशेषम् ॥२०२८॥

क्रापिलं हर्षटं कोट्टं नीतवान्मण्डलेशिताम् । उदयैः कोटभृत्यानां संग्रहं कम्पनाधिपः ॥२०२९॥

कुर्वञ्शय्यां पुनर्नेतुं मण्डलं तद्व्यलम्बत । दिनानि कतिचित्तत्र यावत्प्रकृतिदुर्जनैः ॥२०३०॥ 2030

विटैरसूयाविषमैः प्रसादावसरो नृपः । तावत्कलुषतां तस्मिन्[1]उपजापैरनीयत ॥२०३१॥ तिलकम्[2] ॥

राजा भवन्परः कोस्तु स्वविचारदृढक्रियः । एषोपि शिशुवद्भूद्यत्र धूर्तैः प्रनर्त्यते ॥२०३२॥

शैशवे बालि[1]शप्रायैः संस्तुतैर्जाड्यमर्पितम् । प्रौढावपि न वा यायाद्राज्ञः का[2]र्ष्ण्यं मणेरिव ॥२०३३॥

भृत्यान्तरापरिज्ञानमात्रेण जगतीभुजाम् । निरागसो वज्रपातः कष्टं राष्ट्रस्य जायते ॥२०३४॥

---

२०१३. [1]) $A_1$ indicates here a *lacuna* of one *akshara*; C सुस्थिरं. २०१४. [1]) Thus or त्व–– $A_1$; C दत्त्वाभयं तैरायत्यां. २०१९. [1]) Cf. viii. 1818. 1930. २०२२. [1]) Emended; A कोट्टे. २०२४. [1]) Thus A; text evidently corrupt; perhaps read °द्दृश्यस्याष्टम°.—[2]) Thus corr. by later hand from $A_1$ °स्याहितेहनि. २०२५. [1]) Thus $A_1$; C विलुब्धकार्पण्यकृ°; perhaps read विलुब्धकारुण्यकृ°. २०३१. [1]) $A_1$ writes here ४ instead of तिलकम् (?). २०३३. [1]) A वालि°.—[2]) Thus corr. by $A_3$ from $A_1$ काश्यं.

2035 कृत्ये व्यवसितेसाध्ये हास्यः स्याल्लक्ष्मकादिवत् । सुज्जिः प्रायोजि राजाप्तैर्निर्जेतुमिति लोहरम् ॥२०३५॥
निर्व्यूढाद्भुतकार्येथ तस्मिन्ब्रह्मास्त्रतुल्यया । अमोघया प्रजह्रुस्ते पापाः पैशुनविद्यया ॥२०३६॥
गाम्भीर्यालक्ष्यविकृतेः प्रीत्यालापैर्महीपतेः । प्रत्यायातः कलुषतां नाज्ञासीत्कम्पनापतिः ॥२०३७॥
प्रकृत्या तस्य निर्द्रोहतया शङ्कास्य तादृशम् । प्रियं कृतवतश्च स्यादविश्वासोथ वा कथम् ॥२०३८॥
प्रीतिरासीन्न नृपतेस्तत्कृत्यैरुचितैरपि । अप्रियप्रमदालापैर्विरक्तस्येव कामिनः ॥२०३९॥
2040 जित्वा राष्ट्रद्वयं प्रादां हारितं नृपतेरिति । बहुमानेन दर्पाच्च स्वच्छन्दं स व्यवाहरत् ॥२०४०॥
पौरानगारहरणाद्यपकारैर्निरङ्कुशाः । तद्बन्धवो बाधमाना विरागमनयञ्जनम् ॥ २०४१॥
निजागःस्मरणात्कोष्ठेश्वरी न व्यश्वसीन्नृपे । न पितृव्येपि भूपालकोपाविष्कृतविक्रिये ॥२०४२॥
कोशं प्रजोपतापेन संचिन्वन्सुज्जिना समम् । संबन्धकृच्चित्ररथो नाभूदभिमतः प्रभोः ॥२०४३॥
धन्योदयौ[1] नृपः सुज्जिदाक्षिण्यालक्ष्यसौहृदः । अपुष्णाद्द्रविणैर्गूढं राजपुर्यां[1] कृतस्थिती ॥२०४४॥
2045 तौ चावालगतौ[1] शीतज्वरनष्टपरिच्छदौ । मल्लार्जुनस्य साम्राज्यभ्रंशेपि विपुलश्रियः ॥२०४५॥
सुज्जिद्वेषात्पुरा दूतैराहूतो लक्ष्मकेण यः । आगच्छत्सज्ञपालः स प्राप राजपुरीं तदा ॥२०४६॥
सुज्जिचित्ररथाभ्यां तं रुद्धचेष्टेन भूभुजा । अविसृष्टप्रवेशाज्ञं दूतैर्मल्लार्जुनोभजत् ॥२०४७॥
तन्निमित्तं स केनापि सामन्तेन सहाध्वनि । संजातकलहे शस्त्रक्षतो लक्ष्म्या व्ययुज्यत ॥२०४८॥
तथाभूतमपि स्वर्णं भूर्युरीकृत्य नाशकत् । यत्तन्मल्लार्जुनो नेतुं कार्यज्ञैस्तदपूज्यत ॥२०४९॥
2050 सोस्वतन्त्रेण राज्ञा च सौजन्याद्रिल्हणेन च । दूतैः प्रच्छन्नमाहूतो रभसादाययौ ततः ॥२०५०॥
न न्यघ्नन्नत्र[1] चेद्धन्युर्मामम् अत्रेति चिन्तयन् । अमित्रविषमे मार्गे पुरं[2] साहसिकोविशत् ॥२०५१॥
स कन्यकुब्जगौडादिमण्डलेषु महीभुजाम् । स्पर्धया लब्धसत्कारो भूपतेर्मन्त्रियन्त्रिताम् ॥२०५२॥
अनवाप्य निजे देशे सत्क्रियां दुःखितोभवत् । राजधान्यन्तिकैः पौरैः प्रसृतश्रु व्यलोक्यत ॥२०५३॥
भूपालोगणयित्वाथ मन्त्रिणो दत्तदर्शनः । भेजे स्वहस्तताम्बूलदानप्रक्रिययैव तम् ॥२०५४॥
2055 निष्किंचनोपि सन्ख्यातिमात्रेणानुगतो जनैः । यातायातं नृपगृहे कुर्वञ्शत्रूनकम्पयत् ॥२०५५॥
व्याहारव्यवहारादि व्यालोक्यालौकिकाकृतेः । पुरुषान्तरवित्सुज्जिस्तस्य स्वैरमवेपत ॥२०५६॥
दध्यौ सोथ ध्रुवं राष्ट्रखर्वसर्वंकषक्रियम् । नैवमेवाद्भुतं भूतमेतादृक्शान्तिमेष्यति ॥२०५७॥
तांस्तान्देशान्तरे वीरानुत्सिक्तान्दृष्टवान्स च । तं पर्यालोच्य विश्रान्तिं सोत्सेकानाममन्यत ॥२०५८॥
भवितव्यतया दर्पेणाथ नीतः स्वतन्त्रताम् । परिवादावहं सुज्जिस्ततो यत्तद्व्यवाहरत् ॥२०५९॥
2060 स्वानुगैर्लुण्ठितं रूक्षमाचक्षाणं रुषा द्विजम् । प्रासैर्मडवराज्यस्थः स सृगालमिवावधीत् ॥२०६०॥
बाह्ये कुकर्मणा तेन विप्लाव्य जनमागतम् । तं प्रत्युग्रक्रियं लोको विरागं नगरेष्यगात् ॥२०६१॥
अत्रान्तरे बन्धुमेकं व्यधुः कमलियादयः । अगण्यप्रायमुत्सेकादुत्तमप्रक्रियास्पदम् ॥२०६२॥
मयि सत्यपरोपि स्यात्किमनुग्राहकः स्मयात् । अकारि चारणप्रायस्तादृक्कोपीति सुज्जिना ॥२०६३॥

---

२०४४. [1]) Emended; A धन्योदयो. २०४४. [1]) Emended; A राज्यपुर्यां. २०४५. [1]) Doubtful emendation; A चावालगतौ; G चारालगतौ. २०५१. [1]) न्न supplied with C; A न्यघ्न – त्र.

संजातयौनसंबन्धबन्धः कमलियादिभिः । अथास्याक्षिगतोत्यर्थं सामर्थ्याद्रिल्हणोप्यभूत् ॥२०६४॥
अल्पेन हेतुनोद्भूतं द्वैतं तेषां च तस्य च । खलपैशुनसेकैस्तत्प्रापाशु शतशाखताम् ॥२०६५॥ 2065
प्रकृत्योत्सिक्तमुत्सेकावहैः समुददीदिपत्¹ । दुर्मन्त्रैर्विग्रहैकाग्र्ये साहदेविस्तमुल्हणः ॥२०६६॥
असमा¹नां सहास्माभिः क्षमते समशीर्षिकाम् । कृतघ्नोयमिति स्वैरं मन्युं राज्यपि सोग्रहीत् ॥२०६७॥
बिभ्यत्तु भूपतिस्तस्माद्रिल्हणं बाह्यभृत्यवत् । मन्त्रस्वैरकथाद्येषु विस्रम्भेषु व्यवर्जयत् ॥२०६८॥
स तु धूर्तत्वदुर्लक्ष्यतादृक्षस्वामिवैकृतैः । स्वेषां धैर्यं परेषां तु संत्रासं माययातनोत् ॥२०६९॥
समग्रशक्तिराकाङ्क्ष्यसंस्तवः पक्षयोर्द्वयोः । तस्य तु प्रययौ सञ्जपालो दानेन मित्रताम् ॥२०७०॥ 2070
संनद्धयोः प्रविशतोरन्योन्यस्पर्धया तयोः । क्षणे क्षणे राजधानी ययौ संभ्रमलोलताम् ॥२०७१॥
सुज्जिः सभूपानाक्षेप्तुं प्रतिपक्षान्युयुत्सया । महीमानोत्सवास्थाने संक्षोभमुदपादयत् ॥२०७२॥
कृकाटिकान्यस्तहस्तो द्वाःस्थेनावेदितो हि सः । तं निर्भर्त्स्य शिलाक्षेपं क्रोधरूक्षाक्षरोकरोत् ॥२०७३॥
लिखितैरिव तान्सर्वैः सोढुं रक्षणमीशितुः । मिथ्या तथ्यमिवोदीर्य संग्रथ्नद्भिः समर्थताम् ॥२०७४॥
उपावेशयदभ्यर्णे भूपतिः परिसान्त्व्य तम् । सत्यस्मिन्नास्ति नः किंचिदित्यन्तस्तु व्यचिन्तयत् ॥२०७५॥ 2075
चक्रे मडवराज्यस्थैरथ प्रायो द्विजातिभिः । न सुज्जेः कम्पनेशत्वमिच्छाम इति वादिभिः ॥२०७६॥
अन्विष्य विद्विषः शङ्कां मन्त्रविन्निशि रिल्हणः । संनद्धसैन्यमानिन्ये पञ्चचन्द्रं तदप्रियम् ॥२०७७॥
शशङ्के सञ्जपालाच्च तस्माच्च बहुसैनिकात् । सुज्जिरन्यानगणयन्नबुद्धास्य च तद्रिपुः ॥२०७८॥
आस्कन्दभीत्या निर्गत्य हयारोहैः समं गृहात् । व्यूढानीको निरुद्धातो जजागाराथ सोध्वनि ॥२०७९॥
भूपतिप्रातिलोम्येन वर्तमानस्तदाभवत् । कोष्टेश्वरोपि संनद्धः सुज्जिना बद्धसौहृदः ॥२०८०॥ 2080
स्थितमप्रातिलोम्येन सोवधीन्मनुजेश्वरम् । इति द्वेष्योपि नितरां द्वेष्यतां नृपतेरगात् ॥२०८१॥
तथा स्थिते निशीथिन्यामाचख्युं¹स्तस्य विद्विषः । दुध्रुक्षाहेतुतां राज्ञः स्वगुप्त्यै तेन या कृता ॥२०८२॥
अतथ्यं तथ्यवद्वस्तु तथ्यं वातथ्यवन्नृपः । यः पश्येन्मूढवत्सोर्थैस्त्यक्तोनर्थैः कदर्थ्यते ॥२०८३॥
रत्नज्योतिर्हुतवहधिया त्यज्यते दृष्टिपातः श्यावाक्षाणामितरविषयः स्वस्य संभाव्यते च ।
वस्त्वेकैकं यदिह न मृषा तन्मृषा यन्मृषा तत्तथ्येनेत्थं किमिव न जनैर्दृश्यते तत्त्वशून्यैः ॥२०८४॥
राजाथ तद्वधादन्यदजानन्दौस्थ्यभेषजम् । न्ययुङ्क्त तस्य तीक्ष्णत्वे सञ्जपालं महौजसः ॥२०८५॥ 2085
स कापुरुषवद्धीरः प्रहर्तुं छद्मनाक्षमः । काङ्क्षन्नाक्षिप्य तं हन्तुं तत्र तत्रैक्षत क्षणम् ॥२०८६॥
मायाप्रयोगानन्योन्यमुद्दिश्य स्पृशतोर्द्वयोः । क्षणे क्षणेभजद्राष्ट्रं त्रासोल्लासविलोलताम् ॥२०८७॥
प्रत्याशङ्क्योदयं रात्रौ सुज्जौ जाग्रति पूर्ववत् । अव्यग्रयामिकग्रामं राजधामाप्यजायत ॥२०८८॥
राष्ट्रान्निर्वासने रिल्हणस्य सुज्जेरभीप्सिते । पार्थिवोप्यनुमन्ताभूदनीशः प्रत्यवस्थितौ ॥२०८९॥
स निर्यि¹यासुरामन्त्र्य तत्खेदात्क्षुभिताः प्रजाः । संदर्श्य द्वारपतिना राज्ञो युक्त्या समर्थितः ॥२०९०॥ 2090
संमन्त्र्य नृपतिं मैत्रीप्रार्थिना सुज्जिना समम् । पीत्वा कोशं सञ्जपालः प्राप्तो रात्रौ व्यजिज्ञपत् ॥२०९१॥

२०६६. ¹) Thus corr. by $A_3$ from $A_1$ समुददीपित्. २०६७. ¹) Emended; A आसम°. २०८२. ¹) Emended with C; A °चाख्युः. २०९०. ¹) Emended with C; A निर्यायासु°.

प्रेरणादुल्हणादीनां स्वोत्सेकाच्चैष वर्तते । राजन्सुज्जेरभिप्रायः[1] स्पर्धिनोन्याननिच्छतः ॥२०९२॥
निर्द्रोहस्योपकर्तुश्च मते स्याद्यदि मे नृपः । निर्वास्य रिल्हणं चित्ररथं बद्धा महाधनम् ॥२०९३॥
लोहरारब्धिनिर्नष्टानश्वान्कोशं च भूपतेः । नयेयं संभृतो हन्यां दुर्वृत्तमपि कोष्ठकम् ॥२०९४॥
2095 कार्योपरोधान्निर्बन्धः संबन्धेष्वेव नास्ति मे । दाक्षिण्यं स्वामिनः कृत्ये यस्य प्राणास्तृणोपमाः ॥२०९५॥
मध्येथ प्रतिराजादिनिर्जयस्वीकृतोद्यमे । युवाविश्रान्तचित्तोयं नृपश्रीभोगभाग्भवेत् ॥२०९६॥
साहायकाय द्वारेशमुल्हणं रिल्हणाभये । कार्यव्राते च मामीशमाक्रीरयितुमिच्छति ॥२०९७॥
ब्रूते च मामुल्हणश्च त्वं चाहं चाविभेदिनः । मिलिता यत्र तत्रास्ति गण्यः को नु नृपास्पदे ॥२०९८॥
इहस्था नवदायादमेकमानीय कंचन । निदध्मोस्य पदे राज्ञो नानुतिष्ठेदिदं यदि ॥२०९९॥
2100 गुणान्प्रसरणत्रासाद्वन्धायेव गिरा सृजन् । द्विजांशुभङ्ग्या राजाथ विनिश्वस्याब्रवीद्वचः ॥२१००॥
यथाह स तथैवैतन्न द्रोहो नासमर्थता । नौदासीन्यमथैतस्मिन्संभाव्यमभिमानिनि ॥२१०१॥
निष्प्रतिद्वन्द्वभावोस्य दुरुच्छेदो भवेदिति । इयमप्यन्यतस्तावदस्त्वपायधियः कथा ॥२१०२॥
किं तु द्वये यदाकोप[1]प्राथम्यात्तथ्यतोपि वा । निर्द्रोहस्य वधो ध्यातो योस्यासौ कार्य एव तत् ॥२१०३॥
अर्थोयमल्पसत्त्वानामग्रेस्माभिर्हि मन्त्रितः । नूनं तेनोपलभ्येत तानावर्जयता धनैः ॥२१०४॥
2105 पुण्यैरपरिहार्यैः स्वैर्जाड्यैर्वा मादृशाममी । जानतामपि जायन्ते निर्गुणा भोगभागिनः ॥२१०५॥
बालि[1]शान्गृह्णतां प्रायश्चित्तमेतन्महीभुजाम् । तन्मौर्ख्यस्य फलं मूढैरेतैर्यदनुभूयते ॥२१०६॥
दुर्गमो भूमिभृन्मार्गो विटैर्हट्टवृषैरिव । ... ......................[1] ॥२१०७॥
तन्वाना व्रतवैमुख्यं रसनालौल्यशालिनः । परपिण्डोपहर्तारः खलाः कौलेयका अपि ॥२१०८॥
इत्थं खलोपतापेन प्रयुक्तं तद्भयात्पुनः । असंहार्यं कुकर्मेदं पश्चात्तापाय नो भवेत् ॥२१०९॥
2110 इत्युदीर्य नृपः सुज्जेः सज्जो व्यापादसिद्धये । तमजागारयच्छश्वज्जागरं चाग्रहीत्स्वयम् ॥२११०॥
बिभ्रन्मन्त्रस्रुतेः शङ्कां जिघांसुः सुज्जिरित्यपि । तथ्यं भृत्यवचो जानंस्तस्थौ दौःस्थ्येन पार्थिवः ॥२१११॥
गत्वा स्वयं गृहान्यौनसंबन्धं कुरुतं[1] युवाम् । इत्युक्त्वा रिल्हणेनाथ स सुज्जिं समयोजयत् ॥२११२॥
विश्वास्यापि तथा हन्तुं तं प्रसङ्गमनाप्नुवन् । उदताम्यद्दिवारात्रं तल्पोपर्यवशं लुठन् ॥२११३॥
सज्जपाले गृहाद्बन्धुनाशदुःखिन्यनागते । आशङ्क्य साहसासिद्धिमधिकं पर्यतप्यत ॥२११४॥
2115 निपत्य वीरशयने सुस्सलक्ष्मापसत्क्रियाम् । भ्रातरो यस्य कल्याणराजाद्या व्यस्मरन्युधि ॥२११५॥
सेनानीः कुलराजः स ख्यातो व्यायामविद्यया । प्राणैरानृण्यमिच्छंस्तमपृच्छच्छोककारणम् ॥२११६॥ युग्मम्[1]॥
स संस्थापयितुं हन्तुं वाप्यशक्यं न्यवेदयत् । तस्याप्रतिसमाधेयं कम्पनाधीश्वराद्भयम् ॥२११७॥
कियदेतन्निजप्राणमात्रलभ्यं महीभुजाम् । इत्याभाष्य स जग्राह साहसाध्यवसायताम् ॥२११८॥
दिनद्वयमनायातो गृहेभ्यः कम्पनापतिः । न प्रातिभाव्यमभजत्तस्य मृत्योः श्रियोथ वा ॥२११९॥
2120 विस्रम्भभृत्यः शृङ्गारनामा चाप्यब्रवीत्प्रभोः । तं दृष्टवांस्तृतीयेह्नि शयनेवगणं स्थितम् ॥२१२०॥

---

२०९२. [1]) Emended; A °प्रायस्पर्धिनो°. २१००. [1]) Emended with C; A स्रजन्. २१०३. [1]) Emended; A थ आकोप°; G *sec. manu* यतः को°. २१०६. [1]) A वालि°. २१०७. [1]) Here two *pâdas* are missing; C supplements क्व स नीतिज्ञविज्ञेयः क्व च ते खलबुद्धयः. २११२. [1]) Emended; A कुरुतां. २११६. [1]) $A_1$ २.

शोभोपयोगिनो भर्तुर्नित्यं सततसेवकाः । कर्तुं साहससाचिव्यं विदूरेण तु पार्यते ॥२१२१॥
करे पिनाको मकराङ्कशत्रोः शोभाविशेषाय सदानुषक्तः ।
पुराहवे कार्मुककर्म तस्य तत्कालमात्रेन तु मन्दरेण ॥२१२२॥
ताम्बूलहारकव्याजात्ततो राजा व्यसर्जयत् । कुल्लराजं तमव्याजधैर्यासंलक्ष्यविक्रियम् ॥२१२३॥
ध्रुवं मृत्युः पुनर्नाहमागन्ता तत्ततोस्य कः । आरे[1]भेति स निन्ये न ताम्बूलं स्वर्णभाजने ॥२१२४॥
व्यसनप्रशमं राज्ञः स्वदेहत्यागतोनुगाः[1] । एवं कर्तुं यतन्तेन्ये निर्व्यूढौ स्खलिताः पुनः ॥२१२५॥ 2125
सगणोवगणो वास्तु निहतो नियतं मया । जागर्त्वतः परं देव इत्युदीर्य विनिर्ययौ ॥२१२६॥
गतस्य साहसासिद्धौ शक्यं शङ्क्यं पलायनम् । ························[1]॥२१२७॥
अजन्स्वामिहितं कृत्वा पुनः पश्चान्निनाय सः । शस्त्रिणौ द्वौ मिषाच्छस्त्र्यौ बन्धस्थाने परामृशन्[1] ॥२१२८॥
स्वयं गृहीत्वा ताम्बूलं राज्ञा प्रहित इत्यथ । द्वाः[1]स्थेनावेदितः सुज्जेः पार्श्वं रुद्धानुगोविशत् ॥२१२९॥
ददर्शोच्चावचैस्तं च मितैः परिजनैर्युतम् । यूथनाथमिवात्यल्पैर्द्विपैररहितान्तिकम् ॥२१३०॥ 2130
गृहीतवन्दितस्वामिताम्बूलः सस्मितं स तम् । पृष्ट्वा[1] कृत्यादि नृपतेः सत्कृत्य व्यसृजत्क्षणात् ॥२१३१॥
जनप्रवेशाशङ्की स त्वरमाणस्तमब्रवीत् । कृतागाः कोपि कैवर्तशस्त्रभृन्मत्समाश्रितः ॥२१३२॥
तस्याक्षेपपरान्भृत्यान्स्वान्निवार्याधुना तव । संमान्या वयमित्यग्रेलक्षयन्प्रकृतिक्षणम् ॥२१३३॥
सोत्सेकामिव तां वाचं स दर्पादवधीरयन् । तस्य रूक्षाक्षरं नाहं कुर्यामित्यब्रवीद्वचः ॥२१३४॥
स रोषादिव निर्गच्छन्मान्योसाविति वादिभिः । तं सान्त्वयित्वा तद्भृत्यै रुद्धा व्यावर्तितः पुनः ॥२१३५॥ 2135
तेनावादि ततः कर्तुं विज्ञप्तिं वस्तुनोमुतः । सज्जयोरादिश द्वारप्रवेशं भृत्ययोर्मम ॥२१३६॥
अवशेनेव तेनाथ वीक्ष्य तौ संप्रवेशितौ । सहायलाभाद्बुभुक्षुः प्रजिहीर्षुरवर्तत ॥२१३७॥
याताद्य कुर्यां प्रातर्वो विधेकामिति तान्वदन् । दत्तपृष्ठो निदिद्रासुस्तल्पे सुज्जिर्जहौ वपुः ॥२१३८॥
गत्वाथ किंचिद्व्यावृत्तो निष्कृष्टक्षुरिको जवात् । प्राहरत्कुल्लराजोस्य वामे पार्श्वे कृतत्वरः ॥२१३९॥
तस्य धिक्कुर्वतो द्रोहमधावत्क्षुरिकां प्रति । यावत्पाणिः प्रहरणं तावत्सर्वेपि ते व्यधुः ॥२१४०॥ 2140
विमर्शैः[1] पश्यतां यावदाशङ्क्ये तत्र नोद्ययौ । स तावदेव सुचिरापेतश्वास इवाभवत् ॥२१४१॥
भयत्यक्ताभिमानेषु विद्रुतेष्वनुजीविषु । चकर्ष शस्त्रं तत्रैकः पिच्छदेवः परं तदा ॥२१४२॥
प्रहरंस्तैस्त्रिभिस्तुल्यप्रतिप्रहतिभिः क्षतः । भ्राम्यन्स्रुतासृक्तस्मात्स मण्डपान्निरवास्यत ॥२१४३॥
स्थितान्दत्तार्गले धाम्नि रुद्धद्वारतमोरयः । जिघांसवः सुज्जिभृत्यास्ततस्तान्पर्यवारयन् ॥२१४४॥
तमोरिप्रतिकुर्वाणा भज्यमानैरिभिर्व्यधुः । ते द्वारे तूलशय्यां तां प्रोत्सार्य शवमुद्धृतम् ॥२१४५॥ 2145
खड्गेषुशूलपरशुक्षुरिकाश्माभिवर्षिणः । तान्समभ्रं[1]मयन्मार्गैरनेकैस्ते विविक्षवः ॥२१४६॥
नैराश्यहेतोर्विशतां तेषां संकटवर्तिभिः । पृष्ठाच्छित्त्वा शिरः सुज्जेरङ्गनेक्षिप्यताथ तैः ॥२१४७॥
अस्रनिःसरणाभीक्ष्णशुक्लेक्षणपुटश्रुति । उत्तरौष्ठकचच्छन्नसन्नघ्राणपुटद्वयम् ॥२१४८॥

२१२४. [1]) Thus emended in C; A आरेभेति. २१२५. [1]) Emended; A °तोन्वगाः. २१२७. [1]) Here two *pādas* are missing; C supplements इति चिन्तयतस्तस्य मन आसीद्विशृङ्खलं. २१२८. [1]) Emended; A °मृषन्. २१२९. [1]) Emended; A द्वास्थेन. २१३१. [1]) Emended; A दृष्ट्वा. २१३९. [1]) Emended with C; A कुजरा°. २१४१. [1]) A विमर्षैः. २१४६. [1]) Emended; A तान्स सम्भ्रम°.

अक्ष्णोर्विभ्रम्यमाणस्य लोकस्य प्रतिबिम्बकैः । संभाव्यमानसंस्पन्दस्तोकप्रव्यक्ततारकम् ॥२१४९॥

2150 स्थपुटस्याक्रमच्छेदाद्गलमांसस्य संधिषु । हरिद्रार्द्रैरिवाढ्यानमेदोग्रन्थिभिरुल्बणम् ॥२१५०॥

धूलिध्वस्तकचश्मश्रु तदेतदिति निश्चयम् । परं भालतलस्थेन ददत्कुङ्कुमबिन्दुना ॥२१५१॥

तद्वीक्ष्य तिर्यक्पतनव्यक्तसंध्यन्तरद्विजम् । उच्चलत्तुमुलाक्रन्दा भृत्याः क्वापि विदुद्रुवुः ॥२१५२॥कुलकम्॥

तीक्ष्णान्प्रयुज्य क्ष्मापस्तु तिष्ठन्व्याकुलधीस्तदा । बहिर्वीक्ष्य जनक्षोभं साहसं निश्चिकाय तम् ॥२१५३॥

सुज्जौ हते क्षते वापि कार्यमेतदिति द्रुतम् । संनह्य सैन्यस्यादिक्षत्स तन्मन्दिरवेष्टनम् ॥२१५४॥

2155 मिथ्यैव सुज्जिर्निस्तीर्ण इति श्रुतवता जनात् । स्वयमग्राहि भूपेन ततः समरसंभ्रमः ॥२१५५॥

निःसंशयं हतं ज्ञात्वा सुज्जिं राजोपजीविनः । तत्र स्थितं शिवरथं सर्वद्वेष्यमबन्धयन् ॥२१५६॥

हिल्लात्मजन्मनः सुज्जिभ्रातृस्यालस्य कौशलम् । कलशस्या[1]द्य निर्वर्ण्य वाणीयं पुण्यभागिनी ॥२१५७॥

आक्षिप्यमाणैर्भिक्षाचरैरन्ते वीरोचितं कृतम् । तेन त्वसंशयस्थेन सदाचारान्न विच्युतम् ॥२१५८॥

राजौकस्येव तां वार्तां श्रुत्वा स ह्यपलायितः । हतस्य स्वामिनोभ्यर्णे जिहासुर्जीवितं ययौ ॥२१५९॥

2160 द्वारं पदप्रहतिभिर्भञ्जन्तं राजसैनिकाः । अपसार्य कथंचित्तं तीक्ष्णाः कृच्छ्रादरक्षिषुः ॥२१६०॥

प्रविष्टेस्मिन्ननिर्व्यूढपीडिते मण्डपान्तरम् । लब्धप्राणा नृपाभ्यर्णे कुलराजादयो ययुः ॥२१६१॥

हठप्रविष्टो हतवान्स तत्रैकं महाभटम् । शरैरेव हतो दूरात्कथंचित्परिपन्थिभिः ॥२१६२॥

आयातं क्षुभिते देशे सञ्जपालं महीपतिः । रिल्हणं चोल्हणं हन्तुं प्राहिणोद्विहितत्वरः ॥२१६३॥

यातो मार्गात्पलाय्यायं परिशङ्क्येति रिल्हणः । क्षिप्तिकातटपर्यन्तमटित्वा यावदाययौ ॥२१६४॥

2165 पूर्वायातः सञ्जपालो गृहद्वाराद्विनिर्यतः । उल्हणस्य पथो रुन्धन्सुबहून्प्रहरन्रणे ॥२१६५॥

तावदेकस्य खड्गेन निकृत्ते दोष्णि दक्षिणे । त्वङ्मात्रशेषे छिन्नास्थिस्नायुग्रन्थिरजायत ॥२१६६॥तिलकम्[1]॥

अगण्यप्रायतां प्राप्ते वंशे यत्कौशलादसौ । दिगन्तरेषु स्वस्मिंश्च देशे प्राप प्रथां पुनः ॥२१६७॥

फलकाले समासन्ने शौर्यप्रतिभुवाभजत् । स तेन दोष्णा वैकल्यं धिगिच्छां विधुरां विधेः ॥२१६८॥

स प्राग्वदुदयावाप्तौ भवेदविकलो यदि । फलेन तस्य जानीयादिच्छां लोकोयमद्भुताम् ॥२१६९॥

पीतामृतस्य क्षतविग्रहत्वं न प्राभविष्यद्यदि नाम राहोः ।

2170 अज्ञास्यदिच्छां तदमुष्य लोकः सामर्थ्यभाजः सुचिरप्ररूढाम् ॥२१७०॥

दृष्टः शीलाभिधो वृद्धः पितृव्यः साहदेविना । सस्पृहं निहतः साधु --[1] जातव्रणार्तिना ॥२१७१॥

तस्यार्त्या विशतो वेश्म जज्जलाख्योग्रगो हतः । मान्योनुगो भटौ द्वौ च यामिकश्च जनंगमः ॥२१७२॥

बालं तनयमालोक्य निषण्णस्याङ्गनस्थितेः । तस्यानिर्गच्छतो गेहे रिल्हणोग्निमदापयत् ॥२१७३॥

आनीयमानो धूमान्धो बद्ध्वा मुख्यैः स सैनिकैः । गृहद्वारे हतः कैश्चित्प्राकृतैर्व्रणविक्लवः ॥२१७४॥

2175 तस्य प्रधानप्रकृतिक्षयहेतोर्महीपतिः । मुण्डमप्यवलोक्यासीदशान्तक्रोधविक्रियः ॥२१७५॥

व्यापाद्यमानाः साकोपं भूपतिप्रेरितैर्भटैः । उच्चावचाः सुज्जिभृत्याः कृत्यं सत्त्वोचितं व्यधुः ॥२१७६॥

---

२१५७. [1]) Emended with C; A कल - स्याद्य. २१६६. [1]) A₁ ३. २१७१. [1]) Before or after साधु two *aksharas* are missing; the *lacuna* not indicated in A; C supplements सम्यग्जा°.

अनुजो लक्ष्मकः सुज्जैर्बद्धा नीतः स विक्रियाम् । नृपं वीक्ष्यादयैः कैश्चिद्राजधान्यङ्गने हतः ॥२१७७॥
भ्राता पितृव्यजस्तस्य संगटाख्यो नृपाङ्गने । अटन्नट इव प्राणानौचित्येनामुचत्कृती ॥२१७८॥
प्रविष्टः शरणं त्राणवंश्यैः पापैः प्रमापितः । उन्मत्तो मुम्मुनिस्तस्य भ्राता कैश्चित्स्त्रमन्दिरे ॥२१७९॥
सुज्जिस्यालस्तु शृङ्गारवृत्त्या भङ्गुरया हतः । महाकुलीनो विचरन्नौचित्येन च चित्रियः ॥२१८०॥ 2180
साङ्गिकाख्यः प्रतीहारो व्रणितः शनकैर्हतः । अन्येपि संश्रिताः सुज्जेस्तत्र तत्र प्रमिम्यिरे ॥२१८१॥
जात्यवाजिजवप्राप्तप्राणाः कोष्टेश्वरान्तिकम् । आसाद्य वीरपालाद्या द्वित्रा मृत्युभयं जहुः ॥२१८२॥
व्रजञ्शारदियो[1] दुष्टोत्थानरुद्धतुरंगमः । प्रपेदे संगटभ्राता बन्धनं सुभटामठे ॥२१८३॥
सूनुश्च सज्जलः सुज्जेः श्वेतिकश्चाग्रजात्मजः । उल्हणस्य तनूजश्च कारागारं प्रपेदिरे ॥२१८४॥
इत्थं राजन्यमात्ये[1] च प्राप्ते पिशुनवश्यताम् । नवमेब्दे शुचेः शुक्लपञ्चम्यां विप्लवोभवत् ॥२१८५॥ 2185
कार्ये क्वापि विपर्यस्तसत्त्वं संस्मृत्य मन्त्रिणम् । तमद्यापि नृपस्तादृग्भृत्योपेतोनुतप्यते ॥२१८६॥
वेतालोत्थापनाच्छ्वभ्रलङ्घनाद्विषचर्वणात् । व्यालाश्लेषाच्च विषमं सत्यं राजोपसेवनम् ॥२१८७॥
अनात्मायत्तनिस्तीर्णगुणानां चक्रवर्तिनाम् । शकटानामिवाग्रस्थो विश्वस्तः को न भज्यते ॥२१८८॥
अयुक्तं नृपतिः सुज्जिवधं मेने प्रजाः पुनः । युक्तं ज्ञात्वा तमुद्रिक्तशक्तितां विविदुः प्रभोः[1] ॥२१८९॥
भेजे राजा सज्जपालं कम्पनाधिपतिं ददत् । कुलराजे च नगराधीकारित्वं समार्पयत्[1] ॥२१९०॥ 2190
त्यक्त्वा मल्लार्जुनं[1] धन्योदयौ नगरमागतौ । प्राग्वत्पुनर्जजृम्भाते प्रियौ विश्वंभराभुजः ॥२१९१॥
इतराश्रयविच्छेदा वीतपारिप्लवस्थितिः । श्रीः सर्वाकारमकरोत्स्थिरं चित्ररथे पदम् ॥२१९२॥
अद्भुतैश्वर्यधुर्योपि राष्ट्रं दण्डेन पीडयन् । शमं नेतुमशक्योभूत्स भूपस्याप्यनङ्कुशः ॥२१९३॥
गन्धर्वानाभिधे ग्रामे टिक्कं हत्वा व्यसर्जयत् । परिविशोकं कोट्टेशस्तच्छिरः पार्थिवान्तिकम् ॥२१९४॥
निसर्गद्रविणा प्राप्तप्रतापे नितरां नृपे । तदानीं तप्यमानेन दूतेनाप्यायितोसकृत् ॥२१९५॥ 2195
कोष्ठेश्वरेण रभसादल्पैः परिजनैर्युतः । निशि लोठनदेवः स हाडिग्रामं ततोविशत् ॥२१९६॥
महाकथितकन्थोन्यैः संरब्धे राज्ञि सर्वतः । बद्धसंधिर्लवन्यस्तं विससर्ज यथागतम् ॥२१९७॥
उच्चलादिवदादातुं राज्यं स रभसं भजन् । निर्व्यूढिशून्यदार्ढ्योगान्मूढो लोकस्य हास्यताम् ॥२१९८॥
तीक्ष्णप्रयुक्तिभिः सैन्यभेदैरन्यैश्च कोष्ठकम् । उपायैर्नृपतिस्तैस्तैस्ततो हन्तुं व्यचिन्तयत् ॥२१९९॥
प्रतिद्वन्द्वीव तीक्ष्णानां पाटिताक्षः क्षमाभुजम्[1] । न संप्रासादयत्क्रुद्धः[2] प्रतियोद्धुं त्वचिन्तयत् ॥२२००॥ 2200
स्वैः स्वैः प्रदेशैरादिश्य प्रवेष्टुं पृतनापतीन् । स्वयमुच्चावचैः सैन्यैरवचस्कन्द तं पुनः ॥२२०१॥
स भूपं रभसायातं ज्ञात्वाल्पपृतनं बली । प्राप्तश्छलयितुं तस्थौ प्रतापैः परिहारितः ॥२२०२॥
लग्ने रणे चित्ररथः पृथुसैन्योपि दैवतः । तस्य सैन्यैकदेशेन निन्ये जयविपर्ययम् ॥२२०३॥
भङ्गेनां[1]मङ्गलोंकारकल्पेन किल तेन सः । ततः प्रभृत्यभूद्ध्वस्यदवष्टम्भो दिने दिने ॥२२०४॥
रिल्हणादीन्योधयित्वा व्यूढव्यस्ताखिलानुगः । लवन्यो न्यपतत्सायं कम्पनाधिपतेर्बले[1] ॥२२०५॥ 2205

---

२१८३. [1]) C शरदि यो. २१८५. [1]) Emended with C; A °मान्ये. २१८९. [1]) Conjectural emendation of G. (*sec. manu*); A प्रजाः. २१९०. [1]) Emended with C; समर्पयत. २१९१. [1]) Emended; A मल्लार्जुनो. २२००. [1]) Emended; A °भुजाम्.—[2]) Emended; A संप्रसाद°. २२०४. [1]) Doubtful emendation; A भङ्गनामङ्गलों°; C भङ्गनामङ्गलौङ्कार°. २२०५. [1]) Emended; A °बली.

ऊनैः शतादपि भटैर्युतो विद्रुतसैनिकः । सेहे[1] तत्सैन्यरोषं स गजक्षोभमिवाचलः ॥२२०६॥
किं वाच्यः स नरव्याघ्रः प्रवृद्धिं याति संगरे । निजवर्मतनुत्रादि यस्य मानि न वर्ष्मणि ॥२२०७॥
मन्दीकृतारिसंरम्भमवष्टम्भेन तादृशा । तं त्रिल्लकादयः प्रापुर्लवन्याः सैन्यशालिनः ॥२२०८॥
तैः सजातीयदाक्षिण्यात्तटस्थैरपि संकटे । तस्येषदुपयोगोभूत्स्ववीर्यापास्तविद्विषः ॥२२०९॥
2210 काले संनहनं रात्रिजागरः सामतो बलैः । समये ग्रहणत्यागतत्तद्युक्तिविकल्पनम् ॥२२१०॥
लब्धभूम्यपरित्यागो जिगीषोरीदृशैर्गुणैः । चलेयुररयोप्यस्य का वैर्याक्रमणे स्तुतिः ॥२२११॥
अविश्वसन्भिन्नभृत्यस्तादृक्संरम्भपीडितः । पलायनोन्मुखः शैलात्कोष्ठकोथ व्यगाहत ॥२२१२॥
मार्गेष्वकालप्रालेयपातरुद्धेषु वाजिनाम् । गन्तुं तस्योद्यमं जघ्नुः पृष्ठलग्ना विरोधिनः ॥२२१३॥
अवमानोपतप्तोथ परिमेयपरिच्छदः । स ययौ जाह्नवीं स्नातुं राज्ञा राष्ट्रादपाकृतः ॥२२१४॥
2215 सोमपालोथ भूपालनाम्ना पुत्रेण खेदितः । दीर्घद्वैराज्यदुःखार्तः शरणं नृपतिं ययौ ॥२२१५॥
पुत्रौ दत्तवतो नीविं नागपालस्य तस्य च । अभयं प्रतिशुश्राव भूभृदाश्रितवत्सलः ॥२२१६॥
बृहद्राजस्य जिह्मोयं दौस्थ्यहेतुरभूदिति । स तदापदि नास्मार्षीद्व्याजौदार्यधुर्यधीः ॥२२१७॥
साहायकाय स्वं सैन्यं दत्तवांस्तं महीपतिः । भूयः प्रतिष्ठामनयद्दर्पप्रशमनाद्विषाम् ॥२२१८॥
स्नात्वा द्युनद्यां व्यावृत्तः कोष्ठकोत्रान्तरे पुनः । मल्लार्जुनं गृहीत्वाभूद्वैराज्योत्थापनोद्यतः ॥२२१९॥
2220 अर्कोपरागे प्राप्तः स कुरुक्षेत्रमवाप तम् । लवन्यं कार्यतस्त्यक्तपूर्ववैरो नृपात्मजः ॥२२२०॥
आहूतो लोठनः पूर्वमायातस्तेन डामरम् । निशम्य तं संघटितं[1] खिन्नः प्रायाद्यथागतम् ॥२२२१॥
विजयेशाग्रतः पीतकोशोपि नृपतिद्विषः । प्रविविक्षुनुपैक्षिष्ट सोमपालो दुराशयः ॥२२२२॥
आराधनाय भूभर्तुस्तत्पुत्रः कोष्ठकं पुनः । प्राप्तं स्वविषयैस्तैस्तैष्ठकुरैर्निरलुण्ठयत् ॥२२२३॥
अत्रान्तरे चित्ररथं संवृद्धायासदुर्ग्रहम्[1] । अनिच्छन्तोवन्तिपुरे प्रायं चक्रुर्द्विजातयः ॥२२२४॥
2225 उपेक्ष्यमाणास्ते दर्पात्तेनागणितभूभुजा । ज्वलिते ज्वलने देहान्बहवो जुहुवुः शुचा ॥२२२५॥
चरके धर्मधेनूनामुत्तब्धेपि तदाश्रितैः । वह्निं गोपालकोप्येकः कारुण्यप्रवणोविशत् ॥२२२६॥
भट्टस्योद्भटवंशस्य पृथ्वीराजस्य नन्दनः । युवा विजयराजाख्यः सानुजो गाढदुर्गतः ॥२२२७॥
देशान्तरं जिगमिषुर्विषमं वीक्ष्य तत्र तत् । व्याजहारानुजन्मानं कारुण्यास्रुकणान्किरन् ॥२२२८॥
उपेक्ष्यमाणा दाक्षिण्यस्तम्भितेन महीभुजा । विशः सचिवपाशेन विवशाः पश्य नाशिताः ॥२२२९॥
2230 छन्दानुवृत्त्यामात्यानां[1] यत्र क्ष्माभृदुपेक्षते । कस्तत्रान्यस्तु दीनानामापच्छमयिता विशाम् ॥२२३०॥
यद्वा न्यायोयमन्योन्यस्पर्धया यदुपप्लुतम् । शमिता दण्डयेच्छाम्यं शमितारं परोथ वा ॥२२३१॥
विशृङ्खलं नयेच्छय्यां दार्ढ्यसारं विघट्टनैः । कदाचिल्लोहमश्मानमश्मा लोहं कदाचन ॥२२३२॥
दोषेणैकेन न द्वेष्यो राजा सर्वगुणोज्ज्वलः । वधाच्चित्ररथस्यान्यद्विधेयं नावभाति मे ॥२२३३॥
धर्मः सर्वोपकार्यैकक्षुद्रक्षपणमुच्यते । जघानाजगरं सोपि जन्तूनामन्तकं जिनः ॥२२३४॥

---

२२०६. [1]) Emended; A सह. २२२१. [1]) Emended; A सङ्घट्टितुं. २२२४. [1]) Emended with C; A सवृद्धायास°.
२२३०. [1]) Emended with C; A apparently °मान्यानां.

दुर्वृत्तदमनेस्माभिः[1] कृते तेजस्विनो जनात् । भूयोप्यधिकृतो बिभ्यन्न कश्चित्पीडयेत्प्रजाः ॥२२३५॥ 2235
कायस्यास्य परित्यागादनन्ता जन्तवो यदि । सुखिनः स्युरसौ भ्रातर्वणिज्या ज्यायसी न किम् ॥२२३६॥
संशुश्रुवांसं स तथेत्यथ तं कोशपीथिनम् । विधायानुससारेत्य हन्तुं चित्ररथं तदा ॥२२३७॥
कालेस्मिन्धर्मदौर्बल्यकलुषेपि कलेः किल । प्रभावो भूमिदेवानां द्योततेद्याप्यभङ्गुरः ॥२२३८॥
ब्राह्मणैरपरिक्षीणपूर्णपुण्यो न कश्चन । धैर्यमारभते भ्रष्टदुष्टोत्पाटनपाटवैः ॥२२३९॥
द्विजानुद्वेजयन्सुज्जिर्द्विजादेवासदद्वधम् । विप्रेणैव हतश्चित्ररथो विप्रावमानकृत् ॥२२४०॥ 2240
द्विजोत्थापितयाक्रान्तचित्तोसौ कृत्यया ध्रुवम् । दध्यौ तस्य वधं प्राणान्विना कारणमुत्सृजन् ॥२२४१॥
कृशानुसादकृषत विप्रा देहान्यदेव ते । तद्द्वेषस्तुल्यसंघर्षे तदैवासीद्धतानुगः ॥२२४२॥
अनासादयतश्चित्ररथं पृथुबलान्वितम् । गणरात्रमभूद्धन्तुर्दिवारात्रं प्रजागरः ॥२२४३॥
स ह्यपर्यन्तसामन्तसीमन्तितपथो व्रजन् । अभूददृश्यो दृश्यश्च जनसंबाधमध्यगः ॥२२४४॥
तेन साश्चर्यनैश्चल्यनिष्ठुरेणैकदा जवात् । सोनुसस्रे व्यतिक्रान्तनिःश्रेणिर्नृपवेश्मनि ॥२२४५॥ 2245
विलम्बितस्य स्तम्भाग्रे[1] कृपाण्या मूर्ध्न्यथास्य सः । सामन्तमध्यगस्यैव प्राहरत्तीव्रसाहसः ॥२२४६॥
मुमूर्षोरिव तत्रास्य वैह्वल्यगलितस्मृतेः । उद्भ्रान्तचक्षुषो वर्चश्च्यवनं समपद्यत ॥२२४७॥
प्रमापितोयं राज्ञेति ज्ञात्वा सत्त्वबहिष्कृताः । वित्रस्तास्तं तथाभूतमत्यजन्ननुजीविनः ॥२२४८॥
तं वीतजीवितं ज्ञात्वा न तीक्ष्णः प्राहरत्पुनः । प्राप्तं द्वितीयनिःश्रेण्या भ्रातरं निषिषेध च ॥२२४९॥
न पलायिष्ट निर्विघ्नसर्वमार्गोपि घातितः । राज्ञा चित्ररथः शश्वदित्युच्चैः प्रोच्चकार सः ॥२२५०॥ 2250
प्रनष्टं[1] भृष्टमांसादिराज्यभोगपुरःसरैः । सर्वैः कापुरुषैस्त्रासादथ चित्ररथानुगैः ॥२२५१॥
ज्यायांश्छोठरथस्तस्य भ्राता भीत्या पलायितः । शरणं नर्तकीमेकां ययौ वक्त्रार्पितस्तनः ॥२२५२॥
तादृक्प्रवेशितश्चित्ररथोभ्यर्णे महीभुजा । मा भैषीः[1] प्राहरत्कस्त्वामित्युक्त्वाश्वासितः स्वयम् ॥२२५३॥
नृपाज्ञया को निहन्ता द्वारेशस्येति वादिभिः । तीक्ष्णोन्विष्टो भटैः सोहमित्युक्त्वा स्वं न्यदर्शयत् ॥२२५४॥
धीरो योधान्स्वधैर्यात्तलङ्घनश्लाघ्यविक्रमः । त्रिंशद्विंशान्स हत्वाथ प्रहृत्य चरणे हतः ॥२२५५॥ 2255
परित्राणाय साधूनां विनाशाय च दुष्कृताम् । धर्मसंस्थापनार्थाय संभवामि युगे युगे[1] ॥२२५६॥
लब्धा लिखिततत्कृत्यकारणा पत्त्रिका करात् । तस्यान्तसमयाशंसा श्लोकेनानेन पावनी ॥२२५७॥
अरुच्युन्माददीनत्वयुतश्चित्ररथस्ततः । रूढव्रणोपि लालाटसंधिवेधादजायत ॥२२५८॥
स मासान्पञ्चषान्याप्य निराप्यायकृशाकृतिः । विवेष्टमानोवर्तिष्ट शयनीयतलेन्वहम् ॥२२५९॥
मल्लार्जुनं पुरस्कृत्य कोष्ठको विप्लवोन्मुखः । तन्मध्ये तरुसंबाधं गिरिदुर्गमगाहत ॥२२६०॥ 2260
मा मामभ्रमयं भ्राम्यन्स्वयूथ्यग्रसनोद्यमात्[1] । अविस्मृतापदं लोकं पुनर्द्वैराज्यशङ्किनम् ॥२२६१॥
अकाण्डाम्बुदजाड्येन पीडिताङ्ग इवाभजत् । परचक्रोदयेनाशु लोकः शिथिलशक्तिताम् ॥२२६२॥
तरुदुर्गं तदक्रुशक्रोशो[1]व्याप्यथ सर्वतः । व्याप्तोपान्तवनग्रामैः सचिवैः स न्यरोधयत् ॥२२६३॥

२२३५. [1]) Misread in C दुर्वृत्तहसन°. २२४६. [1]) Emended; A स्तम्बाग्रे. २२५१. [1]) Emended with C; A प्र-ष्टं. २२५३. [1]) Emended with C; A भैर्षीन्प्रा°. २२५६. [1]) Compare for this verse *Bhagavadgîtâ* iv. 8. २२६१. [1]) The text of the first *pâda* is corrupt; perhaps read स समभ्रमयद्भ्रा°. २२६३. [1]) A °क्रोष°.

सञ्जपाले यवनकैः स्कन्धा[1]वारं निबध्नति । अनुचक्रुर्द्विषोस्पन्दान्निवातस्तिमितांस्तरून् ॥२२६४॥

2265 धन्योपि शिलिकाकोट्टपर्यस्तकटकोभवत् । गन्धद्वेषी गजरिपुः सिन्धुरस्ये[1]व वैरिणः ॥२२६५॥

आवासितबलो राज्ञा गोवासे रिल्हणोकरोत् । अटवीं पर्यटन्घूकानिवार्को त्रुडितानरीन् ॥२२६६॥

तीव्रशक्तेर्नृपस्यैवमारम्भैः स्तम्भितोभजत् । कोष्टेश्वरस्त्रिचतुरान्मासान्संचारशून्यताम् ॥२२६७॥

क्लिष्टो देशान्तरे राष्ट्रानन्तरैर्न्यक्कृतो नृपैः । भिन्नस्ववर्गो भूभर्तृभृत्यव्यर्थीकृतोद्यमः ॥२२६८॥

बालि[1]शत्वादकुशलो ज्ञातुं वृत्तिं महीभुजाम् । स विस्मृतागाः संधातुमैच्छच्छिन्नपदो नृपम् ॥२२६९॥

2270 उज्जिहीर्षोः प्रभोर्मन्युं वाच्यं तद्वञ्चनाद्विदन् । भक्त्येकाग्रः सञ्जपालस्तस्येच्छां तामपूरयत् ॥२२७०॥

तथार्तोपि रिपुं राज्ञः संधित्सुर्न्यग्रहीन्न सः । पृथ्वीहरप्रसूतानां निर्द्रोहत्वं न कौतुकम् ॥२२७१॥

तेन प्रहिण्वता राजवैरिणं स्वकराङ्गुलिम् । छिन्दतापि महीभर्तुर्मन्युश्छेत्तुं न पारितः ॥२२७२॥

कण्ठबद्धशिरःशाटः शीर्षेणोपानहं वहन् । भुक्तवेलोपि भूपालं कर्तुं नाशकदक्रुधम् ॥२२७३॥

अस्वीकृतद्वित्रभूभृल्लाञ्छनः स हि राजवत् । तत्तत्प्रत्युक्तभूपाज्ञः सर्वं गर्वाद्व्यवाहरत् ॥२२७४॥

2275 शुश्राव बद्धं तन्मध्ये यातं मल्लार्जुनं नृपः । अनुबध्नाति भव्यानामुदयेभ्युदयान्तरम् ॥२२७५॥

नीयमानः स हि स्कन्ध[1]मधिरोप्यानुजीविभिः । अजाङ्घिकतया मार्गोल्लङ्घनायास[2]निःसहः ॥२२७६॥

ततस्ततो भयस्थानान्निस्तीर्णो लोहराश्रितम् । सार्वर्णिकाभिधं ग्रामं प्राप्तो विन्यस्तरक्षिणा ॥२२७७॥

निरुद्धो जग्गिकाख्येन टक्कुरेण महीपतिः । प्रियंकरं तं च भृत्यं शुश्रावान्तिकमागतम् ॥२२७८॥

बद्धप्रायोरिणा दुर्गान्निर्गतः स कथंचन । बद्धस्तेन पुनः शक्तिः[1] कस्य भाव्यर्थ[2]लङ्घने ॥२२७९॥

गङ्गा द्युमार्गलुठिता जठरात्कथंचिदेकस्य संहृतव्रतो निसृता महर्षेः ।

2280 ग्रस्तापरेण कृतसागरगर्तपूर्तिः शक्तो न कोपि भवितव्यविलङ्घनायाम् ॥२२८०॥

जग्गिके[1] बद्धसंप्राप्तिपर्यन्तोपान्तरक्षिणि । राज्ञोदयद्वारपतिः प्रायोजि प्राज्यबुद्धिना ॥२२८१॥

तं विना धैर्यगाम्भीर्यशौर्यधुर्यं महाधियम् । संकटे न ह्यवष्टम्भो राज्ञाज्ञाय्यन्यमन्त्रिणाम् ॥२२८२॥

स ह्यतिक्रम्य साबाधान्मार्गानुभयवेतनैः । तमोरिस्थितमद्राक्षीत्तं क्षमापतिविद्विषम् ॥२२८३॥

निष्ठाशून्येन धैर्येण शौर्यसंभावनावहः । स्तुवन्स तं बहिः प्राप्तं तत्तदुक्त्वाब्रवीत्पुनः ॥२२८४॥

2285 सर्वतो ज्यायसीं भर्तृभक्तिं यो बहु मन्यते । भवान्धुर्यो मतिमतामाहतो लोभनातुरैः ॥२२८५॥

कृता रक्षामणिसमं सहायं त्वादृशं विना । हानिर्मे दुर्नरेन्द्रस्य बाल्ये राज्ये बहुच्छलैः ॥२२८६॥

दुष्प्रेक्ष्याणां भवत्येव नियमाद्राजभास्वताम् । भाग्यान्तहेमन्तदिने जननेत्रविलङ्घ्यता ॥२२८७॥

शोभते रुधिराताम्रमण्डलाग्रो यथोदये । तथा योस्तमये भास्वानिव वन्द्यः स भूपतिः ॥२२८८॥

धन्योवतारो यस्यासीत्क्षुभ्यत्पौराङ्गनाजनः । उदयेस्तमयेप्युग्रे रागव्यग्राप्सरोगणः ॥२२८९॥

2290 पदे प्रयोगं लब्ध्वार्थं किंचित्कृत्वा कुलीनवत् । अहं कविरिव प्रौढः प्राप्तो निर्व्यूढिमूढताम् ॥२२९०॥

सत्यंकारोधुना भूत्वा विधत्तां स्वान्तसुस्थितिम् । साध्यत्वानतिवृत्तेन वरेणैकेन मे भवान् ॥२२९१॥

---

२२६४. [1]) A. स्कन्द्वा°. २२६५. [1]) A सिन्दुरस्येव. २२६९. [1]) A वालि°. २२७६. [1]) Emended; A स्कन्दम°.—[2]) Emended; °लङ्घनाय स नि°. २२७९. [1]) Emended; A शक्ति.—[2]) Emended; A भावार्थ°. २२८१. [1]) Doubtful; A जग्गके; cf. viii. 2278.

इत्युक्त्वा प्रत्ययोत्पत्त्यै संस्प्रष्टुं स्फाटिकं ततः । सपीठं पुरतो द्वारपतेर्लिङ्गमुपानयत् ॥२२९२॥
अच्छलाहवसंमर्दप्रासशूलेषुवर्षिणः । योधान्योद्धुं वरं माय[1] मानवान्नूनमिच्छति ॥२२९३॥
इति संभाव्य संस्पृष्टशिवलिङ्गः स वाञ्छितम् । वरं तस्योररीचक्रे स च भूयो जगाद तम् ॥२२९४॥
आकृष्टदृष्टिरहतः क्ष्माभुजोन्तिकमक्षतः । यथेदृगेव प्राप्तोपि तथा त्वामर्थयेधुना ॥२२९५॥ 2295
कार्पण्योपहतं तस्य वचः श्रुत्वा त्रपाजडाः । सर्वेप्युर्वीमुखास्तस्थुर्वृष्टयार्द्राः पल्लवा इव ॥२२९६॥
अन्तक्षणस्ततो भिक्षोः स्मर्यमाणः सचेतसाम् । विकासहेतुतां प्राप स्वस्थस्य मनसः पुनः ॥२२९७॥
मनुष्यवाह्यमारूढः पत्त्रं निन्ये स निस्त्रपः । तेन स्वपालितांल्लोकानपि पश्यन्नविक्रियम् ॥२२९८॥
अहीनाहारनिद्रादिवैवश्यः पशुवत्पथि । कृष्यमाणः स केनापि न विकल्पेन पस्पृशे ॥२२९९॥
पश्यन्नानीयमानं तं गोप्तृभिस्तादृशं जनः[1] । दयार्द्रहृदयश्चासीन्नाभ्यनन्दच्च भूभुजम् ॥२३००॥ 2300
उवाच चानुकम्प्येस्मिञ्जन्मज्येष्ठस्य भूपतेः । नैतावद्भाति नैर्घृण्यमनुजे पितृवर्जिते ॥२३०१॥
असेचनकमेतस्य मेचकाब्जदृशो वपुः । क्लेशगर्ह्यमनिस्त्रिंशचेताः कः कर्तुमर्हति ॥२३०२॥
पूर्वापरानुसंधानवन्ध्यस्तं दृष्टवांस्तदा । विस्मृतागा नृपं तत्तदित्युपालभताध्वनि ॥२३०३॥
गणना काथ वा बालबालिशादौ[1] विधीयते । न चित्तवृत्तेरैकाग्र्यं महतामपि सर्वदा ॥२३०४॥
श्रोतृणां द्यूतपाञ्चालीकेशकृष्टयादि शृण्वताम् । पाण्डवेभ्योधिकः क्रोधो धार्तराष्ट्रेषु जायते ॥२३०५॥ 2305
कुरूणां क्षतजापाने भग्नोरोर्मूर्धताडने । श्रुते पाण्डवविद्वेषस्तेषामेव च दृश्यते ॥२३०६॥
परावरज्ञः कार्याणां न कश्चिन्मध्यमं विना । तटस्थेनुभवाभेदस्तत्र तत्र कथं भवेत् ॥२३०७॥
स पौरान्नोदयन्नङ्के छिन्नाङ्गुल्यङ्कमुद्वहन् । युग्याधिरूढो मृत्पात्रं सायं नगरमासदत् ॥२३०८॥
न्यधत्ताश्वयुजाशुक्लपञ्चदश्यां महीपतिः । एकादशेब्दे तं रक्षियुतं नवमठान्तरे ॥२३०९॥
त्यक्ताहारस्य च निशाः पञ्चपास्तस्य ताम्यतः । पार्श्वं जगाम कारुण्याच्चरणस्पर्शनार्थिनः ॥२३१०॥ 2310
अवादीदर्थितं तस्मै प्रतिशुश्रुवुषेभयम् । द्रोहावेकान्ततो वध्यौ स चित्ररथकोष्ठकौ ॥२३११॥
राजा निर्जग्मुषः स्वोर्वीं कोष्ठकस्याथ बन्धनम् । विधित्सुः पञ्चषानाप्तान्रिल्हणादीनचूचुरत् ॥२३१२॥
सर्वेषु गलितौजःसु स्वयं राज्युद्यमस्पृशि । अथ तं रिल्हणो दोर्भ्यां झषं ग्राह इवाग्रहीत् ॥२३१३॥
हतशस्त्रः स बलिनस्तस्य दोष्पञ्जरान्तरे । तस्थावचेष्टो निद्रान्धो भूतेनेवासनीकृतः ॥२३१४॥
भ्रातृव्यो भिः[1]खराजाख्यः कुलराजस्य कोपनः । भूभृद्भक्त्या कृपाण्यास्य निर्बिभेद कृकाटिकाम् ॥२३१५॥ 2315
परश्वधेन मूर्ध्न्येनं पृथ्वीपालश्च ताडयन् । राजबीजी स च क्रोधान्न्यषिध्यत महीभुजा ॥२३१६॥
कृकाटिकास्थिसंजातमर्मवेधोपचेष्टितः । विवेष्टमानोवर्तिष्ट क्षितौ स रुधिरोक्षितः ॥२३१७॥
महाबलैः कमल्लियप्रमुखैस्तस्य सोदरः । चतुष्कः पातितोप्युर्व्यां गण्डशैल इव द्विपैः ॥२३१८॥
विलोक्य वैकल्यहतौ बद्धौ तौ स्वामिनौ[1] तथा । कृष्टासिधेनुरुत्तस्थौ द्विजन्मा मल्लकाभिधः ॥२३१९॥
उच्चावचेषु प्रहरन्स भूपालोपजीविषु । अतर्क्यमाणस्तुमुलं राज्ञैवालक्ष्यतापतन् ॥२३२०॥ 2320

---

२२९३. [1]) A माऽयं. २३००. [1]) Emended ; A जनाः. २३०४. [1]) A °वालि°. २३१५. [1]) A भि×ख°. २३१९. [1]) Emended with C; A स्वामिनो.

नृपान्तिकादापततस्तांस्तान्घ्नन्तं महाभटान् । अधावत्सासिधेनुस्तं कुलराजो महौजसम् ॥२३२१॥
प्रतिप्रहृतिषु क्षिप्रापतत्पाणिमपारयन् । निहन्तुं संरुरोधेव भित्तौ व्यायामवित्स तम् ॥२३२२॥
अपयातुमवस्थातुं प्रहर्तुं वाप्यशक्नुवन् । तस्थौ च बहुसंधानः संस्तभ्यैनं[1]मवेक्षतम् ॥२३२३॥
चरणास्फालनोत्फालदोःशब्दमुखरोन्तिकम् । धाविते पद्मराजेथ मल्लकोक्षिपदीक्षणम् ॥२३२४॥
2325 प्राहरत्कुलराजोस्य लब्धरन्ध्रोथ वक्षसि । प्रहृत्य गच्छतः पाणेः स तस्याङ्गुष्ठमक्षिणोत् ॥२३२५॥
तौ बिज्जराजे[1] दर्पोष्णनिविडे प्रहरत्युभौ । तस्मिन्प्रतिप्रहरति क्षिप्रं प्राहरतां ततः ॥२३२६॥
स त्रीनप्यभियोक्तॄंस्तांस्त्यक्त्वा दृक्पथमागतम् । चतुष्किकाद्वारगतं राजानं समुपाद्रवत् ॥२३२७॥
लक्षीभूते नृपे शीघ्रमनुधावन्ससंभ्रमम् । चकार कुलराजस्तं स्फिगस्थिक्षतिनिर्जवम् ॥२३२८॥
ततः सर्वैर्वृतो योधैः क्लीबाक्लीबान्स सत्वरम् । हत्वाभजद्वीरशय्यां रक्तस्यन्दोत्तरच्छदाम् ॥२३२९॥
2330 जीवद्व्यापद्गतस्वामिवीक्षितः श्लाघ्यविक्रमः । स एवास्पृहणीयान्तक्षणो वीरेष्वगण्यत ॥२३३०॥
बहिः कोष्ठकभृत्येषु विद्रुतेष्वदरिद्रताम् । परं जनकचन्द्राख्यो धैर्येणोवाह डामरः ॥२३३१॥
निरायुधो राजभृत्याद्धृत्वैकस्मात्परश्वधम् । स ह्ययुद्धाग्रदूतत्वं नयन्भूरीन्यमान्तिके ॥२३३२॥
यियासोस्तस्य चण्डांशुमण्डलं परशुः करे । सुषुम्णासंविभागार्थी शशिखण्ड इवाविशत् ॥२३३३॥
नाद्राक्ष्म नाश्रौष्म वापि बद्धे भर्तरि यत्तदा । कोष्ठकस्य वधूरन्वतिष्ठन्मानवती सती ॥२३३४॥
2335 जीवन्भूयोपि लभ्येत त्वया स पतिरित्यसौ । बन्धूनामवधीर्योक्तिं प्राविशद्धव्यवाहनम् ॥२३३५॥
सप्तर्षियोषिदाश्लेषतर्षकिल्बिषदूषितः । तस्याः सतीलोकगायाः पादाभ्यां पावितोनलः ॥२३३६॥
वसन्तस्य सुता धन्योदयभ्रातुः पुपोष सा । शुचिवंशाभिमानेन न डामरवधूव्रतम् ॥२३३७॥
लवन्यललनाः कुर्युर्वैधव्येपि धनेच्छया । ग्रामकार्यिकुटुम्ब्यादीन्नितम्बाभोगभागिनः ॥२३३८॥
मतिव्यामोहनिर्व्यूढवैक्लव्यस्याभिमानिनः । तयानुगाभ्यां च कृतं कोष्ठकस्योच्चकैः शिरः ॥२३३९॥
2340 रूढव्रणोपि क्रिमिसाद्भूतः कैरपि किल्बिषैः । निष्प्राणो गणरात्रेण कारायां कोष्ठकोभवत् ॥२३४०॥
अथ चित्ररथः शोषकृशः कलुषितं नृपम् । श्रुत्वा मल्लार्जुनेनाभूद्भयादत्यन्तदुःस्थितः ॥२३४१॥
पत्नी तस्यैकभार्यस्य प्रिया सूर्यमती सती । परलोकातिथिः पूर्वं विभवप्रतिभूरभूत् ॥२३४२॥
देहे याप्यहताप्याये गेहे गतपरिग्रहे । पत्यौ वैमत्यकलुषे नेषदप्येष पिप्रिये ॥२३४३॥
तीर्थस्थितस्य न स्यान्मे सागसोप्यप्रियं नृपात् । इति संचिन्त्य स प्रायान्मिषान्मर्तुं सुरेश्वरीम् ॥२३४४॥
2345 अथ नानार्थभूयिष्ठां धनाधीशाधिकश्रियः । स्थानात्ततस्ततस्तस्य पार्थिवोपाहरच्छ्रियम् ॥२३४५॥
कनकांशुकसंनाहवाजिरत्नायुधादिभिः । स्वा स्वा प्रकाशिता लक्ष्मीः स्पर्धयेवाधिकाधिका ॥२३४६॥
लोहरद्रोहघर्मोष्मशोषितो राजपादपः । तल्लक्ष्मीशैलतटिनीसेकेनाप्यायितोभवत् ॥२३४७॥
विप्लवे चिरनष्टेपि श्रीकल्याणपुरं न यः । वनवासोचितत्रासः शाल्वः सौभमिवात्यजत्[1] ॥२३४८॥
श्वेतच्छत्त्रांशुपृक्तेव चिन्तापाण्डुरवर्तत । बन्दीकृता नरेन्द्रश्रीर्निर्निद्रा यस्य मन्दिरे ॥२३४९॥

---

२३२३. [1]) Emended with C; संस्तम्भ्यैनं. २३२६. [1]) Emended; A बिज्जराजो. २३४८. [1]) Emended; A साल्वः सौ-मिवा°; C सालूरोऽन्धुमिवा°.

राज्ञा प्रयुक्तं विज्ञाय विजयः स भवोद्भवः । तीक्ष्णमानन्दनामानमवधीत्तेन चावधि ॥२३५०॥तिलकम्[1]॥ 2350
इत्थं स पप्रथे तादृक्प्रजापालनशालिनः । सर्वोत्साहमयोनेहा जयसिंहमहीभुजः ॥२३५१॥
तीर्थस्थिते चित्ररथे पादाग्रग्रहणैषिणौ । शृङ्गारजनकावास्तां तद्भृत्यौ व्यक्तचक्रिकौ ॥२३५२॥
प्रचुरोत्कोचदानेन स्वीकृत्य नृपतिं ययौ । शृङ्गारो भग्नजनकः स्वामिश्रीभोगभागिताम् ॥२३५३॥
चिरप्रचलितं द्वारमुदये निदधे पुनः । मेघकालः सरित्पूरं प्रतीर इव पार्थिवः ॥२३५४॥
अवश्यभोग्यदुष्कर्मदत्तमर्मव्यथश्चिरम् । कथाशेषोभवच्चित्ररथो मासैरथाष्टभिः ॥२३५५॥ 2355
हास्यावहोप्यविकृतो विकृतोनपास्यो दुर्गन्धिरप्यतिजडोपि गृहीतवाक्यः ।
पूर्वानुभावजयिनो भवति प्रभावाद्यस्य स्तुमस्तमतिसंस्तवमप्रतर्क्यम् ॥२३५६॥
निन्द्यैराद्यूतनाद्यैर्यश्चेष्टितैः प्रागभीष्टताम् । बाल्ये दुर्ललितस्यागाद्भूभर्तुश्चित्रचेतसः ॥२३५७॥
विसृज्यमानः संप्राप्तसाम्राज्येन दिवानिशम् । क्रमात्स्वीकृत्य ताम्बूलं तेन चित्ररथान्तिकम् ॥२३५८॥
दूत्यैः कृत्यान्तरज्ञत्वं प्राप्नवान्नाप्ततां गतः । तदन्ते घटयन्राज्ञस्तद्भृत्यान्कोशदर्शकान् ॥२३५९॥
तदा सर्वोन्नताशेषमन्त्रिशून्ये नृपास्पदे । सज्जकस्यात्मजः प्राप शृङ्गारो मुख्यमन्त्रिताम् ॥२३६०॥चक्कलकम्[1]॥ 2360
तस्य वैधेयताभ्यस्तकुदृष्टेरपि दुष्कृतम्[1] । नागुः[2] पात्रार्पणात्तुच्छत्यागित्वेनापि संपदः ॥२३६१॥
योषित्कशिपुभोग्येन धन्यंमन्योपि सोभवत् । धान्यदानवदान्यत्वं[1] गुरूणामाजगाम यत् ॥२३६२॥
पीठं कृतवतो रूप्यं[1] संयोज्य रजतैर्निजैः । विद्यमानं सुरैश्वर्यो सायुज्यं तस्य युज्यते ॥२३६३॥
उर्वीशैरपि नार्वाग्भिर्योनुगन्तुमशक्यत । आषाढचामाद्यसंभारो निविडद्रविणव्ययः ॥२३६४॥
नन्दिक्षेत्रे स तत्राद्यैः प्रणीतश्वणपकादिभिः । तेन कालानुसारेण पोषितः पञ्चषाः समाः ॥२३६५॥ 2365
नर्माङ्गतायां निःसारो ज्ञातो यः सोधिकारभाक् । अचिन्त्यकृत्यकार्यासीत्स्वामिस्नेहप्रभावतः ॥२३६६॥
केलीसज्जैर्युवतिकरजैः कण्ठभूपीदशायां यस्याज्ञायि त्रुटनमसकृत्क्ष्माधरेष्वासकृष्टौ ।
सोप्यादिष्टस्त्रिपुररिपुणा प्राप भङ्गं न भोगी शक्त्याधायी क्वचन न परो भर्तुराज्ञाप्रभावात् ॥२३६७॥
तं च रिल्हणधन्यौ च समाश्रित्येतरेतरम् । कार्यं जनकशृङ्गारावुत्कोचेनापजह्रतुः ॥२३६८॥
कदाचिज्जनकं बद्ध्वा सार्धं भूषणमौक्तिकैः । सपुत्रदारं शृङ्गारो[1] बाष्पबिन्दूनमोचयत् ॥२३६९॥
स तं च जातु निर्विद्य मानहीनमकारयत् । रूक्षरक्ष्यार्[1]पितोत्कोचधनाभ्यर्थितमैथुनः ॥२३७०॥ 2370
अङ्गुष्ठनखनिर्घर्षनर्तितानामिकोर्मिकः । वदन्वामोत्तरौष्ठाग्रोदञ्चनैः कुञ्चितेक्षणः[1] ॥२३७१॥
भ्रूभङ्गोद्वेल्लित[1]वलीनिम्नोन्नतललाटभूः । पुनरेकस्तयोर्लब्धकार्यो लोकमहासयत् ॥२३७२॥तिलकम्[2]॥
अव्यक्ताक्षरवाग्रौक्ष्यमीलिताक्षो रटन्बहु । हसन्सकरतालं च संपद्यन्यो व्यभाव्यत ॥२३७३॥
सोल्लेखप्रतिभोन्नीततत्त्वानां[1] हास्यवस्तुनि । कथाशरीरं पर्याप्तं नेदृशां[2] किमचेतसाम् ॥२३७४॥
सर्वस्मिन्वस्तुतोवाच्ये काले विगतयोग्यते । जाने तृणनृणां तुल्ये शृङ्गारोर्हत्यगर्ह्यताम् ॥२३७५॥ 2375
यः सर्वंकषनिष्कम्पशेमुषीकः क्षमापतिः । धुर्यतां धर्मचर्याभिर्गतः सुकृतशालिनाम् ॥२३७६॥

---

२३५०. [1]) $A_1$ ३. २३६०. [1]) $A_1$ ४. २३६१ [1]) Emended; A दुष्कृताम्.—[2]) Thus A; R G C नातः. २३६२. [1]) A °वदन्य. २३६३. [1]) Emended with C; A रुप्यं. २३६९. [1]) Emended; A शृङ्गारं. २३७०. [1]) Thus A; C emends रूक्षरक्षा°. २३७१. [1]) Emended; A कु-तेक्षणः; C कुरुते क्षणः. २३७२. [1]) Thus A; perhaps read with C °द्वेल्लित°.—[2]) $A_1$ ३. २३७४. [1]) Emended; A °त्त्वरां.—[2]) Emended; A न दृशां.

लब्धबोधिरिवारेर्यश्चक्रे व्यापद्युपक्रियाम् । दावप्रदस्य दग्धाङ्गोल्लाघत्वमिव चन्दनः ॥२३७७॥

गुरुसूरिद्विजानाथप्रभृत्युचितयापि यः । प्रतिपत्त्या संविभेजे संविभाग्यकुटुम्बकम् ॥२३७८॥

प्रासादान्विजयेशादिदेवव्रातस्य शुद्धधीः । सुधादानेन निन्ये च धन्यः कैलासतुल्यताम् ॥२३७९॥

2380 मठदेवगृहारामहृदकुल्यादियोजने । जीर्णोद्धृतिव्यसनिनस्तस्य चिन्ता निरन्तरा ॥२३८०॥

सकृद्दर्शितविद्वेषकार्यः सब्रह्मचारिणाम्[1] । स क्रौर्यधाम पर्याप्तमीदृगप्युच्यते जडैः ॥२३८१॥

विश्वाप्यायनसप्तसिन्धुभरणब्रह्मादिसंप्रीणनप्रायं कृत्यमुदात्तमेकसमयोपात्तेन दुष्कर्मणा ।
स्वःसिन्धोर्लघुतां गतं सगर[1]जश्रेणीचितास्पर्शना—[2]ता येन जनाः श्मशानमिव सा योग्या किलास्थ्नां स्थितौ ॥२३८२॥

तदन्तरे[1] शिवरथो द्विजः प्रचुरचक्रिकः । कायस्थपाशः पाशेन गलं बद्ध्वा व्यपद्यत ॥२३८३॥

इत्थं पृथ्वीपतिः कृत्वा तत्तत्कण्टकपाटनम् । अपेतविघ्नं सौजन्यनिघ्नो व्यधित मण्डलम् ॥ २३८४॥

2385 विपक्षावरणापायप्रायेण पृथिवीभुजः । तैक्ष्ण्यमायान्ति जीमूतमुक्ता रविकरा इव ॥२३८५॥

परिणाममनोज्ञत्वं राजरत्नं स्वयं नृपः । माधुर्याधिक्यमुत्पाको द्राक्षाद्रुम इवाययौ ॥२३८६॥

प्रावर्तयत सातत्यात्क्रतून्विततदक्षिणान् । विवाहतीर्थयात्रादीन्महितांश्च महोत्सवान् ॥२३८७॥

संविभेजे स्वसंभारैः स क्रिया धर्मचारिणाम् । तेजोभिः कुलशैलानामोषधीरिव चन्द्रमाः ॥२३८८॥

प्रतिज्ञातं सुतोद्वाहप्रतिष्ठादौ पुरौकसाम् । तेनौपयिकसामग्रीदानमव्यग्रचेतसा ॥२३८९॥

2390 दारूणामाकराः कोश[1]वृद्धये ये धराभुजाम् । नवीचक्रे पुरं सर्वं स्वाधीनान्स विधाय तान् ॥२३९०॥

मज्जतो राजकार्येषु तत्त्वविद्भिर्हरार्चने । विस्मितैर्वीक्ष्यते तस्य निष्ठा काष्ठा मुनेरिव ॥२३९१॥

प्राह्णादारभ्य सायाह्न[1]पर्यन्तं चास्य दृश्यते । न तत्कृत्यं गता यत्र नाध्यक्षत्वं विचक्षणाः ॥२३९२॥

अविचारान्धतमसे विद्या व्यद्योततान्तरा । जयापीडादिमेघश्रीसौदामन्या विलोलया ॥२३९३॥

तेन श्रियं तु विश्राण्य स्थास्नुं रत्नप्रभामिव । गुणवैचित्र्यचित्रस्य प्रकाशोनश्वरः कृतः ॥२३९४॥

2395 सूरयो येन ———[1] विक्षतक्षेत्रसंपदाम् । ग्रामाणामाग्रहारेन्दु[2] सान्वयाः स्वामिनः कृताः ॥२३९५॥

विदुषां विततोत्सेधसौधास्तद्विहिता गृहाः । व्याप्ताः सप्तर्षिभिर्द्रष्टुमुत्कर्षमिव मूर्धसु ॥२३९६॥

प्रतिभाप्रभवे प्रज्ञोपज्ञे च पथि पान्थता । सार्थवाहं तमालम्ब्य निर्दोषा विदुषां स्थिता ॥२३९७॥

आसीद्यथार्थराजस्य शयानस्याप्यतिप्रियः[1] । कामं लिङ्गाभिषेकाम्भःसंक्षोभप्रभवो ध्वनिः ॥२३९८॥

निद्राणस्य तथा वेणुवीणादिपरिहारिणः । दयितं तस्य निर्द्वेषविद्वज्जल्पविकल्पनम् ॥२३९९॥

2400 काले श्रीललितादित्यावन्तिवर्मादिभूभुजाम् । सिद्धं न यत्प्रतिष्ठादि निष्ठां तदधुना गतम् ॥२४००॥

मठदेवगृहेष्वेवं[1] स्वकालप्रभवेषु यत् । सर्वेष्वेव कृता तेन निर्व्यपाया व्ययस्थितिः ॥२४०१॥

रत्नादेव्या दृढारूढभर्तृवल्लभताभुवः । सर्वप्रतिष्ठाप्रष्ठत्वं विहारः प्रथमं गतः ॥२४०२॥

रिल्हणोथ गुणग्रामबान्धवो धर्मपद्धतौ । बभूव पूर्वपथिकः समस्तामात्यसंततेः ॥२४०३॥

---

२३८१. 1) A °कार्यसत्रब्रह्मचारिणा, evidently corrupt; emendation doubtful. २३८२. 1) Conjectural reading; A सरगज°; C सुरगज°.—2) Thus A; perhaps read °स्पर्शनात्पूता; C °नात् जाता. २३८३. 1) Emended; A °न्तरं. २३९०. 1) A कोष°. २३९२. 1) A सायाह्न°. २३९५. 1) $A_1$ indicates a *lacuna* of three *aksharas*; C supplements संग्रामे.—2) Emended with G (*sec. manu*); A °ग्रहा×कन्दु. २३९८. 1) Emended; A °व्यतिश्रियः; cf. the passage ii. 126, to which evidently reference is made here. २४०१. 1) Perhaps read °ष्वेवं.

तपोधनांल्लब्धवर्णान्धर्मवृद्धांश्च शुद्धधीः । विस्रम्भभवनस्थोपि शक्तस्त्यक्तुं न यः क्वचित् ॥२४०४॥

कृष्णाजिनोभयमुखीदानमुख्यैः सुकर्मभिः । धर्मकन्याविवाहैश्च यस्याशून्यत्वमायुषः ॥२४०५॥ 2405

सर्वेषामाहिताग्नीनां निष्प्रत्यूहा महात्मना । सर्वयागोपकरणैर्येन विश्राणितैः क्रियाः ॥२४०६॥

भोगान्बुभुजिरे भव्यान्सत्त्रे सूत्रितविस्मये । यस्य वर्णाश्चतुःषष्टिः कुदृष्टचस्पृष्टचेतसः ॥२४०७॥

अग्रहारगणोदग्रैर्वितर्तैर्मठसेतुभिः । पुरे परिष्कृते येन द्वयोः प्रवरसेनयोः ॥२४०८॥

आद्ये प्रवरभूभर्तुः पत्तने प्रत्तविस्मयः । प्राप्तः प्रतिष्ठाप्रष्ठत्वं यत्कृतो रिल्हणेश्वरः ॥२४०९॥

लोकान्तरगतां कान्तां कृतिनोद्दिश्य सुस्सलाम् । भल्लेरकप्रपास्थाने विहारस्तेन कारितः ॥२४१०॥ 2410

मार्जार्यास्तिर्यगुचितस्नेहविस्मृत्यपोहतः । मृतामनुमृतायास्तन्नाम्ना यः ख्यातिमागतः ॥२४११॥

तद्भर्तुरीर्ष्याकालुष्ये तस्या दूराग्रगा पुरः । प्रदेशे मानुषीवासीत्प्रिया क्रीडाबिडालिका ॥२४१२॥

तीर्थप्रस्थानदिवसादारभ्यास्या विराविणी । उत्सृजन्त्याहृतं भोज्यं सा शुचा जीवितं जहौ ॥२४१३॥

आरोहति परां काष्ठां प्रतिष्ठाविविधाध्वना । दिद्दा नृपतिपत्नीषु मन्त्रिस्त्रीषु तु सुस्सला ॥२४१४॥

श्रीचङ्कुणविहारं या यातं नामावशेषताम् । अश्मप्रासादवेश्मादिकर्मणा निर्ममेधुना ॥२४१५॥ 2415

अरघट्टप्रबन्धान्धुच्छात्त्रशालादिकर्मभिः । तस्याः संपूर्णतां पुण्यप्राकारा निखिला गताः ॥२४१६॥

पूर्वराजकुलाखण्डस्थण्डिलव्यापिनाखिलम् । तद्विहारेण नगरं नीतं नेत्राभिरामताम् ॥२४१७॥

प्रापि प्रतिष्ठयेवाशु यक्ष्मक्षपितया तया । विपत्तिः श्रीसुरेश्वर्यां प्राज्यसायुज्यदूतिका ॥२४१८॥

मठाग्रहारा धन्येन वल्लभाभिधया कृताः । नाभीष्टं लेभिरे नाम ख्यातिः पुण्यैर्विना कुतः ॥२४१९॥

अग्रहारमठांस्तद्वदुदयः कम्पनापतिः । कृत्वापि स्वाभिधामेव तत्संबद्धां सदाशृणोत् ॥२४२०॥ 2420

उदयद्वारपतिना सह ब्रह्मपुरीगणैः । कृते प्रष्ठे मठे शोभां लेभे पद्मसरस्तटः ॥२४२१॥

शृङ्गारतन्त्रपतिना श्रीद्वारिप्यग्र्यजन्मना । प्रत्यष्ठापि मठोद्यानदीर्घिकाद्यनघात्मना ॥२४२२॥

स्नानकोष्ठमठब्रह्मपुरीसेत्वादिकर्मणा । सोलंचकारालंकारो बृहद्गञ्जाधिपो धराम् ॥२४२३॥

बुधः सदौषधीशान्तिहेतोर्जातः कलावतः । यः कविर्दानवत्त्वं च ख्यातस्त्यागेन योजयत् ॥२४२४॥

नृसिंहसेवी निर्हिंसहिरण्यकशिपुप्रदः । वराहसमये दत्तगौश्च योपूर्ववैष्णवः ॥२४२५॥ 2425

भट्टारकमठाभ्यर्णे पूर्णवार्धाविव ग्रहिः । मठः शृङ्गारभट्टस्य ख्यात्यानौचित्ययोज्झितः ॥२४२६॥

सांधिविग्रहिको दार्वाभिसारोर्वीभुजोकरोत् । अष्टमूर्तेर्जट्टनामा प्रतिष्ठां पुण्यकर्मठः ॥२४२७॥

पुष्पाकरप्रणयभूः सुभगा विभूतिरेकस्य हन्त करवीरतरोर्द्रुमेषु ।
पुष्पाणि यस्य सफलीकुरुते स्वयं तत्प्रादुर्भवत्किमपि लिङ्गमनङ्गशत्रोः ॥२४२८॥

विभूत्या संविभक्तेषु भूभुजाखिलमन्त्रिषु । उत्कर्षकोटिं भुट्टाख्यः परं जल्हानुजोर्हति ॥२४२९॥

स्वयंभूः प्रकटीभूय पूजां स्वीकुरुते स्वयम् । ज्येष्ठरुद्रो वासिष्ठस्य यस्य वा बालकेश्वरः ॥२४३०॥ 2430

सविहारमठोदग्रवेश्मभिः कलुषोज्झितम् । तेन तत्र कृतं भुट्टपुराख्यं पुटभेदनम् ॥२४३१॥

---

२४०४. [1]) Emended with C; A तपोधनाल्ल°. २४१०. [1]) Thus A; cf. vii. 1239, where बल्लेरकप्रपा°. २४१३. [1]) Emended with C; A उत्सज°. २४१४. [1]) Emended; A °धुना. २४२५. [1]) Doubtful emendation; A °कशिपुदः, without indicating the *lacuna*; C °कशिपुच्छिदः. २४२९. [1]) Emended; A उत्कदृकोटिं. २४३१. [1]) Emended; A °षोज्झितः.

नगरेपि हरः प्रत्यष्ठापि भुट्टेश्वराभिधः । सरश्च मडवाग्रामे धर्मविभ्रमदर्पणः ॥२४३२॥
नीत्वा प्रतिष्ठां वैकुण्ठमठादि स्वविहारभूः । रत्नादेव्या दृढं चक्रे स्वार्थग्रथनसुस्थिरा ॥२४३३॥
रत्नापुरे बहुद्वारमहार्घे निरघो मठः । धत्ते सुकृतहंसस्य स्फीतवीतंसविभ्रमम् ॥२४३४॥
2435 मृत्युंजयो राजतेस्याः सुधाधौतान्भजन्गृहान् । जनस्यानित्यतोच्छित्त्यै श्वेतद्वीपं सृजन्निव ॥२४३५॥
गोकुलानां विधातारो गोकुले विहिते तया । गणिताः शूरवर्माद्याः सतृणाभ्यवहारिणः ॥२४३६॥
गवामव्याहतस्वैरसंचारचरकाञ्चिते । तत्र वैतस्ततोयाढ्ये यदपोढामयं वपुः ॥२४३७॥
मुकुन्दस्तत्र साश्चर्यसौन्दर्यौदार्यमन्दिरम् । अश्वा गोवर्धनधरः सिद्धो ना विश्वकर्मणः[1] ॥२४३८॥
मठ – – – कृत्वा सा नन्दिक्षेत्रेकरोत्क्षितिम् । – – जयवनाद्येषु स्थानेषु च मनोरमान्[1] ॥२४३९॥
2440 दार्वाभिसारे[1]ष्युर्वीश[2]सुन्दरौदार्यमन्दिरम् । स्वनामाङ्कं पुरं चक्रे तया शक्रपुरोपमम् ॥२४४०॥
उद्दिश्योपरतान्मान्यमहत्तरमुखानपि । प्रतिष्ठा विविधाश्चक्रे सा राज्ञ्याश्रितवत्सला ॥२४४१॥
एवं सर्वाङ्गमामुक्तालंकृतेरथ स क्षितेः । विशेषकाभं भूभर्तृवृषा स्वमकरोन्मठम् ॥२४४२॥
अनुत्सिक्तेन यो दत्तभूरिग्रामो महीभुजा । तज्ज्ञैरारोपितः ख्यातिं मुख्यः सिंहपुराख्यया ॥२४४३॥
व्यधात्कारपथेशस्य दौहित्रः सिन्धुजान्द्विजान् । निविडान्द्रविडांश्चात्र प्राक्सिद्धच्छत्त्रमध्यगान् ॥२४४४॥
2445 किं वा मठादिनिर्माणस्तुल्या तस्य व्यधत्त यः । भूयः सग्रा[1]मनगरं कृत्स्नं कश्मीरमण्डलम् ॥ २४४५॥
जीर्णारण्यसधर्मायं कालदौरात्म्यतो भवन् । देशो धनजनावासैस्तेन भूयोपि योजितः ॥२४४६॥
आरम्भात्प्रभृति क्ष्मापे दीक्षितेभीष्टदत्तिषु । शिल्पिप्रायैरपि प्रायो मठदेवगृहाः कृताः ॥२४४७॥
सत्कोशांशुकरत्नादौ निरसूयेन भूभुजा । साधारणीकृते पौरास्तांस्तांश्चक्रुर्महोत्सवान् ॥२४४८॥
अकाण्डतुहिनापातोदीपाद्यैरप्युपद्रवैः । नष्टेषु शालिषु क्षीणं[1] सुभिक्षं तत्र न क्षणे ॥२४४९॥
2450 अद्भुतं चाभवद्वाचः श्रुता यन्निशि रक्षसाम् । केत्वाद्युत्पातजातं च दृष्टं नष्टाश्च न प्रजाः ॥२४५०॥
कोष्ठेश्वरानुजश्छुड्डुनामा विहितविप्लवः । आहवैर्गूढदण्डैश्च राज्ञा निन्ये[1]न्तकान्तिकम् ॥२४५१॥
चक्रे विक्रमराजादीन्भूपानुन्मथ्य पार्थिवः । प्ररोहं गुल्हणादीनां राज्ञां वल्लापुरादिषु ॥२४५२॥
प्रजेशान्[1]कान्यकुब्जादावजर्येण नृपार्यमा । स व्यधाद्भव्यभूभोगवैभवानभिमानिनः ॥२४५३॥
विद्योतमाने निश्चोद्यैर्मन्त्रैस्तत्रैवमेकदा । भेजे जीवितदारिद्र्यं दरद्राज्ञो यशोधरः ॥२४५४॥
2455 स भूम्यनन्तरोप्यन्तरज्ञो राज्ञोतिसेवया । विपत्तौ प्रकृतिक्रान्तसंतानश्चिन्त्यतामगात् ॥२४५५॥
निकृत्यास्य निजामात्यो विड्डसीहाभिधो यतः । संभुज्य दयितां राज्यमप्रौढतनयेग्रहीत् ॥२४५६॥
वशीकृत्य शनैर्देशं नाममात्रनृपं शिशुम्[1] । उच्छेत्तुमैच्छद्यावत्तं स जिघृक्षुः स्वयं क्षितिम् ॥२४५७॥
अन्योमात्यः पुरस्कृत्य यशोधरसुतं परम् । तावत्तेन समं भेजे पर्युकाख्यो विपर्ययम् ॥२४५८॥युग्मम्[1] ॥

२४३८.—२४३९. [1]) The last two *pádas* of verse 2438 and the following verse are found in the above, mutilated form in A at the foot of fol. 290, having been added subsequently by $A_1$; C reads: मठप्रतिष्ठां कृत्वा सा नन्दिक्षेत्रेऽकरोत् स्थितिं । विहारान् यवनाद्येषु स्थानेषु च मनोरमान्. २४४०. [1]) The first two *pádas* of this verse have been subsequently added by $A_1$ at the top of fol. 291.—[2]) Emended; A दार्वासारे°; C दार्वागरेष्वप्यू°. २४४५. [1]) Emended; A सङ्ग्राम°. २४४९. [1]) Thus $A_1$ originally; corr. by $A_1$ to शालिष्वक्षीणं. २४५१. [1]) Emended with C; A निन्येन्तिका°. २४५३. [1]) Emended; A प्रजेशा×का°. २४५८. [1]) $A_1$ २. २४५७. [1]) Emended; A °मात्रशिशुं नृपम्.;

कश्मीरान्प्रस्थतः कृत्वा द्वैराज्यं तत्र कुर्वति । उत्सृज्य सज्ञपालादीन्सर्वकार्यभरक्षमान् ॥२४५९॥
हेवाकप्रतिपत्त्यान्याभिधमौग्ध्यनिरुद्धधीः । सर्वाधिकाराद्यारोपान्मन्यमानोभिमानिताम् ॥२४६०॥ 2460
पर्युकाजर्यतः साज्जेर[1]प्रौढमनुजं निजम् । प्रहिण्वतोनुमन्त्रित्वं मन्त्रज्ञोप्यभजन्नृपः ॥२४६१॥तिलकम्[2]॥
अपूर्वमण्डलारब्धावाटोपाद्धामशालिनः । क्व सर्वंकषनिष्कम्पप्रतिभाः कार्यवेदिनः ॥२४६२॥
क्व बालबा[1]लिशप्रायो नष्टव्यवहृतिर्जनः । धिक्परीपाकविषमं स्वाच्छन्द्यं मेदिनीभुजाम् ॥२४६३॥युग्मम्[2]॥
कार्यापेक्षविपक्षैः स्वैरिच्छन्त्युद्रिक्ततांच्छिदाम् । सैन्यक्ष्मादुर्गकोशादेर्न – शन्त्य[1]न्तरज्ञताम् ॥२४६४॥
प्रक्रियामात्रतो मन्त्रं गृह्णन्ति क्षित्यनन्तराः । कृतसाहायकैरेव चिन्त्या मित्रमुखा द्विषः ॥२४६५॥ 2465
युक्त्यारब्धविधौ तत्र वैरिसाहायकग्रहे । क्व वैधेया बकप्रायाः[1] कार्यसंदर्भवेदिनः ॥२४६६॥
दरद्राजद्रुमोन्योन्यभेद[1]कूलक्षयाच्युतः । क्रष्टुं नाशक्यतप्रौढैः स्रोतोभिरिव मध्यगः ॥२४६७॥
पर्युकात्संकटे कार्ये तं तमुत्कोचमिच्छतः । स दुग्धघातमादातुमप्यासीदलसक्रमः ॥२४६८॥
पर्युकेण समं विड्डसीहः संधिं निबद्धवान् । यथागतं गते साज्जौ[1] कश्मीरेन्द्रेमहीद्रुषम् ॥२४६९॥
सर्वाधिकारप्रवगाचिरसंचारभूरुहः । प्रसङ्गे तत्र शृङ्गारो मृत्युसौहित्यकार्यभूत् ॥२४७०॥ 2470
आ लक्ष्मकान्तात्सर्वाधिकारोस्थादद्वितीयया । वृत्त्या ततस्तु शतधा निर्झराम्भ[1] इवाभवत् ॥२४७१॥
अन्येप्यमात्याः सांमत्याद्भर्तुर्माहात्म्यभागिनः । प्रमयं समये तस्मिन्दैवात्किमपि लेभिरे ॥२४७२॥
प्रशंसामानृशंसस्य किं विदध्मो धराभुजः । मृतामात्यार्भ[1]कापत्यं निधत्ते यः पितुः पदे ॥२४७३॥
प्रवर्तिता त्वमात्यानां भृत्यैः पद्धतिरद्भुता । निर्वैलक्ष्याः प्रभोर्लक्ष्मीं जह्रुः स्वगृहिणीमिव ॥२४७४॥
भूभर्तुः प्राभृतीकृत्य मृतस्य स्वामिनः श्रियम् । संतानस्य विभूत्यर्थं कृत्वा कार्यं हि तेहरन् ॥२४७५॥ 2475
गञ्जाधिपे विश्वनाम्नि विपन्ने रक्षिता परम् । एकेन सहजाख्येन सहायानां महार्घता ॥२४७६॥
नाध्यारुरोहाधिकारं पार्थिवेनार्थितोपि यः । स्वामिसूनोष्टिष्टनाम्नो वृद्धौ साहायकं व्यधात् ॥२४७७॥
निष्ठायामप्रतिष्ठत्वं दृष्ट्वापि प्रभविष्णुभिः । धिक्परंपरया भृत्याः प्रावर्ध्यन्तेधिकाधिकम् ॥२४७८॥
आसीदाचमनोपयोगि कलशे स्रष्टुर्जगल्लङ्घनक्रान्ताङ्घ्रिक्रमहार्यथासुररिपोस्त्रैस्रोतसं यत्पयः ।
शंभुस्तन्निदधे स्वमूर्धनि जडेप्येकप्रयुक्तादृतौ स्युः सर्वेप्यवशा गतानुगतया गाढादराः स्वामिनः ॥२४७९॥
सुज्जिनि[1]र्वासनप्राप्तप्ररोहो दुर्नयद्रुमः । साज्जिजाद्यकृताप्यायः क्रमेणासीत्फलोन्मुखः ॥२४८०॥ 2480
द्वित्राः समाः समन्युः स विड्डसीहस्ततोभवत् । अकुण्ठराज्याद्युत्कण्ठं दूतैरकृत लोटनम् ॥२४८१॥
दूरादख[1]ण्डितोत्थानः शूरमाश्रित्य भूपतिम् । जीवन्[2]कृषिवणिज्यादिकर्मणा स सबान्धवः ॥२४८२॥
दरदां मन्त्रिणां जातज्ञातेयैरभियोगभाक् । चक्रेलंकारचक्राद्यैर्डामरैः सह चक्रिकाम् ॥२४८३॥युग्मम्[1]॥
सो[1]प्यद्रिदुर्गस्वाम्यस्य प्रथमप्रस्थितो सुहृत् । क्षुद्रो जनकभद्राख्यः पार्श्वं लिप्सोर्व्यपद्यत ॥२४८४॥
कर्णाढकादावभवत्स्थाने स्थाने विलोक्य तम् । प्रस्थितं कस्यचिद्द्रोहे बुद्धिः कस्यापि साधुता ॥२४८५॥ 2485

---

२४६१. [1]) Emended; A सज्जे°.—[2]) $A_1$ ३. २४६३. [1]) A °वालि°.—[2]) $A_1$ २. २४६४. [1]) Thus A; perhaps read विश-न्त्यन्त°; C न शंसन्त्य°. २४६६. [1]) Emended; A apparently वैधेयान्बकप्रायान्कार्य°, as read in R C. २४६७. [1]) Emended; A °न्योन्यं भेद°. २४६९. [1]) Emended; A सज्जौ. २४७१. [1]) Emended with G (*sec. manu*); A निर्भरा. २४७३. [1]) Emended with C; A °मात्यर्भका°. २४८०. [1]) Emended; A सुज्जिर्नि°. २४८२. [1]) A दूरा–खण्ड°.—[2]) Emended; A जीवल्कृषि°. २४८३. [1]) $A_1$ २. २४८४. [1]) Doubtful emendation; A साप्यद्रि°.

तं तथा विपुलारम्भमपि शाठ्यादसंभ्रमम् । प्रविविक्षुमुपैक्षिष्ट कौसीद्यानुद्यमो नृपः ॥२४८६॥

पोषिते प्रेषितश्रीकैरुत्पिञ्जे विप्लवैषिभिः । अथोदयद्वारपतिः प्रैषि विश्वंभराभुजा ॥२४८७॥

संगृह्णता चमूस्तेन[1] पुरे शंकरवर्मणः । प्राप्तोलंकारचक्रस्य पार्श्वमश्रावि लोठनः ॥२४८८॥

अपि विग्रहराजाख्यः सूनुः सुस्सलभूपतेः । भोजः सल्हण[1]जन्मा च श्रुतौ तेन सहागतौ[2] ॥२४८९॥

2490 अथोपह‾ ‾[1]त्थान एव तेषां स सत्वरः । मार्गं बहुदिनोल्लङ्घ्यमेकेनाह्ना व्यलङ्घयत् ॥२४९०॥

सयूथ्यकन्थाग्रथनासिद्धेर्यातो विधेयताम् । तदास्कन्दहतस्पन्दः स पलायिष्ट डामरः ॥२४९१॥

सिन्धोर्मधुमतीमुक्ताश्रिया अन्त[1]:स्थितं ततः । शिरःशिलाभिधं कोट्टमथ तैरधिशिश्रिये ॥२४९२॥

गहने त्रुटितः कोट्टे स्थितः किं वा स इत्यसौ । न निश्चिकाय द्वारेशो भ्राम्यन्दीर्घासु भूमिषु ॥२४९३॥

अथोपालब्धतद्दुर्गारोहणेऽस्मिन्नशङ्क्यत । दैवेनापि न भूभर्तुः प्रभावो निष्पराभवः ॥२४९४॥

2495 उत्थानोन्मुखतां सर्वेप्युत्पिञ्जे तत्र दस्यवः । पाल्वलास्तिमयो वर्षपृथक्कृत इवाभजन्[1] ॥२४९५॥

तैस्त्रिल्लकादिभिर्गूढवैकृतैरथ लोठनः[1] । पार्थ्वहिरिः[2] पुनश्चक्रे मायाचतुरचाक्रिकैः[3] ॥२४९६॥

पुरग्रामादिदग्धारमसाध्यमथ धावताम् । पदे पदे कृच्छ्रगतं स्वपक्ष्यास्तमरक्षिषुः ॥२४९७॥

दिक्चक्रे नियतेर्भ्राम्यन्दृश्यादृश्यः स सर्वतः । कल्पात्ययोदयी ब्रह्मपुत्रः केतुरिवाभवत् ॥२४९८॥

श्रान्तैरमात्यैर्निर्बन्धे संधौ कालानुरोधतः । मेने मडवराज्योर्वी हारितेवाखिला जनैः ॥२४९९॥

2500 असंवृत्तप्रतीकारतयारोहत्सु वैरिषु । तदन्तरेऽथ संमन्त्र्य धन्यं प्रास्थापयन्नृपः ॥२५००॥

तत्स्कन्धा[1]रोपिते कार्ये व्रीडां गच्छेत्तटस्थताम् । विपर्यासमथ द्वाराधीश इत्यभ्यधाज्जनः ॥२५०१॥

भिक्षुर्मल्लार्जुनस्त्वासीदेक एव त्रयस्त्वमी । संहता हन्त दुःसाधा दध्युश्चेत्यखिलाः प्रजाः ॥२५०२॥

द्वाराधिपस्त्वहेवाकव्यवहारो महीपतेः । सिद्धिं स्वस्याप्रसिद्ध्यापि वाञ्छन्हृद्योद्यमोऽभवत् ॥२५०३॥

एकाकी यः किल न भजते मूढतां भर्तृकार्ये नौदासीन्यं श्रयति च रुषा बद्धधीने च तस्मिन् ।
निर्हेवाकव्यवहृतितया साध्यसिद्धिं किलेच्छंस्तादृङ्मन्त्री प्रभवति परं नाल्पपुण्यस्य राज्ञः ॥२५०४॥

2505 पञ्चचन्द्रे मृते तस्यानुजं राजोपवेशने । न्यधाद्यं षष्ठचन्द्राख्यं सोप्यारब्ध्यै विनिर्ययौ ॥२५०५॥

द्विबाहुकादयो मुख्य‾ ‾ ‾[1]: सह गायकैः । धन्यमेवान्वयुर्बाह्याश्चान्ये राजोपजीविनः ॥२५०६॥

धन्यादिषु तिलग्रामं कोटसिन्धुतटाश्रयम् । अय‾ ‾ ‾[1]द्वारेशो द्रङ्गस्थः पृष्ठपद्धतीः ॥२५०७॥

हटप्रवेशायोग्याजिमुख्यहेवाकवर्जितः । शोषयन्द्विषतो धैर्यगम्भीरं स व्यवाहरत् ॥२५०८॥

कुठारिकादिभिः कारुवृन्दैर्मन्दिरपद्धतीः । धन्यो मधुमतीतीरे नगरस्पर्धिनीर्व्यधात् ॥२५०९॥

2510 निश्चर्वान्तं द्रुमसंबाधं सनिकेता वनस्थलीः । कटकं सर्वभोगाढ्यं शक्तः परिवृढोकरोत् ॥२५१०॥

देशे भूरितुषारोग्रहिमर्तौ भाग्यसंपदा । भूभर्तुरभियोग्यैव भूरभूद्धानुभूषिता ॥२५११॥

भुवनाद्भुतसंभारप्रेषणं विजयैषिणः । द्वैराज्यमीलिताज्ञेऽपि काले राज्ञो न खण्डितम् ॥२५१२॥

---

२४८८. [1]) Emended; A च मूर्तेन. २४८९. [1]) Emended; A सुल्हण°.—[2]) Emended with C; A °गता. २४९०. [1]) Thus A; perhaps read अथोपहत्या उत्थान; cf. viii. 2513; C अथोपाचित उत्थान. २४९२. [1]) Conjectural reading; A °श्रियरन्त-स्थितं; G (*sec. manu*) °श्रिय अन्ते स्थितं. २४९५. [1]) Doubtful emendation; A °भवन्. २४९६. [1]) Comp. for this name viii. 2799. 2912. 3313.—[2]) Emended; A पा‾हरिः; cf. viii. 2748. 2759. 2793. 2837.—[3]) Emended; A °क्रिकैः. २५०१. [1]) A तस्कन्दा°. २५०६.[1]) A does not indicate the *lacuna*; C मुख्याश्चारणैः. २५०७.[1]) Thus A; perhaps read with C अयत्स्वगच्छद्दा°.

उत्थान एवोपहर्ति[1] भये यास्यत्यगात्परम् । भारोढिपीडितग्राम्याक्रन्दः क्षान्तिचरू[2]पमाम् ॥२५१३॥

दीर्घप्रवासनिर्वेदाच्चलितान्दर्[1]शयन्नुषम् । स्थास्नूंश्च तोषयन्दायैः स्थैर्यं निन्ये नृपश्चमूः ॥२५१४॥

इत्थं त्रिचतुरान्मासांस्तिष्ठद्भिरपि निष्ठुरैः । नैवादातुमशक्यन्त कटकैः कोट्टसंश्रयाः[1] ॥२५१५॥ 2515

तेषां हि वीवधासारनिरोधादीनि दृप्यताम् । अप्रियाणि न जातानि दैन्यदायीनि कानि चित् ॥२५१६॥

चिकीर्षवस्तुषारान्ते स्वविभूतिप्रकाशनम् । तस्थुरङ्कुरितोल्लासाः पर्वता इव डामराः ॥२५१७॥

कृषिं कृषीवलैर्वेदपाठमुत्सृज्य च द्विजैः । उत्पिञ्जसज्जैर्ग्रामेषु सर्वतः शस्त्रमादधे ॥२५१८॥

प्रतीक्षमाणाः प्रालेयप्रलयं मार्गभूभृताम् । दारदास्तुरगानीकैः सज्जैस्तस्थुर्जिगीषवः ॥२५१९॥

मिहि[1]कासंहतेः कालतूलतल्पाकृतेर्दधत् । पातभीतिं जनो राजसेना शश्वदवेपत ॥२५२०॥ 2520

इत्थं प्रत्यर्थिसामर्थ्यपरमार्थापरीक्षणात् । क्ष्माभृन्मिथ्यैवमारेभे संदेहं च जयेभजत् ॥२५२१॥

वैदग्ध्यदिग्धमनसामयमेक एव कोप्यस्ति वञ्चनविधेरुचितः प्रकारः ।
येनात्मना किल विशङ्कितशक्तयस्ते मुग्धेपि वैरिणि विचारहतोद्यमाः स्युः ॥२५२२॥

प्रवादमात्रसाराद्यस्त्रसेत्परिकरादरेः । स्वयैव तस्य विघ्न्येत सिद्धिश्चिन्तान्धया धिया ॥२५२३॥

विध्येदाशु शिलीमुखैः प्रवितरेत्पत्त्रैरवस्कन्दनं बध्नीयात्तदिदं गुणैः परिकरैर्मिथ्या प्रसिद्धैरिति ।
स्याच्चेदम्बुरुहं द्विपस्य भयकृच्चिन्तासहैः साहसं प्रत्यूहेत ततो निजैरपघनैरप्येतदुन्मूलने ॥२५२४॥

लोठनाद्यैर्हि कर्णाहा[1]न्निस्तीर्णैस्तैः कथंचन । प्राप्तेलंकारचक्रेग्रे राज्यमज्ञायि निर्जितम् ॥२५२५॥ 2525

मिथ्यैव प्रथिता कन्था स्वयूथ्यैः कथमन्यथा । तस्मिन्नमन्दमास्कन्दं धावन्द्वाराधिपो ददौ ॥२५२६॥

प्रत्यवस्थित्यसामर्थ्यात्ततः कोट्टं व्यसर्जयत् । स राजबीजिनस्तांश्च परेद्युः स्वयमन्वगात् ॥२५२७॥

कोट्टाद्रिः सलिलस्यान्तः कृशो[1]धः पृष्ठदैर्घ्यभाक् । स तैर्वैसारिण[2]ग्रासव्यग्रो बक इवैक्ष्यत ॥२५२८॥

निःसामर्थ्यं तद्विलोक्य गजागारमिवागजम् । तत्यजुर्विजयाशंसां भयं चोदवहन्हृदि ॥२५२९॥

ततः शरैर्दृ[1]षद्वर्षैर्बाध्याश्चेतो विरोधिनः । अर्णसो रक्षणमितो रक्ष्या यन्त्रोपला इतः ॥२५३०॥ 2530

इत्थं स तैरभिदध[1]द्धैर्यादादाय डामरः । मेने स्वगुप्तिमात्रार्थी न युद्धे बद्धनिश्चयः ॥२५३१॥युग्मम्[2]॥

ततः कन्दलितास्कन्दे तिलग्रामे द्विषद्बले । प्रतीकाराक्षमे दस्यौ ते चिन्ताक्षामतां दधुः ॥२५३२॥

विस्रवाविस्रुतप्रज्ञासौष्ठवो लोठनः पुनः । डामरं कृत्यसंपूर्णमगूढं तमगर्हत ॥२५३३॥

भोजं[1]स्तूद्विजितं यन्नो द्रोहो रोहेदिति ब्रुवन् । रुद्ध्वा पितृव्यं तं व्याजस्तुत्या नित्यमुपाचरत् ॥२५३४॥

विमुखे लोठनेकुण्ठशाद्यस्तस्य तु सान्त्वनैः[1] । मेने मन्त्रज्ञतां किंचित्सोवर्तिष्ट[2] च संविदि ॥२५३५॥ 2535

हन्यान्मां भूभृदित्येष यातेष्वेतेषु संत्यजेत् । नास्मानुक्त्वेत्यरौत्सीत्स पितृव्यं गमनार्थनात् ॥२५३६॥

त्वय्यस्मासु च सर्वेषु वेष्टितेषूत्कटा द्विषः । पृष्ठकोपमसंभाव्य कुतश्चिन्निश्चलोद्यमाः ॥२५३७॥

---

२५१३. [1]) Doubtful emendation ; A एवौपह॰भये ; C एवोपहतभये.—[2]) Emended ; A °क्रन्दं क्षान्ति° (the letter क्ष is of unusual shape and resembles इश) ; C क्षान्तिचमू°. २५१४. [1]) Emended ; A चलितां ; another possible emendation would be चलिता दर्शयन्नुषम् । स्थास्नूश्च. २५१५. [1]) Emended ; A संशयाः. २५२०. [1]) Emended with G (*sec. manu*); A हिमिका°. २५२५. [1]) Thus A ; cf. कर्णाढका° viii. 2485. २५२८. [1]) Emended ; A कृषोधः.—[2]) Emended with C ; A तैर्वैसारण°. २५३०. [1]) Emended ; A शरैर्द्विषद्व°. २५३१. [1]) Emended ; A तैरभिदद्धैर्या° ; C तैरभिरुद्धैर्य्यावदा°.—[2]) $A_1$ २. २५३४. [1]) Emended ; A भोजं ; R भोजो. २५३५. [1]) Emended ; A सान्त्वनेः ; C सान्त्वने.—[2]) Doubtful emendation ; A °त्सवर्तिष्ट च ; C °त्समवर्तिष्ट सं°.

यद्यद्विदध्युः सिध्येत्तत्तदेकं त्यज मामितः । अन्यांश्चवन्यानानीय दरदो वा जवेनं[1] वः ॥२५३८॥
बन्धनं त्वपनेष्यामि युक्तमित्युक्तवांश्च तम् । डामरं विदधे किंचिदिव सांमत्यमाश्रितम् ॥२५३९॥
2540 विमोक्ष्यामि क्षपायां त्वामद्य श्वो[1] वेति तं ब्रुवन् । स त्वसंक्षीण[2]दाक्षिण्यो विप्रलेभे प्रतिक्षणम् ॥२५४०॥
अध्वरोधे सुदूरस्थैर्यथावदकृतेरिभिः । बाह्यग्रामाहृतैरन्नैस्ते त्वहान्यत्यवाहयन् ॥२५४१॥
दुरुदर्कमथाशङ्क्य समयं ते व्यजिज्ञपन् । धन्यादयोहितैः संधिर्विधेय इति भूपतिम् ॥२५४२॥
तैस्तैर्निमित्तैः संधानमविधेयं विदन्नृपः । तानादिदेश कर्तव्यं कोट्टाट्टालकवेष्टनम् ॥ २५४३ ॥
संदिदेश च दायादा वञ्चेरन्ख्यातिमागताः । निजास्पदे ताञ्जहति दत्तोत्कोचेथ डामरे ॥ २५४४ ॥
2545 भूत्वा कठोरे[1]ष्यारम्भानिष्ठा निः[2]सौष्ठवा ध्रुवम् । क्रियातिपत्त्युपालम्भैर्यास्यामोनुशयं[3] विशाम् ॥२५४५॥ ॥
नात्यक्षद्धर्षदेवश्चेत्सप्राहान्युद्यमं ततः । दुग्धप्रवाहं प्राप्स्यत्स[1] श्रुत्वेत्यन्योपि तप्यते ॥२५४६॥
प्राप्तव्यं प्राप्तवान्सर्वो निजैः कृत्यैः शुभाशुभैः । क्रियातिपत्तिर्लोकेत्र[1] त्रैलोक्यं तु मुखेर्प्यते ॥२५४७॥
पादेषु पक्षेषु च सत्सु नोर्व्यां न व्योम्नि वा पक्षपिपीलकस्य ।
पङ्ग्वन्धवच्चङ्क्रमणं तु गर्ते[1] किं संपदा स्यान्नियमे गतीनाम् ॥२५४८॥
सहस्रपादस्य गतेर्निमित्तमनूरुभावेप्यरुणः प्रजातः ।
तस्याभविष्यद्यदि पादयुग्मं ततोधिकं तत्किमिवाकरिष्यत् ॥२५४९॥
2550 उपेक्ष्य साक्षितां तस्मात्कृत्स्नं कोट्टं विवेष्ट्यताम् । प्रयातु तत्रैवास्माकं तेषां च पुरुषायुषम् ॥२५५०॥
अविश्रान्तो वातो दहन इव सोयं जनयति प्रसक्तिं सातत्याद्दलयति कुलाद्रीनपि जलम् ।
प्रसूते कृत्येषु व्यवसितिरनिर्व्यूढसुदृढा फलावाप्तिं लोके प्रतिकलमसंभाव्यविभवाम् ॥२५५१॥
क्रूरां नरपतेराज्ञां श्रुत्वा धन्यादयस्ततः । कोट्टप्रतोलीं कूलं तं त्यक्त्वाप्यारुरुहुर्जवात् ॥२५५२॥
कथं युद्धं विधास्यन्ति कथं स्थास्यन्ति वेति तान् । शरान्किरन्तः कोट्टस्था यावत्प्रैक्षन्त[1] कौतुकात् ॥२५५३॥
अधः सो[1]प्यूर्ध्वगान्युद्धैर्निष्पीड्य निविडैर्व्यधात् । धन्यः प्रदेशं तावन्तं निकेतैः पत्तनोपमम् ॥२५५४॥युग्मम्[2]॥
2555 अविश्रान्तैस्ततः संख्यैरसंख्येयश्रमूक्षयः । प्रतिक्षणं प्रववृते सैन्ययोरुभयोरपि ॥२५५५॥
परेद्युः शारदां दृष्ट्वा संप्राप्तो गर्गनन्दनः । संक्रन्दनपुरीपौरवृद्धिं योधैर्हतै[1]र्व्यधात् ॥२५५६॥
अलंकाराभिधो बाह्यराजस्थानाधिकारभाक् । अधृष्योमानुषैर्युद्धैर्विरुद्धान्बहुधावधीत् ॥२५५७॥
क्व भूधरचरैः स्पर्धा वसुधातलचारिणाम् । तथापि पृतनायन्त्रानन्त्यं चिन्त्यमचिन्त्यकृत् ॥२५५८॥
अल्पीयांसः कोट्टनिष्ठा भूयिष्ठाः कटकाश्रयाः । अतः पूर्वं बहून्घ्नन्तोप्यासन्कृत्यात्पया क्षताः ॥२५५९॥
2560 श्लिष्टद्वाराररिपटं द्वित्रैः पीडितमाहवैः । मीलिताक्षमिव त्रासात्ततो दुर्गमजायत ॥२५६०॥
गोप्तृभेदान्तरद्वैधमुखच्छिद्रानुसारिणः । धन्यादीन्वीक्ष्य विश्वासं कोट्टस्था नोपलेभिरे ॥२५६१॥
निद्राच्छेदार्थमन्योन्यं क्रोशन्तो नास्वपन्निशि । स्वपन्तोह्नि तु निःशब्दशून्यं कोट्टमदीदृशन् ॥२५६२॥

---

२५३८. [1]) Emended with G (*sec. manu*); A वा˘येन; C यवेन. २५४०. [1]) Emended with C ; A ह्यो.—[2]) Emended with C; सत्त्वसङ्क्षी°. २५४५. [1]) A कठो˘प्या°; C कठोरोऽप्या°.—[2]) Could be read in A also °निष्टान्नि°.—[3]) A °स्यामो˘शयं C °स्यामोऽसंशयं. २५४६. [1]) Emended; A प्राप्स्यन्स. २५४७. [1]) Emended; A °र्लोके त्रैलो°.; C °र्लोकेऽपि. २५४८. [1]) Emended with G (*sec. manu*); A गर्भे. २५५३. [1]) Emended; A °त्प्रैक्ष्यन्त. २५५४. [1]) Thus A; perhaps read अधःस्थो.—[2]) $A_1$ २. २५५६. [1]) Emended with G (*sec. manu*); A °पौरयोधैर्वृद्धिं हतै°.

निशासु तत्तत्पृतना यामतूर्यरवैरपि । चटकाः कोटरगता मेघशब्दैरिवात्रसन् ॥२५६३॥

अहर्निशं भ्रमन्तीभिर्नौभिः संरुद्धपाथसः । तान्समभ्र[1]मयन्सर्वप्रकारं राजसैनिकाः ॥२५६४॥

ते रुद्धपाथसस्तर्षशोषं[1] कंचिद्विषेहिरे । निःसंचारास्तु संक्षीणे भोक्तव्ये क्लैब्यमाययुः ॥२५६५॥ 2565

बुभुक्षवः क्ष्मापयोग्यान्भोगान्भाग्योर्जितांस्ततः । कदन्नैर्नृपदायादा अशनाशंसनं[1] व्यधुः ॥२५६६॥

दूरे स्पर्धास्तु निस्तीर्णाः क्षुधितास्तेधिकं व्यधुः । भूभर्तुर्भोगभागिभ्यो भृत्येभ्योप्यन्वहं स्पृहाम् ॥२५६७॥

व्यूहेष्वस्माद्धु पर्याप्तमकार्यमिति भाषिणम् । भोजं व्यधान्मध्यशृङ्गे दुर्गस्याथ स तं पृथक् ॥२५६८॥

एकस्य वार्द्धकाद्वेश्यापुत्रत्वादपरस्य च । जानन्नयोग्यतां मेने द्वैराज्यार्हं तमेव सः ॥२५६९॥

विनामुं चानयोः सम्यक्संरम्भेरन्न वैरिणः । इति मिथ्या प्रथां निन्ये तद्विनिःसरणं बहिः ॥२५७०॥ 2570

कान्तालंकारचक्रस्य काङ्क्षन्ती क्षयमित्वरी । चक्षूरागात्षष्ठचन्द्रे सान्द्रस्नेहार्द्रतां गता ॥२५७१॥

बहिराभ्यन्तरं भेदं नयन्ती मन्त्रमाययौ । साल्हणेः कर्णसरणिं सर्वमन्विष्यतोन्वहम् ॥२५७२॥ युग्मम्[1]॥

रागध्वान्तान्वितधियः प्रतिभेदभयेन सः । तस्य प्रका[1]शयन्नेनां गन्तुं तु प्रार्थनां व्यधात् ॥२५७३॥

क्षमावाञ्छिशक्षितोपेक्षो मैत्रीस्थैर्ये मुदं भजन् । नागः सागस्यपि दधे बोधिसत्त्व इव क्रुधम् ॥२५७४॥

प्रियामन्युः सरागेण मृत्युहेतुर्महानपि । हृदि विस्मर्यते पृष्ठे शरभेणेव वारणः ॥२५७५॥ 2575

अथ प्रस्थापितो भोजः सुप्तारिशिबिरा[1]न्तरात् । यातप्रायोप्यलंकारतनयेनानुयायिना ॥२५७६॥

द्रोहेच्छया भयाद्वापि ध्वस्तसत्त्वेन सत्वरम् । व्यावृत्यारोपितो भूयः कोट्टस्थस्यान्तिकं पितुः ॥२५७७॥युग्मम्[1]॥

निर्भर्त्स्य[1] पुत्रं गन्तासि श्वो निशीत्यभिधाय तम् । छन्नमस्थापयत्सोह्नि यात इत्यखिलान्वदन् ॥२५७८॥

प्रोच्चल्यानिश्चयादेकः प्रायाह्नौ श्वः प्रयास्यतः । बोधितैरथ धन्याद्यैरजागार्यखिलैर्निशि ॥२५७९॥

प्रस्थास्नुः स निशीथेथ कोट्टाट्टालाद्व्यलोकयत् । जाग्रतः कटके सर्वान्परितो दीपितानले ॥२५८०॥ 2580

प्रकाश्य वह्निना दुर्गं प्रतोलीनिर्गतो यथा । पिपीलकोप्यलक्ष्यत्वं नोन्मुखानां द्विषां व्रजेत् ॥२५८१॥

ज्वालाप्रकाशचा[1]ञ्चल्याद्विलोला इव रक्षिताः । न्यषेधन्मूर्धकम्पेन साल्हणिं साहसाद्गृहाः ॥२५८२॥

तद्गन्तुमक्षमं[1] क्षिप्रं क्षपाप्राह्णे स डामरः । अधोवातीतरच्छ्वभ्रमालिङ्गितवटाकरम् ॥२५८३॥

क्षेमराजाभिधानेन डामरेशेन सोन्वितः । शिलां वितर्दिकातुल्यामध्यास्त श्वभ्रमध्यगाम् ॥२५८४॥

आरुह्यासनमात्रे तां पर्याप्तां पातभीतितः । निर्निद्रौ पञ्चरात्रीस्तावत्यवाहयतामुभौ ॥२५८५॥ 2585

निर्वर्तितप्राणयात्रौ करस्थैः सक्तुपिण्डकैः । तत एव व्यजहतां विष्ठां नीडादिवाण्डजौ ॥२५८६॥

अव्यक्तव्याकृती चित्रासूत्रिताविव तौ स्थितौ । वीक्ष्यारिकटके लक्ष्मीं पृष्ठाद्विस्मयमीयतुः ॥२५८७॥

तयोराश्रीयत स्फीतशीतविस्मृतिकारिणा । जयसिंहप्रतापाग्निसंतापेनोपकारिता ॥२५८८॥

षष्ठेह्नि तत्र निःशेषीभूतभोक्तव्ययोरथ । क्षतक्षार इवारम्भि तुषारं वर्षितुं घनैः ॥२५८९॥

अगृह्यतोचिते दन्तवीणावाद्योद्यमे तथा । शीतासादितसादेन पाणि[1]पादेन सुप्तता ॥२५९०॥ 2590

---

२५६४. [1]) Emended with C; A तान्ससम्भ्रम°. २५६५. [1]) The letter श is indistinctly written; C °दोषं; R °रोषं. २५६६. [1]) Emended; A °सनैर्व्यधुः. २५७२. [1]) A₁ २. २५७३. [1]) Emended with C; A प्राका°. २५७६. [1]) A °शिविरा°. २५७७. [1]) A₁ २. २५७८. [1]) Emended with C; A निभर्त्स्य. २५८२. [1]) Emended; A °प्रकाशं चाञ्च°. २५८३. [1]) Emended; A °क्षमः. २५९०. [1]) Emended with C; A पाविपादेन.

तावचिन्तयतामद्य क्षुच्छीताभिहतौ ध्रुवम् । पतिष्यावोरिकटके पाशबद्धाविवाण्डजौ ॥२५९१॥

कं पूत्कुर्वः कस्य वावां विदितौ यो विनिर्हरेत् । ततः पङ्कान्तरामग्नौ यूथपः कलभाविव ॥२५९२॥

विषमस्थावयेत्थं तौ नक्तमभ्यर्थ्य डामरः । आरोप्य रज्ज्वावसथे शून्ये स्थापयति स्म सः ॥२५९३॥

कृतशीतप्रतीकारौ पलालानलसेवनैः । दुःखं व्यस्मरतां तत्र निद्रया चिरलब्धया ॥२५९४॥

2595 ततोप्यभ्यधिका व्यापद्गेजे लोठनविग्रहौ । अचक्षुष्यौ जनात्स्निग्धां[1] गिरमप्यापतुर्न यौ ॥२५९५॥

यवकोद्रवपूपादि तयोः सतुषमश्नतोः । गात्रैर्वस्त्रैश्च वैवर्ण्यं शुद्धिवन्ध्यतया दधे ॥२५९६॥

धन्योलंकारचक्रस्य क्षीणभोज्यस्य[1] सर्वतः । स्वीचकारान्नदानेन तुल्यौ होलयशस्करौ ॥२५९७॥

ततः स दूतैर्विक्रेतुमङ्गीचक्रे नृपद्विषः । बुभुक्षाक्षुभितो भृत्यभेदभीतश्च डामरः ॥२५९८॥

दुस्तरव्यापदुद्रेकद्रुतसत्त्वतयात्यजत् । पापोपलिप्तचित्तमधर्माकीर्तिसाध्वसम् ॥२५९९॥

2600 भूपतेर्विद्विषच्छेषस्थापनात्स्वस्य रक्षणम् । ख्यातिशुद्ध्यै चिकीर्षुश्च कुशकाशावलम्बनम् ॥२६००॥

भृत्यस्योदयनाख्यस्य धिया प्रच्छादितं तथा । ररक्ष साल्हणिं भोजं द्वौ तु दातुं स तत्वरे ॥२६०१॥

तं विना च तयोर्भूपाइण्डं जानन्नसांप्रतम् । अबाधं स्वस्य चाशेषकृत्यं युक्तममन्यत ॥२६०२॥

भोज्याभाव[1]कृतां तस्य व्यापदं तच्च मन्त्रितम् । तदा नाज्ञासिषुर्धन्यादयः संधिं विधित्सवः ॥२६०३॥

मिषाच्चिचलिषा तेषां कस्माच्चिदभवत्ततः । किं पुनस्तेन दायादद्वये दातुं प्रतिश्रुते ॥२६०४॥

2605 देयविश्राणनानीकोत्थानादिपणसिद्धये । भ्रातृव्यमनयद्धन्यः कल्याणमवकल्यताम् ॥२६०५॥

प्रबन्धं निर्वध्नन्नरिमुपचरञ्छादितरुषं महाहिं संगृह्णन्नयकुटिलचेष्टं व्यवहरन् ।

स भूमिः सिद्धीनां दधदुचितकर्तव्यपरतां भवेद्यो निर्व्यूढावपि सुदृढसंरम्भरभसः ॥२६०६॥

दुःखैर्दीर्घप्रवासोत्थैरपसारितसौष्ठवाः । तदा संरम्भशैथिल्यं भूभृद्भृत्याः प्रपेदिरे ॥२६०७॥

स सत्यं सचिवोप्राप्यः संग्रहीतुं प्रगल्भते । कथाशरीरमिव यो निर्व्यूढौ कार्यमाकुलम् ॥२६०८॥

संधिं निबद्धं विज्ञाय सैनिकाः स्वगृहोन्मुखाः । उपेक्ष्य स्वामिदाक्षिण्यं क्षणादेवप्रतस्थिरे ॥२६०९॥

2610 तद्विक्रीतमवाप्यान्नं लवन्यः कार्यमन्थरः । धन्याद्याः स्वल्पसैन्यत्वादासन्कृच्छ्रगतासवः ॥२६१०॥

प्रतोलीकीलित[1]दृशः प्रार्थितागमनाशया । तदहः सोभियोक्तृंस्तानददत्तावतापयत् ॥२६११॥

रथाङ्गाक्रन्दिनी रात्रिस्तेषां कृच्छ्रेण सागमत् । विना जीवितसंन्यासमन्यत्कार्यमपश्यताम् ॥२६१२॥

प्रयत्नसंभृते कृत्ये नष्टे मन्दतया धियः । अस्मत्संभावनादूरीकृतवाक्यादरं प्रभुम् ॥२६१३॥

नष्टानुशोचनव्याजात्तद्युक्त्युपहासिनः । सदयं नो ध्रुवं दुःस्थीकरिष्यन्त्यन्यमन्त्रिणः ॥२६१४॥

2615 सद्यो यात्रातारतम्यात्ताम्यन्तो नस्त्वपार्पणम् । कार्यनिष्ठामपश्यन्तः[1] कुर्युर्वैत्यपरेब्रुवन् ॥२६१५॥

मायामेतां विहितवांस्तैः संमन्त्र्य नृपाहितैः । सिद्धसाध्योधुना दस्युर्हसन्नस्मान्ध्रुवं स्थितः ॥२६१६॥

अल्पेतरांस्तु संकल्पानेवं तेषां वितन्वताम् । दत्तानन्ततनुज्यानिः प्रभाता सा विभावरी ॥२६१७॥ कुलकम् ॥

प्राह्णेथ राजस्थानीयोलंकारः साहसोत्सुकः । डामरं कोट्टमारुह्य निन्ये नयभयैर्वशम् ॥२६१८॥

एकाहं गमने सोढविलम्बस्तत्र वासरे । लोठनं[1] क्षीणदाक्षिण्यः स गच्छेत्यब्रवीत्स्फुटम् ॥२६१९॥

---

२५९५. [1]) Emended; A जनान्स्निग्धां. २५९७. [1]) Emended; A °भोजस्य. २६०३. [1]) Emended; A भोज्यभाव°. २६११. [1]) Emended with G (*sec. manu*); A °कैलित°. २६१५. [1]) Emended with C; A °पश्यन्त. २६१९. [1]) Emended; A लोठनें.

उपन्यास्यंस्ततस्तस्य म्लानिप्रक्षालनक्षमम् । मानिनः केपि कर्तव्यं कीर्तिव्ययनिबर्हणम् ॥२६२०॥ 2620

कालः सोयं सकलजनतालोचनध्वान्तदायी नित्यालोकप्रकटनपटुः किंतु सत्क्षत्रियाणाम् ।
अभ्रश्यामाद्भुतमसिलता स्वर्वधूसंगतापि व्यक्तं सक्तिं दिशति रभसान्मण्डलेनोष्णभानोः ॥२६२१॥

संग्राममुवन्ति ननु मण्डलमेकमेव क्ष्मापा जये समरसीम्नि वपुस्तु हित्वा ।
चण्डांशुमण्डलमथाभिमतानि कामं प्रेमार्द्रनिर्जरवधूकुचमण्डलानि ॥२६२२॥

नास्मिन्संततवेष्टनोल्वणतलैस्तल्पैरुदेति व्यथा ग्रन्थिभ्यश्चलितैर्न चालमसुभिर्मर्मव्यथा जन्यते ।
क्रन्दद्बन्धुजनार्तनादचकितस्वान्तं न वा स्थीयते नन्वेतन्मरणं सुखस्य सुभगा काप्येव संप्राप्तिभूः ॥२६२३॥

मार्गैः खड्गलतावितानगहनैर्यातः पिता ते दिवं भ्रातृभ्यामसिधेनुकण्टकवने भ्रान्त्वार्जिता सद्गतिः ।
वंशक्षुण्णमिमं निषेव्य रभसादध्वानमुच्चद्धया वृत्त्या व्योम्नि विशार्कमण्डलमिह स्वान्तं च तेजस्विनाम् ॥२६२४॥

साम्राज्यं विधिनोपनीतमसकृत्क्लैब्येन यद्धारितं तत्रापि प्रशमोचिते वयसि यत्संचेष्टितं बालवत् ।
प्रायश्चित्तममुष्य लब्धमधुना तद्देधसापादितं मा भूद्राज्यमिवैतदप्यसुलभं कर्तव्यमूकस्य ते ॥२६२५॥ 2625

राज्यं प्राप्तमपि प्रनष्टमसमोच्छिष्टाशनैर्यापितः कालः सर्वजनक्षयस्य विषये याता स्थितिर्हेतुताम् ।
इत्यासीत्किमिवोचितं प्रभवतो भिक्षाचरक्ष्मापतेर्निर्व्यूढं तु तदस्य देहविरतौ येनैष सर्वोन्नतः ॥२६२६॥

स तथोत्तेजितोप्योजो नाददे तेजसोज्झितः । न ज्वलत्यग्निसङ्गेपि निर्वीर्यं वानरेन्धनम् ॥२६२७॥

शान्ताहंतस्तु संवृत्तनिद्राभङ्ग इवार्भकः । ऐच्छदुद्यद्भयोद्वेगो रोदितुं प्रसृताधरम् ॥२६२८॥

डामरेणार्पितं नेतुं प्रवृत्तास्तं नृपाश्रिताः । तादृशं वीक्ष्य कारुण्याद्धैर्याधानार्थमभ्यधुः ॥२६२९॥

मा विषीद न देवस्य दयाचन्द्रोदयोज्ज्वले । हृदि प्ररोहति स्वैरं विकारतिमिरान्धता ॥२६३०॥ 2630

स सौजन्यसुधासिन्धुः स स्थिरत्वसुराचलः । स प्रपन्नार्तिसंतापच्छेदचन्दनपादपः ॥२६३१॥

पुण्यां शुद्धां च संलक्ष्य शारदीव द्युवाहिनीम् । मूर्तिं तस्योल्बणं चेतः समाधास्यत एव ते ॥२६३२॥

निष्कलङ्कैर्वंशपूर्वैर्निर्विशेषं सभाजयन् । चारित्रं लाघवभुवो ह्रियस्त्वां सोपनेष्यति ॥२६३३॥

अपकर्तॄन्विपन्नमन्नान्दयमानः परानपि । क्ष्मापरीक्षाहेतुत्वात्स वेत्ति ह्युपकारिणः ॥२६३४॥

उक्त्वेति हृष्टस्तैर्लोलस्थूलकूर्चो गृहात्ततः । व्यालम्बकम्बलो गोष्ठाद्वृद्धोक्ष इव निर्ययौ ॥२६३५॥ 2635

निर्भूषणं म्लानजीर्णवस्त्रशस्त्वं निरीक्ष्य तम् । युग्याधिरूढमायान्तं धन्यो ह्रीनम्रतां दधे ॥२६३६॥

दीर्घास्पन्देक्षणं रूक्षघनकूर्चासविग्रहम् । व्यलोकयदथोलूकमिव नष्टं गुहागृहात् ॥२६३७॥

रेजे शैलश्चलद्भिस्तैः शिबिरोद्दीपितानलः । भूपप्रतापस्वर्णस्य कषाश्मत्वमिवागतः ॥२६३८॥

स्कन्धावारे गते वर्षत्तुषारं प्रसभं नभः । अमर्त्यभावे भूभर्तुर्विशां चिच्छेद संशयम् ॥२६३९॥

प्राक्षिप्तेद्धिमं तावन्म्रियेरन्नत्रुडिताः क्षणात् । पिष्टातकान्तर्गर्ताटाः प्रविष्टा इव सैनिकाः ॥२६४०॥ 2640

एवमेकान्नविंशेब्दे दशम्यां शुक्लफाल्गुने[1] । न्यूनाब्दषष्टिदेशीयो निबद्धो लोठनः पुनः ॥२६४१॥

दीर्घप्रवासादायातं सत्कर्तुं कटकं पुनः । निर्ममो हर्म्यमुत्तुङ्गमारुरोह महीपतिः ॥२६४२॥

२६२०. 1) Emended; A उपन्यस्यंस्त°. २६२८. 1) A₁ gloss शान्ता अहन्ता अहंभावो यस्य. २६३०. 1) Emended; A दैवस्य. २६३७. 1) Emended; A °कूर्चं स°. २६३८. 1) A °शिविरो°. २६३९. 1) A स्कन्दावारे. २६४०. 1) Emended with G (*sec. manu*); A प्राञ्चेत्प°. २६४१. 1) A °फाल्गुणे.

यथोचितं दानमानसंभाषणविलोकनैः । संतोष्य व्यसृजत्सैन्यं धन्यादीन्प्रैक्षतागतान् ॥२६४३॥
तेषां पुनश्च दोर्द्वन्द्वमूले क्षिप्तकरं भटैः । न्यस्तेनानासिकं वासःप्रान्तेनाच्छादिताननम् ॥२६४४॥
2645 निर्भूषणश्रोत्रपालिप्रविष्टैः श्मश्रुलोमभिः । [1]बलक्षरूक्षैः प्रव्यक्तकार्श्यक्लेशं कपोलयोः ॥२६४५॥
उच्चावचोक्तिमुखरे पौरलोकेन्तरान्तरा । व्यापारयन्तं नेत्रान्तौ दीनस्तिमिततारकौ ॥२६४६॥
कातर्यदैन्यभीक्रान्तिक्षुदलक्ष्मीकटाक्षितम् । वेपमानविनिद्राङ्गं गां शीतेनार्दितामिव ॥२६४७॥
भ्रान्तामिव क्ष्मां पर्यस्तानिवाद्रीन्पतितामिव[1] । विदन्तं च दिवं शोष - - - -[2]रदच्छदम् ॥२६४८॥
दैविको वा[1]न्तरायोस्तु ध्वान्तं वोग्रं प्रवर्तताम् । राजौकोभ्यर्णतां यातं वाता वा जरयन्त्विदम् ॥२६४९॥
2650 सर्वापकारकृद्राज्ञः स्थास्यामि पुरतः कथम् । पदानि संनिरुन्धानं निध्यायेति पदे पदे ॥२६५०॥अन्तर्युगलम्॥
बहुलोकावृततया स्तोकसंलक्ष्यमैक्षत । प्रतीहारैरथावेद्यमानं लोठनमङ्गने ॥२६५१॥कुलकम्॥
भ्रूसंज्ञया वितीर्णाज्ञो राज्ञा तामारुरोह सः । सभां पारिप्लवाम्भोजामिव प्रेक्षकलोचनैः ॥२६५२॥
दृष्ट्या निर्दिष्टपार्श्वोर्वीस्थितिः पृथ्वीभुजस्ततः । अस्प्राक्षीत्क्षितिनिक्षिप्तजानुर्मूर्ध्नाङ्घ्रिपङ्कजे ॥२६५३॥
हस्ताम्बुजाभ्यामालम्ब्य ललाटतटमानतम् । सम्राट्संभ्रमनम्रस्य तस्योदनमयच्छिरः ॥२६५४॥
2655 रत्नौषधीजुषोः स्पर्शः पाण्योस्तापं स चेतसः । दौर्भाग्यमहरद्देहाच्चा[1]स्य श्रीखण्डशीतलः ॥२६५५॥
पुण्यानुभावात्कारुण्यभाजो भूभर्तुरञ्जसा । विस्रम्भसंभावनया स क्षणाल्पस्पृशे हृदि ॥२६५६॥
मा भैषीरिति दृप्तोक्तिः सुखं संप्राप्स्यसीति वाक् । अगाम्भीर्येण भग्नेव मन्युर्न त्वयि सोधुना[1] ॥२६५७॥
इत्युक्ते पूर्ववैराणां भवेदुद्घाटनं कृतम् । बान्धवो नस्त्वमित्यस्मिन्परीहास इव क्षणे ॥२६५८॥
क्लिष्टोसीति स्वप्रतापप्रभावाभाषणं भवेत् । ध्यात्वेति भूभृद्दृष्ट्वास्य नाप्यायं तु गिराकरोत् ॥२६५९॥तिलकम्॥
2660 अभयार्थनया पादौ स्प्रष्टुं नमयतः शिरः । संस्पर्शं मौलिषु पुनर्विग्रहस्याङ्घ्रिणाकरोत् ॥२६६०॥
का योग्यता सत्क्रियायां ममेति वदता बलात् । अजिग्रहत्पितृव्येण ताम्बूलं स्वकरार्पितम् ॥२६६१॥
नम्रं द्वारेशमूचेभूच्छ्रमो व इति सस्मितम् । धन्यं षष्ठं च पस्पर्श पृष्ठं सव्येन बाहुना ॥२६६२॥
दाक्ष्यदाक्षिण्यगाम्भीर्यविनयाद्यैर्विभाव्य तम् । भूभृद्गुणैः परीतं स्वं लोठनोमन्यतावरम् ॥२६६३॥
आदिश्य सान्त्वनं धन्यमु[1]खेनाथ त्रपानतम् । पितृव्यं प्राहिणोद्वेश्म भ्राजिष्णु विनयाञ्जलिः ॥२६६४॥
2665 अभियोगे य एवास्य नीतौ विन्यस्यतो दृशम् । मुखरागः स एवाभूत्फलावाप्तावविप्लुतः ॥२६६५॥
नायाति वाडवशिखिक्रथनेन तापं शैत्यं हिमाद्रिपयसा विशता न चाब्धिः ।
कश्चिद्गभीरमनसां सततं विषादकाले प्रमोदसमये च समोनुभावः ॥२६६६॥
प्रीतिस्थैर्यैर्ज्ञातियोग्यैश्चोपचारैरकृत्रिमैः[1] । क्रमाद्राजाहरल्लज्जां पौरुषभ्रंशजीवयोः ॥२६६७॥
दायादोष्टद्वयादेव राष्ट्रे क्रुष्टेपि मन्त्रवित् । भोजेनो[1]त्पिञ्जसर्पस्य दन्तं सोन्तरचिन्तयत् ॥२६६८॥
प्रवासायासभीत्या स्वैस्त्यक्तसंरम्भसंभ्रमैः । जिगीषुर्विद्विषच्छेषैश्चक्रे यन्निष्प्रजागरः ॥२६६९॥
2670 साल्हणिः[1] स तु निस्तीर्णः[2] श्वभ्राच्छून्यगृहे वसन् । पितृव्यविग्रहोदन्तमुपलेभे न कंचन ॥२६७०॥

---

२६४५. [1]) A वलक्ष°. २६४८. [1]) Emended with C; A °पतितानिव.—[2]) Thus A; C supplements शोषबहुशुष्करद°. २६४९. [1]) Emended with C; A दैविको न्तरा°. २६५५. [1]) Emended; A °द्देहचास्य; C °द्देहश्चास्य. २६५७. [1]) Emended with G (*sec. manu*); A मन्युना त्वयि साधुना. २६६४. [1]) Emended; A धन्यं मु°. २६६७. [1]) Emended; A °कृत्रिमः. २६६८. [1]) Conjectural reading; A भोजनोत्पिञ्ज°. २६७०. [1]) Emended; A सल्हणः.—[2]) Emended; A विस्तीर्णः.

राजगृह्यं[1] त्वलंकारं डामरान्तिकमागतम् । पृष्टाद्वीक्ष्याभवद्द्रोहद्रोहसंभावनस्तदा ॥२६७१॥
ददर्श च क्रमाद्दूरतया दुर्लक्ष्यविस्तृति[1] । स्कन्धावारं[2] बद्धमालं मार्गे नगरगामिनि ॥२६७२॥
अज्ञातेन विदूरत्वात्पितृव्येणाश्रितं ततः । युग्यं चासौ धन्यषष्ठयुग्ययोरन्तरैक्षत ॥२६७३॥
अचिन्तयच्च को हेतुः कटकप्रस्थितेरितः । युग्यारूढश्च कोथ स्यात्तृतीयो धन्यषष्ठयोः ॥२६७४॥
पृष्टस्तेनावदत्कश्चित्पामरोथ[1] प्रमोदभाक् । संधिर्निबद्धो नगरं गतौ लोठनविग्रहौ ॥२६७५॥ 2675
संदेहौजहतद्रोहो[1] भयमुन्मुखतां भजेत्[2] । ज्ञातिस्नेहेन तस्यासीन्मुहूर्तमपहस्तितम् ॥२६७६॥
सैन्ये गते शून्यतया मिलितैर्विहगैः सरित् । रुवद्भिस्तेन तौ नीतौ क्रन्दन्तीव व्यकल्प्यत[1] ॥२६७७॥
लवन्य एव मे दध्याद्ध्यात्वेहस्थमवेत्य ते । पुनर्नयेयुर्धन्याद्याः क्रमाद्ध्यात्वथेति सः ॥२६७८॥
स्वं नेतुं पार्थिवचमूं प्रत्यावृत्तां निनादिनीम् । श्रुतेन्तरान्तरा घोषे निर्झराणामशङ्कत ॥२६७९॥
अथाजायत जीमूतवितीर्णतिमिरं जगत् । वन्ध्यं मध्यंदिनेनेव निशीथव्यथितश्रिया ॥२६८०॥ 2680
राधमासावधि दधुस्ततः प्रभृति वारिदाः । दीक्षां क्षोण्यां तुषारौघसत्त्रासूत्रणकर्मणि ॥२६८१॥
विस्रब्धघात्यभव्योहं निर्ब्रह्मण्यो ह्रियोज्झितः । निन्दन्स्वमिति भोजाग्रे ततो दस्युरुपाविशत् ॥२६८२॥
समयापेक्षयाक्षोभो मन्युं संस्तभ्य[1] साल्हणिः । सान्त्वयन्निव नास्त्यागस्तवात्रेति जगाद तम् ॥२६८३॥
ऊचे च संश्रितापत्यज्ञात्याद्यापद्गतं त्वया । त्रातुमेतत्कृतं तत्र गर्हां नार्हसि कस्यचित् ॥२६८४॥
तव द्रोहस्पृहा स्याच्चेन्नानृशंस्यं भवेन्मयि । परवत्ताभवत्तस्मादियं कालानुरोधतः ॥२६८५॥ 2685
राज्ञश्च हर्षभूभर्तृवंश्या इव न वा वयम् । उच्छेद्याः किं तु संयम्या राजधर्मानुरोधिनः ॥२६८६॥
स्वस्याख्यातिस्तयोर्बाधा राज्ञश्चामार्गगामिता । शेषं मां[1] रक्षता हन्त निषिद्धा धीमता त्वया ॥२६८७॥
इत्युक्तवन्तं स त्यक्तलज्जाभार इवावदत् । साक्षी त्वमेव[1] सर्वत्र ममेति सततं स्तुवन् ॥२६८८॥
क्षणेन च प्रहिणु मामधुनेत्यभिधायिनम् । तमेव हिमवृष्ट्यन्ते कर्तास्मीत्युक्तवान्ययौ ॥२६८९॥
त्वयि दस्युर्विपर्यस्येन्मन्युं[1] जानन्नभोजनम् । भोजस्तत्रेति केनापि कथितो व्यधिताशनम् ॥२६९०॥ 2690
स्पृशंश्चान्नं चिरात्प्राप्तमिदं विक्रीय ताविति[1] । ध्यायञ्ज्ञात्योर्देहमांसं तयोर्भुक्तममन्यत ॥२६९१॥
दस्युस्तु हिमवृष्ट्यन्ते त्वां प्रहेष्यामि निश्चयात् । श्वो वाद्य वेति[1] कथयन्द्वौ मासौ न मुमोच तम् ॥२६९२॥
मां ज्ञात्वेह स्थितं राज्ञः[1] कृतारब्धेर्हिमात्यये । विक्रीणात्येष मत्वेति भोजोधाद्गमने त्वराम् ॥२६९३॥
मिषं यं यं निषेधाय गमनायोदपादयत् । दस्युस्तं तं समुच्छेद्य सापराधं व्यधत्त तम् ॥२६९४॥
तेजोनाम्नो[1] बलहरात्संजातो[2] भाद्रमातुरः । [3]अभ्यधाद्बाल्यमाशास्य लम्बकम्बलकावृतः ॥२६९५॥ 2695
तेजोविस्फूर्जितां[1] तत्तद्वीरोत्कर्षकषोपले । द्वैराज्ये सौस्सले सैन्ये पङ्क्तिपावनतां गतः ॥२६९६॥
पितुराप्ततया राज्ञा वर्धितस्तदनन्तरम् । एवेनकादिविषयाधीकारित्वं क्रमाद्व्रजन् ॥२६९७॥

२६७१. [1]) Emended; A राजा गृहे त्वलङ्कारडामर°; cf. viii. 2925. 2618. २६७२. [1]) Emended; A °विस्मृति.—[2]) A स्कन्दा°. २६७५. [1]) Emended; A पृष्टसेना°. २६७६. [1]) Thus A; the text of this *páda* appears to be corrupt; perhaps read संदेहं जहतो द्रोहभयमु°.—[2]) भजेत् corr. by $A_1$ from व्रजेत्. २६७७. [1]) Emended; A व्यकल्पत. २६८३. [1]) Emended with C; A संस्तम्भ्य. २६८७. [1]) Emended; A शेषं मां; C स्वां सभां. २६८८. [1]) Emended with G; A तमेव. २६९०. [1]) Emended; A दस्यून्विप°. २६९१. [1]) Conjectural reading; A विक्रीयतामिति; cf. for the context viii. 2598 ffg. २६९२. [1]) Emended with C; A हेति. २६९३. [1]) Emended; A राज्ञा. २६९५. [1]) Emended; A ओजो°; cf. viii. 2862 and the *vv. ll.* तेजो, ओजो viii. 1084.—[2]) Emended; A °जातं.—[3]) The text of this *páda* is corrupt. २६९६. [1]) Emended with G; A °र्जितांस्तत्त°.

विमुखे राज्ञि नागेन खुयाश्रमभुवा कृते । तं राजवदनो नाम विजिघृक्षू ररक्ष तम् ||२६९८||चक्कलकम्||

आनृशंस्यं भृत्यभावादलवन्यतयास्य च । प्रत्यवस्थित्यसामर्थ्यं राज्ञि सर्वे शशङ्किरे ||२६९९||

2700 अतोलंकारचक्रेण कुर्वतो[1]त्यर्थमर्थनाम् । द्वैराज्येच्छो राजबीजी तदा न स समर्प्यत ||२७००|| युगलकम्||

नीतः प्रत्यक्षतां दूरस्थितेप्युदयने स तम् । विसृष्टवति दुधुक्षुस्त्यक्तुमेनं न सोशकत् ||२७०१||

राज्ञा कर्तुं विनियमं भोजस्य प्रहितो धनैः । प्राप[1] द्रङ्गामलंकारो विषयाधिकृतस्ततः ||२७०२||

तत्पार्श्वमुद्यतं गन्तुं मां समु[1]त्सृज्य यासि चेत् । त्यक्ष्यामि तदसूनेवमूचे भोजस्तु डामरम् ||२७०३||

श्वस्त्वां प्रभाते द्रक्ष्यामीत्येतावत्तत्र जल्पति । कोट्टादनुक्त्वैव निशस्तुर्ययामे विनिर्ययौ ||२७०४||

2705 घनवर्षेप्यमर्षेण मार्गान्वेषी गवेषणम् । यावच्चक्रे क्षपान्ते तं तावच्छुश्राव निर्गतम् ||२७०५||

असाध्यप्रतिषेधोथ तमह्व्यनुजगाम सः । प्रस्थितं शारदादेवीस्थानं यावन्मितानुगः ||२७०६||

एकसार्थगतौ ज्ञाती विना तौ ज्ञातियोषिताम् । दाक्षिण्यादक्षमः स्थातुमग्रे सागा भवन्निव ||२७०७||

प्रवयाः पञ्चषान्वारान्व्यधादारब्धिमेष तु । युवाप्यकल्यः कौलीनमिति स्वस्य च चिन्तयन् ||२७०८||

दुराण्डगमने खण्डितेच्छः संश्रित्य दारदान् । संयुयुत्सुर्मधुमतीरोधसा मार्गमग्रहीत् ||२७०९|| तिलकम्||

2710 क्वापि श्यानाश्मसूच्यश्रिमृत्युदंष्ट्राङ्कुरोत्कटान् । क्वचिद्रुद्धप्रकाशाभ्रकालपाशान्धकारितान् ||२७१०||

प्रभ्रश्यद्धिमसंघातगजव्यूहोल्बणान्क्वचित् । क्वापि निर्झरफूत्कारनाराचक्षतविग्रहान् ||२७११||

क्वचित्सुस्पर्शपवनस्पष्टस्फुटदसृग्धरान् । क्वाप्यातपक्षतहिमज्योतिर्निहत[1]दृक्पथान् ||२७१२||

दूरावरोहं[1] प्रसृते स्फुटमप्रसृते विदन् । ऊर्ध्वावरोहमसकृन्मन्यमानोप्यधोगतेः ||२७१३||

तुषारकालविषमान्षट्सप्तान्पथि वासरान् । उल्लङ्घ्य स दरद्राष्ट्रसीमान्तग्राममासदत् ||२७१४||कुलकम्||

2715 गूढार्पितात्मसामग्रीहताकिंचन्यलाघवम् । तं दुग्धघा[1]ट्टकोट्टेशः प्रणम्यानयदर्च्यताम् ||२७१५||

दूरस्थितो विड्डसीहस्तदूतोक्ततदागमः[1] । प्रक्रियां प्राहिणोच्छत्त्रवादित्राद्यां[2] नृपोचिताम् ||२७१६||

आदिष्टदिष्टवृद्धिश्च राष्ट्रे कोट्टाधिपेन सः । अवारयत्स्वकोशस्य स्वामित्वं राजबीजिनः ||२७१७||

राजायमानो भोजोथ राजवासगतोर्चितुम्[1] । आनिन्ये राजवदनापत्येनाभ्येत्य पश्यताम् ||२७१८||

2720 स पित्रैकान्ततो राज्ञो भिन्नेन प्रहितोन्तिकम् । तेनाज्ञाय्यरिनीत्युग्रपाशाग्रस्थापनोपमः ||२७१९||

कार्यगौरवविश्वासाभावव्यतिकरोचितम् । संदिश्य प्राहिणोत्तं स न स्वीकुर्वंश्च चोत्सृजन् ||२७२०||

किमाप्तोहं किमेकान्तभिन्नो राज्ञः शनैरिति । मां ज्ञास्यसीति तं दूतैः स राजवदनोवदत् ||२७२१||

तस्य दार्ढ्यं दर्शयितुं गोत्रिवैरिमिषान्नृपे । त्रुत्राणेथ विदोषत्वं नागाद्यैरग्रहीद्व्रणम्[1] ||२७२२||

सामग्र्यूनः[1] शनैः स्थैर्यं ततः साम्यमथ क्रमात् । आधिक्यं चादधे तेषां विग्रहैर्धैर्यनिष्ठुरः ||२७२३||

तथा प्रतिष्ठां स प्राप तस्यापूर्वस्य भूमिजाः । दास्यमेत्य यथा व्रीडां नागुर्नागस्य बान्धवाः ||२७२४||

2725 स हि त्यागक्षमास्तम्भालोभादिगुणभूषितः । अभिगम्योभवन्नित्याभ्यस्तभूतिरिवोन्मिषन् ||२७२५||

---

२७००. [1]) Emended; A कुर्वतात्य°. २७०२. [1]) Emended; A प्राप्य. २७०३. [1]) Conjectural reading; A गन्तुं मामुत्सृज्य; C मासमुत्सृज्य. २७१२. [1]) Emended; A °निहित°. २७१३. [1]) Emended; A °रोहे. २७१५. [1]) Thus A; cf. दुग्धघातम् viii. 2468. २७१६. [1]) Emended with C; A °गमम्.—[2]) Emended; A °वादित्राद्यान्नृपो°. २७१८. [1]) Emended; A °गतोचितुम्; C °गतोचितं; G °गतोचिताम्. २७२२. [1]) Emended; A °व्रणे. २७२३. [1]) Conjectural reading; A सामग्री नः.

स्थैर्ये पृथ्वीहरादीनां साश्रयाणां न कौतुकम् । आडम्बरो निरालम्बस्यास्य स्तुत्यस्तु विस्तृतः ॥२७२६॥
प्रथयन्पृथुलान्व्यूहांश्चौराटविकघोषिकैः । क्रान्तग्रामोथ तस्थौ स भोजादीन्प्रतिपालयन् ॥२७२७॥
जहुरन्योन्यसंघर्षसेर्ष्यामात्यमतेन वा । ततो लुण्टिप्रियत्वाद्वा नीतिमन्येपि डामराः ॥२७२८॥
उद्घातध्वंसितां विप्लवेच्छा लोठनबन्धने । याधात्तेषां तदानीं सा जगाम शतशाखताम् ॥२७२९॥
त्रिल्लको जयराजश्च राज्ञा संवर्धितावपि । अकार्ष्टां नैव तपसा विवशौ चक्रमीलनात् ॥२७३०॥ 2730
यो घूकानामिव श्वभ्रमामयानामिव क्षयः । दैत्यानामिव पातालं यादसामिव सागरः ॥२७३१॥
आश्रयः सर्वदस्यूनां त्रिल्लको माययोल्बणः । स देवसरसाधीशं संबध्नन्विप्लवं व्यधात् ॥२७३२॥युग्मम्॥
काङ्क्षन्तोथ तदाक्षेपं क्षोणीत्राणार्थिनो द्विजाः । प्रायं नृपतिमुद्दिश्य चक्रिरे विजयेश्वरे ॥२७३३॥
अकालदस्युनिर्माथं जानतोभ्यर्थनां न ते । राज्ञोगृह्णंस्ततः सोभूद्दाक्षिण्यात्तत्सभानुगः ॥२७३४॥
प्रस्थातुं पार्थिवे सज्जे ज्यायान्यो विप्लुतेष्वभूत् । स जातोत्पातपिटको जयराजो व्यपद्यत ॥२७३५॥ 2735
भाग्यवानेकतोजातदस्युर्वैवित्त्यमीशिता । ततो मडवराज्यं स विप्रप्रीत्यै विनिर्ययौ ॥२७३६॥
अमात्यंदत्तवैमत्यैः स्वशाद्यमंडरैरथ । द्विजैर्निषिद्धोलंकारो मन्त्री राज्ञोज्झितोन्तिकात् ॥२७३७॥
स व्यवस्थापने दुःस्थदस्यूनां सोद्यमः सदा । सेर्ष्याणां प्रत्यभात्तेषां तद्दोषपरिपोषकः ॥२७३८॥
त्रिल्लकोन्मूलनं कुर्यां कृत्वा द्वैराज्यभञ्जनम् । प्रतिज्ञायेति नृपतिर्विप्रान्प्रायान्न्यवीवरत् ॥२७३९॥
त्रस्तोथ त्रिल्लकस्तैस्तैरप्रियैरुदवेजयत् । अनुद्भिन्नमुखो गूढामयो रोगान्तरैरिव ॥२७४०॥ 2740
जयराजानुजं राज्ञा यशोराजं निवेशितम् । तन्मतेनावचस्कन्द भ्रातृव्यं राजकाभिधः ॥२७४१॥
त्रातुं तं देवसरसं दूरारात्याश्रितं गतः । सञ्जपालोल्पसैन्यत्वात्संदिग्धविजयोभवत् ॥२७४२॥
ज्ञातोदन्तस्ततोभ्येत्य रिल्हणो रणमुल्बणम् । जयलक्ष्मीकटाक्षाणां प्रथमातिथितामगात् ॥२७४३॥
मन्दरेणाथ तेनारिवारिराशौ विलोडिते । कल्योभूत्सञ्जपालाब्दस्तुच्छारातिजलाहतौ ॥२७४४॥
जितेपि राजके स्वोऽर्व्यां विनानुग्राहकं क्षमः । न बभूव यशोराजः शून्ये बाल इवासितुम् ॥२७४५॥ 2745
प्रतीक्षमाणो द्वैराज्यपर्याप्तिं क्ष्माभुजेकरोत् । त्रिल्लकः कालहरणं तैस्तैर्मायानतिक्रमैः ॥२७४६॥
यथाकालं ततो गूढोपोढान्मण्डलकण्टकान् । स्वपक्षसूचीविशिखान्दिक्षु श्वाविदिवाक्षिपत् ॥२७४७॥
अथ पार्थ्वीहरिर्योभूच्चतुष्को लोष्ठकानुजः । राज्ञा भ्रात्रा समं बद्धः कारागारात्पलायितः ॥२७४८॥
स तेन निजजामात्रा रक्षितः स्वोपवेशने । असंख्यडामरयुतः शमालां संप्रवेशितः ॥२७४९॥ युग्मम् ॥
आकर्ण्य कुररस्येव निनादं तस्य भेजिरे । व्यक्ततां दस्यवो गूढा ह्रदस्थाः शफरा इव ॥२७५०॥ 2750
दृप्यन्तं राजवदनं षष्ठचन्द्रोथ गग्गजः । रुरोध प्रलयोद्वृत्तं वेलाद्रिरिव वारिधिम् ॥२७५१॥
वर्धमानक्षीयमाणसंहती तौ त्वजायताम् । घर्मे सजम्बालहिमौ तुषाराद्रितटाविव ॥२७५२॥
षष्ठस्य जयचन्द्रश्च श्रीचन्द्रश्चानुजौ ततः । दूरविप्रकृतौ राजमन्दिरावामवेतनौ ॥२७५३॥
ज्ञातनिवृत्त्यपर्याप्ती धुर्यकार्यवशप्रियात् । प्रतीक्ष्यादग्रजाद्राज्ञः शङ्कितावभुभागमन् ॥२७५४॥

---

२७२८ [1]) Emended ; A वः. २७३४. [1]) Emended ; A जानते°. २७३७. [1]) Doubtful emendation ; A स्वशाद्यं मंड°. २७४४. [1]) Emended ; A °पालाब्धिस्तुच्छा°. २७४६. [1]) Emended ; A प्रतीक्ष्यमाणो. २७४८. [1]) Emended ; A °ष्क कोष्टका°; comp. for the name of PRITHVÎHARI's elder son, viii. 2912. 2799. 2496. 3318. २७५०. [1]) A₂ gloss कुररस्येति कुरर नद्‌ हूर् इति भाषया कश्मीरेषु प्रसिद्धः. २७५१. [1]) Thus corr. by A₁ from गर्गजः.

2755 कटकाद्विद्रुतौ राजवदनान्तिकमागतौ । श्वशुर्यावपि भूभर्तुरागतौ प्रतियोगिताम्[1] ॥२७५५॥

शैलप्रस्थानपथिकैरसंख्यैरथ खाशकैः । स पूर्वराजकोशार्थी भूतेश्वरमलुण्ठयत् ॥२७५६॥

तस्कराक्रान्त्यशरणं बलवन्निहताबलम् । अराजकमिवाशेषं राष्ट्रं कष्टां दशामगात् ॥२७५७॥

उदयं कम्पनाधीशं[1] रिल्हणं च ततो नृपः । चतुष्कयुद्धमादिश्य नगरं विवशोविशत् ॥२७५८॥

पार्श्वहरिस्तु दुःसाधो महाव्याधिरिवौषधैः । स्तम्भितोभूत्तयोः सैन्यैः संहन्तुं न त्वशक्यत ॥२७५९॥

2760 कालापेक्षां स्वपक्ष्याणां दुर्बुद्धिं वानुरुन्धतः । आसीन्मन्दप्रतापत्वं रिल्हणस्यापि तत्क्षणम् ॥२७६०॥

विड्डसीहस्तु विज्ञातभोजोदन्तो व्यसर्जयत् । दूतानानेतुमुर्वीशान्सुबहूनुत्तरापथे ॥२७६१॥

अपि वित्तेशवनितारहोवैयात्यवेदिभिः । अपि किंमानुषपुरीगीतोद्गारिदरीगृहैः ॥२७६२॥

अप्यौष्ण्याद्वालुकाम्भोधेः शीतावेदिभिरेकतः । अपि शृङ्गानिलैः प्रीतान्कुर्वाणैरुत्तरान्कुरून् ॥२७६३॥

हिमाद्रिकच्छैर्म्लेच्छेशाः प्रधावन्तोधिशिश्रियुः । दिशस्तुरंगै रुन्धन्तः स्कन्धावारं[1] दरत्पतेः ॥२७६४॥ तिलकम् ॥

2765 राज्ञां संघटनं यावद्व्यधादेवं दरन्नृपः । दिग्भ्यो भोजान्तिकं तावत्तत्सामन्ताः प्रपेदिरे ॥२७६५॥

स पिप्रिये तानज्ञातालापान्वीक्ष्य गिरिव्रजात् । प्रीतिप्ररूढप्रणयानवरूढान्कपीनिव ॥२७६६॥

जयचन्द्रादयो राजवदनप्रहिता अपि । कीराः काश्मीरका[1]ः पार्श्वमभजन्राजबीजिनः ॥२७६७॥

अभ्यर्णस्थान्वलहरप्रमुखांश्च विदूरगान् । अपुष्णात्साल्हणिः स्वर्णैः परां कोशेशतां भजन् ॥२७६८॥

ततः सुजनितोत्पिञ्जतया निश्चोद्यचक्रिकः । भोजेन राजवदनः समगंस्तापसाध्वसम् ॥२७६९॥

2770 तयोरकृतकर्तव्यविशेषेणेतरेतरम् । जातसौष्ठवयोः क्षिप्रमविश्वासो व्यशीर्यत ॥२७७०॥

अभ्यमित्रीणतां तस्यानिच्छतो दरदं विना । मदात्साहायकायैच्छन्मितानेव स तान्हयान् ॥२७७१॥

स्युश्चेत्सोढाग्रिमाटोपाः कटकस्यास्य नो द्विषः । तत्साम्यमुन्मिषेद्यद्वा भङ्गो भूयोपि योगभित् ॥२७७२॥

तस्मात्सर्वाभिसारेण रणमेकं ममेच्छतः । विजयावजयावाप्तिरेकाहान्तरिता मता ॥२७७३॥

व्याजहारेति यद्भोजस्तदेषोथ हसन्स्मयात् । निन्ये तद्दारदं सैन्यमुपेक्ष्यागामिनी[1]श्चमूः ॥२७७४॥ तिलकम् ॥

2775 संकटान्ते वितीर्णानुयात्रस्तेषां प्रसर्पताम् । स राजबीजी शुश्राव दरद्राजमथागतम् ॥२७७५॥

तत्संगमाय व्यावृत्ते तस्मिन्कोट्टान्तिकं पुनः । प्रावेशयद्बलहरो मातृग्रामं स तद्बलम् ॥२७७६॥

दिशस्ततो वीक्ष्य वह्निर्भ्रान्तवातमृगा इव । निसर्गधीरधीर्गार्गिर्न धैर्यात्पर्यहीयत ॥२७७७॥

तस्य सर्वेपि नीलाश्वडामराः स्वे च सैनिकाः । विपक्षैः सह बद्धैक्याः सैन्यान्दुध्रुक्षवो ययुः ॥२७७८॥

स तथा विषमस्थोपि प्रस्थित्यै प्रार्थितो निजैः । म्लानाननः प्रभुं द्रष्टुं न क्षमोस्मीत्यभाषत ॥२७७९॥

2780 स सूर्यवर्मचन्द्रस्य न जातः कश्चि[1]दन्वये । उपयोगाय यो नागान्मल्लाभिजनजन्मनाम् ॥२७८०॥

भोजं सभाजयित्वाथ विड्डसीहः सपार्थिवः । सारैः समं स्वसामन्तैर्विजयाय व्यसर्जयत् ॥२७८१॥

ततो म्लेच्छगणाकीर्णा व्रजन्संवाहयंश्चमूः । प्रयाणमात्रान्तरितः पृष्ठे तस्य बभूव च ॥२७८२॥

प्रादुष्कृतजगत्क्षोभे बले तत्रानुयायिनि । उत्साहात्साल्हणिर्मेने कृत्स्नां हस्तगतां महीम् ॥२७८३॥

---

२७५५. [1]) Emended; A प्रतियोग्यताम्. २७५८. [1]) Emended; A कम्पनाधीशरि°. २७६४. [1]) A स्कन्दा°. २७६७. [1]) Emended; A काश्मीरिकाः. २७७४. [1]) Emended; A° गमिनी°. २७८०. [1]) Emended; A कैश्चि°.

वाजिभिस्तर्जितै[1] म्लेच्छराजैश्च बलमूर्जितम् । स्थाने समुद्रधाराख्ये निबबन्धाथ तत्पदम् ॥२७८४॥

स राजवदनस्तादृग्दुर्जयाग्र्यबलोज्ज्वलः । मृत्युदन्तान्तरे दिष्टं षष्ठचन्द्रममन्यत ॥२७८५॥ 2785

ततः प्रावृट्[1]पयोवाहकृतोदीपपरिप्लुता । संजायते स्म वसुधा समीभूतजलस्थला ॥२७८६॥

धरित्रीपानपात्रेभ्भः सीधु[1]पूर्णे दधुर्द्रुमाः । मग्ना लक्ष्यशिखामात्रा बलन्नीलोत्पलोपमाम् ॥२७८७॥

षष्ठस्य संकटं जानन्भूभृच्छेषैर्बलैः समम् । अथोदयद्वारपतिं तं च धन्यं व्यसर्जयत् ॥२७८८॥

वाहिनीरुद्धमार्गौ तौ पदवीमनुसस्रतुः । मार्गे धनंजयस्येव शैनेयपवनात्मजौ ॥२७८९॥

लम्बाम्बुदेम्बरे दूरं वारिपूर्णे च भूतले । स्यूतेव विद्युद्दृशे भिन्नद्योतननिःस्वना ॥२७९०॥ 2790

शोभामात्रोदितागर्हपरिबर्हाबहिष्कृतः । तत्राविभक्तकटकः पार्थिवः समजायत ॥२७९१॥

अनास्थो राजवदने सत्त्वावष्टम्भयोः पुरा । अत्रापरो न निक्षेप्यो राजबीजीति दारदान् ॥२७९२॥

त्रिल्लकः संदिशन्दूतैर्वृद्धिं पार्श्वीहारिं नयन् । तयोरेकस्य सामर्थ्यादैच्छत्तं हस्तपातिनम् ॥२७९३॥युग्मम्॥

अभित्तिलिखितालेख्यकल्पं बलहरस्य तत् । तादृग्विलोक्य सामर्थ्यमथ राज्ञश्च सर्वतः ॥२७९४॥

विभक्ताशेषसैन्यस्य तत्र तत्रारिसंकटे । ज्ञात्वाप्रतिसमाधेयच्छिद्रमुन्मुद्रदुर्नयः ॥२७९५॥ 2795

अकृशश्चाविदाचारश्चिरं स्वाङ्गैः स गोपितम् । बहिर्दुर्धर्षमत्याक्षीद्द्वितीयमपि कण्टकम् ॥२७९६॥ तिलकम् ॥

ध्वान्तेम्बुधरजालान्ध्यमहावाते रजोभरः । स्वपक्षभेदयोर्ज्ञातकर्णेजपमहोद्यमः ॥२७९७॥

कुलच्छेदकृतो राज्ञस्तत्र तत्रातिसंकटे । अशान्तजागरोत्यर्थमनर्थपरिपोषकः ॥२७९८॥

सोथ शूरपुरेकस्माद्बहुभिः सह डामरैः । तेन संपूरितः पृथ्वीहरजो लोठको[1]पतत् ॥२७९९॥ तिलकम् ॥

तस्य संघटतः कन्थां प्रयातं वैकृतं चिरात् । पालीभङ्गे तटस्येव प्रावृट्पूर्णस्य लक्ष्यताम् ॥२८००॥ 2800

निद्राणोपेन्द्रजठरप्रसादनिसृतं जगत् । समेतमिव तत्सैन्यं प्रत्यभाज्जलदागमे ॥२८०१॥

यावद्भिः पार्यते नेदृक्संख्यातुमपि तद्बलम् । भर्तव्यकल्पैः सुस्वल्पयोधमध्यगतैरपि ॥२८०२॥

तावद्भिरनुगैः पिञ्छदेवद्रङ्गाधिपो युधि । तद्योधान्याम्यहरितैः[1] सरितश्चातिथीन्व्यधात् ॥२८०३॥ युग्मम् ॥

तटोज्ज्वलैश्चिताचक्रैर्बिम्बितैस्तटिनीजले । मृतानामपि संस्कारः क्रियमाण इवाभवत् ॥२८०४॥

इति विस्मृतमृत्युः स कुर्वन्नेकाहमाहवम् । कथंचिदाप्तैरन्येद्युर्भग्नसारोपसारितः ॥२८०५॥ 2805

पुरे स शून्ये सैन्यानि संगृह्णंस्तत्र सर्वतः । द्वित्रैरहोभिर्नगरं सुखग्राह्यममन्यत ॥२८०६॥

इच्छां पद्मपुरास्कन्दे मन्दत्वं त्रिल्लकोनयत् । पृष्ठस्थयोर्यशोराजकम्पनाधीशयोर्भयात् ॥२८०७॥

न भृत्यैस्तद्विधः सिद्धश्चास्यैकस्मिन्नसंमते । विधेयान्यलवन्यस्य डामरे होलडौ[1]कसि ॥२८०८॥

द्वैराज्ये सुस्सलस्यापि नैवादृश्यत तादृशः । अनर्थो यादृगुत्तस्थौ तत्सुतस्य समन्ततः ॥२८०९॥

चतुष्कमवधीर्याथ राज्ञा पादगदोपमम् । रिल्हणः प्रैषि तं[1] ग्रीवागण्डतुल्यं व्यपोहितुम् ॥२८१०॥ 2810

प्रस्थितस्तत्प्रमाथाय शमालैः सोन्वबध्यत । व्रजन्प्राग्ज्योतिषं हन्तुं पार्थः संशप्तकैरिव ॥२८११॥

अधावच्चाभ्यमित्रीणस्तान्व्यावृत्य निपातयन् । पद्माकरोन्मुखः पृष्ठलग्नान्भृङ्गानिव द्विपः ॥२८१२॥

---

२७८४. [1]) Doubtful emendation; A °स्तर्जितो. २७८६. [1]) Emended with C; A प्रावृड्पयो°. २७८७. [1]) A °शीधु°. २७९९. [1]) Thus A; comp. for this name viii. 2496. 2748. 2912. 3313. २८०३. [1]) Emended with C; A °हरित. २८०८. [1]) A होलक्षौकसि. २८१०. [1]) Emended with G; A रिल्हणप्रेषितं.

रणश्रान्तेन गमिता त्रियामा तेन रामशे[1] । गर्जत्[2]कुल्यार्पितारातिपृतनानादसंस्क्रिये ॥२८१३॥

तं[1] कल्याणपुरं प्राह्णे विशन्तं सोग्रमागतः । रुरोधाभ्येत्य भूयोपि बलैर्भरितदिङ्मुखः ॥२८१४॥

2815 आपतन्नेव चारातिपदातीन्संमुखागतान् । दृष्टनष्टान्व्यधाच्छागानिवाग्रेजगलो गिलन् ॥२८१५॥

उद्वृत्तमारुतस्येव तस्यापाते पदातिभिः । तत्यजे रिल्हणः पर्णैर्हैमन्त इव पादपः ॥२८१६॥

पश्यतस्तस्य ते विद्रवन्तो जिह्मा न जिह्रियुः । देहस्पृहापारमित्यै कस्यौचित्यमनत्ययम् ॥२८१७॥

अग्रैरथापसृत्य स्वैरर्थितो रिल्हणोब्रवीत् । नयन्प्रजासृजा साम्यं[1] स्वामिभक्तिस्मृतेः स्मितम् ॥२८१८॥

ह्री[1]--वाविशेषेपि जन्तोर्जन्तोर्यदीशिता । भृत्यभावेपि यो लुप्तकृत्यो धिक्तस्य जीवितम् ॥२८१९॥

2820 जातं वक्त्रसरः श्मश्रुराजिनीलाब्जभां[1]जनम् । जराकैरवगौरं च राज्ञः पादान्प्रपद्य यान् ॥२८२०॥

म्लायत्सु तेषु भ्रूभङ्गभृङ्गभ्राजिष्णुभिर्भवेत् । कथं लक्ष्मीविलासैस्तदखण्डैरविडम्बितम् ॥२८२१॥युग्मम्॥

एषा कापुरुषासेव्या धीराणां नैव पद्धतिः । यदायासलवत्रासात्सौख्यवैमुख्यभागिता ॥२८२२॥

वस्त्रापासन एव शीतजनितस्त्रासोथ तीर्थाम्बुभिः स्नाने ह्लादसुखोपलब्धिरसमब्रह्मानुभावोपमा ।
वैह्वल्यं[1] समरे वपुर्विजहतामेवं किलोपक्रमे कै[2]वल्याख्यसुखोपलम्भपरमा पश्चात्पुनर्निर्वृतिः ॥२८२३॥

एवमुक्त्वा परानीकमेकाकी स व्यगाहत । गृह्णञ्शरान्हरिप्रोथश्वाससंदिग्धशूत्कृतान् ॥२८२४॥

2825 स्वर्णत्सरुप्रभा[1]जालहरितालोज्ज्वलोभजत् । खड्गपट्टनटस्तस्य रणरङ्गोत्तरङ्गताम् ॥२८२५॥

तत्खड्गस्य घ्नतः खड्गाङ्गीवैर्जालच्छलाद्द्रुतम् । उत्थाय लग्नं शत्रूणां तृणैस्तृणमणेरिव ॥२८२६॥

आजौ तमनुजग्मुस्ते यैरगण्यन्त वैरिणः । तिर्यञ्चोलक्ष्यतां यातास्तेषां प्राणास्तृणान्यपि ॥२८२७॥

संप्रविष्टो मुखान्मृत्योः कैश्चिन्मार्गैः स निर्गतः । तिमेः संमीलितास्यस्य श्रोत्ररन्ध्रैरिवोदकम् ॥२८२८॥

शश्वत्कुर्वन्परावृत्तीः श्रमशान्त्यै विनिर्गतः । प्रक्षीणभूयिष्ठबलो लब्धोत्सेको रिपावभूत् ॥२८२९॥

2830 पृष्ठतोथ पपाताथ चतुष्कः पुष्कलैर्बलैः । साहायकागतं प्राक्स यं स्वं कंचिदमन्यत ॥२८३०॥

तस्योभयमुखस्यारिसैन्यस्याहेरिवेक्षणात् । न संरम्भैः[1] शिखण्डीव परं ताण्डवितोभवत् ॥२८३१॥

तौ व्यूहावथ पर्यायैर्मुखपृष्ठं प्रदर्शयन् । सोक्षिणोद्युधि मन्थाद्रिर्मथनेब्धितटाविव ॥२८३२॥

कीलनिश्चलयोर्भ्राम्यन्नसकृद्द्वान्तरे द्वयोः । कुविन्द इव ---[1] तुरंगमत्वरा[2]न्वितः ॥२८३३॥

भासः प्रत्यग्रहीत्तस्य तमेकपृतनारयम्[1] । एकतोम्भोभरं द्वीपस्येव कूलबिलोद्गमः ॥२८३४॥

2835 तेन वैरिचमूश्चक्रे लुलितायुधकुण्डला । क्रीडता चण्डवेगेन पुरुषायितुमक्षमा ॥२८३५॥

त्रासपाण्डून्द्विषां वक्त्रकुम्भान्स्वेदाम्भसाचितान् । स कुर्वन्भूभुजं[1] जाने भूयो राज्येभ्यषेचयत् ॥२८३६॥

स च पार्थ्वीहरिश्चास्तामन्योन्यस्य क्षपाक्षणे । सज्जौ मान्त्रिकवेतालाविव रन्ध्रगवेषिणौ ॥२८३७॥

साहायकागतान्साक्षीकृत्यं[1] क्ष्मापतिसैनिकान् । अन्येद्युः सोकरोच्छत्रुं वनमार्गावगाहिनम् ॥२८३८॥

पर्यस्तशौचान्संचिन्त्य त्रिल्लकादीनथाययौ । सज्जपालस्तृतीयस्मिन्दिवसे रिल्हणान्तिकम् ॥२८३९॥

---

२८१३. [1]) Should probably be रामुषे ; cf. ii. 55.—[2]) Emended ; A गर्जन्कुल्या°. २८१४. [1]) Emended ; A तत्कल्या°. २८१८. [1]) Thus A ; perhaps read with G (*sec. manu*) प्रजासृजश्चास्यं. २८१९. [1]) Thus A ; C ह्रीप्रभावाविशेषे. २८२०. [1]) Emended ; A °भोजनम्. २८२३. [1]) Thus corr. by a later hand from A[1] वैह्वल्ये.—[2]) Conjectural reading ; A वैकल्या°. २८२५. [1]) Emended with C ; A °प्रजाजाल°. २८३१. [1]) Emended ; A संरम्भे. २८३३. [1]) Thus A ; C supplements पूर्ण्योस्तुरंग°.—[2]) Emended ; A °गमतुरान्वितः. २८३४. [1]) Emended with C ; A पृतनावयम्. २८३६. [1]) Emended with C ; A °भुजाम्. २८३८. [1]) Emended ; A साक्षीकृतक्ष्मा°.

नृपप्रतापग्लपितः स ताभ्यां पर्यशोष्यत । वनान्तः शुचिशुक्राभ्यां घुणक्षीण इव द्रुमः ॥२८४०॥ 2840
चितानल इवासारैर्युद्धैः शममनाश्रितः । उदयेन शनैर्निन्ये चतुष्कोपि मितोष्मताम् ॥२८४१॥
दारदं[1] बलं दृप्यद्धै[2]मसंनाहवाहिभिः । हयैरवरुरोहाद्रिकुहरादाहवोन्मुखम् ॥२८४२॥
तुरुष्कलोकेनाक्रान्तान्देशांस्तद्दशमीयुषः । शङ्कमानैर्जनैर्ज्ञाता कृत्स्ना म्लेच्छावृतेव भूः ॥२८४३॥
प्रयाणमात्रान्तरिते धन्ये द्वारपतावपि । साहसं निःसहायस्य तत्खङ्गै[1]रग्रतोभवत् ॥२८४४॥
ज्वलत्कनकसंनाहं तत्सैन्यं स द्विपोरुधत् । कचज्ज्वालावलिं दावं सनिर्झर इवाचलः ॥२८४५॥ 2845
विधूय जयचन्द्रादीनग्रप्रस्थानरोधिनः । बलबाहुल्यदृप्तास्ते व्यगाहन्ताहवावनिम् ॥२८४६॥
तेषां हयसहस्राणि त्रिंशद्भिंशत्तुरंगमैः । रंहसा प्रतिजग्राह निजग्राह च गर्गजः ॥२८४७॥
तस्याशुहद्भिर्ददृशे पौरुषं तदमानुषम् । एकैकस्याग्रतो यत्स वैश्वरूप्यमिवादधे ॥२८४८॥
अश्वबल्गाग्रविन्यस्तवक्त्रास्ते विद्रुताः क्षणात् । जगाहिरे कापुरुषा गिरीन्किंपुरुषा इव ॥२८४९॥
अभूमिज्ञतया शाठ्याचैष जातः पराभवः । श्वस्तदस्मान्पुरस्कृत्य जयं प्रत्याहरिष्यथ ॥२८५०॥ 2850
इत्युक्ता राजवदनजयचन्द्रादिभिर्निशि । तथेति मिथ्याकथयन्दारदा विद्रवोन्मुखाः ॥२८५१॥ युग्मम् ॥
प्रवेश्य धन्यद्वारेशौ दुर्गं बलहरो बली । ऐच्छत्सत्रभिसंधातुं रुद्ध्वा पाश्चात्यपद्धतीः ॥२८५२॥
स्कन्धा[1]वारेण सार्धं च दरदां राजवीजिनम्[2] । विधातुं विदधे बुद्धिं तं ततस्तारमूलके ॥२८५३॥
चिकीर्षति ततस्तस्मिन्मत्तेष्वन्धेषु दस्युषु । उत्सेहे साल्हणिः कृत्स्नं राज्यं निश्चित्य[1] निर्जितम् ॥२८५४॥
जयाभावेप्यनन्तेदृक्सामन्तसहितस्त[1]तः । भव्योस्मि भवितेत्येवं विचिन्त्योत्सिषिचे च सः ॥२८५५॥ 2855
पद्मोन्माथाद्विरदरदनैरप्रियैः पद्मबन्धोरिन्दौ स्पर्धिन्युदयति वपुः खण्डशः स्वं भ्रियेत ।
तापस्त्यज्येत च रुचिरता[1]भागिभिः सूर्यकान्तैर्भद्राभद्रं व्यसनसमये संभवेदप्रतर्क्यम् ॥२८५६॥
यो डामरतया भिक्षोः श्वश्चत्कृच्छ्रेप्युपेक्षणम् । टिक्कादीनां च कौटुम्ब्याद्भूभर्तुर्द्रोग्धृमूर्धनि ॥२८५७॥
अलब्धन्यतयानन्यसामान्याश्चर्यवर्धनात् । ततः कृच्छ्रोपयोगाच विश्वासस्येव मूर्धनि ॥२८५८॥
तौ नागराजवदनौ व्यसनावसरे तदा । चित्रं स्वकार्यतात्पर्यादद्भुतादरतां गतौ ॥२८५९॥ तिलकम् ॥
स्वयं विधेयं नागोन्यकृतं तं वीक्ष्य विप्लवम् । अदूरमर्थमन्येन कृतं कविरिवाशुचत् ॥२८६०॥ 2860
क्ष्माभृद्विपक्षं स्वं पक्षीकर्तुं कृतानं ततः । संत्यज्य[1] राजवदनं मां भजस्वेत्यभाषत ॥२८६१॥
संप्राप्तं वः प्रतीक्षध्वं[1] तेजो[2]बलहरात्मजम् । युग्याधिरूढं किं नारीसे[3]वितं यामिको यथा ॥२८६२॥
इति ते संदिशन्तं च व्यसहन्स विहाय तम् । कामधेनुसमं नागं छागाश्लेषाद्विधि- यत्[1] ॥२८६३॥
सर्वः स्वकार्यतात्पर्यात्प्रवर्तेत प्रियाप्रिये । स्नेहवैरेन्यदीये तु न किंचिदधिगच्छति ॥२८६४॥
ज्योतिस्तर्जितकान्ति दन्तयुगलं बाध्यं सुधादीधितेर्दानास्वादधिया प्रिया मधुलिहां कुम्भस्थली कुम्भिनः ।
वासस्यैष[1] विरोधभाक्सरसिजस्येत्यत्र नेन्दो रतिस्तस्याप्यायकृतो हितोयमिति नाप्यस्य द्विरेफा द्विषः ॥२८६५॥ 2865

---

२८४२. [1]) Thus A; C तद्बलं.—[2]) Emended with C; A दृप्येद्धेम°. २८४४. [1]) Doubtful emendation of C; A तत्खाळ्गेरग्र°. २८५३. [1]) A स्कन्दा°.—[2]) Emended; A राजवींजिनाम्. २८५४. [1]) Emended with G (*sec. manu*); A निश्चितनि°. २८५५. [1]) Emended; A °सहितांस्तत○ २८५६. [1]) Emended; A रुचिरमाभा°. २८६१. [1]) Emended with C; A सात्याज्य. २८६२. [1]) Emended with C; A प्रतीक्ष्यध्वं.—[2]) Cf. ओजोनाम्नो बलहरात्संजातो viii. 2695 and note.—[3]) Thus A; perhaps read नार्डांसे°. २८६३. [1]) The text of this verse is evidently corrupt; A as above. C reads व्यहसन् संविहाय तं । कामधेनुसमं नागं छागाश्लेषो विधिर्न यत्. २८६५. [1]) Doubtful; A वा-स्यैष; C सूरस्यैष.

प्रतिष्ठालोठनं कर्तुं ततो बलहरस्य सः । आजन्म वैरं संरेभे तेन भूभृद्धितेच्छया ॥२८६६॥
स तथा दारदान्भग्नानभिन्नो भूभुजैष वः । सभोजात्राजवदनो हन्यादित्यभ्यधान्निजैः ॥२८६७॥
दरद्राजानकानीतनेतारौ कम्पनापती । प्रख्यातक्षेमवदनमत्ता- -[1]भिधावुभौ ॥२८६८॥
त्रस्यन्नोजसनामा च कोट्टेशो मन्त्रितं रहः । ब्रुवाणास्तद्व्यहस्यन्त भोजेनान्तरवेदिना ॥२८६९॥
2870 स्फाटिकेनेव सैन्येन तेनाग्रे रुद्धमप्यथ । दिधक्षु[1] राजार्कमहो विड्डुसूद्दे[2]न्धनेपतत् ॥२८७०॥
पार्थिवानर्थदुश्चिन्तामययक्ष्मपरिक्षतः । स यत्कृष्णक्षपाक्षीणसोमसाम्यं समाययौ ॥२८७१॥
रोगग्रस्ते रणप्रष्ठे पृष्ठगोप्तरि भर्तरि । तथाभियोज्ये स्थाने च भयजर्जरतां गते ॥२८७२॥
आहारस्थं बलहरं विहाय निखिलास्ततः । पलायिषत[1] तेन्येद्युर्विगाह्य हरिभिर्गिरीन् ॥२८७३॥ युग्मम् ॥
दृष्ट्वा बहुमतं प्रातरागन्तारः पुनर्वयम् । कथयित्वेति संप्रार्थ्य साल्हणिं सह तेनयन् ॥२८७४॥
2875 प्राक्पीतकोशो[1] वैवश्यात्स तेषामनुगोभवत् । भ्रष्टकार्यस्तु वैह्वल्यं श्वभ्रे मज्जन्निवादधे ॥२८७५॥
मुहुः सर्वशिरोद्रिक्त[1]रक्तपूर्णमिव ज्वलत्[2] । अवरोहदनच्छाम्बुसोपानाश्मनिभं मुहुः ॥२८७६॥
ज्ञातेन पतितेनेव मुहुर्व्योम्ना महीसमम् । व्रजतस्तस्य वैलक्ष्यादलक्ष्याक्षमभून्मुखम् ॥२८७७॥
दध्यौ च धिङ्नो ये शश्वत्प्रभावं वयमीदृशम् । राज्ञो दृष्ट्वाप्यनात्मज्ञा जानीमो मर्त्यधर्मताम् ॥२८७८॥
प्रतिभाप्रौढनिर्भाततत्त्वानां नान्यथा शिरः । महाकवीनामेतादृक्प्रतापानलवर्णने ॥२८७९॥
2880 राज्ञः प्रतापशिखिनः कणाः क्षोणौ न सन्ति चेत् । तत्कस्माद्वयमायाताः पदन्यासेप्यधीरताम् ॥२८८०॥
अनेकशोङ्कैर्वीराणां पीतधाराम्बुडम्बरे । शोषः प्रादुष्कृतो न स्यात्तज्ज्वालासंज्वरं विना ॥२८८१॥
किमन्तरेण तद्धूममालान्ध्यं प्रोन्मिषद्दृशः । मार्गामार्गविभागस्य परिज्ञाने विमूढता ॥२८८२॥
मधुमत्यास्तटेन्यस्मिन्विवर्ज्य दरदः स्थितान् । वीचीजवनिकाच्छन्नः सोत्राप्याथ तटेवसत् ॥२८८३॥
क्रमादुत्खातखेदस्तैर्नीत्वा स्वशिबिरा[1]न्तरम् । तत्रैष्यतेति संधातुं रोहद्रोहस्पृ[2]हातुरैः ॥२८८४॥
2885 नृपं तेषां ह्यगण्यार्थवर्षिणं नयनैपुणात् । उपजीवितुमिच्छाभूत्तद्रक्षणवणिज्यया ॥२८८५॥
नानेहा विग्रहस्यायं प्रत्यासन्नो हिमागमः । मधुमासि विधास्यामः पुनरारब्धिमुत्तमाम् ॥२८८६॥
कालक्षेपेक्षमत्वं चेद्भुट्टराष्ट्राध्वनाधुना । त्वान्तर्निदध्मो बलिनस्त्रिल्लकस्योपवेशने ॥२८८७॥
राजानं राजवदनः श्रितस्तैरित्यसावतः । उत्कैष्यत स्वराष्ट्रान्तर्युक्त्या बन्द्धुं नराधमैः ॥२८८८॥ तिलकम् ॥
अपि राजपुरीयाणां कौटिल्यं तैर्हि जीयते । दैर्घ्यं निदाघदस्रा[1]णां वियोगदिवसैरिव ॥२८८९॥
2890 तथा यातमुपालेभे दूतैर्बल्लहरोथ तम् । प्रहो निहितवांस्त्वस्मीति त्रोटितवटाकरः ॥२८९०॥
उत्साहादाहवस्थोपि स तथा गार्गिमग्र[1]िमम् । आयान्तं च नृपानीकमुत्साहान्न[2] व्यचिन्तयत् ॥२८९१॥
अकस्माद्विद्रुतदरद्राजभोजादिवार्तया । न व्यदीर्यत यद्धैर्यपर्याप्तिस्तत्किलाद्भुतम् ॥२८९२॥
आडम्बरालम्बनस्य भेदेप्यच्छिन्नविग्रहः । यदयुद्धोद्धतं सिध्येत्तत्कस्यामानुषं विना ॥२८९३॥

---

२८६८. [1]) Thus A; the *akshara* before the *lacuna* could be read also सु; C °वदनमधुभद्राभिधा°. २८७०. [1]) Emended with C; A दिदक्षु.—[2]) Emended; A विड्डुसूहेन्धने°. २८७३. [1]) Emended; A पलायिततेन्ये°. २८७५. [1]) A °कोषो. २८७६. [1]) Doubtful emendation; A सर्वशिरोदृक्त°.—[2]) Emended; A °ज्वलन्. २८८४. [1]) A स्वशिविरा°.—[2]) Emended; A रोहद्रोहः स्पृहा°. २८८९. [1]) Emended; A °दस्राणां. २८९१. [1]) Emended with C; A गर्गिम°.—[2]) Doubtful emendation; A °कमु – हान्न; C °नीकं दृष्ट्वापि नव्य°.

कालानुरोधात्संधित्सुर् धन्यद्वाराधिपावथ । सोयोजयद्विलम्बेन भोजप्रत्यागमाशया ॥२८९४॥

ततोलंकारचक्रः स नेतुं साल्हणिमाययौ । ज्ञातेयाद्वारदानेत्य[1] प्रार्थिता परिपन्थिनीः ॥२८९५॥ 2895

बुद्ध्वा तदनुबन्धेपि द्रोहनिर्बन्धिनीः सभाः । अग्रहीन्मार्गसेत्वग्रे निधनाध्यवसायिताम् ॥२८९६॥

भृत्यैः सह युवप्रायैर्वीक्ष्य तं मर्तुमुद्यतम् । दरातुरं दरद्राजसैन्यं तद्दैन्यमाययौ ॥२८९७॥

व्यपोहन्ती बलहरी बाहुभिः कलहं सरित् । कल्लोलास्फालनोल्लापैर्निनिन्देव दरद्बलम् ॥२८९८॥

ह्रेपितः स्वावरोधैश्च सेर्ष्यैश्च म्लेच्छपार्थिवैः । सैन्यैः कदनभीतैश्च विड्डुसीहोथ तं जहौ ॥२८९९॥

पुरःसरैर्भग्नसेतुपालैः पारं परं ततः । विद्राव्य तानि[1] स प्राप भिन्दंस्तूर्यरवैर्दिशः ॥२९००॥ 2900

असामर्थ्ये वरूथिन्याः[1] स्वस्य चार्थितसंधिना । आनीतो विड्डुसीहेन दूतः प्रोक्तोथ भूपतेः ॥२९०१॥

अमानुषानुभावेन तावत्त्वत्स्वामिना[1] भवेत् । प्रातिसीमिकसामन्तबुद्ध्या स्पर्धासु धीवरः ॥२९०२॥

अश्रद्धेयानुसंधान एव यान्तौ[1] यमान्तिकम् । जयराजोस्मि वामुष्य प्रभावावेदकौ दिवि ॥२९०३॥

तेन दिव्यानुभावेन निर्जयोपि जयो मम । पान्थस्य कुलविभ्रंशात्तीर्थे पतनमुन्नतिः ॥२९०४॥

अथायातः पुरे स्थित्वा कंचित्कालं निजेविशत् । यमराष्ट्रमसत्कीर्तिलसद्वन्दनमालिकम्[1] ॥२९०५॥ 2905

अबुद्ध्वा भोजमायान्तं संधिं तत्रैव वासरे । सार्धं द्वारेशधन्याभ्यां स राजवदनोप्यगात् ॥२९०६॥

अश्वागतं तं व्यावृत्य षष्ठं प्रष्ठं मनस्विनाम् । आदाय तावथा[1]भ्यर्णे प्राविक्षातां क्षमापतेः ॥२९०७॥

अहंकाराद्विमोहाद्वाविमर्शेन[1] बहिष्कृतौ । उपेक्षामक्षते भोजेभजता[2] राजवीजिनि ॥२९०८॥

आहूतस्तु हठोत्कण्ठाभाजापि प्रभुणासकृत् । अनिःशेषीकृताराातिर्न व्यावर्तत रिल्हणः ॥२९०९॥

प्रभोः पुरस्तात्कार्यान्ते तेन स्थातुमशक्यत । प्रसादाकाङ्क्षिणा सूदेनेव भोक्तुं न हि क्वचित् ॥२९१०॥ 2910

द्विधा कृता येन युद्धे पृथ्वीहरसुतद्वयी । मगधेन्द्राकृतिर्भीमेनेव कार्याक्षमाभवत् ॥२९११॥

मातृकुक्षिमिव स्वोर्वीं तेनाजौ लोष्टकः[1] कृतः । खाण्डवे खण्डितः सर्प इव गाण्डीविनाविशत् ॥२९१२॥

भजं[1]श्चतुष्कः संकोचं दुर्भेदं त्रिल्लकालयम् । स्वकायकर्परं दर्पोज्झितः कूर्म इवाविशत् ॥२९१३॥

निःशेषीकृतकार्यः स शौर्येणैव महीपतेः । पार्श्वं पादनखज्योतिःपट्टबन्धाप्तये ययौ ॥२९१४॥

प्रतापैर्नृपतेरित्थं विप्लवः शोषितोप्यभूत् । अमात्यमतिदोषेण भूयः प्रादुष्कृताङ्कुरः ॥२९१५॥ 2915

दण्डार्हो राजवदनो दानेनाप्यायितो यतः । निर्भयं भोजमायान्तं प्रतिजग्राह तं पुनः ॥२९१६॥

उत्कोचपरिणामात्तं सोथ स्थापयति स्म तम् । दिन्नाग्रामाभिधे स्थाने खाशकानां निवेशने ॥२९१७॥

इत्येनमब्रवीच्छ्वश्चेदायास्यो नानुगामिनः । मितानुयायी द्वारेशः प्रायास्यद्गोचरान्मम ॥२९१८॥

सोत्कम्पः साहसस्रोतःपाते[1]नीयत नौरिव । त्रिल्लकेनापि स स्थैर्यं नीतिरज्जुप्रसारणात् ॥२९१९॥

व्यसनोल्लासवैवश्यं विशां पत्युर्व्यचिन्तयत् । येनाव्यवस्थाप्राथम्यं स जाल्मः पुनरग्रहीत् ॥२९२०॥ 2920

अलंकारादिभिः स्वास्थ्ये स्थाप्यमानोपि मन्त्रिभिः । अत्यजन्नैव[1] कौटिल्यमजितात्मेव[1] दुर्ग्रहम् ॥२९२१॥

---

२८९५. [1]) Emended; A °द्वारदावेत्य; the text is corrupt. २९००. [1]) Emended; A विद्रावितानि. २९०१. [1]) Emended; A वरूथिन्या. २९०२. [1]) Emended; A ताव-त्स्वामिना. २९०३. [1]) Emended with C; A यान्तो. २९०५. [1]) Emended; A °मालिकाम्. २९०७. [1]) The letter corresponding to थ cannot be read with certainty in A; C तावताभ्यर्णे. २९०८. [1]) A °विमर्षेण.—[2]) Emended; A भजते. २९१२. [1]) Comp. note to लोठनः viii. 2496. २९१३. [1]) Emended with C; A भजंञ्च°. २९१९. [1]) Emended with C; A °स्रोतपाते°. २९२१. [1]) Emended; A अत्यजन्नेव and °जितात्मैव.

गदं वैद्य इवापाकं तमवज्ञाय पार्थिवः । पक्वगण्डानिवारेभे रिपून्पाटयितुं परान् ॥२९२२॥
आगन्तव्यं त्वया पश्चाद्यात्स्वस्मात्तु प्रकम्पताम् । भोजमुक्त्वेत्यलंकारचक्रोगाद्भिन्नवोद्यतः ॥२९२३॥
तं जयानन्दवाडाख्यो दस्युरानन्दवाडजः । अन्वयुर्विक्रमोदग्राः परेपि क्रमराज्यजाः ॥२९२४॥
2925 अग्रस्थितो राजगृह्योलंकारः स्वल्पसैनिकः । वालुकासेतुकल्पस्तैर्जज्ञे सिन्धुरयैरिव ॥२९२५॥
स तु रामचराद्याजिक्षोभसंभावनां विशाम् । उदपादयदेकाकी कुर्वन्बह्वभिराहवम् ॥२९२६॥
आपानरभसक्षुभ्यद्रक्षःसंभ्रमदक्षिणम् । रणं जगाम गञ्जात्वमञ्जसास्रपरिस्रुतः ॥२९२७॥
स तूलकूटमिव तत्कटकं विकटं द्विषाम् । किमन्यत्वैरयत्क्वापि प्रभञ्जन इवाञ्जसा ॥२९२८॥
ग्रासाय गृध्रकङ्कादिपत्त्रिव्रातस्य तत्यजे । आनन्दवाडसूनुः स हत्वा तेनेषुणा रणे ॥२९२९॥
2930 भोजस्योत्थातुकामस्य जिघृक्षोः क्ष्माभुजश्च तत् । पङ्कप्रधावत्क्रकरव्याधन्यायो व्यवर्धत ॥२९३०॥
अनुड्डयनसामर्थ्यः श्राम्यति क्रकरो यथा । धावन्पङ्के पतन्व्याधोप्यनुधावत्यथान्वहम् ॥२९३१॥
प्रसङ्गे साहसस्यैवं भोजः क्लैब्यमगात्तदा । तं प्राप्तुमिच्छुर्भूपोपि मतिमोहं मुहुर्मुहुः ॥२९३२॥ युग्मम् ॥
दिन्नाग्रामस्थिते भोजे स राजवदनोप्यगात् । पुनः किं चौरचण्डालाः श्रेयसीत्युक्तिमीशितुः ॥२९३३॥
डामरा भग्नसंघाता भूयः पूर्वाधिकां ततः । कन्थां ते ग्रन्थयामासुर्मुहुर्यां शौर्यशालिनः ॥२९३४॥
2935 ते द्वारपतिमायातं सोढुं शेकुर्न केवलम् । अशक्यैराहवैर्यावत्तात्पर्यादुदवेजयन् ॥२९३५॥
तेषां त्राणार्थमन्येषामुत्थानार्थमथाययौ । कृष्टोलंकारचक्रेण नीविं दत्त्वा स साल्हणिः ॥२९३६॥
तेषां परेद्युः पार्श्वं स यियासुरसकृद्यदा । हायाश्रमं श्रान्तसैन्यो द्वारेशोबुद्ध तं तदा ॥२९३७॥
अजानन्निव तेषां स व्याजसंधिं निबद्धवान् । मिषात्कुतोप्यगात्तिर्यक्स्थितं सत्तारमूलकम् ॥२९३८॥
तस्मिंस्तत्र स्थिते दूरात्कुतस्त्यामपि पूत्कृतिम् । श्रुत्वा भोजोवदत्सायं किमपि व्याकुलीभवन् ॥२९३९॥
2940 निर्जीर्विहस्यमानोपि त्रासात्तस्मादहेतुकात् । व्यरंसीत्संभ्रमान्नासौ चक्रे सज्जांस्तु वाजिनः ॥२९४०॥
त्रस्तोलंकारचक्रोथ दशग्राम्यग्रतो द्रुतम् । क्व राजपुत्र इत्येवं कथयित्वा पलायितः ॥२९४१॥
उदतिष्ठत्ततो ग्राममध्यात्तूर्यध्वनिर्महान् । आस्कन्दावेदकः सेनानिनादश्च क्षपामुखे ॥२९४२॥
अलक्षितो ध्वान्तमध्ये भेजे भोजः पलायनम् । श्वः कर्तव्येष्वलंकारचक्रो युद्धाय संदधे ॥२९४३॥
दत्तो द्वाराधिपेनाग्निर्गिरिवर्त्म प्रकाशयन् । ध्वान्तध्वस्तात्मनां[1] तेषां तदाभूदुपकारकः ॥२९४४॥
2945 द्वाराधिपस्य क्षाम्यन्तः[1] संधिं भोजप्रतीक्षया । श्रुत्वा तमथ वृत्तान्तं भङ्गं ते डामरा ययुः ॥२९४५॥
असंत्यजन्नपत्यादिबन्धं धीरोचलाश्रयात् । आजिं स भोजोलंकारचक्रेणामङ्गलावहम् ॥२९४६॥
...........................[1] । भोजस्तत्राप्यभूत्तर्षान्नाहारादिसुखान्वितः ॥२९४७॥
बाणाग्निजस्त्रिपुरनिर्दहने प्रतापः पाथोनिधेः प्रमथने वडवाग्निजन्मा ।
आसाद्य मन्दरनगेन समागमं हि न क्वापि पन्नगपतेः सुखसख्यमासीत् ॥२९४८॥

---

२९२३. [1]) Emended with C; A °चक्रेगाद्भि°. २९२४. [1]) A °वाळाख्यो and °वाळजः. २९२५. [1]) Emended with G (*sec. manu*); A °कल्पस्तं जज्ञे. २९२६. [1]) Conjectural reading; A राम-राद्या°; $C_2$ शत्रुभिराद्या°. २९२९. [1]) Emended; A °पतिव्रातस्य; C °पातित्रा°.—[2]) A आनन्दवाळ°. २९३२. [1]) Emended; A तत्प्राप्तु°. २९३८. [1]) Emended; A सन्ता°. २९४४. [1]) Emended; A °त्मना. २९४५. [1]) Emended with C; A °क्षम्यन्तः. २९४७. [1]) Two or more *pâdas* seem to be lost here; A does not indicate the *lacuna*; C supplements संरम्भात्कर्तुमारेभे सामर्थ्यान्न च चक्षमे.

क्षुत्पिपासाश्रमं हन्तुं प्राप्तः स्वविषयावनौ । अलंकाराल्मजैर्भूयो बन्द्धुं[1] भोजोभ्यलप्स्यत ||२९४९||

पितुर्मतेन बुद्ध्या वा स्वया तत्तद्विधित्सतः । सोभिसंधाय निर्यातः प्रापाथ विषयान्तरम् ||२९५०|| 2950

ततो बलहरेणैव कृत्यं निश्चित्य कार्यवित् । अनास्थोन्यलवन्येषु दिन्नाग्रामं पुनर्ययौ ||२९५१||

द्वाराधिपोहितोद्धारधीरोप्यत्रान्तरेक्षमः । चक्षूरोगेण भग्नाभियोगोकस्माद्व्यधीयत ||२९५२||

भोजाय दातुमैच्छद्यो डामरस्ते सुते ददौ । पर्माण्डयें गुल्हणाय राजजाय च निर्जितः ||२९५३||

रोगोच्चण्डतया दण्डप्रयोगावसरे कृते । तत्र साम प्रयुज्यैव द्वारेशो विवशोविशत् ||२९५४||

अभियोगक्षगे तस्मिन्ययौ भारसहः क्षयम् । दुर्नामकामयक्षामः षष्ठचन्द्रोपि गर्गजः ||२९५५|| 2955

तत्रामयाविन्येत्रात्तोद्रेकौ तदनुजौ निजौ[1] । चक्राते वसुधां दुःस्थामास्कन्दाद्यैरुपद्रवैः ||२९५६||

त्रिल्लकः प्रबलैरन्यैः सहाभेदं प्रवर्धयन् । नाग्रहीद्विग्रहैकाग्रः सान्त्वनामपि भूपतेः ||२९५७||

षष्ठे निष्ठां गते रोगमग्ने द्वारपतावपि । नियुक्तः क्ष्माभुजा धन्यो[1] निरगात्तारमूलकम् ||२९५८||

भोजश्च्युतोमुतोन्येषां बलिनां गोचरे पतेत् । प्राप्तप्रतिष्ठो निस्तीर्णो देशाद्वासाध्यतां व्रजेत् ||२९५९||

इति संचिन्त्य सामाद्यैरुपायैस्तं जिघृक्षुणा । क्ष्माभुजामन्दसंरम्भो विदधे सोभियोगभाक् ||२९६०|| युग्मम् || 2960

अज्ञातोदर्कवैषम्या दुर्नीतिः सा महीभुजम्[1] । व्यावृत्यावाधताच्छिन्नपुच्छाक्रुष्टेव पन्नगी ||२९६१||

बलिनं राजवदनं नृपं चावेत्य निर्बलम् । आभ्यन्तराश्च बाह्याश्च विक्रियां यत्क्रमाद्ययुः ||२९६२||

छिद्रान्तराणि सुलभानि सदैव हन्त पातालरन्ध्रसरणेरिव दण्डनीतेः ।

बल्हीभवन्प्रसरमन्तरसंप्रविष्टो यात्यप्रतर्क्यनियमात्पतनं भजेद्वा ||२९६३||

भोजत्यागोर्थितो राज्ञा क्षीणार्थोसौ व्रजेदितः । उक्त्वेत्यमुं बलहरस्तस्य वृत्तिमकारयत् ||२९६४||

तां लब्धप्रसरां मायां राजपक्षे विलोक्य सः । युक्त्यन्तराणि संलेभे प्रयोक्तुं नीतिकौशलात् ||२९६५|| 2965

संधिं पदे पदे बद्ध्वा सार्धं बलहरादिभिः । कुर्वन्गतागतं धन्यो जनस्यावाप हास्यताम् ||२९६६||

शश्वद्व्या[1]वर्तमानस्य राजकार्यस्य नावधिम् । अरघट्टघटीयन्त्रगुणस्येवाससाद सः ||२९६७||

तस्य चक्र इवोद्भ्रान्ते कर्तव्ये तैक्ष्ण्यभागपि । भेत्तुं प्ररोढुं वाप्यासीन्नयो बाण इवाक्षमः ||२९६८||

नीतराजद्वयो व्यग्रः शेषस्यैकस्य विग्रहे । चतुरङ्ग इव क्रीडन्विवशोभूद्विशां पतिः ||२९६९||

बद्धलक्ष्यः प्रदानार्थं ततश्च छद्मना परान् । भञ्जतो वाजिपत्त्यादि नाप्यासीन्नाप्यजीगणत् ||२९७०|| 2970

दस्युषु स्यूत[1]सङ्गेषु शीतापायप्रतीक्षिषु । नागाद्बलहरः स्वेषामुन्मूलनमशङ्कत ||२९७१||

सामर्थ्याशिथिलामित्रभावे सूत्रितविप्रिये । तस्मिन्धावति धन्ये च शश्वत्सोवेपताकुलः ||२९७२||

संमन्त्र्य सार्धं भोजेन धन्यं समदिशत्ततः । बद्ध्वार्पयत नागं मे भोजं दास्यामि वस्ततः ||२९७३||

भूरिकार्यकृतं स्वस्य बन्धनार्थावहां[1] रिपोः । धन्यो व्यसनवैवश्याद्धियं नाबुद्ध तस्य ताम् ||२९७४||

पार्थिवाः स्वार्थसंसिद्धित्वराविरतसत्त्वया । धियाविशुद्धं यत्किंचित्कुर्वन्तीति न नूतनम् ||२९७५|| 2975

काकुत्स्थो[1]पि प्रियाप्रार्थी व्यग्रः सुग्रीवसंग्रहे । वीरोविधेयं स्वार्थान्ध्याद्वधं व्यधित वालिनः ||२९७६||

---

२९४९. [1]) A बन्धुं. २९५६. [1]) Emended; A नमनुजं निजम्; cf. षष्ठस्य जयचन्द्रश्च श्रीचन्द्रश्चानुजौ viii. 2753. २९५८. [1]) Emended; A धन्ये. २९६१. [1]) Emended; A °भुजाम्. २९६७. [1]) Emended; A °बुधवर्तं°. २९७१. [1]) $A_1$ has written first द्यूतसङ्गेषु and subsequently indicated the reading स्यूत°. २९७४. [1]) Emended; A °वहं. २९७६. [1]) Emended with C; A काकुस्थोपि.

संहृत्य सत्यनित्यत्वं राज्यगर्वाविशुद्धधीः । आचार्यं पाण्डवो राजा धर्मनिघ्नोऽप्यघातयत् ॥२९७७॥
आ भिक्षुविग्रहान्नित्यद्रोग्धुर्नागस्य विग्रहः । स्वार्थापेक्षी तटस्थस्य तत्कालं न विगर्हितः ॥२९७८॥
अगृहीत्वा तु भूभर्त्रा कंचिद्भोजार्पणे पणम् । सोवाष्टम्भी[1]त्यभूत्तस्मिन्मन्युर्मतिमतां मनाक् ॥२९७९॥
2980 यथा तत्कृत्यमायत्यां हितं जातं तथैव चेत् । विचार्याकारि राज्ञा तच्छेमुषीयममानुषी ॥२९८०॥
विभिन्न इव भोजस्तु नागं समदिशद्यथा । दित्सुर्बलहरो[1] राज्ञे त्वद्र्पणपणेन माम् ॥२९८१॥
बन्धमश्रद्दधानोऽस्य राज्ञस्त्रासादसौ श्रयेत् । स विदन्नथ माध्यस्थ्यमिति तं हि तथावदत् ॥२९८२॥
षष्ठचन्द्रे गते निष्ठां जयचन्द्रेण पार्थिवः । संगृहीतेन तं नागं पार्श्वं प्रावेशयत्ततः ॥२९८३॥
पक्षीकृतः क्ष्माभुजायं हन्यादस्मान्भयादिति । चलन्तमपि तं भोजस्तन्मन्त्रिणम[1]बोधयत् ॥२९८४॥
2985 तथेति जानन्नपि तं क्रुष्टोऽस्म्येतै[1]रनीशताम् । यातः किमपि हन्तेति दूतैर्नागोऽप्यभाषत ॥२९८५॥
नियतं नियतिस्रोतोगर्भे जन्तोर्निमज्जतः । कथ्यमानं तटस्थेन श्रोतुं न श्रवणौ क्षमौ ॥२९८६॥
नागे बद्धे तत्कुटुम्बैर्भीतैरेत्य समाश्रितः । मायाशाली बलहरो दुर्दर्शः समपद्यत ॥२९८७॥
भोजनि[1]ष्क्रयविक्रेयं तमादाय ययौ ततः । रिल्हणेन समं धन्यो धावन्बलहरा[2]न्तिकम् ॥२९८८॥
सान्तर्हासोमोहयत्तौ[1] प्राङ्नागं दत्त मे ततः । भोजं दास्यामि व इति ब्रुवन्भ्रामयति स्म सः ॥२९८९॥
2990 बद्धमूलतया दूरं दुर्धर्षौ योद्धुमागतम् । सर्वं तच्च तयोः सैन्यं निन्ये कृत्यविधेयताम् ॥२९९०॥
वर्षयुद्धापकर्षादि – खि[1]न्नौ तौ ततोऽभ्यधात्[2] । इतोपसृतयोः कुर्यां युवयोर्मतमित्यसौ ॥२९९१॥
एकप्रयाणान्तरिते स्थितयोः पथि चाकरोत् । कार्यान्तःपातवैवश्ये तयोर्मतिविमोहनम् ॥२९९२॥
काचिद्बलहरस्यासीत्पर्याप्तिर्धैर्यसत्त्वयोः । निश्चोद्याद्यतने काले वीराणां विरलैव या ॥२९९३॥
तथा हारितमार्गाय साहसात्पार्श्वमीयुषे । द्रुह्यति स्म न धन्याय लोभाद्भोजाय नापि यः ॥२९९४॥
2995 मतिमोहे[1]न नागं चेद्द्युर्मे सचिवास्ततः । कुर्यां तं स्वपदेभ्यर्थ्य चकारेति च चेतसि ॥२९९५॥
नागासांनिध्यलब्धर्द्धिदार्ढ्यार्थं गूढवैकृतः । भ्रातृव्योपातयन्नागं धन्याद्यैर्लौष्टकाभिधः ॥२९९६॥
सचिवैर्निहते नागे निर्हेत्वहितमोहितैः । दुर्मन्त्रितं नरपतेः स्वैः परैश्च व्यगर्ह्यत ॥२९९७॥
स्वजातीयवधक्रोधाद्विरुद्धैः सर्वडामरैः । नागानुगैश्चाश्रितोऽभूत्ततो बलहरो बली ॥२९९८॥
देहिनो व्यसनापातवैवश्याद्भ्रमतोऽपथि । अकार्यं कुर्वतः कार्यं सिद्धः संसाधयेद्विधिः ॥२९९९॥
उद्यद्दुःसहवित्तितानवतया बद्धावधाने मनस्युन्मार्गभ्रमणैवशस्य रभसाच्छ्वभ्रे परिभ्राम्यतः ।
3000 अन्योपाहितकोशपृष्ठलुठनात्संदर्शिताङ्कक्षतेर्जन्तोर्हन्त तनोति दुर्गतिशमं रम्यानुलोम्यो विधिः ॥३०००॥
तथा निरनुसंधानं नागं धीसचिवैर्हतम् । नाबुद्ध भोजः संजातत्रासस्त्वेवं व्यकल्पयत् ॥३००१॥
लब्धवर्णस्य नावर्णावहं कर्मेदमीशितुः । अलब्धपणबन्धस्य वाञ्छिताप्त्यै विशङ्क्यते ॥३००२॥
[1]यश्च युद्धमिति व्यग्रं[2] हर्षादाद्यामवापि यः । भोजमन्यकरस्थोऽयमशक्यो ह्यन्यथा मम ॥३००३॥

---

२९७९. 1) Emended; A सोवष्टम्भी°. २९८१. 1) Emended; A °बलहरे. २९८४. 1) Thus A; perhaps read °न्मन्त्रितमबो°. २९८५. 1) Emended; A °स्मीत्येतैर°. २९८८. 1) Emended with C; A भोजोनि°.—2) Emended with C; A °न्बलहरोन्तिकम्. २९८९. 1) Emended; A मोहयन्तौ. २९९१. 1) Thus A; C °कर्षादिसङ्क्लिन्नौ.—2) Thus corr. by $A_1$ from °व्यधात्. २९९५. 1) $A_1$ has written मतिमोहे; न supplied apparently by $A_2$. ३००३. 1) The text of this verse is evidently corrupt; emendation doubtful.—2) Perhaps read युद्धमतिव्यग्रं.

उक्त्वेति मोहयन्धन्यमुख्या – –स्मि[1] संदिशेत्[2] । इति मां राजवदनः स्थितस्तन्नूनमन्यथा ॥३००४॥युग्मम्॥

आ भिक्षुविप्लवाद्द्रोहसुभिक्षस्यानुबन्धिनः । किं राजवदनोप्येष लोभात्संभाव्यते न भूः ॥३००५॥ 3005

अथाविशङ्किनस्त्रासव्युदासायास्य खाशकाः । रक्तार्द्रकृत्तिस्रस्ताङ्गि कोशपानं प्रचक्रिरे ॥३००६॥

प्रादुष्कृतभियः क्षिप्तरक्षिणोमुष्य तिष्ठतः । विश्वासार्थं वल्हरो विरलः पार्श्वमाययौ ॥३००७॥

अमात्यमतिजाड्येन नष्टे कृत्येथ कृत्यवित् । स्वयमुत्तम्भने नीतः संरम्भसंभ्रमो नृपः ॥३००८॥

चैत्रः पादपमण्डलस्य तटिनीतोयस्य वर्षागमः सत्कारो गुणगौरवस्य नयनप्रेम्णोन्तिकासेवनम् ।

ऐश्वर्यस्य महोद्यमो जयविधेर्गाढाविषादग्रहः कर्तव्यस्य च सिंहदेवनृपतिम्र्लानौ न तत्त्वावहः ॥३००९॥

प्रवाहेणेव कृत्यस्य हठेन हरतोन्तरे । प्रातिलोम्यं श्रितवता पारं गन्तुं न पार्यते ॥३०१०॥ 3010

अतो धूर्तो नृपो मुग्ध इति ज्ञातोरिभिर्मुधा । मौग्ध्यं प्रदर्शयंस्तेषां यततेस्माभिसंधये ॥३०११॥

स हि यत्तत्प्रदानेन भजन्भोजान्तिकस्थितीन् । तस्याविश्वासपात्रत्वं मन्त्रस्तस्याभितोनयत् ॥३०१२॥

गन्धेन वासितोत्सङ्गाः कुरङ्गार्यङ्गजन्मना । प्रज्वलन्त्यो विभाव्यन्ते तटिन्योपि कवाटिभिः ॥३०१३॥

नीडस्यान्तः सरन्ध्रस्य सर्वतो हि भयं स्पृशन् । जाले द्वाराग्रबद्धे च निर्गमे पतनं विदन् ॥३०१४॥

ताम्येद्यथा खगो भोजस्तथान्तःस्थेष्वविश्वसन् । बहिर्भूपेन रुद्धाध्वा प्रस्थानेप्यभजद्भयम् ॥३०१५॥ युग्मम् ॥ 3015

तदा स दौस्थ्यातिथितां प्राप्तः प्रैक्षत न क्षणम् । मनोविनोदनं किंचित्कृत्यं लोकद्वयोचितम् ॥३०१६॥

उग्राभिषङ्गमनुषङ्गि परस्य दुःखं हन्ताश्रथं व्यथयति प्रसभार्द्रभावम् ।

बद्धः सरोजकुहरे विरहार्तनादैश्चक्राभिधस्य मधुपोधिकमेति दैन्यम् ॥३०१७॥

रणे पूर्णव्रणाश्यानशोणितो लूनकुन्तलः । फेणोद्गार्याननः क्रन्दंस्तेनैकः प्रैक्ष्यत द्विजः ॥३०१८॥

स पृष्टो विप्लुतैर्नीतं सर्वस्वं[1] विक्षतं तथा । स्वं डामरैर्निवेद्यैनं निनिन्द त्रातुमक्षमम् ॥३०१९॥

स्वदौस्थ्यार्तमनास्तस्य दुःखेन व्यथितोन्वहम् । घट्टितार्द्रव्रण इव प्राह स्मेति स सान्त्वयन् ॥३०२०॥ 3020

गर्हार्होस्मि न ते ब्रह्मन्योनुग्राह्योहमीदृशः । विषमे वर्तमानश्चेत्यथ सोपि तमब्रवीत् ॥३०२१॥

दुर्ग्रहेणामुना ब्रूहि कोर्थः पार्थिवपुत्र ते । सारासार[1]विदो यूनः कुले जातस्य मानिनः ॥३०२२॥

प्राणान्संदेहमारोप्य प्रणम्य प्राकृताशयान् । पीडयित्वा विशः क्लेशैः कार्यं किमिव पश्यसि ॥३०२३॥

यश्च ते प्रतिभात्येव जेतव्यो विदितो न किम् । अग्निशौचः स सारङ्गः परशौर्याग्निमज्जने ॥३०२४॥

यत्र शस्त्रशलाकापि विकला तद्विधीयते । इन्दीवरदलद्रोण्या घटनं स्फाटिकाश्मनः ॥३०२५॥ 3025

पृथ्वीहरावतारादिप्रत्यनीकिजितः परे । के नामास्य न संघर्षे क्षुद्रप्राया दरिद्रति ॥३०२६॥

किं दृष्ट्या[1] एव बुद्धापि कृत्यं द्वैराज्यजीविनाम् । भृत्याशयाः फणिग्राहिगृहीता इव भोगिनः ॥३०२७॥

जातैः क्ष्मावलयोद्वहे फणिकुले धिग्भो[1]गिडिम्भैर्मुदा[2] व्यालग्राहिविकासितास्यकुहरैर्ग्रासस्य[3] हा गृह्यते ।

एतान्भिक्षयितुं न तु प्रथयितुं ते जीविकायै जनत्रासार्थं ननु कारयन्ति हि दृतेर्निर्मज्जनोन्मज्जनम् ॥३०२८॥

इत्युक्तवन्तं तं सान्त्वयित्वा भोजो व्यसर्जयत् । तदैव[1] चाशु व्याकोशविवेकः समपद्यत ॥३०२९॥

---

३००४. 1) Thus A; C °मुख्यान्मुग्धोऽस्मि सन्दिशेत्.—2) Perhaps read संदिशन्. ३०१९. 1) Emended with C; A °र्नीतः. ३०२२. 1) सारसा no longer legible in A; found in R G C. ३०२७. 1) Emended; A दृष्य. ३०२८. 1) Emended with G (*sec. manu*); A °कुलैर्धिभोंगि°.—2) Emended; A मुधा.—3) Emended with G (*sec. manu*); A °कासितस्य कुहरैर्ग्रासस्य. ३०२९. 1) Emended; A तदेव.

भव्यात्मत्वं प्रशममहिमोल्लासने हन्त हेतुर्भावानां तु ध्रुवमपरथा मार्दवं क्रूरता वा ।
3030 स्पृष्टं[1] पादैरमृतमहसः स्यात्कठोरं हिमांशोर्याति ग्रावाप्यहह रभसादार्द्रतां चन्द्रकान्तः ॥३०३०॥
राजन्याभिजने जातोप्यलज्जत्वमशिक्षितः । सोन्तरं स्वस्य राज्ञश्च मुहुर्महदचिन्तयत् ॥३०३१॥
गुणैः शौर्यनयत्यागसत्यसत्त्वादिभिः प्रभोः । पूर्वेप्युर्वीभुजः खर्वाः क्षुद्राः स्पर्धासु के वयम् ॥३०३२॥
तस्य प्रभावदीप्तेपि समये क्षान्तिशीतला । शक्तिः क्षयजडत्वेपि मुक्तानां नो महोष्मता ॥३०३३॥
क्ष्वेडाग्नितापनिविडोरगसंगमेपि तुङ्गस्य चन्दनतरोरपि शीतलत्वम् ।
काले हिमर्तुपरिपिञ्जरसंज्वरेपि निम्नस्य कूपकुहरस्य महोष्मयोगः ॥३०३४॥
3035 कुतोपि पर्ययात्कार्यं सुप्तं नृपममुं विना । प्राप्य कस्य पुनः प्राप्यमप्यशुद्ध्या न बाधितम्[1] ॥३०३५॥
भ्रष्टं निर्झरवारि शुभ्रमचलैः स्वीयेन भूयः क्वचिल्लभ्यं लभ्यमथाभ्रतः कलुषतादुष्टं प्रकृष्टं न तत् ।
निर्यन्निर्भरनिम्नगाम्बु नभसः प्राप्येत नित्यं दधत्प्रालेयत्वमुपेत्य शुद्धिमधिकां नाद्रेर्हिमाद्रेर्नगैः ॥३०३६॥
तदर्थमेव ग्रथितो योनर्थोग्रथितात्मनः । स तेन स्वस्थतां नेतुमर्थितो न स्पृशेद्रुषम् ॥३०३७॥
प्लोषाय योस्य दववह्निमदादमुष्मिन्स्वस्थे स तेन शिखिना ग्लपितः समीपम् ।
अभ्येति चन्दनतरोर्दववह्निदाहशान्त्यै यदि प्रियकृदेष न तस्य किं स्यात् ॥३०३८॥
समग्रं[1]दुर्गतावर्हदपकर्तैव भूपतिम् । लोकनाथं तमुद्धर्तुं धीरं धन्यः पुनः पुनः ॥३०३९॥
3040 राजप्रसादनोपायान्वेषी बलहरान्तिकम् । राजदूतमथायान्तमेकदै[1]कं व्यलोकयत् ॥३०४०॥
दरद्देशं व्रजन्दृष्टवान्प्राक्प्रज्ञात[1]मन्तिकम् । स नमन्तं तमानीय ततः स्मेर इवाब्रवीत् ॥३०४१॥
राज्ञः किमन्यसंधानैः संधिं बध्नात्[1]वसौ मया । प्राज्ञैर्हि भिषजा भोज्यमातुराय समर्प्यते ॥३०४२॥
तत्तस्याश्रद्दधानस्य नर्मस्मेरस्य जानतः । प्रत्ययोत्पादनं तैस्तैरालापैः किंचन व्यधात् ॥३०४३॥
निर्दम्भभाषितैरूढविस्रम्भः स कथान्तरे । अथाभिगम्य राजानं स्तुवन्भोजमभाषत ॥३०४४॥
3045 राजपुत्राभिजातस्य पादच्छायास्य लभ्यते । स्वर्णाद्रेरिव कल्याणप्रकृतेः पुण्यभागिभिः ॥३०४५॥
अनुवृत्त्यातिमृद्व्यापि तस्यापोह्यते[1] वैकृतम् । ज्योत्स्नयेव शरद्भानुपरितापौष्ण्यमम्भसः ॥३०४६॥
अपि स्मरसि चार[1]त्वे नियुक्तोस्मि महीभुजा । विशतस्ते दरद्देशमभूवं पुरतः पुरा ॥३०४७॥
ततो निवृत्तो वृत्तान्तं मुख्यमाख्याय तावकम् । कालं क्षेप्तुं कथां[1] दैर्घ्यं नयन्मध्ये तमभ्यधाम्[2] ॥३०४८॥
क्षुत्तृ[1]डध्वक्रमश्रान्तान्देव त्वामवलोक्य माम् । निन्दतः स्वानुगान्भोजो[2] निर्भर्त्स्यैवं तदाब्रवीत् ॥३०४९॥
3050 स दैवतमिवास्माकं कुलालंकरणं प्रभोः । वयं त्वसुकृतो यस्य नाप्नुमः पादसेवनम् ॥३०५०॥
गण्याः पर्यन्तनिःसारास्तत्संबन्धादिमे वयम् । चन्दनभ्रान्तिकृत्काष्ठं यत्स्यात्तद्गन्धवासितम् ॥३०५१॥
तच्छ्रुत्वैव दयार्द्रत्वं त्वयि यातः स लक्षितः । पृच्छन्पितेव किं गर्भरूपो वक्तीति मां पुनः ॥३०५२॥
तन्निशम्यैव भोजस्य द्रवीभूतमभून्मनः । सोन्तर्बाष्पोप्य[1]पश्यत्त्वं सान्त्वयन्तमिवाग्रतः ॥३०५३॥

---

३०३०. [1]) Emended with C; A स्पष्टं. ३०३५. [1]) Emended ; A चाधितुम्. ३०३९. [1]) Emended with G (*sec. manu*); A समग्रोद्दु°. ३०४०. [1]) Emended with G (*sec. manu*); A °मेकमेकं. ३०४१. [1]) Emended ; A °न्दृष्टवाक्प्रज्ञान्तम°; C °वाक्प्रज्ञाहम°. ३०४२. [1]) Emended with C ; A सन्धिबन्धात्त्वसौ. ३०४६. [1]) Emended ; A °पोह्यत. ३०४७. [1]) Emended; A चारुत्वे. ३०४८. [1]) Emended ; A कथादैर्घ्यं.—[2]) Emended ; A तमभ्यधात्. ३०४९. [1]) Doubtful emendation of C ; A क्षुन्तृन्नध्व°.—[2]) Emended ; A भोजं. ३०५३. [1]) प्य omitted in A ; supplied with C.

सुव्यक्तमात्रासंबोधमुग्धत्वेन विहीयते । तत्त्ववित्कारणाज्ञानादन्तःकरणवेदनम् ॥३०५४॥

अश्रद्दधानस्तामिच्छां भोजस्याकृच्छ्रवर्तिनः । प्रतिदूतीकृते तस्मिन्धन्यो न प्रत्ययं दधे ॥३०५५॥ 3055

देविताभूद्यथा नागवृत्तान्ते न भवेत्तथा । महीभुजं मोहयितुं मायया दीव्यते मया ॥३०५६॥

मा भूद्विन्नोयमित्येवमुक्त्वा बलहरं रहः । व्याजार्जवेन भोजस्तु संधिबन्धाय तत्वरे ॥३०५७॥युग्मम्॥

तत्कालयोग्यसाचिव्यश्वक्रिकाचतुरस्तथा । तेनाशु दैशिकापत्यमेको दूत्ये न्ययोज्यत ॥३०५८॥

स बालकतया नित्यस्वतन्त्रश्वक्रिकां स्वयम् । आचरेदिति नाशङ्कां भोजे बलहरोभजत् ॥३०५९॥

पार्थिवः प्रार्थितः संधिदूतमाप्तं प्रतीक्षते । प्रत्यागतेन तेनेति ततो भोजोभ्यधीयत ॥३०६०॥ 3060

तत्रासंनिहितान्याप्तः स्त्रीत्वादप्रतिभामपि । धात्रीं नोनाभिधानां स्वां राज्ञोभ्यर्णे व्यसर्जयत् ॥३०६१॥

मृतेन पित्रा मात्रा च हीनं[1] तमनुयातया । मातृकृत्यं ययात्रासीच्छैशवे माननीयया ॥३०६२॥

पत्युः प्रीत्यै विसंधानध्वंसाकल्पादिकल्पनात् । सखीकृत्यं सपत्नीनां यया शान्तेर्ष्यया कृतम् ॥३०६३॥

ह्रासोल्लासे[1] हि कार्याणां योग्यकृत्याप्रनिश्चयात् । न यां सुक्षत्रियां क्ष्माभृत्संभ्रान्तां जातु वीक्षते ॥३०६४॥

श्वशुरेण प्रजाभिश्च कृतं राज्ञोभिषेचने । आशास्यं या[1] महादेवीपट्टबन्धं समादधे ॥३०६५॥ 3065

अपत्यप्रियताभोगलोभभर्तृप्रसादनैः । प्रेर्यमाणाप्यकार्येषु बुद्धिर्यस्या न धावति ॥३०६६॥

स्वत्रान्यत्र च संधाने जाते भर्तुरभिन्नधीः । भाग्योदयेष्वनुत्सिक्ता या चाखण्डितसद्व्रता ॥३०६७॥

आ बाल्याद्भावविद्भर्तुः कुसृत्यनुसृतौ न सा । कार्यमध्यं विगाहेत मानाभिजनरक्षिणी ॥३०६८॥

इति कल्हणिकादेव्या माध्यस्थ्ये स धियं व्यधात् । प्रस्थानपदयात्रां सा सीमान्त[1]प्रापणावधि ॥३०६९॥कुलकम्॥

गुप्त्यै लग्नकवित्तादि परार्ध्यं मध्यपातिनाम्[1] । पाथेयार्थं पृथुस्वर्णभाजि कोशादि चात्मनः ॥३०७०॥ 3070

प्रापया[1]मास किं चाष्टौ प्रकृष्टाभिजनोद्भवान् । पालनार्थं राजपुत्रान्देवी यत्[2]सर्वसंविदम् ॥३०७१॥युगलकम्॥

वाचकं तद्गृहीत्वा तामागमत्पार्थिवेन सः । धात्रीं स कारयन्धन्यो बद्धेच्छासिद्धिनिश्चयाम् ॥३०७२॥

विहितप्रत्ययस्तस्याः सद्यः स्यात्तु महीपतिः । राजधर्मस्य च वसन्नासीद्दोलाकुलाशयः ॥३०७३॥

स हि दध्यौ निर्विरोधो वैराग्येणाथ मायया । संकटान्मोचितव्योसौ[1] यायात्कालेन विक्रियाम् ॥३०७४॥

अनिःशेषितजीमूतजालमाविर्भवन्नविः । अनूनक्लेशशेषं च विवेको न स्फुरेच्चिरम् ॥३०७५॥ 3075

मुग्धान्नि[1]रनुसंधाननागबाधादवेत्य नः । स्वार्थस्य सिद्धये माया तेनेयं निरमायि वा ॥३०७६॥

लब्धलक्षेपरिक्षीणे शक्ते[1] यूनि गणाश्रिते । क्षत्रधर्मस्थिते नेदृग्विवेकः क्वापि लक्ष्यते ॥३०७७॥

अवल्लि कुङ्कुमं पुष्पमपुष्पं क्षीरिणः फलम् । अकालपर्ययापेक्षं वैराग्यं वा महात्मनाम् ॥३०७८॥

न त्याज्यो राजपुत्रोसावेवं मायानिधिर्यदि । एवंविवर्तश्चेत्तस्मिन्नदृष्टे किं दृशोः फलम् ॥३०७९॥

राज्ञी राजात्मजाश्रिते प्रतिष्ठाभङ्गशंसिनः । ऋजुप्रभावात्सुस्पष्टमन्यत्कार्यं न मन्यते ॥३०८०॥ 3080

अटन्ती[1] कुटिलं स्पष्टं सरित्[2]सर्वैर्न लक्ष्यते । कान्ताकुन्तलविष्यन्दी तोयबिन्दुरिव क्रमः ॥३०८१॥

---

३०५४. [1]) Emended with G (*sec. manu*); A °कारणज्ञा°. ३०६२. [1]) Emended; A हींनें. ३०६४. [1]) Emended; A °ल्लासो. ३०६५. [1]) Emended; A या. ३०६९. [1]) Emended; A सीमन्ताप्रा°. ३०७०. [1]) Emended; A °पातिनम्. ३०७१. [1]) Emended with C; A प्राप्नुयामास.—[2]) Emended with G (*sec. manu*); A °न्देवींवत्स°. ३०७४. [1]) Doubtful emendation; A °तव्यासौ. ३०७६. [1]) Emended; A मुग्धानिर°. ३०७७. [1]) Emended; A शक्तौ. ३०८१. [1]) Emended with C; A₁ has first written अ-लं and then supplied टि over the *lacuna*.—[2]) Emended with C; A शरत्स°.

इति ध्यात्वा राजधर्मं सत्यप्रज्ञोचितं व्यधात् । धन्यरिल्हणयोः कार्यं श्रुतावन्यान्विसर्जयन् ॥३०८२॥

स्वस्यैवार्थस्य दार्ढ्याय साल्हणिस्[1]त्वां दिदृक्षते । समागमायेत्युक्त्वाथ धन्यो दूतैरनीयत ॥३०८३॥

मा भैषीदेष संधित्सुः[1] सैन्यादिति मितानुगः । अवर्तिष्ट तटिन्याः स द्वीपान्तस्तत्प्रतीक्षया ॥३०८४॥

3085 सरित्सा जानुदघ्नाम्भा भूत्वा घर्मद्रुते हिमे । गगनालिङ्गिभिर्भीमा तरङ्गैः समपद्यत ॥३०८५॥

अवाप्ता चेर्ष्ययालङ्घ्यभावं यान्त्यपि दन्तिनाम् । रुद्धः सिन्ध्वाभवत्सोऽथ द्विषां रन्ध्रैषिणां वशे ॥३०८६॥

सिन्धोरुभयतस्तोयैर्व्याप्तेतीरभुवोन्तरे । ते दिण्डीरोपमां[1] प्रापुः पिण्डिताः पाण्डुवाससः ॥३०८७॥

खाशा[1]कानां सहस्राणि भोजस्य पतितं[2] बले । स्थितवन्ति निहन्तुं तं तथास्थितमचिन्तयन्[3] ॥३०८८॥

दृग्भ्यां संभ्रमदीनाभ्यामघशान्त्यै स्पृशन्निव । कर्णे सल्हणसूनुस्तान्संतर्ज्यावृजिनो[1]ऽब्रवीत् ॥३०८९॥

3090 निर्दम्भमस्य विस्रम्भाद्धावतो विहिते वधे[1] । निरत्ययो निपातः स्यान्नियतं निरये पुनः ॥३०९०॥

हतेस्मिन्बहुभृत्यस्य न च शक्तिक्षयः प्रभोः । नैकपक्षक्षये तार्क्ष्यरंहः संहारमर्हति ॥३०९१॥

अपि वा वाच्यता राज्ञामेवं विस्रब्धबाधनात्[1] । तुल्यस्तुल्येन कर्तव्यं किमनुध्याय बध्यते ॥३०९२॥

यथायं वृत्तयेनन्यकर्मा भूपं[1] निषेवते । तथा ममापि यत्नोयं तत्सेवासादने यतः ॥३०९३॥

युक्तमित्यादि तेनोक्ता अपि निश्चलनिश्चयाः । ते न्यषिध्यन्त निर्बन्धात्प्रतिज्ञायात्मनो वधम् ॥३०९४॥

3095 रात्रौ तथैवादरिद्राश्छिद्रं तद्रक्षितुं ततः । कारिताः कोशपानं ते तमर्थं सोपि बोधितः ॥३०९५॥

तेनावेदितनिर्व्याजतया धीरो महीपतिः । अनुध्यायाथ संदिग्धं संधिसिद्धिसमुग्धधीः ॥३०९६॥

अज्ञातनिश्चयः सिद्धेर्विनान्तःकरणं परैः । अथ प्रास्थापयद्देवीं सामात्यां[1] तारमूलकम् ॥३०९७॥

राजधर्मविधेयत्वादवार्यक्रूरशङ्किनी । प्रस्थानप्रार्थनां भर्तुः सा स्वीकृत्य ततोऽब्रवीत् ॥३०९८॥

असामान्येष्वमात्येषु कुसृत्यालोकनात्सकृत् । आर्यपुत्र विचार्योऽस्ति[1] विस्रम्भः किं विरोधिनाम् ॥३०९९॥

3100 यद्वा निर्मानुषोन्मेषं[1] शेमुषीत्वं विगाहितुम् । प्रथते नु कथंकारं मूर्तत्वं मर्त्यधर्मिणाम् ॥३१००॥

देहोपकरणत्वं ते प्राणैर्मम विचिन्त्यते । सतीधर्मस्तु सहते राजधर्मस्य नोचितम् ॥३१०१॥

व्यञ्जितास्यसदाचारं कलिकृत्यं द्विषि त्वयि । प्रारब्धो देव भोजेन हिमाद्रौ हिमविक्रयः ॥३१०२॥

न गृह्णाति शमं वेत्ति स्वस्यान्यस्य न चान्तरम् । निर्व्यूढमददोषोद्य प्रायेण प्राकृतो जनः ॥३१०३॥

पुत्रमन्त्यविरोधादिबुद्ध्यशुद्ध्या प्रधावति । साध्वाचारोपि भूपालः क्रुध्यन्[1]विस्रब्धबाधने ॥३१०४॥

3105 समयालङ्घनामोघगिरा देवेन पीयते । लोकत्रयैकपात्रेस्मिन्यशो नूनं मया सह ॥३१०५॥

त्रातव्यसंक्षयोपेक्ष्यप्राणायास्त्वन्यदाशयः । ममैवास्वादयन्त्यादादात्संभरिपुरास्थितिः[1] ॥३१०६॥

इत्युक्त्वा विरतां सत्यसंधः साध्वीं धरापतिः । शान्तशङ्कामकृत्वा तां समामन्त्र्य[1] न्ययोजयत् ॥३१०७॥

भङ्गं सर्वानयं त्रातुं प्रयोक्तुं वेतनं नृपः । संरम्भे किमयं ध्यायत्यन्तः सर्वोऽप्यचिन्तयत् ॥३१०८॥

---

३०८३. [1]) Emended; A °णिस्तां. ३०८४. [1]) Emended; A भैषीरेष सन्धित्स्व. ३०८७. [1]) Emended with C; A °रोपमतां. ३०८८. [1]) Emended; A खश°.—[2]) Emended; A पतिते.—[3]) Emended; A° चिन्तयत्. ३०८९. [1]) Emended; A °तर्ज्य वृजिनो°. ३०९०. [1]) Emended; A विधेः. ३०९२. [1]) Emended; A °बोधनात्. ३०९३. [1]) Emended; A रूपं. ३०९७. [1]) The *akshara* त्यां could also be read न्यां; thus C. ३०९९. [1]) Doubtful emendation; A विचार्योसि. ३१००. [1]) Conjectural reading; A °न्मापां. ३१०४. [1]) Emended with C; A क्रुध्य वि°. ३१०६. [1]) Thus A; the text of this verse requires emendation. ३१०७. [1]) Conjectural reading; A has written originally ----न्ययो° and subsequently filled up the *lacuna* with माता मन्त्र्या; G (*sec. manu*) सोनामन्त्र्य.

उपायेषु प्रयुक्तेषु देवीसंप्रेषणावधि । नान्यदस्य प्रयोक्तव्यं यदवाशिष्यत क्वचित् ॥३१०९॥

स्वपक्षभेदाद्भूभर्तुः सबलत्वाबलत्वयोः । परीक्षकत्वाद्ये केचिन्माध्यस्थ्येनावसन्क्वचित् ॥३११०॥ 3110

तेप्यल्पे वा महान्तो वा क्षीणदाक्षिण्यशृङ्खलाः । भोजगृह्यैः सहाबध्नन्कन्थां सर्वेपि डामराः ॥३१११॥

ते ह्यच्छिन्नतटस्थत्वाद्वैराज्येस्माभिरीदृशः । भोजः संजात इत्याशु माध्यस्थ्यं परिजह्रिरे ॥३११२॥

त्रिल्लको भोजसविधं तनूजं प्राहिणोद्द्रुतम् । प्रावेशयच्छमालां च चतुष्कं पुष्कलैर्बलैः ॥३११३॥

ये भिक्षुविप्लवेप्यासन्राजदाक्षिण्यरक्षिणः । विरोधिसविधं प्रापुस्तेपि नीलाश्वडामराः ॥३११४॥

लहराद्दिवसरसाद्धोलडातैश्च[1] डामराः । त्रयो नीलाश्वतश्चैका डामरी पर्यशिष्यत ॥३११५॥ 3115

न व्यरंसीद्धिमं तत्तल्लवन्ये साल्हणेर्बले[1] । पतत्प्रावृट्प्रमत्तौघ[2]घोषोम्भोधाविवोद्गतः ॥३११६॥

भोजस्तु देवीमायान्तीं[1] श्रुत्वा बलहरं ततः[2] । ध्रुवं संधित्सया बद्ध इति सुव्यक्तमभ्यधात् ॥३११७॥

एतावन्ति दिनान्यासीत्पुंसो भ्रमयिता पुमान् । संबन्धिनीनां माध्यस्थ्ये स्वकुल्यात्कोन्यथा भवेत् ॥३११८॥

कुलचूडामणिः प्रेम्णा स यत्रैवं प्रवर्तते । किं स्यादगण्यप्रायाणां कार्कश्यं तत्र मादृशाम् ॥३११९॥

यच्च मायामिमां ब्रूथ तत्तथास्त्वस्मि वञ्चितः । विश्वास्यैव भविष्यामि नाकीर्तीनां निकेतनम् ॥३१२०॥ 3120

मा च भूद्विजयाशा वः समेता निखिला इति । अद्राक्ष्म चेदृशान्व्यूहानवारुक्षाम[1] वोन्नतेः ।३१२१॥

युक्तियुक्तमिदं चान्यच्चोक्तवान्बहु निश्चयात् । नाशक्यतान्यथा कर्तुं भोजो बलहरादिभिः ॥३१२२॥

द्वित्राहान्तरितेमित्रप्रमाथेपरथा कथम् । फलकालेसि संवृत्तमिति तं चावदन्नृपाः ॥३१२३॥

तारमूलस्थितौ[1] राज्ञ्यां ससैन्यौ धन्य[2]रिल्हणौ । राजपुत्रैः सह ततः पाञ्चिग्राममवापतुः ॥३१२४॥

प्राप्तावत्रेत्य तौ नद्यास्तीरेवाचि कृतस्थिती । परस्मिन्कूलगहने भोजोप्येतावुपाविशत् ॥३१२५॥ 3125

अश्रान्तं विशतो दिङ्मुखेभ्यस्तत्कटकं भटान् । पश्यन्तः केपि संधिं न श्रद्दधुर्नृपतेर्बले ॥३१२६॥

हठप्रविष्टान्निर्यातुमक्षमानल्पसैनिकान् । धन्यादीन्राजवदनो हन्तुं शश्वदचिन्तयत् ॥३१२७॥

छित्त्वा सुय्यपुरात्सेतुं राज्ञः सैन्यं जिघांसवः । महापद्मसरोनौषु निभृतं केचनावसन् ॥३१२८॥

अन्ये तत्साहसोदन्तान्वेषिणः पतनोन्मुखाः । स्वैः स्वैर्मार्गैस्तत्र तत्र तस्थुर्भूभृदसंमताः ॥३१२९॥

आस्कन्दं भाङ्गिलेयाद्याः पुरे शंकरवर्मणः । शमालोक्षिप्तिकावाप्तिं[1] डामराः समचिन्तयन् ॥३१३०॥ 3130

प्राप्यं महासरित्कूलं त्रिल्लकाद्यैरगण्यत । नीलाश्वडामरैर्वीशा[1] कार्या च नगरान्तरे ॥३१३१॥

किमन्यद्राजगृह्याणां समं सर्वे जिघांसवः । कारण्डवानां तोयान्तर्वेष्टितानामिवाभवन्[1] ॥३१३२॥

संदिग्धशिक्षितं कार्यं सर्वतः समतां तदा । प्राप वृष्टेरवग्राहग्रहयोगान्तरस्थितेः ॥३१३३॥

पदे पदे राजचमूपथायोत्थानमिच्छतः । छिन्दन्बलहरस्येच्छां भोजो व्यग्रत्वमग्रहीत् ॥३१३४॥

क्षणे क्षणे विसंधानध्यायिना तेन कश्चन । बध्यमानास्वन्तरायः[1] संविधासु व्यधीयत ॥३१३५॥ 3135

घटनामुद्ययौ यो यो विरोधः कटकद्वयात् । सत्त्वैकाग्रः स्वयं भोजस्तं तं त्वरितमच्छिनत् ॥३१३६॥

---

३११५. [1]) A °द्धोलळातश्च. ३११६. [1]) Emended; A साल्हणे बले.—[2]) Emended with C; A °प्रमत्तोघ°. ३११७. [1]) Doubtful emendation; A दीर्वीमायान्तौ.—[2]) Emended A° हरस्ततः. ३१२१. [1]) Doubtful emendation; A चेदृशां व्यूहानवरुक्ष्याम; C चेदृशं व्यूहमवरोक्ष्यामि. ३१२४. [1]) Doubtful emendation; A °स्थिते राज्ञ्यां; C °स्थिते राज्ञि.—[2]) Emended with C; A धैन्य°. ३१३०. [1]) $A_1$ gloss श्वाल्. ३१३१. [1]) Thus A; C °रैरीर्ष्या. ३१३२. [1]) Emended with C; A °भवत्. ३१३५. [1]) Emended; A बध्यमानस्वान्त°.

दूत्ये च कल्यकल्वे वा येरुवन्राजरञ्जकाः । भयेन प्रययुस्ते यद्वैकल्यं कार्यसंकटे ॥३१३७॥

[1]कर्णे तत्कथयन्ति दुन्दुभिरवै राष्ट्रे यदुद्घोषितं तन्नम्राङ्गतया[2] वदन्ति करुणं[3] यस्मात्त्वपावान्भवेत्[4] ।
श्लाघन्ते तदुदीर्यते यदरिणाप्युग्रं न[5] मर्मान्तकृद्[6]ये केचिन्ननु[7] शाद्यमौग्ध्यनिधयस्ते भूभुजो रञ्जकाः ॥३१३८॥

भण्डस्ताण्डवमण्डपे कटुकथावीथीषु[1] कन्थाकविर्गोष्ठश्वा स्वगृहाङ्गने शिखरिभूगर्ते[2] खटाकुः स्फुटम् ।
पिण्डीशूरतया विटश्च पटुतां भूभृद्गृहे गाहते गच्छन्ति ह्रदकूटकच्छपतुलां चित्रं ततोन्यत्र ते ॥३१३९॥

3140 शूरोद्रेकविपर्यासाच्छान्तोष्मक्ष्माभृतस्ततः । वासरः शरणीचक्रे तुङ्ग[1]स्योत्तुङ्गमञ्जसा ॥३१४०॥

भानुर्दत्तपदोनूरोर्भ्रातुर्गौवलयान्तरे । क्ष्माभृच्छिरोर्पितकरो रक्तमण्डलतां दधे ॥३१४१॥

अहस्त्रियामामुखयो – –[1] मध्यस्थया दधे । संध्यया वन्दनीयत्वं जनस्य[2] व्यञ्जिताञ्जलेः ॥३१४२॥

कवाटिदन्तैर्विस्फोटाश्चन्द्रकान्तैः सिरोद्गमः । श्वयथुः पयसां पत्या दधे राज्युदयोन्मुखे ॥३१४३॥

सदैन्येष्वरविन्देषु हीनद्वन्द्वोपजीवनैः । कवाटिनां घटेष्वेव षट्पदैर्घटितं पदम् ॥३१४४॥

3145 अदृष्टकार्यपर्यन्तास्ततस्ते विषमस्थिताः । सरित्तटे सकटकाः पर्यतप्यन्त मन्त्रिणः ॥३१४५॥

न किंचित्प्रत्यभात्[1]सर्वं लघु भ्रान्तं च जानताम् । ओघेन ह्रियमाणानामिवैषामवलम्बनम् ॥३१४६ ॥

तीरे परस्मिन्सरितो वसन्बलहरः पुनः । रुद्धः कन्दलितास्कन्दबुद्धिः[1] साल्हणिना[2]सकृत् ॥३१४७॥

कार्यातिपातादायातं मन्त्रिणां तन्मितं बलम् । तस्य प्रवर्धमानस्य सुखोच्छेदं बभूव यत् ॥३१४८॥

वितस्तासिन्धुसंभेदयात्रायां नगरे यथा । तथा तथापतन्त्रा[1]त्रौ लोकोभ्रान्तो व्यवर्तत ॥३१४९॥

3150 लेखैर्डामरसंहारखण्डनाय विसर्जितैः । सान्तैर्ग्रथिता बाह्यैर्नानाग्रे राजबीजिनः ॥३१५०॥

शाद्यान्वितैरनुसरैस्तुमुलोत्पादनैरपि । धीरो धैर्यान्निश्चयाद्वा स्वैः स क्रष्टुं न पारितः ॥३१५१॥

सामन्तानामागतानामविस्रम्भादसंभ्रमम् । न्यक्कृतोयं निपत्याशु कुर्यादत्याहितं रुषा ॥३१५२॥

कृते च कदनोंकारे[1]नेन – – समुन्मिषेत् । द्विजानामिव दस्यूनां समूहस्तेन सर्वतः ॥३१५३॥

इति निर्ध्याय दुर्ध[1]र्क्षुरिव भोजः क्षपात्यये । कुर्मः साहसमित्युक्त्वा निन्ये बलहरं समम् ॥३१५४॥तिलकम्॥

3155 एषां मदर्था[1]यातानां सामन्तानां सभोजनः[2] । दाक्षिण्यादिति नाभोजि तेनाप्यभिजनस्पृशा ॥३१५५॥

तथा स्वमत्या[1]वैमत्यं तमज्ञात्वा तु मन्त्रिणः । निष्प्रत्ययास्तेन जातममन्यन्त नयात्ययम् ॥३१५६॥

पक्षिपक्षस्फुटास्फालशफरस्फुरितेप्यधात् । तेषामासन्निधास्कन्द[1]ः प्रधावदहितभ्रमम् ॥३१५७॥

कूले परस्मिन्कूलिन्याः स्वाभिसंधाननिर्वृतैः । समभाव्यत तैर्नान्यो रथाङ्गेभ्योभिषङ्गभाक् ॥३१५८॥

मरुत्का[1]कुत्स्थदूतस्य कपेस्तीर्णाम्बुधेः पिता । ततान तेषां दूतानां सरित्पारगतौ – –[2] ॥३१५९॥

---

३१३८. [1]) This verse and the following are found in *Vallabhadeva's Subháshitávalí*, 462-463 (ed. Peterson and Durgâprasâda).—[2]) नम्राङ्गतया supplied by $A_3$ in space left by $A_1$.—[3]) Thus corr. by $A_1$ from करुणां.—[4]) Thus corr. by $A_3$ from $A_1$ त्वपावाभ°.—[5]) Thus in *Subháshitávali*; A °प्युग्रेण.—[6]) Thus corr. by $A_3$ from $A_1$ कर्मा°.—[7]) ननु supplied by $A_3$ in space left by $A_1$. ३१३९. [1]) Emended; A कटुकथावीचीषु; *Subhásh.* चटुकथावीथीषु.—[2]) Thus $A_1$ in margin and *Subhásh.*; $A_1$ in text भूगर्भे. ३१४०. [1]) तुङ्ग supplied by $A_3$ in space left by $A_1$. ३१४२. [1]) Thus $A_1$; C supplements °योरपि.—[2]) Emended with C; A जनयन्व्यञ्जि°. ३१४६. [1]) Emended; A °भात्स्वं. ३१४७. [1]) Emended with C; A °स्कन्दोबुद्धिः.—[2]) Emended with C; A साल्हणना°. ३१४९. [1]) Emended A °पतद्रात्रौ. ३१५३. [1]) नेन supplied by $A_3$; $A_1$ indicated originally a *lacuna* of four *aksharas*; C supplements सर्वं. ३१५४. [1]) A दुद्रु°. ३१५५. [1]) Doubtful emendation; A एतां मद्र्थया.—[2]) Doubtful emendation; A सभोजनिः; C सामन्तानामभोजने. ३१५६. [1]) Doubtful emendation; A समत्यावै°. ३१५७. [1]) Emended; A °स्कन्दप्र°. ३१५९ [1]) Emended with C; A काकुस्थ°.—[2]) Thus A; C fills up the *lacuna* with बलम्.

कीर्णकर्णज्वरांश्चारीन्पीत्कृतैस्तीरभूरुहाम् । आश्रित्योन्निद्रकेणेत्थं निन्युस्ते तां निशीथिनीम् ॥३१६०॥ 3160

क्षपान्ते क्ष्माधरोत्तंसहेमतामरसभ्रमम् । उद्गच्छतो रवेर्यावच्चिच्छिदुर्न करच्छटाः ॥३१६१॥

चक्राह्वविरहालोकसशोकानामिवागलत् । कुट्मलाक्षिपुटाद्यावन्नैशं नाम्भश्च वीरुधाम् ॥३१६२॥

मितपत्तियुतस्तावत्तरुकच्छाद्विनिर्गतः । ---[1]स्त्वरयन्युद्ध[2]वाहान्मूर्ध्न्यङ्घ्रिणा स्पृशन्[3] ॥३१६३॥

रोद्धुकामाण्डामरीयान्वीरान्दृष्टैर्विलोकितैः । सर्वतो धावतः कुर्वन्योधान्प्रतिहतौजसः ॥३१६४॥

पारश्वधी चारुवेषो युवा संमुखमापतन् । युग्याधिरूढस्तैः प्रैक्षि संप्राप्तः सरितस्तटम् ॥३१६५॥कुलकम्॥ 3165

अदृष्टपूर्वं तं दृष्ट्वा श्रीखण्डोल्लिखितालकम् । कुङ्कुमालेपिनं चैते भोजोयमिति मेनिरे ॥३१६६॥

अतिवाह्य निशां राजवदनं तं विमोहयन् । प्रातश्च तरसामन्त्र्य स तथा संमुखोह्यभूत् ॥३१६७॥

प्रविष्टयुग्यं तोयान्तः पाराद्धावितवाजिनः । धन्यादयस्तमभ्येत्य मुदिताः पर्यवारयन् ॥३१६८॥

उदभूत्तुमुलः शब्दस्ततः कटकयोर्द्वयोः । एकत्राक्रन्द[1]मुखरः परत्रानन्दनिर्भरः॥३१६९॥

नादमाकर्ण्य संग्रामबुद्ध्या दिग्भ्यः प्रधावितैः । तं परैर्[1]मिलितं वीक्ष्य मूर्ध्न्यताड्यत डामरैः ॥३१७०॥ 3170

तस्याभिनन्दनालापप्रमुखा [1]प्रक्रियाभवत् । अदैन्यशुद्धधन्यादिष्वनुज्झितनिजक्रमा ॥३१७१॥

प्लवमानं मनोहर्षं वेगात्संस्तभ्य[1] सर्वतः । अथेत्थं स्तुवता तत्तस धन्येनाभ्यधीयत ॥३१७२॥

राजपुत्र पवित्रेयं पृथिवी स्थैर्यशालिना । त्वया धाम्ना सुमनसां मेरुणा वा महीभृता ॥३१७३॥

गवां जयति सर्वासां निर्विकारतया वसन् । विक्रियोपहतं गौस्ते क्षीरं –[1] क्षीरवारिधेः ॥३१७४॥

कस्य पुंस्कोकिलस्येव त्वां विनाधममध्यतः । निर्गत्य निजकुल्यानां सिद्धं मध्यावगाहनम् ॥३१७५॥ 3175

सदाचारस्य भवता प्रथमं प्रहते पथि । न तच्चित्रं संचरामश्चरमं चेत्ततोधिकम् ॥३१७६॥

इत्यादिप्रसृतालापदत्तोल्लापोधिरोह्य[1] सः । जयोत्तरङ्गं तुरगं स्तुवद्भिस्तैरनीयत ॥३१७७॥

लवन्याः कतिचित्क्रोशान्[1]विक्रोशन्तस्तदा ययुः । स्वकुल्यैर्नीयमानं तं काका इव पिकान्तिकम् ॥३१७८॥

स एवमेकविंशेब्दे ज्यैष्ठस्य[1] दशमेहनि । त्रयस्त्रिंशद्वर्षदेश्यः समगृह्यत भूभुजा ॥३१७९॥

राज्ञी कृतप्रणामं तं प्रियं पुत्रमिवागतम् । अभ्यनन्दच्छ्रान्तभृत्यमस्याहारमकल्पयत् ॥३१८० ॥ 3180

इन्दुवंशा[1]विसंवादिगुणग्राममवेक्ष्य तम् । प्रागदृष्टवती मेने वञ्चिते सा विलोचने ॥३१८१॥

गुणैरशाठ्यदाक्षिण्यमाधुर्याद्यैरकृत्रिमैः । तस्या विशदशीलं स क्ष्मापतिममन्यत ॥३१८२॥

मुखरागो[1] मनोवृत्तेर्द्वारौज्ज्वल्यं गृहश्रियः । भर्तृस्वभावस्याचारो योषितामनुमापकः ॥३१८३॥

दिनक्षयव्यञ्जिताध्वक्लमं[1] प्रस्थातुमुत्सुकम् । राज्ञोभ्यर्णं विशल्येनं[2] दाक्षिण्यात्कोपि नाब्रवीत् ॥३१८४॥

कथंचिद्रुद्धमाध्यस्थ्यवैमत्यैः सचिवैरथ । स त्वादिक्षन्नरपतिराशान्तेभ्योभ्यधीयत[1] ॥३१८५॥ 3185

राज्ञोभ्यर्णं विश[1]ल्युक्तेरुपोद्घातोपमं वचः । तत्तस्य श्रोत्रशष्कुल्यां --[1] शङ्कुक्रियां व्यधात् ॥३१८६॥

---

३१६३. [1]) Thus A; C स वीरस्त्वर°.—[2]) Emended with C; A °न्युद्धघवा°.—[3]) The letter न् cannot be read with certainty; C °स्पृशत्. ३१६९. [1]) Emended; A °क्रान्ति°. ३१७०. [1]) Thus corr. by $A_1$ from डामरैर्मि°. ३१७१. [1]) Emended with G (*sec. manu*); A °मुखापक्रि°. ३१७२. [1]) Emended with C; A °स्तम्भ्य. ३१७४. [1]) Thus A; C supplements तं. ३१७७. [1]) Emended; A °दन्तोल्लापोधिरोह. ३१७८. [1]) Emended; A °त्क्रोशाद्वि°. ३१७९. [1]) Emended with C; A ज्येष्ठस्य. ३१८१. [1]) Emended; A इन्द्रवंशा°. ३१८३. [1]) Emended; A मुखरागमनो°. ३१८४. [1]) Emended with C; A °क्रमां.—[2]) Emended; A विशल्येनं. ३१८५. [1]) Doubtful emendation; A स त्वादिक्षुर्नरपतिराशान्तेभ्योभ्य°. ३१८६. [1]) Emended; A विशल्यु°.—[2]) Thus A; C supplements तदा.

चिरात्ताडितमर्मेव समाश्वास्यैक्षताथ सः । मध्यस्थानां स्थितं स्थैर्यं[1] दाक्षिण्यादोष्ठयोः परम् ॥३१८७॥
प्राणान्मुमुक्षोस्ते रूक्षभाषिणस्तस्य सान्त्वनैः । मन्दत्वं विक्रियां निन्युर्विनयानतमौलयः ॥३१८८॥
आचारं चैनमास्निग्धमपि न्याय्यं वचस्विनम् । न कोपि प्रतिवाक्येन शक्यं जेतुममन्यत ॥३१८९॥
3190 अथ स्वान्तस्थितस्वामिवैवश्यं दर्शयन्निव । दशनांशुवनैर्धन्यो वीरः स्निग्धमभाषत ॥३१९०॥
पद्धतिं राजधर्माणां सदाचारे स्थितां च ते । जानतोपि कथं मोहः समायातेषु वस्तुषु ॥३१९१॥
किं संधिः सोभिधीयेत यत्र संधेयदर्शनम् । अकृत्वा गम्यत इति प्राज्ञो कथमजीगणः ॥३१९२॥
अनद्यतनभूभर्तृसुलभं[1] भूभुजं[2] तव । ज्ञात्वा सत्त्वोज्ज्वलं ज्ञातिधर्मजातप्रवर्तनम् ॥३१९३॥
नास्य दम्भस्मयस्तम्भाप्री[1]तिस्थैर्यखलोक्तयः । आदरादर्शवैशद्ये निःश्वासस्यापि काः श्रियः ॥३१९४॥
3195 अस्योपजीवनाद्या श्रीः साम्राज्यासादनान्न सा[1] । प्रकाशो बिम्बितो[2] योर्कादीपात्स्याज्ज्वलतः स किम् ॥३१९५॥
निर्वाणगोष्ठीनिष्ठत्वं शमिनामाश्रयेषु यत् । तत्पर्षद्यस्य राजर्षेः --[1]न्वृन्दानुबन्धिनः ॥३१९६॥
एवं स्वगृहसंप्राप्यप्रायोनिःश्रेयसस्य ते । स्थानैः श्रियः समाप्याथ किं स्यादन्यैर्महीधरैः ॥३१९७॥
मुग्धा न केचन परे गणिताः फणिभ्यः कालानुकूलनिजकुण्डजलत्यजो[1] ये ।
श्लिष्यन्ति चन्दनतरूञ्शिशिरान्निदाघे माघेप्यशीतमनवं[2] विवरं विशन्ति ॥३१९८॥
प्राणोपकरणं राज्ञो राज्ञी राजात्मजाश्च ये । तद्धिते यदनौचित्यं तेषामौचित्यमेव तत् ॥३१९९॥
3200 त्यक्तोष्मवैकृतं पाथ इव क्वथितशीतलम् । अनुतापेन ते कृत्यं भूयो वैरस्यमेष्यति ॥३२००॥
तथा समर्थां सामर्थ्याद[1]प्रत्याख्याय भारतीम् । कुण्ठशाद्यलवस्तस्थौ प्रस्थानार्थं स मन्थरः ॥३२०१॥
पथि संग्रथितस्तोत्रान्वास्तव्यान्वीक्ष्य सर्वतः । अजायताथ संरूढकृत्यसाधुत्वदार्ढ्यधीः ॥३२०२॥
पदातिचरणक्षुण्णरेणुव्याजाददृश्यत । वसुंधरातलं बद्धसंधीव नभसा समम् ॥३२०३॥
दध्यौ ----[1]भोजः कच्चित्संप्राप्नुयां नृपम् । कच्चिदमुष्य विघ्न्येत दर्शनं विप्रलम्बकैः ॥३२०४॥
3205 आराधन--[1]धाम्नि नान्तरान्तरितो विटैः । स्वामिनां क इवाप्नोति गुणाविष्करणक्षणम् ॥३२०५॥
शीतोपचारकरणाद्दयितो भवेयमौर्वार्दितस्य जलधेः प्रसृतं धियेति ।
स्रोतो हिमाद्रिपयसो विनिपात एव ग्रासीकृतं तिमिभिराहत---[1]स्यात् ॥३२०६॥
इत्यादिचिन्तास्तैमित्यात्पुरक्षोभाद्यलक्षयन् । सैन्यस्य रुद्धाश्वतयाबुद्धासन्नं[1] नृपास्पदम् ॥३२०७॥
नातिप्रांशुं नातिकृशं सूर्यांशुश्यामलाननम् । सरोजकर्णिकागौरं शिथिलश्लथविग्रहम् ॥३२०८॥
ककुद्मत्ककुदोत्सेधिस्कन्धमायतवक्षसम् । श्मश्रुणानतिदीर्घेण व्यक्तगण्डगलोन्नतिम् ॥३२०९॥
3210 उन्नसं पक्वबिम्बोष्ठं विस्तीर्णानुल्बणालिकम् । तिर्यग्विप्रेक्ष्य---[1]धीरमन्थरगामिनम् ॥३२१०॥
समाहितांशुकोष्णीष--[1]श्रीखण्डव--[2]म् । सीमन्त--[3]चुम्बिन्या रेखया चन्द्रगौरया ॥३२११॥

---

३१८७. 1) Emended with C; A स्थौर्यं. ३१९३. 1) Emended; A सुलभे.—2) Emended; A भूभुजां. ३१९४. 1) Emended with G (*sec. manu*); A °स्तम्भप्री°. ३१९५. 1) Emended with C; A सः.—2) Emended with C; A बिम्बतो. ३१९६. 1) Thus A; perhaps read राजर्षेर्विद्वद्वृन्दा°; C °र्षेज्जनान् वृन्दा°. ३१९८. 1) Emended with C; A °जल-जो.— 2) Emended with C; A °शीतम-वं. ३२०१. 1) Doubtful emendation; A समर्थासामर्थ्या-प्रत्या°; C °सामर्थ्यान्न प्रत्या°. ३२०४. 1) Thus A; C supplements विज्ञतरो. ३२०५. 1) Thus A; C आराधयन् प्रभुं धाम्नि. ३२०६. 1) Thus A; C °हतमेव तत् स्यात्. ३२०७. 1) Emended; A °सन्ननृपास्पदम्. ३२१०. 1) Thus A; C °प्रेक्ष्यमाणास्यं. ३२११. 1) Thus A; C °ष्णीषमौलिं.—2) Thus A; C श्रीखण्डवर्द्धनं.—3) Thus A; C सीमन्तस्थानचु°.

अश्वावरूढं हर्म्यस्थसचिवैः परिवारितः[1] । - - - - -[2]मायान्तं तमवैक्षत पार्थिवः[3] ॥३२१२॥ कुलकम् ॥

प्रीतिविस्फारितदृशा राज्ञा पृष्टस्ततः सभाम् । सोध्यारुरोह संबाधां कौतुकोत्कन्धरैर्जनैः ॥३२१३॥

स्पृष्ट्वा पादौ निषण्णोग्रे नृपस्यानीय पाणिना । खड्गधेनुं पाणिबद्धामासनाग्रे समार्पयत्[1] ॥३२१४॥

पाणिं सफणिवल्लीकं विवृताग्राङ्गुलिद्वयम् । ततोस्य चिबुकोपान्ते विन्यस्यन्पार्थिवोब्रवीत् ॥३२१५॥ 3215

न विगृह्य गृहीतोसि नाधुनापि निरुध्यसे[1] । तदङ्ग कस्माद्भीमः शस्त्रमेतत्त्वयार्पितम् ॥३२१६॥

व्यजिज्ञपत्स भूपालं देव शस्त्रस्य धारणम् । स्वामिसंरक्षणं स्वस्य परित्राणस्य कारणम् ॥३२१७॥

देवे निजप्रतापाग्निगुप्तसप्रसरित्पतौ । सेवावकाशो विरलः स्वशस्त्रस्यापि दृश्यते ॥३२१८॥

लोकान्तरेपि शरणं चरणाश्रयणं प्रभोः । तत्रात्र लोके किं कार्यं त्राणोपकरणैः परैः ॥३२१९॥

राजा जगाद तं सत्त्वस्पर्धाबन्धेधुना भवान् । निर्व्यूढकृत्यो वादीव कृत्यं नो वर्तते परम् ॥३२२०॥ 3220

भोजो बभाषे दाक्षिण्यजननायाधुना प्रभोः । दृष्टादृते मया किंचिन्नोपचारार्थमुच्यते ॥३२२१॥

किं ते न चिन्तितं दुष्टं किं किं न कृतमप्रियम् । यदसिद्धं न तच्छक्तिमगादित्यवधार्यताम् ॥३२२२॥

किं न मद्वान्वये कश्चित्कारणेपूदितो भवान् । विद्मः[1] स्मानन्यकुल्यं प्राग्यं वयं चर्मचक्षुषः ॥३२२३॥

यदा यदा देव वाञ्छामकार्ष्म भवदग्रिये । भूमिस्तदा तदा भूम्ना भूप - - -[1] भूयसः ॥३२२४॥

यावत्कवीनां निर्भाति प्रतिभानेन भास्वरः । देवाभवन्नः प्रत्यक्षः प्रतापस्तादृशस्तव ॥३२२५॥ 3225

न शेखरे न प्रदरे न दरेप्युज्झितो[1] मया । प्रालेये भूभृतः कुञ्जे संज्वरस्त्वत्प्रतापजः ॥३२२६॥

ततः प्रभृत्यवनतिप्रणयः शरणैषिणः । सिद्धः संध्यादि[1]वन्ध्यत्वाद्देव दूरस्थितेर्न मे[2] ॥३२२७॥

अथाभेदाभिलाषेण पापाद्य[1]त्किल चेष्टितम् । स्फुरत्तामात्रकव्यक्त्यै न तु तद्विग्रहाग्रहात् ॥३२२८॥

त्वत्संबन्धादिमे दिक्षु प्रतीक्ष्याः क्ष्माभुजां[1] वयम् । सङ्गाद्गङ्गाम्भसः काचकुम्भसंभावना भुवि ॥३२२९॥

अद्यापि द्योतते शाहि[1]राह्वयेन दिगन्तरे । तत्संतानभवोनन्तः समूहः क्षत्रजन्मनाम् ॥३२३०॥ 3230

त्वय्यर्पिते पार्वतीयभूभृत्सङ्केन्यदादि[1] नः । कदन्नाशनदु - - मुखैः[2] खेदोन्मुखैरभूत् ॥३२३१॥

इतीदृ[1]शीभिः - - -[2] प्रमाणमथ वा प्रभुः । इत्युक्त्वा भूपतेर्मूर्ध्ना सोगृह्णाच्चरणौ पुनः ॥३२३२॥

प्रणामसंभ्रमस्रस्तोष्णीषशीर्षं ततो नृपः । तस्योत्थितस्य स्वशिरोवाससा समवस्त्रयत् ॥३२३३॥

स्वां तां च शस्त्रीं तन्न्यस्तामुत्सङ्गे सान्त्वयन्व्यधात् । तस्यासंक्षोभगाम्भीर्यस्तमूचे च निषेधिनम् ॥३२३४॥

दत्ते[1] मया बिभृहि वा त्वमेते पूजयाथ वा । न शस्त्रग्रहवैमुख्यं कार्यं मच्छासनं त्वया ॥३२३५॥ 3235

अवन्ध्यशासने - -[1]त्यनुबध्नति[2] ते व्यधात् । शस्त्र्यौ[3] राजानुगत्यैव वन्दित्वाङ्क्रे स कालवित् ॥३२३६॥

ततो निर्यन्त्रणत्वस्य नर्मणः सान्त्वनस्य च । चिरसेवीव तत्कालं राज्ञोजायत भाजनम् ॥३२३७॥

---

३२१२. [1]) Emended; A °रितम्.—[2]) Thus A; C अनङ्गतुल्यमायान्तं.—[3]) Emended with C; A पार्थिवम्. ३२१४. [1]) Emended with C; A समर्पयत्. ३२१६. [1]) Emended; A न बध्यसे. ३२२३. [1]) Emended with C; A विघ्न स्मा°. ३२२४. [1]) Thus A; C तदा भूता पात्रं कम्पस्य भूयसः; perhaps read भूम्ना भूः प्रकम्पस्य भूयसः. ३२२६. [1]) Emended; A °ज्झितं. ३२२७. [1]) Emended; A संध्यायिव°.—[2]) Emended; A दूरस्थिते न. ३२२८. [1]) Emended with C; A पा-द्यत्किल. ३२२९. [1]) Emended; A क्ष्माभुजा. ३२३०. [1]) Emended; A शाहेवाह्व°. ३२३१. [1]) Thus A; doubtful.—[2]) Thus A; C कदन्नाशनदुर्भोगासुस्थैः खे°. ३२३२. [1]) Emended with C; A इतीदृ°.—[2]) Thus A; C supplements स्तुतिभिः. ३२३५. [1]) Emended; A दत्तं. ३२३६. [1]) Emended; A °शासनो--; perhaps read अवन्ध्यशासने राज्ञीत्यनु°; C °शासनोमानीत्य°.—[2]) Emended; A °त्यनुव्रति ते; the *lacuna* not indicated.—[3]) Emended; शस्त्रौ.

अन्यत्प्रविष्टो धन्योथ स्वार्चाम--[1]यन्कृती । कृतप्रणामो भूपाल त्वद्गुणाकर्णनं विना ॥३२३८॥<br>
न प्राणा द्रविणं नाद्य गण्यं निर्विक्रिया पुनः । सत्क्रिया स्वामिनोप्यर्थे[1] तस्मात्पार्थिव चिन्त्यताम् ॥३२३९॥<br>
3240 तथापि कथ्यमानं तन्न स्यात्संभावनाभुवि । यदस्मिं[1]श्चिन्त्यतेस्माभिरिति भूपो व्यभाषत ॥३२४०॥<br>
क्षणमुच्चावचां चर्चां विरचय्य विशां पतिः । भोजेन सार्धं शुद्धान्तं रड्डादेव्यास्ततो ययौ ॥३२४१॥<br>
कृतप्रणामस्तां वीक्ष्य सौजन्यादिगुणोज्ज्वलाम् । स राजपारिजातं तं मेने कल्पलतायुतम् ॥३२४२॥<br>
मान्योयं देवि सौजन्यज्ञातेयाभ्यामिहागतः । विशिष्यतेसौ पुत्रेषु क्ष्माभृद्योपेत्य[1]भाषत ॥३२४३॥<br>
सभाजनाय सौजन्यनिधिर्भोजान्वितस्ततः । उदूढकार्यभाराणां दाराणामप्यगाद्गृहान् ॥३२४४॥<br>
3245 अभाणीन्निपुणा राज्ञी भोजं राज्ञा सहागतम् । अधुनैव नृपस्याप्तः संवृत्तोसीति[1] सस्मितम् ॥३२४५॥<br>
लज्जास्मितमुखी पत्युः प्रणत्या स्वागतोक्तिषु । ददत्येवोत्तरं भोजं निर्दिशन्त्यप्यभाषत ॥३२४६॥<br>
आर्यपुत्र न विस्मार्यं प्रत्याख्यातात्प्रमन्वितम् । मानैकशरणस्यास्य ज्ञातिप्रीतिप्रवर्तनम् ॥३२४७॥<br>
पूर्वोपकर्तृ सलिलं वृद्धावस्पृशतोन्वहम् । पद्मान्स्वकुलपद्मानां युक्तं जेतुं भवादृशाम् ॥३२४८॥<br>
कार्यकृच्छ्रेवसन्नानाममुष्यागमनं विना । सिध्येदौन्नत्यसंरक्षा नेह प्रत्यागमश्च नः ॥३२४९॥<br>
3250 उदीपे[1] रक्षतस्तीरं शरीराश्रयिणी भवेत् । ध्रुवं वनस्पतेर्वीरुत्त[2]न्निपातानुपातिनी ॥३२५०॥<br>
पतिगत्यनुगामित्वं प्राणानां परिचिन्तितम् । तथा कार्यं यथा न स्यात्त्रातव्यस्यान्यथात्मनः ॥३२५१॥<br>
राजा जगाद तां देवि सर्वकर्तव्यसाक्षिणी । अन्यथाप्रतिपत्त्रं[1] मे त्वमप्यस्य[2] न मन्यसे ॥३२५२॥<br>
निगृहीतवतो दुष्टौ सुज्जिमल्लार्जुनावपि । निस्तापं मम नाद्यापि प्राप्तानुशयमाशयम् ॥३२५३॥<br>
अथ राज्ञार्थितः स्थातुं परार्ध्ये धाम्नि सानुगः । भोजो नामन्यतान्यत्र राजधान्याः[1] स्थिरां स्थितिम् ॥३२५४॥<br>
3255 विदूराश्रयनिर्गोप्तृभावाप्रचुरदर्शनैः । आराधनं धराभर्तुरसाध्यं ध्यातवान्हि सः ॥३२५५॥<br>
रक्षितृनग्रहीत्क्ष्मापात्स्थि[1]रं च समकल्पयत् । [2]अनया - नृपं कार्या न सुराराधनागमे ॥३२५६॥<br>
विज्ञाय भावं प्रीतेन राज्ञा दत्तं[1] ततो गृहम् । सर्वोपकरणापूर्णं राजधान्यन्तरेभजत् ॥३२५७॥<br>
राजापि ममतास्फीतप्रीतिभिः स्वैः परैस्तथा । उपासितस्तत्र रतिं चिराश्रित इवाययौ ॥३२५८॥<br>
भोगवेलोचिताश्चर्यदर्शनादौ नृपोपि तम् । प्रियं पुत्रमिवास्मार्षीद्दूतैः पार्श्वं निनाय च ॥३२५९॥<br>
3260 जग्राह दक्षिणे पार्श्वे भुञ्जानं ज्ञातिगौरवात् । स्पर्शास्वादितभोज्यादिदाने नैव व्यवर्जयत्[1] ॥३२६०॥<br>
अकृत्रिमं तथा स्नेहमुवाह[1] ---[2] यथा । लडितं ज्ञा[1]तिवत्तस्मिंस्तद्बाला[3]पत्यकैः समम् ॥३२६१॥<br>
तामेवालम्बत व्यक्तां[1] सोपि वृत्तिं यथा यथा । राजा सपरिवर्होपि विस्रम्भमविगर्हितम् ॥३२६२॥<br>
आसन्नाभ्यन्तरा भिन्ना ये द्वैधे तानदर्शयत् । राज्ञा[1] विरक्तिं स्वस्यारिबाहुल्यं च व्यसर्जयत् ॥३२६३॥

---

३२३८. [1]) Thus A; C स्वार्चाममलयन्कृती. ३२३९. [1]) Emended with C; A स्वामिनो‾र्थे. ३२४०. [1]) Emended; A यदास्मिं°. ३२४३. [1]) Emended with C; A क्ष्माभृद्योपेत्य°. ३२४५. [1]) Emended; A संवृत्तोर्मीति; C संवृत्तोऽस्मीति. ३२५०. [1]) $A_1$ gloss उदीपः अतिवृष्ट्या अत्युद्रिक्तजलागमः.—[2]) Emended with C; A °वीरुस्तन्नि°. ३२५२. [1]) Emended; A प्रतिपत्त्यं.—[2]) Emended with C; A त्वमप्य‾. ३२५४. [1]) Emended; A °धान्यां. ३२५६. [1]) Emended; A °क्ष्मापान्स्थिरं.—[2]) Thus A; the text is here evidently corrupt; C अनयात्तं नृपं; G (*sec. man.*) अनुयान्तं नृपं कार्यान्नृसुराराधनागमे. ३२५७. [1]) Emended with C; A दातुं. ३२६०. [1])—[1]) Written by $A_5$ on new paper. ३२६१. [1])—[1]) Written by $A_5$ on new paper.—[2]) Thus A; C supplements जनको.—[3]) Emended; A° स्तब्बलापत्यकैः. ३२६२. [1]) Conjectural reading; A तंमवालम्बत व्यक्तिं. ३२६३. [1]) Emended; A राज्ञां.

अकृत्रिमात्समाधानात्करणानां सभान्तरे । न प्रत्यभाज्जडो नापि धृष्टो नापि बकव्रतः ॥३२६४॥
प्रमादस्खलिते हीनातिरिक्तत्वे च भूपतेः । कार्ये नावदधे क्षुद्रः कवितेव महाकवेः ॥३२६५॥ 3265
न विक्रमकथांसत्र ----[1]व्यकत्थत । प्राग्वृत्तमन्तरा पृष्टः सोपस्कारं च नाभ्यधात् ॥३२६६॥
वि--कात्प्रभोः[1] साम्यसकुल्यत्वादिचाटुभिः । धीराधृष्टैर्दृष्टिपातैरपुनर्भाविणो व्यधात् ॥३२६७॥
तथा स्पृष्टोप्यनुत्तानाशयोभूदवगाहितुम् । न शेकुस्तं यथा जाल्मनर्मवित्पिशुनादयः ॥३२६८॥
क्षणेष्ववसितालोकक्षोभादिविशरारुषु । प्रा--[1]वसथं गच्छञ्शङ्कां[2] कामपि नातनोत् ॥३२६९॥
यथा यथास्य विस्रम्भाद्भूपोभूच्छिथिलाग्रहः । तथा तथैव सिद्धोश्च इव नाधावदुद्धतम् ॥३२७०॥ 3270
सदैवाग्रेसरोन्यत्र पश्चाद्रुद्धपदोभवत् । अनिषिद्धोपि शुद्धान्तमन्त्रागारावगाहने[1] ॥३२७१॥
विज्ञप्त्यौपयिकावाप्तिप्रार्थनमादरात्[1]स्वयम् । दूरीचक्रे परापेक्षां शश्वत्संशयिताशयः ॥३२७२॥
अना---समये तस्या---[1] रक्षिणः । न स्वप्नवृत्तमप्यासीदनावेद्यं महीभुजे ॥३२७३॥
मन्त्र्यान्तःपुरिकादीनां[1] परस्परविगर्हणम् । नावर्णयद्विस्मृतिं च दुष्टस्वप्नमिवानयत्[1] ॥३२७४॥
सचेतनोपि दुर्नर्मगोष्ठीष्वनुरणन्वचः । अवदत्स्फुरदप्यन्तर्विटानां नाम लाघवम् ॥३२७५॥ 3275
एवं शुद्धानुभावस्य तस्य कृत्येन कृत्यवित् । पुत्रेभ्योप्यधिकां प्रीतिं खिद्यन्भेजे[1] क्रमान्नृपः ॥३२७६॥
कलिकालमहीपालदुस्तरः सिंहभूभुजा । सोयं गोत्रपरित्राणे नवः सेतुः प्रवर्तितः ॥३२७७॥
इत्थं विद्रावितांशेषोपद्रवस्त्रिल्लकस्ततः । अभि--[1]मपि स्वास्थ्य--[2] भूभृदचिन्तयत् ॥३२७८॥
असौ हि निर्हिमोर्वीभृन्मार्गे काले पलायनम् । शाठ्यं सत्त्वस्य दुःसाध्यं बद्धं ध्यायन्व्यलम्बत ॥३२७९॥
अतः सुमेधा यात्रायां यावत्क्षणमपेक्षत । सञ्जपालिनाविचारात्तावत्प्रारम्भि धावनम् ॥३२८०॥ 3280
अल्पाधिष्ठानसुभटः स देवसरसोद्भटैः । बहुभिः सहितः सैन्यैर्मार्ताण्डे विदधे पदम् ॥३२८१॥
निर्निरोधप्रवेशः स प्रदेशः परिपन्थिनाम् । बाह्याश्च योधा निःसारा दर्पान्नेति विवेद सः ॥३२८२॥
त्रिल्लकानुचरा युद्धमसंनिहितसायकाः । तेन सार्धं विदधिरे न चाहीयन्त पौरुषम् ॥३२८३॥
निःसीम[1]सैन्यसहितो लवन्योन्यत्र डामरे । तत्र सर्वाभिसारेण धावतो युयुधे क्रुधा ॥३२८४॥
लुण्ठितद्रविणापूर्णास्ते देवसरसौकसः । सर्वे ततः सञ्जपालं विद्रुताः परिजह्रिरे[1] ॥३२८५॥ 3285
द्विषत्संवर्तवर्षार्त्या सर्वत्र त्रुटितेभवन् । अधिष्ठान[1]भटा एव कुलशैला इवोद्धताः[2] ॥३२८६॥
ते तीक्ष्णतीक्ष्णतरणौ सोढारातिरुषश्चिरम् । बहून्[1]निहतवन्तोन्यांस्तत्र तत्राहवे हताः ॥३२८७॥
[1]क्षतेषु युधि सर्वेषु विन्दानैर्मण्डलं निजैः । शूरेषु तत्र मार्ताण्डोप्यासीदविरलव्रणः[1] ॥३२८८॥
रराजाजौ साञ्जपालि[1]र्गयापालो[2] हतेषु यः । त्रिषु वाजिषु[3] चातुर्यात्पदातिर्नोपलक्षितः ॥३२८९॥

---

३२६६. 1) Thus A; C supplements °सत्त्वदानाद्यैः स्वं व्य°. ३२६७. 1) Thus A; possible emendations would be विडम्बकात्प्रभोः or विगर्हकात्प्रभोः; C विचारकात्प्रभोः. ३२६९. 1) Thus A; C प्राप्तोऽस्याव°.—2) Emended; A गच्छच्छ-ङ्कां. ३२७१. 1) Emended with C; A °गहने. ३२७२. 1) Conjectural reading; A प्रार्थन-दरात्स्वयम्; C °प्रार्थनः स दरात्स्वयम्. ३२७३. 1) Thus A; C अनाप्तसमये तस्य न ययुः पथि रक्षिणः. ३२७४. 1)—1) Written by A$_5$ on new paper. ३३७६. 1) Emended with C; A भोजे. ३२७८. 1) Thus A; C अभिप्रेषमपि स्वास्थ्यहेतुं भू°. ३२८४. 1) Emended with C; A निःसीमः सै°. ३२८५. 1) Emended; A °जम्रिरे. ३२८६. 1) Thus corr. by a later hand from A$_1$ अधिष्ठाने भटा.—2) Emended with C; A इवेद्धताः. ३२८७. 1) Emended with C; A बहूनिह°. ३२८८. 1)—1) Written by A$_5$ on new paper. ३२८९. 1) Emended; A सञ्जपालि°.—2) Emended; A गयपालः; cf. viii. 3322.—3) Emended; A वाजिष्मचा°; C वाजिष्वचा°.

3290 तत्प्राथम्योपलब्धाजिर्जर्जरतदनुजः शिशुः । निनाय विस्मयं वीरान्दृष्टा[1]संख्यमहाहवान् ||३२९०||
दक्षिणं दोर्न तच्चक्रे यद्वामं कम्पनापतेः । महेभांस्तापयत्यर्कः कुर्याद्भ्रमरदान्विधुः ||३२९१||
स धावन्वाजिनाराजदेकदोःस्फुरितायुधः । सधूमदण्डो[1] दावाग्निः सपक्षेद्राविव[2] स्थितः ||३२९२||
तं वैरितुमुले बाणव्रणभङ्गेष्वसौ पुनः । पृष्ठादलोठयद्वाजी ‿ ‿ न्[1]वबद्धपद्धतिः ||३२९३||
वर्मगौरवभूपृष्ठकाठिन्याघातपीडितः । स विसंज्ञो द्विषन्मध्यात्तनयाभ्यां विनिर्हृतः ||३२९४||
3295 कटके सर्वतो नष्टे मार्ताण्डप्राङ्गणान्तरे । विरोध्यसाक्षि क्षिप्त्वा तं तावपासरतां ततः ||३२९५||
तत्रस्थं ‿ ‿[1]ना क्ष्माभृत्प्रस्थितः पृथुलैर्बलैः । तावद्भिः प्राप्यमप्याशु डामरं पिण्डितं व्यधात् ||३२९६||
क्ष्मापाले विजयक्षेत्रं प्राप्ते त्रोटितवेष्टनः । सज्जपालो लवन्यस्य वसतीर्निरदाहयत् ||३२९७||
स तादृगपि भूपाले क्रुद्धे[1] वक्रीकृतभ्रुवि । अदरिद्रो गिरिद्रोणीश्रेणिभूसु[2]लभाशनः ||३२९८||
संवृत्तो निःसहायश्च परिग्रहबहिष्कृतः । आपत्सुलभपाण्डित्यभृत्योपालम्भभाजनम् ||३२९९||
3300 निकृत्तकरशाखोथ क्ष्मापकोपकपेर्व्यधात् । निरालम्भतया ‿ ‿[1] स स्वशीर्षफलार्थनाम् ||३३००||
रड्डादेवीतनूजानां ज्यायांसं गुल्हणाभिधम् । श्रीमांल्लो[1]हरराज्येथ क्ष्मावृ[2]षा सोभ्यषेचयत्[2] ||३३०१||
षट्[1]सप्तहायनो[1] राजतनयः स वयोधिका[1]न् । चूताङ्कुरो जीर्णतरुनिवेशानज[1]यद्गुणैः ||३३०२||
अभिषेक्तुं सुतं देव्या यातायाः क्ष्माभुजो व्यधुः । शिरःशोणाश्मकिरणैश्चरणौ यावकारुणौ ||३३०३||
तत्राभिषिक्ते वसुधामुग्रावग्रहशोषिताम् । देवीभावाभिषेकार्थमिवासिञ्चन्पयोमुचः ||३३०४||
3305 भूयोपि राजवदनो विप्लवोत्पादनोत्सुकः । अमन्दमवचस्कन्द जयचन्द्रं नृपाज्ञया ||३३०५||
नागभ्रातृव्यसहिता गार्गैरनुप्रवेशिनः । पश्चात्प्रसर्पिणीः सेनाः सोवधीत्संकटेध्वनि ||३३०६||
गार्गिः परिभवम्लानाननं तिष्ठन्दिनैस्ततः । नागभ्रातृसुताग्रण्य[1]मवधाल्लोष्ठकं[2] मृधे ||३३०७||
दुर्गमत्वादनाक्रान्तमन्यैर्वेगात्प्रविश्य च । दग्ध्वा च[1] दिन्नाग्रामं स निरगाल्लघुविक्रमः ||३३०८||
तथापि राजवदनो न शौर्यात्पर्यहीयत । न संदधे न चुक्रोध शक्यमस्य विनिर्गमम् ||३३०९||
3310 अहन्यहनि हीनाभिः सेनाभिर्न्यपतन्नृपे । जयचन्द्रमुखाच्छश्वदसुखान्यवधीभवत्[1] ||३३१०||
क्ष्मानायकोथ निःसीमनखबाहुप्रसारणः । रणान्तरेव तं तीक्ष्णैर्गूढन्यस्तैरघातयत् ||३३११||
तन्मुण्डगण्डलेखेन लुठता खण्डशः कृतः । झटिति त्रुटितः स्वास्थ्यविटप्यं[1]कुरणोन्मुखः ||३३१२||
पृथ्वीहरकुलाच्छेदस्वच्छद्मा मेदिनीपतिः[1] । अवधील्लोठनम[2]पि छन्न[3]दण्डप्रयुक्तिभिः ||३३१३||
एकवारं वेष्टितोपि रक्षितस्तिलकेन सः । भूमिभृन्नीतिपाशस्य निपातेनाभ्यवर्तत[1] ||३३१४||
3315 मल्लकोष्ठक्षुरजय्यसड्डु[1]चन्द्रादयोभवन् । जीवन्मृताश्च शान्ताश्च दारिद्र्योपप्लवार्दिताः ||३३१५||-

३२९०. [1]) Emended with C; A °न्दृष्टसङ्ख्य°. ३२९२. [1]) Emended with C; A °दण्डं.—[2]) Emended with C; A °द्राविव. ३२९३. [1]) Thus A; C तदन्वाबद्ध°. ३२९६. [1]) Thus A; C कम्पनाक्ष्मा°. ३२९८. [1]) Emended with C; A क्रुद्धो.—[2]) Emended with C; A °श्रेण‿सुल°. ३३००. [1]) Thus A; C supplements तस्य. ३३०१. [1]) Emended; A श्रीमाल्लो°.—[2])—[2]) Written by $A_5$ on new paper. ३३०२. [1])—[1]) Written by $A_5$ on new paper. ३३०७. [1]) Emended with C; A °सुताग्रन्यामव°.—[2]) Comp. viii. 2996. ३३०८. [1]) Emended; A स. ३३१०. [1]) Doubtful; thus C; A °खान्यवववधीभवद्. ३३१२. [1]) Conjectural reading; A °विर्यास्यङ्कुरो°; C °विवास्यंकुरणो°. ३३१३. [1]) Emended with C; A °पतेः.—[2]) Comp. regarding this name the note to viii. 2496.—[3]) Emended; A च्छच्चद°. ३३१४. [1]) Emended with C; A °भ्यवर्तितता. ३३१५. [1]) Thus A; misread °मड्डुचन्द्रा° in R C; cf. सड्डुचन्द्रस्य viii. 643.